LXXI
8(b)
1

LXXV
8(b)
IX.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपक्र-
वृत्त्या-

ग-
।

L XXV
8(b)

।
नात्र
वैकायां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

SARASWATI-BHAVANA
BENARES
SANSKRIT LIBRARY
1 Acc 24
PRINCESS OF WALES
Saraswati Bhawan Library
BENARES.
LXXV 8(67)

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाटशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 97. Benares, June 1st, 1874. Vol. IX.

काशिकायाः

प्रथमाध्यायस्य तृतीयः पादः

निसमुपविभ्यो ह्वः ॥ ३० ॥

अकर्मकादिति निवृत्तम् । अतः परं सामान्येनात्मनेपदविधानं प्रतिपत्तव्यम् । नि सम् उप वि इत्येवंपूर्वाद् ह्वयतेर्ह्वोतेरात्मनेपदं भवति । निह्वयते । संह्वयते । उपह्वयते । विह्वयते । अकर्त्रभिप्रायार्थोयमारम्भः । अन्यत्र हि त्रित्वात्सिद्धमेवात्मनेपदम् । उपसर्गादस्त्यूह्योर्वा वचनम् ॥ * ॥ निरस्यति । निरस्यते । समूहते । समूहति ॥

स्पर्द्धायामाङः ॥ ३१ ॥

अकर्त्रभिप्रायार्थोयमारम्भः । स्पर्द्धायां विषये आङ्पूर्वाद् ह्वयतेरात्मनेपदं भवति । स्पर्द्धा संघर्षः पराभिभवेच्छा स विषयो धात्वर्थस्य । धातुस्तु शब्दक्रिय एव । मल्लो मल्लमाह्वयते । छात्रश्छात्रमाह्वयते । स्पर्द्धमानस्तस्याह्वानं करोतीत्यर्थः । स्पर्द्धायामिति किम् । गामाह्वयति गोपालः ॥

गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगेषु कृञः ॥ ३२ ॥

र्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायारम्भः । गन्धनादिष्वर्थेषु वर्त्तमानात्करोतेरात्मनेपदं भवधनमपकारप्रयुक्तं हिंसात्मकं सूचनम् । तथाहि, वस्त वे, अर्द्द हिंसायाम्, इति चुरादौ पठ्यते । अवक्षेपणं भवनमनुवृत्तिः । साहसिक्यं साहसिकं कर्म्म । प्रतिणान्तराधानम् । प्रकथनं प्रकर्षेण कथनम् । उपयोगो धर्म्मादिप्रयोजनो विनियोगः । गन्धने तावत् । उत्कुरुते उदाकुरुते । सूचयतीत्यर्थः । अवक्षेपणे । श्येनो वर्त्तिकामुदाकुरुते । भर्त्सयतीत्यर्थः । सेवने । गणकानुपकुरुते । महामात्रानुपकुरुते । सेवतइत्यर्थः । साहसिक्ये । परदारान्प्रकुरुते । तेषु सहसा प्रवर्त्ततइत्यर्थः । प्रतियत्ने । एधो दकस्योपस्कुरुते । काण्डं गुडस्योपस्कुरुते । तस्य सतो गुणान्तराधानं करोतीत्यर्थः । षष्ठीसुटौ करोतेः प्रतियत्नएव विधीयेते * । प्रकथने । गाथाः प्रकुरुते । जनापवादान्प्रकुरुते । प्रकर्षेण कथयतीत्यर्थः । उपयोगे । शतं प्रकुरुते । सहस्रं प्रकुरुते । धर्म्मार्थं शतं विनियुङ्क्तइत्यर्थः । एतेष्विति किम् । कटं करोति ॥

अधेः प्रसहने ॥ ३३ ॥

अकर्त्रभिप्रायार्थोऽयमारम्भः । अधिपूर्वात् करोतेः प्रसहने वर्त्तमानादात्मनेपदं भवति । प्रसहनमभिभवः, अपराजयो वा । तमधिचक्रे । तमभिबभूव, न तेन पराजित, इति वा । प्रसहनइति किम् । अर्थमधिकरोति । पृथग्योगकरणमुपसर्गविशेषणार्थम् ॥

वेः शब्दकर्म्मणः ॥ ३४ ॥

कृञ इत्यनुवर्त्तते । विपूर्वात्करोतेरकर्त्रभिप्राये क्रियाफले शब्दकर्म्मण आत्मनेपदं भवति । कर्मशब्द इह कारकाभिधायी न क्रियावचनः । क्रोष्टा विकुरुते स्वरान् । ध्वाङ्क्षो विकुरुते स्वरान् । शब्दकर्म्मण इति किम् । विकरोति पयः ॥

अकर्म्मकाच्च ॥ ३५ ॥

वेः कृञ इत्यनुवर्त्तते । विपूर्वात्करोतेरकर्म्मकादकर्म्मकक्रि

* कृञः प्रतियत्नइति षष्ठी । उपात्प्रतियत्नेति सुडिति कुत्र चित्पाठः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यावचनादात्मनेपदं भवति। विकुर्वन्ते सैन्यवाः। साधुदान्ताः शोभनं वल्गन्तीत्यर्थः। ओदनस्य पूर्णाश्छात्रा विकुर्वते। निष्फलं चेष्टन्तइत्यर्थः॥

संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥ ३६॥

णीञ् प्रापणे ऽस्मात् कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम्। अकर्त्रभिप्रायार्थोयमारम्भः। णीञ् प्रापणे इत्येतस्माद्धातोरात्मनेपदं भवति सम्माननादिषु विशेषणेषु सत्सु। संमाननं पूजनम्। नयते चार्वीं लोकायते। चार्वी बुद्धिः तत्संबन्धादाचार्योपि चार्वी, सलोकायते शास्त्रे पदार्थान्नयते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति, ते युक्तिभिः स्थाप्यमानाः संमानिताः पूजिता भवन्ति। उत्सञ्जनमुत्क्षेपणम्। माणवकमुदानयते। उत्क्षिपतीत्यर्थः। आचार्यकरणमाचार्यक्रिया, माणवकमीदृशेन विधिना ऽऽत्मसमीपं प्रापयति यथा स उपनेता स्वयमाचार्यः संपद्यते। माणवकमुपनयते। आत्मानमाचार्यीकुर्वन्माणवकमात्मसमीपं प्रापयतीत्यर्थः। ज्ञानं प्रमेयनिश्चयः। नयते चार्वीं लोकायते। तत्र प्रमेयं निश्चिनोतीत्यर्थः। भृतिर्वेतनम्। कर्मकरानुपनयते। भृतिदानेन समीपं करोतीत्यर्थः। विगणनमृणादेर्निर्यातनम्। मूलं विनयन्ते। निर्यातयन्तीत्यर्थः। व्ययो धर्म्मादिषु विनियोगः। शतं विनयते। सहस्रं विनयते। धर्मादावर्थं शतं विनियुङ्क्तइत्यर्थः। एतेष्विति किम्। अजां नयति ग्रामम्॥

कर्तृस्थे चाशरीरे कर्म्मणि॥ ३७॥

नयतेः कर्त्ता देवदत्तादिर्लकारवाच्यः कर्तृस्थे कर्म्मण्यशरीरे सति नयतेरात्मनेपदं भवति। शरीरं प्राणिकायः तदेकदेशोपि शरीरम्। क्रोधं विनयते। मन्युं विनयते। कर्तृस्थइति किम्। देवदत्तो यज्ञदत्तस्य क्रोधं विनयति। अशरीरइति किम्। गडुं विनयति। शाटं विनयति। कर्म्मणीति किम्। बुद्ध्या विनयति। प्रज्ञया विनयति॥

वृत्तिसर्गतायनेषु क्रमः॥ ३८॥

शेषात्कर्त्तरि परस्मैपदे प्राप्ते वृत्त्यादिष्वर्थेषु क्रमेर्धातोरात्मनेपदं भवति। वृत्तिरप्रतिबन्धः। सर्गं उत्साहः। तायनं स्फीतता। वृत्तौ तावत्। चक्षुस्त्य क्रमते बुद्धिः। न प्रतिहन्यतइत्यर्थः। यजुःष्वस्य क्रमते बुद्धिः। सर्गे। व्याकरणाध्ययनाय ते। उत्सहतइत्यर्थः। तायने। अस्मिन् शास्त्राणि क्रमन्ते। स्फीभवन्तीत्यर्थः। एतेष्विति किम्। अपक्रामति॥

उपपराभ्याम्॥ ३९॥

वृत्तिसर्गतायनेष्विति वर्त्तते। उपपराभ्यां पूर्वात्क्रमतेर्वृत्त्यादिष्वर्थेषु वर्त्तमानादात्मनेपदं भवति। किमर्थं तर्हीदमुच्यते, उपसर्गनियमार्थं सोपसर्गादुपपराभ्यामेवेति नान्यपूर्वादिति। मते। पराक्रमते। उपपराभ्यामिति किम्। संक्रामति। दिग्विजयेत्येव। उपक्रामति। पराक्रामति॥

आङ उद्गमने॥ ४०॥

आङ्पूर्वात् क्रमतेरुद्गमने वर्त्तमानादात्मनेपदं भवति। आक्रमतआदित्यः। आक्रमते चन्द्रमाः। आक्रमन्ते ज्योतींषि उद्गमनइति किम्। आक्रामति माणवकः कुतपम्। ज्योतिरुद्गमनइति वक्तव्यम्॥ * ॥ इह मा भूत्। आक्रामति धूमो हर्म्यतलात्॥

वेः पादविहरणे॥ ४१॥

विपूर्वात्क्रमतेः पादविहरणेर्थे वर्त्तमानादात्मनेपदं भवति। विहरणं विक्षेपः। सुष्ठु विक्रमते। साधु विक्रमते। अश्वादीनां गतिविशेषो विक्रमणमुच्यते। यद्यपि क्रमिः पादविहरणएव पठ्यते क्रमुपादविक्षेपइति तथाप्यनेकार्थत्वाद्धातूनामेवमुक्तम्। पादविहरणइति किम्। विक्रामत्यजिनसन्धिः॥

प्रोपाभ्यां समर्थाभ्याम्॥ ४२॥

प्र उप इत्येताभ्यां परस्मात् क्रमतेरात्मनेपदं भवति, तौ चेत् प्रोपौ समर्थौ तुल्यार्थौ भवतः। क्व चानयोस्तुल्यार्थता, आदिकर्म्मणि। प्रक्रमते भोक्तुम्। उपक्रमते भोक्तुम्। समर्थाभ्यामिति किम्। पूर्वेद्युः प्रक्रामति। गच्छतीत्यर्थः। अपरेद्युरुपक्रामति। आगच्छतीत्यर्थः। अथोपपराभ्यामित्यनेनात्मनेपदमत्र कस्माच्च भवति, वृत्त्यादिग्रहणं तत्रानुवर्त्तते, ततोऽन्यत्रेदं प्रत्युदाहरणम्॥

अनुपसर्गाद्वा॥ ४३॥

क्रम इति वर्त्तते। अप्राप्तविभाषेयम्। उपसर्गवियुक्तात् क्रमतेरात्मनेपदं वा भवति। क्रमते। क्रामति। अनुपसर्गादिति किम्। संक्रामति॥

अपह्नवे ज्ञः॥ ४४॥

शेषात्कर्त्तरि परस्मैपदे प्राप्ते जानातेरपह्नवे वर्त्तमानादात्मनेपदं भवति। अपह्नवो ऽपह्नुतिरपलापः। सोपसर्गश्चायमपह्नवे वर्त्तते न केवलः। शतमपजानीते। सहस्रमपजानीते। अपलपतीत्यर्थः। अपह्नवइति किम्। न त्वं किंचिदपि नासि॥

अकर्म्मकाच्च॥ ४५॥

अकर्त्रभिप्रायार्थमिदं, कर्त्रभिप्राये ह्यनुपसर्गाज्ज्ञ इत्यति। जानातेरकर्मकादकर्म्मकक्रियावचनादात्मनेसर्पिषो जानीते। मधुनो जानीते। कथं चायमकसर्पिरादि ज्ञेयत्वेन विवक्षितं, किं तर्हि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रवृत्तौ करणत्वेन, तथा च "ज्ञो ऽविदर्थस्य करणे" इति षष्ठी विधीयते । सर्पिषो जानीते । मधुनो जानीते । सर्पिषा उपायेन प्रवर्त्ततइत्यर्थः । अकर्मकादिति किम् । स्वरेण पुत्रं जानाति ॥

संप्रतिभ्यामनाध्याने ॥ ४६ ॥

ज्ञ इति वर्त्तते । सकर्मकार्थमिदम् । सं प्रति इत्येवंपूर्वाज्जानातेरनाध्याने वर्त्तमानादात्मनेपदं भवति । आध्यानमुत्कण्ठास्मरणम् । शतं संजानीते । सहस्रं संजानीते । शतं प्रतिजानीते । सहस्रं प्रतिजानीते । अनाध्याने इति किम् । मातुः संजानाति । पितुः संजानाति । उत्कण्ठतइत्यर्थः ॥

भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः ॥ ४७ ॥

शेषात्कर्त्तरि परस्मैपदे प्राप्ते भासनादिषु विशेषणेषु सत्सु वदतेरात्मनेपदं भवति । भासनं दीप्तिः । वदते चार्वी लोकायते । भासमानो दीप्यमानस्तत्र पदार्थान् व्यक्तीकरोतीत्यर्थः । उपसंभाषा उपसान्त्वनम् । कर्मकरानुपवदते । उपसान्त्वयतीत्यर्थः । ज्ञानं सम्यगवबोधः । वदते चार्वी लोकायते । जानाति वदितुमित्यर्थः । यत्न उत्साहः । क्षेत्रे वदते । गेहे वदते । तद्विषयमुत्साहमाविष्करोतीत्यर्थः । विमतिर्नानामतिः । क्षेत्रे विवदन्ते । गेहे विवदन्ते । विमतिपतिता विचित्रं भाषन्त इत्यर्थः । उपमन्त्रणं रहस्युपच्छन्दनम् । कुलभार्यामुपवदते । परदारानुपवदते । छन्दयतीत्यर्थः । एतेष्विति किम् । यत्किं चिद्वदति ॥

व्यक्तवाचां समुच्चारणे ॥ ४८ ॥

वद इति वर्त्तते । व्यक्तवाचां समुच्चारणं सहोच्चारणं तत्र वर्त्तमानाद्वदतेरात्मनेपदं भवति । ननु वद व्यक्तायां वाचीत्येव पठ्यते तत्र किं व्यक्तवाचामिति विशेषणेन । प्रसिद्ध्युपसंग्रहार्थमेतत् । व्यक्तवाच इति हि मनुष्याः प्रसिद्धाः तेषां समुच्चारणे यथा स्यात् । संप्रवदन्ते ब्राह्मणाः । संप्रवदन्ते क्षत्रियाः । व्यक्तवाचामिति किम् । संप्रवदन्ति कुक्कुटाः । समुच्चारणइति किम् । ब्राह्मणो वदति । क्षत्रियो वदति ॥

अनोरकर्मकात् ॥ ४९ ॥

वद इति व्यक्तवाचामिति च वर्त्तते । अनुपूर्वाद्वदतेरकर्मकाद्व्यक्तवाग्विषयादात्मनेपदं भवति । अनुवदते कठः कलापस्य । अनुवदते मौदः पैप्पलादस्य । अनुः सादृश्ये । यथा कलापोधीयाना वदति तथा कठ इत्यर्थः । अकर्मकादिति किम् । पूर्वमेव यजुरुदितमनुवदति । व्यक्तवाचामित्येव । अनुवदति वीणा ॥

विभाषा विप्रलापे ॥ ५० ॥

वद इति वर्त्तते । व्यक्तवाचां समुच्चारण इति च । विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्त्तमानाद्वदतेरात्मनेपदं भवति विभाषा । प्राप्तविभाषेयम् । विप्रवदन्ते सांवत्सराः । विप्रवदन्ति सांवत्सराः । विप्रवदन्ते मौहूर्त्ताः । विप्रवदन्ति मौहूर्त्ताः । युगपत्परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः । विप्रलापइति किम् । संप्रवदन्ते ब्राह्मणाः । व्यक्तवाचामित्येव । विप्रवदन्ति शकुनयः । समुच्चारणइत्येव । क्रमेण मौहूर्त्ता मौहूर्त्तेन सह विप्रवदन्ति ॥

अवाद्गः ॥ ५१ ॥

गृ निगरणइति तुदादौ पठ्यते तस्येदं ग्रहणं, न तु गृ शब्दइति क्र्यादिपठितस्य । तस्य ह्यवपूर्वस्य प्रयोग एव नास्ति । शेषादिति परस्मैपदे प्राप्ते । अवपूर्वाद्गिरतेरात्मनेपदं भवति । अवगिरते । अवगिरेते । अवगिरन्ते । अवादिति किम् । गिरति ॥

समः प्रतिज्ञाने ॥ ५२ ॥

ग इति वर्त्तते । संपूर्वाद्गिरतेः प्रतिज्ञाने वर्त्तमानादात्मनेपदं भवति । प्रतिज्ञानमभ्युपगमः । शतं संगिरते । नित्यं शब्दं संगिरते । प्रतिज्ञानइति किम् । संगिरति यासम् ॥

उदश्वरः सकर्मकात् ॥ ५३ ॥

शेषात्कर्त्तरि परस्मैपदे प्राप्ते उत्पूर्वाच्चरतेः सकर्मकक्रियावचनादात्मनेपदं भवति । गेहमुच्चरते । कुटुम्बमुच्चरते । गुरुवचनमुच्चरते । उत्क्रम्य गच्छतीत्यर्थः । सकर्मकादिति किम् । बाष्पमुच्चरति ॥

समस्तृतीयायुक्तात् ॥ ५४ ॥

संपूर्वाच्चरतेस्तृतीयायुक्तादात्मनेपदं भवति । तृतीयेति तृतीया विभक्तिर्गृह्यते तया चरतेरर्थद्वारकोयोगः । अश्वेन संचरते । तृतीयायुक्तादिति किम् । उभौ लोकौ संचरसि इमं चामुं च देवल । यद्यप्यत्र तदर्थयोगः संभवति तृतीया तु न श्रूयतइति प्रत्युदाहरणं भवति ॥

दाणश्च सा चेच्चतुर्थ्यर्थे ॥ ५५ ॥

दाण् दाने परस्मैपदी ततः संपूर्वात्तृतीयायुक्तादात्मनेपदं भवति सा चेत्तृतीया चतुर्थ्यर्थे भवति । कथं पुनस्तृतीया चतुर्थ्यर्थे स्यात् । वक्तव्यमेवैतत् । अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम् ॥ * ॥ दास्या संप्रयच्छते । वृषल्या संप्रयच्छते । कामुकः सन् दास्यै ददातीत्यर्थः । चतुर्थ्यर्थेइति किम् । पाणिना संप्रयच्छति । समः प्रशब्देन व्यवधाने कथमात्मनेपदं भवति । सम इति विशेषणे षष्ठी न पञ्चमी ॥

उपाद्यमः स्वकरणे ॥ ५६ ॥

शेषात्कर्त्तरि परस्मैपदे प्राप्ते उपपूर्वाद् यमः स्वकरणे वर्त्तमानादात्मनेपदं भवति । पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते न स्वकरणमात्रम् । भार्यामुपयच्छते । स्वकरणइति किम् । देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञाश्रुस्मृदृशां सनः ॥ ५७ ॥

ज्ञा श्रु स्मृ दृश् इत्येतेषां सन्नन्तानामात्मनेपदं भवति । तत्र ज्ञानातेरपह्नवेज्ञ इति त्रिभिः सूत्रैरात्मनेपदं विहितं श्रुदृशोरपि समो गम्यृच्छीत्यत्र विहितं तस्मिन्विषये पूर्ववत्सन इत्येव सिद्धमात्मनेपदं ततो ऽन्यत्रानेन विधीयते । स्मरतेः पुनरप्राप्तएव विधानम् । धर्म्मं जिज्ञासते । गुरुं शुश्रूषते । नष्टं सुस्मूर्षते । नृपं दिदृक्षते । सन इति किम् । जानाति । शृणोति । स्मरति । पश्यति ॥

नानोर्ज्ञः ॥ ५८ ॥

पूर्वेण योगेन प्राप्तमात्मनेपदं प्रतिषिध्यते । अनुपूर्व्वाज्ज्ञानातेः सन्नन्तादात्मनेपदं न भवति । तथा च सति सकर्मकस्यैवायं प्रतिषेधः संपद्यते । पुत्रमनुजिज्ञासति । अनोरिति किम् । धर्म्मं जिज्ञासते ॥

प्रत्याङ्भ्यां श्रुवः ॥ ५९ ॥

प्रति आङ् इत्येवंपूर्वाच्छृणोतेः सन्नन्तादात्मनेपदं न भवति । प्रतिशुश्रूषति । आशुश्रूषति । उपसर्गग्रहणं चेदं, तस्मादिह प्रतिषेधो न भवति । देवदत्तं प्रति शुश्रूषते ॥

शदेः शितः ॥ ६० ॥

शदॢ शातने परस्मैपदी तस्मादात्मनेपदं विधीयते । शदिर्यः शिद्भावी शितो वा संबन्धी तस्मादात्मनेपदं भवति । शीयते । शीयेते । शीयन्ते । शित इति किम् । अशत्सयत् । शत्स्यति । शिशत्सति ॥

म्रियतेर्लुङ्लिङोश्च ॥ ६१ ॥

मृङ् प्राणत्यागे । ङित्त्वादात्मनेपदमत्र सिद्धमेवेति नियमार्थमिदं वचनम् । म्रियतेर्लुङ् लिङोः शितश्चात्मनेपदं भवति अन्यत्र न भवति । अमृत । मृषीष्ट । शितः खल्वपि । म्रियते । म्रियेते । म्रियन्ते । नियमः किमर्थः । मरिष्यति । अमरिष्यत् ॥

पूर्ववत्सनः ॥ ६२ ॥

सनः पूर्वो यो धातुः आत्मनेपदी तद्वत्सन्नन्तादात्मनेपदं भवति । येन निमित्तेन पूर्वस्मादात्मनेपदं विधीयते तेनैव सन्नन्तादपि भवति । अनुदात्तङित आत्मनेपदम् । आस्ते । शेते । सन्नन्तादपि तदेव निमित्तम् । आसिसिषते । शिशयिषते । नेर्विशः । निविशते । निविविक्षते । आङ उद्गमने । आक्रमते । आचिक्रंसते । इह न भवति । शिशत्सति । मुमूर्षति । नहि शदिम्रियतिमात्रमात्मनेपदनिमित्तं किं तर्हि शिदाद्यपि तच्चेह नास्ति । यस्य च पूर्वेणैव निमित्तभावः प्रतिषिध्यते तत्सन्नन्तेष्वनिमित्तम् । अनुचिकीर्षते । पराचिकीर्षते । इह जुगुप्सते मीमांसते इति अनुदात्तेत इत्येव सिद्धमात्मनेपदमवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति ॥

आम्प्रत्ययवत्कृञोनुप्रयोगस्य ॥ ६३ ॥

अकर्त्रभिप्रायार्थोयमारम्भः । आम् प्रत्ययो यस्मात्सोयमाम्प्रत्ययः आम्प्रत्ययस्येव धातोः कृञो ऽनुप्रयोगस्यात्मनेपदं भवति । ईक्षांचक्रे । ईक्षांचक्रे । यदि विध्यर्थमेतत् तर्हि उदुब्जांचकार उदुम्भांचकारेति कर्त्रभिप्राये क्रियाफले आत्मनेपदं प्राप्नोति । नैष दोषः । उभयमनेन क्रियते । विधिर्नियमश्च । कथम् । पूर्ववदिति वर्त्तते । स द्वितीयो यत्नो नियमार्थो भविष्यति । कृञ इति किम् । ईक्षामास । ईक्षांबभूव । कथं पुनरस्यानुप्रयोगो यावता कृञ्वानुप्रयुज्यते लिटीत्युच्यते । कृ ञिति प्रत्याहारग्रहणं तत्र विज्ञायते । कृ संनिविष्टानां प्रत्याहारः । अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि च्विरितिकृशब्दादारभ्य यावत् कृञो द्वितीयतृतीयेति ञकारः ॥

प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ ६४ ॥

युजिर् योगे स्वरितेत् तस्य कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोयमारम्भः । प्र उप इत्येवंपूर्वाद् युजेरयज्ञपात्रप्रयोगविषयादात्मनेपदं भवति । प्रयुङ्क्ते । उपयुङ्क्ते । अयज्ञपात्रेष्विति किम् । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति । स्वराद्यन्तोपसृष्टादिति वक्तव्यम् ॥ * ॥ उद्युङ्क्ते । नियुङ्क्ते । स्वराद्यन्तोपसृष्टादिति किम् । संयुनक्ति ॥

समः क्ष्णुवः ॥ ६५ ॥

ष्णु तेजने परस्मैपदी ततः संपूर्वादात्मनेपदं भवति । समो गम्यृच्छि इत्यत्रैव कस्माच्च पठितः । अकर्म्मकादिति वर्त्तते । संक्ष्णुते शस्त्रम् । संक्ष्णुवाते । संक्ष्णुवते ॥

भुजो ऽनवने ॥ ६६ ॥

भुज पालनाभ्यवहारयोरिति रुधादौ पठ्यते । तस्मादनवने ऽपालने वर्त्तमानादात्मनेपदं भवति । भुङ्क्ते । भुञ्जाते । भुञ्जते । अनवन इति किम् । भुनक्त्येनमग्निरोहितः । अनवनप्रतिषेधेन रौधादिकस्यैव ग्रहणं विज्ञायते न तौदादिकस्य भुजो कौटिल्यइत्यस्य । तेनेह न भवति । विभुञ्जति पाणिम् ॥

णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने ॥ ६७ ॥

णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थोयमारम्भः । एयन्तादात्मनेपदं भवति, कथम्, अणौ यत्कर्म णौ चेत्तदेव कर्म, स एव कर्त्ता भवति । अनाध्याने, आध्यानं वर्जयित्वा । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयते हस्ती स्वयमेव । उपसिञ्चन्ति हस्तिनं हस्तिपकाः । उपसेचयते हस्ती स्वयमेव । पश्यन्ति भृत्या राजानम् । दर्शयते राजा स्वयमेव । णेरिति किम् । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयमाणो हस्ती साध्वारोहति । अणा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दापवाक्रेम् । गणयति गणं गोपालकः । गणयति गणः स्वयश्चित्तवर्त्मग्रहणं किम् । लुनाति दात्रेण । लावयति दात्रं देवदत्तः । णौ चेद्ग्रहणं समानक्रियार्थम् । आरोहन्ति हस्तिनं देवदत्तम् । । आरोहयमाणो हस्ती भीतान् सेचयति मू इति के चित्ग्रहणमनन्यकर्मार्थम् । आरोहन्ति हस्तिनं ह प्रतिषेधोपि प्रत्यारोहयमाणो हस्ती स्थलमारोहयति मनुपरस्मैपदेनैव भा किम् । आरोहन्ति हस्तिनं हस्तिपकाः । तानारोहयोतार्याहामात्रः । अनाध्यानइति किम् । स्मरति वनगुल्मस्य कोकिलः । स्मरयत्येनं वनगुल्मः स्वयमेव । ननु चात्र कर्मकर्त्तरि मूलोदाहरणानि तत्र कर्मवद्भावेनैव सिद्धमात्मनेपदं किमर्थमिदमुच्यते । कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवदतिदेशो विज्ञायते । कर्तृस्थार्थोयमारम्भः । तथा च रुहिः कर्तृस्थक्रियः दृशिः कर्तृस्थभावक उदाहृतः ॥

भीस्म्योर्हेतुभये ॥ ६८ ॥

णेरिति वर्त्तते । अकर्त्रभिप्रायार्थोयमारम्भः । बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये । हेतुः प्रयोजकः कर्त्ता लकारवाच्यस्ततश्चेद्भयं भवति । भयग्रहणमुपलक्षणार्थं विस्मयोपि तत एव । जटिलो भीषयते । मुण्डो भीषयते । जटिलो विस्मापयते । मुण्डो विस्मापयते । हेतुभयइति किम् । कुञ्चिकयैनं भापयति । रूपेण विस्माययति । अत्र कुञ्चिका भयस्य करणं न हेतुः ॥

गृधिवञ्च्योः प्रलम्भने ॥ ६९ ॥

णेरिति वर्तते । अकर्त्रभिप्रायार्थो ऽयमारम्भः । गृधु अभिकाङ्क्षायां वञ्चु गतावित्येतयोर्ण्यन्तयोः प्रलम्भने वर्त्तमानयोरात्मनेपदं भवति । प्रलम्भनं विसंवादनं मिथ्याफलाख्यानम् । माणवकं गर्धयते । माणवकं वञ्चयते । प्रलम्भनइति किम् । श्वानं गर्धयति । गर्धनमस्योत्पादयतीत्यर्थः । अहिं वञ्चयति । परिहरतीत्यर्थः ॥

लियः संमाननशालीनीकरणयोश्च ॥ ७० ॥

णेरिति वर्त्तते । अकर्त्रभिप्रायार्थोयमारम्भः । लीङ् श्लेषणे इति दिवादौ पठ्यते । ली श्लेषणे इति च क्र्यादौ । विशेषाभावाद् द्वयोरपि ग्रहणम् । लियो ण्यन्तात्संमानने शालीनीकरणे च वर्त्तमानादात्मनेपदं भवति च शब्दात् प्रलम्भने च । संमाननं पूजनम् । शालीनीकरणं न्यग्भावनम् । जटाभिरालापयते । पूजां समधिगच्छतीत्यर्थः । श्येनो वर्त्तिकामुल्लापयते । न्यक्करोतीत्यर्थः । प्रलम्भने । कस्त्वामुल्लापयते । विसंवादयतीत्यर्थः । विभाषा लीयतेरिति वात्वं विधीयते । तदस्मिन्विषये नित्यमन्यत्र विकल्पः । व्यवस्थितविभाषा हि सा । संमाननादिष्विति किम् । बालकमुल्लापयति ॥

मिथ्योपपदात्कृञोभ्यासे ॥ ७१ ॥

णेरिति वर्त्तते । अकर्त्रभिप्रायार्थोयमारम्भः । ण्यन्तात्करोतेर्मिथ्योपपदादात्मनेपदं भवति अभ्यासे । अभ्यासः पुनःपुनः करणमावृत्तिः । पदं मिथ्या कारयते । सापचारं स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः । मिथ्योपपदादिति किम् । पदं सुष्ठु कारयति । कृञ इति किम् । पदं मिथ्या वाचयति । अभ्यासइति किम् । पदं मिथ्या कारयति । सकृदुच्चारयति ॥

स्वरितञितः कर्त्रभिप्राये क्रियाफले ॥ ७२ ॥

णेरिति निवृत्तम् । शेषात्कर्त्तरि परस्मैपदे प्राप्ते स्वरितेतो ये धातवो ञितश्च तेभ्य आत्मनेपदं भवति कर्त्तारं चेत्क्रियाफलमभिप्रैति क्रियायाः फलं क्रियाफलं प्रधानभूतं यदर्थमसौ क्रिया आरभ्यते तच्चेत्कर्त्तुर्लकारवाच्यस्य भवति । यजते । पचते । ञितः खल्वपि । सुनुते । कुरुते । स्वर्गादि प्रधानफलमिह कर्त्तारमभिप्रैति । कर्त्रभिप्रायइति किम् । यजन्ति याजकाः । पचन्ति पाचकाः । कुर्वन्ति कर्म्मकराः । यद्यपि दक्षिणा भृतिश्च कर्त्तुः फलमिहास्ति तथापि न तदर्थः क्रियारम्भः ॥

अपाद्वदः ॥ ७३ ॥

कर्त्रभिप्रायइति वर्त्तते । अपपूर्वाद्वदतेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । धनकामो न्यायमपवदते । न्यायापवादेन धनमर्जयिष्यामि इति मन्यते । कर्त्रभिप्राये क्रियाफलइत्येव । अपवदति ॥

णिचश्च ॥ ७४ ॥

कर्त्रभिप्राये क्रियाफलइति वर्त्तते । णिजन्तादात्मनेपदं भवति कर्त्रभिप्राये क्रियाफले । कटं कारयते । ओदनं पाचयते । कर्त्रभिप्रायइत्येव । कटं कारयति परस्य ॥

समुदाङ्भ्यो यमो ऽग्रन्थे ॥ ७५ ॥

कर्त्रभिप्रायइति वर्त्तते । सम् उद् आङ् इत्येवंपूर्वाद्यमेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति ग्रन्थविषयश्चेत्प्रयोगो न भवति । व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । आङ्पूर्वादकर्म्मकादाङो यमहन इति सिद्धमेवात्मनेपदं सकर्मकार्थमिदं पुनर्ग्रहणम् । अग्रन्थइति किम् । उद्यच्छति चिकित्सां वैद्यः । कर्त्रभिप्रायइत्येव । संयच्छति । उद्यच्छति । आयच्छति ॥

अनुपसर्गाज् ज्ञः ॥ ७६ ॥

कर्त्रभिप्रायइति वर्त्तते । अनुपसर्गाज्जानातेः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति । गां जानीते । अश्वं जानीते । अनुपसर्गादिति किम् । स्वर्गं लोकं न प्रजानाति मूढः । कर्त्रभिप्रायइत्येव । देवदत्तस्य गां जानाति ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विभाषेापपदेन प्रतीयमाने ॥ ७७ ॥

स्वरितञित इति पञ्चभिः सूत्रैरात्मनेपदं कर्त्रभिप्राये क्रियाफले द्योतिते विहितं तदुपपदेन द्योतिते न प्राप्नोतीति वचनमारभ्यते । समीपे श्रूयमाणं शब्दान्तरमुपपदं तेन प्रतीयमाने कर्त्रभिप्राये क्रियाफले विभाषा ऽऽत्मनेपदं भवति । स्वं यज्ञं यजति । स्वं यज्ञं यजते । स्वं कटं करोति । स्वं कटं कुरुते । स्वं पुत्रमपवदति । स्वं पुत्रमपवदते । एवं पञ्चसूत्र्यामुदाहार्यम् ॥

शेषात्कर्त्तरि परस्मैपदम् ॥ ७८ ॥

पूर्वेण प्रकरणेनात्मनेपदनियमः कृतः न परस्मैपदनियमः तत्सर्वतः प्राप्नोति तदर्थमिदमुच्यते । येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदमुक्तं ततो यदन्यत्स शेषः । शेषात्कर्त्तरि परस्मैपदं भवति शेषादेव नान्यस्मात् । अनुदात्तङित आत्मनेपदमुक्तम् । आस्ते । शेते । ततो ऽन्यत्र परस्मैपदं भवति । याति । वाति । नेर्विश आत्मनेपदमुक्तम् । निविशते । ततो ऽन्यत्र परस्मैपदम् । आविशति । प्रविशति । कर्त्तरीति किम् । पच्यते । गम्यते । कर्मकर्त्तरि कस्मात्परस्मैपदं न भवति । पच्यते ओदनः स्वयमेव । कर्त्तरि कर्मव्यतिहारइति द्वितीयं कर्तृग्रहणमनुवर्त्तते तेन कर्त्तैव यः कर्त्ता तत्र परस्मैपदं कर्मकर्त्तरि न भवति ॥

अनुपराभ्यां कृञः ॥ ७९ ॥

कर्त्रभिप्राये क्रियाफले गन्धनादिषु च करोतेरात्मनेपदं विहितं तदपवादः परस्मैपदं विधीयते । अनु परा इत्येवंपूर्वात्करोतेः परस्मैपदं भवति । अनुकरोति । पराकरोति ॥

अभिप्रत्यतिभ्यः क्षिपः ॥ ८० ॥

क्षिप प्रेरणे स्वरितेत् ततः कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । अभि प्रति अति इत्येवंपूर्वात् क्षिपः परस्मैपदं भवति । अभिक्षिपति । प्रतिक्षिपति । अतिक्षिपति । अभिप्रत्यतिभ्य इति किम् । आक्षिपते । द्वितीयमपि कर्तृग्रहणमनुवर्त्तते । तेनेह न भवति । अभिक्षिप्यते स्वयमेव ॥

प्राद्वहः ॥ ८१ ॥

वह प्रापणे स्वरितेत् तत्र कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । प्रपूर्वाद्वहतेः परस्मैपदं भवति । प्रवहति । प्रवहतः । प्रवहन्ति । प्रादिति किम् । आवहते ॥

परेर्मृषः ॥ ८२ ॥

मृष तितिक्षायां स्वरितेत् ततस्तथैवात्मनेपदे प्राप्ते परस्मैपदं विधीयते । परिपूर्वाद् मृष्यतेः परस्मैपदं भवति । परिमृष्यति । परिमृष्यतः । परिमृष्यन्ति । परेरिति किम् । आमृष्यते । वहतिमपि के चिदत्रानुवर्त्तयन्ति । परि

व्याङ्परिभ्यो रमः ॥ ८३ ॥

रमु क्रीडायाम् । अनुदात्तेत्त्वादात्मनेपदे प्राप्ते विधीयते । वि आङ् परि इत्येवंपूर्वाद्रमतेः परस्मै विरमति । आरमति । परिरमति । एतेभ्य अभिरमते ॥

उपाच्च ॥ ८४ ॥

रम इत्येव । उपपूर्वाद्रमतेः परस्मैपदं भवति । देवदत्तमुपरमति । यज्ञदत्तमुपरमति । उपरमयतीति यावत् । अन्तर्भावितण्यर्थाच्च रमिः । पृथग्योगकरणमुत्तरार्थम् । अकर्मकाद्विभाषां वक्ष्यति सा उपपूर्वादेव यथा स्यात् ॥

विभाषा ऽकर्मकात् ॥ ८५ ॥

रम उपादिति च वर्त्तते । पूर्वेण नित्ये परस्मैपदे प्राप्ते विकल्प आरभ्यते । उपपूर्वाद्रमतेरकर्मकाद्विभाषा परस्मैपदं भवति । यावद्भुक्तमुपरमति । यावद्भुक्तमुपरमते । निवर्तत इत्यर्थः ॥

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ ८६ ॥

णिच्श्चेति कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते । बुध युध नश जन इङ् प्रु द्रु स्रु इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । बोधयति । योधयति । नाशयति । जनयति । अध्यापयति । प्रावयति । द्रावयति । स्रावयति । ये ऽत्राकर्मकास्तेषामणावकर्मकाच्चित्तवत्कर्तृकादित्येवं सिद्धे वचनमिदमचित्तवत्कर्तृकार्थम् । बोधयति पद्मम् । योधयन्ति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् । ये ऽत्र चलनार्था अपि तेषां निगरणचलनार्थेभ्यश्चेति सिद्धे यदा न चलनार्थास्तदर्थं वचनम् । प्रवते । प्राप्नोतीति गम्यते । अयो द्रवति । विलीयतइत्यर्थः । कुण्डिका स्रवति । स्यन्दतइत्यर्थः । तद्विषयाण्युदाहरणानि ॥

निगरणचलनार्थेभ्यश्च ॥ ८७ ॥

णेरिति वर्त्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विधीयते । निगरणमभ्यवहारः । चलनं कम्पनम् । निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति । निगारयति । आशयति । भोजयति । चलनार्थेभ्यः । चलयति । चोपयति । कम्पयति । अयमपि योगः सकर्मकार्थः । अचित्तवत्कर्तृकार्थश्च । अदेः प्रतिषेधो वक्तव्यः ॥ * ॥ अत्ति देवदत्तः । आदयते देवदत्तेन ॥

अणावकर्मकाच्चित्तवत्कर्तृकात् ॥ ८८ ॥

णेरिति वर्त्तते । कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेप-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दापवादः परस्मैपदं विधीयते । अण्यन्तो यो धातुरकर्मकश्चित्तवत्कर्तृकश्च तस्माद् ण्यन्तात्परस्मैपदं भवति । आस्ते देवदत्तः । आसयति देवदत्तम् । शेते देवदत्तः । शाययति देवदत्तम् । अणाविति किम् । चेतयमानं प्रयोजयति चेतयते इति के चित्प्रत्युदाहरन्ति तदयुक्तम् । हेतुमण्णिचो विधिः प्रतिषेधोपि प्रत्यासत्तेस्तस्यैव न्याय्यः । तस्मादिह चेतयतीति परस्मैपदेनैव भवितव्यम् । इदं तु प्रत्युदाहरणम् । आरोहयमाणं प्रयोजयति । आरोहयते । अकर्मकादिति किम् । कटं कुर्वाणं प्रयोजयति । कारयते । चित्तवत्कर्तृकादिति किम् । शुष्यन्ति व्रीहयः । शोषयते व्रीहीनातपः ॥

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः ॥ ८९ ॥

पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदापवादः परस्मैपदं विहितं तस्य प्रतिषेधोयमुच्यते । यत्कर्त्रभिप्रायविषयमात्मनेपदं तदवस्थितमेव न प्रतिषिध्यते । पादमि आङ्यम आङ्यस परिमुह रुचि नृति वद वस इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न भवति । णिचश्चेत्यात्मनेपदं भवति । तत्र पिबतिर्निगरणार्थः । दमिप्रभृतयश्चित्तवत्कर्तृकाः । नृतिश्चलनार्थोपि । एषां परस्मैपदं न भवति । पा । पाययते । दमि । दमयते । आङ्यम । आयामयते । यमोऽपरिवेषणे इति मित्संज्ञा प्रतिषिध्यते । आङ्यस । आयासयते । परिमुह । परिमोहयते । रुचि । रोचयते । नृति । नर्त्तयते । वद । वादयते । वस । वासयते । पाविषु धेट उपसंख्यानम् ॥ * ॥ धापयेते शिशुमेकं समीची ॥

वा क्यषः ॥ ९० ॥

लोहितादिडाभ्यः क्यषिति वक्ष्यति तदन्ताद्धातोर्वा परस्मैपदं भवति * । लोहितायति । लोहितायते । पटपटायति । पटपटायते । अथात्र परस्मैपदेन मुक्ते कथमात्मनेपदं लभ्यते । यावता ऽनुदात्तङित इत्येवमादिना प्रकरणेन तच्चियतम् । एवं तर्हि आत्मनेपदमेवात्र विकल्पितं विधीयते, तच्चानन्तरं परस्मैपदप्रतिषेधेन सन्निधापितमिह संबध्यते । तेन मुक्ते शेषात्कर्त्तरि परस्मैपदं भवति ॥

द्युद्भ्यो लुङि ॥ ९१ ॥

वेत्येव । द्युत दीप्तौ तत्साहचर्याद् लुठादयोपि क्रूपर्यन्तास्तथैव व्यपदिश्यन्ते । बहुवचननिर्द्देशादाद्यर्थो भवति । अनुदात्तेत्त्वाच्चित्यमेवात्मनेपदे प्राप्ते द्युतादिभ्यो लुङि वा परस्मैपदं भवति । व्यद्युतत् । व्यद्योतिष्ट । अलुठत् । अलोठिष्ट । लुङीति किम् । द्योतते ॥

वृद्भ्यः स्यसनोः ॥ ९२ ॥

द्युतादिष्वेव वृतादयः पठ्यन्ते । वृतु वर्त्तने । वृधु वृद्धौ । शृधु शब्दकुत्सायाम् । स्यन्दू प्रस्रवणे । क्रूपू सामर्थ्ये । एतेभ्यो धातुभ्यः स्ये सनि च परतो वा परस्मैपदं भवति । वृत् । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । वर्त्तिष्यते । अवर्त्तिष्यत । विवर्त्तिषते । वृध् । वर्त्स्यति । अवर्त्स्यत् । विवृत्सति । वर्द्धिष्यते । अवर्द्धिष्यत । विवर्द्धिषते । स्यसनोरिति किम् । वर्त्तते ॥

लुटि च क्रूपः ॥ ९३ ॥

वृतादित्वादेव स्यसनोर्विकल्पः सिद्धः । लुटि विधीयते । चकारस्तर्हि स्यसनोरनुकर्षणार्थो न वक्तव्यः । एवं तर्हीयं प्राप्तिः पूर्वां प्राप्तिं बाधेत । तस्माच्चकारः स्यसनोरनुकर्षणार्थः क्रियते । लुटि च स्यसनोश्च क्रूपेः परस्मैपदं वा भवति । कल्प्ता । कल्प्तारौ । कल्प्तारः । कल्प्स्यति । अकल्प्स्यत् । चिक्रूप्सति । कल्पिता । कल्पिष्यते । अकल्पिष्यत । चिक्लृप्सते * ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमस्याध्यायस्य तृतीयः पादः ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ तृतीयाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

तदेवं जन्ममरणादिदुःखनिलयत्वरूपप्रपञ्चदोषोक्त्या ब्रह्मणो हेयसंबन्धरहितत्वकल्याणगुणसागरत्वनिरूपणेन तस्यैव सर्वफलदायित्वनिरूपणेन च तत्तृष्णैव तदितरवितृष्णापूर्विका तत्प्राप्तिकारणमिति पादद्वयेन दर्शितम् ।

इदानीं ब्रह्मोपासनाः, तासु गुणोपसंहारविकल्पनिर्णयाय विद्याः, भेदाभेदविचारश्च प्रारभ्यते । ताश्च त्रिविधाः । प्रतीकरूपाङ्गाश्रितरूपाहंग्रहरूपभेदात् । तत्र प्रतीकत्वं नाम तदितरस्मिंस्तद्दृष्टिमत्त्वम् । यथा "पुरुषो वाव गौतमाग्नि"रित्यत्राग्निभिन्ने पुरुषादौ ह्यग्निदृष्टिरिति । एवमादिप्रतीकोपासनोदाहरणं बोध्यम् । अङ्गाश्रिताः, कर्माङ्गोपकारीत्यादिष्वाश्रिताः । अहंग्रहत्वं नाम तत्तदुपदेशानुकूले ब्रह्मणि तादात्म्यसंबन्धानुसंधानम् । यथा सत्यविद्यादयः । "ऐतदात्म्यमिदं सर्वं","तत् सत्यं","स आत्मा","तत् त्वमसी"त्यादिश्रुतेः । ताश्चोद्गीथविद्या,शाण्डिल्यविद्या, पुरुषविद्या, दहरविद्यादय एकैका अनेकशाखासु पठिताः । तासु चेतरेतरं गुणानामुपसंहारं कृत्वोपासनीयम् । तत्र गुणोपसंहारो नाम

---

* शेषाठिति नित्ये प्राप्ते विकल्पार्थं वचनमित्यपि क्व चित्पाठः ।

* यत्र परस्मैपदं तत्र तासि च क्रूप इतीट् प्रतिषेधः । यत्रात्मनेपदं तत्रेड् भवत्येवेत्यपि क्व चित्पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एकस्यामनेकशाखासु पठितायां विद्यायां तत्र तत्र पठितानां गुणानां न्यूनाधिकानामितरेतरं निष्कृष्य संयोजनम् । यथा वाजसनेयकेऽग्निरहस्ये शाण्डिल्यविद्या श्रूयते । "सत्यं ब्रह्मेत्युपासीत", "अथ खलु क्रतुमयोऽयं पुरुष" इत्यारभ्य, "आत्मानमुपासीत", "मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशात्मान"मिति । तथा बृहदारण्यकेऽपि शाण्डिल्यविद्या श्रूयते । "मनोमयः पुरुषो भाः सत्यं तस्मिन् यदन्तर्हृदये यथा व्रीहिर्वा यवो वा स एव सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ती"ति । उभयत्र वेद्याऽभेदाद्विद्यैक्यं निश्चित्य सत्यसंकल्पत्वादीनां सर्ववशित्वादीनां चोभयत्रेतरेतरोपसंहरणम् । एवमन्यत्रापि बोध्यम् ।

किंच, आनन्दादीनामपहतपाप्मत्वादीनामस्थूलत्वादीनां च सर्वास्वपि विद्यासूपसंहारः, "सर्वे चोभयविधस्य ब्रह्मणो वेद्यस्याभेदा"दिति स्पष्टयिष्यते । अथ तत्र तावत् सर्ववेदान्तेषु दहरादिविद्या श्रूयते । सा किमेका, उत विद्याभेद, इति संशये, अविशेषेण पुनः श्रवणस्य प्रकरणान्तरस्य च विद्याभेदकत्वाद्विद्यान्तरमिति । अत एव शिरोव्रतनामाथर्वणिकानां विद्योतः । अन्यथा विद्याङ्गस्य शिरोव्रतस्यान्यशाखिनामपि प्राप्तत्वादाथर्वणिकानामेवेति नियमानुपपत्तिरिति प्राप्तेऽभिधीयते । "सर्ववेदान्तप्रत्यय"मिति । सर्वैर्वेदान्तैः प्रतीयत इति सर्ववेदान्तप्रत्ययं, सर्ववेदान्तविहितमेकमुपासनम् । कुतः । चोदनाद्यविशेषात् । विद्यादुपासीतेत्येवंरूपो धात्वर्थविशेषो विधिश्चोदना । आदिना पूर्वतन्त्रे शाखान्तराधिकरणसिद्धान्तसूत्रोक्ताः संयोगरूपाख्या ग्रहाकृष्यन्ते । चोदनादीनामविशेषात् प्रतिपत्तृभेदेन पुनः श्रवणोपपत्तेः, तत एव प्रकरणान्तरत्वाभावाच्च, सैवेयं विद्येति ॥ १ ॥

शाखान्तरेऽपि विद्यैक्यं प्रत्यभिज्ञायते ॥

॥ भेदान्नेति चेदेकस्यामपि ॥ २ ॥

अविशेषेण पुनरुक्तेः प्रकरणान्तराच्च विधेयभेदप्रतीतेर्न विद्यैक्यमिति चेत्, तत्रोच्यते । स्यादेकस्यामपि विद्यायां प्रतिपत्तृभेदात् पुनरुक्तिः प्रकरणान्तरं च । यस्याः शाखाया अन्येऽध्येतारस्तेषां प्रतिपत्त्यर्थं सैव विद्या पुनः श्राव्यते । एकस्यां तु शाखायां प्रतिपत्तृभेदे प्रतिप्रकरणं विद्याभेदः । वाक्यानां परस्परं निराकाङ्क्षत्वात् । यथा शाण्डिल्यविद्योपकोशलविद्या सद्विद्या भूमविद्या दहरविद्येति ॥ २ ॥

यद्यप्याथर्वणे शिरोव्रतं, "तेषामेवैतां ब्रह्मविद्यां वदेत, शिरोव्रतं विधिवद्यैस्तु चीर्ण"मिति, तदपि न विद्याभेदकमित्याह ॥

स्वाध्यायस्य तथात्वे हि समाचा-
रेऽधिकाराच्च सरवच्च तन्नियमः ॥ ३ ॥

शिरोव्रतस्य विद्योपदेशाङ्गत्वनियमदर्शनं विद्याभेदं द्योतयतीति, नैतदस्ति । तस्य विद्याङ्गत्वाभावात् । अपितु स्वाध्यायस्य वेदस्य हि यत्तस्तथात्वेऽध्ययनाङ्गत्वे तन्नियमः शिरोव्रतोपदेशनियमः । निमित्ते सप्तमी । तदङ्गतया शिरोव्रतं विधीयते । न विद्याङ्गतयेत्यर्थः । कुत एवमवगम्यते । "नैतदचीर्णव्रतोऽधीयीते"ति तस्याध्ययनसंबन्धात्, समाचारेऽधिकाराच्च । समाचाराख्ये यन्य इदमपि वेदव्रतत्वेन व्याख्यातमिति हि पठ्यते । तत्र ब्रह्मविद्यां वेदविद्यामित्यर्थः । "सरवच्चे"ति । तथाहि, सरा होमाः सप्त सौर्यादयः शतौदनपर्यन्ता आथर्वणिकानामेवैकाग्नौ श्रूयन्ते, नान्येषां, तथाध्ययनधर्मस्तेषामेव ॥ ३ ॥

॥ दर्शयति च ॥ ४ ॥

दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वं, "सर्वे वेदा यत्पदमामनन्ती"ति, तथा च छान्दोग्ये "तस्मिन् यदन्तस्तदन्वेष्टव्य"मित्युक्त्वा किं तदत्र विद्यते यदन्वेष्टव्यमिति प्रश्नपूर्वकमपहतपाप्मत्वादिगुणाष्टकविशिष्टस्य परमात्मन उपासनमुक्तम् । तैत्तिरीयके तु केवलं "तस्मिन् यदन्तस्तदुपासितव्य"मित्येवोक्तम् । तदुभयत्र गुणोपसंहारादेव विद्यैक्यं संभवति ॥ ४ ॥

तदेवं विद्यासु गुणोपसंहारादिचिन्तार्थं शाखान्तराधिकरणोक्तन्यायस्तत्फलं च विद्यैक्यं स्थिरीकृतम् । तत्प्रयोजनमाह ॥

॥ उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥ ५ ॥

चशब्दोऽवधारणे सर्ववेदान्तेषु दहराद्युपासने समाने सत्येकस्यां शाखायामुक्तस्य गुणस्यान्ययाप्युपसंहारः कर्तव्यः । कुतः । विधिशेषवदर्थाभेदात् । अर्थः प्रयोजनं, यथा प्रयोजनाभेदादग्निहोत्रादिविधिशेषस्य सर्वत्रोपसंहारस्तद्वदिहापि ॥ ५ ॥

॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

"अथ हैममास्यं प्राणमूचुस्त्वं न उद्गायेति, तथेति तेभ्य एष प्राण उदगाय"दिति वाजसनेयिनः समामनन्ति । छान्दोगाः पुनर्"य ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे"इति । तत्र संशयः । किमत्र विद्यैक्यमुत विद्याभेद इति । तत्र तावत् प्राप्तं विद्यैक्यमिति । कुतः । उभयत्रोद्गीथस्यैव प्राणदृष्ट्योपास्यत्वश्रवणेन चोदनाद्यविशेषात् । तथाहि, चोदना तावद्विदिधात्वर्थगताविशिष्टा । फलसंयोगोऽपि शत्रुपरिभवरूपोऽविशिष्टः । रूपमपि प्राणदृष्ट्योद्गीथाख्योपास्यैक्यादविशिष्टम् । आख्या चोद्गीथविद्येत्यविशिष्टा । पूर्वपक्षी सिद्धान्तेच्छायया परचोद्यं परिहरति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ननु चान्यथात्वं नानात्वं विद्यायाः । कुतः । शब्दात् । "त्वं न उद्गायेति कर्तृत्वं प्राणस्य वाजिभिर्निर्दिश्यते । अन्यत्र कर्मत्वं, "तमुद्गीथ"मिति । एवं चैकत्र कर्तरि प्राणदृष्टिशब्दादन्यत्र कर्मणि प्राणदृष्टिशब्दाच्च रूपभेदः । रूपभेदे च विधेयभेदः । तत्र सति केवलचोदनाद्यविशेषोऽकिंचित्कर इति विद्याभेद इति चेत्, तत्र न रूपभेद इत्यर्थः । कुतः । अविशेषात् । उपक्रमेऽविशेषेण "उद्गीथेनात्ययाम उद्गीथमाजह्रुरनेनैवाभिहनिष्याम"इत्युद्गीथस्यैवोपास्यत्वप्रतीतेः । "त्वं न उद्गायेति तथेति तेभ्य एष उदगाय"दिति कर्मण्येवोद्गीथे कर्तृत्वमुपचर्यत इति युक्तम् । अन्यथोपक्रमविरोधः स्यात् ॥ ६ ॥

अतो विद्यैक्यमिति प्राप्त आह ॥

॥ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥ ७ ॥

नवेति पक्षव्यावृत्त्यर्थः । नचैतदस्ति,यदूपैक्याद्विद्यैक्यमिति । कुतः । प्रकरणभेदात्, प्रक्रमभेदादित्यर्थः । तथाहि, छान्दोग्ये तावत्,"ओमित्येतदक्षरमुद्गीथमुपासीते" त्युद्गीथावयवं प्रणवमुपास्यं प्रक्रम्य, "उद्गीथमाजह्रु"रिति वचनादुद्गीथावयवभूतः प्रणवः प्राणदृष्टेर्विषयः । उक्तवाजसनेयके त्व-"विशेषेणोद्गीथेनात्ययाम"इत्युपक्रमात् क्रत्वोद्गीथः प्राणदृष्टेर्विषयः । अतः प्रक्रमभेदाद्विधेयभेदः, विधेयभेदे च रूपभेदः, तस्माच्च विद्याभेद इति ।

नच वाक्यच्छायासमानतामात्रेणैकविद्यात्वम् । यथा निर्देशसाम्येऽप्यभ्युदयेष्टिपशुकामेष्ट्योर्भेदः, प्रक्रमभेदात्, तथा प्रकृतेऽपि निर्देशसाम्यं न विद्यैक्यप्रयोजकमिति । "परोवरीयस्त्वादिवत्" । परस्मात् परो वराच्च वरीयानुद्गीथस्तस्य भावस्तत्त्वं, तदादिवत् । अथैकस्यामपि शाखायामुद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येऽपि हिरण्मयपुरुषदृष्टिविधानात् परोवरीयस्त्वादिगुणविशिष्टविधानमर्थान्तरमिति रूपभेदः । तद्वदत्रापि ॥ ७ ॥

॥ संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

उद्गीथविद्येति संज्ञैकत्वात् तद्विद्यैक्यमिति चेत्,उक्तं तदपि । "न वा प्रकरणभेदा"दित्यनेन । प्रकरणभेदात् संज्ञाया दुर्बलत्वात् ।

अपिच,एतत्संज्ञैकत्वं विधेयभेदेऽप्यस्त्येव । यथाग्निहोत्रसंज्ञा नित्याग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे च । यथा च छान्दोग्ये प्रथमप्रपाठकोदितासु बह्वीषु विद्यासूद्गीथविद्येति संज्ञैक्यम् ॥ ८ ॥

॥ व्याप्तेश्च समञ्जसम् ॥ ९ ॥

छान्दोग्ये प्रथमप्रपाठक उपास्यत्वेन प्रथमं प्रस्तुतस्योद्गीथावयवस्य प्रणवस्योत्तरास्वप्युद्गीथविद्यासूपास्यत्वेन व्याप्तेश्च मध्यगतस्य "तद्व देवा उद्गीथमाजह्रु"रित्युद्गीथशब्दस्यापि प्रणवविषयत्वं समञ्जसम् । अयमेव हि समुदायशब्दो यावो दग्धः पटो दग्ध इत्यादौ दृश्यते । एवं च छान्दोग्य उद्गीथशब्दनिर्दिष्ट उद्गीथावयवभूतः प्रणव एवोपास्यत्वेन प्रतिपत्तव्यः । वाजसनेयके तूद्गीथशब्दः क्रत्वोद्गीथविषय इति क्रत्वोद्गीथः प्राणदृष्ट्योपास्य इति सिद्धो विद्याभेदः ॥ ९ ॥

॥ सर्वाभेदादन्यत्रेमे ॥ १० ॥

छन्दोगानां वाजसनेयिनां च प्राणसंवादे ज्यैष्ठ्यश्रैष्ठ्यगुणान्वितं प्राणमुपास्यतया प्रतिपाद्य वागादीनामपि तत्र वशिष्ठत्वादिगुणानुक्त्वा वागादीनां देहस्य च प्राणाधीनस्थितितया प्राणाधीनकार्यतया च प्राणस्य श्रेष्ठत्वमुक्त्वा वागादिगुणाः प्राणे पुनः प्रत्यर्पिताः । यद्वा, "अहं वशिष्ठोऽस्मि, त्वं तद्वशिष्ठोऽसी"त्यादिना । एवं च तत्र ज्यैष्ठ्यश्रैष्ठ्यगुणको वशिष्ठत्वादिगुणकश्च प्राण उपास्यतया प्रतिपाद्यते । कौषीतकिप्रभृतीनां तु प्राणसंवादे वशिष्ठत्वादयो गुणा उक्ता वागादीनाम् । न पुनः प्राणे समर्पिताः । तत्र संशयः । किं कौषीतकिप्राणविद्यायां प्राणे वशिष्ठत्वादयो गुणा उपसंहर्तव्या उत नेति । किं प्राप्तम् । तत्रानुपसंहारोऽश्रुतत्वादिति प्राप्ते, उच्यते । "सर्वे"ति । अन्यत्र कौषीतकिप्राणविद्यायामपि,इमे वशिष्ठत्वादयो गुणाः प्राण उपादेयाः । कुतः । सर्वाभेदात् । प्राणज्यैष्ठ्यश्रैष्ठ्योपपादनं वागादीनां स्थितेस्तत्कार्यस्य च प्राणाधीनतयेत्येतत् सर्वत्राप्यविशिष्टमेव । अन्यथा वागादिगतवशिष्टत्वादेरपि प्राणहेतुकत्वानुसंधानमन्तरा प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यानुसंधानं नोपपद्यते ।

किंच, कौषीतके प्राणविद्यायामपि प्राणज्यैष्ठ्यादिप्रतिपादनायैव वागादिषु वशिष्ठत्वादय उक्ताः । "अथ हेमा देवताः प्रजापतिं पितरमेत्याब्रुवन्, को वै नः श्रेष्ठ इति, स होवाच प्रजापतिर्यस्मिन् व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठ"इत्यादिना । वागादयस्तद्गतगुणाश्च देहश्च प्राणाधीना इति ज्यैष्ठ्यं श्रैष्ठ्यं च प्राणस्योपपादितम् । यतो वागादिवशिष्ठत्वादिहेतुत्वरूपेणैव प्राणे वशिष्ठत्वादिगुणयोगित्वमित्यतः प्राणेऽपि त उपसंहर्तव्या एवेति ॥ १० ॥

॥ आनन्दादयः प्रधानस्य ॥ ११ ॥

आनन्दत्वसर्वज्ञत्वसर्वात्मत्वज्ञानानन्तत्वरूपा ब्रह्मस्वरूपगुणा ब्रह्मस्वरूपपरासु श्रुतिषु श्रूयन्ते । तत्र संशयः । किं तेषां सर्वासु ब्रह्मोपासनासूपसंहारोऽस्ति,उत नेति !

तत्र प्रकरणपठितानामेवोपसंहारदर्शनादप्रकरणपठितानामुपसंहारे प्रमाणाभावात् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किंच, तेषामसंख्येयत्वेनोपसंहाराशक्तेश्च नोपसंहर्तव्या इति प्राप्त आह । "आनन्दादय" इति । सर्वाभेदादित्यनुवर्तते । प्रधानस्य ब्रह्मणः सर्वत्राभेदाद् गुण्यव्यतिरेकाद्गुणानां सर्वत्रानन्दादयस्तद्गुणा उपसंहर्तव्याः । यत्र प्रधानं तत्रैव तैर्भवितव्यमिति भावः ॥ ११ ॥

नन्वेवं गुण्यव्यतिरेकादेवानन्दादिवत् प्रियशिरस्त्वादयोऽपि धर्माः सर्वे सर्वत्र प्रसज्येरन् । ते हि तैत्तिरीयके, आनन्दमयप्रक्रमे श्रूयन्ते, "तस्य प्रियमेव शिरो मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्ष आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठे"त्यत उत्तरमाह ॥

॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

आनन्दादिवत् प्रियशिरस्त्वादीनामप्राप्तिः । ते हि न ब्रह्मस्वरूपगुणाः किंतु ब्रह्मणः पुरुषविधत्वरूपणमात्रेऽन्तर्गताः । कुतः । यतो ब्रह्मणः शिरःपक्षपुच्छाद्यवयवभेदे सत्युपचयापचयौ स्याताम् । ततश्च "सत्यं ज्ञानमनन्तं ब्रह्म", "अनन्तोऽजर" इत्यादि विरुध्येत ॥ १२ ॥

तेभ्य आनन्दादीनां विशेषमाह ॥

॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे त्वानन्दादयः सर्वत्र स्युः । कुतः । अर्थसामान्यात् । ब्रह्मस्वरूपसमानत्वात् । ब्रह्मस्वरूपवत् सर्वत्रोपसंहार्याः । आनन्दाद्यपहतपाप्मत्वाद्यस्थूलत्वादिसत्यज्ञानामलत्वानन्तत्वादयो हि ब्रह्मस्वरूपेण धर्मत्वेन ब्रह्मस्वरूपप्रतीत्यनुबन्धित्वाद् ब्रह्मस्वरूपसमानाः । ये तु वात्सल्यकारुण्यौदार्यैश्वर्यगाम्भीर्यादयः, तेषां गुण्यव्यतिरेकत्वेऽपि ब्रह्मस्वरूपप्रतीत्यनुबन्धित्वाभावाद्यत्र श्रुतास्तत्रैवोपसंहर्तव्या इति प्रथमसूत्रे हेत्वप्रदर्शनादनेन प्रियशिरस्त्वादिवैषम्यार्थं हेतुकथनं कृतमिति न पुनरुक्तता ॥ १३ ॥

प्रियशिरस्त्वादीनां ब्रह्मस्वरूपनिरूपणधर्मत्वाभावाच्च ते ब्रह्मगुणा भवन्ति चेत्, तर्हि तदभिधाने प्रयोजनं वक्तव्यं, तत्राह ॥

॥ आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

आध्यानायानुचिन्तनार्थमुपासनार्थं तेषामभिधानम् । कुतः । प्रयोजनान्तराभावात् । अयमर्थः । "ब्रह्मविदाप्नोति पर"मित्यत्र वेदितव्यतयोपदिष्टमेकं ब्रह्मानन्दमयं सुखप्रतिपत्तये प्रियमोदादिरूपेण विभज्य शिरःपक्षादिभावेन रूपयित्वा बुद्ध्यारोह्यते । यथा ह्यन्नमयप्राणमयमनोमयविज्ञानमयाश्चास्य देहस्य शिरःपक्षादिरूपकेण प्राणाद्यवयवरूपकेण च बुद्ध्यारोह्यन्ते, "तस्येदमेव शिर"इत्यादिना । "तस्य प्राण एव शिर"इत्यादिभिश्च । तथैतेभ्योऽर्थान्तरभूततदन्तरात्मानन्दमयपुरुषस्यापि सम्यग्ध्यानाय प्रियमोदादिरूपकेण बुद्ध्यारोहणमित्यतः प्रियशिरस्त्वादीनामानन्दमयोपलक्षणार्थत्वाच्च ते ब्रह्मस्वरूपप्रतीतादुपसंहार्या इति ॥ १४ ॥

॥ आत्मशब्दाच्च ॥ १५ ॥

"अन्योऽन्तर आत्मानन्दमय"इत्यात्मशब्देन निर्देशाच्च प्रियशिरस्त्वादयो न ब्रह्मस्वरूपधर्माः । आत्मनः पक्षिवच्छिरःपक्षपुच्छाद्यसंभवात् । अतस्तस्य सुखबोधाय रूपकतामात्रं तदिति गम्यते ॥ १५ ॥

ननु प्राणमयादिष्वनात्मस्वपि पूर्वमात्मशब्दप्रयोगात्, "अन्योऽन्तर आत्मानन्दमय"इत्युत्तरवाक्यादात्मशब्दस्य कथं ब्रह्मपरत्वनिश्चय इति चेत् तत्राह ॥

॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

"अन्योऽन्तर आत्मे"त्यात्मशब्देन परमात्मैव गृह्यते । इतरवत् । "आत्मा वा इदमेक एवाग्र आसी"दित्यादिषु ऐतरेयकवाक्येषु यथात्मशब्दः परमात्मानमेव गृह्णाति, तद्वत् । कथमवगम्यते । उत्तरात् । तदैक्यार्थात् । "सोऽकामयत बहु स्या"मित्यानन्दमयात्मविषयादुत्तराद्वाक्यात् ॥ १६ ॥

ननु पूर्वेषु "अन्योऽन्तर आत्मा प्राणमय" इत्यादिवाक्योक्तप्राणमयाद्यनात्मस्वप्यात्मशब्दान्वयदर्शनाच्चोत्तरवाक्यादपि परमात्मा निश्चेतुं शक्यत इत्याशङ्क्याह ॥

॥ अन्वयादिति चेत् स्यादवधारणात् ॥ १७ ॥

पूर्वेष्वनात्मस्वप्यात्मशब्दान्वयाच्चोत्तरवाक्यगतात्मशब्देन परमात्मनिर्णय इति चेत् । स्यादेव निर्णयः । कुतः । अवधारणात् । "तस्माद्वा एतस्मादात्मन आकाशः संभूत"इति प्रकृतस्यात्मन एव प्राणमयादिष्वानन्दमयपर्यन्तेष्वात्मशब्देन निश्चितत्वात् ॥ १७ ॥

॥ कार्याख्यानादपूर्वम् ॥ १८ ॥

छन्दोग्यवाजसनेयकयोर्ज्येष्ठं च प्राणमुपास्यमुक्त्वा तस्यैव श्वादिमर्यादमत्वमाम्नायापो वासस्त्वेनाम्नायन्ते । "सहोवाच, किं मे वासो भविष्यतीत्याह, इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति, लम्बुको ह वासो भवत्यनग्नो भवती"ति छन्दोगाः । वाजसनेयिनस्तु "किं मे वास" इति प्राणेन चोदिता वागादय ऊचु "रापो वास"इति, "तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते, तस्मादेवं विदशिष्यत्वाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते, इत्यामनन्ति । तत्र संशयः । किमत्राचमनमपां प्राणवासस्त्वानुसंधानं चोभयं विधीयते, उताचमनम् । किं वाचमनमनूद्यापां प्राणवासस्त्वानुसंधानमिति । किं तावत् प्राप्तम् । उभयं विधीयत इति । कुतः । उभयस्याप्यत्र श्रूयमाणत्वात् । अपूर्वत्वाच्च विध्यर्हत्वम् । किं वा "अशिष्यत्वा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चामेदशित्वा चाचामे"दित्याचमने विधिश्रवणात्, "एतमेव तदनमनग्नं कुरुते" इत्यपां प्राणवासस्त्वानुसंधाने विधिविभक्त्यश्रवणादाचमनस्यैव स्तुत्यर्थमनग्नतासंकीर्तनमिति । भोजनाङ्गस्याचमनस्य स्मृत्याचारप्राप्तत्वेन विधिविभक्तिबलात् तदेव प्राणविद्याङ्गत्वेनोपदिश्यत इति पूर्वः पक्षः । राद्धान्तस्तु यदपूर्वमप्राप्तं स्मृतितस्तदाचमनीयास्वप्सु वासोदर्शनं विधीयते,न त्वाचमनस्य विधेयत्वमुपपद्यते । कुतः । कार्याख्यानात् । अहरहः कर्तव्याचमनस्य स्मृत्याचारप्राप्तस्य संकीर्तनात् । शास्त्रस्य चाप्राप्ताख्यानस्वरूपत्वादाचमनमनूद्याचमनीयास्वप्सु प्राणवासस्त्वानुसंधानं विधीयत इत्यर्थः ।

न चैकार्थविधाने संभवति प्रायत्यार्थता परिधानार्थता चेत्यर्थद्वयविधानं कल्पयितुं युक्तम् । आचमनस्य क्रियान्तरत्वाङ्गीकारात् । आचमनं हि क्रियान्तरमेव पुरुषस्य प्रायत्यार्थमङ्गीक्रियते,आचमनीयास्वप्सु वासःकल्पनमपि क्रियान्तरमेव प्राणस्य परिधानार्थमङ्गीक्रियत इति । "तदनमनग्नं कुरुत" इति चोपसंहारात् प्राणविद्याप्रकरणार्थपरिधानविधानमेव युक्तम् । अत एव छान्दोग्ये"ऽद्भिः परिदधती"ति परिधानमेवोक्तं, न त्वाचमनम् ।

अपिच, "यदिदं किं चा श्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत् तेऽव"मित्यत्र तावद्दृष्टिविधानं, न हि समस्तप्राणिभक्षणमुपासकेन कर्तुं शक्यते, प्रतिषेधातिक्रमात्, तत्साहचर्यादाचमनेऽपि दृष्टिविधानमिति ॥ १८ ॥

॥ समान एवं चाभेदात् ॥ १९ ॥

वाजसनेयिशाखायामग्निरहस्ये शाण्डिल्यविद्या श्रूयते, "सत्यं ब्रह्मेत्युपासीते"त्यारभ्य, "स आत्मानमुपासीत मनोमय"मित्यादि,तथा तत्रैव बृहदारण्यके पुनरपि सैव श्रूयते । "मनोमयोऽयं पुरुषो भाः सत्य"मित्यादि । तत्र संदिह्यते । किमत्र विद्याभेद उताभेद इति । किं तावत् प्राप्तम् । विद्याभेदः । अभ्यासात् । यथा पञ्चकृत्वोऽभ्यासात् प्रयाजभेदस्तथाचापीति प्राप्ते, उच्यते । विद्याभेदः । कुतः । "समान" इति । समाने शाखैकत्वे वेद्यस्याभेदात् । एवं च गुणोपसंहारः । यथा भिन्नशाखासु विद्यैक्यं गुणोपसंहारश्च भवति, एवमेकस्यामपि भवितुमर्हति । वेद्याभेदात् ।

न च मनोमयादीनां पुनः श्रवणमनर्थकम्, विदितानामेव गुणानां विधानस्य युक्तत्वादिति वाच्यम् । कतिपयविहितगुणसंकीर्तनस्य विद्याप्रत्यभिज्ञानसिद्ध्यर्थत्वात् ॥ १९ ॥

॥ संबन्धादेवमन्यत्रापि ॥ २० ॥

बृहदारण्यक इदमाम्नायते, "सत्यं ब्रह्मे"त्युपक्रम्य "तद्धात् सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुष" इत्यादि । तत्र सत्यब्रह्मणो व्याहृतिशरीरतयादित्यमण्डलेऽक्षिणि चोपास्यत्वमुक्त्वा द्वे उपनिषदौ रहस्यनामनी उपासनशेषतयादिश्येते, "तस्योपनिषदहरित्यधिदैवतं, तस्योपनिषदहमित्यध्यात्म"मिति । तत्र संदिह्यते । किं यत्र श्रुते, तत्रैव नियमेन व्यवस्थिते,उतोभयत्रोभे अनियमेनेति । तत्रोभयोः स्थानयोर्व्याहृतिशरीरस्य सत्यब्रह्मैकरूपस्यैवोपास्यतया रूपाभेदात् संयोगचोदनाद्यभेदाच्च विद्यैक्यमित्यनियते नामनी, इति पूर्वपक्षयति । "संबन्धादेव"मिति । यथा शाण्डिल्यविद्यायां मनोमयत्वादिगुणविशिष्टस्यैवोपास्यत्वेनोभयं यत्र रूपाभेदाद्विद्यैक्यम्, एवमन्यत्रापि मण्डलेऽक्षिणि चैकस्यैव सत्यब्रह्मणः स्थानद्वयसंबन्धात्र रूपभेद इति विद्यैक्याद् द्वे नामनी अनियते ॥ २० ॥

इति प्राप्ते प्रतिविधीयते ॥

॥ न वा विशेषात् ॥ २१ ॥

न वेति पक्षव्यावृत्तिः । न वोभयोरुभयत्रोसंहारः । कुतः । विशेषात्, उपास्यस्थानभेदात् । यथा चाचार्यस्यासीनस्योक्तो धर्मो गच्छतो न भवति, एवं ब्रह्मण एकत्वेऽप्येकत्रादित्यस्थानसंबन्धितयोपास्यत्वमितरत्राक्षिस्थानसंबन्धितयोपास्यत्वमिति स्थानसंबन्धित्वभेदेनोपास्यरूपभेदाद्विद्याभेदेनोपास्यरूपभेदाद्विद्याभेद इति नियते नामनी । शाण्डिल्यविद्यायां तूभयत्र हृदयाधारतयोपास्यत्वात्रोपास्यस्थानं भिद्यते ॥ २१ ॥

॥ दर्शयति च ॥ २२ ॥

दर्शयति च श्रुतिरेवंजातीयकधर्मस्य विद्याभेदेनानुपसंहारं, "तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यद्याम तद्यामे"त्यादिना । अद्यादित्यस्थानभेदादादित्यपुरुषगतं रूपादिकमक्षिपुरुषे स्वतोऽप्राप्तमतिदेशेन प्रापयति । तस्माद्भवतिष्ठेते एवैते नामनी, इति निर्णयः ॥ २२ ॥

॥ संभृतिद्युव्याप्यपि चातः ॥ २३ ॥

"ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माये ज्येष्ठं दिवमाततान ब्रह्म भूतानां प्रथमं नु जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं क"इति तैत्तिरीयके राणायनीखिनेषु च वीर्यसंभृतिद्युव्याप्तिप्रभृति ब्रह्मगुणजातमाम्नायते, तेषामेवोपनिषदि शाण्डिल्यविद्याद्या ब्रह्मविद्याः पठन्ते । तत्र संशयः । तेषां किं तासु सर्वासु विद्यासूपसंहार उत स्थानविशेषोपासनेषु नियम इति । तत्र तेषामुपासनविशेषमधीतानामपि विद्याभेदादुपसंहार इति प्राप्त उच्यते । "संभृतिद्युव्याप्ती"ति । संभृतिश्च द्युव्याप्तिश्चेति समाहार एकवद्भावः । संभृतिद्युव्याप्तिप्रभृति गुणजातं न सर्वासु विद्यासूपसंहार्यम् । कुतः । अत एव स्थानभेदादेव । शाण्डिल्यविद्यायां ब्रह्मणो हृदयमायतनमुक्तम् । "एष म

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आत्मान्तर्हृदय" इति। दहरविद्यायामपि तदेवोक्तम्। "दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश" इति। उपकोशलविद्यायां त्वस्यायतनं "य एषोऽक्षिणि पुरुषो दृश्यत" इति। द्युव्याप्तेर्हि हृदयाद्यल्पस्थानेषूपसंहारायोगात्। तत्साहचर्यात् संभृत्यादयोऽप्यल्पस्थानविषयासु विद्यासु नोपसंहार्या इति। श्रुत्यर्थस्तु वीर्यंति वीर्याणि परमात्मपराक्रमविशेषरूपाणि खादीनि, "सुपां सुलु" गित्यनेन जस आः, कीदृशानि, ब्रह्मैव ज्येष्ठमनन्यापेक्षि कारणं येषां तानि ब्रह्मज्येष्ठानि, अत्रापि जस आत्वम्। तानि च वीर्याणि कारणेन ब्रह्मणा संभृतानि धृतानि पुष्टानि च।

"वासुदेवस्य वीर्येण विधृतानि महात्मनः"।

इत्युक्तेः। तच्च ज्येष्ठं ब्रह्म, अग्रे देवदानवादिजन्मनः प्रागेव दिवं स्वर्गमाततान, व्याप्नुवत्, सर्वा, सर्वव्यापकमित्यर्थः। कथमेतदवगतं तत्राह। भूतानां चतुर्मुखादिप्राणिनां प्रथमं तु पूर्ववर्ति सत्, जज्ञे प्रादुर्बभूव, तेन सर्वकारणेन प्राक्सिद्धेन ब्रह्मणा सह स्पर्धितुं स्पर्धां कर्तुं कोऽवरजन्मा जीवो वृत्तियोग्यो भवति, सर्वस्य तच्छिष्यत्वात्, तद्व्याप्यत्वात्, तदाधेयत्वाच्च, तदेव सर्वोपजीव्यं सर्वपूज्यं चेत्यर्थः॥ २३॥

॥ पुरुषविद्यायामपि चेतरेषामनाम्नानात्॥ २४॥

छान्दोग्ये ताण्डिनां पैङ्गिनां च रहस्यब्राह्मणे पुरुषविद्या श्रूयते, "पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत् प्रातः सवनमथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनमथ यान्यष्टाचत्वारिंशद्वर्षाणि तृतीयं सवन" मित्यादिः। तत्र पुरुषो यज्ञत्वेन कल्पितः, तदीयमायुश्च प्रसिद्धयज्ञसाम्यार्थं सवनत्रयत्वेन कल्पितम्, ऋशिशिषादिकं तु दीक्षादित्वेन कल्पितमित्यादि तत्रैव स्पष्टम्। तैत्तिरीयकेऽपि सा श्रूयते, "तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हि" रित्येवमाद्यनुवाके। तत्र संदिह्यते। किमत्र विद्याभेद उत नेति। तत्र पुरुषविद्येति समाख्याविशेषात् पुरुषावयवेषु यज्ञावयवकल्पनसाम्येन रूपाभेदात् तैत्तिरीयके फलसंबन्धाम्नानाच्छान्दोग्यगतेन "स ह षोडशं वर्षशतं जीव" तीत्यनेनैकफलत्वाच्च विद्यैक्यमिति प्राप्ते राद्धान्तमाह, "पुरुषविद्याया" मिति, पुरुषविद्यायामप्युभयत्र रूपभेदाद्विद्याभेदः। कुतः। इतरेषामनाम्नानात्। इतरशाखोदितानामितरशाखास्वनाम्नानात्। "पुरुषविद्यायामिवे" ति पाठे यद्येकेषां शाखिनां ताण्डिनां पैङ्गिनां च पुरुषविद्यायां यज्ञावयवा आम्नाताः, नैवमितरेषां तैत्तिरीयाणां पुरुषविद्यायां, यथा वा तैत्तिरीयपुरुषविद्यायां यजमानपत्न्यादि सवनत्रयं चाम्नातं, नैवमितरेषां ताण्डिनां च पैङ्गिनां पुरुषविद्यायामित्यर्थः। तथाहि, छान्दोग्ये त्रेधा विभक्तस्य पुरुषायुषः सवनत्वेन कल्पनं, तैत्तिरीयके च "यत् सायं प्रातर्मध्यंदिनं च तानि सवनानी" त्येवं सवनत्रयकल्पनम्। छान्दोग्ये ह्यशिशिषादीनां दीक्षात्रयत्वकल्पनम्, तत् तैत्तिरीयके न श्रुतम्, "आत्मा यजमानः श्रद्धा पत्नी" ति यजमानादिकल्पनं च श्रुतं, तच्छान्दोग्ये न श्रुतम्। फलसंबन्धभेदोऽपि। छान्दोग्ये ह्यायुःप्राप्तिफला पुरुषविद्या, तैत्तिरीयके तु पूर्वानुवाकगतस्य ब्रह्मणो महिमानमाप्नोतीति ब्रह्मविद्याफलस्यैव संनिधानादफलस्यानुवाकस्य ब्रह्मविद्याङ्गतया ब्रह्मप्राप्तिरेव फलम्। अतः सवनत्रयकल्पनप्रकारभेदेन यजमानपत्न्यादिकल्पनप्रकारभेदेन च रूपभेदात् फलसंबन्धभेदाच्च विद्याभेद इति नैकत्रोक्तानां धर्माणामितरत्रोपसंहारः॥ २४॥

॥ वेधाद्यर्थभेदात्॥ २५॥

स्वशाखोक्तगुणविशिष्टस्य ब्रह्मण उपास्यत्वमुक्तम्। अथ तत्रान्येऽपि मन्त्राः कर्माणि च श्रूयन्ते, तेषामपि ब्रह्मोपासनाङ्गत्वमस्ति, न वेति मीमांस्यते। तथाह्याथर्वणिकैरुपनिषदारम्भे मन्त्रा आम्नायन्ते। "अग्ने त्वयातुधानस्य भिन्धि तं प्रत्यञ्चमर्चिषा विध्य मर्मे" ति, "सर्वं प्रविध्य हृदयं प्रविध्य धमनीः प्रवृत्य शिरोऽभिप्रवृत्य त्रिधा विपृक्त" इत्याद्यस्ताण्डिभिः, सामगैरपि रहस्यब्राह्मणारम्भे "देव सवितः प्रसुव यज्ञं प्रसुवे" त्यादिराम्नायते, शाट्यायनिभिश्च "श्वेताश्वो हरितनीलोऽसी" त्यादिः, कठैस्तैत्तिरीयकैश्च "शं नो मित्रः शं वरुण" इत्यादिः, ऐतरेयिभिश्च महाव्रतब्राह्मणं पठ्यते, "इन्द्रो वै वृत्रं हत्वा महानभव" दित्यादि, कौषीतकिभिरपि तदेव पठ्यते "प्रजापतिर्वै संवत्सरस्तस्यैष आत्मा यन्महाव्रत" मित्यादि, वाजसनेयिभिस्तूपनिषदारम्भे प्रवर्ग्यब्राह्मणं पठ्यते "देवा ह वै सत्रं निषेदु" रित्यादि। तत्र संदिह्यते। किमिम उपनिषदारम्भे पठिता मन्त्राः प्रवर्ग्यादीनि च कर्माण्युपासनासु तदङ्गतयोपसंह्रियेरन्नुत नेति। किं तावत् प्राप्तम्। विद्याङ्गतयोपसंह्रियेरन्निति। कुतः। विद्याप्रधानोपनिषद्ग्रन्थानां संनिधौ पाठात्। इति प्राप्त उच्यते। नैषामुपासनासूपसंहारः। कुतः। वेधाद्यर्थभेदात्। भिन्ना हीमेऽर्था वेधादयो न विद्यायामुपयुज्यन्ते। मन्त्रलिङ्गेन त्वभिचारकर्मणि विनियुज्यन्त एव। "शं नो मित्रः शं वरुण" इत्यादिमन्त्रस्यापि "ऋतं वदिष्यामि तेजस्वि नावधीतमस्त्वि" त्यादिमन्त्रलिङ्गेनाध्ययने विनियोगाच्च विद्याङ्गत्वम्।

न च मन्त्राणामन्यथार्थकल्पना युक्ता। समाख्यानात्। संनिधेश्च लिङ्गस्य बलीयस्त्वम्। श्रुत्यादिपूर्वोत्तरस्य दौर्बल्योक्तेः। प्रवर्ग्यं चाग्निष्टोमं चेति युक्तम्। "अग्निष्टोमं प्रवृणक्ती" ति वाक्येनाग्निष्टोमः स्वर्गफलार्थं नित्यार्थं च विनियुक्तः। "स्व-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

र्गकामो यजेत, वसन्ते वसन्त" इति। संनिधिपाठस्त्वरण्येऽनुवचनादिधर्मसामान्यकृतः ॥ २५ ॥

॥ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥

"तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती"त्याथर्वणिकैः। "अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामी"ति ताण्डिभिः। छन्दोगैश्च विदुषो ब्रह्म प्राप्नुवतः पुण्यपापयोर्विमोचनं पठ्यते। "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्या"मिति। शाट्यायनिभिश्च विमुक्तयोः पुण्यपापयोरन्यत्र प्रवेशः पठ्यते। तथा कौषीतकिभिस्तु "तत् सुकृतदुष्कृते विधुनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृत"मित्युभयं पठ्यते। तद्यत्रोभयं हानमुपायनं च पठ्यते तत्र न किंचिदुक्तव्यम्। यत्रोपायनमेव पठ्यते तत्र हानिस्त्वर्थादाक्षिप्यते, अन्यथा तदनुपपत्तेः। उपायनं हि ग्रहणम्। तस्य च त्यागपूर्वकत्वात्। अत्यक्तस्य ग्रहणायोगाच्च। यत्र तु केवलहानिः श्रूयते, तत्रास्ति विचिकित्सा। किं यत्र विद्यायां केवलं हानं श्रूयते, तत्राप्युपायनमुपसंह्रियते, उत नेति। किं तावत् प्राप्तम्। नोपसंह्रियत इति। कुतः। पृथक् पठनसामर्थ्यात्। उपसंहारे हि सर्वयोभयानुसंधानं भवेत्। तस्य च कौषीतकिवाक्येनैव सिद्धत्वादन्यत्राज्ञानस्यानर्थकत्वापत्तेः। इति प्राप्ते तत्रोच्यते। "हाना"विति। तुशब्दः पक्षव्यावृत्त्यर्थः। हानौ केवलायां श्रुतायामुपायनमुपसंह्रियते। कुतः। उपायनशब्दशेषत्वात्। उपायनशब्दस्य हानिवाक्यशेषत्वात्। विदुषा त्यक्तयोः पुण्यपापयोः प्रवेशस्यानवाचित्वादुपायनवाक्यस्य हानिवाक्यशेषत्वम्। कौषीतकिरहस्ये तथावगमात्। शाखान्तराम्नातवाक्यस्य शाखान्तराम्नातवाक्यशेषत्वे दृष्टान्तानाह। "कुशे"ति। तद्यथा कौषीतक्याम्नाये "कुशा वानस्पत्या स्य ता मा पाते"ति सामान्यतो वानस्पत्यत्वेऽवगते सति शाट्यायनिना "मौदुम्बरा" इति विशेषवाक्यम्, औदुम्बर्यः कुशा इति प्रतिपादयत् तद्वाक्यशेषतां गच्छति। यथा च "देवासुराणां छन्दोभि"रित्यादिनाविशेषेण देवासुरच्छन्दसां पौर्वापर्यप्रसङ्गे "देवच्छन्दांसि पूर्वाणी"ति पैङ्गिवाक्यं क्रमविशेषं याहयत् तद्वाक्यशेषत्वं भजते। यथा च "हिरण्येन षोडशिनः स्तोत्रमुपाकरोती"ति शाखान्तरस्थस्य तत्कालविशेषवाचिसमयाध्युषिते सूर्य इति शाखान्तरस्थं तच्छेषतां गच्छति। यथा च "ऋत्विज उपगायन्ती"ति शाखान्तरस्थस्य "नाध्वर्युरुपगायती"ति तत्पर्युदासरूपं शाखान्तरस्थम्। एवमुपायनवाक्यस्य हानिवाक्यशेषतया गतिसंभवे हान्युपायनयोरितरेतरं समुच्चयः कार्यः। उभयोरन्योन्यसापेक्षत्वनियमात्। न तु विकल्पो युक्तः। तदुक्तं द्वादशलक्षण्याम्। "अपितु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य, विधीनामेकदेशः स्या"दिति ॥ २६ ॥

॥ सांपराये तर्तव्याभावात् तथाह्यन्ये ॥ २७ ॥

ब्रह्मविद्यानिष्ठस्य विदुषो ब्रह्म प्राप्नुवतः पुण्यापुण्यप्रहाणस्याप्यसंभावितत्वात् प्रहाणविषयत्वाच्चोपायनस्येति द्वयस्य सर्वविद्यासु चिन्तनमुक्तम्। तत्र पुण्यापुण्यप्रहाणचिन्तनेऽस्ति विचिकित्सा। किं देहवियोगकाल एकदेशस्तयोः क्षीयते, देहादुत्क्रान्तस्याध्वनि च शिष्टमित्युभयत्र चिन्तनमुत देहवियोगकाल एव सर्वं क्षीयत इति। तत्र "स एनं देवयानं पन्थानमापद्याग्निलोकमागच्छती"त्युपक्रम्य "स आगच्छति विरजां नदीं तां मनसात्येति, तत् सुकृतदुष्कृते विधुनुते" इति। कौषीतकिवाक्येऽध्वनि पुण्यपापहानिः श्रूयते। "अश्व इव रोमाणि विधूये"ति। कौण्डिन्यानां वाक्ये तु देहवियोगकाल एवेति। किं युक्तम्। उभयत्र श्रुतेर्देवयानेन पथा गमनान्यथानुपपत्तेश्चोभयत्रेति प्राप्ते पठति। "सांपराये" इति। सांपराये परलोकगमने देहादुत्सर्पणसमय एव विदुषः पुण्यपापे निरवशेषं क्षीयेते। कुतः। तर्तव्याभावात्। देहवियोगादूर्ध्वं विद्याफलभूतब्रह्मप्राप्तिव्यतिरेकेण तर्तव्यस्य पुण्यापुण्यफलस्य सुखदुःखभोगस्याभावात्। तथाह्यन्येऽपि शाखिनोऽधीयते। "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति, "अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः, एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इत्यादि। एवं चाध्वन्याम्नातमपि "सुकृतदुष्कृते विधुनुते"इति वाक्यं देहवियोगसमय एव संगमयितव्यम्। अर्थानुपपत्तिबलात्। तथा च सुकृतदुष्कृते उत्क्रान्तिसमये विधुनुते। ततश्च देवयानं पन्थानमासाद्याग्निलोकमागच्छतीत्यन्वयः। सर्वकर्मक्षयेऽपि विद्यासामर्थ्यादेव देवयानेन पथा गमनमुपपद्यते। विद्या हि स्वसामर्थ्यादेव स्वफलभूतब्रह्मप्राप्तिप्रतिपादनाय सुखदुःखोपभोगसाधनस्य स्थूलशरीरस्य सर्वकर्मणां च निरवशेषं क्षयेऽप्येनं देवयानेन पथा गमयितुं सूक्ष्मशरीरं स्थापयति ॥ २७ ॥

॥ छन्दत उभयाविरोधात् ॥ २८ ॥

ननु "तस्य पुत्रा दायमुपयन्ती"ति परकीययोः परत्र संक्रान्तिः श्रुता। सा विरुद्धा। तथात्वादर्शनादिति चेत्। तत्राह। "छन्दत" इति। परसंकल्पात् तथात्वोपपत्तेः। यो हि विदुषां शुभं वाञ्छति, तस्य सुकृतापत्तिर्यस्तु द्वेषादहितं संकल्पयति, तस्य दुष्कृतापत्तिरिति, शास्त्रादेवावगतम्। तथाह भगवान् मनुः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्म याति सनातनम्" ॥
इति ।

"शप्यमानस्य यत् पापं शपमानं नियच्छति" ।
इति स्मृत्यन्तरात् । एवमुभयोः कौषीतकिशाट्यायनिश्रुत्योरविरोधः ॥ २८ ॥

अत्र चोद्यति ॥

॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ २९ ॥

देवयानगतिश्रुतेरर्थवत्त्वं देहादुत्क्रान्तिसमयेऽध्वनि चेत्युभयथा कर्मक्षये सत्येव । अन्यथा देहत्यागकाल एव सर्वकर्मक्षयाङ्गीकारे सूक्ष्मशरीरारम्भकनाशेन तस्य स्थित्यनुपपत्तेः केवलात्मनो गतिर्नोपपद्यत इति देवयानगतिर्विरुध्यते ॥ २९ ॥

अत्रोत्तरयति ॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥

परमात्मानमुपासीनानां देहत्यागकाल एव सर्वकर्मक्षयेऽप्युपपन्नो देवयानः पन्थाः । कुतः । तल्लक्षणार्थोपलब्धेः । तल्लक्षणस्य तत्सजातीयस्याकर्मलभ्यस्यार्थस्योपलब्धेः । उपलभ्यते ह्यकर्मलभ्योऽर्थः परं ब्रह्मोपासीनानाम् । "स तत्र पर्येति, "जक्षत् क्रीडन् रममाणः","स स्वराड् भवति","तस्य सर्वेषु लोकेषु कामचारो भवति," "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते"इत्यादिषु । लोकवत् । यथा लोके राजानमुपासीनानां प्राकृतपुरुषासाधारणातिरमणीयानेकार्थसिद्धिः । तद्वत् सर्वज्ञं सर्वशक्तिं सत्यसंकल्पं महोदारं ब्रह्मोपासकानां सर्वमुपपन्नमित्यर्थः ॥ ३० ॥

॥ अनियमः सर्वेषामविरोधः
शब्दानुमानाभ्याम् ॥ ३१ ॥

कासुचिदुपकोशलविद्यापञ्चाग्निविद्यादिष्वर्चिरादिका गतिः पठ्यते, नान्यासु मधुविद्याशाण्डिल्यादिविद्यासु । तत्र संशयः । किमुपकोशलादिविद्यावतामेव गतिरुपपद्यते, उत सर्वेषां ब्रह्मविद्यावतामिति । यत्र श्रूयते तद्वतामेवेति प्राप्त उच्यते । "अनियम"इति । सर्वेषां सर्वब्रह्मविद्यावतां तथैव गमनसंभवात् । उपकोशलादिविद्यावतामेवेति नियमो नास्ति । अत एव शब्दानुमानाभ्यां, श्रुतिस्मृतिभ्यामविरोधः । अन्यथा विरोध एव स्यात् । श्रुतिस्तावच्छान्दोग्ये वाजसनेयके च पञ्चाग्निविद्यायामर्चिरादिना सर्वब्रह्मनिष्ठानां गमनमाह । "य एतद्विदुर्यं चेमेऽरण्ये श्रद्धां सत्यमुपासते, तेऽर्चिषमभिसंभवन्ती"ति । वाजसनेयके"तद्य इत्थं विदुर्यं चेमे श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्ती"ति । छान्दोग्ये "तत्र य इत्थं विदु"रिति पञ्चाग्निविद्यानिष्ठान्, "ये चेमेऽरण्ये"इति श्रद्धापूर्वकं ब्रह्मोपासकांश्चोद्दिश्यार्चिरादिगतिरुपदिष्टा । "सत्यं त्वेव विजिज्ञासितव्यं","सत्यं ज्ञान"मित्यत्र सत्यशब्दो ब्रह्मपरः । तपःशब्दोऽपि तेनैकार्थतस्तत्पर एवेत्यर्थः । स्मृतिरपि ।

"अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्" ।

इत्यादिकानेनैव मार्गेण सर्वेषां ब्रह्मोपासकानां गमनमाह । एवं चोपकोशलादिविद्यासु सर्वविद्यासाधारणीयं गतिः प्राप्तेवानूद्यते ॥ ३१ ॥

॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३२ ॥

ननु यदुक्तं "विदुषामुत्क्रमणकाल एव सुकृतदुष्कृतनाशोऽर्चिरादिका गतिश्चे"ति । तदयुक्तम् । वशिष्ठादीनां ब्रह्मविदामपि दुःखादियोगस्य देहान्तरप्राप्तेश्च शास्त्रसिद्धत्वादित्यत उत्तरमाह । "याव"दिति । नहि ज्ञानिमात्रस्य देहवियोगसमये सर्वकर्मक्षयो विवक्षितः । अपितु येषां देहपातानन्तरमेवार्चिरादिगत्या ब्रह्मप्राप्तिस्तेषामेव । वशिष्ठादीनां तु प्रारब्धस्याधिकारस्यासमाप्तत्वात् कर्मविशेषेणाधिकारविशेषं प्राप्तानां तेषां यावदधिकारसमाप्ति तद्धेतुभूतकर्मक्षयो न भवति, तावत् तद्भोगायावस्थितिरविरुद्धेति ॥ ३२ ॥

॥ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम् ॥ ३३ ॥

"एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति,अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसंगमरसमगन्धमचक्षुष्कमश्रोत्रमवाङ्मनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं तत् तदश्नाति किंचने"ति बृहदारण्यके वाजसनेयिभिराम्नायते । "अथ परा यया तदपारमधिगम्यते यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपाद"मिति चाथर्वणे । तत्र संदिह्यते । किमिमेऽक्षरब्रह्मसंबन्धित्वेन श्रुता अस्थूलत्वादयो गुणाः सर्वासु विद्यासूपसंहर्तव्या उत यत्र श्रुतास्तत्रैवेति । किं तावद्युक्तम् । तत्र विद्याविशेषरूपतया श्रुतानां तेषां सर्वविद्यासाधारणत्वाभावात् प्रतिषेधरूपतयानन्दादिवत् स्वरूपावगमोपायत्वाभावाच्च यत्र श्रुतास्तत्रैव नियता इति प्राप्ते ब्रूते । "अक्षरधियां त्वि"ति । अक्षरधियामक्षरसंबन्धिनीनामस्थूलत्वादिबुद्धीनामप्यानन्दादिवत् सर्वब्रह्मविद्यास्ववरोधः परिग्रहः । उपसंहार इत्यर्थः । कुतः । "सामान्यतद्भावाभ्याम्" । सर्वासु विद्यासूपास्यस्याक्षरब्रह्मणः समानत्वात् । अस्थूलत्वादिगुणबुद्धीनां ब्रह्मस्वरूपानुसंधानान्तर्भावाच्च । न केवलमानन्दादिभिर्ब्रह्मणोऽसाधारणं स्वरूपमुपस्याप्यते । जीवात्मन्यपि तेषां विद्यमानत्वात् । अस्थूलत्वादिभिर्विशेषितं त्वानन्दादि ब्रह्मणः प्रत्यगात्मनोऽव्यावर्तकम् । प्रत्यगात्मनस्तु स्वभावतः स्थूलत्वाद्यचेतनधर्मासं-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बन्धित्वेऽपि तत्संबन्धार्हतास्त्येव । तदर्हतया हि पूर्वं तत्संबन्धः संजातः । अतो ब्रह्मणस्तदनर्हस्वरूपानुसंधानतयास्थूलत्वादीनामानन्दादिवद्ब्रह्मस्वरूपप्रतिपादनपरत्वात् सर्वासु विद्यासूपसंहारः । एवं चास्थूलत्वादिविशेषितविज्ञानानन्दादिस्वरूपं ब्रह्म सर्वविद्यास्वनुसंधेयमिति । गुणानां प्रधानवशवर्तित्वे दृष्टान्तः । "औपसदव"दिति । यथा ज्ञामदग्न्येऽहीने पुरोडाशिनीपूपषत्सु सामवेदपठिता, "अग्निर्वर्हाचं, वेरध्वर"मित्येवमादयो मन्त्राः सामवेदपठितत्वेन सामवेदस्वरनियता अपि प्रधानभूतोपसदृशवर्तित्वाद् याजुर्वैदिकत्वाच्चोपसदो याजुर्वैदिकोपांशुस्वरसंबन्धिनः । तद्वदत्तरविद्यासंबन्धितयाधीतत्वेन तद्विद्यानियता अप्यस्थूलत्वादयः प्रधानवशवर्तित्वस्वभावात् सर्वविद्यासंबन्धिनः । तदुक्तं प्रथमकाण्डे । "गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग" इति ॥ ३३ ॥

नन्वेवं "सर्वकर्मा सर्वगन्धः सर्वरस"इत्यादीनामपि सर्वेषां ब्रह्मगुणत्वेन प्रतिविद्यं चिन्तनीयतया व्यवस्थितानामपि व्यवस्था न स्यात् । सर्वविद्यासु ब्रह्मण एव गुणित्वात्, गुणानां च प्रधानतन्त्रत्वादिति चेत् । तत्राह ॥

॥ इयदामननात् ॥ ३४ ॥

इयदस्थूलत्वादिविशेषितमानन्दाद्येव सर्वत्रानुसंधेयम् । कुतः । आमननाद्धेतोः । आमननं ह्याभिमुख्येन मननं, परब्रह्मस्वरूपानुचिन्तनं, तच्च येन विना नोपपद्यते, तदेवानन्दादिगुणजातं सर्वत्रानुसंधेयम् । सर्वकर्मत्वादिकं तु तत्र व्यवस्थितमित्यर्थः ॥ ३४ ॥

॥ *अन्तरा भूतग्रामवत् स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥ ३५ ॥

बृहदारण्यक उपस्तप्रश्न एवमामनन्ति वाजसनेयिनः । "यत् साक्षादपरोक्षाद्ब्रह्म","य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वे"ति । तत्र प्रतिवचनम् । "यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा सर्वान्तर"इत्यादि । असंतोषात् पुनस्तेन पृष्टो याज्ञवल्क्य आह । "न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणुया न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरोऽतोऽन्यदार्त"मिति । ततः कहोलप्रश्ने चैवं श्रूयते । "यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वे"ति । तत्र प्रतिवचनं च । "योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति, एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्चे"त्यादि, "अतोऽन्यदार्त"मित्यन्तम् । तत्र विचिकित्स्यते । किमत्र विद्याभेद उत नेति । भेद इति । कुतः । प्रतिवचनभेदेन रूपभेदात् । पूर्वत्र प्राणनादिहेतुः प्रत्यगात्मा सर्वान्तरात्मत्वेनोच्यते, उत्तरत्राशनायाद्यतीतः परमात्मेत्युपास्यभेदाद्रूपं भिद्यत इत्येवमाशङ्क्य परिहरति । "अन्तरा" इति । "य आत्मा सर्वान्तर"इत्युपस्तप्रश्नो भूतग्रामवतः स्वात्मनः प्रत्यगात्मन इत्यभ्युपगन्तव्यः । सर्वस्य देहादेरन्तरात्मत्वेन तस्य सर्वान्तरत्वोपपत्तेः । अन्यथा प्रश्नस्य मुख्यान्तरात्मपरमात्मपरत्वे प्रतिवचनभेदानुपपत्तिः । परमात्मनश्चाशनायादिरहितत्वात् प्राणितृत्वापानितृत्वाद्यसंभवेन प्रतिवचनस्य तत्परत्वासंभवादिति चेत् । "ने"ति । न प्रश्नद्वयं प्रतिवचनद्वयं च भिद्यते । तयोरुभयत्र परमात्मविषयत्वात् । तथाहि । प्रथमप्रश्नः परमात्मविषय एव । तत्र ब्रह्मशब्दस्य क्वचिज्जीवादिष्वपि गौण्या वृत्त्या प्रयोगो दृश्यते, तद्व्यावृत्त्यर्थं "यत् साक्षा"दिति विशेषणम् । अपरोक्षत्वमपि "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यनन्तत्वेनावगतस्य परमात्मन एव सर्वदेशकालसंबन्धित्वेनोपपद्यते । सर्वान्तरत्वमपि सर्वान्तर्यामिणः परमात्मन एवान्तर्यामिब्राह्मणादवगतम् । तथैव प्रतिवचनमपि तद्विषयमेव । मुख्यप्राणनकर्तृत्वं हि परमात्मन एव । जीवस्य सुषुप्तिमूर्च्छादौ प्राणनादिकं प्रति कर्तृत्वादर्शनात् । एवमजानतोपस्तेन प्रतिवचनस्य प्रत्यगात्मसाधारणत्वं मन्वानेनासंतोषात् पुनः पृष्टस्तं प्रति तद्व्यावृत्तं मुख्यं सर्वप्राणिप्राणनादिकर्तारं परमात्मानमाह । "न दृष्टेर्द्रष्टार"मित्यादिना । करणाधीनदर्शनश्रवणादिकर्ता प्रत्यगात्मा प्राणनादिकर्तृत्वेनोक्त इति न मन्वीथाः । सुषुप्त्यादौ तस्य तदभावात् । "को ह्येवान्यात्, कः प्राण्यात्, यदेष आकाश आनन्दो न स्या"दिति परमात्मन्येव तच्छ्रवणात् । एवमुत्तरप्रश्नप्रतिवचने अपि परमात्मविषये । अशनायाद्यतिक्रमणस्य तदसाधारणत्वात् । तत्र दृष्टान्तः । "उपदेशान्तरव"दिति । यथा,"स्तब्धोऽस्युत तमादेशमप्राक्ष्"इति प्रक्रान्तायामेकस्यामेव सद्विद्यायां "भगवांस्त्वेवमेतद्ब्रवीतु भूय एव मा भगवान् विज्ञापयतु", इति प्रश्नवृत्तिः प्रतिवचनभेदश्च वेद्यस्य माहात्म्यविशेषप्रतिपादनपरतया दृश्यते, तद्वदिहापि वेद्यस्याशनायाद्यतीतत्वप्रतिपादनाय प्रश्नप्रतिवचनयोर्द्विरावानम् ।

अत एकस्यैव सर्वान्तर्यामिणो निखिलप्राणिप्राणनकारणत्वाशनायाद्यतीतत्वप्रतिपादनेन रूपाभेदाद्विद्यैक्यम् ॥ ३५ ॥

नन्वेवमप्युपास्यगुणस्य प्राणितृत्वाशनायाद्यतीतत्वस्य भेदेन रूपभेदात् प्रष्टृभेदाच्च विद्याभेदोऽवर्जनीय इत्याशङ्क्याह ॥

॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३६ ॥

* शांकरभाष्यानुसारेण, 'अन्तरा भूतग्रामवत् स्वात्मन, इति, 'अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्, इति च सूत्रद्वयम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वयोः प्रष्ट्रोः प्रश्नस्यैकरूपत्वेन सर्वान्तरात्मत्वविशिष्टब्रह्मैकविषयत्वे निश्चिते सत्येकस्मिन्नेवोपास्ये ब्रह्मण्युषस्तकहोलयोरितरेतरं बुद्धेर्व्यतिहारो व्यत्ययः कार्यः । उषस्तस्य या सर्वान्तरस्य ब्रह्मणः प्राणनादिहेतुत्वविषया बुद्धिः सा कहोलेनापि कार्या, तथाशनायाद्यतीतत्वविषया बुद्धिरुषस्तेनापीति । एवं सति ब्रह्मणो जीवव्यावृत्तिर्निश्चिता भवति । विशिंषन्ति ह्युभयत्र याज्ञवल्क्यप्रतिवचनान्येव सर्वान्तरात्मानमेवोपास्यम्, इतरवत्,यथेतरत्र सद्विद्यायां सर्वाणि प्रतिवचनान्येकमेव सच्छब्दवाच्यं परं ब्रह्म प्रति, तद्वत् ॥ ३६ ॥

ननु प्रश्नप्रतिवचनावृत्तिसत्त्वे सद्विद्यायामप्युपास्यैक्यं कथमवगम्यत इति चेत् । तत्राह ॥

॥ सैव हि सत्यादयः ॥ ३७ ॥

सैव हि सच्छब्दाभिहिता "सेयं देवतैक्षत","तेजः परस्यां देवताया"मिति प्रकृता परा देवतैव । यथा "सोम्य मधु मधुकृतोऽग्निस्तिष्ठती"त्यादि सर्वपर्यायेष्वनुवर्तते । "ऐतदात्म्यमिदं सर्वं","तत् सत्यं,""स आत्मे"ति प्रथमपर्याये पठिता एव सत्यादयः सर्वेषु पर्यायेषूपसंह्रियन्ते ।

केचित् त्वेतत्सूत्रद्वयमधिकरणद्वयं मन्यन्ते । तत्र "पूर्णं त्वं वाहमस्मि भगवो देवते,""अहं वै त्वमसी"ति,"तद्योऽहं सोऽसौ", "योऽसौ सोऽह"मिति च वाक्ये जीवपरयोर्व्यतिहारोऽयमाध्यानायाम्नायते,"इत्याहुः । तदनादरणीयम् । तस्य "सर्वं खल्विदं ब्रह्म,""ऐतदात्म्यमिदं सर्वं,""तत् त्वमसी"त्यादिना ब्रह्मणि प्राप्तसर्वात्मत्वविषयत्वान्नात्रापूर्वं किंचित् प्रतिपादनीयमस्ति, वक्ष्यति च, "आत्मेति तूपगच्छन्ति, ग्राहयन्ति चे"त्युत्तरसूत्रेण । "स यो हैतमेवं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मे"त्यादिवाक्ये,"तद्यत् सत्यमसौ स आदित्यो य एष एतस्मिन् मण्डले पुरुषः,यश्चायं दक्षिणेऽक्षन् पुरुष"इत्यादिवाक्ये च सत्यविद्यैकैवे"त्याहुः । तदप्यसम्यक् । उत्तरवाक्येऽक्ष्यादिस्थानभेदादुपास्यरूपभेदेन फलसंयोगादिभेदेन च विद्याभेदस्य पूर्वमेव "न वा विशेषा"दित्यनेन प्रतिपादितत्वात् ॥ ३७ ॥

॥ कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३८ ॥

"अथ यदिदमस्मिन् ब्रह्मपुरे दहरे पुण्डरीकं वेश्म,दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्य"मित्युपक्रम्य छन्दोगैराम्नायते,"एष आत्मापहतपाप्मे"त्यादि । वाजसनेयिभिश्च "स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशान" इत्यादि । तत्र किमनयोर्विद्याभेद उत नेति संशये,एकत्रापहतपाप्मत्वादिविशिष्टस्योपास्यत्वमितरत्राकाशे शयानस्य वशित्वादिगुणविशिष्टस्योपास्यत्वमिति रूपभेदाद्विद्या भिद्यत इति प्राप्त इदमुच्यते । "कामादी"ति । छान्दोग्ये श्रुतं सत्यकामत्वादिगुणजातमितरत्र वाजसनेयके संग्रहीतव्यम् । वशित्वादयश्च नात्र छान्दोग्ये संग्रहीतव्याः । कुतः । "आयतनादिभ्यः" । समानं ह्युभयत्र हृदयमायतनं सेतुत्वविधारणत्वादि च । "परं ज्योतिरुपसंपद्ये"ति, "अभयं वै ब्रह्म भवती"ति च ब्रह्मप्राप्तिरूपं फलं चैकम् । अतो रूपैक्यात् स्थानाद्यैक्यात् फलैक्याच्च न विद्याभेदः । एवं च छान्दोग्ये श्रुत आकाशशब्दो ब्रह्मवाचीति "दहर उत्तरेभ्य" इत्यत्रोक्तम् । "आकाशे शेत" इत्यत्र त्वाकाशशब्दो हृदयपुण्डरीकवर्त्यवकाशवाचीति ॥ ३८ ॥

ननु यदुक्त"मुभयत्रापि सत्यकामत्वादिवशित्वादिगुणजातं संग्रहीतव्य"मिति । तदनुपपन्नम् । "मनसैवानुद्रष्टव्यम्,""नेह नानास्ति किंचन," "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति," "एकधैवानुद्रष्टव्य"मिति प्रकृतवाक्यात् "स एष नेति नेत्यात्मे"त्युपरितनवाक्याच्च प्रतीतस्य निर्विशेषस्य ब्रह्मणो न सत्यकामत्वादयो वशित्वादयश्च पारमार्थिका गुणाः । अतस्तेषां मोक्षफलासु विद्यासु लोप इति चेत् । तत्राह ॥

आदरादलोपः ॥ ३९ ॥

प्रमाणान्तरप्रतिपन्नस्य श्रुत्येकसमधिगम्यस्य सत्यकामत्वादेर्ब्रह्मगुणतयादरेण प्रतिपादनादलोपः । अप्रतिशेषः । अपितूपसंहार एव कर्तव्यः । अन्यथा ब्रह्मगुणतयादरेण प्रतिपाद्य भूयः स्वयमेव तन्निषेधे प्रवृत्तस्य शास्त्रस्योन्मत्तप्रतारकत्वादिदोषापत्तिरिति । "नेह नाने"त्यादिश्रुत्यर्थस्तु पूर्वमेवोक्तः ॥ ३९ ॥

नन्वेवमपि सगुणोपासने "स यदि पितृलोककामो भवती"त्यादिना पितृलोकादिप्राप्तिश्रवणात्, तस्याश्च सांसारिकफलत्वेन न मोक्षफलत्वम्, अतो न सगुणं ब्रह्म मुमुक्षोरुपास्यमिति न सत्यकामत्वादयो ब्रह्मप्रेप्सुनोपसंहार्या इत्याशङ्क्याह ॥

॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥

उपस्थितिरुपस्थानं, ब्रह्मोपसंपत्तिः, उपस्थिते ब्रह्मोपसंपन्ने निवृत्तसर्वाविद्ये स्वेन रूपेणाभिनिष्पन्ने प्रत्यगात्मनि,अतो ब्रह्मोपसंपत्तेरेव हेतोः, तद्वचनात्, पितृलोकप्राप्तिवचनात्, न तत् सांसारिकं फलम्, अपितु संसारान्मुक्तस्य सर्वबन्धविनिर्मुक्तस्य स्वेन रूपेणाभिनिष्पन्नस्यैव "स उत्तमः पुरुषः स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वान्यैर्वा ज्ञातिभिर्वान्योपजनं स्मरन्निदं शरीरं स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भव"तीत्याद्युच्यते । अतः सर्वलोकेषु कामचारस्य मुक्तोपभोग्यफलत्वादुपसंहार्या मुमुक्षुणापि सत्यकामत्वादयो गुणाः ॥ ४० ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॥ ४१ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीते"त्याद्याः कर्माङ्गाश्रया विद्याः श्रूयन्ते । तत्र संशयः । ताः किं कर्मसु पर्णमयीत्वादिवच्चियमेनोपादेया उत गोदोहनादिवदनियमेनेति । तत्र नियमेनोपादेया इति । यतो "यदेव विद्यया करोति श्रद्दधोपनिषदा तदेव वीर्यवत्तरं भव"तीत्युद्गीथादिविद्यासंबन्धिनो वर्तमाननिर्देशस्य पर्णमयीत्वादिसंबन्ध्यपाश्लोकश्रवणवत् पृथक्फलत्वप्रतिपादनायत्तत्वात् । यत् त्वासां स्ववाक्येषु फलं श्रूयते,"आप्यिता ह वै कामानां भवती"त्यादि, तदप्यर्थवादमात्रम्, अपापश्लोकश्रवणादिवत्,न फलप्रधानम् । तस्माद्यथा "यस्य पर्णमयीर्जुहूर्भवति न स पापं श्लोकं शृणोती"त्येवमादीनामनारभ्याधीतानामपि जुहूादिमुखेन कर्मसु प्रवेशादारभ्याधीतवच्चियमेनोपादेयत्वं, तथासामपि कर्माङ्गभूतोद्गीथादिमुखेन कर्मसु प्रवेशात् क्रत्वङ्गतया नियमेनोपसंहार्यत्वमिति प्राप्ते ब्रूमः । "तन्निर्धारणानियम"इति । निर्धारणं,निश्चयेन मनसो धारणम्, उपासनमित्यर्थः । तस्योद्गीथाद्युपासनस्य कर्मस्वनियमः । कुतः । "तदृष्टेः" । "तेनोभौ कुरुतो यश्चैतदेवं वेद, यश्च न वेद"इत्युद्गीथोपासनरहितस्य विदुषोऽपि क्रत्वनुष्ठानवचनेनोपासनानुष्ठानस्यानियमदर्शनात् । उपासनस्य कर्माङ्गत्वे तु तदनुपपत्तेः । साङ्गक्रतुफलात् स्वर्गादेः पृथग्भूतवीर्यवत्तरत्वं ह्यस्योपासनस्य फलम् । तच्चाप्रतिबन्धरूपम् । प्रतिबध्यते हि कर्मफलं प्रबलकर्मान्तरफलेन । अस्य तु तदभावः । श्रुत्यर्थस्तु यदेव कर्म विद्ययोद्गीथाद्युपास्या श्रद्दधास्तिक्यबुद्धयोपनिषदा रहस्यदेवताध्यानेन करोति, तदेव कर्म वीर्यवत्तरं,फलातिशयवद्भवतीति । कर्मणो वीर्यवत्त्वं नाम फलवत्त्वं. तद्विद्याहीनस्यापि गम्यमानं विद्याया अनङ्गत्वं सूचयति । अतः कर्माङ्गाश्रयाणामप्युद्गीथादिविद्यानां पृथक्फलत्वाद्गोदोहनादिवत् कर्मस्वनियमेनोपादेयत्वम् ॥ ४१ ॥

॥ प्रदानवदेव तदुक्तम् ॥ ४२ ॥

दहरविद्यायां दहराकाशमुपास्यत्वेनोक्त्वा "तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानित्यपहतपाप्मत्वादिगुणानामपि स्वरूपोपासनवत् पृथगुपासनमुक्तम् । तत्र किं गुणचिन्तने गुणिनोऽनुचिन्तनमावर्तनीयमुत नेति संशयः । दहराकाशस्य परमात्मन एकस्यैव सर्वगुणानां गुणित्वेन सकृदेव तच्चिन्तनोपपत्तेर्नावर्तनीयमिति प्राप्ते आह । "प्रदानव"दिति । यथे"न्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेदिन्द्रियाधिराजायेन्द्राय स्वराज्ञ"इत्यस्यां त्रिपुरोडाशिन्यामिष्टावैन्द्रस्यैकत्वेऽपि राजत्वादिविशिष्टाकारभेदाद्वैवताभेद इति प्रदानावृत्तिः,तद्वद्गुणिस्वरूपैक्येऽपि तद्गुणविशिष्टाकारभेदादावर्तनीयमेवेति । तदुक्तं संकर्षे । "नाना वा देवता पृथग्ज्ञाना"दिति ॥ ४२ ॥

॥ लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥ ४३ ॥

वाजसनेयिनोऽग्निरहस्ये "मनश्चितो वाक्चितः प्राणश्चितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचित" इत्यादिना मनश्चितादीनग्नीन् सांपादिकान् पठन्ति । तत्र संशयः । किमेते क्रियामयक्रत्वङ्गभूता उत प्राधान्यज्ञापकलिङ्गभूयस्त्वाद्विद्यामयक्रत्वङ्गभूता इति । तत्र सिद्धान्तं तावदाह । "लिङ्गभूयस्त्वा"दिति । लिङ्गं सामर्थ्यम् । "तद्यत् किंचेमानि मनसा संकल्पयन्ति, तेषामेव सा कृतिरिति तान् हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपते", इत्येवमादिलिङ्गानां भूयस्त्वाद् बाहुल्याद् विद्यारूपा एवैते । तद्धि लिङ्गं प्रकरणाद्बलीयः । तदप्युक्तं शेषलक्षणे । "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा"दिति । समवाये समानविषयत्वेन द्वयोर्विरोधे परस्य दौर्बल्यम् । कुतः । अर्थविप्रकर्षात् । स्वार्थबोधने परस्य पूर्वव्यवधानेन प्रवृत्तेरित्यर्थः ॥ ४३ ॥

अथ पूर्वः पक्षः ॥

॥ पूर्वविकल्पः प्रकरणात्
स्यात् क्रिया मानसवत् ॥ ४४ ॥

पूर्वस्यैव क्रियामयस्य"एकाभिरग्निं चिनुत"इति विहितस्येष्टकचितस्याग्नेरयं विकल्पः स्यात्, तत्प्रकार इत्यर्थः । यथासौ क्रत्वङ्गस्तथायमपीत्यर्थः । कुतः । प्रकरणात् । "असद्वा इदमग्र आसी"दित्यादिना पूर्वत्रेष्टकचितस्याग्नेः प्रकृतत्वात्, तस्य च क्रियामयक्रत्वव्यभिचारित्वेन तत्र क्रतुसंनिधानात् तत्प्रकरणपठिता मनश्चितादयोऽपि तद्विकल्परूपत्वेन क्रियारूपा एव स्युः ।

ननु प्रकरणस्य लिङ्गाद्दौर्बल्यमुक्तमिति चेत् सत्यम् । विधिवाक्यस्थस्यैव लिङ्गस्य प्रकरणाद्बलीयस्त्वं न त्वर्थवादस्येति गृहाण । विद्यारूपा अप्येते क्रियामयक्रत्वनुप्रवेशेन क्रियारूपतां लभन्ते, मानसवत् । यथा "द्वादशाहस्य दशमेऽहन्यनया त्वा पात्रेण समुद्रं रसया प्राजापत्यं मनोयहं ग्रहाती"ति मानसी क्रिया क्रत्वङ्गम् । एवमत्रापीत्यर्थः ॥ ४४ ॥

॥ अतिदेशाच्च ॥ ४५ ॥

इतश्चैषां क्रियारूपत्वम् । "षट्त्रिंशत् सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान् यावानसौ पूर्व"इति पूर्वस्येष्टकचितस्याग्नेः कार्यं तेष्वतिदिश्यते । ततश्चेष्टकचितवत् तेषामपि क्रतुनिर्वर्तकत्वेऽङ्गभूता एते क्रियारूपा एव ॥ ४५ ॥

इति प्राप्त आह ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ विद्यैव तु निर्धारणाद्दर्शनाच्च ॥ ४६ ॥ ४७ ॥

तुशब्दात् पक्षव्यावृत्तिः । एवकारोऽवधारणे । मनश्चिदादयो विद्यैव । विद्यामयक्रत्वङ्गभूता एवेत्यर्थः । कुतः । निर्धारणात् । तेषां सांपादिकाग्नित्वेन विद्यारूपत्वे प्रसिद्धेऽपि ते हैते विद्याचित एव "विद्यया हैवैत एवंविदश्चिता भवन्ती"ति च निर्धारणं विद्यामयक्रत्वङ्गतयैषां विद्यारूपत्वं ख्यापयति । "दर्शनाच्च" । दृश्यते चात्रैवैषामङ्गी विद्यामयक्रतुः । "ते मनसैवाधीयन्त, मनसाचीयन्त, मनसैषु यज्ञं अगृह्णन्त, मनसास्तुवन्, मनसाशंसन्, यत् किंच यज्ञे कर्म क्रियते, यत् किंच यज्ञीयं कर्म, मनसैव तेषु मनोमयेषु मनश्चित्सु मनोमयमेवाक्रियत" इत्यादौ ॥ ४६ ॥ ४७ ॥

ननु न तेषामिह विद्यामयक्रत्वङ्गता संभवति, विधिपदाश्रवणात्, फलसंबन्धाप्रतीतेश्च, इष्टकचिताग्न्युपस्थापितक्रियामयक्रतुप्रकरणेन तद्बाधाच्च । इत्याशङ्क्याह ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४८ ॥

न प्रकरणेन तेषां विद्यामयक्रत्वङ्गता बाध्यते । कुतः । श्रुत्यादेः प्रकरणाद्बलीयस्त्वात् । श्रुतिस्तावत् । "ते हैते विद्याचित एवे"ति । तथा "तान् हैतान्, एवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्ती"ति लिङ्गम् । तथा वाक्यमपि "विद्यया हैवैत एवंविदश्चिता भवन्ती"ति । एवंविदो मनआदिव्यापारेष्वग्नित्वं संपादयितुर्विद्यया विद्यामयक्रतुना संबद्धा एते मनश्चिदादयश्चिता भवन्तीत्येषां विद्यामयक्रतुसंबन्धमाचक्षाणं क्रियामयक्रत्वङ्गशङ्कां निरणद्धि ॥ ४८ ॥

यच्चोक्तं, "ते मनसैवाधीयन्ते" त्यादौ विधिपदाश्रवणात्, फलसंबन्धाप्रतीतेश्च न तेषां विद्यामयक्रत्वङ्गता संभवती"ति । तत्राह ॥

॥ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद् दृष्टश्च, तदुक्तम् ॥ ४९ ॥

इष्टकचितसंबन्धक्रियामयक्रतोर्विद्यामयोऽयं क्रतुः पृथक्त्वेनावगम्यते । कुतः । "अनुबन्धादिभ्यः" । अनुबन्धा "मनसैषु यज्ञं अगृह्णन्ते"त्यादिनोक्ता यज्ञानुबन्धिनो यज्ञस्तोत्रशस्त्रादयः । तेभ्यः । आदिशब्दात् पूर्वोक्तातिदेशश्रुत्यादिग्रहः । तत्र दृष्टान्तः । "प्रज्ञे"ति । यथा प्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वस्वानुबन्धादिहेतुभिः क्रियामयक्रतोर्विद्यान्तरेभ्यश्च पृथगवतिष्ठन्ते, एवमयमपि । एवं चानुबन्धैः श्रुत्यादिना च पृथग्विद्यामयक्रतुनिश्चये विधिः । तदुक्तम् । "वचनानि त्वपूर्वत्वा"दिति । इष्टकचिताग्नेः स्वक्रतुद्वारेण यत् फलं तदेव तेषामपि स्वक्रतुद्वारेण फलम् । "तेषामेकैक एव तावान् यावानसौ पूर्व"इत्यतिदेशात् ॥ ४९ ॥

यत् तूक्तं, मानसवदिति, तत्राह ॥

॥ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ५० ॥

न मानसग्रहसामान्यात् तुल्यत्वादपि मनश्चिदादीनां क्रियामयक्रत्वङ्गत्वं कल्प्यम् । कुतः । उपलब्धेः । पूर्वोक्तश्रुत्यादिहेतुभ्यो विद्यारूपत्वोपलब्धेः । नहि किंचित् सादृश्यं कस्यचित् केनचिदस्ति । न तावता वैषम्यनिवृत्तिः । मृत्युवत् । यथा पूर्वस्मिन् मण्डले ब्राह्मणसमाप्तौ "स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुष"इति, "अग्निर्वै मृत्यु"रिति चाग्न्यादित्यपुरुषयोर्न सादृश्यादैक्यापत्तिः । यथा च "असौ वाव लोको गौतमाग्नि" रिति न द्यग्नेर्लोकापत्तिर्लोकस्य वाग्न्यापत्तिः, तथात्रापि क्रियारूपत्वविद्यारूपत्ववैषम्येऽपि मानसत्वसामान्यं न विरुध्यते । विषययोरपि साम्यदर्शनात् ॥ ५० ॥

किंच, पूर्वोत्तरब्राह्मणयोः केवलविद्याविधानात् तन्मध्यस्यापि ब्राह्मणस्य केवलविद्याविधिपरत्वमित्याह ॥

॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात् त्वनुबन्धः ॥ ५१ ॥

परेण च "अयं वाव लोक एषोऽग्निचित" इत्यनन्तरेण लोकपूर्णब्राह्मणेनास्य मनश्चिदाद्यभिधायिनः शब्दस्य ताद्विध्यं तद्विधत्वं विद्यामयत्वं प्रतिपादितमवगम्यते । तेन हि ।

"विद्यया तदारोहन्ति यच्च कामाः परागताः ।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः" ॥

इति केवलकर्मनिन्दापूर्वकं विद्यां प्रशंसता विद्यैव विधीयते । अतोऽग्निरहस्ये क्रिया एव विधीयन्त इति नियमो नास्ति । एवं तर्हि विद्यामयमनश्चिदादीनां क्रियाग्निना सह पाठः किमर्थमित्यत आह, "भूयस्त्वात् त्वनुबन्ध"इति । मनश्चिदादिषु संपादनीयानामग्न्यङ्गानां भूयस्त्वात् तेषां क्रियाग्निसंनिधावनुबन्धः कृतः, न तु कर्माङ्गतायाः । तस्मान्मनश्चिदादयोऽग्नयो विद्यामयक्रत्वङ्गभूता एवेति सिद्धम् ॥ ५१ ॥

॥ एक आत्मनः शरीरे भावात् ॥ ५२ ॥

पूर्वं "त्रयाणामेव चैवमुपन्यासः प्रश्नश्चे"त्यन्तेन त्रयाणामप्युपास्योपासकोपासनानां स्वरूपस्य सर्वासु परविद्यासु च ज्ञेयत्वमुक्तम् । वक्ष्यते चोपासकस्यात्मतया परमात्मोपास्य उपासकश्चोपास्यात्मकतयानुसंधेयः । "आत्मेति तूपगच्छन्ति ग्रहयन्ति चे"त्यनेन । तत्र संशय्यते । किमयं प्रत्यगात्मा शरीरे वर्तमानो ज्ञातृत्वभोक्तृत्वादिविशिष्टस्वरूपोऽनुसंधेय उत प्रजापतिवाक्योक्तापहतपाप्मत्वादिगुणको यथावस्थितरूप इति । तत्र ज्ञातृत्वादिविशिष्टमेव तत्स्वरूपमनुसंधेयमित्येके मन्यन्ते । कुतः । "आत्मनः शरीरे भावात्" । शरीरे वर्तमानस्यो-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पासितुरात्मनस्तथाभावात् । न हि कर्मिणां कर्तृत्वाद्व्यतिरेकेण फलानुभवदशायां यादृशं रूपं तादृशं साधनानुष्ठानदशायामनुसंधीयते । तावतैव साधनानुष्ठानतत्फलयोः संभवात् । तथैवोपासकस्यापि देहस्यस्य यादृशं रूपं तावतैवोपासनानुष्ठानतत्फलयोः सिद्धेः । "यथा क्रतुरस्मिल्लोके पुरुषो भवति, तथेतः प्रेत्य भवतीति तु तं यथा यथोपासत" इत्यनेनैकार्थ्यात् परमात्मविषयम् ॥ ५२ ॥

इत्येवं प्राप्ते सिद्धान्तमाह ॥

॥ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥ ५३ ॥

तुशब्दोऽवधारणे । न ज्ञातृत्वादिविशिष्टस्वरूप एव प्रत्यगात्मानुसंधेयः, अपितु सांसारिकस्वरूपान्मुक्तस्वरूपस्य यो व्यतिरेक आविर्भूतापहतपाप्मत्वादिगुणत्वरूपः सोऽनुसंधेयः । कुतः । "तद्भावभावित्वात्" । तद्भावस्यापहतपाप्मत्वाद्यवच्छिन्नयथावस्थितस्वरूपत्वस्य मुक्तौ भावित्वात् । अयं भावः । "ऐतदात्म्यमिदं सर्वं","तत् त्वमसि","स त आत्मान्तर्याम्यमृत" इत्यादिश्रुतेः प्रत्यगात्मन आत्मतयैव परमात्मोपास्य इति प्रत्यगात्माप्युपास्यभूतपरमात्मात्मकत्वेनोपास्यकोटिनिविष्टः । अतो "यथा क्रतुरस्मिल्लोके पुरुष इति तं यथा यथोपासते तथैव भवती"ति च न परमात्ममात्रविषयम्, अपितु प्रत्यगात्मात्मभूतोपास्यविषयमिति प्रजापतिवाक्योक्तापहतपाप्मत्वादिविशिष्टं यथावस्थितं स्वरूपमेव प्रत्यगात्मनोऽनुसंधेयम्, अन्यथा प्राप्योपास्ययोः प्रकारभेदा"द्यथा क्रतु"रित्यादि विरुध्येत । तत्र दृष्टान्तः । "उपलब्धिवत्" । ब्रह्मोपलब्धिवत् । यथा ब्रह्मोपलब्धिर्यथावस्थितब्रह्मस्वरूपानुसंधानयुक्तस्यैव, तथात्मोपलब्धिरपि यथावस्थितात्मस्वरूपानुसंधानयुक्तस्यैव । कर्मिणां तु, "यजेत स्वर्गकाम" इत्यादिविधिषु देहादिव्यतिरिक्तकर्तृत्वाद्याकारप्रत्यगात्मस्वरूपविचारस्यैव कालान्तरभाविफलसाधनकर्माधिकारायापेक्षितत्वाच्च ब्रह्मतादात्म्यापन्नतया प्रजापतिवाक्योदितापहतपाप्मत्वादिविशिष्टप्रत्यगात्मस्वरूपानुसंधानस्य तत्र कर्माङ्गत्वमिति विशेषः ॥ ५३ ॥

॥ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५४ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीत, लोकेषु पञ्चविधं सामोपासीत, उक्थमुक्थमिति वै प्रजा वदन्ति, तदिदमेवोक्थमियमेव पृथिवी, अयं वाव लोक एषोऽग्निश्चित" इत्येवमाद्या उद्गीथादिक्रत्वङ्गाश्रया उपासनाः प्रतिवेदं शाखाभेदेषु विधीयमानाः श्रूयन्ते । तत्र संशयः । ताः किं यासु शाखासु पठितास्तच्छाखागतोद्गीथादिष्वेव नियता उत सर्वशाखागतेषूद्गीथादिषु संबध्यन्त इति । तत्र येन स्वरादिविशेषेण यस्यां शाखायामुद्गीथादयः पठ्यन्ते, तद्विशिष्टा एव भवेयुर्न शाखान्तरगतोद्गीथाद्याश्रयाः । संनिधानात् । इति प्राप्ते ब्रूमः । "अङ्गावबद्धास्त्विति" । तुशब्दः पक्षव्यावृत्त्यर्थः । उद्गीथाङ्गप्रतिबद्धा उपासना न स्वशाखास्वेव व्यवस्थिताः, अपितु प्रतिवेदं सर्वशाखासु संबध्यन्ते । हि यतः स्वरादिभेदेनोद्गीथव्यक्तिभेदेऽपि "उद्गीथमुपासीते"ति सामान्योद्गीथादिश्रुतिरविशिष्टा सती संनिधिं बाधते । क्रतुमध्यगताश्चोद्गीथादयः प्रत्ययार्थया न तत्र संनिधिविशेषः । सर्वशाखाप्रभवत्वात् क्रतोः ॥ ५४ ॥

मन्त्रादिवद्वाविरोधः ॥ ५५ ॥

चार्थे वाशब्दः । यथा च शाखान्तरविहितो मन्त्रः "कुटरसी"ति शाखान्तरेष्वपेक्ष्यते, "कुक्कुटोऽसी"त्यश्मानमादत्ते "कुटरसी"ति वेति । आदिना कर्मगुणजातिसंख्यादयो गृह्यन्ते । यथा मैत्रायणीयानां प्रयाजा न सन्ति, तथाप्यूर्ध्वं गुणविधिर्भवति । "ऋतवो वै प्रयाजाः समास्तत्र होतव्या" इत्याद्युदाहरणमूह्यम् ।

एवं च यथा मन्त्रादीनां क्रत्वङ्गभूतानामेकैकशाखावगतानां सर्वशाखासु क्रतोरेकत्वेन सर्वत्र संबन्धो न विरुध्यते, तद्वदिहापि न विरोधः ॥ ५५ ॥

॥ शेषमपराङ्गे ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

वर्क्लेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिका ।

तत्र द्विषष्टितमादिपरिच्छेदाः ।

६२—अपरं चात्र द्रष्टव्यम् । यद्यपि केवला ऐन्द्रियकयान्त्रिकादिसंस्थितयः किमपि कार्यं जनयितुं नालं तथापि प्राकृतिकनियमानुगुण्यं सुस्थिराव्यभिचारिक्रमेण कार्योत्पत्तये आवश्यक्य एव । प्राकृतिकनियमाश्च सांसारिककार्येषूपलब्धाः सर्वसाधारणा अवस्याविशेषा ये प्राकृतिककार्यक्रमयोगपद्यादिदर्शनाद्यात्मकेन प्रकृत्यध्ययनेनाधिगन्तुं शक्यन्ते । वर्ण्यन्ते च लोके न केवलं विविधसिद्धवस्तुकारणत्वेनापि तु सांसारिकोपयोगभूषणाद्यर्थानां कृत्रिमकार्याणां साधनेऽपि प्रयुज्यन्ते तेषां कारणत्वस्य वर्णनं तु कस्मिंश्चिदवस्थाविशेषे प्राकृति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कसाधारणावस्थासाजात्यस्य प्रदर्शने प्राक्तनकार्याणां सर्वत्रैकरूपताया आविष्करणे एव वा पर्यवस्यति । स्पष्ट चेदं बहुलोदाहरणसमीक्षणात् । लौकिकविद्वांसस्तु तादृशनियमेषु कार्यविशेषजनकत्वमारोपयन्ति तदयुक्तम् । तथाहि । ईश्वरव्यवस्थापितस्य स्वव्यापारनियतक्रमस्य सुस्पष्टयथार्थप्रयोजनानि तु पूर्वमेकत्रिंशत्तमपरिच्छेदे एव निरूपितानि । यद्यपि कार्यविशेषं जनयितुं रूपपरिमाणाकारगत्यादिविशेषा अवयवसन्निवेशविशेषाश्च सत्यलौकिककारणान्तरसमवधाने ऽवश्यमपेक्ष्यन्तइति प्रतीयते तथापि सा सर्वा सामग्री सुव्यवस्थितप्राक्तननियमानुसारतः कार्यं जननीय एव नत्वन्यथा । यतोहि नैतच्चित्रं यदखिललौकिककार्यप्रवाहनियमानामालम्बभूतः प्रवर्तकश्च परमेश्वरो यदीच्छेत्तर्हि लौकिककारणसामग्रीमन्तरैव कार्याणि जनयेच्चक्राद्यवयवनिरपेक्षमेव घटीयन्त्रस्थकालसूचकसूचीश्चालयेत् । परंतु तस्मिन्त्स्वव्यवस्थापितनियमानुसारमेव कार्याणि जनयितुं प्रवर्तमाने घटीयन्त्रस्थकालसूचकसूचीचालनादेः प्राङ् नियमेन तादृशयन्त्रनिर्मातुर्यन्त्रावयवादिनिर्माणपूर्वको यथायथं तत्सन्निवेशनादिव्यापार आवश्यकः । तत्र गतिवैकल्यानुगतायाः कस्या अप्यवस्थाया उपलम्भे तु यन्त्रघटकावयवसन्निवेशादिशोधनं चावश्यकम् । तत्साधुसन्निवेशादेरेव तन्निर्दुष्टगतिनियतपूर्ववृत्तित्वात् ।

६३–इदमप्यावश्यकम् यज्जगदीश्वरः स्वसर्वशक्तिमत्वं प्रकाशयितुं कदाचित् कदाचित् प्रायिकसृष्टिक्रमविरुद्धान्येव कतिपयान्यद्भुतकार्याणि सृजेत् यानि साश्चर्यं पश्यन्तोजना अचिन्त्यशक्तिमतः परमेश्वरस्य सत्तां सादरमनुमन्येरंस्ततो भयं चाशङ्केरन् । नूनं तथाविधान्यद्भुतकार्याणि लोकेऽतिविरलमेव सृज्यन्ते अन्यथा तानि प्रायिककार्यरूपाण्येव मन्यमानो न कोपीश्वरस्य सत्तामतिमानुषशक्तिमत्त्वादिकं च स्मरेत् । स्वयमीश्वरोपि सुपरिकल्पितानि परस्परानुगुणप्राक्तनकार्याणि सृजन् मनुष्यान्स्वोत्तमगुणान् प्रतीषिपयिव प्रतीयते । तत्कार्याणि च स्वस्रष्टुः परमातिचातुर्यविज्ञत्वादिकमेव द्योतयन्ति न पुनर्विस्मापकविलक्षणवृत्तान्तान्तरवशादीश्वर सद्भाव एवाशङ्कामादधते ।

६४–ननु पञ्चत्रिंशत्तमपरिच्छेदोक्तावेपस्यायमाशयः । तथाहि । ज्ञानानां कार्यकारणभावसदृशेन केनचित्संबन्धान्तरेणान्योन्यं संबद्धत्वात्र किमपि ज्ञानं ज्ञानान्तरासंबद्धमनियतं चोत्पत्तुं शक्यते । सन्ति चैवं भूयिष्ठाः सुनिश्चितक्रमविशिष्टाः क्वचिन्मज्ञानपुञ्जा ये नेपथ्ये प्रच्छन्नस्य सूत्रधारस्येव प्रकृतेर्हस्ते तिष्ठन्तः कार्यान्तरोपकरणीभूताः शास्त्रदृष्टिमात्रगोचराः संसाररङ्गभूमौ दृश्यमानानां कार्याणां जनने निगूढं व्याप्रियन्त इति प्रतीयन्ते । परंतु ज्ञानानां जडात्मकतया तानि न कस्यापि ज्ञानकार्यस्य कारणानि भवितुमर्हन्तीति तादृशज्ञानसंबन्धस्य निरुपयुक्तत्वमापद्यते । तथाच न कान्यपि ज्ञानानि प्राक्तनकार्योत्पत्तावावश्यकानि स्युः । तेषाम् आत्मगतनिष्क्रियप्रत्यक्षात्मकत्वात् । एवं स्थिते ईश्वरसृष्टकार्येषु सूक्ष्मदृग्भा परीक्षितेषु भासमानानां नानाविधज्ञानसंबन्धरचनानियमादीनां किमपि तात्त्विकं फलमवश्यं त्वया वक्तव्यम् । तच्चिन्त्यत्वकल्पनायास्तु सर्वथाऽश्रद्धेयत्वादिति चेदुच्यते वक्ष्यमाणपरिच्छेदे ।

६५–वस्तुतोहि ज्ञानानां मिथः संबन्धो न कार्यकारणभावात्मकोऽपितु लिङ्गलिङ्गिभावरूप एव । पुरतो दृश्यमानो वह्निर्न तापपीडादेर्हेतुः किंतु लिङ्गं यत्स्वसन्निकर्षात्प्रागेव तापादिकमनुमापयति । एवं श्रूयमाणः शब्दो न कस्यापि परितोवर्तमानपिण्डसंघर्षस्य कार्यं किंतु संघर्षलिङ्गमेव । यन्त्रादिरूपेण सुपरिकल्पितानां नियमविशेषानुयायिनां ज्ञानसमूहानां प्रयोजनं तु शब्दरूपेण विन्यस्तानां वर्णानां प्रयोजनेन समानं बोध्यम् । भूयिष्ठानां कार्याणां व्यापाराणां वा बोधनाय कतिपयानि ज्ञानानि विविधाभीरीतिभिरवश्यं संयोज्येरन् । परं तु तादृशः संयोगास्तथोक्तमयुक्तिसिद्धास्तत्तन्नियमानुसारिणश्च भवेयुर्यथा न कदापि स्वबोध्यार्थान् व्यभिचरेयुः । येन कार्यविशेषानुकूलास्तत्तद्व्यापाराः सुखदुःखादिविविधज्ञानोत्पत्त्यनुकूलास्तत्तदुपायाश्च निश्चेतुं शक्येरन् । यच्च लोके ज्ञेयपिण्डगतपरिमाणाकारादीनां तद्घटकावयवसंस्थितेश्च सम्यग्विवेचनेन तादृशपिण्डानामुपयोगविशेषास्तदाश्रितनैसर्गिकक्षत्रियादिधर्मविशेषाश्चावगन्तुं शक्यन्त इत्याद्युच्यते तस्यापि पूर्वोक्तानुसार्येवार्थो बोध्यः ।

६६–एतेन कार्याणां सहकारिकारणादिरूपेण लोके प्रसिद्धान्यपि यथाऽशक्योपपादनानि वस्तूनि सुस्पष्टमुपपाद्येरन् । तेषां लिङ्गरूपत्वेन कार्यविशेषज्ञापनैकयथार्थफलकत्वात् । तदेषां प्रकृत्यधिष्ठात्रेश्वरेण नियमितानां लिङ्गानां सम्यक्परिज्ञानान्वेषणयोरेव बाह्यप्रपञ्चशास्त्रिणः प्रयतेरन् न पुनर्मूर्तकारणैः कार्याण्युपपादयितुं व्यपदिशेरन् । तथात्वे तु यस्मिन्त्सर्वाणि भूतानि तिष्ठन्ति जीवन्ति चलन्तीत्यादिनिगमोक्तलक्षणलक्षितात्सर्वप्रवर्तकादीश्वरान्मनुष्यबुद्धीनां भृशं विप्रकृष्टत्वं प्रत्यापद्येत ।

केशवशास्त्री
मराठोपाह्वः

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature

No. 98. Benares, July 1st, 1874. Vol. IX.

काशिकायाः

प्रथमाध्यायस्य चतुर्थः पादः

आ कडारादेका संज्ञा ॥ १ ॥

कडाराः कर्मधारयइति वक्ष्यति आ एतस्मात्सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामः तत्र एका संज्ञा भवतीति वेदितव्यम्। का पुनरसौ । या परा ऽनवकाशा च । अन्यत्र संज्ञासमावेशात्त्रियग्रार्थं वचनमेकैव संज्ञा भवतीति। वक्ष्यति ह्रस्वं लघु । भिदि । छिदि । भेत्ता । छेत्ता । संयोगे गुरु । शिक्षा । भिक्षा । संयोगपरस्य ह्रस्वस्य लघुसंज्ञा प्राप्नोति गुरुसंज्ञा च । एका संज्ञेति वचनाद्गुरुसंज्ञैव भवति। अततक्षत्। अरक्षत्। सन्वल्लघुनीत्येष विधिर्न भवति ॥

विप्रतिषेधे परं कार्यम् ॥ २ ॥

तुल्यबलविरोधो विप्रतिषेधः । यत्र द्वौ प्रसङ्गावन्यार्थावेकस्मिन्युगपत्प्राप्नुतः स तुल्यबलविरोधो विप्रतिषेधः। तस्मिन्विप्रतिषेधे परं कार्यं भवति। उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्तीति नायमस्य योगस्य विषयो बलवतैव तत्र भवितव्यम्। अप्रवृत्तौ पर्यायेण वा प्रवृत्तौ प्राप्तायां वचनमारभ्यते। अतो दीर्घो यञि सुपि चेत्यस्यावकाशः। वृत्ताभ्याम्। प्लुताभ्याम्। बहुवचने झल्येदित्यस्यावकाशः। वृत्तेषु। प्लुतेषु। इत्तेोभयं प्राप्नोति। वृत्तेभ्यः। प्लुतेभ्यः। इति। परं भवति विप्रतिषेधेन ॥

यू स्त्याख्यौ नदी ॥ ३ ॥

ईच ऊ च यू। अविभक्तिको निर्देशः। स्त्रियमाचक्षाते स्त्याख्यौ । मूलविभुजादिदर्शनात्कप्रत्ययः । ईकारान्तमूकारान्तं च स्त्याख्यं शब्दरूपं नदीसंज्ञं भवति । ईकारान्तम् । कुमारी। गौरी। लक्ष्मीः। शार्ङ्गरवी। ऊकारान्तम् । ब्रह्मबन्धूः। यवागूः। यू इति किम्। मात्रे। दुहित्रे। स्त्याख्याविति किम्। यामणीः। सेनानीः। खलपूः। आख्यायहणं किम्। शब्दार्थे स्त्रीत्वएव यथा स्यात् पदान्तराख्ये मा भूत्। यामण्ये स्त्रियै। खलप्वे स्त्रियै। नदीप्रदेशा आगनद्या इत्येवमादयः ॥

नेयङुवङ्स्थानावस्त्री ॥ ४ ॥

पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते । स्थितिः स्थानम् । इयङुवङोः स्थानमनयोरितीयङुवङ्स्थानौ तौ यू नदीसंज्ञौ न भवतः स्त्रीशब्दं वर्जयित्वा। हे श्रीः। हे भूः। अस्त्रीति किम्। हे स्त्रि ॥

वा ऽऽमि ॥ ५ ॥

पूर्वेण नित्ये प्रतिषेधे प्राप्ते आमि विकल्पः क्रियते । इयङुवङ्स्थानौ यू आमि परतो वा नदीसंज्ञौ न भवतः । श्रियाम् । श्रीणाम् । भुवाम् । भूणाम् । अस्त्रीत्येव । स्त्रीणाम् ॥

ङिति ह्रस्वश्च ॥ ६ ॥

दीर्घस्य नदीसंज्ञा विहिता ह्रस्वस्य न प्राप्नोति इयङुवङ्स्थानयोश्च प्रतिषिद्धा । तस्माद्ङिति वा विधीयते । ङितिपरतो ह्रस्वश्च य्वोः संबन्धी यः स्त्याख्यौ इयङुवङ्स्थानौ च यू वा नदीसंज्ञौ भवतः । क्रत्यै । क्रतये । धेन्वै । धेनवे । श्रियै । श्रिये । भुवै । भुवे । अस्त्रीत्येव । स्त्रियै । स्त्याख्याविति किम् । अग्नये । वायवे । भानवे ॥

शेषो घ्यसखि ॥ ७ ॥

ह्रस्व इति वर्तते । शेषोत्र घिसंज्ञो भवति सखिशब्दं व-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

र्जयित्वा। कश्च शेषः। ह्रस्वमिवर्णोवर्णान्तं यच स्याख्यं स्याख्यं च यच नदीसंज्ञकं स शेषः। अग्नये। वायवे। क्रतये। धेनवे। असखीति किम्। सख्या। सख्ये। सख्युः। सख्यौ * ॥

पतिः समासएव ॥ ८ ॥

पतिशब्दस्य घिसंज्ञायां सिद्धायामयं नियमः क्रियते पतिशब्दः समासएव घिसंज्ञो भवति। प्रजापतिना। प्रजापतये। समासइति किम्। पत्या। पत्ये। एवकार इष्टतो ऽवधारणार्थः। दृढमुष्टिना। दृढमुष्टये ॥

षष्ठीयुक्तश्छन्दसि वा ॥ ९ ॥

पतिरिति वर्तते। पूर्वेण नियमेनासमासे न प्राप्नोतीति वचनमारभ्यते। षष्ठ्यन्तेन युक्तः पतिशब्दः छन्दसि विषये वा घिसंज्ञो भवति। कुलुञ्चानां पतये नमः। कुलुञ्चानां पत्ये नमः। † षष्ठीयहणं किम्। मया पत्या जरदृष्टिर्यथासः। छन्दसीति किम्। यामस्य पत्ये ॥

ह्रस्वं लघु ॥ १० ॥

मात्रिकस्य ह्रस्वसंज्ञा कृता तस्यानेन लघुसंज्ञा विधीयते। ह्रस्वमक्षरं लघुसंज्ञं भवति। भेत्ता। छेत्ता। अचीकरत्। अजीहरत्। लघुप्रदेशाः पुगन्तलघूपधस्य चेत्येवमादयः ॥

संयोगे गुरु ॥ ११ ॥

ह्रस्वमिति वर्तते। पूर्वेण लघुसंज्ञायां प्राप्तायां गुरुसंज्ञा विधीयते। संयोगे परतो ह्रस्वमक्षरं गुरुसंज्ञं भवति। कुण्डा। शिक्षा। भिक्षा। गुरुप्रदेशाः गुरोश्च हल इत्येवमादयः ॥

दीर्घं च ॥ १२ ॥

संयोगइति नानुवर्त्तते। सामान्येन संज्ञाविधानम्। दीर्घं चाक्षरं गुरुसंज्ञं भवति। ईहांचक्रे। ईक्षांचक्रे ॥

यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गम् ॥ १३ ॥

यस्मात्प्रत्ययो विधीयते धातोर्वा प्रातिपदिकाद्वा तदादि शब्दरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति। कर्त्ता। हर्त्ता। करिष्यति। हरिष्यति। औपगवः। कापटवः। यस्मादिति संज्ञिनिर्द्देशार्थं,तदादीतिसंबन्धात्। प्रत्ययग्रहणं किम्। न्यविशत। व्यक्रीणीत। नेर्विश इत्युपसर्गाद्विधिरस्ति तदादेरङ्गसंज्ञा स्यात्। विधिग्रहणं किम्। प्रत्ययपरत्वमात्रे मा भूत्। स्त्री इयती। तदादिवचनं स्यादिनुमर्थम्। करिष्यावः। करिष्यामः। कुण्डानि। पुनः प्रत्ययग्रहणं किमर्थम्। लुप्त प्रत्यये मा भूत्। स्यर्थम्। अङ्गप्रदेशा अङ्गस्येत्येवमादयः ॥

सुप्तिङन्तं पदम् ॥ १४ ॥

सुप्तिङिति प्रत्याहारग्रहणम्। सुबन्तं तिङन्तं च शब्दरूपं पदसंज्ञं भवति। ब्राह्मणाः पचन्ति। पदसंज्ञायामन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेः प्रतिषेधार्थम्। गौरी ब्राह्मणितरा। पदप्रदेशाः पदस्य पदादित्येवमादयः ॥

नः क्ये ॥ १५ ॥

क्यङिति क्यच्क्यङ्क्यषां सामान्यग्रहणम्। नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति। क्यच्। राजीयति। क्यङ्। राजायते। क्यष्। चर्म्मायति। चर्म्मायते। सिद्धे सत्यारम्भो नियमार्थः। नान्तमेव क्ये परतः पदसंज्ञं भवति नान्यत्। वाच्यति। स्रुच्यति।

सिति च ॥ १६ ॥

यचि भमिति वक्ष्यति तस्यायं पुरस्तादपकर्षः। सिति प्रत्यये परतः पूर्वं पदसंज्ञं भवति। भवतष्टक्कसौ। भवदीयः। उर्णायाः युस्। उर्णायुः। ऋतोरण्। छन्दसि घस्। ऋत्वियः ॥

स्वादिष्वसर्वनामस्थाने ॥ १७ ॥

स्वादिष्विति सुशब्दादेकवचनादारभ्य आ कपः प्रत्यया गृह्यन्ते। स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्ज्जितेषु पूर्वं पदसंज्ञं भवति। राजभ्याम्। राजभिः। राजत्वम्। राजता। राजतरः। राजतमः। असर्वनामस्थानइति किम्। राजानौ। राजानः ॥

यचि भम् ॥ १८ ॥

स्वादिष्वसर्वनामस्थानइति वर्तते। पूर्वेण पदसंज्ञायां प्राप्तायां तदपवादो भसंज्ञा विधीयते। यकारादावजादौ च स्वादौ सर्वनामस्थानवर्ज्जिते प्रत्यये परतः पूर्वं भसंज्ञं भवति। यकारादौ। गार्ग्यः। वात्स्यः। अजादौ। दात्तिः। प्रात्तिः ॥ नभोङ्गिरोमनुषां वत्युपसंख्यानम् ॥ * ॥ नभइव नभस्वत्। अङ्गिरादव अङ्गिरस्वत्। मनुरिव मनुष्वत् ॥ वृषण्वस्वश्वयोः ॥ * ॥ वृषन्नित्येतत् वस्वश्वयोः परतो भसंज्ञं भवति छन्दसि विषये। वृषण्वसुः। वृषणश्वस्य मेने। भप्रदेशाः भस्येत्येवमादयः ॥

तसौ मत्वर्थे ॥ १९ ॥

भमिति वर्त्तते। तकारान्तं सकारान्तं शब्दरूपं मत्वर्थे प्रत्यये परतो भसंज्ञं भवति। उदश्वित्वान् घोषः। विद्युत्वन् बलाहकः। सकारान्तम्। यशस्वी। पयस्वी। तसाविति किम्। तत्तवान् यामः ॥

अयस्मयादीनिच्छन्दसि ॥ २० ॥

अयस्मयादीनि शब्दरूपाणि छन्दसि विषये साधूनि भवन्ति। भपदसंज्ञाधिकारे विधानात्तेन मुखेन साधुत्वमय-

* इत उत्तरं "घिप्रदेशाः ह्रस्वे घीत्येवमादय" इत्यपि क्व चित्पाठः ॥
† क्षेत्रस्य पतये नमः। क्षेत्रस्य पत्ये नम इत्यपि क्व चिदुदाहरणम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्मयादीनां विधीयते । अयस्मयं वर्म । अयस्मयानि पात्राणि । क्व चिदुभयमपि भवति । स सुष्टुभा स ऋक्वता गणेन । यदत्त्वात्कुत्वं भत्वाज् जशत्वं न भवति । छन्दसीति किम् । अयोमयं वर्म ॥

बहुषु बहुवचनम् ॥ २१ ॥

इयाप्प्रातिपदिकात्स्वादयः लस्य तिबादय इति सामान्येन बहुवचनं विहितं तस्यानेन बहुत्वसंख्या वाच्यत्वेन विधीयते । बहुषु बहुवचनं भवति । बहुत्वमस्य वाच्यं भवतीति यावत् । कर्मादयोप्यत्र विभक्तीनामर्था वाच्यास्तदीये बहुत्वे बहुवचनं कर्मादिषु बहुषु बहुवचनमित्यर्थः । ब्राह्मणाः पठन्ति । यत्र च संख्या संभवति तत्रायमुपदेशः । अव्ययेभ्यस्तु निःसंख्येभ्यः सामान्यविहिताः स्वादयो विद्यन्तएव ॥

द्व्येकयोर्द्विवचनैकवचने ॥ २२ ॥

द्वित्वैकत्वयोरर्थयोर्द्विवचनैकवचने भवतः । एतदपि सामान्यविहितयोर्द्विवचनैकवचनयोरर्थाभिधानम् । द्वित्वे द्विवचनं भवति एकत्वे एकवचनं भवति । ब्राह्मणौ पचतः । ब्राह्मणः पचति ॥

कारके ॥ २३ ॥

कारकइति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते । कारकइत्यधिकारो वेदितव्यः । यदित ऊर्द्ध्वमनुक्रमिष्यामः कारकइत्येवं तद्वेदितव्यम् । कारकशब्दश्च निमित्तपर्यायः । कारकं हेतुरित्यनर्थान्तरम् । कस्य हेतुः । क्रियायाः । वक्ष्यति ध्रुवमपाये ऽपादानम् । ग्रामादागच्छति । पर्वतादवरोहति । कारकइति किम् । वृक्षस्य पर्णं पतति । कुड्यस्य पिण्डः पतति । अकथितं च । अकथितं च कारकं कर्मसंज्ञं भवति । माणवकं पन्थानं पृच्छति । कारकइति किम् । माणवकस्य पितरं पन्थानं पृच्छति । कारकसंशब्दनेषु चाननैव विशेषणेन व्यवहारो विज्ञायते ॥

ध्रुवमपाये ऽपादानम् ॥ २४ ॥

ध्रुवं यदपाययुक्तमपाये साध्ये यदवधिभूतं तत्कारकमपादानसंज्ञं भवति । ग्रामादागच्छति । पर्वतादवरोहति । सार्थाद्धीनः । रथात्पतितः ॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् ॥ * ॥ अधर्माज्जुगुप्सते । अधर्मादुपरमति । धर्मान्नप्रमाद्यति । अपादानप्रदेशा अपादाने पञ्चमीत्येवमादयः ॥

भीत्रार्थानां भयहेतुः ॥ २५ ॥

बिभेत्यर्थानां त्रायत्यर्थानां च धातूनां प्रयोगे भयहेतुर्यस्तत्कारकमपादानसंज्ञं भवति । चौरेभ्यो बिभेति । चौरेभ्य उद्विजते । त्रायत्यर्थानाम् । चौरेभ्यस्त्रायते । चौरेभ्यो रक्षति । भयहेतुरिति किम् । अरण्ये बिभेति । अरण्ये त्रायते ॥

पराजेरसोढः ॥ २६ ॥

परापूर्वस्य जयतेः प्रयोगे ऽसोढो योर्थः सोढुं न शक्यते तत्कारकमपादानसंज्ञं भवति । अध्ययनात्पराजयते । असोढ इति किम् । शत्रून्पराजयते ॥

वारणार्थानामीप्सितः ॥ २७ ॥

वारणार्थानां धातूनां प्रयोगे य ईप्सितोर्थः तत्कारकमपादानसंज्ञं भवति । प्रवृत्तिविघातो वारणम् । यवेभ्यो गां वारयति । यवेभ्यो गां निवर्त्तयति । ईप्सित इति किम् । यवेभ्यो गां वारयति क्षेत्रे ॥

अन्तर्द्धौ येनादर्शनमिच्छति ॥ २८ ॥

व्यवधानमन्तर्द्धिः । अन्तर्द्धिनिमित्तं येनादर्शनमात्मन इच्छति तत्कारकमपादानसंज्ञं भवति । उपाध्यायादन्तर्द्धत्ते । उपाध्यायान्निलीयते । मा मामुपाध्यायो द्राक्षीदिति निलीयते । अन्तर्द्धाविति किम् । चौराय विद्योतते । इच्छतिग्रहणं किम् । अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ॥

आख्यातोपयोगे ॥ २९ ॥

आख्याता प्रतिपादयिता । उपयोगो नियमपूर्वकं विद्याग्रहणम् । उपयोगे साध्ये य आख्याता तत्कारकमपादानसंज्ञं भवति । उपाध्यायादधीते । उपाध्यायादागमयति । उपयोगइति किम् । नटस्य शृणोति ॥

जनिकर्त्तुः प्रकृतिः ॥ ३० ॥

जनेः कर्त्ता जनिकर्त्ता । जन्यर्थस्य जन्मनः कर्त्ता जायमानः तस्य या प्रकृतिः कारणं हेतुः तत् कारकमपादानसंज्ञं भवति । शृङ्गाच्छरो जायते । गोमयाद्वृश्चिको जायते ॥

भुवः प्रभवः ॥ ३१ ॥

कर्त्तुरिति वर्त्तते । भवनं भूः । प्रभवत्यस्मादिति प्रभवः । भूकर्त्तुः प्रभवो यस्तत्कारकमपादानसंज्ञं भवति । हिमवतो गङ्गा प्रभवति । काश्मीरेभ्यो वितस्ता प्रभवति । प्रथमत उपलभ्यतइत्यर्थः ॥

कर्मणा यमभिप्रैति स संप्रदानम् ॥ ३२ ॥

कर्मणा करणभूतेन कर्त्ता यमभिप्रैति तत्कारकं संप्रदानसंज्ञं भवति । अन्वर्थसंज्ञाविज्ञानाद्ददातिकर्मणेति विज्ञायते । उपाध्यायाय गां ददाति । माणवकाय भिक्षां ददाति ॥ क्रियाग्रहणमपि कर्त्तव्यम् ॥ * ॥ क्रियायापि यमभिप्रैति स संप्रदानम् । श्राद्धाय निगर्हते । युद्धाय संनह्यते । पत्ये शेते । संप्रदानप्रदेशाः चतुर्थी संप्रदानइत्येवमादयः ॥ कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य च कर्मसंज्ञा ॥ पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रुच्यर्थानां प्रीयमाणः ॥ ३३ ॥

रुचिना समानार्था रुच्यर्थाः । अन्यकर्तृको ऽभिलाषो रुचिः । रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो यो ऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । देवदत्ताय रोचते मोदकः । यज्ञदत्ताय स्वदते पूपः । देवदत्तस्यास्याभिलाषस्य मोदकः कर्त्ता । प्रीयमाण इति किम् । देवदत्ताय रोचते मोदकः पथि ॥

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ॥ ३४ ॥

श्लाघ ह्नुङ् स्था शप इत्येतेषां ज्ञीप्स्यमानो यो ऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । ज्ञीप्स्यमानो ज्ञपयितुमिष्यमाणो बोधयितुमभिप्रेतः । देवदत्ताय श्लाघते । देवदत्तं श्लाघमानस्तां श्लाघां तमेव ज्ञपयितुमिच्छतीत्यर्थः । एवं देवदत्ताय ह्नुते । यज्ञदत्ताय ह्नुते । देवदत्ताय तिष्ठते । यज्ञदत्ताय तिष्ठते । देवदत्ताय शपते । यज्ञदत्ताय शपते । ज्ञीप्स्यमान इति किम् । देवदत्ताय श्लाघते पथि ॥

धारेरुत्तमर्णः ॥ ३५ ॥

धारयतेः प्रयोगे उत्तमर्णो यो ऽर्थः तत्कारकं संप्रदानसंज्ञं भवति । उत्तममृणं यस्य स उत्तमर्णः । कस्य चोत्तममृणं, यदीयं धनं, धनस्वामी प्रयोक्ता उत्तमर्णः स संप्रदासंज्ञो भवति । देवदत्ताय शतं धारयति । यज्ञदत्ताय शतं धारयति । उत्तमर्ण इति किम् । देवदत्ताय शतं धारयति यामे ॥

स्पृहेरीप्सितः ॥ ३६ ॥

स्पृह ईप्सायां, चुरादावदन्तः पठ्यते, तस्य ईप्सितो यो ऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति । ईप्सित इत्यभिप्रेत उच्यते । पुष्पेभ्यः स्पृहयति । फलेभ्यः स्पृहयति । ईप्सित इति किम् । पुष्पेभ्यो वने स्पृहयति ॥

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ ३७ ॥

अमर्षः क्रोधः । अपकारो द्रोहः । अक्षमा ईर्ष्या । गुणेषु दोषाविष्करणमसूया । क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपस्तत्कारकं संप्रदानसंज्ञं भवति । क्रोधस्तावत्कोप एव, द्रोहादयोपि कोपप्रभावा एव गृह्यन्ते । तस्मात्सामान्येन विशेषणं यं प्रति कोप इति । देवदत्ताय क्रुद्धति । देवदत्ताय द्रुह्यति । देवदत्तायेर्ष्यति । देवदत्तायासूयति । यं प्रति कोप इति किम् । भार्यामीर्ष्यति । मैनामन्यो द्राक्षीदिति ॥

क्रुधद्रुहोरुपसृष्टयोः कर्म ॥ ३८ ॥

पूर्वेण संप्रदानसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । क्रुधद्रुहोरुपसृष्टयोरुपसर्गसंवृत्योर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं भवति । देवदत्तमभिक्रुध्यति । देवदत्तमभिद्रुह्यति । उपसृष्टयोरिति किम् । देवदत्ताय क्रुध्यति । यज्ञदत्ताय द्रुह्यति ॥

राधीक्ष्योर्यस्य विप्रश्नः ॥ ३९ ॥

राधेरीक्षेश्च कारकं संप्रदानसंज्ञं भवति, कीदृशं, यस्य विप्रश्नः, विविधः प्रश्नः विप्रश्नः, स कस्य भवति, यस्य शुभाशुभं पृच्छ्यते । देवदत्ताय राध्यति । देवदत्तायेक्षते । नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थः ॥

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता ॥ ४० ॥

प्रति आङ् इत्येवंपूर्वस्य श्रुणोतेः कारकं संप्रदानसंज्ञं भवति, कीदृशं, पूर्वस्य कर्त्ता । प्रतिपूर्व आङ्पूर्वश्च श्रुणोतिरभ्युपगमे प्रतिज्ञाने वर्त्तते । स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति । तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्त्ता संप्रदानसंज्ञो भवति । देवदत्ताय गां प्रतिश्रुणोति । देवदत्ताय गामाश्रुणोति । प्रतिजानीतदित्यर्थः ॥

अनुप्रतिगृणश्च ॥ ४१ ॥

पूर्वस्य कर्त्तेति वर्त्तते । अनुपूर्वस्य प्रतिपूर्वस्य च गृणातेः कारकं पूर्वस्याः क्रियायाः कर्तृभूतं संप्रदानसंज्ञं भवति । होत्रे ऽनुगृणाति । होता प्रथमं शंसति तमन्यः प्रोत्साहयति । अनुगरः प्रतिगर इति हि शंसितुः प्रोत्साहने वर्त्तते । होत्रे ऽनुगृणाति । होतारं शंसन्तं प्रोत्साहयतीत्यर्थः ॥

साधकतमं करणम् ॥ ४२ ॥

क्रियाप्रसिद्धौ यत्प्रकृष्टोपकारकं विवक्षितं तत्साधकतमं कारकं करणसंज्ञं भवति । दात्रेण लुनाति । परशुना छिनत्ति । तमब्ग्रहणं किम् । गङ्गायां घोषः । कूपे गर्गकुलम् । करणप्रदेशाः । कर्तृकरणयोस्तृतीयेत्येवमादयः ॥

दिवः कर्म च ॥ ४३ ॥

पूर्वेण करणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते । दिवः साधकतमं यत्कारकं तत्कर्मसंज्ञं भवति चकारात्करणसंज्ञं च । अक्षान्दीव्यति । अक्षैर्दीव्यति ॥

परिक्रयणे संप्रदानमन्यतरस्याम् ॥ ४४ ॥

साधकतममिति वर्त्तते । पूर्वेण करणसंज्ञायां प्राप्तायां संप्रदानसंज्ञा पक्षे विधीयते । परिक्रयणे साधकतमं कारकमन्यतरस्यां संप्रदानसंज्ञं भवति । परिक्रयणं नियतकालं वेतनादिना स्वीकरणं नात्यन्तिकः क्रय एव । शताय परिक्रीतो ऽनुब्रूहि । शतेन परिक्रीतो ऽनुब्रूहि । सहस्रेण परिक्रीतो ऽनुब्रूहि । सहस्राय परिक्रीतो ऽनुब्रूहि ॥

आधारो ऽधिकरणम् ॥ ४५ ॥

आधियन्ते ऽस्मिन् क्रिया इत्याधारः । कर्तृकर्मणोः क्रियाश्रयभूतयोर्धारणक्रियां प्रति य आधारस्तत्कारकमधिकरणसंज्ञं भवति । कटे आस्ते । कटे शेते । स्थाल्यां पचति । अधिकरणप्रदेशाः सप्तम्यधिकरणे चेत्येवमादयः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अधिशीङ्स्थासां कर्म ॥ ४६ ॥

पूर्वेणाधिकरणसंज्ञायां प्राप्तायां कर्मसंज्ञा विधीयते। अधिपूर्वाणां शीङ् स्था आस् इत्येतेषामाधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममधिशेते। ग्राममधितिष्ठति। पर्वतमध्यास्ते ॥

अभिनिविशश्च ॥ ४७ ॥

अभिनिपूर्वस्य विशतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममभिनिविशते। कथं कल्याणेऽभिनिवेशः, पापेऽभिनिवेशः, यावा संज्ञा यस्मिन्यस्मिन् संज्ञिन्यभिनिविशतइति। अन्यतरस्यामिति वर्त्तते परिक्रयणे संप्रदानमन्यतरस्यामित्यतः। सा च व्यवस्थितविभाषा विज्ञायते ॥

उपान्वध्याङ्वसः ॥ ४८ ॥

उप अनु अधि आङ् इत्येवंपूर्वस्य वसतेराधारो यस्तत्कारकं कर्मसंज्ञं भवति। ग्राममुपवसति सेना। पर्वतमुपवसति। ग्राममनुवसति। ग्राममधिवसति। ग्राममावसति ॥ वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः ॥ * ॥ ग्रामे उपवसति। भोजननिवृत्तिं करोतीत्यर्थः ॥

कर्तुरीप्सिततमं कर्म ॥ ४९ ॥

कर्तुः क्रियया यदाप्तुमिष्टतमं तत्कारकं कर्मसंज्ञं भवति। कटं करोति। ग्रामं गच्छति। कर्तुरिति किम्। मापेष्यश्वं बध्नाति। कर्मणा ईप्सिता माषा न कर्तुः। तमव्ययहणं किम्। पयसौदनं भुङ्क्ते। कर्मेत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्। इतरथा ऽऽधारस्यैव हि स्यात्। गेहं प्रविशतीति। ओदनं पचति सक्तून्पिबतीत्यादिषु न स्यात्। पुनः कर्मग्रहणात् सर्वत्र सिद्धं भवति। कर्मप्रदेशाः कर्मणि द्वितीयेत्येवमादयः ॥

तथायुक्तं चानीप्सितम् ॥ ५० ॥

येन प्रकारेण कर्तुरीप्सिततमं क्रियया युज्यते तेनैव चेत्प्रकारेण यदनीप्सितं युक्तं भवति तस्य कर्मसंज्ञा विधीयते। ईप्सितादन्यत्सर्वमनीप्सितं द्वेष्यमितरच्च। विषं भक्षयति। वैरान्यश्यति। ग्रामं गच्छन् वृक्षमूलान्युपसर्पति ॥

अकथितं च ॥ ५१ ॥

अकथितं च यत्कारकं तत्कर्मसंज्ञं भवति। केनाकथितमधादानादिविशेषकथाभिः। परिगणनं कर्त्तव्यम्।

दुहियाचिरुधिप्रच्छिभिक्षिचित्रा-
मुपयोगनिमित्तमपूर्वविधौ।
ब्रुविशासिगुणेन च यत्सचते
तदकीर्त्तितमाचरितं कविना ॥

उपयुज्यतइत्युपयोगः, पयः प्रभृति, तस्य निमित्तं गवादि, तस्योपयुज्यमानपयःप्रभृतिनिमित्तस्य गवादेः कर्मसंज्ञा विधीयते। पाणिना कांस्यपात्र्यां गां दोग्धि पयः। पाण्यादिकमप्युपयोगनिमित्तं तस्य कस्मान्न भवति। नैतदस्ति। विहिता हि तत्र करणादिसंज्ञा। तदर्थमाह। अपूर्वविधाविति। ब्रुविशासिगुणेन च यत्सचते। ब्रुविशास्योर्गुणः साधनं प्रधानं कर्म धर्मादिकं, तेन यत्संबध्यते, तदकीर्तितमाचरितं कविना, तदर्थितमुक्तं सूत्रकारेण। दुहि,गां दोग्धि पयः। याचि,पौरवं गां याचते। रुधि, गामवरुणद्धि व्रजम्। प्रच्छि,माणवकं पन्थानं पृच्छति। भिक्षि, पौरवं गां भिक्षते। चित्र्, वृक्षमवचिनोति फलानि। ब्रुवि, माणवकं धर्मं ब्रूते। शासि,माणवकं धर्ममनुशास्ति ॥

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ ॥ ५२ ॥

अर्थशब्दः प्रत्येकमभिसंबध्यते। गत्यर्थानां बुद्ध्यर्थानां प्रत्यवसानार्थानां च धातूनां तथा शब्दकर्मकाणामकर्मकाणां च अण्यन्तानां यः कर्त्ता स ण्यन्तानां कर्मसंज्ञो भवति। गच्छति माणवको ग्रामम्। गमयति माणवकं ग्रामम्। याति माणवको ग्रामम्। यापयति माणवकं ग्रामम्। गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः ॥ * ॥ नयति भारं देवदत्तः। नाययति भारं देवदत्तेन। वहति भारं देवदत्तः। वाहयति भारं देवदत्तेन ॥ वहेरनियन्तृकर्तृकस्येति वक्तव्यम् ॥ * ॥ इह प्रतिषेधो मा भूत्। वहन्ति यवान् बलीवर्दाः। वाहयति यवान् बलीवर्दानिति। बुद्धि। बुध्यते माणवको धर्मम्। बोधयति माणवकं धर्मम्। वेत्ति माणवको धर्मम्। वेदयति माणवकं धर्मम्। प्रत्यवसानमभ्यवहारः। भुङ्क्ते माणवक ओदनम्। भोजयति माणवकमोदनम्। अश्नाति माणवक ओदनम्। आशयति माणवकमोदनम् ॥ आदिखाद्योः प्रतिषेधो वक्तव्यः ॥ * ॥ अत्ति माणवक ओदनम्। आदयते माणवकेनौदनम्। खादति माणवकः। खादयति माणवकेन ॥ भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः ॥ * ॥ भक्षयति पिण्डीं देवदत्तः। भक्षयति पिण्डीं देवदत्तेनेति। अहिंसार्थस्येति किम्। भक्षयन्ति बलीवर्दाः सस्यं, भक्षयन्ति बलीवर्दान्सस्यम्। शब्दकर्मणाम्। अधीते माणवको वेदम्। अध्यापयति माणवकं वेदम्। पठति-माणवको वेदम्। पाठयति माणवकं वेदम्। अकर्मकाणाम्। आस्ते देवदत्तः। आसयति देवदत्तम्। शेते देवदत्तः। शाययति देवदत्तम्। एतेषामिति किम्। पचत्योदनं देवदत्तः। पाचयत्योदनं देवदत्तेनेति। अण्यन्तानामिति किम्। गमयति देवदत्तो यज्ञदत्तं, तमपरः प्रयुङ्क्ते, गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हृक्रोरन्यतरस्याम् ॥ ५३ ॥

अणि कर्त्ता स णाविति वर्त्तते। हरतेः करोतेश्चाण्यन्तयोर्यः कर्त्ता स ण्यन्तयोरन्यतरस्यां कर्मसंज्ञो भवति। हरति भारं माणवकः। हारयति भारं माणवकं माणवकेनेति वा। करोति कटं देवदत्तः। कारयति कटं देवदत्तं देवदत्तेनेति वा ॥ अभिवादिदृशोरात्मनेपदउपसंख्यानम् ॥ * ॥ अभिवदति गुरुं देवदत्तः। अभिवादयते गुरुं देवदत्तं देवदत्तेनेति वा। पश्यन्ति भृत्या राजानम्। दर्शयते भृत्यान् राजानं दर्शयते भृत्यैरिति वा। आत्मनेपदइति किम्। दर्शयति चैत्रं मैत्रमपरः। प्राप्तविकल्पत्वाद् द्वितीयैव। अभिवादयति गुरुं माणवकेन पिता। अप्राप्तविकल्पत्वात्तृतीयैव ॥

स्वतन्त्रः कर्ता ॥ ५४ ॥

स्वतन्त्र इति प्रधानभूत उच्यते। अगुणीभूतो यः। क्रियाप्रसिद्धौ स्वातन्त्र्येण विवक्ष्यते तत्कारकं कर्तृसंज्ञं भवति। देवदत्तः पचति। स्थाली पचति। कर्तृप्रदेशाः कर्तृकरणयोस्तृतीयेत्येवमादयः ॥

तत्प्रयोजको हेतुश्च ॥ ५५ ॥

तदिति अनन्तरः कर्ता परामृश्यते। तस्य प्रयोजकः तत्प्रयोजकः। निपातनात्समासः। स्वतन्त्रस्य प्रयोजको योऽर्थः तत्कारकं हेतुसंज्ञं भवति चकारात्कर्तृसंज्ञं च। संज्ञासमावेशार्थश्चकारः। कुर्वाणं प्रयुङ्क्ते। कारयति। हारयति। हेतुत्वात् णिचो निमित्तं कर्तृत्वाच्च कर्तृप्रत्ययेनोच्यते। हेतुप्रदेशाः हेतुमति चेत्येवमादयः ॥

प्राग्रीश्वरान्निपाताः ॥ ५६ ॥

अधिरीश्वरइति वक्ष्यति प्रागेतस्मादवधेर्यानित ऊर्ध्वमनुक्रमिष्यामः निपातसंज्ञास्ते वेदितव्याः। वक्ष्यति "चादयोऽसत्त्वे" च वा ह अह। प्राग्वचनं संज्ञासमावेशार्थम्। गत्युपसर्गकर्मप्रवचनीयसंज्ञाभिस्सह निपातसंज्ञा समाविशति। रेफोच्चारणमीश्वरे तोसुन्कसुनावित्ययमवधिर्मा विज्ञायीति ॥

रीश्वराद्रीश्वरान्मा भूत् क्रन्मेजन्तः परोऽपि सः।
समासेष्वव्ययीभावो लौकिकं चातिवर्त्तते ॥

चादयोऽसत्त्वे ॥ ५७ ॥

चादयो निपातसंज्ञा भवन्ति न चेत्सत्त्वे वर्तन्ते। प्रसज्य प्रतिषेधो यं,सत्त्वमिति द्रव्यमुच्यते ॥ च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। नह। हन्त। माकिम्। नकिम्। माङ्। माङो ङकारो विशेषणार्थो माङि लुङिति। इह न भवति। मा भवतु, मा भविष्यति। नञ्। यावत्। तावत्। त्वा। त्वै। द्वै। रै। श्रौषट्। वौषट्। स्वाहा। वषट्। स्वधा। ओम्। किल। तथा। अथ सु। स्म। अस्मि। अ। इ। उ। ऋ। ऌ। ए। ऐ। ओ। औ। अम्। तक। उञ्। उकञ्। वेलायाम्। मात्रायाम्। यथा। यत्। यम्। तत्। किम्। पुरा। अद्धा। धिक्। हाहा। हे। है। प्याट्। पाट्। थाट्। अहो। उताहो। हो। तुम्। तथाहि। खलु। आम्। आहो। अथो। ननु। मन्ये। मिथ्या। असि। ब्रूहि। तु। नु। इति। इव। वत्। चन। बत। इह। आम्। शम्। कम्। अनुकम्। नहिकम्। हिकम्। मुकम्। सत्यम्। ऋतम् * अद्धा। इद्धा। मुधा। नोचेत्। नचेत्। नहि। जातु। कथम्। कुतः। कुत्र। अव। अनु। हाहो। हैहा। ईहा। आहोस्वित्। छम्बट्। खम्। दिष्ट्या। पशु। वट्। सह। आनुपक्। अङ्ग। फट्। ताजक्। अये। अरे। चटु। बाट्। कुम्। खुम्। घुम्। हुम्। आईम्। शीम्। सीम्। वै। † उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाताः। उपसर्गप्रतिरूपकाः।

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि।
सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥

अच उपसर्गात्त इति तत्वं न भवति। दुर्नीतम्। दुर्नयः। दुर्निर्णयः। उपसर्गादिति णत्वं न भवति। असत्त्वइति किम्। पशुर्वै पुरुषः। पशुः पुरोडाशः। निपातप्रदेशाः स्वरादिनिपातमव्ययमित्येवमादयः ॥

प्रादयः ॥ ५८ ॥

प्रादयोऽसत्त्वे निपातसंज्ञा भवन्ति। प्र। परा। अप। सम्। अनु। अव। निस्। दुस्। वि। आङ्। नि। अधि। अपि। अति। सु। उत्। अभि। प्रति। परि। उप। पृथग्योगकरणमुत्तरसंज्ञाविशेषणार्थम्। उपसर्गाः क्रियायोगइति चादीनामुपसर्गसंज्ञा मा भूत्। असत्त्वइत्येव। परा जयति सेना ॥

उपसर्गाः क्रियायोगे ॥ ५९ ॥

प्रादयः क्रियायोगे उपसर्गसंज्ञा भवन्ति। प्रणयति। परिणयति। प्रणायकः। परिणायकः। क्रियायोगइति किम्। प्रगतो नायको ऽस्माद्देशात् प्रनायको देशः ॥ मरुच्छब्दस्य चोपसंख्यानं कर्त्तव्यम् ॥ * ॥ मरुद्भिर्दत्तो मरुत्तः। संज्ञाविधानसामर्थ्यादनजन्तत्वेपि अच उपसर्गात्त इति तत्वं भवति। अच्छब्दस्योपसंख्यानम् ॥ * ॥ आतश्चोपसर्गइति अङ् भवति। अद्धा। उपसर्गप्रदेशा उपसर्गे घोः किरित्येवमादयः ॥

---

* ऋतमित्येतदुत्तरं "वाकिर्, नकिर्, आङ्, "अ, मा, नो, ना, प्रतिषेधे," उत, दद्ध, "इत्येते क्व चित् पुस्तके दृश्यन्ते।

† त्वै, तुवै, न्वै, नुवै, अध, अधस्, स्मि, अच्छ, अदस्, दद्ध, हैहै, हैहै, नौ, म, आस्, श्रस्, शुकम्, सम्, वव, वात्, डिकम्, चिनुक्, वशम्, शिकम्, भवकम्, सनुकम्, नुकम्, अन्त, द्यौ, सुक्, भाजक्, अले, वद्, वाद्, कीम्, एते ऽधिकाः पुस्तकान्तरेषु।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गतिश्च ॥ ६० ॥

गतिसंज्ञकाश्च प्रादयो भवन्ति क्रियायोगे । प्रकृत्य । प्रकृतम् । यत्प्रकरोति । योगविभाग उत्तरार्थः । उत्तरत्र गतिसंज्ञैव यथा स्यात्, उपसर्गसंज्ञा मा भूत् । उरीस्यादित्यत्रोपसर्गप्रादुर्भ्यामस्तिर्यच्परे इति षत्वं प्रसज्येत । चकारः संज्ञासमावेशार्थः । प्रणीतम् । अभिपिक्तम् । गतिरनन्तर इति स्वर उपसर्गादिति णत्वषत्वे च भवतः । कारिकाशब्दस्योपसंख्यानम् ॥ * ॥ कारिकाकृत्य । कारिकाकृतम् । यत्कारिकाकरोति । पुनश्चनसौ छन्दसि गतिसंज्ञौ भवत इति वक्तव्यम् ॥ * ॥ पुनरुत्स्यूतं वासो देयम् । गतिर्गताविति निघातो भवति । चनोहिः । गतिरनन्तर इति स्वरः । गतिप्रदेशाः कुगतिप्रादय इत्येवमादयः ॥

कर्यादिव्विडाचश्च ॥ ६१ ॥

कर्यादयः शब्दाः च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञा भवन्ति । च्विडाचोः कृभ्वस्तियोगे विधानं तत्साहचर्यादूर्यादीनामपि तैरेव योगे गतिसंज्ञा विधीयते । करीउररीशब्दावङ्गीकरणे विस्तारे च । करीकृत्य । करीकृतम् । यदूरीकरोति । उररीकृत्य । उररीकृतम् । यदुररीकरोति । पापी । ताली । आताली । वेताली । धूसी । शकला । संशकला । ध्वंसकला । भ्रंशकला । एते शकलादयो हिंसायाम् । शकलाकृत्य । संशकलाकृत्य । ध्वंसकलाकृत्य । भ्रंशकलाकृत्य । गुलुगुधा पीडार्थे । गुलुगुधाकृत्य । सजूः सहार्थे । सजूःकृत्य । फलू, फली, विक्ली, आक्ली, इति विकारे । फलूकृत्य । फलीकृत्य । विक्लीकृत्य । आक्लीकृत्य । आलेष्टी, करालो, केवाली, शेवाली, वर्षाली, मस्मसा, मसमसा, एते हिंसायाम् । वषट् । वौषट् । श्रौषट् । स्वाहा । स्वधा । बन्धा । प्रादुस् । श्रत् । आविस् । च्व्यन्ताः खल्वपि । शुक्लीकृत्य । शुक्लीकृतम् । यच्छुक्लीकरोति । डाच् । पटपटाकृत्य । पटपटाकृतम् । यत्पटपटाकरोति ॥

अनुकरणं चानितिपरम् ॥ ६२ ॥

इतिः परो यस्मादिति बहुव्रीहिः । अनुकरणमनितिपरं क्रियायोगे गतिसंज्ञं भवति । खाट्कृत्य । खाट्कृतम् । यत् खाट्करोति । अनितिपरमिति किम् । खादिति कृत्वा निरष्ठीवत् ॥

आदरानादरयोः सदसती ॥ ६३ ॥

प्रीत्यतिशय आदरः † । परिभवोदासीन्यमनादरः । आदरानादरयोर्यथाक्रमं सदसच्छब्दौ गतिसंज्ञौ भवतः । सत्कृत्य । सत्कृतम् । यत्सत्करोति । असत्कृत्य । असत्कृतम् । यदसत्करोति । आदरानादरयोरिति किम् । सत्कृत्वा काण्डं गतः । असत्कृत्वा काण्डं गतः ॥

† प्रीतिसंभ्रम इति पाठान्तरम् ।

भूषणे ऽलम् ॥ ६४ ॥

अलमिति प्रतिषेधे सामर्थ्ये पर्याप्तौ भूषणे चेति विशेषणमुपादीयते । भूषणे यो ऽलंशब्दः स गतिसंज्ञो भवति । अलंकृत्य । अलंकृतम् । यदलंकरोति । भूषणइति किम् । अलं भुक्त्वा ओदनं गतः ॥

अन्तरपरिग्रहे ॥ ६५ ॥

अन्तःशब्दो ऽपरिग्रहेर्थे गतिसंज्ञो भवति । परिग्रहः स्वीकरणं तदभावे गतिसंज्ञा विधीयते । अन्तर्हृत्य । अन्तर्हृतम् । यदन्तर्हरन्ति । अपरिग्रहइति किम् । अन्तर्हृत्वा भूषिकां श्येनो गतः । परिगृह्य गत इत्यर्थः । अन्तःशब्दस्याङ्क्रियाविधिणत्वेष्वुपसर्गसंज्ञा वक्तव्या ॥ * ॥ अन्तर्धा । अन्तर्धिः । अन्तर्णयति ॥

कर्णेमनसी अश्रद्धाप्रतीघाते ॥ ६६ ॥

कर्णेशब्दो मनस्शब्दश्च अश्रद्धाप्रतीघाते गतिसंज्ञौ भवतः । कर्णेहत्य पयः विबति । मनोहत्य पयः पिबति । तावत्पिबति यावदस्याभिलाषो निवृत्तः । अश्रद्धा प्रतिहतेत्यर्थः । अश्रद्धाप्रतीघातइति किम् । कर्णे हत्वा गतः । मनो हत्वा गतः ॥

पुरो ऽव्ययम् ॥ ६७ ॥

असिप्रत्ययान्तः पुरःशब्दो ऽव्ययं स गतिसंज्ञो भवति । समासस्वरोपचाराः प्रयोजनम् । पुरस्कृत्य । पुरस्कृतम् । यत्पुरस्करोति । अव्ययमिति किम् । पूः, पुरौ, पुरः कृत्वा काण्डं गतः ॥

अस्तं च ॥ ६८ ॥

अस्तंशब्दो मकरान्तो ऽव्ययमनुपलब्धौ वर्त्तते स गतिसंज्ञो भवति । अस्तंगत्य सविता पुनरुदेति । अस्तंगतानि धनानि । यदस्तंगच्छति । अव्ययमित्येव । अस्तं काण्डम् । क्षिप्रमित्यर्थः ॥

अच्छ गत्यर्थवदेषु ॥ ६९ ॥

अच्छशब्दो ऽव्ययमभिशब्दस्यार्थे वर्त्तते । स गत्यर्थेषु धातुषु वदतौ च गतिसंज्ञो भवति । अच्छगत्य । अच्छगतम् । यदच्छगच्छति । वदतौ । अच्छोद्य । अच्छोदितम् । यदच्छवदति । अव्ययमित्येव । उदकमच्छं गच्छति ॥

अदो ऽनुपदेशे ॥ ७० ॥

अदःशब्दस्त्यदादिषु पठ्यते सोनुपदेशे गतिसंज्ञो भवति । उपदेशः परार्थः प्रयोगः । स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्त्युपदेश इति सो ऽस्य विषयः । अदःकृत्य । अदःकृतम् । यददःकरोति । अनुपदेशइति किम् । अदः कृत्वा काण्डं गत इति परस्य कथयति ॥

तिरो ऽन्तर्द्धौ ॥ ७१ ॥

अन्तर्द्धिर्व्यवधानम् । तत्र तिरःशब्दो गतिसंज्ञो भवति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तिरोभूय। तिरोभूतम्। यत् तिरोभवति। अन्तर्द्धाविति किम्। तिरो भूत्वा स्थितः। पार्श्वतो भूत्वेत्यर्थः॥

विभाषा कृञि ॥ ७२ ॥

अन्तर्द्धाविति वर्तते। प्राप्तविभाषेयम्। तिरःशब्दः करोतौ परतो विभाषा गतिसंज्ञो भवति। तिरःकृत्य। तिरस्कृत्य। तिरस्कृतम्। यत्तिरस्करोति। तिरस्कृत्वा। तिरःकृत्वा। अन्तर्द्धावित्येव। तिरः कृत्वा काष्ठं तिष्ठति॥

उपाजेन्वाजे ॥ ७३ ॥

विभाषा कृञीति वर्तते। उपाजेऽन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य सामर्थ्याधाने वर्त्तेते तौ कृञि विभाषा गतिसंज्ञौ भवतः। उपाजेकृत्य। उपाजे कृत्वा। अन्वाजेकृत्य। अन्वाजे कृत्वा॥

साक्षात्प्रभृतीनि च ॥ ७४ ॥

विभाषा कृञीति वर्त्तते। साक्षात्प्रभृतीनि शब्दरूपाणि कृञि विभाषा गतिसंज्ञानि भवन्ति। साक्षात्प्रभृतिषु च्व्यर्थवचनम्॥ ॰॥ साक्षात्कृत्य। साक्षात्कृत्वा। मिथ्याकृत्य। मिथ्या कृत्वा। साक्षात्। मिथ्या। चिन्ता। भद्रा। लोचना। विभाषा। संपत्का। आस्या। श्रमा। श्रद्धा। प्राजर्या। प्राजरुहा। बीजर्या। बीजरुहा। संसर्या। अर्थे। लवणम्। उष्णम्। शीतम्। उदकम्। आर्द्रम्। गतिसंज्ञासंनियोगेन लवणादीनां मकारान्तत्व निपात्यते। अग्नौ। वशे। विक्रम्यते। विहसने। प्रहसने। प्रतपने। प्रादुस्। नमस्। आविस्॥

अनत्याधानउरसिमनसी ॥ ७५ ॥

विभाषाकृञीति वर्त्तते। अत्याधानमुपश्लेषणं तदभावे ऽनत्याधाने उरसिमनसी शब्दौ विभाषा कृञि गतिसंज्ञौ भवतः। उरसिकृत्य। उरसि कृत्वा। मनसिकृत्य। मनसि कृत्वा। अनत्याधानइति किम्। उरसि कृत्वा पाणिं शेते॥

मध्येपदेनिवचने च ॥ ७६ ॥

विभाषा कृञीति वर्त्तते। चकारादनत्याधानइति च। मध्ये पदे निवचने इत्येते शब्दा अनत्याधाने विभाषा कृञि गतिसंज्ञा भवन्ति। मध्येकृत्य। मध्ये कृत्वा। पदेकृत्य। पदे कृत्वा। निवचनं वचनाभावः। निवचनेकृत्य। निवचने कृत्वा। वचं नियम्येत्यर्थः। अनत्याधानइत्येव। हस्तिनः पदे कृत्वा शिरः शेते॥

नित्यं हस्तेपाणावुपयमने ॥ ७७ ॥

कृञीति वर्तते। हस्ते पाणौ इत्येतौ शब्दौ कृञि नित्यं गतिसंज्ञौ भवत उपयमने। उपयमनं दारकर्म। पाणौकृत्य। हस्तेकृत्य। दारकर्म कृत्वेत्यर्थः। उपयमनइति किम्। हस्ते कृत्वा कार्षापणं गतः॥

प्राध्वं बन्धने ॥ ७८ ॥

कृञीति वर्तते। प्राध्वमिति मकारान्तमव्ययमानुकूल्ये वर्तते, तदानुकूल्यं बन्धनहेतुकं यदा भवति तदा प्राध्वंशब्दः कृञि नित्यं गतिसंज्ञो भवति। प्राध्वंकृत्य। बन्धनइति किम्। प्राध्वं कृत्वा शकटं गतः॥

जीविकोपनिषदावौपम्ये ॥ ७९ ॥

कृञीति वर्त्तते। जीविका उपनिषदित्येतौ शब्दौ औपम्ये विषये कृञि गतिसंज्ञौ भवतः। जीविकाकृत्य। उपनिषत्कृत्य। औपम्यइति किम्। जीविकां कृत्वा गतः॥

ते प्राग्धातोः ॥ ८० ॥

ते गत्युपसर्गसंज्ञकाः धातोः प्राक् प्रयोक्तव्याः। तथा चैवोदाहृताः। तेग्रहणमुपसर्गार्थम्। गतयो ह्यनन्तराः॥

छन्दसि परे ऽपि ॥ ८१ ॥

प्राक् प्रयोगे प्राप्ते छन्दसि परेष्वभ्यनुज्ञायन्ते। छन्दसि विषये गत्युपसर्गसंज्ञकाः परेपि पूर्वेपि प्रयोक्तव्याः। न च परेषां प्रयुज्यमानानां संज्ञाकार्यं किं चिदस्ति। केवलं परप्रयोगेपि क्रियायोग एषामस्तीति ज्ञाप्यते। याति नि हस्तिना। हन्ति नि मुष्टिना। निहन्ति मुष्टिना॥

व्यवहिताश्च ॥ ८२ ॥

व्यवहिताश्च गत्युपसर्गसंज्ञकाः छन्दसि दृश्यन्ते। आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः। आयाहि॥

कर्मप्रवचनीयाः ॥ ८३ ॥

कर्मप्रवचनीया इत्यधिकारो वेदितव्यः। यानित ऊर्द्ध्वमनुक्रमिष्यामः कर्मप्रवचनीयसंज्ञास्ते वेदितव्याः। अधिरीश्वरइति यावदुत्तरति। कर्मप्रवचनीयप्रदेशाः कर्मप्रवचनीययुक्ते द्वितीयेत्येवमादयः॥

अनुर्लक्षणे ॥ ८४ ॥

अनुशब्दो लक्षणे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। शाकल्यस्य संहितामनु प्रावर्षत्। अनडुद्यज्ञमन्वसिञ्चत्। अगस्त्यमन्वसिञ्चन्प्रजाः। किमर्थमिदमुच्यते। यावता लक्षणेत्थंभूताख्यानेति सिद्धैवानोः कर्मप्रवचनीयसंज्ञा। हेत्वर्थं तु वचनं हेतुतृतीयां बाधित्वा द्वितीयैव यथा स्यात्॥

तृतीयार्थे ॥ ८५ ॥

अनुशब्दस्तृतीयार्थे द्योत्ये कर्मप्रवचनीयसंज्ञो भवति। नदीमन्ववसिता सेना। पर्वतमन्ववसिता सेना। पर्वतेन संबद्धेत्यर्थः॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हीने ॥ ८६ ॥

हीन इति न्यून उच्यते स चोत्कृष्टापेक्षः । तेनेयं हीनोत्कृष्टसंबन्धे संज्ञा विज्ञायते । हीने द्योत्ये ऽयमनुः कर्मप्रवचनीयसंज्ञो भवति । अनुशाकटायनं वैयाकरणाः । अन्वर्जुनं योद्धारः ॥

उपोधिके च ॥ ८७ ॥

उपशब्दः अधिके हीने च द्योत्ये कर्मप्रवचनीयसंज्ञो भवति । उप खार्यां द्रोणः । उप निष्के कार्षापणम् । हीने । उपशाकटायनं वैयाकरणाः ॥

अपपरी वर्जने ॥ ८८ ॥

अपपरी शब्दौ वर्जने द्योत्ये कर्मप्रवचनीयसंज्ञौ भवतः । प्रकृतेन संबन्धिना कस्य चिदनभिसंबन्धो वर्जनम् । अप त्रिगर्त्तेभ्यो वृष्टो देवः । परि । परि त्रिगर्त्तेभ्यो वृष्टो देवः । वर्जनइति किम् । ओदनं परिषिञ्चति ॥

आङ्मर्यादावचने ॥ ८९ ॥

आङित्येष शब्दः मर्यादावचने कर्मप्रवचनीयसंज्ञो भवति । अवधिर्मर्यादा । वचनग्रहणादभिविधिरपि गृह्यते । आ पाटलिपुत्राद्वृष्टो देवः । आकुमारं यशः पाणिनेः । आ सांकाश्यात् । आ मथुरायाः । मर्यादावचनइति किम् । ईषदर्थे क्रियायोगे च मा भूत् ॥

लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः ॥ ९० ॥

लक्षणे इत्थंभूताख्याने भागे वीप्सायां च विषयभूतायां प्रति परि अनु इत्येते कर्मप्रवचनीयसंज्ञा भवन्ति । लक्षणे तावत् । वृक्षं प्रति विद्योतते विद्युत् । वृक्षं परि । वृक्षमनु । इत्थंभूताख्याने । साधुर्देवदत्तो मातरं प्रति । मातरं परि । मातरमनु । भागे । यदत्र मां प्रति स्यात् । मां परि स्यात् । मामनु स्यात् । वीप्सायाम् । वृक्षंवृक्षं प्रति सिञ्चति । परि सिञ्चति । अनु सिञ्चति । लक्षणादिष्विति किम् । ओदनं परिषिञ्चति । अथ परिशब्दयोगे पञ्चमी कस्माच्च भवति पञ्चम्यपाङ्परिभिरिति । वर्जनविषये सा विधीयते, अपशब्दसाहचर्यात् ॥

अभिरभागे ॥ ९१ ॥

लक्षणादिष्वेव भागवर्ज्जितेष्वभिः कर्मप्रवचनीयसंज्ञो भवति । वृक्षमभि विद्योतते । साधुर्देवदत्तो मातरमभि । वृक्षंवृक्षमभि सिञ्चति । अभागइति किम् । भागः स्वीक्रियमाणोंशः । यदत्र ममाभिष्यात् तद्दीयताम् । यदत्र मम भवति तद्दीयतामित्यर्थः ॥

प्रतिः प्रतिनिधिप्रतिदानयोः ॥ ९२ ॥

मुख्यसदृशः प्रतिनिधिः । दत्तस्य निर्यातनं प्रतिदानम् । प्रतिनिधिविषये प्रतिदानविषये च प्रतिः कर्मप्रवचनीयसंज्ञो भवति । अभिमन्युरर्जुनतः प्रति । माषानस्मै तिलेभ्यः प्रति यच्छति ॥

अधिपरी अनर्थकौ ॥ ९३ ॥

अधिपरी शब्दौ अनर्थकौ अनर्थान्तरवाचिनौ कर्मप्रवचनीयसंज्ञौ भवतः । कुतोध्यागच्छति । कुतः पर्यागच्छति । गत्युपसर्गसंज्ञाबाधनार्थो कर्मप्रवचनीयसंज्ञा विधीयते ॥

सुः पूजायाम् ॥ ९४ ॥

सुशब्दः पूजायामर्थे कर्मप्रवचनीयसंज्ञो भवति । सु सिक्तं भवता । सु स्तुतं भवता । धात्वर्थः स्तूयते । उपसर्गसंज्ञाश्रयं षत्वं न भवति । पूजायामिति किम् । सुपिक्तं किं तवाद्य ॥

अतिरतिक्रमणे च ॥ ९५ ॥

अतिशब्दः अतिक्रमणे चकारात्पूजायां च कर्मप्रवचनीयसंज्ञो भवति । निष्पन्नेपि वस्तुनि क्रियाप्रवृत्तिरतिक्रमणम् । अति सिक्तमेव भवता । अति स्तुतमेव भवता । पूजायाम् । अति सिक्तं भवता । अति स्तुतं भवता । शोभनं कृतमित्यर्थः ॥

अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु ॥ ९६ ॥

पदार्थे संभावने ऽन्ववसर्गे गर्हायां समुच्चये च वर्तमानः अपिः कर्मप्रवचनीयसंज्ञो भवति । पदान्तरस्याप्रयुज्यमानस्यार्थः पदार्थः । सर्पिषोपि स्यात् । मधुनोपि स्यात् । मात्रा बिन्दुः श्लोकमित्यस्यार्थे ऽपिशब्दो वर्त्तते । संभावनमधिकार्थवचनेन शक्तेरप्रतिघाताविष्करणम् । अपि सिञ्चेन्मूलकसहस्रम् । अपि स्तुयाद्राजानम् । अन्ववसर्गः कामचारानुज्ञा । अपि सिञ्च । अपि स्तुहि । गर्हा निन्दा । धिग्जाल्मं देवदत्तमपि सिञ्चेत्पलाण्डुम् । अपि स्तुयाद्वृषलम् । समुच्चये । अपि सिञ्च । अपि स्तुहि । सिञ्च च स्तुहि च । उपसर्गसंज्ञाबाधनात् षत्वं न भवति ॥

अधिरीश्वरे ॥ ९७ ॥

ईश्वरः स्वामी स च स्वमपेक्षते । तदयं स्वस्वामिसंबन्धे कर्मप्रवचनीयसंज्ञो भवति । तत्र कदा चित्स्वामिनः कर्मप्रवचनीयविभक्तिः सप्तमी भवति कदा चित्स्वात् । अधि ब्रह्मदत्ते पञ्चालाः । अधि पञ्चालेषु ब्रह्मदत्तः ॥

विभाषा कृञि ॥ ९८ ॥

अधिः करोतौ विभाषा कर्मप्रवचनीयसंज्ञो भवति । यदत्र मामधिकरिष्यति । कर्मप्रवचनीयसंज्ञापक्षे गतिसंज्ञाबाधनात् तिङि चोदात्तवतीति निघातो न भवति ॥

लः परस्मैपदम् ॥ ९९ ॥

ल इति षष्ठी आदेशापेक्षा । लादेशाः परस्मैपदसंज्ञ

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवन्ति । तिप्, तस्, झि । सिप्, थस्, थ । मिप्, वस्, मस् । शतृक्वसू च । परस्मैपदप्रदेशाः सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः ॥

तङानावात्मनेपदम् ॥ १०० ॥

तङिति प्रत्याहारो नवानां वचनानाम् । आन इति शानच्कानचोर्ग्रहणम् । पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां तङानयोरात्मनेपदसंज्ञा विधीयते । त, आताम्, झ । थास्, आथाम्, ध्वम् । इट्, वहि, महिङ् । आनः खल्वपि । शानच्कानचौ । ल इत्येव । कतीह निघ्नानाः । आत्मनेपदप्रदेशा अनुदात्तङित आत्मनेपदमित्येवमादयः ॥

तिङस्त्रीणित्रीणि प्रथममध्यमोत्तमाः ॥ १०१ ॥

तिङोऽष्टादश प्रत्ययाः नव परस्मैपदसंज्ञकाः नवात्मनेपदसंज्ञकाः तत्र परस्मैपदेषु त्रयस्त्रिकाः यथाक्रमं प्रथममध्यमोत्तमसंज्ञा भवन्ति । आत्मनेपदेष्वपि त्रयस्त्रिकाः प्रथममध्यमोत्तमसंज्ञा भवन्ति । तिप्, तस्, झि, इति प्रथमः । सिप्, थस्, थ, इति मध्यमः । मिप्, वस्, मस्, इत्युत्तमः । आत्मनेपदेषु त, आतां, झ, इति प्रथमः । थास्, आथाम्, ध्वम्, इति मध्यमः । इट्, वहि, महिङ्, इत्युत्तमः । प्रथममध्यमोत्तमप्रदेशाः शेषे प्रथम इत्येवमादयः ॥

तान्येकवचनद्विवचनबहुवचनान्येकशः ॥ १०२ ॥

तान्येकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति * एकशः एकैकं पदम् । तिबित्येकवचनम् । तसिति द्विवचनम् । झि इति बहुवचनम् । एवं सर्वत्र । एकवचनद्विवचनबहुवचनप्रदेशाः बहुषु बहुवचनमित्येवमादयः ॥

सुपः ॥ १०३ ॥

तिङां त्रिकेष्वेकवचनादिसंज्ञा विहिताः संप्रति सुपां त्रिकेषु विधीयन्ते । सुपश्च त्रीणित्रीणि पदानि एकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति । सु इत्येकवचनम् । औ इति द्विवचनम् । जसिति बहुवचनम् । एवं सर्वत्र ॥

विभक्तिश्च ॥ १०४ ॥

त्रीणित्रीणीत्यनुवर्तते । त्रीणित्रीणि विभक्तिसंज्ञाश्च भवन्ति सुपस्तिङश्च । विभक्तिप्रदेशा अष्टन आ विभक्ताविति येवमादयः ॥

युष्मद्युपपदे समानाधिकरणे
स्थानिन्यपि मध्यमः ॥ १०५ ॥

लस्येत्यधिकृत्य सामान्येन तिबादयो विहितास्तेषामयं पुरुषनियमः क्रियते । युष्मद्युपपदे सति व्यवहिते चाव्यवहिते सति समानाधिकरणे समानाभिधेये तुल्यकारके स्थानिनि प्रयुज्यमाने ऽप्यप्रयुज्यमानेपि मध्यमपुरुषो भवति । त्वं पचसि । युवां पचथः । यूयं पचथ । अप्रयुज्यमानेपि । पचसि । पचथः । पचथ ॥

प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च ॥ १०६ ॥

प्रहासः परिहासः क्रीडा । प्रहासे गम्यमाने मन्योपपदे धातोर्मध्यमपुरुषो भवति मन्यतेश्चोत्तमः स चैकवद्भवति । एहि मन्ये ओदनं भोक्ष्यसइति, नहि भोक्ष्यसे, भुक्तः सोतिथिभिः । एहि मन्ये रथेन यास्यसि, नहि यास्यसि, यातस्तेन ते पिता । मध्यमोत्तमयोः प्राप्तयोः उत्तममध्यमौ विधीयेते । प्रहासइति किम् । एहि मन्यसे ओदनं भोक्ष्यइति । सुष्ठु मन्यसे, साधु मन्यसे ॥

अस्मद्युत्तमः ॥ १०७ ॥

उत्तमपुरुषो नियम्यते । अस्मद्युपपदे समानाभिधेये प्रयुज्यमानेप्यप्रयुज्यमानेपि उत्तमपुरुषो भवति । अहं पचामि । आवां पचावः । वयं पचामः । अप्रयुज्यमानेपि । पचामि । पचावः । पचामः ॥

शेषे प्रथमः ॥ १०८ ॥

शेषइति मध्यमोत्तमविषयादन्य उच्यते । यत्र युष्मदस्मदौ समानाधिकरणे उपपदे न स्तः तत्र शेषे प्रथमपुरुषो भवति । पचति । पचतः । पचन्ति ॥

परः संनिकर्षः संहिता ॥ १०९ ॥

परशब्दो ऽतिशये वर्त्तते । संनिकर्षः प्रत्यासत्तिः । परो यः संनिकर्षो वर्णानामर्धमात्राकालव्यवधानं स संहितासंज्ञो भवति । दद्धत्र । मद्धत्र । संहिताप्रदेशास्संहितायामित्येवमादयः ॥

विरामो ऽवसानम् ॥ ११० ॥

विरतिर्विरामः । विरम्यतेनेनेति वा विरामः । सोवसानसंज्ञो भवति । दधि । मधु । वृक्षः । प्लक्षः । अवसानप्रदेशाः खरवसानयोर्विसर्जनीय इत्येवमादयः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥ शुभम् ॥

---

* तानि तिङस्त्रीणित्रीणि भूत्वैकवचनद्विवचनबहुवचनसंज्ञानि भवन्तीत्यपि क्व चित्पाठः ।

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ तृतीयाध्यायस्य ॥

॥ तृतीयपादावशेषः ॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५६ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

छान्दोग्ये वैश्वानरविद्यायां व्यस्तस्य समस्तस्य च स्वर्लोकादित्यद्यौराकाशपृथिव्यवयवत्वेन वैश्वानरात्मन उपासनं श्रूयते । तत्र संशयः । किं तत्रास्य व्यस्तस्योपासनं कर्तव्यमुत व्यस्तस्य समस्तस्य चाथ समस्तस्यैवेति । किं तावत् प्राप्तम् । व्यस्तस्येति । यत "द्यौरमस्यवकं त्वमात्मानमुपास्से"इति, "दिवमेव भगवो राजन्निति होवाचे"त्यादिना स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादान्तावयवत्वमभिधाय तत्र तत्र व्यस्तोपासनं, तत्फलं च विहितम् । परत्र,"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते"इति पूर्वोक्तस्यैव मूर्धाद्युपासनस्य समासेनोपसंहार इति युक्तम् । अतो व्यस्तस्यैवेति प्रथमः पक्षः । एवमेव व्यस्तस्य समस्तस्य चाप्युपासनं कार्यं, "स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती"ति समस्तोपासनस्य व्यस्तोपासनफलेभ्यः फलान्तरविधानादिति द्वितीयः पक्षः । न त्वेतावता वाक्यभेदप्रसङ्गः । यथा भूमविद्योपक्रमे "नाम ब्रह्मेत्युपासीते"त्यादिवाक्यानां भूमविद्यापरत्वेऽपि नामाद्यवान्तरोपासनस्य तत्फलस्य च भूमविद्यास्तुत्यर्थमङ्गीकारः,तथेहापीत्येवं प्राप्त उच्यते । "भूय"इति । भूम्नः समयोपासनस्य ज्यायस्त्वं प्रशस्तता, प्रमाणत्वम् । कथम् । उपक्रमोपसंहारयोरेकवाक्यत्वात् । एवं सति प्रत्येकमवयवोपासनानां तत्फलस्य च समस्तोपासनैकदेशानुवादमात्रत्वं निश्चेतव्यम् । क्रतुवत् । यथा"वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते"इति विहितस्यैव क्रतोरेकदेशे "यदष्टाकपालो भवती"त्यादिनानूद्यते । तथाहि दर्शयति । यथा न्याय उक्तोऽस्माभिस्तथा श्रुतिश्च, "मूर्धा ते व्यपतिष्यद्यन्नां नागमिष्य"इत्यादिका व्यस्तोपासने दोषं ब्रुवन्ती समयोपासनस्य ज्यायस्त्वं दर्शयति । अतो न नामाद्युपासनसमत्वम् । तत्र तेषु दोषाश्रवणात् ॥ ५६ ॥

॥ नानाशब्दादिभेदात् ॥ ५७ ॥

अनन्तराधिकरणे सुतेजःप्रभृतिफलभेदश्रवणे सत्यपि समयोपासनस्य ज्यायस्त्वमुक्तम् । एवं शाण्डिल्यविद्याभूमविद्यासद्विद्यादहरविद्योपकोशलविद्यावैश्वानरविद्यानन्दमयविद्यात्तरविद्यादिकानामपि ब्रह्मविद्यानां ब्रह्मप्राप्तिरूपमोक्षैकफलानां सर्वासां किं समुच्चित्योपासनं ज्याय उत भेदेनेति संशये, किं तावद्युक्तम् । समुच्चित्योपासनं ज्यायोऽनन्तरन्यायेन । यथा चाग्निहोत्रादीनां समुच्चित्य प्रयोगस्तथात्रापि । अपिच, वेद्यस्य ब्रह्मण एकत्वात् । वेद्यं हि रूपं विद्यायाः । द्रव्यदेवतमिव यागस्य । अतो रूपाभेदादपि विद्यैक्यमिति प्राप्त उच्यते । "नाने"ति । भेदेनोपासनं कर्तव्यं, न समुच्चित्य । प्रतिप्रकरणमुपासनाविधीनामन्योन्यनिराकाङ्क्षत्वात् । कथम् । शब्दादिभेदात् । "वेदोपासीत", "स क्रतुं कुर्वीते"ति "सद्भूमापद्यतपाप्मेति" च शब्दभेदात् । आदिना शब्दान्तराभ्यासंख्यासंज्ञागुणप्रकरणनामधेयानि पूर्वं काण्डे दर्शितानि गृह्यन्ते । शब्दान्तरादिभिरत्र विधेयभेदहेतवोऽनुबन्धभेदा दृश्यन्ते । "वेदोपासीत","स क्रतुं कुर्वीते"ति स्वरूपाभेदे विधेयस्य पुरुषप्रयत्नस्य भेदहेतोर्गुणफलानुबन्धभेदात् तत्र स्वरूपं भिद्यते । यथेष्टिपशुसोमादीनाम् । अतो विद्याभेद इति स्थितम् ॥ ५७ ॥

विद्यानां स्वरूपमुक्त्वानुष्ठानप्रकारमाह ॥

॥ विकल्पोऽविशिष्टफलत्वात् ॥ ५८ ॥

किमासु ब्रह्मप्राप्तिफलासु शाण्डिल्यादिविद्यासु फलार्थिना समुच्चयेन प्रयोगोऽग्निहोत्रादिवदथवा विकल्पेनेति संशयः । समुच्चयेनाग्निहोत्रादिवदिति पूर्वः पक्षः । विकल्प इति सिद्धान्तः । कुतः । "अविशिष्टफलत्वात्" । अविशिष्टं हि सर्वासामासां परविद्यानां परब्रह्मभावापत्तिलक्षणं फलम् । तस्य चैकयैव सिद्धत्वाद्विद्यान्तरसमुच्चये प्रयोजनाभावाच्च सर्वासां विकल्प एव, न समुच्चय इति ॥ ५८ ॥

॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ५९ ॥

काम्यास्तु"कामचारो भवति, य एतमेवं वायुं दिशां वत्स वेद, स न पुत्ररोदं रोदिती"त्यादिकाः प्रतीकरूपाः । ब्रह्मप्राप्त्यतिरिक्तफलास्तु विद्याः स्वर्गादिफलकर्मवद्यथाकामं यथाफलं, यावन्ति फलानि प्रार्थ्यते तत्प्राप्तये समुच्चेतव्याः । यद्येकं फलमिच्छति,तदैकमेव कुर्यादित्यनियमः । कुतः । "पूर्वहेत्वभावात्" । मोक्षफलकत्वहेत्वभावात् ॥ ५९ ॥

अङ्गेषु यथाश्रयभावः ॥ ६० ॥

"ओमित्येतदक्षरमुद्गीथमुपासीते"त्यादिकानां कर्माङ्गेषूद्गीथादिष्वाश्रितानां प्रत्ययानां किमुद्गीथादिवत् क्रत्वर्थतया क्रतुषु नियमेनोपादानमिति युक्तम् । किंवा "तद्विधारणानियम"इत्ययथाकाममिति संशये नियमेनोपादानमिति युक्तम् ।

ननु "तद्विधारणानियम"इत्यत्राङ्गाश्रितानां गोदोहनादिवदनङ्गत्वमुक्तमिति चेत् । सत्यम् । अङ्गान्यनुष्ठापयन् प्रयोगविधिर्यद्युपासनानि नानुष्ठापयेत्, तर्हि तेषां तदाश्रितत्वं व्यर्थं स्यादित्याशङ्क्य पूर्वोक्तमेव द्रढयितुं कैश्चिल्लिङ्गदर्शनेराक्षिपति । "अङ्गेष्वि"ति । अङ्गेषूद्गीथादिष्वाश्रितानामुपासनानां क्रतुषु यथाश्रयभावः । उद्गीथादिवदङ्गभावः । गोदोहनादिवत् । "उद्गीथमुपासीते"त्युपासनविधौ फलसंबन्धाश्रवणादुद्गीथसंबन्धावगतक्रत्वङ्गता न विरुध्यते । एवं विधिवाक्येनैव क्रत्यङ्गत्वेऽवगते "यदेव विद्यया करोति तेनैवीर्यवत्तरं भवती"ति च वर्तमानफलसंबन्धनिर्देशेन "स यावं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

श्लोकं शृणोती"तिवदर्थवादमात्रं स्यात् । अतो यथोद्गीथादीनामुपासनाश्रयक्रत्वङ्गतया प्रयोगविधिना नियमेनोपादानं, तथा तदाश्रितोपास्तीनामपि तद्द्वारा क्रत्वङ्गतया नियमेनोपादानम् ॥ ६० ॥

॥ शिष्टेश्च ॥ ६१ ॥

शिष्टिः शासनम् । "उद्गीथमुपासीते"त्युद्गीथाङ्गतया प्रत्ययानां विधानम् । ततश्चोपादाननियमः ॥ ६१ ॥

॥ समाहारात् ॥ ६२ ॥

"होतृषदनाद्वैवापि दुरुद्गीथमनुसमाहरन्ती"ति दुरुद्गीथं दुष्टमुद्गीथं वेदनहीनम्, उद्गाता स्वकर्मणि समुत्पन्नं वैगुण्यं होतृषदनाद्धोतृकर्मणः शंसनात् समादधातीत्यन्येन समाधानं ब्रुवन्ती श्रुतिर्वेदनस्योपादाननियमं दर्शयति ॥ ६२ ॥

॥ गुणसाधारण्यश्रुतेश्च ॥ ६३ ॥

इतश्च विद्यागुणस्य विद्याश्रयस्योङ्कारस्य "तेनेयं त्रयी विद्या वर्तते, ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायती"ति वेदत्रयसाधारण्यश्रवणाच्च तदाश्रितस्य प्रत्ययस्यापि साधारण्यमित्यभिप्रायः । "तेने"ति प्रकृतपरामर्शात्,तेन सोपासनेन प्रणवेन वेदत्रयोक्तं कर्म प्रवर्तत इत्यर्थः । अत उपासनस्य प्रणवसहभावनियमदर्शनादुद्गीथाद्युपासनानामुद्गीथादिवदुपादाननियमो निश्चीयते ॥ ६३ ॥

तत् परिहरति ॥

॥ न वा तत्सहभावाश्रुतेः ॥ ६४ ॥

न वेति पक्षव्यावृत्तिः । नोद्गीथाद्याश्रिताः प्रत्ययाः क्रतूद्गीथादिवन्नियमेनोपसंहर्तव्याः । कुतः । "तत्सहभावाश्रुतेः" । क्रत्वङ्गभावाश्रवणात् । सहभावो हि क्रत्वङ्गभावः । "यदेव विद्यया करोति तदेव वीर्यवत्तर"मिति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साक्षात् साधनत्वमवगम्यते । एवं क्रतुफलात् पृथङ्निलसाधनतया सा विद्या किमाश्रित्य फलं कुर्यादित्यपेक्षायां "ओमित्येतदक्षरमुद्गीथमुपासीते"त्युद्गीथमाश्रित्य कुर्यादिति क्रत्वङ्गभूतस्योद्गीथस्याश्रयमात्रत्वं प्रतीयते । यथा "गोदोहनेनापःश्रुत्यापः प्रणये"दित्यत्राप्प्रणयनमाश्रित्य गोदोहनं फलं साधयति, इति प्रणयतिशब्दोपादानसामर्थ्यात् तत्र तथावगतायां विद्यायां न क्रत्वङ्गभाव उपपद्यते, अपितु यथा क्रत्वधिकारिण एव पशुकामनानिमित्तं गोदोहनमधिकारान्तरम् । एवं क्रतुप्रयुक्तोद्गीथाद्याश्रयस्योपासनस्यापि क्रत्वधिकारिण एव क्रतोर्वीर्यवत्तरत्वफलेच्छानिमित्तमधिकारान्तरत्वमिति क्रतुषु तद्विकल्प एव । पर्णमयीवाक्ये तु पर्णतादीनां "यदेव विद्यये"ति विद्यायाः फलसाधनत्ववदपापश्लोकश्रवणादिफलं प्रति साक्षात् साधनभावो न श्रूयते । तत्र पर्णतायां जुहूसंबन्धस्यावश्यंभावित्वात् तत्संबन्धः पूर्वं विधातव्यः, ततः क्रत्वङ्गभूतजुहूद्वाङ्गतया तेषां क्रत्वर्थता न विरुध्यते । तदङ्गानां फलान्तरसाधनत्वकल्पनानुपपत्तेस्तत्र फलश्रुतिरर्थवादः । अन्यथा वाक्यभेदप्रसङ्गादिहेतुवाक्यान्तरे स्ववाक्ये वा यत् फलमुक्तं तदेव युक्तम् । अन्तरङ्गत्वादनारभ्याधीतत्वाच्च । प्रयोगवचनस्तु क्रत्वर्थानामुद्गीथादीनां सहभावनियमं विधत्ते । उद्गीथादिप्रत्ययास्तु क्रत्वङ्गाश्रया अपि गोदोहनादिवत् पुरुषार्था इति वैषम्यम् ॥ ६४ ॥

॥ दर्शनाच्च ॥ ६५ ॥

इतश्च प्रत्ययानामसहभावः । दर्शनात् । "एवंविद्वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षती"ति ब्रह्मणो विदुषया सर्वेषां पालनं ब्रुवन्ती श्रुतिः प्रत्ययानामनियतत्वं दर्शयति । अनेन लिङ्गेन पूर्वोक्तसमाहारादिलिङ्गानि प्रायिकाणीत्यवगम्यते ॥ ६५ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ तृतीयाध्यायस्य तृतीयपादविवरणम् ॥ ३ ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ तृतीयाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

पूर्वस्मिन् पादे वेदनाध्ययनोपासनादिशब्दवाच्याया ब्रह्मविद्याया भेदाभेदविचारस्तदनुष्ठानप्रकारश्च निरूपितः । अथेदानीं विद्यायाः स्वातन्त्र्यं कर्मणस्तदङ्गत्वमिति निरूपयितुं विद्यातः पुरुषार्थं उत विद्याङ्गकात् कर्मण इत्याशङ्क्य सिद्धान्तं तावदाह ॥

॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

पुरुषस्यार्थः प्रयोजनं सर्वमतो विद्यात एव स्यादिति भगवान् बादरायणो मन्यते स्म । कुतः । "शब्दादिती"ति । इति शब्दोऽवधारणार्थः । "तरति शोकमात्मवित्", "ब्रह्मविदाप्नोति परं," "तमेव विद्वानमृत इह भवति,"तथा "विद्वान् नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्", "एतद्धेवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तदि"त्यादिशब्दो विद्यात एव पुरुषार्थं ब्रुवन् दृश्यते ॥ १ ॥

अत्र पूर्वः पक्षः प्रारभ्यते ॥

॥ शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

यदुक्तं"विद्यातः पुरुषार्थ"इति, नैतदुपपद्यते , उक्तश्रुतीनां क्रत्वङ्गकर्तृस्वरूपयाथात्म्यवेदनविधानपरत्वात् कर्तृसंस्कारद्वा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रेणात्मज्ञानस्य कर्मशेषत्वात् तत्र फलश्रवणमर्थवादमात्रमिति जैमिनिराचार्यो मन्यते स्म । तत्र दृष्टान्तः । "यथान्येष्वि"तीति । तदुक्तम् । "द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्या"दिति । तत्र द्रव्ये फलश्रुतिः, "यस्य पर्णमयी जुहूर्भवती"त्याद्या । संस्कारे च "यदाङ्क्ते चक्षुरेव आतृव्यस्य वृङ्क्ते", इत्याद्या । कर्मणि च, "वर्म वा एतद्यज्ञस्य क्रियते, यत् प्रयाजानुयाजा इज्यन्ते"इत्याद्या । यथान्येषु द्रव्यादिषु पर्णमयीद्रव्ययज्ञमानस्याज्ञनादिसंस्कारप्रयाजादिरूपेषु, अपापश्लोकश्रवणादिश्रुतिरर्थवादः, तथात्रापि पुरुषार्थश्रुतिरर्थवाद इत्यर्थः । ब्रह्मज्ञानं कर्माङ्गम् । फलशून्यत्वे सति कर्माङ्गाश्रयत्वात् । पर्णतादिवत् । इत्यनुमानात् ।

न च कर्मण्यात्मज्ञानस्याप्रयोजकत्वमिति वाच्यम् । आत्मनो देहादिव्यतिरेकज्ञानमन्तरेण परलोकगामित्वानिश्चयाज्ज्योतिष्टोमादौ प्रवृत्तिरेव न स्यात् । तस्मात् क्रतुप्रवृत्तावात्मज्ञानस्योपकारकत्वात् कर्माङ्गत्वसिद्धिरित्यर्थः ।

न च कर्तुरात्मनोऽन्यो मुमुक्षुवेद्यो मुक्तोपसृप्यो वेदान्तैरुपदिश्यत इति वाच्यम् । वेदान्तेष्वेव ब्रह्मज्ञानस्य कर्मप्राधान्यं सूचयद्भिर्लिङ्गैस्तदुपबृंहितसामानाधिकरण्यनिर्देशेन च वेदान्ता अपि देहातिरिक्तप्रत्यक्स्वरूपयाथात्म्यवेदनपरा इत्यवश्यमङ्गीकरणीयत्वात् ॥ २ ॥

लिङ्गान्याह ॥

॥ आचारदर्शनात् ॥ ३ ॥

"जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे","यद्यमाणो ह वै भगवन्तोऽहमस्मी"त्यादिश्रुतिभ्यो जनकक्रेक्वयादीनां ब्रह्मविद्यावतामपि कर्माचरणदर्शनात् ॥ ३ ॥

॥ तच्छ्रुतेः ॥ ४ ॥

"यदेव विद्यया करोती"ति श्रुतिरेव विद्यायाः कर्मशेषत्वमाह ॥ ४ ॥

॥ समन्वारम्भणात् ॥ ५ ॥

"तं विद्याकर्मणी समन्वारभेते"इति विद्याकर्मणोः फलारम्भे समुच्चयश्रवणाच्च ॥ ५ ॥

॥ तद्वतो विधानात् ॥ ६ ॥

"आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयान" इत्यादौ वेदज्ञानवतोऽपि कर्मसु विनियोगदर्शनात् ॥ ६ ॥

॥ नियमाच्च ॥ ७ ॥

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः," "यावज्जीवमग्निहोत्रं जुहोति"इत्यादिनियमाच्च कर्मत एव फलं, विद्यायास्तु कर्मशेषत्वम् ॥ ७ ॥

इति प्राप्त आह ॥

॥ अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दः पक्षव्यावृत्त्यर्थः । न विद्यायाः कर्मशेषत्वमुपपद्यते । कुतः । "अधिकोपदेशात्" । कर्मकर्त्रात्मनः सकाशादत्यन्तविलक्षणस्यातिशयसाम्यशून्यस्य हेयगन्धास्पृष्टमाहात्म्यानन्ताचिन्त्यापरिमितभद्गुणार्णवस्य श्रीपुरुषोत्तमस्य वेदान्तैः प्रतिपाद्यमानत्वात्, तज्ज्ञानस्य कर्मानुपयोगात्, प्रकरणाद्यभावाच्च, कर्मशेषत्वं कल्पयितुमशक्यम् । फलवत्संनिधावफलं तदङ्गं, प्रयाजवत्, इति न्यायात् । आत्मज्ञानं तु प्रकरणगतेनैव "तन्महिमानमिति वीतशोक" इत्यादिश्रुतिप्रतिपादितेन फलेन निराकाङ्क्षं नान्यशेषत्वं प्रतिपद्यते, स्थितमेवम्, पुरुषार्थोऽत इति बादरायणस्य मते । कथम् । "तद्दर्शनात्," "एष सर्वेश्वरः", "एष भूतपालः," "एष भूताधिपतिः" "स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः," "एतस्यैवाक्षरस्य प्रशासने गार्गि", "भीषास्माद्वातः," "यः सर्वज्ञः", "सत्यकामः सत्यसंकल्प" इत्यादिश्रुतिभिः, "अहं सर्वस्य प्रभवो मत्तः परतरं नान्यत्," "तपाम्यहं वर्षं," "पितामहस्य जगत"इत्यादिस्मृतिभिश्च सर्वेश्वरत्वादिस्वाभाविकाचिन्त्यानन्तकल्याणरूपधर्मैः श्रीपुरुषोत्तमस्यैवाखिलाविद्याद्यस्पृष्टमाहात्म्यसीम्नः परब्रह्मभूतस्य जीवादधिकतया वेदात्मत्वेन प्रतिपाद्यमानत्वदर्शनात् । तादृशधर्माणां हेयसंबन्धार्हे प्रत्यगात्मनि कथमप्यसंभाव्यत्वात् ।

न च "तत्त्वम"स्यादिना तस्यैव तत्ताविधानादस्मदिष्टसिद्धिरिति वाच्यम् । तस्य तदात्मकत्वादिभिस्तदपृथक् सिद्धत्वादेकत्वोक्तिर्न स्वरूपतोऽभेद इति पूर्वमेव प्रतिपादितत्वात् । अखिलवेदान्तस्याशेषदोषास्पृष्टमाहात्म्ये ज्ञानैश्वर्यकारुण्यवात्सल्यगुणार्णवे ब्रह्मणि श्रीभगवति समन्वयेन ब्रह्मविद्यायां क्लेशकर्माद्यशेषहेयधर्माश्रयस्य क्षेत्रज्ञस्य प्रत्यगात्मनोऽपि नास्ति । तस्मात् तद्भावापत्तिरूपनिःश्रेयसैकप्रयोजनमेवापनिषदं ज्ञानम् ।

नाप्युक्तलिङ्गानां तत्र प्रामाण्यम् । तेषामन्यपरत्वेनोक्तार्थासाधकत्वात् ॥ ८ ॥

इत्याह ॥

॥ तुल्यं तु दर्शनम् ॥ ९ ॥

न तावद्विद्यावतां कर्मानुष्ठानस्य विद्यायाः कर्माङ्गत्वे लिङ्गत्वम् । अनैकान्तिकत्वात् । "एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः काक्षसेयाः, किमर्था वयमध्येष्यामहे, किमर्था वयं यक्ष्यामहे, एतद्ध स्म वै तत्पूर्वे विद्वांसोऽग्निहोत्रं न जुह्वां चक्रिरे"इत्यादौ कर्मानाचरणस्यापि तुल्यत्वदर्शनात् । कर्मा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नुष्ठानदर्शनं तु फलाभिसंधिरहितस्य कर्मणो विद्याङ्गत्वात् ॥ ९ ॥

नापि "यदेव विद्ययें"ति श्रुतिस्तत्परेत्याह ॥

॥ असार्वत्रिकी ॥ १० ॥

सा हि प्रकृतोद्गीथविद्यामात्रपरा। "यदेवे"ति यच्छब्दस्यानिश्चितविशेषस्यो"द्गीथमुपासीते"ति प्रस्तुतोद्गीथविशेषनिष्ठत्वात्। न हि यत् करोति तद्विद्ययेत्यन्वय इति भावः ॥ १० ॥

नापि"तं विद्याकर्मणी"इति श्रुतेस्तत्परत्वं संभाव्यम्। तस्या विभक्ताधिकारिकत्वादित्याह ॥

॥ विभागः शतवत् ॥ ११ ॥

यथा शतमाभ्यां दीयतामित्युक्ते विभज्य दीयते, पञ्चाशदेकस्मै,पञ्चाशदन्यस्मै, तथा विद्यान्यस्मै कर्म चान्यस्मै, इति विभागो द्रष्टव्य इत्यर्थः। यद्वा, विभक्तफलकत्वाद्विद्या स्वफलार्था समारभ्या,कर्म च स्वफलार्थमारभ्यमिति। यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थे शतमिति विभागस्तथात्रापि ॥ ११ ॥

नाप्या"चार्यकुला"दित्यादिश्रुतिरुक्तार्थपरेत्याह ॥

॥ अध्ययनमात्रवतः ॥ १२ ॥

वेदाध्ययनमात्रवतः पुंसस्तद्विषयत्वात्, न तु परविद्यावतः। अध्ययनशब्दस्यात्तरराशियहणमात्रेणैव नैराकाङ्क्ष्यादाधानवत्।

ननु "वेदमधीत्ये"त्यध्ययनविधिरेवार्थावबोधपर्यन्तमध्ययनं ज्ञापयतीति चेत्। एवमपि न विद्या कर्माङ्गम्। अर्थज्ञानां विद्याया अर्थान्तरत्वात्। यथा ज्योतिष्टोमादिकर्मस्वरूपज्ञानात् फलसाधनभूतकर्मानुष्ठानमर्थान्तरं, तथा ब्रह्मस्वरूपविज्ञानाद्वेदनध्यानोपासनादिशब्दवाच्या पुरुषार्थहेतुभूता विद्यार्थान्तरमिति न कर्मसंबन्धगन्धोऽपि तत्र ॥ १२ ॥

नापि यावज्जीवं श्रुतिरुक्तार्थपरेत्याह ॥

॥ नाविशेषात् ॥ १३ ॥

न यावज्जीवं श्रुत्या विद्यायाः कर्माङ्गत्वं निर्णेतुं शक्यम्। तस्या अज्ञविदुत्सामान्येन नियतविदुद्विषयकत्वायोगादित्यर्थः ॥ १३ ॥

ननु सामान्यविषयकत्वेऽपि विदुषोऽपि तदन्तःपातित्वेन तद्विधेयमस्य तादवस्थ्यमिति चेत्। तत्राह ॥

॥ स्तुतयेऽनुमतिर्वा ॥ १४ ॥

वाशब्दोऽवधारणे। ब्रह्मविद्यास्तुतये कर्मणामनुज्ञामात्रत्वात्, यावज्जीवं ब्रह्मविद्यावति पुंसि कर्म कुर्वत्यपि विद्यासामर्थ्यात् कर्मलेपो नास्तीति। तस्याः श्रुतेर्विद्यासामर्थ्यद्योतनार्थकत्वादित्यर्थः। "यथा पुष्करपलाश आपो न श्लिष्यन्ते, एवमेवंविदि पापं कर्म न श्लिष्यत" इत्यादिश्रुतेः।

"सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ॥
इति मां योऽभिजानाति कर्मभिर्न स लिप्यते।
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ॥
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा"।

इत्यादिस्मृतेश्च ॥ १४ ॥

॥ कामकारेण चैके ॥ १५ ॥

अपिच, एके शाखिनो विदुषामिच्छानुरोधेन प्रजादिपरित्यागमामनन्ति। "किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक" इति। विद्याया यदि कर्माङ्गत्वमभ्युपगतं स्यात्, तर्हि तद्विरोधाद्गार्हस्थ्यत्यागविधानानुपपत्तिः ॥ १५ ॥

॥ उपमर्दं च ॥ १६ ॥

संसारबीजस्य कर्मण उपमर्दकत्वं विद्याया आमनन्ति।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" ॥

इत्यादि, "ज्ञानाग्निदग्धकर्माणं",

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन"।

इति स्मृतिश्च विद्यायाः कर्माङ्गत्वे न संगच्छेत ॥ १६ ॥

॥ ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

इतश्च विद्यायाः स्वातन्त्र्यम्। कथम्। ऊर्ध्वरेतःसु निवृत्तयाम्यधर्मेष्वाश्रमेषु ब्रह्मविद्याश्रवणात्। अग्निहोत्रादिकर्म च तेषु न श्रूयते। ते चाश्रमा वैदिके शब्दे दृश्यन्ते। "त्रयो धर्मस्कन्धाः"। "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते, तपःश्रद्धे ये ह्युपवसन्त्यरण्ये, एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति", "ब्रह्मचर्यादेव प्रव्रजे"दित्यादौ यावज्जीवं श्रुतिस्त्वविरक्तेषु कर्म विधत्ते ॥ १७ ॥

॥ परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥ १८ ॥

यदुक्तं, "त्रयो धर्मस्कन्धा" इत्यादिवैदिकशब्देषु तेषां दर्शनात् ते आश्रमाः सन्त्येवे"ति। तचोपपद्यते। यतः। "त्रयो धर्मस्कन्धा"इत्यादिवाक्येषु स्मृत्याचारप्रसिद्धानामाश्रमाणां सामोपासनविधिप्रकरणे वितायमाने ततोऽपकृष्य प्रकृतस्य स्वतन्त्रस्य प्रणवेन ब्रह्मोपासनस्य स्तुत्यर्थं परामर्शमात्रमनुवादमात्रं क्रियते, न तु ते विधीयन्त इति जैमिनिराचार्यो मेने। कुतः। "अचोदनात्"। विधायकशब्दाभावात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपिच, "अपवदति", "वीरहा वा एष देवानां योऽग्निमुद्वासयते, आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीर्नापुत्रस्य लोकोऽस्ती"त्यादिका श्रुतिराश्रमान्तरम्। "ये चेमेऽरण्ये श्रद्धा तप इत्युपासत" इत्यादि च देवयानविधिपरम्। न तत्राश्रमान्तरोपदेशसंभवः। अतो नोर्ध्वरेतस आश्रमाः सन्तीति जैमिनिमतम् ॥ १८ ॥

॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

अनुष्ठेयमाश्रमान्तरमपि गृहस्थाश्रमवदिति भगवान् बादरायणो मन्यते। कुतः। "साम्यश्रुतेः"। गार्हस्थ्येन तुल्यश्रवणादाश्रमान्तरस्य, "त्रयो धर्मस्कन्धा"इत्यत्र यथा श्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृश्यते, एवमाश्रमान्तरमपि श्रुत्यन्तरविहितमेव परामृष्टमिति ॥ १९ ॥

॥ विधिर्वा धारणवत् ॥ २० ॥

वाशब्दोऽवधारणे। न परामर्शमात्रमाश्रमान्तराणाम्। किं तर्हि विधिरेवायम्। सर्वेषामाश्रमाणां धारणं च यथादिष्टं गताग्निहोत्रे श्रूयते। "अधस्तात् समिधं धारयन्नुद्वेदुपरि हि देवेभ्यो धारयती"त्यत्राधोधारणेन सहैकवाक्यताप्रतीतावपि तां भित्त्वोपरिधारणमपूर्वत्वाद्विधीयते। तदुक्तं शेषलक्षणे। "विधिस्तु धारणेऽपूर्वत्वा"दिति। तदिहाप्यप्राप्तत्वाद्विधिरुपगमनीयः।

अपिच, "ब्रह्मचर्यं समाप्य गृही भवेद्गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा यदहरेव विरजेत्, तदहरेव प्रव्रजे"दिति प्रत्यक्षैवाश्रमान्तरविधायिनी जाबालश्रुतिः, तामनपेक्ष्यैवाचार्येणेतरवाक्येष्वप्याश्रमप्राप्तिरवश्याश्रयणीयेत्येतदर्थं विचारः कृतः।

तस्मात् सिद्धमूर्ध्वरेतःस्वपि विद्यादर्शनाद्विद्यात एव पुरुषार्थ इति।

नन्वेवमपि प्रत्यगात्मज्ञानं विनादृष्टस्वर्गादिफलके यागादिकर्मणि प्रवृत्तेरेवासंभवात्, अन्यथा कर्मश्रुतेर्बाधस्तवापि वैदिकत्वादनिष्ट एव।

तस्माज्ज्ञानस्य कर्माङ्गत्वमवश्यमभ्युपेयमिति चेन्मैवम्। आपातोक्तेः। तथाहि, ज्ञानं तावद् द्विविधं, देहादिव्यतिरिक्तप्रत्यगात्मत्वंपदार्थविषयकं, प्रत्यगात्मब्रह्मतादात्म्यविषयकं चेति। तत्राद्यस्य देहादिविवेकज्ञानस्य कर्माङ्गत्वेऽपि ततोऽत्यन्तविलक्षणद्वितीयज्ञानस्य न कथमपि पराङ्गत्वमिति राद्धान्तः। "प्रधानः क्षेत्रज्ञपतिर्गुणेशः संसारबन्धस्थितिमोक्षहेतुः", "अक्षरात् परतः परः", इत्यादिविवेचनश्रुतेः।

"अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः"।

इत्यादिस्मृतेश्च सर्वात्मपरमात्मज्ञानं स्वतन्त्रमेव मोक्षफलकं, परमात्मनश्च तत्फलदातृत्वमिति सिद्धम्।

ननु स्यादेतत् परमेश्वरस्य कर्मफलदातृत्वं, यदि कर्म निरपेक्षं स्यात्र तु तदस्ति। तस्य कर्मसापेक्षत्वस्य त्वयाप्यभ्युपगम्यमानत्वात्, अन्यथा वैषम्यादिप्रसङ्गात्।

तस्मात् कर्मानुसारिफलदातुरीश्वरस्याभ्युपगमे गौरवमात्वादन्वयव्यतिरेकाभ्यां कर्मण एवैकान्तफलहेतुत्वदर्शनात् कर्माभावे केवलेश्वरस्य फलदातृत्वाभावाच्चाप्रयोजक एवेश्वरः। दृश्यते च लोके कृष्यादिकर्मणः फलहेतुत्वम्। तथा वैदिकेऽपि यागादौ तस्यैव स्वातन्त्र्यमनुमेयम्। यागादिकं वैदिकानुष्ठानं फलदानार्हं, कर्मत्वात्, कृष्यादिवदित्यनुमानात्,

न चाशुविनाशित्वात् तस्य कथं फलदातृत्वमिति वाच्यम्। तस्य विनाशित्वेऽपि तज्जन्यादृष्टलक्षणसंस्कारस्य यावत्फलावाप्ति स्थैर्यत्वाभ्युपगमात्।

किंच, "स्वर्गकामो यजेते"त्यादिविधिवाक्यमपि स्वर्गादिफलसिद्धये कर्मण एव विधानपरं, न त्वीश्वरस्येति चेन्न। कर्मणो जडत्वेनाकिंचित्करत्वादिति पूर्वमेवोक्तम्।

किंच, तज्जन्यादृष्टस्यापि जडत्वाविशेषात्।

नाप्युक्तानुमानमत्र प्रमाणम्। आभासमात्रत्वात्। वृष्ट्याद्यभावेनोपलादिपातेन वा व्यभिचारदर्शनात्।

नापि "यजे"दित्यादिशास्त्रस्य कर्ममात्रविधायकत्वम्, अपितु परदेवताराधनपरत्वमेव। तथा च "यज्ञ देवपूजाया"मिति धात्वर्थादेव कर्मणः पराङ्गत्वोपलब्धेः। "वायव्यं श्वेतमालभेत भूतिकामो, वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयती"त्यादिषु कामिनः पुंसः सिसाधयिषितफलसाधनत्वप्रकारे शब्दादेवावगते सति तत्परित्यागमश्रुतापूर्वकल्पनं च न विदुषां संमानार्हम्। अन्याय्यत्वाच्छ्रुतिविरुद्धत्वाच्च।

ननु तर्हि देवा एव पुण्यकर्माणः क्षेत्रज्ञविशेषाः कर्मफलदातारः सन्तु, तेषामपि कर्मण एव परंपरया फलहेतुत्वसिद्धेः, तेषां जीवत्वसामान्येऽपि पुण्यकर्मबाहुल्यजन्यशक्त्यैव कर्मफलदातृत्वयोग्यत्वात्, इति चेन्न। कर्मवश्यानां तेषां पारतन्त्र्याविशेषेण तादृक्शक्त्यसंभवात् तदन्तर्यामिपरमपुरुष एव "फलमत उपपत्ते"रित्यत्र पूर्वमेव "इष्टापूर्ते बहुधा जायमानं विश्वं बिभर्ति, भुवनस्य नाभिः, तदेवाग्निस्तद्वायुस्तत् सूर्यस्तदु चन्द्रमा" इत्यादिश्रुत्या तदात्मकत्वेन तत्सामानाधिकरण्योक्तेरिति संक्षेपः ॥ २० ॥

॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीत," "स एष रसतां रस-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तमः परमः परार्ध्योऽष्टमो य उद्गीथः, इयमेवर्गग्निः साम," "अयं वाव लोक एषोऽग्निश्चितः, तदेदमेवोक्थमियमेव पृथिवी"त्येवंजातीयकानां वाक्यानां कर्माङ्गभूतोद्गीथादिस्तुतिमात्रं प्रयोजनमास्थेयमुतोद्गीथादिषु रसतमत्वादिदृष्टिविधानमिति संशयः। किं युक्तम्। स्तुतिमात्रमिति। कुतः। "उपादानात्"। उद्गीथाद्युपादानात्। "जुहूरादित्यः कूर्मः स्वर्गलोक आहवनीय"इत्यादिवत् कर्माङ्गोद्गीथादिसंबन्धितया रसतमत्वादेरुपादानात् स्तुतिमात्रं क्रियते, न तु रसतमत्वादिदृष्टिविशेषो विधीयत इति पूर्वः पक्षः। सिद्धान्तस्तु "नापूर्वत्वा"दिति। नेति पूर्वपक्षनिवृत्तिः। जुहूादिविधिवदुद्गीथादिविधेरत्रासंनिधानेन रसतमत्वादेरप्राप्तत्वादुपासीतेति प्रत्ययो न स्तुतिमात्रम्, अपितु तद्दृष्टिविधिरेव।

न च प्रदेशान्तरे विहितस्योद्गीथस्य प्रदेशान्तरे स्तुतिरुपयुज्यते। विधायकस्य पदसमूहस्यानन्तरं पुरस्तात् परस्ताद्वा समाम्नातोऽर्थवादस्तेनैकवाक्यतामेति। यथा "वायुर्वै क्षेपिष्ठे"ति। तदुक्तं, "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु"रिति॥ २१॥

॥ भावशब्दाच्च॥ २२॥

भावो विधिः। "उद्गीथमुपासीत", "सामोपासीते"त्यादिविधिशब्दाच्चाप्युपासनविध्यर्थान्युद्गीथादिवाक्यानि॥ २२॥

॥ पारिप्लवार्था वा इति चेन्न विशेषितत्वात्॥ २३॥

"प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम, जानश्रुतिर्ह पौत्रायणः श्रद्दादेयो बहुदायी बहुपाक्य आस, श्वेतकेतुर्दारुणेय आसे"त्यादयो वेदान्तेष्वाख्यानविशेषाः श्रूयन्ते। तेषु संशयः। किमु ते पारिप्लवार्था उत तत्र तत्र विद्याविशेषप्रतिपादनार्था इति। तत्रा"ख्यानानि शंसन्ती"त्याख्यानसामान्यात्, आख्यानप्रयोगस्य च पारिप्लवे चोदितत्वात्, तदर्था इति पूर्वः पक्षः। ततश्च मन्त्रवत् प्रयोगशेषत्वाच्च विद्याप्राधान्यं वेदान्तानां न्याय्यमिति चेन्न। कुतः। "विशेषितत्वात्"। "पारिप्लवमाचक्षीते"त्युक्त्वा तत्रैव "मनुर्वैवस्वतो राजे"त्यादिना कानिचिन्मन्वाद्याख्यानान्येव विशेष्यन्ते। अतस्तेषामेव तत्र विनियोगो, नाख्यानसामान्यात् सर्वस्य। अथ विशेषणानर्थक्यम्। तस्मादाख्यानश्रुतयो विद्याविध्यर्था एव, न पारिप्लवार्था इति॥ २३॥

॥ तथा चैकवाक्यतोपबन्धात्॥ २४॥

यथा च "सोऽरोदी"दित्येवमादीनां विधिनैकवाक्यत्वादर्थवादता, तथा द्रष्टव्य इत्यादिविधेरेकवाक्यतयोपबन्धात् संबन्धात् तत्प्रशंसार्थताख्यानमिति। अतो न पारिप्लवार्थत्वम्॥ २४॥

॥ अत एव चाग्नीन्धनाद्यनपेक्षा॥ २५॥

स्तुतिप्रसङ्गादवान्तरसङ्गत्याधिकरणद्वयं चिन्तितम्। ऊर्ध्वरेतस आश्रमाः श्रुतिपरिगृहीताः सन्तीत्युक्तम्। इदानीं तेषु यज्ञादिकर्माभावात् तदङ्गिका विद्यापि संभवति, न वेति संशये, न संभवतीति प्राप्ते आह। "अत एव चे"ति। यतो, "यदिच्छन्तो ब्रह्मचर्यं चरन्ति, एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति, ब्रह्मसंस्थोऽमृतत्वमेति", "ये चेमेऽरण्ये श्रद्धा तप इत्युपासत" इत्यादिश्रुतिभिस्तेषां विद्यावत्त्वमवगम्यते। अत एव तेष्वाग्नीन्धनाद्यनपेक्षा। अग्न्याधानसाध्यकर्मानपेक्षा विद्येति निश्चीयते॥ २५॥

॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्॥ २६॥

यद्येवं केवला विद्या पुरुषार्थं साधयेत् तर्हि किं सर्वाश्रमकर्माण्यपेक्षतेऽपीति संशये विद्यायाः स्वातन्त्र्यात् सर्वाश्रमानपेक्षेति प्राप्ते आह, "सर्वापेक्षे"ति। विद्या स्वोत्पत्तौ सर्वापेक्षाणि यज्ञाद्याश्रमकर्माण्यपेक्षते। उत्पन्ना सती स्वफलमोक्षसिद्धौ तु निरपेक्षा। कुतः। यज्ञादिश्रुतेः। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेने"ति। यज्ञादयो विविदिषोत्पादनद्वारा विद्याङ्गतया विनियुक्ष्यन्ते। यज्ञादिभिर्वेदनं प्राप्तुमिच्छन्तीति। अतस्तदपेक्षाया इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमेव तदङ्गकमित्यर्थतोऽवगम्यते। तत्र दृष्टान्तः। अश्ववदिति। यथाश्वो गमनसाधनभूतो गमनसिद्धयेऽपेक्ष्यते, सिद्धे च गमने स्वगृहादिप्राप्तौ नापेक्ष्यते, तद्वत्॥ २६॥

॥ शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात्॥ २७॥

यद्यपि यज्ञादिभिः स्वाश्रमाभिहितकर्मभिरेव शुद्धान्तःकरणस्य विद्या स्यात्, तथापि तु मुमुक्षुः शमदमाद्युपेतः स्यात्। कुतः। तदङ्गतया तद्विधेः। "तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्ये"दिति विद्याङ्गतया शमादीनां विधानात्। विहितानां च तेषां विद्यानिर्वृत्तेऽवश्यानुष्ठेयत्वात्। विद्याया एकायत्तानिष्पाद्यत्वाच्छमादिभिरेव तन्निष्पत्तिः। यज्ञादिकर्माण्यपि पापनिर्हरणद्वारेणैकायत्तामापादयन्तीति भावः॥ २७॥

॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥ २८॥

वाजिनां प्राणविद्यायां "न ह वा अस्यानन्नं जग्धं भवति, नानन्नं प्रतिगृहीतं," तथा छन्दोगानां "न ह वा एवंविदि किंचनानन्नं भवती"ति प्राणविदः सर्वान्नभोजनानुमतिः श्रूयते। सा किं प्राणविद्यावतां सर्वदा कर्तव्योत प्राणात्ययापत्ताविति विशये विशेषाश्रवणात् सर्वदेति। चशब्दोऽवधारणार्थः। प्राणात्यय एव सर्वान्नानुमतिः सर्वान्नभक्षणानुज्ञा, न सर्वदा।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुतः । तद्दर्शनात् । ब्रह्मविदामपि प्राणात्ययापत्तौ तथात्वश्रवणात् । किं पुनः प्राणविदः । उषस्तिः किल चाक्रायणो ब्रह्मविदग्रेसरो "मटचीहतेषु" मटच्यो रक्तक्षुद्रपक्षिणस्तैर्हतेषु कुरुदेशस्थशस्येषु, दुर्भिक्षदूषितेषु कुरुष्वित्यर्थः । इभ्यग्रामे वसन्ननशनेन प्राणसंशयापन्नो ब्रह्मविद्यानिष्पत्तये प्राणानामनवसादमाकाङ्क्षमाण इभ्यं कुल्माषान् खादन्तं भिक्षमाणस्तेनोच्छिष्टेभ्योऽन्ये न विद्यन्त इति प्रत्युक्तः पुनरप्येतेषां मे देहीत्युक्त्वा तेन चेभ्येनोच्छिष्टेभ्य आदाय दत्तान् कुल्माषान् प्रतिगृह्यानुपानप्रतिग्रहमिभ्येनार्थित उच्छिष्टं मे पीतं स्यादिति वदंश्चाक्रायणः किमेते कुल्माषा अनुच्छिष्टा इतीभ्येन पर्यनुयुक्तो "न वा अजीविष्यमिमानखादन्, कामो म उदपान"मिति कुल्माषाखादने स्वस्य प्राणसंशयापत्तिस्तावन्मात्रखादनेन धृतप्राणस्य स्वस्याच्छिष्टोदकपानं कामचारं निषिद्धं स्यादित्युक्त्वा स्वभुक्तशेषं जायायै दत्त्वा तया च रक्षितान् दिनान्तरे पुनरपि प्राणसंकटे तया दत्तांस्तानेवेभ्योच्छिष्टांश्च चखादेति ब्रह्मविदां प्राणसंकट एव सर्वान्नानुमतिदर्शनादत्राविशेषदर्शनेऽपि प्राणात्यय एव प्राणविदोऽपि तथात्वमिति निश्चेयम् ॥ २८ ॥

॥ अबाधाच्च ॥ २९ ॥

आहारशुद्धौ सत्त्वशुद्धिरित्याहारशुद्धिविधेरबाधादपि ब्रह्मविदां सर्वान्नीनत्वं प्राणसंकटविषयमेव । एवमतिशयितशक्तेर्ब्रह्मविदोऽपि ह्युच्छिष्टपरिग्रहभक्षणयोरापद्येव दर्शनादल्पशक्तेः प्राणविदः किं पुनरिति ॥ २९ ॥

॥ अपि च स्मर्यते ॥ ३० ॥

"जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" ॥

इति प्राणसंकट एव सर्वान्नभक्षणं स्मर्यते ॥ ३० ॥

॥ शब्दश्चातोऽकामकारे ॥ ३१ ॥

यतो ब्रह्मविदामन्येषां च सर्वान्नानुमतिः प्राणात्यय एव । अतः । अकामकारे यथेष्टाचरणनिवृत्तौ कठसंहितायां श्रूयमाणशब्दश्चोपपद्यते । "तस्माद्ब्राह्मणः सुरां न पिबति, पाप्मना नोत्सृजा इती"ति, पाप्मना संसृष्टो न भवामीति मत्वा सुरां न पिबतीत्यर्थः ।

"अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः ।
एतादृशोऽपि नाचारं श्रौतं स्मार्तं विवर्जयेत्" ॥

इति स्मृतिश्च । तस्मा"न्न ह वा अस्यानन्नं जग्ध"मित्येवंजातीयकाः प्राणविद्यास्तुत्यर्था अर्थवादा एव न शमादिवत् प्राणविद्याङ्गतायाः सर्वान्नभक्षणविधयः ॥ ३१ ॥

॥ विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

"यज्ञादिश्रुते"रिति यज्ञाद्याश्रमकर्मणां विद्याहेतुत्वमुक्तम् । इदानीं तानि यज्ञादिकर्माणि केवलाश्रमनिष्ठेनामुमुक्षुणाप्यनुष्ठेयान्युत नेति चिन्त्यते । तत्र विद्याङ्गभूतानां तेषां केवलाश्रमस्याप्यङ्गत्वे नित्यानित्यसंयोगविरोधः प्रसज्यत इति न केवलाश्रमधर्मा यज्ञादय इति प्राप्ते आह, "आश्रमकर्मापी"ति । यज्ञाद्याश्रमकर्मापि केवलगृहस्थाश्रममात्रनिष्ठस्यामुमुक्षोः कर्तव्यमेव । कुतः । विहितत्वात् । "यावज्जीवमग्निहोत्रं जुहोती"त्यादिना केवलाश्रमिणोऽपि जीवननिमित्ततया नित्यवद्विहितत्वात् ॥ ३२ ॥

॥ सहकारित्वेन च ॥ ३३ ॥

"तमेतं वेदानुवचनेने"त्यादिना विद्यासाधनत्वेन विहितत्वाच्च विद्योत्पत्तिद्वारेण विद्यासहकारितयाप्यनुष्ठेयं यज्ञादिकर्म । नाप्यत्र नित्यानित्यसंयोगविरोधः । कर्माभेदेऽपि संयोगभेदात् । "एकस्य तूभयत्वे संयोगपृथक्त्व"मिति न्यायात् । संयोगभेदो हि तुल्यबलवाक्यद्वयेन विनियोगपृथक्त्वम् । तथाहि, यावज्जीवादिवाक्यकल्पितो नित्यः संयोगः । न तस्य विद्याफलत्वम् । "तमेतं वेदानुवचनेने"त्यादिवाक्यकल्पितस्त्वनित्यः । तस्य विद्याफलत्वम् । यथैकस्यापि दध्नो "दध्ना जुहोती"ति नित्येन विनियोगेन क्रत्वर्थता । "दध्नेन्द्रियकामस्य जुहुया"दित्यनित्येन विनियोगेन पुरुषार्थता । तद्वत् । अतः सति वाक्यद्वये विनियुक्तविनियोगो न विरुध्यते ॥ ३३ ॥

ननु नित्याग्निहोत्रादिभ्यो भिन्ना एवापूर्वयज्ञादयो विविदिषायां विनियुज्यन्ताम् । तत्र कुतो विनियुक्तविनियोगस्तत्राह ॥

॥ सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

सर्वथापि विद्यासहकारित्व आश्रमकर्मत्वेऽपि त एव यज्ञादयो धर्मा अनुष्ठेयाः । त एवेत्यवधारणेन कर्मस्वरूपभेदनिरासः । यथा कुण्डपायिनामयने "मासमग्निहोत्रं जुहोती"ति होमान्तरम्, तद्वदिह न भवतीत्यर्थः । कुतः । उभयलिङ्गात्" । उभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्य तेषामेव विनियोगाल्लिङ्गात् ॥ ३४ ॥

॥ अनभिभवं च दर्शयति ॥ ३५ ॥

"धर्मेण पापमपनुदती"त्यादिना तैरेव यज्ञादिभिर्विद्याया अनभिभवं पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति । अत उभयत्र विनियोगाद्यज्ञादयस्त एव मुमुक्षूणां केवलाश्रमिणां चानुष्ठेयाः ॥ ३५ ॥

॥ अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ चानाश्रमिणां विद्यायामधिकारोऽस्ति न वेति विशये किं प्राप्तम् । नास्तीति । कुतः । तेषां विद्याऽसाधारणहेत्वाश्रमधर्माभावादिति प्राप्त इदमुच्यते । "अन्तरा चापि त्वि"ति । तुशब्दः पक्षं व्यावर्तयति । चशब्दो नियोगे । अन्तरा, आश्रमधर्मान्तराले, विनष्टदाराक्षतदारत्वादनाश्रमित्वेन वर्तमानानामपि विद्यायामधिकारोऽस्त्येव । कुतः । तद्दृष्टेः । दृश्यते ह्यूर्ध्वरेतसां रैक्वभीष्मसंवर्तवाचक्नवीप्रभृतीनामपि ब्रह्मविद्यानिष्ठत्वम् ।

न च तेषां विद्यानुग्राहकधर्माभाव इति वाच्यम् । यज्ञहोमाद्यनैकान्तिकधर्माभावेऽपि तपउपवासदानदेवाराधनादानामैकान्तिनामाश्रमानियतानां विद्यानुग्राहकधर्माणां तेष्वपि सत्त्वात् ॥ ३६ ॥

॥ अपि च स्मर्यते ॥ ३७ ॥

"जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते" ॥

इति विधुरादीनामनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते ॥ ३७ ॥

॥ विशेषानुग्रहश्च ॥ ३८ ॥

श्रयते चानाश्रमनियतधर्मविशेषैस्तेषां विद्यानुग्रहः । "तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्या"दिति । प्राग्जन्मानुष्ठितैरप्याश्रमधर्मैरिह विद्योदयः संभवति ।

"अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" ।

इति स्मृतेः ।

तस्माद्विधुरादीनामप्यधिकारोऽस्त्येवेति ॥ ३८ ॥

तथाप्याश्रमित्वानाश्रमित्वस्यैव वैशिष्ट्यमित्याह ॥

॥ अतस्त्वितरज्यायो लिङ्गाच्च ॥ ३९ ॥

अतोऽनाश्रमित्वादितरदाश्रमित्वमेव ज्यायो वरिष्ठम् । भूयोधर्मकान्यधर्मकयोरतुल्यकार्यत्वाल्लिङ्गात् । श्रुतिलिङ्गात् । स्मृतिलिङ्गाच्च । "तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्चे"ति देवयानेन पथा गमनमाश्रमिणामेव दर्शयति । कथं गम्यते । "ये चेमेऽरण्य" इत्यरण्यवासिनामेव ग्रहणात् । चत्वार आश्रमा इति नियमात् ।

"अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः" ।

संवत्सरमनाश्रमी स्थित्वा कृच्छ्रं समाचरेदिति निन्दावचनाच्चाश्रमित्वेनैव भाव्यम् ।

अपिच, विनष्टदारा अकृतदारा वा विधुरादयः केनचिद्धेतुनाश्रमप्रतिपत्त्यसंभवे, तेषामप्यपवर्गो जपादिसाधारणधर्मैर्विद्यानुग्रहादवगम्यते । तथाह याज्ञवल्क्यः ।

"नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः ।
अतो यदात्मनोऽपथ्यं परस्य न तदाचरेत्" ॥

इतिहासे च ।

"विद्यावृत्तिविनीतस्य निगृहीतेन्द्रियस्य च ।
आर्जवे वर्तमानस्य आश्रमैः किं प्रयोजनम्" ॥

इति ॥ ३९ ॥

अथ च नैष्ठिकवैखानसपरिव्राजकानां स्वाश्रमेभ्यः प्रच्युतानामपि ब्रह्मविद्यायामधिकारोऽस्ति न वेति विशये, अस्तीति । विधुरादिवदनाश्रमधर्मैर्जपादिभिस्तेषामपि विद्यानुग्रहसंभवादिति प्राप्त आह ॥

॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात् तद्रूपाभावेभ्यः ॥ ४० ॥

तुशब्दः पक्षनिषेधार्थः । तद्भूतस्य नैष्ठिकादिधर्मनिष्ठस्य नातद्भावः । अनाश्रमितयावस्थितिर्न संभवति । कुतः । तद्रूपाभावेभ्यो नियमात् । तद्रूपाभावा नैष्ठिकादिधर्माभावाः, तेभ्यः, शास्त्रैर्नियमात् । नैष्ठिकादिकद्भूर्मनिष्ठान् स्वाश्रमधर्मत्यागाविषयच्छन्ति शास्त्राणि । "ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयचि"ति नैष्ठिकस्य, "अरण्यमीयात्र ततः पुनरेया"दिति वैखानसस्य, संन्यस्तस्य "अग्निं न पुनरावर्तये"दिति परिव्राजकस्य । अतो विधुरादिवत् तेषामनाश्रमित्वासंभवाच्च ब्रह्मविद्याधिकारः । जैमिनेराचार्यस्याप्येतत् संमतम् ।

किंच, "ब्रह्मचर्यं समाप्य गृही भवे"दित्याद्यारोहणविधिवदवरोहणविध्यदर्शनात् । शिष्टाचाराभावाच्च ॥ ४० ॥

नन्वधिकारलक्षणेऽ"वकीर्णिपशुश्च तद्व्रदाधानस्याप्राप्तकालत्वा"दिति "ब्रह्मचार्यवकीर्णी नैऋतं गर्दभमालभेते"त्यादिना प्रच्युतब्रह्मचर्यस्य प्रायश्चित्तविधानात् कृतप्रायश्चित्तस्य ब्रह्मविद्यायामधिकारः स्यादित्याशङ्क्याह ॥

॥ न चाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४१ ॥

आधिकारिकमधिकारलक्षणोक्तं प्रायश्चित्तं नैष्ठिकधर्मच्युतानां न संभवति । कुतः । तेषां पतनस्मरणात् प्रायश्चित्तायोगात् । तथा च स्मृतिः ।

"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" ॥

इति । अपिशब्दः प्रायश्चित्तस्योपकुर्वाणविषयकत्वद्योतनार्थकः ॥ ४१ ॥

॥ उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् ॥ ४२ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अपिः संभावनायम् । एके त्वाचार्या गुरुदारादिभ्योऽन्यत्र नैष्ठिकादिब्रह्मचर्यच्यवनस्य महापातकविलक्षणत्वादुपपातकत्वादुपकुर्वाणवत्नैष्ठिकस्याप्यप्रायश्चित्तभावं मन्यन्ते । ब्रह्मचारित्वाविशेषात् । अवकीर्णित्वाविशेषाच्च । अशनवत् । यथा मद्यशनादिनिषेधस्तत्प्रायश्चित्तं चोपकुर्वाणस्य नैष्ठिकादीनां च समानम् । तदुक्तं स्मृतिकर्तृभिः । "उत्तरेषां चैतदविरोधी"ति । उपकुर्वाणब्रह्मचारिण उक्तो धर्म उत्तरेषां चाश्रमिणां स्वाश्रमाविरोधी भवतीत्यर्थः । तथाऽपि ब्रह्मचर्यच्यवने प्रायश्चित्तमूह्यम् ॥ ४२ ॥

॥ बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

ऊर्ध्वरेतस उपपातकित्वे महापातकित्वे चोभयथापि स्वाश्रमप्रच्युतत्वाच्छिष्टैर्बहिष्कार्याः । कुतः । "आरूढो नैष्ठिक"मित्यादिस्मृतेः । आचारात् । वर्जयन्ति हि तांश्छिष्टा विद्योपदेशसहभोजनादिव्यवहारेषु ।

यद्यपि किल्बिषनिर्हरणाय कैश्चिद्वाक्यैस्तेषु प्रायश्चित्तमुपदिश्यते, तथापि कर्माधिकारापादनी शुद्धिस्तेषां न संभवति । तद्धेतुप्रायश्चित्ताभावात् । "प्रायश्चित्तं न पश्यामी"ति स्मृतेरित्यर्थः । अतः प्रायश्चित्ते कृतेऽपि तादृशशुद्ध्यनुरूपयोग्यताभावाद्ब्रह्मविद्याधिकारासंभव इति भावः । जपादिना पारमार्थिकफलभाक्त्वेऽपि व्यवहारयोग्यता नास्तीति राद्धान्तः ॥ ४३ ॥

॥ स्वामिनः फलश्रुतेरित्याचेयः ॥ ४४ ॥

अङ्गाश्रितान्युद्गीथाद्युपासनानि किं स्वामिनो यजमानस्य कर्माण्युत ऋत्विज इति विशये, किं युक्तम् । स्वामिन इति । कुतः । फलश्रुतेः । "यदेव विद्ययें"ति क्रतुवीर्यवत्तरत्वफलस्य यजमानाश्रयत्वश्रवणाद्ध्रुवोपासनादिष्विव स्वामिन एवैषु कर्तृत्वमित्याचेय आचार्यो मन्यते स्म ॥ ४४ ॥

॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४५ ॥

क्रत्वङ्गत्वेन क्रत्वधिकृतस्यैवोद्गीथाद्युपासनेऽधिकारात्, क्रतोश्च साङ्गस्यार्त्विज्यत्वेनैतदपि गोदोहनादिवदङ्गाश्रयत्वेनार्त्विज्यमङ्गीकुर्वत ऋत्विजः कर्मैवेत्यौडुलोमिराचार्यो मन्यते स्म । किं कारणम् । तस्मै हि यजमानफलसाधनभूतसाङ्गक्रत्वनुष्ठानाय हि, ऋत्विक् परिक्रीयते । क्रतुः प्रयोगान्तःपातीति चोद्गीथाद्युपासनानीति, ऋत्विजैव निर्वर्त्यानि ।

यत् तूक्तं, "फलस्य यजमानाश्रयत्वश्रवणा"दिति, नैष दोषः । "शास्त्रफलं प्रयोक्तु"रिति न्यायेन तस्य तद्वामित्वात् । यजमानेन हि स्वर्गामिफलकसाङ्गप्रयोगकरणायर्त्विजां दक्षिणया क्रीतत्वात् कर्तृत्वेऽपि नैतेषां फलभाक्त्वम् । अतः क्रयणद्वारा कर्तृत्वभोक्तृत्वसामानाधिकरण्यमप्युपपद्यते । भृत्यकर्तृके युद्धे राज्ञा युध्यत इतिवदिति भावः ।

तस्मादङ्गोपासनान्यृत्विक्कर्माणीति सिद्धम् ॥ ४५ ॥

॥*सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्॥४६॥

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्, बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण" इति बृहदारण्यके कहोलप्रश्ने श्रूयते । तत्रेदं चिन्त्यते । किमत्र बाल्यपाण्डित्यवन्मौनमपि विद्याङ्गतया विधीयते, उतानूद्यत इति विशये, किं तावत् प्राप्तम् । अनूद्यत इति । मौनं च ज्ञानं, तच्च पाण्डित्येन गतमित्येवं प्राप्ते ब्रूमः । "सहकार्यन्तरविधि"रिति । विधीयत इति विधिः, सहकार्यन्तरस्य विधिः सहकार्यन्तरविधिः । तद्वतो विद्यावतः सहकार्यन्तरं मौनं विधीयते, विध्यादिवत् । विधीयत इति विधिः । तेन यज्ञदानप्रभृत्याश्रमधर्माः शमदमादयश्च गृह्यन्ते । आदिशब्दाच्छ्रवणमननयहः । आश्रमधर्मवत्, शमदमादिवत्, श्रवणमननवच्च, पाण्डित्यबाल्ययोस्तृतीयं मौनं विद्यायाः सहकार्यन्तरं विधीयते ।

यद्यपि बाल्य एव विधेः पर्यवसानं, तथाप्यपूर्वत्वान्मुनित्वमपि विधेयम् ।

न च त्रयाणां विधाने वाक्यभेदो दोषः । उपरि धारणवदिष्टत्वाद्वाक्यभेदस्य ।

ननु पाण्डित्यग्रहणादेव सिद्धं, मौनं नेत्याह, "पक्षेणे"ति । मुनिशब्दस्य मननान्मुनिरिति व्युत्पत्त्या प्रकृष्टमननशीले पक्षेण प्रसिद्धेः । "मुनीनामप्यहं व्यास"इति, "वाल्मीकिर्मुनिपुंगव" इति च प्रयोगदर्शनात् । प्रकृष्टमननं च श्रवणप्रतिष्ठार्थान्मननादर्थान्तरभूतमुपासनालम्बनस्य परमात्मस्वरूपगुणादेरनवरतध्यानरूपं भगवदनुग्रहासाधारणं कारणं निदिध्यासनाख्यम् । ततश्चैवं वाक्यार्थः । यस्मात् पूर्वं ब्राह्मणा आत्मानं विदित्वा पुत्रैषणादेर्व्युत्थाय भिक्षाचर्यं चरन्ति, तस्मात्, अधुना ततोऽपि ब्राह्मणो विद्यावान्, विद्यानिष्पत्तये पाण्डित्यं निर्विद्य, साङ्गवेदाध्ययनजा बुद्धिः पण्डा, तद्वान् पण्डितः, तस्य कृत्यं श्रवणापरपर्यायं पाण्डित्यं निर्विद्य, निश्चयेन लब्ध्वा, बाल्येन तिष्ठासेत्, श्रवणजज्ञानस्य बालभावेन मननेनासंभावनानिरासेन बालस्य भावेन वा दम्भादिरहितशुद्धचित्तत्वेन स्यातुमिच्छेत् । बाल्यं च पाण्डित्यं च निर्विद्यैवं श्रवणमनने कृत्वानन्तरं मुनिः स्यात्, परब्रह्मण्यनवरतध्यानशीलो भवेत्, तत्परिपाकाय, एवममौनं मौनेतरं सहकारिकलापं मौनं च निदिध्यासनं यथावल्लब्ध्वानन्तरं ब्राह्मणो भवति, निष्पच-

* अतः पूर्वं श्रुतेश्चेति सूत्रं शंकरभाष्येऽस्ति तदिह न स्वीक्रियते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विद्यो भवतीत्यर्थः, ततो भगवदनुग्रहेण तत्साक्षात्कारं लभत इति भावः ।

न च श्रवणादेरेव साक्षान्मोक्षहेतुत्वमस्तु, किमनुग्रहाङ्गीकारेण, गौरवादिति वाच्यम् । तेषां व्यभिचारदर्शनात् । अस्य त्वन्वयव्यतिरेकाभ्यामव्यभिचारित्वश्रवणादवश्याभ्युपगम इत्यर्थः । "शृण्वन्तोऽपि बहवो यं न विद्युः," "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते तेन लभ्यः," "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीश"मित्यादिश्रुतेः ।

न च "ततस्तु तं पश्यति निष्कलं ध्यायमान"इति ध्यानस्यैव तत्साक्षात्कारं प्रति प्रधानोपायत्वश्रवणात् तद्वाधः स्यादिति वाच्यम् । अविरुद्धत्वात् । ध्यानस्य कारणत्वे भगवत्प्रसादस्य व्यापारत्वेनाङ्गीकारादनयोः सामञ्जस्यम् । अन्यथा प्रसादश्रुतेर्बाधप्रसङ्गात् ।

अतः सर्वाश्रमस्थस्य विदुषो यज्ञादिस्वाश्रमधर्मवत् पाण्डित्यादिचितयं विद्यायाः सहकार्यन्तरं विधीयते ॥ ४६ ॥

ननु यदि सर्वाश्रमस्थविदुषां स्वस्वाश्रमधर्मसहकारिणी पाण्डित्यादिसहकारिणी च विद्या ब्रह्मप्रापिकेत्युच्यते, तर्हि कथं छान्दोग्ये, "आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्ब"इत्यारभ्य, "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते" इति गृहस्थेनोपसंहार इत्याशङ्क्याह ॥

॥ कृत्स्नभावात् तु गृहिणोपसंहारः ॥ ४७ ॥

तुः शब्दः शङ्काच्छेदार्थः । गृहिणोपसंहारात् तस्यैव यथोक्तविद्यानुष्ठानाद्ब्रह्मप्राप्तिरिति नाभिप्रेयते । अपितु कृत्स्नभावात्, कृत्स्नानां धर्माणां तत्र सत्त्वात्, तेनोपहारः । सन्ति हि गृहस्थं प्रति कर्तव्यतयोपदिष्टा बहुलायासा बहवो यज्ञादयः स्वाश्रमधर्माः, आश्रमान्तरधर्माश्च यथासंभवमहिंसेन्द्रियसंयमादयः ।

तस्मात् तत्र धर्मबाहुल्यात् तेनोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः । तथैतस्मिन्नपि वाक्ये "अथ भिक्षाचर्यं चरन्ती"ति पारिव्राज्यैकान्तधर्मभिक्षाचरणपूर्वकः ॥ ४७ ॥

अथ मुनिरिति मौनोपदेशः सर्वाश्रमधर्मप्रदर्शनार्थ इत्याह ॥

॥ मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

यथा "बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः, एतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमभीप्सन्तः प्रव्रजन्ती"त्यादौ पारिव्राज्यं मौनमुपदिष्टम्, तद्वदितरेषां नैष्ठिकादिधर्माणामपि त्रयो धर्मस्कन्धाः, यज्ञोऽध्ययनं दानमिति प्रथमः, "तप एव द्वितीयो, ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति, "ब्रह्मसंस्थोऽमृतत्वमेती"त्यादावुपदेशात् । तत्र हि सर्वाश्रमसाधारणेन ब्रह्मसंस्थशब्देन सर्वेषामप्याश्रमिणां ब्रह्मप्राप्तिरुपदिश्यते । तथा जाबालोपनिषदि च "ब्रह्मचर्यं समाप्य गृही भवे"दित्यादिना चत्वार आश्रमा उपदिश्यन्ते ।

अतः सूष्ठुक्तं "यज्ञादिसर्वाश्रमधर्मवन्मौनञ्चितयं विद्यायाः सहकार्यन्तरं विधीयत" इति ॥ ४८ ॥

॥ अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

"बाल्येन तिष्ठासे"दित्यत्र किं बालचरितं बाल्यं विदुषोपादेयमुत जितेन्द्रियतया दम्भदर्पादिराहित्यं भावशुद्धिमात्रं बाल्यमिति विशये, तिष्ठन्मूत्रपुरीषादिकर्म बाल्यमिति पूर्वः पक्षः । राद्धान्तस्तु बालो यथा स्वाभिजनाद्यनाविष्कुर्वन् दम्भदर्पादिरहितो वर्तते, तथा विद्वानपि पाण्डित्यप्रयुक्तस्वमाहात्म्याद्यनाविष्कुर्वन् दम्भादिराहित्येन बाल्येन वर्तेत । कुतः । "अन्वयात्" । तस्यैव विद्यान्वययोग्यत्वात् । कामचारादेस्तु ।

"नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" ॥

इत्यादिभिर्विद्योत्पत्तिविरोधित्वावगमात् ॥ ४९ ॥

अथ विद्योत्पत्तिकालश्चिन्त्यते ॥

॥ ऐहिकमप्रस्तुते प्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

किं पूर्वोक्तसाधनैः सिध्यन्ती विद्येहैव जन्मनि सिध्यति, उत जन्मान्तर इति संशयः । तत्र किं युक्तम् । इहैवेति । कुतः । दृष्टार्थत्वाद्विद्यायाः । न हि कश्चित् परत्र मे विद्या जायतामिति कामयमानो विद्यासाधनेषु प्रवर्तते । अतो यस्मिन् जन्मनि विद्यायां यतते, तत्रैव तत्फलेन भवितव्यमिति प्राप्ते ब्रूमः । ऐहिकं विद्याफलं प्रतिबन्धेऽप्रस्तुते सति विद्याविरुद्धफलं देशकालविशेषापेक्षं फलोन्मुखं प्रतिबन्धशब्दवाच्यम् । तस्मिंश्चाविद्यमाने सतीत्यर्थः । प्रस्तुते तु तस्मिन् जन्मान्तरे विद्यासिद्धिः । कुतः । तद्दर्शनात् । "मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं कृत्स्नं ब्रह्म प्राप्तो विरजोऽभूद्विमृत्यु"रित्यादिश्रुतिर्ह्यैहिकीं विद्यासिद्धिं दर्शयति । "गर्भस्थ एव वामदेवः प्रतिपेदे"इत्यादिस्तु जन्मान्तरसाधनजा जन्मान्तरे । स्मृतिश्च ।

"अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति" ।
"अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" ।

इत्यादिका ।

अतोऽस्मिन् जन्मनि जन्मान्तरे वा प्रबलकर्मान्तरप्रतिबन्धवशयानन्तरमेव विद्या सिध्यतीति सिद्धम् ॥ ५० ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ संपन्नविद्यस्य मोक्षकालश्चिन्त्यते ॥

॥ एवं मुक्तिफलानियमस्तदव-
स्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥

किं यस्मिन् शरीरे विद्यादयस्तच्छरीरपात एव मोक्ष उत शरीरान्तरपात इति विशये, विद्यासिद्धौ तत्फलस्यावश्यकत्वात् तच्छरीरपात एवेति पूर्वः पक्षः । राद्धान्तस्तु यथा साधनसंपन्नस्येह जन्मन्येव विद्या सिध्यतीति न नियमः, अपितु प्रतिबन्धनाशोत्तरमेव । एवं विद्यासंपन्नस्य मुक्तिरेव फलम् । तस्यानियमः । प्रारब्धकर्मणि सति शरीरान्तरपाते, तदभावे तच्छरीरपात एवेति । कुतः । "तदवस्थावधृतेः" । विद्यावतोऽपि "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति छान्दोग्ये प्रारब्धक्षयोत्तरमेव मोक्षकालविनिश्चयादित्यर्थः । यदाभ्यासोऽध्यायसमाप्तिद्योतकः ॥ ५१ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ तृतीयाध्यायस्य चतुर्थपादविवरणं समाप्तिमगात् ॥ ४ ॥ ∴ ::

॥ अथात्मपुराणवर्णनं प्रस्तूयते ॥

अलिकफलितचञ्चच्चन्द्रकान्तिच्छटाच्छ-
प्रशमितनिजवासोद्भासनायासबाञ्छम् ।
रुचिरुचिरपुरन्ध्रीकोटिधिक्कारिसव्य-
स्थितगिरिसुतयातिभ्राजमानं भजेऽहम् ॥ १ ॥

अथ वेदान्तोपनिषत्तात्पर्यमवधारयितुमनसां विपश्चितामुपकाराय तात्पर्यबोधिनीनाम्नीं भगवद्गीताव्याख्यां सूत्रदीपिकाख्यां ब्रह्मसूत्रवृत्तिं कौषीतक्याद्युपनिषट्टीकां दीपिकाभिधानां निर्मायापि मन्दधियामनेकग्रन्थसंपादनोद्योगमविदधतां बहुविधनिबन्धालोडनभीरूणामतिसुलभसंदर्भं मृगयतां सावधारणमनेकोपनिषत्सारार्थमनवगच्छतां वेदान्ततात्पर्यमवगन्तुमिच्छतां कलिकालमहिम्ना सर्वथापचीयमानमतीनां परमालस्यजुषां संख्यावतां प्राचुर्यं संभावयद्भिः कृपाम्बुधिभिर्द्रविडान्ववायमवतंसयद्भिर्दक्षिणदिग्जनिभिः परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादान्तेवासिभिः सकलशास्त्रपारावारपारदृश्वभिः श्रीशंकरानन्दमुनिभिर्निखिलवेदान्तोपनिषत्सारसागरावगाहसुखप्रदं विषयिणामपि केवलं श्रवणवाचनमात्रेण विषयवैराग्योपजननद्वारा ब्रह्मानन्दावाप्तिसाधकं ब्रह्मप्रतिपादनपरं तत्तत्क्रमोपबृंहणपूर्वकमर्थतः सर्वोपनिषद्ब्रह्मघटितमतिसुगमं गुरुशिष्यसंवादरूपं पद्ममयमष्टादशाध्यायात्मकमात्मपुराणं नाम विशेषतः कावेरीतीरनिवासिस्वशिष्योद्देशेन केवलं स्नेहतः पुराणपरिपाट्या निरमायि । तथा चोक्तमष्टादशाध्यायस्यद्विचत्वारिंशदधिकपञ्चशततमपद्ये स्वयमेव ।

"इदं गुरुः स्वशिष्याय कावेरीतीरवासिने ।
उक्तवान् श्रद्दधानाय स्नेहादेव च केवलात्" ॥

इति । एतत्पद्यार्थपर्यालोचनया कावेरीतीरेऽस्य प्रबन्धस्य निर्मितिरिति निश्चीयते । एतत्पद्याख्यान्तरा "अस्य ग्रन्थस्योत्पत्तिदेशमाह, इदं गुरुरिति" इत्यवतरणमवतारयतोररीक्रियते चेति ।

यद्यपि शंकरानन्दभगवतो नोद्भवसमयः प्रतीयते, तथापि विद्यारण्येन गुरुत्वपुरस्कारपुरःसरं वन्द्यमानत्वाद्विद्यारण्यमुनेर्गुरुरासीदिति प्रतीत्यैनयोः पौर्वापर्याभावः प्रतीयत एवेति । तथा चोक्तं विद्यारण्यमुनिभिः पञ्चदशीप्रारम्भे ।

"नमः श्रीशंकरानन्दगुरुपादाम्बुजन्मने" ।

इति ।

भिन्नश्चायं शंकराचार्यादित्यप्यवसीयत एव । शंकराचार्यस्य विद्यारण्यमुनेश्च कालयोर्दूरान्तरत्वेन प्रसिद्धत्वाद्गुरुशिष्यभावायोगात् । एतदात्मपुराणव्याख्याविधायकेन प्रथमाध्यायविवरणावसानावसरकृतपद्यस्यास्मिन्नेव प्रत्ययेऽनुकूलत्वाच्च । तथा च तत् पद्यम् ।

"श्रीशंकरानन्दमुनेः प्रबन्धः
श्रीशंकराचार्यमतानुगामी" ।

इति ।

अस्य प्रथमाध्याय ऐतरेयोपनिषदर्थनिरूपणं, द्वितीये कौषीतक्युपनिषत्सारार्थप्रकाश इन्द्रप्रतर्दनाख्यानं, तृतीये कौषीतक्युपनिषत्सारार्थप्रकाशे गार्ग्याजातशत्रुसंवादः, चतुर्थे बृहदारण्यकमधुकाण्डसारार्थप्रकाशके ऋभ्यश्विसंवादः, पञ्चमे बृहदारण्यके याज्ञवल्क्यकाण्डसारार्थप्रकाशे ऋषियाज्ञवल्क्यसंवादः, षष्ठे बृहदारण्यकयाज्ञवल्क्यकाण्डसारार्थप्रकाशे याज्ञवल्क्यजनकसंवादः, सप्तमे खिलकाण्डसारार्थप्रकाशस्तत्र याज्ञवल्क्यमैत्रेयीसंवादः, अष्टमे श्वेताश्वतरोपनिषत्सारार्थप्रकाशे श्वेताश्वतरसंन्यासिसंवादः, नवमे काठकोपनिषत्सारार्थप्रकाशे यमनचिकेतःसंवादः, दशमे तैत्तिरीयोपनिषत्सारार्थप्रकाश आनन्दवल्लीभृगुवल्लीनारायणीयव्याख्यानम्, एकादशे जाबालगर्भब्रह्मपरमहंसहंसारुणेयतुरिकामृतनादमहदात्मप्रबोधकैवल्योपनिषदामेकादशानां सारार्थप्रकाशः, द्वादशे छान्दोग्यसारार्थप्रकाश आरुणिश्वेतकेतुसंवादः, त्रयोदशे छान्दोग्यसारार्थप्रकाशे सनत्कुमारनारदसंवादः, चतुर्दशे छान्दोग्यसारार्थप्रकाशे प्रजापतीन्द्रविरोचनाख्यायिका

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्चदशे तलवकारोपनिषदर्थप्रकाशः, षोडशे मुण्डकोपनिषत्सारार्थप्रकाशस्तत्राङ्गिरःशौनकसंवादः, सप्तदशे प्रश्नोपनिषदर्थप्रकाशे पिप्पलादसुकेशसंवादः, अष्टादशे नृसिंहपूर्वोत्तरतापनीयसारार्थप्रकाश ईशावास्योपनिषत्सारार्थप्रकाशश्चेति।

तदित्थं संक्षिप्याष्टादशाध्यायाभिधेयार्थनिरूपणं मतिमद्भिरवसेयम्।

अस्य प्रबन्धस्य सर्गप्रतिसर्गादिपञ्चविधपुराणलक्षणसमन्वितत्वात् पुराणत्वम्। तदुक्तमष्टादशतमाध्यायोपान्तऽष्टत्रिंशदधिकपञ्चशततमादिपद्यैर्मूल एव शंकरानन्दमुनिभिः। तथाहि।

"सृष्टिः स्थितिश्च संहारो विश्वस्यास्मिन् हि तिष्ठति।
भूतानां भौतिकानां च वंशोऽपि च महानयम् ॥ ५३८ ॥
स्वायंभुवस्य च मनोः कीर्तनं चाच विद्यते।
यस्मिन् मन्वन्तरं सर्वमन्तर्भवति सर्वदा ॥ ५३९ ॥
व्यापारा अपि वंश्यानां भूतादीनां महात्मनाम्।
राज्ञां यशांसि कीर्त्यन्ते पुराणेऽस्मिन्ननेकधा" ॥ ५४० ॥

एतद्व्याख्यानमनुपदमात्रवर्णयिष्यमाणकाकारामपण्डितरचितं प्रसङ्गात् प्रदर्श्यते। इदमेव च दिक्प्रदर्शनं तद्व्याख्यानसौष्ठवस्यानुसंधेयम्। तद्यथा।

"अस्मिन् प्रसिद्धं पुराणलक्षणं समन्वितं करोति, "सृष्टिरिति", सर्गपदोक्ता विश्वस्य सृष्टिः, तदुपलक्षिता स्थितिश्च, तथा प्रतिसर्गः संहारोऽस्मिन् यन्ये तिष्ठति प्रतिपाद्यते. तथा भूतानामाकाशादीनां भौतिकानां विराडादीनां च वंशोऽत्र तिष्ठतीत्यर्थः ॥ ५३८ ॥ मन्वन्तरसत्त्वमप्यत्र दर्शयति, "स्वायंभुवस्ये"ति, स्वायंभुवमनोः कीर्तनमुत्पत्त्यादिवर्णनमत्र चतुर्थाध्याये त्रयोदशाधिकत्रिशततमश्लोकमारभ्य विद्यते, येन तद्विभूतिभूतानां सर्वेषां मनूनां कीर्तनं कृतप्रायं भवति, तदेतदुक्तं "यस्मिन् मन्वन्तर"मित्यादिना ॥ ५३९ ॥ वंश्यानुचरितं वंशभवानां व्यापारः, सोऽप्यत्र विद्यते, आकाशादीनां भूतानां तद्विकाराणामिन्द्रियादीनां तथा मनुवंशानां तथा मनुवंश्यानां प्रतर्दनादीनां राज्ञां च ये व्यापारास्तेषामत्र कीर्तनादित्याह, "व्यापारा अपीति" ॥ ५४० ॥ इति।

अथ वाराणसीस्थवृद्धकालेश्वरसमीपवर्तिमठमधिवसतो वाङ्मयमात्रपारावारविहारिणः कृपालुतया संसारतप्तान् वेदान्तोपदेशेनोद्धरतो वेदान्ततात्पर्यबोधने परमोत्कृष्टतामेतत्पुराणस्यावकलयतो निजगुरोः श्रीमद्विश्वेश्वराश्रमयतिवरस्यार्थगरिमभृतैतत्पुराणसंबन्धिसुस्पष्टव्याख्यानाय निदेशं शिरसि निदधता काश्मीरमण्डलालंकृतिजम्बूनामराजधान्यवाग्दिग्विभागवर्तिव्यासगङ्गाभिधनदीनिकटगामिबब्बराभिधपुरीनिवासिना सारस्वतद्विजात्यन्तर्गतसप्तशाखमुणीहाराख्यजात्यन्तर्गतं दत्तकुलमलंकुर्वता द्विचत्वारिंशदधिकाष्टादशशतमितवैक्रमाब्दगतपौषसुदिद्वादशीलब्धजनुषा कृष्णचन्द्रात्मजदिलारामनामतातसविधे किंचिदधीत्य पञ्चविंशकल्पशरद्भ्ययनाय काशीमिमामायातवता समयविद्याबृहस्पत्यहोबलशास्त्रिविश्वेश्वराश्रमयतिवर्यप्रभृतिभ्यो व्याकरणपूर्वोत्तरमीमांसातर्कपातञ्जलसांख्यमुखाखिलशास्त्राण्यधीत्य यथाशक्ति वसुविद्यावितरणेन बहुविद्यार्थिनो विदुषश्च संतोषयता विद्वन्मण्डलाग्रेसरत्वपदवीमनुभवता हनुमत्कुलदैवतेन काकारामेति विख्याताभिख्येन सूरिवरेणाद्रिशशिनवभूमितवैक्रमाब्दाधिकाश्विनसिताष्टम्यां दिवं भूषयता पञ्चवसुनागमितवैक्रमाब्देऽखण्डब्रह्मानन्दसुखसाक्षात्कारोपलम्भिका सत्प्रसवाख्या व्याख्यास्य पुराणस्य व्यधायि।

तस्यास्य प्रबन्धस्य क्वचित् क्वचिन्मूलरूपेण क्वचिदेव चोक्तवरटीकया सहोपलभ्यमानस्य बहुभिर्यत्नैरपि क्वचित् क्वचिदनुपलभ्यमानस्य सुप्रचाराहंस्यापि क्रयविक्रयादिव्यापाररहितस्यातिविरलप्रचारतामवलोक्यानन्दात्मयतिवरस्य सुप्रचारयिषापिपरिपूर्यरामपुत्रमनसुखरामेरितनागरद्विजातीयजीर्णदुर्गाभिधराजधानीनिवासिभिस्तद्राजधानीप्रभुवितीर्णप्रधानमन्त्रिपदप्रतिष्ठायुग्भिर्वेदान्तशास्त्रनिष्णातैर्कालापदाङ्कितैः संपद्रामसुतैर्गोकुलजीति सुगृहीतनामभिर्भावनगरराजधानीनिवासिभिस्तदधीशदत्तोपमन्त्रिपदभृद्भिः परमानन्ददासूनुभिः श्यामलदासशर्मभिश्च निगदितचरानन्दाभिधयतिवरसुप्रचारयिषापूर्तितत्परैः सुदामनगरीस्थवेदान्तशास्त्रनिपुणजीवनरामतनूजजयकृष्णसूरिकृतोत्तेजनां मनसुखरामप्रेरणां च सफलयद्भिरेतदपूर्वप्रबन्धदिदृक्षुसूरिजनोपचिकीर्षामतिकृद्भिः स्वद्रव्यव्ययेन काशिकनृसिंहभारतीयतिवरादेकमेकं च प्रोक्तजयकृष्णसूरेः पुस्तकमुपलभ्य नासिकक्षेत्रवास्तव्यनारायणाङ्गजखाडिल्करोपाह्वात्माराम(आपा)शास्त्रिभिः प्रशोध्य मुम्बईपत्तनवर्तिगणपतकृष्णाजीमुद्रायन्त्रालये तदधिपात्मारामकाङ्कोबाभिधेन लौहमुद्राक्षरैर्मुद्रणं कृतमासीत्।

अथास्य वेदान्तशास्त्रप्रतिपाद्यार्थनिरूपणे परमोत्तमस्य मूलमात्रस्याल्पस्य प्रसिद्धतरवाराणसीस्थराजकीयसरस्वतीमहामन्दिरेऽवलोकितवरस्य बहुलप्रसादगुणजुषो वेदान्तशास्त्रार्थविविदिषावद्रसिकजनात्यन्ताह्लादकस्य प्रबन्धवर्यस्येमां सुमुद्रणसौभाग्यवत्तां निरीक्ष्यातिप्रमुदितमना एतत्संपादकानामद्वितलोकोपकारशीलतां पश्यन् स्वयमखिलविद्वज्जननयनगोचरीकरणाय सत्यां समयोपलब्धौ प्रचिकाशयिषुरप्यनाया-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ससंसिद्धमनोरथः कृतकृत्यः संपन्नोऽस्मीति । स्मरिष्यामि च संपादकानामिमामुपकारितामिति ।

तथा पुस्तकरूपेण त्रिवलि यन्मुद्रितं, पत्राणि च सुदृढानि यद्योजितानि, सुमनोहराणि महान्ति च यदक्षराणि मुद्रितानि, तदेतत् सर्वं मन्मनसोऽतिप्रीतिमुत्पादयतीति ।

आत्मा पुराणः प्रतिपाद्यतेऽस्मिन्
सर्वाणि वेदान्तवचांसि यच्च ।
वन्दिव्रजत्वं कलयन्ति नैव
प्रयान्त्यनन्तस्य कदापि पारम् ॥ १ ॥

रामकृष्णमहासूरिव्याख्ययेदमलंकृतम् ।
निसर्गादुचिरं वक्त्रं कुण्डलेनेव शोभते ॥ २ ॥
नाहमत्रालिखं किंचिदपूर्वं विदुषां गणः ।
जानातु क्षमतां चैव चापल्यं क्षमया समः ॥ ३ ॥
भूमिकातश्च टीकातो मूलतश्च क्वचित् क्वचिद् ।
भावमादाय विद्वांसोऽलेखिषं भवतां मुदे ॥ ४ ॥
श्रीमतः शास्त्रविज्ञस्य न्याय्याध्योचितचेतसः ।
गिफिथेत्यभिधानस्य साहेबाय्यस्य सुप्रभोः ॥ ५ ॥
निदेशं शिरसि न्यस्य प्रावर्तिषि महात्मनः ।
विदाङ्कुर्वन्तु धीमन्तः किमन्यैर्बहुलेखनैः ॥ ६ ॥

इति शिवम् ॥

आज्ञां प्राप्य विघट्टिते कथमपि द्वारे प्रविष्टो हरिः
साष्टाङ्गप्रणतिं विधाय तनुते यावत् स्तुतिं शूलिनः ।
गौर्यङ्कस्थगणेशशुण्डललनात् तावन्मणिं गुंप्रवां-
स्तद् दृष्ट्वाम्बिकया सहातिविहसन्नीशोऽस्तु नः श्रेयसे ॥७॥

॥ काशिकराजकीयपाठशालास्यसांख्यशास्त्राध्यापकस्त्रिपाठ्युपनामको वेचनरामशर्मा ॥

* तावल्लम्बितशुण्डके गणपतौ स्वं कौस्तुभं गु-इति पाठान्तरम् ।

SÁNKHYATATTVAPRADÍPA
OR
THE PRINCIPLES OF
THE SÁNKHYA PHILOSOPHY.

[1] Having saluted Nature and pure Soul, I bring out this Sánkhya Tattva Pradipa—or the luminator of the principles of Sánkhya, for the benefit of others.

[1] Persons, who are too idle to attempt to study the Sánkhya Philosophy, being without the ship in the shape of the knowledge of its system, sink down in the sea of the Institute, for want of a support, like those whose efforts to swim are rendered useless—or the means of going across are destroyed, by the current. I bring out this work for supporting such persons. The principles of the Sánkhya Philosophy are fully expressed in it, and though containing but few words, it is full of meaning. Those who are averse to the trouble of studying the doctrinal systems of Kapila, i, e, the whole of the Sánkhya Philosophy, and are desirous of knowing its doctrines, should attentively read this elementary book. Herein they will attain the knowledge of every thing [desired, i. e. the doctrines of the Sánkhya] without trouble, in the same way as persons obtain the result of their merit and demerit [done in the former births without endeavouring]. Because trouble is not required for a thing, which is easily obtainable, as it is said by the authorities of Sánkhya, "why should any one go to the hills when honey is obtainable in the corner of the house, why should a wise man exert himself when the object desired has been accomplished?" inasmuch as it is improper to accomplish an object by a tedious way when the same can be effected by a simple one.

[2] But some persons, their minds being distracted by the pain of three kinds, long for only some means to remove it. Such means I shall describe in the sequel.

[3] The three kinds of pain are—viz., (1) due to one's self; (ádhyátmika); (2) due to products of elements; (ádhi-bhoutika; (3) due to supernatural causes. (ádhi-daivika). Of these that which is due to one's self is two fold, bodily and mental. The bodily pain is caused by an inequality, occurring among the wind, bile and phlegm; and mental pain originates in love, anger,

१ प्रकृतिं पुरुषं शुद्धं प्रणिपत्य प्रणीयते । प्रदीपः साङ्ख्यतत्त्वस्य परोपकृतये मया ॥

१ इह खलु प्रवाहविध्वस्ततरणोपाया इव साङ्ख्यतन्त्राध्ययनपरिश्रमासास्तत्प्रक्रियाज्ञानतरीविहीनाः शब्दोदधावनन्यावलम्बनाः सीदन्ति तत्तरणोपायः सकलसाङ्ख्यप्रक्रियाद्योतको बह्वर्थोऽल्पाक्षरो मया प्रकाश्यते । कापिलतन्त्राध्ययनालसैस्तत्प्रक्रिया जिज्ञासायामिदमेव प्रकरणं सम्यगवलोकनीयम् । अत्युग्रशुभाशुभादृष्टफलवत् प्रथमं विनैव सर्वमत्रैवाधिगन्तव्यम् । अयबलभ्येऽर्थे यद्बादर्शनात् । उक्तञ्च साङ्ख्याचार्यैः ॥

अक्त्रे चेन्मधुविन्देत किमर्थं पर्वतं व्रजेत् ।
दृष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत् ॥
ऋजुमार्गेण सिद्ध्यतोऽर्थस्य वक्रेण साधनायोगात् । इति ॥

२ केचित्तु दुःखत्रयोद्विग्नचित्तास्तन्निवृत्युपायमेव तावदभिकामयन्ते तज्ज्ञापयेदर्शयिष्यामः ॥

३ दुःखत्रयञ्च आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च । तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च । वातपित्तश्लेष्मणां वैषम्यनिमित्तं शारीरं कामक्रोधलोभमोहेर्ष्याविषादविषयविशेषादर्शनकारणकं मानसम् । इदमान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखमिति व्यपदिश्यते । बाह्योपायसाध्यमविदुःखं द्विविधं । आधिभौतिकमाधिदैविकञ्च । तत्राधिभौतिकं मानुषपशुसरीसृपस्थावरनिबन्धनं । आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिमित्तं । सर्वं मानसप्रत्यूहमेतत् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

avarice, delusion, envy, disappointment and in not seeing a particular desired object. It is called subjective or due to one's self, because the causes hereof are internal. The pain produced by the external causes is also of two kinds; due to products of elements, and due to supernatural causes. Of these two the former, i. e. due to products of elements is caused by men, birds, reptiles, and immovable things; and the latter, viz., due to supernatural causes is effected by demigods, demons, evil spirits, the planets when in an unauspicious position. All these are cognizable by the mind or—internal organ.

[1] Pain is a particular modification of the quality Passion, Rajo-guna. And inasmuch as it is modification of an eternal thing, it is eternal itself, and therefore it is quite impossible to remove or annihilate it entirely. By means, however, its suppression is possible. Such a means cannot be other than the knowledge of the difference between Nature and Soul, derived from the Institute.

[2] The object matter of this [Sánkhya] Institute is four-fold, *viz* (1) some object is merely nature—cause, but it is not modification of any thing, as Nature,—Primal Cause, which is the root—original cause of all [things], but nothing else has been established by proof to be a cause thereof. Otherwise—that is if a cause of the Primary cause also be admitted] there would occur an infinite regression of causes, [inasmuch as there would thus be supposed another cause for that cause, and so on] which would be destructive of there being such a thing as Primary cause. If it be held that the Primary cause itself is its own cause, then we say it is impossible, because, as a cause it would be prior, and as an effect posterior to itself, which is absurd. Nay, if the Original Cause be supposed to have a cause for itself, then the revelations, such as "it is unborn, single, red, white, black, bringing forth numerous offsprings—various phenomena" &c. which declare the fact of Nature being non-product, would be contradicted. Nature, [prakriti] means that which does—produces chiefly, it is therefore called Primal Principle also. It is the state of equipoise of the three, qualities i. e. Purity, Passion, and Darkness.

(2) [1] Some object *i. e.* the set consisting of seven, *viz.* the Great Principle-understanding, [mahat-tattva] Self-consciousness, [ahaṅkára] and the five subtile Elements, have the characteristics of being both Nature and modification. These are root-cause of one and effect of other thing. For instance, the Great Principle is the cause of Self-consciousness [ahaṅkára] and effect of the Original Cause—or principal Nature. So also Self-consciousness is the cause of the Subtile elements and organs of sense, but it is modification of Great principle—principle of understanding. Likewise the five Subtile elements are respectively causes of the five Gross Elements—ether &c and are effects of Self-consciousness.

(3) [2] The set consisting of the five Gross Elements and the eleven organs is simply product, being cause of nothing. But then it may be objected here that products of the five Gross Elements, earth &c., are observed in the shape of a cow a jar and a tree &c., and likewise particular products of their products that is to say of milk, and seed &c., are seen in the form of 'curd' 'germ' &c how then do you say that these—i. e. Gross Elements are simply products. To this we reply that, by a 'cause' is meant here the power of producing a distinct element; which the Gross Elements do not have inasmuch as a cow and a jar &c. are like them in grossness and perceptibility, therefore they are not distinct from earth &c. As it is said in the Sánkhya Tattva Kaumudí, all these cow, jar &c. are alike in being gross and perceptible; hence they are not different elements.

(4) [3] Soul is not a cause of any thing, because it is not modified, nor is it effect of any thing, for it is eternal. Otherwise causation or the cause and the effect should be cognizable as in the case of a jar; and a thing without a proof is like the horn of a man. O.

G. D.

---

१ दुःखं रजःपरिणामविशेषो नित्यपरिणामित्वादिदमपि नित्यमिति न शक्यते बाधितुं तथापि शक्यते तदभिभवः कर्तुं साधनेन तच्च साधनं शास्त्रजनितं प्रकृतिपुरुषान्यता ज्ञानं नान्यदिति ।

२ तच्छास्त्रप्रतिपाद्योऽर्थश्चतुर्विधः । तद्यथा (१) कश्चिदर्थः प्रकृतिरेव नतु कस्यचिद्विकृतिर्यथा मूलप्रकृतिः । सा सर्वस्य मूलमादिकारणं नतु तस्याः कारणान्तरङ्किञ्चित्प्रमाणसिद्धम् । तथात्वे वा मूलप्रकृतिकर्य्यनवस्था स्यात् । स्वस्यैव स्वकारणत्वेत् स्वापेक्षया कारणत्वात्स्वस्यैव पूर्ववर्तित्वङ्कार्य्यत्वात्पश्चाद्वर्तित्वमित्यसंभवः । सकारणत्वे चाजामेकां लोहितशुक्लकृष्णामित्यजत्वप्रतिपादनश्रुतिविरोधः स्यात् । साच प्रकरोतीतिप्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था ॥

१ कश्चिदर्थः प्रकृतिविकृतिश्च । तच्च महत्तत्त्वमहङ्कारः पञ्चतन्मात्राणि चेति सप्तसङ्ख्याकोगणः कस्यचित् प्रकृतिः कस्यचिद्विकृतिः । तद्यथा महत्तत्त्वमहङ्कारस्य प्रकृतिर्विकृतिश्च मूलप्रकृतेः । तथा । अहङ्कारः पञ्चतन्मात्राणामिन्द्रियाणाञ्च प्रकृतिर्विकृतिश्च महतः । तथपञ्चतन्मात्राणि भूतानामाकाशादीनाम्प्रकृतयो विकृतयश्चाहङ्कारस्य ॥

२ पञ्चमहाभूतान्येकादशेन्द्रियाणि चेति षोडशसङ्ख्याको गणो विकृतिरेव नतु कस्यचित प्रकृतिः । ननु पृथिव्यादीनामपि गोघटवृक्षादयो विकारा उपलभ्यन्ते तथा तद्विकारविशेषाणामपिपयोदधिजादीनां दध्यङ्कुरादय इति कथं विकृतित्वमेव तेषामितिचेच । तत्त्वान्तरोपादानत्वम्प्रकृतित्वमिहाभ्युपगतं नत्वेषां तदस्ति । स्थूलतयेन्द्रियग्राह्यतया गोघटादीनां समानत्वाच्च तत्त्वान्तरता पृथिव्यादिभ्यः । उक्तं च तत्त्वकौमुद्याम् । सर्वेषाङ्गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्वान्तरम् ।

३ पुरुषस्तु न कस्यचित् प्रकृतिरपरिणामित्वाच्चापि विकृतिर्नित्यत्वात् । अन्यथा । साध्यसाधनाभिव्यक्तिः स्यात् घटवत् । प्रमाणविरुद्धोऽर्थस्य च दृष्टसादृश्याभ्युपगमात् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

THE VRITTA-RATNÁKARA

OR

THE OCEAN OF METRES

BY

KEDÁRA BHAṬṬA.

There lived one Pavvi, an excellent Bráhmaṇa versed in the Vedas and doctrinal works of the followers of Śiva. His son Kedára, devoted to the worship of the feet of Mahádeva, having, for the happy completion of this work, saluted Sankara, together with Gauri and Ganeśa, the benefactor of this world, to whom both Brahmá and Vishṇu pay homage, writes this treatise on metres entitled Vrittaratnákara[1], which consists of definitions and illustrations (the definitions written in the measure of the metres defined).

Those metres will be stated here which by Pingala and others have been divided into two classes, viz. according to the quantities and according to (the number of) letters.

Rules for one hundred and thirty-six kinds of metres will be clearly explained in six chapters of this work.

Entire (poetical) speech (both Prakrit and Sanskrit) is pervaded by the ten letters म (ma), य (ya), र (ra), स (sa), त (ta), ज (ja), भ (bha), न (na), ग (ga) and ल (la), as the three worlds are pervaded by Vishṇu.

That foot of three letters is called म (ma-gaṇa) all of whose letters are long.

That is य (ya-gaṇa) whose first letter is short (and the remaining two letters long).

That is र (ra-gaṇa) whose middle letter is short (and the first and last long).

That is स (sa-gaṇa) whose last letter is long (and the first two short).

That is त (ta-gaṇa) whose last letter is short (and the first two long).

That is ज (ja-gaṇa) whose middle letter is long (and the first and last short).

That is भ (bha-gaṇa) whose first is long (and the two last short).

That is न (na-gaṇa) all of whose three letters are short.

These are the feet, (used in Sanskrit metres) eight in number, each consisting of three letters. In the Áryá metre and others of that class, five other feet are used, each consisting (not of three letters as mentioned before but) of four *Mátrás* or syllabic instants.

Each of these (latter) either consists of (two) letters both of which have long vowel sounds (a long vowel sound being equal to two short ones); or of four letters all of which have short vowel sounds; or of three letters whose first has a long sound (and the others are short); or whose second has a long sound (and the others are short); or whose last has a long sound (and the preceding ones short).

A letter with an *anusvára* or *visarga*, a long vowel, or a letter which immediately precedes a compound letter, is long. Also a letter is optionally long at the end of a *páda* (the fourth part of a sloka). A long vowel sound is denoted by the letter ग (ga) or a crooked line; and a short sound is denoted by the letter ल (la) or by a perpendicular line. A compound letter in the beginning of a *páda* is called *krama*. A long letter preceding a *krama* is some times considered short.

The following is an illustration of this:—

तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति॥

(In this verse the letter रि at the end of the third quarter coming before ग्रा which is a *krama* becomes short Else रि would have been long by its position standing as it does before a compound letter. In that case there would have been thirteen instants in the third quarter of an Áryá which is against rule).

The terms अब्धि, भूत, रस and like others are to be taken in the sense in which they are popularly used (अब्धि, the ocean, means four; भूत, the elements, five; and रस, flavour, six).

The *páda* (quarter) is the fourth part of a verse and *yati* is the cæsural pause.

Even pádas (quarters) are called युज् (yuj) and odd pádas (quarters) अयुज् (Ayuj).

A metre is either सम (sama), अर्द्धसम (ardha-sama) or विषम (Vishama).

Men well-versed in the knowledge of metres call that a *sama* metre all of whose quarters are of the same character.

That is an *Ardha-sama* metre whose first and third quarters, and second and fourth quarters are respectively identical in their characteristics.

FOOT NOTE. Vrittaratnákara means "The ocean of metres." There are more than one commentary on this work. One is by Sulhana and is called the Sukavihridayánandini or "The delighter of the heart of good poets." A later one by Bháskara is an improvement on Sulhaná. It is called the Vritta-ratnákara Setu, or "The bridge over the ocean of metres." The Vritta-ratnákara is a short but comprehensive treatise on Sanskrit metre. Its rules are quoted as an authority by the celebrated commentator Mallináth. It is very popular with the Panditsof Benares and of Upper India. Unfortunately its rules are so tersely expressed that they are often obscure and difficult of comprehension even with the help of its commentary, the "Setu."

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Men well-versed in the knowledge of metres call that a *Vishama* metre whose four quarters differ from one another.

Metres are various beginning with one letter in a quarter till there are twenty-six in each, lengthened by a successive addition of a letter to each quarter. Beyond them are enumerated the Chanda, Vrishṭi, Daṇḍaka and others. The rest are *Gáthas* characterised by three or six quarters.

Uktá, Atyuktá, Madhyá, Prathisṭhá, Supúrviká, Gáyatrí, Ushṇih, Anushṭubh, Vrihatí, Pankti, Trishṭubh Jagatí, Atijagatí, Sakkarí, Atipúrvá, Ashṭí, Atyashṭí, Dhrití, Atidhrití, Krití, Prakriti, Ákriti, Vikrití, Sankrití, Atikriti and Utkrití, These are the names of the twenty six classes of metres (alluded to above). I shall now explain the character of all the metres both with respect to their quantities and their letters.

Here ends the First Chapter of the Vrittaratnákara.

The characteristic of the first half of an Áryá metre is also follows:—there should be seven feet (each consisting of four instants) together with a long letter; the odd feet should never be formed of a ज (Ja-gaṇa); and the sixth foot be made of either a ज (Ja-gaṇa) or a न (Na-gaṇa) and a short letter.

The rule for the cæsural pause is, that should the sixth foot be made of a Na-gaṇa and a short letter, the pause will be on the first of the four instants. If the seventh foot be made of a Na-gaṇa and a short letter, then the pause should be on the last letter of the sixth foot.

In the second half, should the fifth foot be made of a Na-gaṇa and a short letter, the pause will be on the last letter of the fourth foot. Here (in the second half of the Áryá) the sixth foot consists of only one short letter.

That has been termed the Pathyá, by the King of Serpents (*i. e.* Pingala, the author of the oldest and most comprehensive treatise on metre) when the first and the third quarter of an Áryá consists of three feet each, *i. e.* twelve instants.

When the first and the third quarter of an Áryá consists of the first three feet and the initial letter of the fourth foot, Pingala, the Serpent King, calls it Vipulá. Pingala calls that the *Chapalá*, in both the halves of which the second and the fourth foot is a Ja-gaṇa. The sage (Pingala) has termed that the Mukha-chapalá, the first half of which has the characteristics of a *Chapalá*, and the second half of an Aryá. Men of pure understanding have termed that the Jaghaṇa-chapalá, the first half of which has the characteristic of the Áryá and the second half of a Chapalá.

Here ends the section on the Áryá class of metres.

The serpent king has given the name of Gítí to that metre in which both the halves have the characteristic of the first half of an Áryá. The sage calls that the Upagíti, both halves of which have the characteristic of the second half of an Áryá.

That is called the Udgíti whose halves are made of the halves of the Áryá with the order inverted (*i. e.* the first half of the Udgíti being the second half of thd Áryá and the second half of the Udgíti being the first half of the Áryá).

That is called the Áryá-gíti when the first half of the Áryá is lengthened by the addition of a long letter at its end; and whose second half resembles the first in all respects.

Here ends the section on Gíti.

(To be continued.)

List of books printed and published and for sale by E. J. Lazarus and Co., at the Medical Hall Press, Benares.

ÁTMA PURÁṆA, containing all the principles of Vedántism by ŚANKARÁNAND, with commentary by *Kákárám Pandit.* Rs. 16-0. Published at Ganpat Krishanaji's, Bombay.

THE LAGHU KAUMUDÍ, a Sanskrit grammar with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College Benares. *Price* 8 *Rs.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHRA, edited by PANDIT GOVINDA DEVA ŚAŚTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares. Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚAŚTRI. Rs. 1-4.

VAISESHIKHA APHORISMS OF KAṆADA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNVA DHURMM PRAKÁS ARTHAT MANUSMEITTHI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230, Price, Rs. 5-0-0.

SIDDHANTA KAUMUDI VYÁKARAN, 8vo. demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 99. Benares, August 1st, 1874. Vol. IX.

अथ काशिकायाः

द्वितीयाध्यायस्य प्रथमः पादः

समर्थः पदविधिः ॥ १ ॥

परिभाषेयम् । यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स समर्थो वेदितव्यः । विधीयतइति विधिः । पदानां विधिः पदविधिः । स पुनः समासादिः । समर्थः शक्तः, विग्रहवाक्यार्थाभिधाने यः शक्तः स समर्थो वेदितव्यः । अथ वा समर्थपदाश्रयत्वात् समर्थः । समर्थानां पदानां सम्बद्धार्थानां संसृष्टार्थानां विधिर्वेदितव्यः । वक्ष्यति, "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" । कष्टं श्रितः, कष्टश्रितः । समर्थग्रहणं किम् । पश्य देवदत्त कष्टं, श्रितो विष्णुमित्रो गुरुकुलम् । "तृतीया तत्कृतार्थेन गुणवचनेन" । शङ्कुलया खण्डः, शङ्कुलाखण्डः । समर्थग्रहणं किम् । करिष्यसि शङ्कुलया, खण्डो देवदत्त उपलेन ॥ "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" । यूपाय दारु, यूपदारु । समर्थग्रहणं किम् । गच्छ त्वं यूपाय, दारु देवदत्तस्य गेहे । "पञ्चमी भयेन" । वृकेभ्यो भयं, वृकभयम् । समर्थग्रहणं किम् । गच्छ त्वं मां वृकेभ्यो, भयं देवदत्तस्य यज्ञदत्तात् । "षष्ठी" । राज्ञः पुरुषो, राजपुरुषः । समर्थग्रहणं किम् । भार्या राज्ञः, पुरुषो देवदत्तस्य । "सप्तमी शौण्डैः" । अक्षेषु शौण्डः, अक्षशौण्डः । समर्थग्रहणं किम् । शक्तस्त्वमक्षेषु, शौण्डः पिबति पानागारे । पदग्रहणं किम् । वर्णविधौ समर्थपरिभाषा मा भूत् । तिष्ठतु दध्य,शान त्वं शाकेन । तिष्ठतु कुमारी,च्छत्रं हर देवदत्तात् । यणादेशो नित्यश्च तुभवति ॥

सुबामन्त्रिते पराङ्गवत्स्वरे ॥ २ ॥

सुबन्तमामन्त्रिते परतः परस्याङ्गवद्भवति, स्वरे, स्वरलक्षणे कर्तव्ये । तादात्म्यातिदेशोयम् । सुबन्तमामन्त्रितमनुप्रविशति । वक्ष्यति । "आमन्त्रितस्य च" । आमन्त्रितस्यादिरुदात्तो भवति । स सुपुकस्यापि यथा स्यात् । कुण्डेनाटन् । परशुना वृश्चन् । मद्राणां राजन् । कश्मीराणां राजन् । सुविति किम् । पीड्ये पीड्यमान । आमन्त्रितइति किम् । गेहे गार्ग्यः । परग्रहणं किम् । पूर्वस्य मा भूत् । देवदत्त कुण्डेनाटन् । अङ्गग्रहणं किम् । यथा मृत्पिण्डीभूतः स्वरं लभेत । उभयोराद्युदात्तत्वं मा भूत् । वत्करणं किम् । स्वाश्रयमपि यथा स्यात् । आं कुण्डेनाटन् । "आम एकान्तरमामन्त्रितमनन्तिके"इत्येकान्तरता भवति । स्वरइति किम् । कूपे सिञ्चन् । चर्मे नमन् । पत्वणत्वे प्रति पराङ्गवच्च भवति । सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमननन्तरत्वात् ॥ * ॥ * तीक्ष्णया सूच्या सीव्यन् । तीक्ष्णेन परशुना वृश्चन् । अव्ययानां प्रतिषेधो वक्तव्यः ॥ * ॥ उच्चैरधीयान । नीचैरधीयान ॥

प्राक्कडारात्समासः ॥ ३ ॥

कडारसंशब्दनात्प्राग् † यानित कर्तुमनुक्रमिष्यामस्ते समासंज्ञा वेदितव्याः । वक्ष्यति । यथा ऽसादृश्ये । यथावृद्धं ब्राह्मणानामन्वयस्व । प्राग्वचनं संज्ञासमावेशार्थम् । समासप्रदेशा"स्तृतीयासमास"इत्येवमादयः ॥

* सुबन्तस्य पराङ्गवद्भावे कर्तव्ये तत्समानाधिकरणस्योपसंख्यानम् ॥ अननन्तरत्वाद्धि न प्राप्नोति । इति पाठान्तरम् ॥ परमुपरित्य एव पाठोन्यासाद्यारूढः ।

† अधिकारो ऽयम् । "कडाराः कर्मधारये" इति वक्ष्यति, प्रागेतस्माद्–इति पाठान्तरम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सह सुपा ॥ ४ ॥

सुबिति वर्तते, सहेति सुपेति च त्रयमप्यधिकृतं वेदितव्यम् । यदित ऊर्द्धमनुक्रमिष्यामस्तत्रेदमुपस्थितं द्रष्टव्यम् । वक्ष्यति द्वितीयाश्रितेति द्वितीयान्तं श्रितादिभिः सह समस्यते । कष्टं श्रितः, कष्टश्रितः । सहग्रहणं योगविभागार्थं, तिङापि सह यथा स्यात् । अनुव्यचलत् । अनुप्रावर्षत् ॥

अव्ययीभावः ॥ ५ ॥

अव्ययीभाव इत्यधिकारो वेदितव्यः । यानित ऊर्द्धमनुक्रमिष्यामो ऽव्ययीभावसंज्ञास्ते वेदितव्याः । वक्ष्यति, "यथा ऽसादृश्ये" । यथावृद्धं ब्राह्मणानामन्त्रयस्व । अन्वर्थसंज्ञा चेयं महती पूर्वपदार्थप्राधान्यमव्ययीभावस्य दर्शयति । अव्ययीभावप्रदेशा "अव्ययीभावश्चे"त्येवमादयः ॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु ॥ ६ ॥

सुप् सुपेति च वर्त्तते । विभक्त्यादिष्वर्थेषु यदव्ययं वर्त्तते तत्समर्थेन सुबन्तेन सह समस्यते, अव्ययीभावश्च समासो भवति । वचनग्रहणं प्रत्येकं संबध्यते । विभक्तिवचने तावत् । स्त्रीष्वधिकृत्य कथा प्रवर्त्तते । अधिस्त्रि । अधिकुमारि । सप्तम्यर्थे यदव्ययं तद् विभक्तिवचनम् । सपीपवचने । कुम्भस्य समीपम् । उपकुम्भम् । उपगिरिकम् । समृद्धिर्व्यृद्धेराधिक्यम् । समृद्धिर्मद्राणाम् । सुमद्रं, सुमगधं, वर्त्तते । व्यृद्धिर्व्यृद्धेरभावः । गवादिकानामृद्धेरभावः । दुर्गवदिकं, दुर्यवनं वर्त्तते । अर्थाभावो वस्तुनो ऽभावः । अभावो मक्षिकाणाम् । निर्मक्षिकं, निर्मशकं, वर्त्तते । अत्ययो भूतत्वमतिक्रमः । अतीतानि हिमानि । निर्हिमं, निःशीतं, वर्तते । असंप्रति, उपभोगस्य वर्त्तमानकालप्रतिषेधः । अतितैसुकम् * । तैसुकमाच्छादनं, तस्यायमुपभोगकालो न भवतीत्यर्थः । शब्दप्रादुर्भावः प्रकाशता शब्दस्य । इतिपाणिनि । तत्पाणिनि । पाणिनिशब्दो लोके प्रकाशतइत्यर्थः । पश्चात् । अनुरथं पादातम् । रथानां पश्चात् । यथार्थे यदव्ययं वर्त्तते तत्समस्यते । योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति यथार्थाः । योग्यतायाम् । अनुरूपम् । रूपयोग्यं भवतीत्यर्थः । वीप्सायाम् । अर्थमर्थं प्रति । प्रत्यर्थम् । पदार्थानतिवृत्ता । यथाशक्ति । आनुपूर्व्यमनुक्रमः । अनुज्येष्ठं प्रविशन्तु भवन्तः । ज्येष्ठानुपूर्व्या भवन्तः प्रविशन्त्वित्यर्थः । यौगपद्यमेककालता । सचक्रं धेहि । युगपच्चक्रं धेहीत्यर्थः । सादृश्यं तुल्यता । किमर्थमिदमुच्यते, यथार्थइत्येव सिद्धम् । गुणभूतेपि सादृश्ये यथा स्यात् । सदृशः सख्या ससखि । संपत्तिरनुरूप आत्मभावः समृद्धेरन्यः । सब्रह्म ब्राध्नवाणाम् । सक्षत्रं शालङ्कायनानाम् । साकल्यमशेषता सतृणमभ्यवहरति । सबुसम् । न किं चिदभ्यवहार्यं परित्यजतीत्ययमर्थोधिकारार्थवचनेन प्रतिपाद्यते । अन्तवचने । अन्तइति परियहापेतया समाप्तिरुच्यते । साग्न्यधीते । सेष्टि पशुबन्धम् । पशुबन्धान्तमधीतइत्यर्थः । इयं समाप्तिरसकलेप्यध्ययने भवतीति साकल्यात्पृथगुच्यते ॥

* तैष्टकम् । इति पाठान्तरम् ।

यथा ऽसादृश्ये ॥ ७ ॥

यथेत्येतदव्ययमसादृश्ये वर्त्तमानं सुपा सह समस्यते, ऽव्ययीभावश्च समासो भवति । यथावृद्धं ब्राह्मणानामन्त्रयस्व । येये वृद्धाः । यथावृद्धम् । यथाध्यापकम् । असादृश्यइति किम् । यथा देवदत्तस्तथा यज्ञदत्तः । यथार्थे यदव्ययमिति पूर्वेणैव सिद्धे समासे वचनमिदं सादृश्यप्रतिषेधार्थम् ॥

यावद्वधारणे ॥ ८ ॥

यावदित्येतदव्ययमवधारणे वर्त्तमानं सुपा सह समस्यते, अव्ययीभावश्च समासो भवति । अवधारणमियत्तापरिच्छेदः । यावदमत्रं ब्राह्मणानामन्त्रयस्व । यावन्त्यमत्राणि संभवन्ति पञ्च षड्वा तावत आमन्त्रयस्व । अवधारणइति किम् । यावद्भुक्तं तावद्भुक्तम् । नावधारयामि कियन्मया भुक्तमिति * ॥

* कियद्भुक्तं त्वया कियद्भुक्तं मयेति पा० ।

सुप्प्रतिना मात्रार्थे ॥ ९ ॥

मात्रा बिन्दुः स्तोकमल्पमिति पर्यायाः । मात्रार्थे वर्त्तमानेन प्रतिना सह सुबन्तं समस्यते, अव्ययीभावश्च समासो भवति । अस्त्यत्र किं चित् शाकम् । शाकप्रति । सूपप्रति । मात्रार्थे इति किम् । वृक्षं प्रति विद्योतते विद्युत् । सुबिति वर्त्तमाने पुनः सुग्रहणमव्ययनिवृत्त्यर्थम् ॥

अक्षशलाकासंख्याः परिणा ॥ १० ॥

अक्षशब्दः शलाकाशब्दः संख्याशब्दश्च परिणा सह समस्यन्ते, अव्ययीभावश्च समासो भवति । कितवव्यवहारे समासोयमिष्यते । पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति, तत्र यदा सर्वे उत्तानाः पतन्त्यवाञ्चो वा तदा पातयिता जयति, तस्यैवास्य विघातो ऽन्यथा पाते सति जायते । अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये, अक्षपरि । शलाकापरि । एकपरि । द्विपरि । त्रिपरि । परमेण चतुष्परि । पञ्चसु त्वकरूपासु जय एव भविष्यति ।

अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत् ।
कितवव्यवहारे च एकत्वे ऽक्षशलाकयोः ॥

विभाषा ॥ ११ ॥

विभाषेत्ययमधिकारो वेदितव्यः । यदित ऊर्द्धमनुक्रमि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ष्यामस्तद्विभाषा भवति। वक्ष्यति "अपपरिबहिरञ्चवः पञ्चम्या"। अपत्रिगर्तं वृष्टो देवः। अपत्रिगर्तेभ्यः॥

अपपरिबहिरञ्चवः पञ्चम्या॥ १२॥

अप परि बहिस् अञ्चु इत्येते सुबन्ताः पञ्चम्यन्तेन सह विभाषा समस्यन्ते, अव्ययीभावश्च समासो भवति। अपत्रिगर्त्तं वृष्टो देवः। अप त्रिगर्त्तेभ्यः। परित्रिगर्त्तम्। परि त्रिगर्त्तेभ्यः। बहिर्ग्रामम्। बहिर्ग्रामात्। प्राग्ग्रामम्। प्राग्ग्रामात्। बहिःशब्दयोगे पञ्चमीभावस्यैतदेव ज्ञापकम्॥

आङ्मर्यादाभिविध्योः॥ १३॥

आङित्येतन्मर्यादायामभिविधौ च वर्त्तमानं पञ्चम्यन्तेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। आपाटलिपुत्रं वृष्टो देवः। आ पाटलिपुत्रात्। अभिविधौ। आकुमारं यशः पाणिनेः। आ कुमारेभ्यः॥

लक्षणेनाभिप्रती आभिमुख्ये॥ १४॥

लक्षणं चिह्नं तद्वाचिना सुबन्तेन सहाभिप्रती शब्दावाभिमुख्ये वर्त्तमानौ विभाषा समस्येते, अव्ययीभावश्च समासो भवति। अभ्यग्नि शलभाः पतन्ति। अग्निमभि। प्रत्यग्नि। अग्निं प्रति। अग्निं लक्ष्यीकृत्य अभिमुखं पतन्तीत्यर्थः। लक्षणेनेति किम्। स्रुघ्नं प्रति गतः। प्रतिनिवृत्य स्रुघ्नमेवाभिमुखं गतः। अभिप्रती इति किम्। येनाग्निस्तेन गतः। आभिमुख्यइति किम्। अभ्यङ्का गावः। प्रत्यङ्का गावः। नवाङ्का इत्यर्थः॥

अनुर्यत्समया॥ १५॥

समया समीपम्। अनुर्यस्य समीपवाची तेन लक्षणभूतेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। अनुवनमशनिर्गतः। अनुरिति किम्। वनं समया। यत्समयेति किम्। वृत्तमनु विद्योतते विद्युत्। अव्ययं विभक्तिसमीपेत्येव सिद्धे पुनर्वचनं विभाषार्थम्॥

यस्य चायामः॥ १६॥

लक्षणेनेति वर्त्तते। आयामो दैर्घ्यम्। अनुर्यस्यायामवाची तेन लक्षणभूतेन सह विभाषा समस्यते, अव्ययीभावश्च समासो भवति। अनुगङ्गं वाराणसी। अनुयमुनं मथुरा। यमुनाऽऽयामेन मथुराऽऽयामो लक्ष्यते। आयाम इति किम्। वृत्तमनु विद्योतते विद्युत्॥

तिष्ठद्गुप्रभृतीनि च॥ १७॥

तिष्ठद्गवादयः समुदाया एव निपात्यन्ते। तिष्ठद्गुप्रभृतीनि शब्दरूपाणि अव्ययीभावसंज्ञानि भवन्ति। तिष्ठद्गु कालविशेषः। तिष्ठन्ति गावो यस्मिन्काले दोहनाय स तिष्ठद्गु कालः। खलेयवादीनि प्रथमान्तानि विभक्त्यन्तरेण नैव संबध्यन्ते ऽन्यपदार्थे च काले वर्त्तन्ते। चकारो ऽवधारणार्थः। अपरः समासो न भवति परमतिष्ठद्गुरिति। तिष्ठद्गु। वहद्गु। आयतीगवम्। खलेबुसम्। खलेयवम्। लूनयवम्। लूयमानयवम्। पूतयवम्। पूयमानयवम्। संहृतयवम्। संह्रियमाणयवम्। संहृतबुसम्। संह्रियमाणबुसम्। एते कालशब्दाः। समभूमि। समपदाति। सुषमम्। विषमम्। निष्यमम्। दुष्यमम्। अपरसमम्। आयतीसमम्। प्राह्णम्। प्रत्यूषम्। प्रभृगम्। प्रदक्षिणम्। अपरदक्षिणम्। संप्रति। असंप्रति। पापसमम्। पुण्यसमम्॥ दृच् कर्मव्यतिहारे॥ दण्डादण्डि। मुसलामुसलि॥

पारे मध्ये षष्ठ्या वा॥ १८॥

षष्ठीसमासे प्राप्ते तदपवादो ऽव्ययीभाव आरभ्यते। वावचनाच्च षष्ठी समासोपि पत्ते ऽभ्यनुज्ञायते। पारमध्यशब्दौ षष्ठ्यन्तेन सह विभाषा समस्येते, ऽव्ययीभावश्च समासो भवति। तत्सन्नियोगेन चानयोरेकारान्तत्वं निपात्यते। पारं गङ्गायाः, पारेगङ्गम्। मध्यं गङ्गायाः, मध्येगङ्गम्। षष्ठीसमासपक्षे। गङ्गापारम्। गङ्गामध्यम्। महाविभाषया वाक्यविकल्पः क्रियते॥

संख्या वंश्येन॥ १९॥

विद्यया जन्मना वा प्राणिनामेकलक्षणसंतानो वंश इत्यभिधीयते। तत्र भवो वंश्यः। तद्वाचिना सुबन्तेन सह संख्या समस्यते, अव्ययीभावश्च समासो भवति। द्वैमुनी व्याकरणस्य वंश्या द्विमुनि व्याकरणस्य। त्रिमुनि व्याकरणस्य। यदा तु विद्यया तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति। द्विमुनि व्याकरणं, त्रिमुनि व्याकरणमिति। जन्मना। एकविंशति भारद्वाजम्॥

नदीभिश्च॥ २०॥

संख्येत्यनुवर्त्तते। नदीवचनैः शब्दैः सह संख्या समस्यते, अव्ययीभावश्च समासो भवति। समाहारे चायमिष्यते। सप्तगङ्गम्। द्वियमुनम्। पञ्चनदम्। सप्तगोदावरम्॥

अन्यपदार्थे च संज्ञायाम्॥ २१॥

संख्येति निवृत्तं, नदीग्रहणमनुवर्त्तते। नदीभिः सह सुबन्तमन्यपदार्थे वर्त्तमानं संज्ञायां विषये समस्यते, अव्ययीभावश्च समासो भवति। विभाषाधिकारेपि नित्यसमास एवायम्। नहि वाक्येन संज्ञा गम्यते। उन्मत्तगङ्गं नाम देशः। लोहितगङ्गम्। कृष्ण गङ्गम्। शनैर्गङ्गम्। अन्यपदार्थइति किम्। कृष्णवेणा। संज्ञायामिति किम्। शीघ्रगङ्गो देशः॥

तत्पुरुषः॥ २२॥

तत्पुरुष इति संज्ञा ऽधिक्रियते प्राग्बहुव्रीहेः, योनितऊर्द्धम

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नुक्रमिष्यामस्तत्पुरुषसंज्ञास्ते वेदितव्याः । वक्ष्यति द्वितीयाश्रितातीतपतितेति। कष्टश्रितः। पूर्वाचार्यसंज्ञा चेयं महती तदङ्गीकरणमुपाधेरपि तदीयस्य परिग्रहार्थम् । उत्तरपदार्थप्रधानस्तत्पुरुष इति । तत्पुरुषप्रदेशाः तत्पुरुषे कृति बहुलमित्येवमादयः ॥

द्विगुश्च ॥ २३ ॥

द्विगुश्च समासस्तत्पुरुषसंज्ञो भवति । द्विगोस्तत्पुरुषत्वे समासान्ताः प्रयोजनम् । पञ्चराजी । दशराजी । द्व्यहः । पञ्चगवम् । दशगवम् ॥

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः ॥ २४ ॥

सुप् सुपेति वर्त्तते, तस्य विशेषणमेतद् द्वितीया । द्वितीयान्तं सुबन्तं श्रितादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । कष्टं श्रितः, कष्टश्रितः । नरकश्रितः । अतीत । कान्तारमतीतः, कान्तारातीतः । पतित । नरकं पतितः, नरकपतितः । गत । ग्रामं गतः, ग्रामगतः । अत्यस्त । तरङ्गानत्यस्तः, तरङ्गात्यस्तः । तुहिनात्यस्तः । प्राप्त । सुखं प्राप्तः सुखप्राप्तः । आपन्न । सुखमापन्नः, सुखापन्नः । दुःखापन्नः ॥ श्रितादिषु गमिगाम्यादीनामुपसंख्यानम् ॥ * ॥ ग्रामं गमी, ग्रामगमी । ग्रामं गामी, ग्रामगामी । ओदनं बुभुक्षु, ओदनबुभुक्षुः ॥

स्वयं क्तेन ॥ २५ ॥

स्वयमेतदव्ययमात्मनेत्यस्यार्थे वर्त्तते तस्य द्वितीयया संबन्धोनुपपन्न इति द्वितीयाग्रहणमुत्तरार्थमनुवर्त्तते । स्वयमित्येतत्सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । स्वयंधौतौ पादौ । स्वयंविलीनमाज्यम् । ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति ॥

खट्वा क्षेपे ॥ २६ ॥

खट्वाशब्दो द्वितीयान्तः क्तान्तेन सह क्षेपे गम्यमाने समस्यते, तत्पुरुषश्च समासो भवति । क्षेपो निन्दा स च समानार्थ एव, तेन विभाषाधिकारेपि नित्यसमास एवायं, नहि वाक्येन क्षेपो गम्यते । खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम् । सर्व एवाविनीतः खट्वारूढ इत्युच्यते । खट्वारूढो जाल्मः । खट्वाप्लुतः । अपथप्रस्थित इत्यर्थः । क्षेपइति किम् । खट्वामारूढः ॥

सामि ॥ २७ ॥

सामीत्येतदव्ययमर्द्धशब्दपर्यायस्तस्यासत्त्ववाचित्वाद् द्वितीयया नास्ति संबन्धः तत् सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । सामिक्षतम् । सामिपीतम् । सामिभुक्तम् । ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति ॥

कालाः ॥ २८ ॥

द्वितीया क्तेनेति वर्त्तते । कालवाचिनः शब्दा द्वितीयान्ताः क्तान्तेन सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति । अनत्यन्तसंयोगार्थं वचनम् । काला इति न स्वरूपविधिः । षण्मुहूर्त्ताश्चराचराः । ते कदा विदहर्गच्छन्ति कदा चिद्रात्रिम् । अहरतिसृता मुहूर्त्ताः। अहस्संक्रान्ताः । रात्र्यतिसृता मुहूर्ताः । रात्रिसंक्रान्ताः । मासप्रमितश्चन्द्रमाः । मासं प्रमातुमारब्धः प्रतिपच्चन्द्रमा इत्यर्थः ॥

अत्यन्तसंयोगे च ॥ २९ ॥

काला इति वर्त्तते, क्तेनेति निवृत्तम् । अत्यन्तसंयोगः क्तत्वसंयोगः कालस्य स्वेन संबन्धिना व्याप्तिः । कालवाचिनः शब्दा द्वितीयान्ता अत्यन्तसंयोगे गम्यमाने सुपा सह समस्यन्ते विभाषा, तत्पुरुषश्च समासो भवति । मुहूर्त्तं सुखम्, मुहूर्त्तसुखम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना ॥

तृतीया तत्कृतार्थेन गुणवचनेन ॥ ३० ॥

सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत् । तृतीयान्तं सुबन्तं गुणवचनेनार्थशब्देन च सह समस्यते, तत्पुरुषश्च समासो भवति । कीदृशेन गुणवचनेन, तत्कृतेन, तदर्थकृतेन, तृतीयान्तार्थकृतेनेति यावत् । शङ्कुलया खण्डः, । शङ्कुलाखण्डः । किरिणा काणः, किरिकाणः । अर्थशब्देन । धान्येनार्थः, धान्यार्थः । तत्कृतेनेति किम् । अक्ष्णा काणः । गुणवचनेनेति किम् । गोभिर्वपावान् ॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ ३१ ॥

पूर्व सदृश सम ऊनार्थ कलह निपुण मिश्र श्लक्ष्ण एतैः सह तृतीयान्तं समस्यते, तत्पुरुषश्च समासो भवति । अस्मादेव वचनात् पूर्वादिभिर्योगे तृतीया भवति, हेतौ वा द्रष्टव्या । मासेन पूर्वः, मासपूर्वः । संवत्सरपूर्वः । सदृश । मातृसदृशः । पितृसदृशः । सम । मातृसमः । पितृसमः । ऊनार्थ । माषेनम् । कार्षापणेनम् । माषविकलम् । कार्षापणविकलम् । कलह । असिकलहः । वाक्कलहः । निपुण । वाग्निपुणः । आचारनिपुणः । मिश्र । गुडमिश्रः । तिलमिश्रः । श्लक्ष्ण । आचारश्लक्ष्णः ॥ पूर्वादिष्ववरस्योपसंख्यानम् ॥ * ॥ मासेनावरः, मासावरः । संवत्सरावरः ॥

कर्तृकरणे कृता बहुलम् ॥ ३२ ॥

तृतीयेति वर्त्तते । कर्त्तरि करणे च या तृतीया तदन्तं कृदन्तेन सह समस्यते बहुलं, तत्पुरुषश्च समासो भवति । सर्वोपाधिव्यभिचारार्थं बहुलग्रहणम् । कर्तरि । अहिना हतः, अहिहतः । करणे । नखैर्निर्भिन्नो, नखनिर्भिन्नः । परशुना

CC-0. Sampurnanand University Collection. Digitized by eGangotri

छिन्नः, परशुच्छिन्नः । कर्तृकरणे इति किम् । भित्ताभिरुपितः । बहुलग्रहणं किम् । दात्रेण लूनवान्, परशुना छिन्नवान्, इह समासो न भवति । पादहारको, गलेचोपक, इति च भवति ॥

कृत्यैरधिकार्थवचने ॥ ३३ ॥

स्तुतिनिन्दाप्रयुक्तमध्यारोपितार्थवचनमधिकार्थवचनम् । कर्तृकरणयोर्या तृतीया तदन्तं सुबन्तं कृत्यैः सह समस्यते ऽधिकार्थवचने गम्यमाने विभाषा, तत्पुरुषश्च समासो भवति । कर्त्रा । काकपेया नदी । श्वजेह्यः कूपः । करणम् । बाध्यच्छेद्यानि तृणानि । कण्टकलवित्रेण क्षौदनः । पूर्वस्यैवायं प्रपञ्चः ॥ कृत्यग्रहणे यण्ण्यतोर्ग्रहणं कर्त्तव्यम् ॥ * ॥ इह मा भूत् । काकैः पातव्या इति ॥

अन्नेन व्यञ्जनम् ॥ ३४ ॥

तृतीयेति वर्त्तते । व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन सह समस्यते विभाषा, तत्पुरुषश्च समासो भवति । संस्कार्यमन्नं, संस्कारकं व्यञ्जनम् । दध्ना उपसिक्त क्षौदनः, दध्योदनः । क्षीरौदनः । वृत्तौ क्रियाया अन्तर्भावादन्नव्यञ्जनयोः सामर्थ्यम् ॥

भक्ष्येण मिश्रीकरणम् ॥ ३५ ॥

मिश्रीकरणवाचि तृतीयान्तं भक्ष्यवाचिना सुबन्तेन समस्यते, तत्पुरुषश्च समासो भवति । खरविशदमभ्यवहार्यं भक्ष्यं, तस्य संस्कारकं मिश्रीकरणम् । गुडेन मिश्रा धानाः, गुडधानाः । गुडपृथुकाः । वृत्तौ क्रियाया अन्तर्भावात्पूर्वोत्तरपदयोः सामर्थ्यम् ॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥ ३६ ॥

सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत् । तदिति सर्वनाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते । तस्मै इदं तदर्थम् । तदर्थ अर्थ बलि हित सुख रक्षित इत्येतैः सह चतुर्थ्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । तदर्थेन प्रकृतिविकारभावे समासोयमिष्यते । यूपाय दारु, यूपदारु । कुण्डलाय हिरण्यम्, कुण्डलहिरण्यम् । इह न भवति । रन्धनाय स्थाली, अवहननायोलूखलमिति । चतुर्थी चास्मादेव ज्ञापकात्तादर्थ्ये भवति ॥ अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या ॥ * ॥ ब्राह्मणार्थं पयः । ब्राह्मणार्था यवागूः । बलि । कुबेराय बलिः । कुबेरबलिः । महाराजबलिः । हित । गोहितम् । अश्वहितम् । सुख । गोसुखम् । अश्वसुखम् । रक्षित । गोरक्षितम् । अश्वरक्षितम् ॥

पञ्चमी भयेन ॥ ३७ ॥

सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत् । पञ्चम्यन्तं सुबन्तं भयशब्देन सुबन्तेन सह समस्यते विभाषा, तत्पुरुषश्च समासो भवति । वृकेभ्यो भयम्, वृकभयम् । चौरभयम् । दस्युभयम् ॥ भयभीतभीतिभीभिरिति वक्तव्यम् ॥ * ॥ वृकेभ्यो भीतः, वृकभीतः । वृकभीतिः । वृकभीः । पूर्वस्यैवायं बहुलग्रहणस्य प्रपञ्चः । तथा च यामनिर्गतः, अधर्मजुगुप्सुरित्येवमादि सिद्धं भवति ॥

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ॥ ३८ ॥

अपेत अपोढ मुक्त पतित अपत्रस्त इत्येतैः सह पञ्चम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । अपेत । सुखापेतः । अपोढ । कल्पनापोढः । मुक्त । चक्रमुक्तः । पतित । स्वर्गपतितः । अपत्रस्त । तरङ्गापत्रस्तः । अल्पश इति समासस्याल्पविषयतामाचष्टे । अल्पा पञ्चमी समस्यते न सर्वा । प्रासादात्पतितः, भोजनादपत्रस्तः, इत्येवमादौ न भवति । कर्तृकरणे कृता बहुलमित्यस्यैवायं प्रपञ्चः ॥

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥ ३९ ॥

स्तोक अन्तिक दूर इत्येवमर्थाः शब्दाः कृच्छ्रशब्दश्च पञ्चम्यन्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति । स्तोक । स्तोकान्मुक्तः । अन्तिक । अन्तिकादागतः । अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । कृच्छ्राल्लब्धः । पञ्चम्याः स्तोकादिभ्य इत्युक् ॥ शतसहस्रौ परेणेति वक्तव्यम् ॥ * ॥ शतात्परे, परः शताः । सहस्रात्परे, परः सहस्राः । राजदन्तादित्वात्परनिपातः । निपातनात्सुडागमः ॥

सप्तमी शौण्डैः ॥ ४० ॥

सप्तम्यन्तं शौण्डादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । अक्षेषु शौण्डो, ऽक्षशौण्डः । अक्षधूर्त्तः । अक्षकितवः । शौण्ड । धूर्त्त । कितव । व्याड । प्रवीण । संवीत । अन्तर् । अन्तरशब्दस्त्वनाधिकरणप्रधान एव पठ्यते । अधिपटु । पण्डित । कुशल । चपल । निपुण * । वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादक्षादिषु अधिकरणे सप्तमी ॥

सिद्धशुष्कपक्वबन्धैश्च ॥ ४१ ॥

सप्तमीति वर्तते । सिद्ध शुष्क पक्व बन्ध इत्येतैः सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति । सांकाश्यसिद्धः । काम्पिल्यसिद्धः । शुष्क । आतपशुष्कः । छायाशुष्कः । पक्व । स्थालीपक्वः । कुम्भीपक्वः । बन्ध । चक्रबन्धः । बहुलग्रहणस्यैवायमुदाहरणप्रपञ्चः ॥

ध्वाङ्क्षेण क्षेपे ॥ ४२ ॥

ध्वाङ्क्षेणेत्यर्थग्रहणम् । ध्वाङ्क्षवाचिना सह सप्तम्यन्तं सुबन्तं

* संव्याड । मन्थ । समीर । एते शब्दा अन्यत्र पुस्तकान्तरे दृश्यन्ते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समस्यते, तत्पुरुषश्च समासो भवति, क्षेपे गम्यमाने। तीर्थे ध्वाङ्क्षइव, तीर्थध्वाङ्क्षः। अनवस्थित इत्यर्थः। तीर्थकाकः। तीर्थवायसः। क्षेपइति किम्। तीर्थे ध्वाङ्क्षस्तिष्ठति॥

कृत्यैर्ऋणे॥ ४३॥

सप्तमीति वर्त्तते। कृत्यप्रत्ययान्तैः सह सप्तम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति, ऋणे गम्यमाने। यत्प्रत्ययेनैवेष्यते। मासे देयमृणं, मासदेयम्। संवत्सरदेयम्। अहर्देयम्। ऋणयहणं नियोगोपलक्षणार्थं तेनेहापि समासो भवति। पूर्वाह्णे गेयं साम। प्रातरध्येयो ऽनुवाकः। ऋणइति किम्। मासे देया भिक्षा॥

संज्ञायाम्॥ ४४॥

संज्ञायां विषये सप्तम्यन्तं सुपा सह समस्यते, तत्पुरुषश्च समासो भवति। संज्ञा समुदायोपाधिः। तेन नित्यसमास एवायं, नहि वाक्येन संज्ञा गम्यते। अरण्येतिलकाः। अरण्येमाषाः। वनेकिंशुकाः। वनेबिल्वकाः। कूपेपिशाचकाः। हलदन्तात्सप्तम्याः संज्ञायामित्यलुक्॥

क्तेनाहोरात्रावयवाः॥ ४५॥

अहरवयवा रात्र्यवयवाश्च सप्तम्यन्ताः क्तान्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति। पूर्वाह्णकृतम्। अपराह्णकृतम्। पूर्वरात्रकृतम्। अपररात्रकृतम्। अवयववयहणं किम्*। अहनि भुक्तम्। रात्रौ वृत्तम्। बहुलयहणाद् रात्रिवृत्तम्, संध्यागर्जितमित्यादयः॥

तच॥ ४६॥

तत्रेत्येतत् सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। तत्रभुक्तम्। तत्रकृतम्। तत्रपीतम्। ऐकपद्यमैकस्वर्यं च समासत्वाद्भवति॥

क्षेपे॥ ४७॥

क्षेपो निन्दा। क्षेपे गम्यमाने सप्तम्यन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति। अवतप्तेनकुलस्थितं तवैतत्। चापलमेतत्, अनवस्थितत्वं तवैतदित्यर्थः। उदकेविशीर्णम्। प्रवाहेमूत्रितम्। भस्मनिहुतम्। निष्फलं यत्क्रियते तदेवमुच्यते। तत्पुरुषे कृति बहुलमित्यलुक्॥

॥ पात्रेसंमितादयश्च॥ ४८॥

समुदाया एव निपात्यन्ते। पात्रेसंमितादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति क्षेपे गम्यमाने। ये चात्र क्तान्तेन सह समासास्तेषां पूर्वेणैव सिद्धे पुनः पाठो युक्तारोहादिपरिग्रहार्थः। पूर्वपदाद्युदात्तत्वं यथा स्यादिति। युक्तारोहादिषु हि पात्रेसंमितादयश्चेति पठ्यन्ते। पात्रेसंमिताः। पात्रेबहुलाः। अवधारणेन क्षेपो गम्यते। पात्रएव संमिता न पुनः क्व चित्कार्यदृति। उदुम्बरमशकादिषु उपमया क्षेपः। मातरिपुरुष इति प्रतिपिङ्गसेवनेन। पिण्डीशूरादिषु निरीहतया। अव्यक्तत्वाच्चाकृतिगणोयम्*। पात्रेसंमिताः। पात्रेबहुलाः। उदरक्रिमिः। कूपकच्छपः। कूपचूर्णकः। अवटकच्छपः। कूपमण्डूकः। कुम्भमण्डूकः। उदपानमण्डूकः। नगरकाकः। नगरवायसः। मातरिपुरुषः। पिण्डीशूरः। गेहेशूरः। गेहेनर्दी। गेहेक्वेडी। गेहेविजिती। गेहेव्याडः। गेहेतृप्तः। गेहेधृष्टः। गर्भेतृप्तः। आखनिकबकः। गोष्ठेशूरः। गोष्ठेविजिती। गोष्ठेक्वेडी। गेहेमेही। गोष्ठेपटुः। गोष्ठेपण्डितः। गोष्ठेप्रगल्भः। कर्णेटिट्टिभः। कर्णेचुरचुरा। चकारो ऽवधारणार्थः। तेन समासान्तरं न भवति, परमपात्रेसंमिता इति।

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन॥ ४९॥

सुप् सुपेति वर्त्तते, तस्य विशेषणमेतत्। पूर्वकाल एक सर्व जरत् पुराण नव केवल इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति। भिन्नप्रवृत्तिनिमित्तस्य शब्दस्यैकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्। पूर्वकाल इत्यर्थनिर्द्देशः, परिशिष्टानां स्वरूपयहणम्। पूर्वकालो ऽपरकालेन समस्यते। स्नातानुलिप्तः। कृष्टसमीकृतम्। दग्धप्ररूढम्। एकशाटी। एकभिक्षा। सर्वदेवाः। सर्वमनुष्याः। जरद्वृस्ती। जरद्वृष्टिः। जरद्वृत्तिः। पुराणान्नम्। पुराणावसथम्। नवान्नम्। नवावसथम्। केवलान्नम्। समानाधिकरणेनेति किम्। एकस्याः शाटी॥

दिक्संख्ये संज्ञायाम्॥ ५०॥

समानाधिकरणेनेत्यापादसमाप्तेरनुवर्त्तते। दिग्वाचिनः शब्दाः संख्या च समानाधिकरणेन सुबन्तेन सह समस्यन्ते, तत्पुरुषश्च समासो भवति, संज्ञायां विषये। पूर्वेषुकामशमी। अपरेषुकामशमी। संख्या। पञ्चाम्राः। सप्तर्षयः। संज्ञायामिति किम्। उत्तरा वृक्षाः। पञ्च ब्राह्मणाः॥

॥ तद्धितार्थोत्तरपदसमाहारे च॥ ५१॥

दिक्संख्ये इत्यनुवर्त्तते। तद्धितार्थे विषये उत्तरपदे च परतः समाहारे चाभिधेये दिक्संख्ये समानाधिकरणेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति। तद्धितार्थे तावत्

---

* अवयववयहणं किम्।
उलूखलेराभरणैः पिशाची यदभाषत।
यत्तु ते दिवा वृत्तं रात्रौ वृत्तं च दृश्यसि।
इति पाठान्तरम्।

* अदृत्करणादाकृतिगणोयम्। इति पा०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त । पूर्वस्यां शालायां भवः । दिक्पूर्वपदादसंज्ञायां ञः । पौर्वशालः । आपरशालः । उत्तरपदे । पूर्वशालाप्रियः । अपरशालाप्रियः । समाहारे दिक्शब्दो न संभवति । संख्या तद्धितार्थे । पाञ्चनापितिः । पाञ्चकपालः । उत्तरपदे । पञ्चगवधनो, दशगवधनः । समाहारे । पञ्चफली । दशपूली । पञ्चकुमारि । दशकुमारि । स नपुंसकमिति नपुंसकत्वं, ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वम् ॥

संख्यापूर्वो द्विगुः ॥ ५२ ॥

तद्धितार्थोत्तरपदसमाहारे चेत्यत्र यः संख्यापूर्वः समासः स द्विगुसंज्ञो भवति । तद्धितार्थे तावत् । पञ्चसु कपालेषु संस्कृतः, पञ्चकपालो, दशकपालः । संस्कृतं भक्षा इतीहाण्, तस्य द्विगोर्लुगनपत्ये इति लुक् । उत्तरपदे । पञ्चनावप्रियः । नावो द्विगोरिति समासान्तो भवति । समाहारे । पञ्चपूली । द्विगोरिति ङीप् भवति । द्विगुप्रदेशा द्विगोरित्येवमादयः ॥

कुत्सितानि कुत्सनैः ॥ ५३ ॥

कुत्सितवाचीनि सुबन्तानि कुत्सनवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते । विशेषणं विशेष्येणेति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थं आरम्भः । वैयाकरणखसूचिः । निष्प्रतिभ इत्यर्थः । याज्ञिकक्षितवः । अयाज्ययाजनतृष्णापरः । मीमांसकदुर्दूरूढः । नास्तिकः । कुत्सितानीति किम् । वैयाकरणश्चोरः । नह्यत्र वैयाकरणत्वं कुत्स्यते । कुत्सनैरिति किम् । कुत्सितो ब्राह्मणः ॥

पापाणके कुत्सितैः ॥ ५४ ॥

पापाणकशब्दो कुत्सनाभिधायिनो तयोः पूर्वेण समासे परनिपातः प्राप्तः पूर्वनिपातार्थमिदमारभ्यते । पाप अणक एते सुबन्ते कुत्सितवचनैस्सह समस्येते, तत्पुरुषश्च समासो भवति । पापनापितः । पापकुलालः । अणकनापितः । अणककुलालः ॥

उपमानानि सामान्यवचनैः ॥ ५५ ॥

उपमीयतेनेनेत्युपमानम् । उपमानवाचीनि सुबन्तानि सामान्यवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । उपमानोपमेययोः साधारणो धर्मः सामान्यं तद्विशिष्टोपमेयवचनैरयं समासः । शस्त्रीव श्यामा, शस्त्रीश्यामा देवदत्ता । कुमुदश्येनी । हंसगद्गदा । न्यग्रोधपरिमण्डला । उपमानानीति किम् । देवदत्ता श्यामा । सामान्यवचनैरिति किम् । फालाइव तन्दुलाः । पर्वताइव बलाहकाः ।

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ ५६ ॥

उपमेयमुपमितं तद्वाचि सुबन्तं व्याघ्रादिभिः सामर्थ्याद् उपमानवचनैः सह समस्यते, तत्पुरुषश्च समासो भवति, न चेत्सामान्यवाची शब्दः प्रयुज्यते । विशेषणं विशेष्येणेति परनिपाते प्राप्ते विशेष्यस्य पूर्वनिपातार्थं आरम्भः । पुरुषोयं व्याघ्रइव पुरुषव्याघ्रः । पुरुषसिंहः । सामान्याप्रयोगइति किम् । पुरुषो व्याघ्रइव शूरः । व्याघ्र । सिंह । ऋक्ष । ऋषभ । चन्दन । वृक्ष । वृष । वराह । हस्तिन् । कुञ्जर । रुरु । पृषत । पुण्डरीक । बलाहक । आकृतिगणश्चायम् । तेनेदमपि भवति । मुखपद्मम् । मुखकमलम् । करकिसलयम् । पार्थिवचन्द्रः । इत्येवमादि ॥

विशेषणं विशेष्येण बहुलम् ॥ ५७ ॥

भेदकं, विशेषणं, भेद्यं, विशेष्यम् । विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते, तत्पुरुषश्च समासो भवति । नीलोत्पलम् । रक्तोत्पलम् । बहुलवचनं व्यवस्यार्थम् । क्व चिच्चित्यसमास एव । कृष्णसर्पः । लोहितशालिः । क्व चिच्च भवत्येव । रामो जामदग्न्यः । अर्जुनः कार्त्तवीर्यः । क्व चिद्विकल्पः । नीलमुत्पलम् । नीलोत्पलम् । विशेषणमिति किम् । तक्षकः सर्पः । विशेष्येणेति किम् । लोहितस्तक्षकः ॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च ॥ ५८ ॥

पूर्व अपर प्रथम चरम जघन्य समान मध्य मध्यम वीर इत्येते सुबन्ताः समानाधिकरणेन सुपा सह समस्यन्ते, तत्पुरुषश्च समासो भवति । पूर्वपुरुषः । अपरपुरुषः । प्रथमपुरुषः । चरमपुरुषः । जघन्यपुरुषः । समानपुरुषः । मध्यपुरुषः । मध्यमपुरुषः । वीरपुरुषः । पूर्वस्यैवायं प्रपञ्चः ॥

श्रेण्यादयः कृतादिभिः ॥ ५९ ॥

श्रेण्यादयः सुबन्ताः कृतादिभिः समानाधिकरणैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति ॥ श्रेण्यादिषु च्व्यर्थवचनम् ॥ * ॥ अश्रेणयः श्रेणयः कृताः । श्रेणिकृताः । एककृताः । श्रेण्यादयः पठ्यन्ते । कृतादिराकृतिगणः । च्व्यन्तानां तु कुगतिप्रादय इत्यनेन नित्यसमासः । श्रेणीकृताः । श्रेणि । एक । पूग । कुण्ड । राशि । विशिख । निचय । निधान । इन्द्र । देव । मुण्ड । भूत । श्रवण । वदान्य । अध्यापक । ब्राह्मण । क्षत्रिय । पटु । पण्डित । कुशल । चपल । निपुण । कृपण । श्रेण्यादिः ॥ कृत । मित । मत । भूत । उक्त । समाज्ञात । समाम्नात । समाख्यात । संभावित । अवधारित । निराकृत । अवकल्पित । उपकृत । उपाकृत । इति कृतादिः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्तेन नञ्विशिष्टेनानञ् ॥ ६० ॥

नञेव विशेषो यस्य सर्वमन्यत्प्रकृत्यादिकं तुल्यं तत्रविशिष्टं, तेन नञ्विशिष्टेन क्तान्तेन समानाधिकरणेन सह अनञ् क्तान्तं समस्यते, तत्पुरुषश्च समासो भवति। कृतं च तदकृतं च, कृताकृतम्। भुक्ताभुक्तम्। पीतापीतम्। उदितानुदितम्। नुडिटौ तद्वक्तव्यावेव भेदकौ। अशितानशितेन जीवति। क्लिष्टाक्लिशितेन वर्त्तते ॥ कृतापकृतादीनामुपसंख्यानम् ॥ * ॥ कृतापकृतम्। भुक्तविभुक्तम्। पीतविपीतम्। गतप्रत्यागतम्। यातानुयातम्। क्रयाक्रयिका। पुटापुटिका। फलाफलिका। मानोन्मानिका ॥ समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च ॥ * ॥ शाकप्रधानः पार्थिवः। शाकपार्थिवः। कुतपसोऽयुतः। अजातौल्वलिः ॥

सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः ॥ ६१ ॥

सत् महत् परम उत्तम उत्कृष्ट इत्येते पूज्यमानैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति। पूज्यमानैरिति वचनात् पूजावचनाः सदादयो विज्ञायन्ते। सत्पुरुषः। महापुरुषः। परमपुरुषः। उत्तमपुरुषः। उत्कृष्टपुरुषः। पूज्यमानैरिति किम्। उत्कृष्टो गौः कर्द्दमात् ॥

वृन्दारकनागकुञ्जरैः पूज्यमानम् ॥ ६२ ॥

वृन्दारक नाग कुञ्जर इत्येतैः सह पूज्यमानवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति। पूज्यमानमिति वचनाद् वृन्दारकादयः पूजावचना गृह्यन्ते। गोवृन्दारकः। अश्ववृन्दारकः। गोनागः। अश्वनागः। गोकुञ्जरः। अश्वकुञ्जरः। पूज्यमानमिति किम्। सुसीमो नागः ॥

कतरकतमौ जातिपरिप्रश्ने ॥ ६३ ॥

कतरकतमौ जातिपरिप्रश्ने वर्त्तमानौ समर्थेन सुपा सह समस्येते, तत्पुरुषश्च समासो भवति। कतरकठः। कतरकालापः। कतमकठः। कतमकालापः। ननु कतमशब्दस्तावज्जातिपरिप्रश्नएव व्युत्पादितः, कतरशब्दोऽपि साहचर्यात्तदर्थवृत्तिरेव ग्रहीष्यते, किं जातिपरिप्रश्नग्रहणेन। एवं तर्ह्येतज्ज्ञापयति कतमशब्दोऽन्यत्रापि वर्त्ततइति। तथा च प्रत्युदाहरणं, कतरो भवतोर्द्वयोर्दत्तः। कतमो भवतां देवदत्तः ॥

किं क्षेपे ॥ ६४ ॥

किमित्येतत् क्षेपे गम्यमाने सुपा सह समस्यते, तत्पुरुषश्च समासो भवति। किंराजा, यो न रक्षति। किंसखा, योऽभिद्रुह्यति। किंगौः, यो न वहति। किमः क्षेपे इति समासान्तो न भवति। क्षेपइति किम्। को राजा पाटलिपुत्रे ॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः ॥ ६५ ॥

उभयत्रज्ञना, पोटेत्यभिधीयते। * गृष्टि,रेकवारप्रसूता। धेनुः, प्रत्ययप्रसूता। वशा, वन्ध्या। वेहद्,गर्भपातिनी। बष्कयणी, तरुणवत्सा। पोटादिभिः सह जातिवाचि सुबन्तं समस्यते, तत्पुरुषश्च समासो भवति। इभयोटा। इभयुवतिः। अग्निस्तोकः। उदश्चित्कतिपयम्। गोगृष्टिः। गोधेनुः। गोवशा। गोवेहत्। गोबष्कयणी। कठप्रवक्ता। कठश्रोत्रियः। कठाध्यापकः। कठधूर्त्तः। जातिरिति किम्। देवदत्तः प्रवक्ता। धूर्त्तग्रहणमकुत्सार्थम् ॥

प्रशंसावचनैश्च ॥ ६६ ॥

जातिरिति वर्त्तते। जातिवाचि सुबन्तं प्रशंसावचनैः सह समस्यते, तत्पुरुषश्च समासो भवति। रूढिशब्दाः प्रशंसावचना गृह्यन्ते मतल्लिकादयस्ते च विशिष्टलिङ्गत्वादन्यलिङ्गेपि जातिशब्दे स्वलिङ्गोपादाना एव समानाधिकरणा भवन्ति। गोप्रकाण्डम्। अश्वप्रकाण्डम्। गोमतल्लिका। अश्वमतल्लिका। गोमचर्च्चिका। अश्वमचर्च्चिका। जातिरिति किम्। कुमारी मतल्लिका ॥

युवा खलतिपलितवलिनजरतीभिः ॥ ६७ ॥

खलत्यादिभिः समानाधिकरणैः सह युवशब्दः समस्यते, तत्पुरुषश्च समासो भवति। जरतीभिरिति स्त्रीलिङ्गनिर्देशः 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहण'मिति ज्ञापनार्थः। युवा खलतिः, युवखलतिः। युवतिः खलती, युवखलती। युवा पलितः, युवपलितः। युवतिः पलिता, युवपलिता। युवा वलिनः, युववलिनः। युवतिर्वलिना, युववलिना। युवा जरन्, युवजरन्। युवतिर्जरती, युवजरती ॥

कृत्यतुल्याख्या अजात्या ॥ ६८ ॥

कृत्यप्रत्ययान्तास्तुल्यपर्यायाश्च सुबन्ता अजातिवचनेन समस्यन्ते, तत्पुरुषश्च समासो भवति। भोज्योष्णम्। भोज्यलवणम्। पानीयशीतम्। तुल्याख्याः। तुल्यश्वेतः। तुल्यमहान्। सदृशश्वेतः। सदृशमहान्। अजात्येति किम्। भोज्य ओदनः ॥

वर्णो वर्णेन ॥ ६९ ॥

वर्णविशेषवाचि सुबन्तं वर्णविशेषवाचिना सुबन्तेन समानाधिकरणेन सह समस्यते, तत्पुरुषश्च समासो भवति। कृष्णसारङ्गः। लोहितसारङ्गः। कृष्णशबलः। लोहितशबलः। अवयवद्वारेण कृष्णशब्दः समुदाये वर्त्तमानः समानाधिकरणो भवति ॥

* युवतिर्नवयौवना स्त्री। स्तोकमल्पपर्यायः। कतिपयं च। इत्यधिकं क्व चित्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुमारः श्रमणादिभिः ॥ ७० ॥

कुमारशब्दः श्रमणादिभिः सह समस्यते, तत्पुरुषश्च समासो भवति । येच स्त्रीलिङ्गाः पठ्यन्ते श्रमणा प्रव्रजिता कुलटेत्येवमादयस्तैः सह स्त्रीलिङ्ग एव कुमारशब्दः समस्यते, ये तु पुंलिङ्गा अध्यापको ऽभिरूपकः पण्डित इति, तैरुभयथा, प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति । कुमारी श्रमणा, कुमारश्रमणा । श्रमणा । प्रव्रजिता । कुलटा । गर्भिणी । तापसी । दासी । बन्धकी । अध्यापक । अभिरूपक । पण्डित । पटु । मृदु । कुशल । चपल । निपुण ॥

चतुष्पादो गर्भिण्या ॥ ७१ ॥

चतुष्पाद्वाचिनः सुबन्ता गर्भिणीशब्देन समस्यन्ते, तत्पुरुषश्च समासो भवति । गोगर्भिणी । अजागर्भिणी ॥ चतुष्पान्जातिरिति वक्तव्यम् ॥ * ॥ इह मा भूत् । कालाक्षी गर्भिणी । स्वस्तिमती गर्भिणी । चतुष्पाद इति किम् । ब्राह्मणी गर्भिणी ॥

मयूरव्यंसकादयश्च ॥ ७२ ॥

समुदाया एव निपात्यन्ते । मयूरव्यंसकादयः शब्दास्तत्पुरुषसंज्ञा भवन्ति । चकारो ऽवधारणार्थः । परममयूरव्यंसक इति समासान्तरं न भवति मयूरव्यंसकः । क्षात्रव्यंसकः । काम्बोजमुण्डः । यवनमुण्डः । छन्दसि । हस्तेगृह्य । पादेगृह्य । लाङ्गूलेगृह्य । पुनर्दाय ॥ एहीडादयो ऽन्यपदार्थे ॥ एहीडम्, एहीयवं वर्त्तते । एहिवाणिजा क्रिया । अपेहिवाणिजा । प्रेहिवाणिजा । एहिस्वागता । अपेहिस्वागता । प्रेहिस्वागता । एहिद्वितीया । अपेहिद्वितीया । प्रेहिकटा । अपेहिकटा । प्रेहिकर्दमा । अपेहिकर्दमा । उद्धरचूडा । आहरचेला । आहरवसना । आहरवनिता । छन्दविचक्षणा । उद्धरोत्सृजा । उद्धमविधमा । उत्पचविपचा । उत्पतनिपता । उच्चावचम् । उच्चनीचम् । अचितोपचितम् । अवचितपराचितम् । निश्चप्रचम् । अकिंचनम् । स्नात्वाकालकः । पीत्वास्थिरकः । भुक्त्वामुहितः । प्रेप्यपापीयान् । उत्पत्त्यव्याकुला । निपत्तरोहिणी । निपतणश्यामा । अपेहिप्रघसा । इहपञ्चमी । इहद्वितीया ॥ जहि कर्म्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति ॥ जहिजोडः । उज्जहिजोडः । जहिस्तम्बः । उज्जहिस्तम्बः ॥ आख्यातमाख्यातेन क्रियासातत्ये ॥ अश्नीतपिबता । पचतभृज्जता । खादतमोदता । खादताचमता । आहरनिवपा । आवपनिष्किरा । उत्पचविपचा । भिन्दिलवणा । छिन्दिविचक्षणा । पचलवणा । पचप्रकूटा । अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ चतुर्थाध्यायस्य ॥

॥ प्रथमः पादः ॥

मोक्षोपायाभियुक्तानां भजतां त्वत्पदाम्बुजम् ।
तनोति परमं श्रेयो यस्तं कृष्णमहं भजे ॥ १ ॥
संगृहीतानि मोक्षस्य साधनानि तृतीयके ।
चरमेऽस्मिन् फलं प्राह भगवान् बादरायणः ॥ २ ॥

एवं तृतीयेऽध्याये ससाधनविद्याविचारो वृत्तः । अथेदानीं चतुर्थेऽस्मिन्नध्याये विद्यायाः फलचिन्ता वर्तिष्यते । प्रसङ्गप्राप्तं चान्यदपि किंचित् । तत्र तावदिदं चिन्त्यते । "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः," "सोऽन्वेष्टव्यः स विजिज्ञासितव्य" इत्यादिना ब्रह्मदर्शनाय विधीयमानानि श्रवणादीनि श्रूयन्ते । तानि किं सकृत् कर्तव्यानि, उतासकृदावर्तनीयानीति संशये, किं तावत् प्राप्तम् । सकृदिति । असकृदावृत्तौ प्रमाणाभावादिति प्राप्त उच्यते ॥

॥ आवृत्तिरसकृदुपदेशात् ॥ १ ॥

तान्यसकृदावर्तनीयानि । कुतः । उपदेशात् । वेदनोपासनपर्यायेण निदिध्यासनशब्देनोपदेशात् । तस्य च निरन्तरध्यान एव शक्तत्वात् ।

अयमर्थः । "ततस्तु तं पश्यति निष्कलं ध्यायमान" इत्यादिना ब्रह्मापरोक्षासाधारणोपायत्वेन श्रूयमाणं ध्यानं सकृत् कृतं ब्रह्मदर्शनाय न क्षमं भवति, किं त्वसकृदेवेति ॥ १ ॥

॥ लिङ्गाच्च ॥ २ ॥

लिङ्गं स्मृतिः । स्मर्यते चायमेवार्थः ।
"आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः" ।
इत्यादिना ॥ २ ॥

॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

यस्य ध्यानं नैरन्तर्येण निर्णीतं, सोऽशेषदोषासंस्पृष्टमाहात्म्यः सार्वज्ञ्याद्यसंख्येयस्वाभाविकसद्गुणशक्तिवैभवः सर्वात्मा परब्रह्माख्यः श्रीमुकुन्दः किं स्वस्मादन्यत्वेनानुसंधेय उत स्वस्यात्मत्वेनेति संशये, किं तावद्युक्तम् । बहुशो भेदोपपादनादन्यत्वेनेति प्राप्त आह । "आत्मेती"ति । "स ममात्मैवाह च तदात्मक" इति तादात्म्यसंबन्धेनैव ध्येयः । कुतः । यत "एष म आत्मा" "एष सर्वेभूतान्तरात्मे"ति पूर्वे महान्तोऽभ्युपगच्छन्ति । "एष त आत्मा सर्वान्तरः," "एष त आत्मान्तर्याम्यमृतः," "ऐतदात्म्यमिदं सर्वं," "तत् त्वमसी"त्यादिना शिष्यांस्तथैव ग्राहयन्ति च । "अहमात्मा गुडाकेशः," "क्षेत्रज्ञं चापि मां विद्धि," "वासुदेवः सर्वं"मिति, "अखिलमिदमहं च वासुदेवः," "वासुदेवात्मकान्याहु"रित्यादिस्मृतेश्च ॥ ३ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ न प्रतीकेन हि सः ॥ ४ ॥

"मनो ब्रह्मेत्युपासीते"त्यादिप्रतीकोपासनेष्वप्यात्मत्वेनानुसंधानं कर्तव्यमुत नेति संशये, ब्रह्मोपासनत्वाविशेषादात्मेत्येवानुसंधेय इति प्राप्ते उच्यते। "न प्रतीकेने"ति। आत्मत्वानुसंधानं कर्तव्यम्। न हि स प्रतीक उपासितुरात्मा। प्रतीकोपासने हि मनोनामादिप्रतीकस्योपासनं, न तु परब्रह्मणः। तस्य तत्र तत्तद्दृष्ट्यानुसंधानमात्रत्वात्। प्रतीकोपासनं ह्यब्रह्मणि ब्रह्मदृष्ट्यानुसंधानम्। तत्रोपास्यप्रतीकस्योपासितुरात्मत्वाभावाच्च तथानुसंधातुं योग्यम् ॥ ४ ॥

ननु मनआदेरचेतनाल्पशक्तेरुपास्यत्वाश्रयणस्यान्याय्यत्वादत्रापि मनआदिदृष्ट्या ब्रह्मैवोपास्यमिति चेत्। तत्राह ॥

॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

मनआदिषु ब्रह्मदृष्टिरेव कर्तव्या, न ब्रह्मणि मनआदिदृष्टिः। कुतः। उत्कर्षात्। ब्रह्म हि मनआदिभ्य उत्कृष्टम्। अपकृष्टे ह्युत्कृष्टदृष्टिरभ्युदयाय भवति। उत्कृष्टे त्वपकृष्टदृष्टिः प्रत्यवायकरी। राजनि भृत्यदृष्टिरिव। "नेदं ब्रह्म यदिदमुपासत" इत्यादिना प्रतीकस्य ब्रह्मत्वनिषेधश्रवणात्। विश्वात्मत्वात्मसंभवाच्च। तादात्म्यविधानशास्त्रविरोधाच्च ॥ ५ ॥

॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

"य एवासौ तपति, तमुद्गीथमुपासीते"त्यादिकर्माङ्गाश्रयेषूपासनेषु किं कर्माङ्ग उद्गीथादावादित्यादिदृष्टिः कर्तव्योतादित्यादिपूद्गीथादिदृष्टिरिति संशये, तत्रादित्यादिपूद्गीथादिदृष्टिरिति। कुतः। फलसाधनभूतकर्माङ्गतयोद्गीथादीनामफलेभ्य आदित्यादिभ्य उत्कृष्टत्वात्। निकृष्टे ह्युत्कृष्टदृष्टिः कर्तव्या। न्याय्यत्वात्। इति प्राप्त उच्यते। "आदित्यादिमतयश्चे"ति। आदित्यादिदृष्टय एव कर्माङ्ग उद्गीथादौ कर्तव्याः। कुतः। उपपत्तेः। कर्मणामपि फलसाधनत्वमादित्यादिदेवताराधनद्वारेणेत्यादित्यादेरेवोत्कृष्टत्वोपपत्तेः ॥ ६ ॥

॥ आसीनः संभवात् ॥ ७ ॥

किमिदं ब्रह्मदर्शनासाधारणोपायतया वेदान्तशास्त्रैर्विहितं ध्यानवेदनज्ञानप्रत्ययादिशब्दवाच्यमुपासनम्, "आसीनः शयानो गच्छंस्तिष्ठन् वा कुर्यादित्यनियम उतासीन एवेति नियम इति संशयः। तत्र विशेषाश्रवणादनियम इति प्राप्ते प्रत्युच्यते, आसीन एवोपासनमनुतिष्ठेत्। कुतः। संभवात्। उपासनमेकायतया साध्यम्। एकाग्रचित्तता चासीनस्यैव संभवति। शयनादीनां लयविक्षेपहेतुत्वात् ॥ ७ ॥

॥ ध्यानाच्च ॥ ८ ॥

"निदिध्यासितव्य"इत्युपासनस्य ध्यानरूपत्वाच्चैकाग्रतावश्यंभाविनी। अन्यथा ध्यानासिद्धेः। ध्यानं हि विजातीयप्रत्ययानालम्बनत्वे सति ध्येयाकारैकस्मृतिसंततिरूपम्। तदेव परिपाकापन्नं ध्रुवस्मृतिपरभक्तिशब्दाभिधेयम्। "सत्त्वशुद्धौ ध्रुवा स्मृतिः," "भद्यते हृदयग्रन्थिः" "भिद्यते हृदयग्रन्थि"रिति श्रुतिस्मृतिभ्याम्। तथा च स्थितौ गमने च विक्षेपात्, शयाने लयाच्च दुःसाध्यमिति भावः ॥ ८ ॥

॥ अचलत्वं चापेक्ष्य ॥ ९ ॥

तच्च ध्यानं नैश्चल्यसापेक्षम्। तदभावे तदसिद्धेः। "ध्यायतीव पृथिवी," "ध्यायतीवान्तरिक्षं," "ध्यायतीव द्यौः," "ध्यायन्तीवापो," "ध्यायन्तीव पर्वता"इत्यत्राचलत्वमपेक्ष्यैव ध्यायतिप्रयोगो दृश्यते। तथाभूतं नैश्चल्यमासीनस्यैव संभवति। नान्यस्येत्यर्थः ॥ ९ ॥

॥ स्मरन्ति च ॥ १० ॥

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये" ॥

इत्यादिना स्थिरसुखासने स्वस्तिकासनेनोपविश्य निमीलितनयनो निरतिशयानन्दे परमात्मनि चित्तमावेशयेदिति स्मरन्ति ॥ १० ॥

॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

नात्र कश्चिद्देशकालादिनियमः किंतु यत्र देशे काले च चित्तैकाग्र्यं स्यात्, तत्रैव ध्यानं कुर्यात्।

ननु वैदिकारम्भेषु प्रायेण दिगादिनियमो दृश्यते। उपासनस्यापि वैदिकत्वाविशेषात् तत्रापि दिगादिनियमेन भवितव्यमिति चेत्। तदुदत्र विशेषस्याश्रवणात्।

नन्वाम्नायते देशविशेषनियमः श्वेताश्वतरैः।

"समे शुचौ शर्करवह्निवालुका-
विवर्जिते शब्दजलाश्रयादिभिः।
मनोऽनुकूले न तु चक्षुपीडने
गुहानिवाताश्रयणे प्रयोजयेत्" ॥

इत्यादिनेति चेत्। सत्यम्। तैरपि चित्तैकाग्र्यतैकान्तदेशावेवोच्येते, न तु देशविशेषो नियम्यते। "मनोऽनुकूल" इति वाक्यशेषादित्यर्थः ॥ ११ ॥

॥ आ प्रयाणात् तत्रापि हि दृष्टम् ॥ १२ ॥

तदिदं मोक्षासाधारणसाधनं ध्यानमेकस्मिन्नहनि कार्यमुतप्रयाणात् प्रत्यहमावर्तनीयमिति संशयः। तत्रैकस्मिन्नेवाहनि कृत्वोपरमेत। आवृत्तिविशिष्टस्योपासनशब्दार्थस्य कृतत्वात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"यावदायुष"मिति वचनं तु विधिशब्दाभावाद्विद्यायाः फलत्वेनोपसंहारपरम् । इति प्राप्ते ब्रूमः । "आ प्रयाणा"दिति । आ मरणाच्चैरन्तर्येणानुष्ठेयं, न त्वल्पकालानुष्ठेयम् । कुतः । तत्रापि हि,आ प्रयाणान्मध्ये यः कालस्तत्राप्युपासनं दृष्टम् । "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते"इत्यप्राप्तेनानुवादाद्विधिरेवायमिति । तथा, "अथ खलु क्रतुमयोऽयं पुरुषः," "स यावत् क्रतुरस्मांल्लोकात् प्रैति," "एवं क्रतुर्ह्यमुं लोकं प्रेत्याभिसंभवती"त्यग्निरहस्ये शाण्डिल्यविद्यायां श्रवणात् । अत्र क्रतुशब्दो मानसव्यापारपरः । क्रतुमयो ध्यानप्रधान इत्यर्थः ॥ १२ ॥

तदेवं विद्यासाधनानुष्ठाने प्रयत्नाधिक्यज्ञापनाय फलाध्यायेऽपि विद्यासाधनशेषं विचार्येदानीं तत्फलचिन्तनायारेभे ॥

॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

छान्दोग्ये श्रूयते, तद्यथा, "पुष्करपलाश आपो न श्लिष्यन्ते,एवमेवंविदि पापं कर्म न श्लिष्यते." "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते," इति । तत्र संशयः । किमत्र प्राप्तविद्यस्य विदुष उत्तरपूर्वाघयोरश्लेषविनाशौ श्रूयमाणावुपपद्येते, न वेति । किं युक्तम् । नोपपद्येते इति । कुतः ।

"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" ॥

इति भोगेनैव कर्मक्षयश्रवणात् । अश्लेषविनाशश्रुतिः कथंचिद्विद्यास्तुत्यर्थतया नेया । न हि विद्या पापप्रायश्चित्तत्वेन विधीयते, अपितु "ब्रह्मविदाप्नोति परं," "ब्रह्म वेद ब्रह्मैव भवती"ति ब्रह्मापरोक्षसाधनतया विधीयते । इति प्राप्ते उच्यते । "तदधिगम"इति । एवंभूतेन ध्यानपरिपाकेन ध्रुवस्मृत्याख्यज्ञानाधिगमे सिद्धे सत्युत्तरपूर्वाघयोरश्लेषविनाशावुपपद्येते । तत्रोत्तरभाविनः क्रियमाणस्य पापस्याश्लेषः । तत्प्राग्भूतस्य संचितस्य तस्य नाशः । कुतः । "तद्व्यपदेशात्" । "एवंविदि पापं कर्म न श्लिष्यते, एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते," इत्यादिव्यपदेशात् । "नाभुक्तं क्षीयते कर्मे"ति शास्त्रं हि कर्मणां फलजनने सामर्थ्यं द्रढयति । "एवंविदि पापं कर्म न श्लिष्यत"इत्यादि तु विद्यायास्तत्सामर्थ्यनिवारणशक्तिमिति द्वयोरपि शास्त्रयोर्भिन्नविषयत्वाच्च विरोधः । यथाप्तेजसोः शीतजननतन्निवारणशक्तिविषययोर्द्वयोः प्रमाणयोरपि विषयभेदात् प्रामाण्यम् । एवमिहापीति ॥ १३ ॥

नन्वत्र पापस्यैवाश्लेषविनाशश्रवणात्, पुण्यं तु विदुषा भोक्तव्यं, सुकृतस्य शास्त्रीयत्वात् । तत्फलस्य सुखरूपत्वेन विदुषोऽनिवृत्त्याभावाच्च, इति चेत्, तत्राह ॥

॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

इतरस्यापि पुण्यस्य कर्मणः शास्त्रदृष्ट्या संसरणहेतुत्वसाम्यादेवमघवदश्लेषविनाशौ विद्यायाः स्याताम् । उभे सुकृतदुष्कृते निर्दिश्य "सर्वे पाप्मानोऽतो निवर्तन्ते, तत् सुकृतदुष्कृते विधुनुते"इत्यादिश्रुत्या मुमुक्षोर्मोक्षविरोधित्वेनानिष्टफलत्वात् पुण्यमपि पाप्मशब्देन व्यपदिश्यते । "उभे उ ह्येवैष एते तरती"त्यादौ पापवत् पुण्यस्यापि प्रणाशव्यपदेशाच्च । "पाते तु" । तुशब्दोऽवधारणे । शरीरपाते विदुषो मुक्तिरेवेत्यर्थः ॥ १४ ॥

॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

पूर्वयोरधिकरणयोः पुण्यपापयोर्विद्यानिमित्तो विनाशोऽवगतः । स किमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति चिन्त्यते । तत्र "सर्वे पाप्मानः प्रदूयन्त"इति विद्याशक्तेरविशेषात् । तदविशेषात् तदविशेष इति पूर्वपक्षी मन्यते । तत्राचक्ष्महे । पूर्वे पुण्यपापरूपे कर्मणी अनारब्धकार्ये एव विनश्यतः । कुतः । तदवधेः । "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य"इत्युत्पन्नविद्यस्यापि शरीरपातावधिश्रवणात्,अन्यथा सर्वविनाशे शरीरस्थित्यनुपपत्तेः ॥ १५ ॥

॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

अग्निहोत्रादिनित्यनैमित्तिकस्वाश्रमकर्म विदुषा किं कर्तव्यमुत नेति संशयः । तत्र विद्यासामर्थ्याद्धर्माधर्मयोरश्लेषविनाशविधानादाश्रमकर्मणोऽपि सुकृतत्वसाम्येन तत्फलाश्लेषान्न कर्तव्यमिति प्राप्ते प्रत्युच्यते । "अग्निहोत्रादि त्वि"ति । तुः शब्दः सुकृतान्तरसाम्यशङ्कां निरस्यति । अग्निहोत्रादिस्वाश्रमकर्म विदुषापि तत्कार्याय विद्योत्पत्तिरूपकार्यायैव कर्तव्यम् । कुतः । तद्दर्शनात् । दृश्यते ह्यग्निहोत्रादीनां "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसानाशकेने"त्यादिना विद्योत्पत्तिफलत्वम् । विद्या चा प्रयाणादहरहराधेयातिशयेत्याद्यैव । तदुत्पत्त्यर्थमाश्रमकर्माप्यहरहः कर्तव्यम् । इतरथा ह्यशुद्धान्तःकरणस्य विद्योत्पत्त्यसंभवात् ॥ १६ ॥

यद्यग्निहोत्रादि सुकृतं विद्योत्पत्त्यर्थं विद्योत्पत्तेः पूर्वकृतं च सुकृतदुष्कृतं विद्यया विनष्टं भुक्त्यवशिष्टं च प्रवृत्तफलं, तर्हि "तस्य प्रिया ज्ञातयः सुकृतमुपयन्ती"ति कौषीतकिवचनस्य "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्या"मिति शाट्यायतिवचनस्य च को विषय इत्याशङ्क्याह ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

अतोऽग्निहोत्रादेरन्यापि विद्याधिगम्या । पूर्वोत्तरयोरुभयोरपि पुण्यपापकर्मणोः प्रबलकर्मान्तरप्रतिबद्धफला साध्वसाधुकृत्यास्त्येव यतः । काम्यं कर्म फलाय क्रियते प्रतिषिद्धं चाचर्यते तद्विषयमेकेषां शाखिनां "तस्य प्रिया ज्ञातयः सुकृत"मित्यादिवचनम् । तद्विषयैव विद्ययाश्लेषविनाशश्रुतिरपि । काम्यकर्मणो विद्यां प्रत्यनुपकारकत्वात् ॥ १७ ॥

अनुष्ठितस्य कर्मणः फलप्रतिबन्धसंभवं पूर्वोक्तं स्मारयति ॥

॥ यदेव विद्ययेति हि ॥ १८ ॥

हि यतो "यदेव विद्यया करोति तदेव वीर्यवत्तर"मित्युद्गीथविद्यायाः क्रतुफलाप्रतिबन्धफलत्वकथनमनुष्ठितस्य केवलस्य कर्मणः कर्मान्तरेण फलप्रतिबन्धं सूचयति, अत आरोग्याद्यादिसिद्धये विदुषानुष्ठितप्रबलकर्मान्तरप्रतिबद्धफलपुण्यकर्मविषयं "सुहृदः साधुकृत्या"मित्यादि ॥ १८ ॥

॥ भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

विदुषा प्रारब्धे पुण्यपापे कर्मणी किं विद्यायोनिशरीरभोग्ये उत शरीरान्तरभोग्ये अपीति संशये, किं युक्तम् । तच्छरीरभोग्ये इति । "यावच्च विमोक्ष्येऽथ संपत्स्ये" इति श्रुतेरिति प्राप्ते आह "भोगेने"ति । तुशब्दः शङ्कानिरासार्थः । इतरे प्रवृत्तकार्ये पुण्यपापरूपे कर्मणी स्वप्रवृत्तफलभोगेन क्षपयित्वाथ फलसमाप्त्यनन्तरं ब्रह्म संपद्यते । प्रारब्धं कर्म यदि ह्येक. शरीरभोग्यं तर्हि तच्छरीरावसाने मोक्षः । अनेकशरीरभोग्यं चेदनेकशरीरावसान इति सिद्धान्तः । "नाभुक्तं क्षीयते कर्मे"ति श्रुतिः प्रारब्धकर्मविषयैव । आरब्धफलयोर्भोगेनैव क्षपयितव्यत्वाभिप्रायेण "यावच्च विमोक्ष्येऽथ संपत्स्ये"इति चोच्यते । शरीरमतन्त्रम् । तदवधिनियमाश्रवणात् । कर्मविषयो बन्धमोक्षौ ।

। अयं भावः । विदुषो विद्यामाहात्म्यात् संचितक्रियमाणयोरश्लेषविनाशौ । प्रारब्धस्य तु कर्मणो भोगेन विनाशः । तत्र प्रारब्धस्य विद्यायोनिशरीरेणेतरशरीरैर्वा भुक्त्वा विनाशान्मोक्ष इति संक्षेपः ॥ १९ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां चतुर्थाध्यायस्य प्रथमपादविवृतिः समाप्ता ॥ ४ ॥ १ ॥ :: :: ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ चतुर्थाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

अथेदानीं विद्वदुत्क्रान्तिप्रकारचिन्तनार्थं प्रथमं तावदुत्क्रान्तिश्चिन्त्यते । "अस्य सौम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवताया"मिति संपत्तिः श्रूयते । तत्र संशयः । किं वाग्वृत्तिर्मनसि संपद्यते, उत वागेवेति । तत्र वाचो मनःप्रकृतिकत्वाभावात् स्वरूपलयस्तत्र न संभवतीति वागादीनां मनोऽधीनवृत्तिकत्वाद्वाग्वृत्तिकत्वमात्रमिति पूर्वः पक्षः । राद्धान्ते तु वाक्स्वरूपस्यैव लयो बोध्यः । कुतः । दर्शनात् । वागिन्द्रिय उपरतेऽपि मनःप्रवृत्तिदर्शनात् । "वाङ्मनसि संपद्यते"इति शब्दाच्च । अन्यथा शब्दस्वारस्यभङ्गः स्यात् । नहि वृत्त्युपरमे तत्र प्रमाणान्तरेण वागिन्द्रियमवगम्यते, येन वृत्तिसंपत्तिः कल्प्या । अप्रकृतौ लयाभावात् । संपत्तिशब्दः संयोगाभिप्रायः ॥ १ ॥

॥ अत एव सर्वाण्यनु ॥ २ ॥

अत एवोक्तहेतुभ्यां दर्शनशब्दाभ्यामेव वाचमनु सर्वाण्यपीन्द्रियाणि मनसि संपद्यन्ते । कोऽसौ शब्दः । "तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैर्यच्चेतस्तेनैष प्राणमायातीति" प्रश्नोपनिषदि श्रुतेः । दर्शनं च पूर्ववद्बोध्यम् ॥ २ ॥

॥ तन्मनः प्राणउत्तरात् ॥ ३ ॥

"मनः प्राण" इति श्रुतौ किं प्राणशब्दोऽपां वाचक उत प्राणस्यैवेति संशये, "अन्नमयं हि सौम्य मनः," "आपोमयः प्राण" इति मनसोऽन्नमयत्वस्य श्रवणात् । "अद्भ्यः पृथिवी"त्यपामन्नप्रकृतित्वेन तत्र लयस्यापि संभवादवाचक इति प्राप्ते राद्धान्तः । तत् सर्वेन्द्रियसंयुक्तं मनः प्राणे संपद्यते । तेन संयुज्यत इत्यर्थः । कुतः । उत्तरात् । "मनः प्राण" इति वाक्यशेषात् ।

किंच, "अन्नमयं हि सौम्य मनः" "आपोमयः प्राण" इति श्रुत्यान्नादिना मनःप्राणयोराप्यायनस्यैव विवक्षितत्वान्न तदुपादेयत्वम् । मनसोऽहंकारोपादेयत्वात्, प्राणस्य चाकाशोपादेयत्वान्न तत्रान्नजत्वशङ्कावकाश इत्यर्थः ॥ ३ ॥

अष्टाधिकनवतितमे पतिते पत्रे धराब्धिमितपृष्ठे ।
द्वादशसंख्यकपङ्क्तौ पौर्वापर्यं तु भावान्तम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

प्राणः किं तेजसि संपद्यते, उत जीवे, इति संशये, तेजसीति पूर्वपक्षः । राद्धान्तस्तु स प्राणो देहेन्द्रियाधिपे जीवात्मनि संयुज्यते । कुतः । तदुपगमादिभ्यः । श्रूयन्ते हि प्राणस्य जीवे;ऽपगमादयः । "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति, तमुत्क्रामन्तं प्राणोऽनूत्क्रामति", "कस्मिन्नुत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठितः स्या"मित्यादिषु ।

न च "प्राणस्तेजसी"ति श्रुतिविरोधः । तस्या जीवविशिष्टप्राणविषयकत्वात् । यथा गङ्गायमुनयोर्वैशिष्ट्येन समुद्रत्वेऽपि यमुनायाः पृथक् समुद्रलयोक्तावप्यविरोधस्तद्वत् । अन्यथोक्तश्रुतिविरोधात् ॥ ४ ॥

॥ भूतेषु तच्छ्रुतेः* ॥ ५ ॥

"प्राणस्तेजसी"ति जीवविशिष्टः प्राणः किं तेजोमात्रे संयुज्यते, उत संहतेषु तेजःप्रभृतिभूतेष्विति संशये, "तेजसी"-ति श्रुतेस्तेजोमात्रे, इति प्राप्ते आह । भूतेष्विति । तच्छ्रुतेः । "पृथिवीमय आपोमयो वायुमय आकाशमय"इति संचरतो जीवस्य सर्वभूतमयत्वश्रवणात् ॥ ५ ॥

ननु तेजआदिष्वेकैकस्मिन् क्रमेण संपत्तावप्युक्तश्रुतिरुपपद्यत इति चेत् । तत्राह ॥

॥ नैकस्मिन् दर्शयतो हि ॥ ६ ॥

नैकस्मिन्नेव प्राणः संयुज्यते । एकैकस्याकार्यत्वमत्वात् । दर्शयतो हि कार्यात्वमत्वं श्रुतिस्मृती । "नामरूपे व्याकरवाणि", तासां त्रिवृतमेकैकां करवाणीति नामरूपव्याकरणार्हत्वाय त्रिवृत्करणमुपदिश्यते ।

"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना ।
नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः ॥
समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः ।
महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते" ॥

इति । तथा च "प्राणस्तेजसी"ति जीवद्वारा भूतान्तरसंसृष्टे तेजसि प्राणः संयुज्यत इत्यर्थात् तेजःप्रभृतिभूतेष्वेव प्राणसंपत्तिरिति ॥ ६ ॥

॥ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

किं सेयमुत्क्रान्तिर्ज्ञानयोः समाना, उताज्ञस्यैवेति विशये ।

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" ॥

इति बृहदारण्यके विदुषोऽत्रैवामृतत्वप्राप्तिश्रुतेरुत्क्रान्त्यभावादज्ञस्यैवेति पूर्वः पक्षः । राद्धान्तस्तु, आङ् मर्यादायाम् । सृतिरर्चिरादिका गतिः । यावत् मृत्युपक्रमो मूर्धन्यनाडीप्रवेशस्ततः प्राग्ज्ञाज्ञयोः समानैवेयमुत्क्रान्तिः । तदनन्तरं त्वस्ति विशेषः । विद्वांश्चेत्, मूर्धन्यनाडीं प्रतिपद्यते । अविद्वांश्चेत्, पितृयानं, नरकद्वारं वा, प्रतिपद्यते । तथाहि छन्दोगैराम्नायते । "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वगन्या उत्क्रमणे भवन्ती"ति । एवं नाडीविशेषेण गतिश्रवणाद्विदुषोऽप्युत्क्रान्तिरावश्यकी । सा च पूर्वत्र समानापि प्रवेशे विशेषवती श्रूयते । "तस्य हैतस्य हृदयस्यं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य" इति । अत्र मूर्ध्न उत्क्रान्तिर्विद्वद्विषया, चक्षुरादिभ्य उत्क्रान्तिरितरविषया । "शतं चैके"ति श्रुत्यैकार्थ्यात् ।

यत् तूक्तं, "विदुषोऽत्रैवामृतत्वप्राप्तिश्रुतेरुत्क्रान्त्यभाव इति । तत्रोच्यते । "अमृतत्वं चानुपोष्ये"ति । "अमृतत्वमेति, अमृतो भवती"त्यादिना । अमृतत्वं हि, अनुपोष्यैव,उपदाहे, देहेन्द्रियादिसंबन्धमदग्ध्वैव, पूर्वोत्तराघविनाशश्लेषमात्रमुच्यते' देहादिसंबन्धनाशस्याग्रे भविष्यत्त्वात् । अत्र "ब्रह्म समश्नुत" इति श्रुतिस्तूपासनसमय एव ध्रुवस्मृत्याख्यब्रह्मानुभूतिविषया । ध्रुवस्मृतेर्बृहत्त्वात् । अन्यथा"मृतत्वं चानुपोष्ये"ति विरुध्येत । लिङ्गशरीरदाहाभावे परमोक्षानुपपत्तेः । तस्य हि देशविशेषं गत्वैव लयश्रवणात् । "इमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती"ति श्रुतेः । गतिश्रुतिश्च विरुध्येत । अतो गतिश्रुत्यविरोधाय "यदा सर्वे प्रमुच्यन्ते" इत्यनेनामृतत्वसाधनभूतोपासननिष्पत्तिरुच्यते । हृदि स्थिताः कामा यदा प्रमुच्यन्ते तदैवोपासननिष्पत्तेर्मर्त्योऽमृतो भवति, पूर्वोत्तराघरहितो भवति । अत्र कामप्रमोक्षपूर्वकमोक्षोपासने स्थितो मर्त्यो ब्रह्म समश्नुते, ब्रह्मविषयकानवच्छिन्नानुभूत्या स्थितो भवतीत्यर्थः ॥ ७ ॥

उक्तमेव विशदयति ॥

॥ तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

तदमृतत्वमदग्धदेहसंबन्धस्यैव मन्तव्यम् । कुतः । "आपीते"रिति । अपीतिरप्ययो ब्रह्मप्राप्तिः । अर्चिरादिगत्या देशविशेषं गत्वा यावद् ब्रह्म न प्राप्यते तावद्देहसंबन्धरूपसंसारस्य व्यपदेशात् ।

"योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्" ॥

*—ध्वतः श्रुतेः, इति शंकरभाष्यपाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"तस्य तावदेव चिरं धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामी"त्यादिना ॥ ८ ॥

॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

इतश्च मरणसमये विदुषो न देहसंबन्धो दग्धः । यतः सूक्ष्मं शरीरमनुवर्तते । कुतः । प्रमाणतस्तथोपलब्धेः । देवयानेन पथा गच्छतो विदुषश्चन्द्रमसा संवादलक्षणप्रमाणादपि सूक्ष्मशरीरस्य सद्भावोपलम्भात् । "तं प्रति ब्रूयात् सत्यं ब्रूया"दिति श्रुतेः ॥ ९ ॥

॥ नोपमर्देनातः ॥ १० ॥

अत उक्ताद्धेतुकलापात् । "अथ मर्त्योऽमृतो भवतीति" श्रुतिर्न देहसंबन्धोपमर्देनामृतत्वं वक्तुं समर्था ॥ १० ॥

॥ अस्यैव चोपपत्तेरेष ऊष्मा ॥ ११ ॥

जीवदवस्थायां स्थूलदेहे संस्पर्शेन योऽयमूष्मोपलभ्यते सोऽस्यैव सूक्ष्मशरीरस्य गुणो न च स्थूलस्य । कुतः । उपपत्तेः । सति तस्मिन्नूष्मोपलब्धेः । तस्मिन् विनिर्गते तु मृतशरीर ऊष्मानुपलब्धेश्च । इत्यन्वयव्यतिरेकाभ्यां तस्यैवोपपन्नत्वात् । अतः सूक्ष्मदेहयुक्तो विद्वानप्युत्क्रामतीति ॥ ११ ॥

एवमुत्क्रान्तिं निरूप्य तद्विवादं निराकरोति ॥

॥ प्रतिषेधादिति चेन्न शारीरात् * स्पष्टो ह्येकेषाम् ॥ १२ ॥

ननु यदुक्ता विदुष उत्क्रान्तिः सोपपन्ना । कुतः । "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति," ब्रह्मैव सन् ब्रह्माप्येती"त्यादिकाण्वश्रुतेर्विदुष उत्क्रान्तिप्रतिषेधदर्शनादिति प्राप्ते राद्धान्तो"ने"ति । नायं निषेधो विदुष उत्क्रान्तेः । कथं तर्ह्युक्तश्रुतेर्गतिरित्यत्राह । "शारीरादि"ति । तया श्रुत्या शारीरात् प्राणानामुत्क्रान्तिर्निषिध्यते, न शरीरात् । तस्याकामयमानस्य विदुषः प्राणाः स्वस्मान्नोत्क्रामन्ति, देवयानेन गमनात् सहैव तिष्ठन्ति । तत्र हेतुः । "स्पष्टो ह्येकेषा"मिति । हि यस्मादेकेषां माध्यंदिनशाखिनां पाठे "न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते," "ब्रह्मैव सन् ब्रह्माप्येती"ति पञ्चमीप्रयोगाच्छारीरात् प्राणानामुत्क्रान्तिनिषेधः स्पष्टः श्रूयत इत्यर्थः । अत्रैवान्तर्यामिणि । परमात्मन्येवेत्यर्थः । यदि च शरीरादुत्क्रान्तिः प्रतिषिध्येत, तर्हि "स उच्छ्रयत्याध्मात्याध्मातोऽमृतः शेत" इति नोपपद्येत । उच्छ्रयनादीनां देहधर्मत्वेन प्रत्यक्षविरोधश्च स्यात् । अतः शारीरात् प्रतिषेधो युक्तः । विवक्षितार्थोपपत्तेः ।

किंच, "न तस्ये"ति षष्ठीप्रयोगेऽपि संबन्धसामान्यप्रतीत्या विदुषः संबन्धिप्राणोत्क्रान्तिनिषेधो युक्त एव ।

न चोत्क्रमणस्यापादाननिरूप्यत्वनियमात् षष्ठीश्रवणविरोधः, अपादानं तु शरीरमेव, न शारीर इति वाच्यम् । अपादानापेक्षायामश्रुताच्छरीरात् संबन्धितया श्रुतस्य शारीरस्यैव संनिहितत्वेनापादानतया ग्रहणेऽपि दोषायोगात् ।

किंच, जीवसंबन्धितया ज्ञातानां प्राणानां संबन्धसामान्यवाचकायाः षष्ठ्या अपादानत्वरूपसंबन्धविशेषपरत्वमपि समञ्जसम् । विशेषस्य सामान्यानतिरेकित्वात् । नटस्य शृणोतीतिवत् । अन्यथा श्रुतत्यागाश्रुतकल्पनापत्तेः ।

किंच, विदुषः शरीरवियोगकाले प्राणवियोगस्यापि प्राप्तत्वात् तस्यैव निषेधः । अप्राप्तस्य निषेधायोगात् ।

किंच, "इमाः षोडश कला" इत्यादिना विदुषो गत्यनन्तरं देशान्तरे प्राणवियोगश्रवणाच्च ।

ननु पूर्वत्रार्तभागप्रश्ने, "अथ पुनर्मृत्युं जयती"ति विद्वांसं प्रस्तुत्य, "याज्ञवल्क्य इति होवाच, यत्रायं पुरुषो म्रियते, उदस्मात् प्राणाः क्रामन्त्याहो नेतीति पृष्टे, नेति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते, स उच्छ्रयत्याध्मात्याध्मातोऽमृतः शेत" इति विदुष उत्क्रान्तिनिषेधश्रवणाद्विद्वानिहैवामृतत्वं प्राप्नोतीति चेन्न । तत्र प्रश्नप्रतिवचनयोर्ब्रह्मविद्याप्रसङ्गादर्शनेन तस्य विद्वद्विषयकत्वाभावात् । तत्राह प्रश्नपूर्वकं "प्राणो वै ग्रहः सोऽपानो नातिग्रहेण गृहीत"इत्यादिना ग्रहातिग्रहरूपेणेन्द्रियेन्द्रियार्थस्वभावो"ऽग्निर्वै मृत्युः सोऽपामन्न"मित्यनेनापामग्न्यन्नत्वम् । "अथ पुनर्मृत्युं जयती"त्यनेन चापामग्न्यन्नत्वज्ञानादग्निजय एव मृत्युजयः । "नेति होवाच याज्ञवल्क्य"इत्यादित्रयेण म्रियमाणस्य जीवस्य प्राणापरित्यागो मृतस्य नामवाच्यकीर्त्यनुवृत्तिः, तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेऽर्था वर्णिता इति नात्र विदुषः प्रसङ्गः । अविदुषस्तु प्राणा उत्क्रामन्तीति वचनं स्थूलदेहवत् प्राणा न मुञ्चन्ति, अपितु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्तीति प्रतिपादयति ॥ १२ ॥

॥ स्मर्यते च ॥ १३ ॥

"संनिरुद्धस्तु तेनात्मा सर्वेष्वायतनेषु वै ।
जगाम भित्त्वा मूर्धानं दिवमित्युत्पपात ह ॥
ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्" ॥

इत्यादिस्मृतेश्च विदुषो मूर्धन्यनाड्योत्क्रान्तिर्न भवतीति सिद्धा विदुषोऽप्युत्क्रान्तिः ॥ १३ ॥

सेन्द्रियः सप्राणो जीवात्मोत्क्रान्तिसमये तेजःप्रभृतिभूतसूक्ष्मेषु संयुज्यत इत्युक्तं, तत्राशङ्क्य परिहृतं च, तानि पुनर्वि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दुषो वागादीन्द्रियाणि प्राणो भूतसूक्ष्माणि च किं परदेवतायां समवलीयन्त उत यथाकर्म यथाविद्यं गच्छन्तीति संशये यथाकर्म यथाविद्यमिति पूर्वपक्षः । तदानीं पुण्यादिफलभोगाभावेन संपत्तेर्निष्प्रयोजनत्वादिति प्राप्त आह ॥

॥ तानि परे तथाह्याह ॥ १४ ॥ *

तानि विदुषो वागादिप्राणभूतानि परे परस्मिन् सर्वात्मनि ब्रह्मणि संपद्यन्ते । सर्वस्य तदुपादेयत्वात् । कुतः । "तथा ह्याहे"ति । हि यत"स्तेजः परस्यां देवतायां"मिति श्रुतिरेव परमात्मानं तथा सुषुप्तिप्रलययोरिव विश्रामस्थानत्वेनाह ॥ १४ ॥

॥ अविभागो वचनात् ॥ १५ ॥

सेयं परमात्मनि विदुत्प्राणादिसंपत्तिः किं मनःप्रभृतिषु वागादिसंपत्तिवत् संयोगरूपा, उत समुद्रे नद्यादिसंपत्तिवत् तादात्म्यापत्तिरूपेति विशये, "वाङ्मनसि संपद्यत" इति श्रुतस्यैव संपत्तिपदस्य "तेजः परस्या"मित्यत्रानुषङ्गाद्विशेषादर्शनाच्च संयोगापत्तिरूपेति पूर्वः पक्षः ।

राद्धान्तस्तु सर्वात्मनो भगवतः परब्रह्मणः सर्वाधारत्वात् सर्वकारणत्वाच्च तत्र विदुत्प्राणादीनां संपत्तिरविभागस्तादात्म्यापत्तिरूपैव । कुतः । वचनात् । "एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती"ति परमात्मनि प्राणादिकलानां संपत्तिमुक्त्वा "भिद्येते चासां नामरूपे पुरुष"इत्येवं प्रोच्यते, "स एषोऽकलोऽमृतो भवती"ति तासां नामरूपभेदोक्तेरित्यर्थः । अयमभिप्रायः । स्थूलदेहादुत्क्रम्य देवयानेन गतो विद्वान् प्राकृतमण्डलं भित्त्वा प्रकृतिविष्णुपदसोपानैर्विवेचनहेतुभूतां सरिद्वरां विरजां यावत् प्राप्नोति तावत् सूक्ष्मशरीरमनुवर्तते, तत्र सूक्ष्मशरीरं परस्यां देवतायां हित्वा दिव्याप्राकृतानादिसिद्धामानवानीतब्राह्मालंकारैरलंकृतो विष्णुलोकं परं पदं प्रविश्य परं ब्रह्माधिगच्छतीति ॥१५॥

एवं मृत्युपक्रमावधिं विद्वदविदुषोः सामान्यत उत्क्रान्तिं निर्णीयाथेदानीं विदुषः प्रति ज्ञातं विशेषं दर्शयितुमारभ्यते ॥

॥तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥

"शतं चैका च हृदयस्य नाड्य" इति श्रुतौ शताधिकया मूर्धन्यनाड्या मूर्धस्थानाविष्क्रमणं श्रूयते । तत्रास्ति संशयः । शताधिकया विदुषो निष्क्रमणमन्याभिस्त्वितरस्येति नियमः संभवत्युत नेति । तत्र नाडीनामतिसूक्ष्मत्वाद्दुर्विवेचनतया पुरुषेण ग्रहीतुमशक्यत्वाच्च नियमः । "तयोर्ध्वमाय"न्निति तु यादृच्छिकौ तथा गतिमनुवदतीति प्राप्त उच्यते । "तदोक" इति । विद्वान् देहादुत्क्रम्य शताधिकया शतादतिरिक्तयैकशततम्या हृदयादुन्नतया ब्रह्मरन्ध्रं प्राप्तया सूर्यरश्मिभिरेकीभूतया सुषुम्णाख्यनाड्यैव निष्क्रामति, न च तेन सा विवेक्तुमशक्या, यतोऽयं विद्वान् परमात्माराधनभूतविद्याया उपासनायाः सामर्थ्यात् प्रभावाद् विद्याङ्गभूतगतेरातिवाहिकैस्तत्पदप्राप्तेरनुचिन्तनयोगाच्च प्रीतेन हृदि स्थितेन परमात्मनानुकम्पितो भवति, ततश्च तस्योपसंहृतवागादिवर्गस्योच्चिक्रमिषोर्जीवस्योक्तः स्थानं हृदयं "स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामती"ति श्रुतेः, अग्रज्वलनं प्रकाशितायं भवति, एवं तेन हार्देन परमात्मना प्रकाशितं द्वारं सुषुम्णामूलं यस्यैतादृशो विद्वां स विजानातीति तया तस्य गतिर्युक्तेवेति ॥ १६ ॥

॥ रश्म्यनुसारी ॥ १७ ॥

छान्दोग्ये"ऽथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमत"इत्याद्युक्त्वा पुन"स्तयोर्ध्वमायन्नमृतत्वमेती"त्युक्तं, ततो हि मूर्धन्यनाड्या निष्क्रामन् रश्मीननुसृत्यादित्यमण्डलं गच्छतीति गम्यते । तत्रेयं विचिकित्सा । किं मूर्धन्यनाड्या निर्गतो विद्वान् रश्म्यनुसार्येव गच्छतीति नियमः संभवत्युत नेति । तत्र रात्रौ मृतस्य विदुषो रविरश्म्यनुसरणासंभवादनियम इति प्राप्ते राद्धान्तः । रश्म्यनुसार्येव गच्छति । कुतः । विशेषाश्रुतेः । "अथैतैरेवे"त्यवधारणाच्च निश्यपि सूक्ष्मा रश्मयः सन्त्येवेति । निदाघकाले निश्युष्णोपलब्धेः । हेमन्तादौ तु हिमाभिभवाद्दुर्दिन इव तदनुपलब्धिः । श्रूयते च सर्वदा शिरारश्मिसंबन्धः । तद्यथा । "महापथ आत्मत उभौ यामौ गच्छतीमं चामुं च, एवमेवैत आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं च, अमुष्मादादित्यात् प्रतायन्ते त आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते, तेऽमुष्मिंचादित्ये सृप्ता"इति ॥ १७ ॥

॥ निशि नेति चेन्न संबन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

इदमत्र विचार्यते । निशि मृतेन विदुषा ब्रह्म प्राप्यते न वेति । तत्र,

"दिवा च शुक्लपक्षश्च उत्तरायणमेव च ।
मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्" ॥

इति रात्रिमरणस्य गर्हितत्वेनाधोगमनहेतुत्वाच्च निशि मृतस्य ब्रह्मप्राप्तिः संभवतीति चेत् । विदुषः कर्मसंबन्धस्य यावद्देहभावित्वात् । उत्तरपूर्वयोः पुण्यापुण्ययोर्भगवदीयध्रुवस्मृत्याख्यज्ञानेनैवाश्लेषविनाशात् प्रवृत्तफलकर्मसंबन्धस्य च यावच्चरमदेहभावित्वाद्बन्धहेतुभावेन न तत्र कालादिप्रतीक्षा-

* शंकरभाष्ये स्पष्टो श्लोकोऽयमिति भिन्नं सूत्रम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पेतेति विदुषो निशि मरणेऽपि ब्रह्मप्राप्तिरविरुद्धेति। दर्शयति च श्रुतिरेवैतत्। "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति। "दिवा चे"ति वचनं त्वज्ञविषयम्॥ १८॥

॥ अतश्चायनेऽपि दक्षिणे ॥ १९ ॥

अतः पूर्वोक्तहेतोरेव दक्षिणायनेऽपि मृतस्य विदुषो ब्रह्मप्राप्तिरविरुद्धा।

नन्व"थ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यं गच्छती"ति चन्द्रप्राप्तिश्रवणाच्चन्द्रं प्राप्तानां चा"यैनमेवाध्वानं पुनर्निवर्तते"इति पुनरावृत्तेरावश्यकत्वात्, किंच भीष्मादीनां ब्रह्मविद्यावदयर्वर्तिनामप्युत्तरायणप्रतीक्षादर्शनात्, कथं दक्षिणायने मृतस्य ब्रह्मप्राप्तिरिति चेन्न। ब्रह्मविद्याविधुराणां पितृयानेन पथा चन्द्रं गतानामेव पुनरावृत्तिर्न विदुषाम्। तेषां तु चन्द्रप्राप्तावपि "तस्माद्ब्रह्मणो महिमानमाप्नोती"ति वाक्यशेषाद्दक्षिणायनमितानां चन्द्रं गतानामपि ब्रह्मप्राप्तिरविरुद्धा। चन्द्रसायुज्यवचनं तु ब्रह्म प्रेप्सोर्विश्रामस्थानमात्रविषयम्। आवृत्तिवचनं चाविद्वद्विषयम्। भीष्मादीनामुत्तरायणादिप्रतीक्षा तु स्वस्य स्वच्छन्दमरणशक्तिप्रदर्शनार्था, उत्तरायणप्रशंसार्था वेत्यविरोधः॥ १९॥

ननु "यत्र काले त्वनावृत्ति"मित्युपक्रम्य,

"एकया यात्यनावृत्तिमन्ययावर्तते पुनः"।

इत्यन्तमहरादिकालविशेषः स्मृतौ मुक्तये निर्दिश्यते, तत् कथं रात्रौ दक्षिणायने वा मृतो मुक्तिं लभेतेत्यत्रोच्यते॥

॥ योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ २० ॥

योगिनो ब्रह्मनिष्ठान् प्रति हेयोपादेयतया पितृयानदेवयानाख्यस्मृतिद्वयं तत्र स्मर्यते, न तु विदुषः कालविशेषो नियम्यते। यत एते स्मृती स्मार्ते। स्मृतिविषयभूतयोगाङ्गतयाहरहः स्मरणार्हे।

"नैते सृती पार्थ जानन् योगी मुह्यति कश्चन"।

इत्युपसंहारवाक्यात्।

"यत्र काले त्वि"त्यत्र कालशब्दोऽहरादिसंवत्सरान्तकालाभिमान्यातिवाहिकदेवतापरः। अग्निधूमयोः कालत्वासंभवात्। तया च तदुपलक्षितो मार्ग उच्यते। यत्र यस्मिन् काले कालाभिमानिदेवतोपलक्षितमार्ग इत्यर्थः॥ २०॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्मकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य द्वितीयपादविवृतिः समाप्ता॥ २॥ :: :: ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ चतुर्थाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

॥ अर्चिरादिना तत्प्रथितेः ॥ १ ॥

उत्क्रान्तिमारभ्य नाडीविशेषेणोत्क्रम्य रश्म्यनुसारी सन् देवयानेन पथा गतो विद्वान् परं ब्रह्म प्राप्नोतीति स्थितम्। तदानीं गच्छतस्तस्य सा सृतिरेकानेका वेति चिन्त्यते। तत्र श्रुतिष्वनेकविधा सृतिः श्रूयते। तथाहि,बृहदारण्यकेऽर्चिरादिनैका। "ते य एवमेतद्विदुर्ये चामी अरण्ये आपूर्यमाणपक्षादाद्वा सत्यमुपासते तेऽर्चिरभिसंभवन्ति," "एवमर्चिषोऽहरह्न आपूर्यमाणपक्षादान् षण्मासानुदङ्नादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं तान् वैद्युतान् पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयती"ति, पुनस्तत्रैवान्या, "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथारथचक्रस्य खण्डेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथोदुम्बरस्य खण्डेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खण्डेन स ऊर्ध्वमाक्रमते स ब्रह्मलोकमागच्छती"ति, कौषीतक्याम्नाये त्वपरा, "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोक"मिति, छान्दोग्ये च, "अथ यदु चैवास्मिन् सव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसंभवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षादान् षडुदङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त"इत्यर्चिः प्रथमैका, तथा तत्रैव नाडीरश्मिसंबन्धेनान्या, "अथैतेरेव रश्मिभिरूर्ध्वमाक्रमत इति सूर्यद्वारेण ते विरजाः प्रयान्ती"ति च क्वचिन्या।

इह संशयः। किमेता नानाविधा ब्रह्मलोकसृतयः श्रुतिभिः प्रतिपाद्यन्ते, उतार्चिरादिकैकैव सृतिरिति। तत्रान्योन्यनिरपेक्षत्वाद्विद्यप्रकरणत्वाद्विद्योपासनाशेषत्वाद्, "अथैतेरेवे"त्यवधारणानुरोधाच्च नानाविधा इति प्राप्तेऽभिदध्महे। "अर्चिरादिने"ति। अर्चिरादिरेक एव मार्गोऽनेकविशेषणविशिष्टः सर्वश्रुतिभिः प्रतिपाद्यते, तेनैव विद्वान् ब्रह्म गच्छति। कुतः। "तत्प्रथितेः"। प्रथितिः प्रसिद्धिः। तस्यैव सर्वत्र प्रसिद्धत्वात्, पञ्चाग्निविद्याप्रकरणे "ये चेमेऽरण्ये श्रद्धा तप इत्युपासत" इति विद्यान्तरशालिनामप्यर्चिरादिमार्गेणैव गत्यभिधानात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम् ।
धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात्" ॥
इति स्मृतेः,
"पन्थानौ पितृयाणश्च देवयानश्च विश्रुतौ ।
दुर्जनाः पितृयाणेन देवयानेन सोत्तिमाः" ॥

इति मोक्षधर्मे च स्मरणात्, श्रुत्यन्तरोक्तानामेकदेशानां विद्यागुणोपसंहारवच्छ्रुत्यन्तर उपसंहारात् स एव सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यते । प्रकरणभेदेऽपि विद्यायाः प्राप्तव्यस्य चैकत्वादनेकमार्गकल्पनमनर्थकम् । संभवत्येकवाक्यत्वे वाक्यभेदस्यान्याय्यत्वात् "एतैरेवे"त्यवधारणस्यापि रश्मिप्राप्तिपरत्वादेकेयं स्मृतिरिति स्थितम् ॥ १ ॥

॥ वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

सर्वप्रकरणेष्वर्चिरादिमार्ग एकस्तेनैव विद्वान् गच्छतीत्युक्तम् । अथ श्रुत्यन्तरोक्तानां मार्गपर्वणां केन क्रमेण संनिवेश इति चिन्त्यते । ध्यानोपयोगात् । तत्र वाजसनेयिपाठे मासादित्ययोर्मध्ये देवलोकः श्रूयते । छन्दोगपाठे तु तयोर्मध्ये संवत्सरः । तावुभावुभयत्रोपसंहार्यौ । द्वयोर्मार्गैक्यत् । तत्रापि मासादूर्ध्वं संवत्सरः । ततो देवलोकः संनिवेशयितव्यः । "अर्चिषोऽहरह्न आपूर्यमाणपक्ष"मित्यादावधिककालानां न्यूनकालेभ्य उत्तरोत्तरसंनिवेशदर्शनात् । मासंवत्सरयोः संबन्धस्य प्रसिद्धत्वाच्च । "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छती"त्यत्र तु वाजसनेयिभिरादित्यात् पूर्वं वायुः पठ्यते । कौषीतकिनस्तु "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोक"मित्यग्निलोकशब्दितार्चिषः परं वायुं पठन्तीति वायुस्थानानिश्चयात् तं किमर्चिरात्मकाग्नेरनन्तरं विद्वानभिगच्छेदुत संवत्सरादनन्तरमिति संशये, "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोक"मिति पाठबलादर्चिषोऽनन्तरो वायुरिति प्राप्ते उच्यते । "वायुमब्दा"दिति । अब्दात् संवत्सरादूर्ध्वमादित्यादर्वाञ्चं वायुमभिसंभवति । कुतः । "अविशेषविशेषाभ्या"मिति । स वायुलोकमित्यविशेषेण वायुरुपदिष्टः । पदार्थमात्रनिर्देशात् । "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुलोकमागच्छति तस्मै तत्र विजिहीते यथा रथचक्रस्य खखेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छती"ति विशेषेणोपदिष्टः । ऊर्ध्वशब्दः क्रमवाची । तेन विशेषो गम्यते । एवं सति बृहदारण्यकोक्तदेवलोकशब्देनापि वायुरेव ज्ञातव्यः । कौषीतकिनां वायुलोकशब्दश्च, वायुश्चासौ लोकश्चेति वायुमेवाभिधत्ते । "वायुश्च देवानामावासभूतो योऽयं पवते, एष एव देवानां यह"इति श्रुतेः ।

केचित् तु संवत्सराद्देवलोकं देवलोकाद्वायुलोक"मिति श्रुत्यन्तरवशाद्देवलोकोऽप्यत्र मध्ये निवेशयितव्यः । "वायुमब्दा"दिति तु छन्दोगश्रुत्यपेक्षयोक्तं, सूत्रे वायुपदं देवलोकपूर्वकवायुपरमिति वदन्ति । तन्मते त्रयोदशपर्वा ब्रह्मलोकपद्धतिः ॥ २ ॥

एवं कौषीतकिभिरन्यनन्तरं पठितस्य वायोः स्थानमुक्तम् । अथ वाय्वनन्तरं पठितस्य वरुणस्य किं विद्युत उपरि निवेश, उत वायोरुपरीति संशये "स वायुलोकं स वरुणलोक"मिति पाठक्रमेण वायोरुपरि वरुणनिवेश इति प्राप्ते राद्धान्तमाह ॥

॥ तडितोऽधिवरुणः संबन्धात् ॥ ३ ॥

"स वरुणलोक"मिति कौषीतकिश्रुत्युक्तो वरुण"श्चन्द्रमसो विद्युत"मिति छान्दोग्यश्रुत्युक्तायास्तडितो विद्युतोऽप्युपरिष्टाच्चिवेशयितव्यः । कुतः । संबन्धात् । विद्युतो मेघोदरवर्तित्वेन विद्युद्वरुणयोः संबन्धस्य लोके वेदे च प्रसिद्धत्वात् । पाठक्रमादर्थक्रमस्य बलीयस्त्वात् । "यदा हि विशाला विद्युतस्तीव्रस्तनितनिर्घोषा जीमूतोदरेषु प्रनृत्यन्त्यथापः प्रयतन्ति विद्योतते स्तनयति वर्षिष्यति वा"इति श्रुतेः । अपां चेश्वरो वरुणः, वरुणाच्चोपरीन्द्रप्रजापती निवेश्यौ । स्थानान्तराभावात् । पाठसामर्थ्याच्च ।

एवं च सति "तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयती"त्यमानवस्य विद्युत्पुरुषस्य गमयितृत्वं व्यवधानसहमित्यवगम्यते ।

तदेवमर्चिरादिप्रजापत्यन्तो द्वादशपर्वा ब्रह्मलोकमार्ग इति सिद्धम् ॥ ३ ॥

॥ आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

किमर्चिरादयो विदुषो ब्रह्म प्रेप्सोर्भोगस्थानानि, किं वा मार्गचिह्नानि, किं वा नेतारः पुरुषा, इति संशयः । तत्र मार्गचिह्नानीति तावत् प्राप्तम् । तत्सरूपत्वेन निर्देशात् । यथाहि लोके कंचिद्ग्रामादितीर्थं प्रविष्टाः समानं तन्मार्गज्ञा अनुशिष्यन्ति, अतो निर्गत्यामुं यामं याहि ततो नगरं ततो गिरिं ततो नदीं, ततस्तीर्थं प्राप्स्यसीति । अथवा भोगस्थानानि । अहरादेः कालविशेषत्वेन प्रसिद्धेर्मार्गचिह्नत्वानुपपत्तेः । "एत एव लोका यदहोरात्राण्यर्धमासा ऋतवः संवत्सरा" इत्यहरादीनां लोकत्वोक्तेः । कौषीतकिनां च "अग्निलोकमागच्छती"त्यादिना लोकशब्दानुविधानेनार्चिरादीनां पाठाल्लोकशब्दस्य च भोगस्थानेषु प्रसिद्धत्वादर्चिरादेरचेतनत्वाच्च भोगभूमय एवार्चिरादय इति प्राप्ते प्रतिब्रूमः । "आतिवाहिका" इति । अतिवाहे भवास्तत्र परमात्मना नियुक्ता आतिवाहिका देवताविशेषा एवैते भवितुमर्हन्ति । कुतः । "तल्लिङ्गात्" । उपसं-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हारे "स एतान् ब्रह्म गमयती"ति वैद्युतपुरुषस्य गन्तॄणां गमयितृत्वदर्शनात् पूर्वेषां चाविशेषनिर्दिष्टानां स एव संबन्धः। तेऽप्यमानवा इति निश्चीयते। अन्यथोपसंहारे प्राप्तमानवत्वनिवृत्त्यर्थममानव इति विशेषणं न प्रकल्पते। गन्तॄणां च सूक्ष्मशरीरपरिवेष्टितानां स्वातन्त्र्येण गमनानुपपत्तेः। उपपत्तौ वा विभूतिविस्ताराय परेण नीयमानत्वमुक्तम्। "अग्निलोक"-मित्यादिलोकशब्दोऽपि मध्ये भोगाभावाद्गमयितृत्व एवोपपद्यते ॥ ४ ॥

ननु वैद्युतादूर्ध्वं आ ब्रह्मप्राप्तेरमानवस्य गमयितृत्वं श्रुतं, न वरुणादीनाम्। अतः कथं तेषामातिवाहिकत्वमित्यत आह ॥

॥ *वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

ततो विद्युत उपरिष्टाद्वैद्युतेन विद्युल्लोकपर्यन्तागतेनैवामानवेनातिवाहिकेन ब्रह्मप्राप्त्यै विद्वान् नीयते। कुतः। "तच्छ्रुतेः"। "स एतान् ब्रह्म गमयती"ति तस्यैव गमयितृत्वश्रवणात्। "तान् वैद्युतान् पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयती"ति श्रुत्यन्तराच्चामानवो विद्युल्लोकमागतो वैद्युत उच्यते। वरुणादयस्तु साधु गम्यतामिति साहित्येनोपकारकाः। अतस्तेषामप्यातिवाहिकत्वमिति।

एतदुक्तं भवति। "विद्वान् देहादुत्क्रम्य मूर्धन्यनाड्या विनिःसृत्य रश्मीनारुह्य यदा गन्तुमिच्छति, तत्रार्चिषोऽभिमानिनातिवाहिकेन सन्मुखमेत्य निरतिशयसन्मानेनोपचारैः समभ्यर्च्यातिवाह्य दिनं नीतस्तेनापि पूर्वोक्तरीत्या शुक्लपक्षं नीतः, ततश्चोक्तरीत्या क्रमात् पक्षोत्तरायणसंवत्सराभिमानिभिर्वायुं देवलोकरूपं नीतस्तेनापि सन्मानेन समभ्यर्च्य स्वस्मिन् सूर्यमण्डलं भित्त्वा चन्द्रमसं, तेन विद्युल्लोकं तदभिमानिदेवताविशेषेण वरुणलोकं, तत इन्द्रलोकं, ततः प्रजापतिलोकं, ततः प्राकृतमण्डलं भित्त्वा परधामसीमानं सरिद्वरां विरजामेति। "स आगच्छति विरजां नदीं तां मनसैवात्येती"ति श्रुतेः। ततः सूक्ष्मशरीरं परदेवतायां हित्वा तत्रामानवान् पुरुषान् स्वस्यातिवाहनार्थमागतान् पश्यति, तैः सह संकल्पमात्रेण तां तीर्त्वा विष्णुलोकं प्रविश्य ब्रह्मभावमधिगच्छतीति यावत्। सन्ति चात्र संग्रहश्लोकाः।

"विद्वान् विनिष्क्रम्य सुषुम्णया तया
नाड्या समारुह्य सवितृरश्मीन् ।
ततश्च वह्निं प्रथमं प्रयाति
ततो दिनं पक्षमुपैति शुक्लम् ॥ १ ॥

तथोत्तरं प्राप्य बुधोऽयनं ततः
संवत्सरं देवनिवासवायुम् ।
सूर्यं च सोमं च ततश्च वैद्युतं
जलेशमिन्द्रं च ततः प्रजापतिम् ॥ २ ॥
स तच्च तचाखिललोकपालैः
समर्चितो याति समस्तलोकान् ।
अतीत्य देवैश्च समागतैरसौ
ह्यमानवैर्याति सरिद्वरां बुधः ॥ ३ ॥
विहाय लिङ्गं परदेवतायां
संकल्पमात्रेण तरेच्च तां नदीम् ।
ततोऽकृतं विग्रहमभ्युपेत्य
ह्यलंकृतो ब्रह्मसमेश्च भूषणैः ॥ ४ ॥
द्वाःस्थैः समागम्य परस्परं मुदा
ह्यलौकिकं स्थानमसौ प्रपश्यन् ।
समागतो भागवतैश्च मार्गे
समानशीलैर्भगवत्प्रपन्नैः ॥ ५ ॥
ततश्च पश्यन्मणिमण्डपेऽसौ
स्थूणासहस्रादिविराजमाने ।
दिव्ये महारत्नमये महात्मा
सिंहासनस्थं पुरुषोत्तमं हरिम् ॥ ६ ॥
लक्ष्म्यादियुक्तं परमेङ्गितार-
मादित्यवर्णं तमसः परात् परम् ।
सुनन्दमुख्यैश्च सुदर्शनादिभि-
र्नमस्कृतं स्वाञ्जलिसंपुटैश्च ॥ ७ ॥
सहस्रसूर्यादिप्रभातिरस्कर-
द्युभिः किरीटादिसमस्तभूषणैः ।
विभूषिताङ्गं जगतां पतिं गुरुं
वेदान्तवेद्यं दुहिणादिवन्द्यम् ॥ ८ ॥
मुक्तोपसृप्यं च मुमुक्षुमृग्यं
विश्वस्य हेतुं स्वजनैकजीवनम् ।
विज्ञानमानन्दमयस्वरूपं
स्वभावतोऽप्रास्तसमस्तहेयम् ॥ ९ ॥
समस्तकल्याणगुणाकरं प्रभुं
विज्ञानमूर्तिं परधामसंस्थम् ।
दृष्ट्वा मुकुन्दं भगवन्तमाद्यं
कृष्णं सदानन्दमयं वरेण्यम् ॥ १० ॥

* अतः प्राङ्मुद्रितशंकरभाष्ये "उभयव्यामोहात् तत्सिद्धेः" इति सूत्रमस्ति, तत् प्रामादिकमुचीयते, अत्रानङ्गीकारात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दूरान्नमस्कृत्य पदारविन्दयो-
र्नमो नमो भूय उदाहरन्मुदा ।
ततश्च कृष्णेन कृपार्द्रया दृशा-
वलोकितः श्रीमुखपङ्कजालिना ॥ ११ ॥
गिरा परानन्दनिदानभूतया
संभावितो याति हि ब्रह्मभावम् ।
पुनर्न संसारगतिं समेति वै
विमुक्तमायार्गल एष मुक्तः ॥ १२ ॥
प्रदर्शितेयं श्रुतिभिः परा गतिः
संक्षेपतो मन्दधियां हिताय ।
स्वसंप्रदायानुगुणा मयेरिता
श्रुतिस्मृतिन्यायप्रमाणसंचैः ॥ १३ ॥
यया गतो याति परेशभावं
हरेः पदं मुक्तसमस्तबन्धः ।
मुमुक्षुभिः सा परिशीलनीया
मुकुन्दपादाम्बुजगन्धलुब्धैः ॥ १४ ॥

इति ॥ ५ ॥

॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥

"अथ स एतान् ब्रह्म गमयती"ति श्रुत्यार्चिरादिना ब्रह्मप्राप्तिर्विधीयते, सा किं कार्यभूतहिरण्यगर्भब्रह्मविषयिका, उत परब्रह्मविषयिकेति संशये, किं युक्तम् । कार्यं ब्रह्मैवार्चिरादिर्गमयति । कुतः । अस्य कार्यब्रह्मण एव देवविशेषवर्तित्वेन तत्रैव गत्युपपत्तेर्गन्तृगन्तव्यत्वसंभवादिति बादरिराचार्यो मन्यते ॥ ६ ॥

॥ विशेषितत्वाच्च ॥ ७ ॥

"ब्रह्मलोकान् गमयति ते तेषु पराः परावन्तो वसन्ती"ति लोकशब्दबहुवचनाभ्यां तस्य विशेषितत्वाच्च ॥ ७ ॥

ननु नपुंसकब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वात् कथं कार्यब्रह्मोपस्थापकत्वम् । अन्यथा "स एतान् ब्रह्माणं गमयती"ति निर्देष्टव्यं स्यात् । अत आह ॥

॥ सामीप्यात् तु तद्व्यपदेशः ॥ ८ ॥

तुशब्दः शङ्काच्छेदार्थः । "यो ब्रह्माणं विदधाती"ति तस्य पूर्वजत्वेन परब्रह्मसामीप्याद्ब्रह्मत्वोक्तिः ॥ ८ ॥

ननु "नावर्तन्त" इति, "अमृतत्वमेती"ति, कथमस्यापुनरावृत्त्यादिश्रवणं संगच्छेत । कार्यब्रह्मगतस्य "आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिन" इति पुनरावृत्तिस्मरणात् । इति चेत् । तत्राह ॥

॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ९ ॥

चतुर्मुखप्राप्तावप्यपुनरावृत्तिर्नानुपपन्ना । कार्यस्य हिरण्यगर्भलोकस्यात्यये, महाप्रलये सतीत्यर्थः, तदध्यक्षेण चतुर्मुखेण विदुषा सह स्वयमपि तत्राधिगतविद्यः । अतः कार्यब्रह्मणश्चतुर्मुखात् परं मूलभूतं ब्रह्म प्राप्नोति । कुतः । "अभिधानात्" ।

"ते ब्रह्मलोके तु परन्तकाले परामृतात् परिमुच्यन्ति सर्वे" ।

इति ब्रह्मणा सह परप्राप्त्यभिधानात् ॥ ९ ॥

॥ स्मृतेश्च ॥ १० ॥

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" ॥

इति स्मरणाच्च तथावगम्यत इति पूर्वः पक्षः ॥ १० ॥

॥ परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥

जैमिनिराचार्यस्तु परं ब्रह्मैवार्चिरादिगणो विद्वांसं गमयतीति मन्यते स्म । कुतः । मुख्यत्वात् । "ब्रह्म गमयती"त्यत्र परं ब्रह्मैव ब्रह्मशब्दाभिधेयम् । तस्यैव शक्यत्वेन नपुंसकब्रह्मशब्दस्य तत्रैव वृत्तेः । अन्यथा गौणत्वप्रसङ्गः । "यत्परः शब्दः स शब्दार्थ"इति न्यायात् । शब्दप्रमाणकैः शब्दानां योऽर्थः प्रतीयते स गृहीतव्यः । गौणो लाक्षणिकश्च न शब्दनिमित्तः । प्रमाणान्तरापेक्षत्वात् ॥ ११ ॥

॥ दर्शनाच्च ॥ १२ ॥

"परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते," इति श्रुतौ परस्यैव प्राप्यत्वं स्पष्टं दृश्यते ॥ १२ ॥

ननु "प्रजापतेः सभां वेश्म प्रपद्ये" इति श्रुत्या कार्यब्रह्मपरत्वमेव पूर्वश्रुतस्य ब्रह्मशब्दस्येति चेत् । तत्राह ॥

॥ न च कार्ये प्रतिपत्त्यभिसंधिः ॥ १३ ॥

नायं कार्यब्रह्मविषयः प्रतिपत्त्यभिसंधिः संप्राप्तिसंकल्पः, किंतु परब्रह्मविषय एव । "नामरूपयोर्निर्वहिते"ति परस्यैवाधिकारात् । वाक्यशेषे "यशोऽहं संभवामि ब्राह्मणाना" मिति तस्याभिसंधातुः सर्वाविद्याविमोकसर्वात्मभावाभिसंधानात् । "अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवानी"त्यभिसंभाव्यमानस्य ब्रह्मलोकस्याकृतत्वश्रवणात् । सर्वबन्धविनिर्मुक्तिश्रवणाच्च परं ब्रह्मैव प्राप्यमर्चिरादिना गतस्येति । एतदुक्तं भवति । "स एतान् ब्रह्म गमयती"ति ब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वं, प्रमाणान्तरेण कार्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तम् ।

न च गत्यनुपपत्तिः प्रमाणम् । परब्रह्मणः सर्वगतत्वेऽपि विदुषो विशिष्टदेशगतस्यैव निःशेषाविद्यानिवृत्तिः शास्त्राद-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वगम्यते । यथा विद्योत्पत्तौ वर्णाश्रमादिधर्मापेक्षा विविदिषा । श्रुतेः । तथा निःशेषाविद्यानिवृत्तिरूपविद्यानिष्पत्तिरपि विशिष्टदेवगतिसापेक्षेति गतिश्रुतिभ्योऽवगम्यते ।

न च लोकशब्दबहुवचनाभ्यां विशेषणाभ्यां हिरण्यगर्भस्यैव प्रतीतिरिति वाच्यम् । "निषादस्थपति"न्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयसमासेनाविरोधात् । अर्थैक्यनिश्चये बहुवचनं प्रयुज्यते, तद्वत् ।

केचित् तु निर्गुणब्रह्मविदो हि गतिर्नोपपद्यते । ब्रह्मणः सर्वगतत्वात् । नहि प्राप्तमेव प्राप्यते, किंतु यः परिच्छिन्नो यामादिः स गत्वा प्राप्यते । तस्मात् सगुणब्रह्मविद एव सगुणासु विद्यासु गतिश्रुतिरित्याहुः । तदयुक्तमित्याहुरन्ये । असंभवात् । तथाहि, यदि निर्गुणायां गतिरनुपपन्ना, तर्हि सगुणास्वपि समानानुपपत्तिः । तत्रापि ब्रह्मैवोपास्यते । तस्यानेकत्वाभावात् । सर्वगतस्य ये गुणास्ते सर्वगता एव, यथाकाशस्य परममहत्त्वम् । यस्य हि संसारविनिवृत्तिहेतवोऽपहतपाप्मत्वादयो गुणाः स परमात्मोच्यते । यस्यैते न सन्ति स संसारी । सत्त्वादिगुणयोगात् । नहि सगुणं ब्रह्मोपास्यमानमब्रह्म भवति । तव निर्गुणं वस्तु विद्यते । न ह्याकाशप्रकाशादिप्रत्याख्यानेऽग्निर्नाम भवति । नापि द्रव्यप्रत्याख्याने गुणो नामास्ति । उभयात्मकं तद्वस्तु । "विज्ञानमानन्दं ब्रह्म," "आनन्दो ब्रह्मे"ति शतगुणोत्तरक्रमेणानन्दप्रतिपादनात् ।

यदि चैतन्यमात्रं ब्रह्म । आनन्दगुणोपदेशोऽनर्थकः स्यात् । न वाकस्मादर्थवादकल्पना युक्ता । यथाश्रुतार्थग्रहणे किं नामानुपपन्नम् । अस्थूलादिश्रुतिस्तु प्रपञ्चनिवारणपरा । अयं तु स एको ब्रह्मण आनन्द इत्यसाधारणगुण उत्कर्षापकर्षरहितो व्यपदिष्टः । यदि च श्रुतं नाद्रियतेऽपवर्गेऽप्यर्थवादः किंन स्यात् । अत एव सर्वज्ञत्वं सर्वशक्तित्वं सृष्टिकर्तृत्वमित्येते गुणाः परस्यासाधारणा न केनचित् प्रतिषेद्धुं शक्यन्त । गुणकृतं कार्यकृतं वा नानात्वं च दर्शितम् । तच्चास्माकं न दोषाय, प्रत्युतालंकारः । भिन्नाभिन्नात्मवस्तूपगमात् । अतः सगुणब्रह्मविदोऽपि गतिरनुपपन्ना । तद्भावापत्तेः । नहि प्राप्तमेव प्राप्यत इति त्वदुक्तेनैव हेतुना तथात्वे गत्यादिश्रुतयः कूपे प्रवेशयितव्याः ।

किंच, संसारिणोऽपि स्वरूपतो गतिर्नोपपद्यते । तस्यापि लिङ्गशरीरगमनादेव गमनम् ।

ननु च संसारी जीवो नाम परमात्माभासः, तत्परिच्छिन्नत्वाद्गतिरुपपद्यते । अत्रोच्यते । कोऽयमाभासो नाम । किं वस्तुभूतोऽथावस्तुभूत इति । यदि तावद्वस्तुभूतः । तस्य स्वर्गापवर्गयोरधिकाराभावः । शशविषाणवत् । अथ वस्तुभूतः । तत्राणुमध्यमपरिमाणत्वं च भवता नेष्यते । यच्चाणुत्वं, तदौपाधिकमित्यभ्युपगतम् । तथात्वे च लिङ्गशरीरस्यैव गतिर्न स्वरूपस्येति गतिश्रुतीनां बाध एव । स्वरूपेण जीवस्य गत्यनुपपत्तेः । शरीरस्यैव फलप्राप्तिप्रसङ्गाच्च । तच्चास्माभिरियं गतिः पठिता । अपितु श्रौतमानसिद्धा ।

नापि सगुणविद्यायामेव श्रुता, अपितु निर्गुणायामपि । "तद्वैतदिष्टापूर्तं कृतमित्युपासते, ते चन्द्रमसमेव लोकमभिजायन्ते, त एव पुनरावर्तन्ते, तयोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजायन्ते, एतद्वै प्राणानामायतनम्, एतदमृतमभयमेतत् परायणमेतस्माच्च पुनरावर्तन्ते," इति प्रश्ने । मुण्डके च, "सूर्यद्वारेण ते विरजाः प्रयान्ती"ति, ऐतरेयके च, "अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्वामृतः समभव"दित्यादिश्रवणात् । तथा च श्रुतिमुखेनैव सिद्धा विदुषां गतिरिति ।

ननु वाजसनेयके तेषामित्याह न पुनरावृत्तिरिति हेति विशेषणादिह कल्पेऽनावृत्तिः, कल्पान्तरे त्वावृत्तिः स्यादिति चेन्न । अनेवंभावात् । तथाहि, यथा राजसूये ब्रह्मणो यह्वे महिम्ना यह्व इत्येवमादिना द्वादशहवींषि विहितानि प्रत्येकं कर्तव्यानीति । तत्र "श्वोभूते निर्वपे"दित्युक्तम् । एकस्मिन् कृते पुनरपि श्वोभूत इत्युपतिष्ठते । "श्वोभूतवदनुवादा"दिति सूत्रात् । तद्वत्रापीह कल्पेऽनावृत्तिः कल्पान्तरेऽपि बोध्या । आकृतिनिर्देशस्य सर्वकल्पव्यापनात् ।

अपिच, इह युगेऽवान्तरे कल्पेऽन्यस्मिन् वेत्यनध्यवसानादाकृतिवादोऽयुक्तः । अर्थवादसंभवात् । यद्वैकत्ववद्वाक्यभेदात् सदानावृत्तिर्विधीयते । युगपत् सर्वकल्पानावृत्तिरेवावतिष्ठते । तत्रास्मिन्नेव कल्पे न कल्पान्तर इत्यपरस्मिन्नर्थे विद्यमाने वाक्यभेदो दुर्निवारः । यथा "यद्वै संमार्ष्टी"ति संमार्गे विधीयमाने सर्वयहेषु प्राप्तिः । तत्रैकमिति पुनर्विधीयमाने वाक्यभेदः । तथा प्रकृतेऽपि बोध्यम् ।

किंच, अमुत्रानावृत्तिर्न विधीयते । तदानीमिहे"ति पदं किंविशेषणं स्यात् । तस्मादिहपदमनुवादः । अत एव काण्वानामिहपदं न पठ्यते ।

तस्मादर्चिरादिना गत्वा परमात्मनि लिङ्गप्रलयो न प्रागिति गतिश्रुतिसामर्थ्याच्चीयते । "परेऽव्यये सर्वे एकीभवन्ती"ति, "पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती"ति श्रुतिभ्य, इत्यादिना । तदपि न रमणीयम् । स्वोक्तिविरोधात् । तन्मतेऽपि न तावद्भेदः स्वाभाविकः, किं त्वौपाधिक एव । मोक्षे भेदानङ्गीकारात् । तथात्वे चोपाधेरेव गत्यादिसिद्धेर्न स्वरूपस्य । तथैव मोक्षोऽपि विरुद्धः । स च पूर्वमेव विस्तृतः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सिद्धान्ते तु भेदस्यापि स्वाभाविकत्वेनाणुपरिमाणस्य च श्रुतिमानसिद्धत्वेन पारमार्थिकत्वाद्बन्धमोक्षयोरुत्क्रान्तिगत्यागतीनां च सामञ्जस्यम् । विरोधाभावात् । अपुनरावृत्तिरपि त्रिविधकर्मणो निःशेषनाशेन जन्मकारणाभावादेव । निष्कारणमेव पुनरावृत्त्यङ्गीकारे मुक्तस्य पुनः संसारापत्तिस्तवापि समाना ।

नच तस्यापि कर्मशेषोऽङ्गीकार्य इति वाच्यम् । प्रमाणाभावात् ।

"तच्च प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः" ।

इत्यर्चिरादिना गतस्य ब्रह्मप्राप्तिविधानादित्यलं प्रासङ्गिकेन ॥ १३ ॥

एवं पक्षद्वयं दर्शयित्वा स्वमतेन निर्णयमाह ॥

॥ अप्रतीकालम्बनान्नयतीति बादरायणः
उभयथा दोषात् तत्क्रतुश्च ॥ १४ ॥

ये "नाम ब्रह्मेत्युपासते" त्यादिश्रुत्युक्तनामादिप्रतीकं ब्रह्मदृष्ट्योपासते, प्रतीकालम्बनांस्तान् वर्जयित्वा ये परं ब्रह्मोपासीना ये च पञ्चाग्निविद्यावन्तः प्रकृतिवियुक्तं प्रत्यगात्मस्वरूपं ब्रह्मात्मकत्वेनोपासीनास्तानुभयविधानमानवः पुरुषः परं ब्रह्म नयतीति भगवान् बादरायणो मन्यते स्म । कुतः । उभयथा दोषात् । तत्र कार्योपासकान् नयतीति पक्षे "एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इत्याद्याः श्रुतयो विरुध्येरन् । परं ब्रह्मोपासीनानेव नयतीति पक्षे "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ती"ति पञ्चाग्निविदामप्यर्चिरादिगतिविधायकश्रुतिगणो विरुध्येत । अत उभयस्मिन् पक्षे दोष इत्यर्थः । तस्मादुक्तलक्षणोभयविधान् नयतीत्याह । "तत्क्रतुश्चे"ति । यथोपासीनस्तथैव प्राप्नोति । परमात्मक्रतुः परमात्मानं प्रतिपद्यते । परमात्मात्मकतया प्रकृतिवियुक्तप्रत्यगात्मक्रतुस्तादृशस्वरूपप्राप्तिपूर्वकपरमात्मानं प्रतिपद्यते । "यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति तं यथा यथोपासते तदेव भवती"त्यादिश्रुतेः पञ्चाग्निविद्यावतामप्यर्चिरादिगतिविधानादर्चिरादिना गतस्य परब्रह्मप्राप्त्यपुनरावृत्तिविधानाच्च तत्क्रतुन्यायेन प्रकृतिवियुक्तब्रह्मात्मकात्मस्वरूपोपासनं सिद्धम् ।

ननु प्रतीकालम्बनोपासनास्वपि ब्रह्मोपासनस्य सत्त्वात् कथमर्चिरादिगत्यभाव इति चेन्न । तत्र तत्क्रतुविरहात् । नामादिप्राणपर्यन्तप्रतीकोपासनासु प्रतीकस्यैव प्राधान्येन, ब्रह्मणस्तु विशेषणत्वाच्च तेषां ब्रह्मोपासकत्वम् । अतो नार्चिरादिना गतिर्ब्रह्मप्राप्तिश्च संपद्यते ॥ १४ ॥

॥ विशेषं च दर्शयति ॥ १५ ॥

न प्रतीकेषु ब्रह्मोपासनमस्तीत्युक्तम् । श्रुतिरपि "यावन्नाम्नो गतं तत्रास्य कामचारो भवति नाम्नो भूयसी यावद्वाचो गतं तत्रास्य कामचारो भवती"त्यादिका नामादिप्रतीकोपासनस्य गतिनिरपेक्षं परिमितं च फलमुपासनतारतम्यं च दर्शयति । तस्मात् प्रतीकोपासकभिन्नान् पूर्वोक्तोभयविधान् विदुषोऽमानवः पुरुषः परं ब्रह्म नयतीति गतिश्रुतिभिस्तेषामेव गतिरपुनरावृत्तिश्च संपद्यत इति सिद्धान्तः ।

एवं च "ब्रह्मणा सह ते सर्वे" इति वचनं नार्चिरादिना गतानां गतिप्रकारविषयम् । अर्चिरादिना गतानां देहावसानसमय एव पुण्यापुण्ययोर्नाशात् । चतुर्मुखलोकप्राप्तितद्वासतत्रत्यभोगानुभवहेत्वभावात् । तत्क्रतुन्यायविरोधात् । तदानीमेव ब्रह्मप्राप्तिश्रुतिविरोधाच्च । तद्वचनं तु पुण्यकर्मविशेषेण सत्यलोकं प्राप्तानां "तदुपर्यपि बादरायणः संभवा"दिति न्यायेन तत्रैव निष्पन्नविद्यानां गतिप्रकारविषयम् । "ते ब्रह्मलोके तु परान्तकाले", इति तु वाक्यं ब्रह्मलोकशब्दस्य कर्मधारयसमासेन ब्रह्मविषयमेव । ब्रह्मण्युपास्ये वर्तमानाः परान्तकाले चरमदेहावसानसमये परामृतात् परस्माद्ब्रह्मण उपासनप्रोताद्धेतोः परिमुच्यन्ति, सर्वेऽस्माद्बन्धाद्विमुच्यन्ते, इति "वेदान्तविज्ञानसुनिश्चितार्था" इति प्रकरणादवगम्यते । एतद्रायहमाश्रित्य सगुणनिर्गुणतया ब्रह्मभेदं वदन्तो निर्गुणब्रह्मविदो गत्यनुपपत्तिं, सगुणब्रह्मविदश्च गत्या कार्यब्रह्मप्राप्तिमभ्युपगच्छन्ति,त उपेक्षणीयाः । बादरिपक्षान्तःपातित्वात् । सूत्रकारपक्षविरोधात् । श्रुतिहीनत्वाच्च । नहि ब्रह्मभेदे कार्यब्रह्मप्राप्तौ च श्रुतिरुपलभ्यत इति भावः ॥ १५ ॥

इति श्रीसनकसप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य तृतीयपादविवृतिः समाप्तिमगात् ॥ ३ ॥ :: ::

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्कलेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिका ।

तत्र सप्रपञ्चितमादिपरिच्छेदाः ।

६७—अथ द्वादश आक्षेपः । नन्वेतावता प्राचीनविद्वद्वर्णितस्य चलनयोग्यस्य घनस्य रूपपरिमाणाकारादिमत आत्मनो बहिर्भूतस्य जडद्रव्यापरपर्यायस्याधिकरणविशेषस्यासंभवे सिद्धेऽपि यदि जडद्रव्यपदेन रूपादिसकलगुणरहितमात्मबहिर्भूतं निश्चलमचेतनमधिकरणमात्रं विवक्ष्येत, तत्समवधान-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एव वेश्वरस्यास्मासु ज्ञानजनकत्वमित्युच्येत चेत्तर्हीदृशस्य ज्ञाननिमित्तस्याधिकरणस्य नास्त्यसंभवइति चेत्। अधिकरणमन्तराऽऽधेयभूतानां गुणानामिव निखिलगुणरहितस्याधिकरणस्यापि बाधितत्वात्। एवंविधदुर्ज्ञेयाधिकरणस्यापि संभवो मन्येत चेत्तर्हि क्व तावत्तत्सत्ता प्रकल्प्यताम्। आत्मनि तदभावस्तु तवापि संमतः। नापि यस्मिन् कस्मिन्नपि प्रदेशे तत्संभवः संभवति। सर्वस्यापि प्रदेशस्यात्ममात्रनिष्ठत्वस्यैव दृष्टत्वात्। एवंच न क्वापि तत्सत्ता संभवतीति पर्यवस्यति॥

६८—किंच जडद्रव्यमित्युक्तिसंभवोपि न संघटते। तथा हि। निश्चलमचेतनमज्ञेयमधिकरणमिति नानानिषेधघटिततल्लक्षणस्यैर्निश्चलादिपदैर्निष्क्रियमज्ञातृ प्रत्यक्षागोचरं तथाऽधिकरणपदेन पदार्थान्तरसंबन्धाश्रितं च किंचिदनिर्वाच्यं लक्ष्यं लक्ष्यते। परंत्वेतच्च किमपि धारयतीत्युक्तत्वादुक्तलक्षणस्य सर्वथालीकवस्तुलक्षकत्वं तावद् द्रष्टव्यम्। यच्चैतज्ज्ञाननिमित्तं यत्समवधानएवेश्वरोऽस्मासु प्रत्यक्षज्ञानान्युत्पादयतीत्युच्यते तदप्ययुक्तम्। अतीन्द्रियस्य बुद्ध्याप्यग्राह्यस्य जडतयाऽऽत्मसु ज्ञानजननानुभवस्य सर्वविधपरिमाणशून्यस्य नीरूपस्य कस्मिन्नपि स्थानेऽस्थितस्य तस्य समवधानस्यैवासंभवात्। समवधानं नामोपस्थानं सामीप्यमिति यावत्। यदि च तत्पदं किंचिद्विलक्षणार्थान्तरबोधतात्पर्येणैव प्रयुञ्जीथास्तर्हि न कोपि तादृशार्थमवगन्तुं शक्नुयात्।

६९—किंच लोकव्यवहारे निमित्तपदं कार्यजनकं कर्तारं, कार्यसहचरितत्वेन कार्यनियतपूर्ववृत्तित्वेन वा प्रसिद्धं पदार्थं च ह। त्वदुक्तं जडद्रव्यस्य निमित्तत्वं तु निरुक्तविधानां निमित्तानां न कतमस्मिन्नप्यन्तर्भवति। तस्य जडत्वेन कार्यजनकत्व संभवात्। अङ्गुलिदाहो दुःखनिमित्तमित्यादौ प्रसिद्धस्य दुःखनिमित्तस्याङ्गुलिदहनस्येव तस्य कार्यसाहचर्यकार्यनियतपूर्ववृत्तित्वयोरप्यभावाच्च। निखिलज्ञेयगुणराहित्येन तस्याऽज्ञेयतया कार्यसाहचर्यादिनाऽदर्शनात्। एवं च निमित्तपदस्य गगनकुसुमायमानाप्रसिद्धार्थान्तरकल्पनामन्तरेण जडाधिकरणस्य ज्ञाननिमित्तत्वं न संघटते।

७०—ननु जडद्रव्याणामस्मदादिदृष्टाऽदृश्यत्वेपि परमेश्वरस्य सर्वज्ञतया तत्रादृष्टत्वं न संभवति। तस्य तानि निमित्तीकृत्य ज्ञानजनकत्वं तु सूपपादम्। युक्तं चैतत्। कतिपयनिमित्तानि विना सुनियताव्यभिचारक्रमेणास्मासु प्रत्यक्षज्ञानोदयस्यानुपपत्तेः। तथा चायं निष्कर्षः। तत्तत्प्रत्यक्षज्ञानानुगुणाः सुनियता भिवभिचा जडद्रव्यपुञ्जा एव। ते च जडत्वादस्मदाद्यज्ञेयत्वाच्च साक्षाज्ज्ञानानि जनयितुं न शक्नुवन्ते। परमेश्वरस्तु तान्यश्यंस्तद्दर्शनेनैव तेषुतेषु कालेषु तांस्तान्मनुष्यात्मसूत्पादनीयान्त्समुचितज्ञानविशेषान्त्स्मरति येनैव च लौकिका विषयाः सुस्थिराव्यभिचारिक्रमेण प्रवर्तन्ते। एवं च जडद्रव्याणां पारम्परिकं ज्ञाननिमित्तत्वमापद्यतइति चेत्।

७१—अत्रोच्यते। निरुक्तजडद्रव्यपदार्थवर्णनानुसारी त्वदाक्षेपो हि न तावज्ज्ञातृज्ञेययोरात्मज्ञानयोरतिरिक्ताः केपि पदार्थाः सन्तीत्यात्मकः किं त्वचिन्त्यरूपाणि परमात्ममात्रनिष्ठानि मनुष्याद्यात्मसु क्रमिकप्रत्यक्षज्ञानपरम्पराजनने परमेश्वरप्रवर्तकान्यत एव ज्ञाननिमित्तानि ज्ञानान्तराणि सन्तीत्यादिरूप एव। तत्र यथा कोपि वाद्यवादकः स्ववादित्रतन्त्रीभिस्तांस्तान्तत्तालान् रागविशेषान् जनयति। यथा च तादृशसंगीतश्रोतुस्तत्रत्यतन्त्रीणामदर्शने सर्वथाऽज्ञानेऽपि तासां तन्त्रीणां संगीतनिमित्तत्वं निर्बाधमित्यादि दृष्टान्तैरीश्वरस्य तादृशाऽचिन्त्यज्ञानद्वारा प्रत्यक्षज्ञानोत्पादकत्वं मत्वा तादृशज्ञानापरपर्यायत्वेन चिन्तितानां जडद्रव्याणां प्रसिद्धज्ञाननिमित्तत्वं मन्यसे चेत्सुखेन मन्यस्व न कापि नो हानिः। न पुनस्तत्खण्डनेऽपि प्रवर्तामहे। तेषां स्वीकारेऽपि पुरा खण्डितस्याचेतनाज्ञेयजडाधिकरणस्यासिद्धेः।

केशवशास्त्री

SÁNKHYATATTVAPRADÍPA

OR

THE PRINCIPLES OF

THE SÁNKHYA PHILOSOPHY.

(Continued from page 44.)

[1] The evidences by which these objects (of true knowledge) are established have been admitted by the authorities of Sankhya to be of three kinds, namely Perception, Inference and Testimony—or words of an authority. Other proofs asserted by some disputants are included under these three. It is thus said in the Sánkhya Káriká "all evidences being established" that is all proofs of other kinds accepted by some opponents, being included under these three.

[2] It may now be objected that in accordance with the invariable concomitance, whatever (object) can-

---

१ उक्तप्रमेयसाधकं त्रिविधमप्रमाणमुररीकृतं साङ्ख्याचार्यैः प्रत्यक्षमनुमानमाप्तवचनञ्चेति॥ अन्यवाद्यङ्गीकृतानामप्रमाणानामेतेष्वेव त्रिष्वन्तर्भावः। उक्तञ्च सर्वप्रमाणसिद्धत्वादिति सर्वेषां वाद्यन्तराभ्युपगतानामप्रमाणानां सिद्धत्वात् त्रिष्वेवान्तर्भावादित्यर्थः॥

२ ननु यत्र यत्र प्रत्यक्षमप्रवर्तमानं तदत्यन्ताऽसदिति व्याप्तिः सुप्रसिद्धा शशशृङ्गकूर्मलोमादावेवं प्रधानस्यापि प्रत्यक्षासिद्धत्वात्तदत्यन्ताऽसत्वमेव युक्तङ्गगनकुसुमादीनामिवेति चेत्। नहि यत्प्रत्यक्षागोचरं तदत्यन्तन्ता सदिति व्याप्तियुक्ता युक्तो ऽन्यथा गृहाबिर्गतस्य गृहधनपुत्रपशुयनितादीन् सुखसाधनभूतानपश्यतस्तत्राऽनिश्चयजदुःखविप्लुष्टान्तःकरणस्य रुदतो मरणं स्यात्,। नत्वेवमस्ति॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

not be cognized by perception is a non-entity, which is truly observed in the cases of the horns of a hare, the hair of a tortoise and other unreal things, Nature —Primal Agency, also, as it is not-cognized by perception is a non-existent thing, like the flower of the sky &c. We reject this objection, because the above rule "whatever is not perceived is a non-entity" is not universally right. For otherwise a person who gose out of his house would weep to death, with the griefs of his heart, which he would then feel in consequence of his not perceiving his dwellings, his wealth, his son, his cattle, and his wife, and being therefore sure of the destruction of all these and other means of his enjoyment. But such is not the case with Nature.

'Moreover do you mean to assert that the cause of existence [of a thing] or in other words the reason for accepting a thing as existent is its being an object of all perceptions or of a particular one? The former alternative is not maintainable, inasmuch as the objects lying in different houses, different places and countries, or existing in different times cannot be cognized by perception other than that of an ascetic; or otherwise all persons would be omniscient, because without omnisciency it is impossible to ascertain whether or not all things are perceived by all individuals, inasmuch as the cognition of one person is not perceivable by others; the doubt, therefore (regarding the existence of all objects) would not be removed. The latter alternative also is inadmissible, for it comprises an inconsistency. For instance, the existence of a gayal, seen by a wild man, could not properly be denied by a citizen, merely because he did not see it personally. The following assertion of the author of the Lílávatí is confirmatory of the above: [the objection of] "non-perception by all, involving a doubt, and [that of an object] being non-perceived by a particular person himself being liable to non-coextensiveness." The fore-mentioned rule should therefore be thus modified, whatever thing is not cognized by a perception void of all of its hindrances, that is indeed absolutely non-existent, and not merely that which is imperceptible: for otherwise, Soul, Nature, Understanding, paradise, and destiny or impressions produced by merit and demerit [done in the former birth] deities, and other supersensible things, would be absolutely non-existent.

'The hindrances of Perception are:—Remoteness hinders a bird, flying in the air, from being perceived; proximity is obstruction to the perception of the collyrium in the eyes; destruction of the organs of sense is a hindrance to perception, for instance blindness and deafness, and the like prevent a colour and sound &c., from being perceived; perception of an object is also prevented by a strong desire, or by someother passion predominating in the mind, because a person who is eagerly desiring for or attentive to a different object does not perceive a thing, though connected with his organ of sense even in the clear light; Subtility is preventive of the perception of atoms and the like; intervention likewise is an opposition to perception, inasmuch as the perception of an object well seen and ascertained as existing near is obstructed by the interposition of the hand; overwhelming also obstructs perception, for instance the organ of sight overpowered by the solar rays loses its power of seeing the stars and planets, mingling together often opposes perception, hence the drops of rain falling from the cloud cannot be discerned by the eyes when mingled with the water of a lake &c; non-appearance or imperceptibility also prevents some objects from being perceived; as it is observed in the cases of curd and butter when in the states of milk and curd. Therefore the object which is not perceived, and the existence whereof is established by some stronger evidence, should be held as prevented from being perceived by one of these obstructive causes. As it is said by the author of Sánkhya Káriká. "The non-perception thereof [that is of Nature, Soul, and the like] is caused by remoteness, proximity, destruction of the organ of sense, disturbance of the mind, subtility, interposition, overwhelming, and mingling together; but not from its being a non-existent."

---

१ किञ्च सर्वप्रत्यक्षविषयत्वं सत्वे हेतुः किञ्चित्प्रत्यक्षविषयत्वं वा। नाद्यः। नहि गृहान्तरदेशान्तरकालान्तरगतं वस्तु केनाप्ययोगिना प्रत्यक्षेण विषयीकर्तुं शक्यमन्यथा सर्वं एव सर्वज्ञः स्यात् परबुद्धेरप्रत्यक्षतया सर्वैः सर्वं प्रत्यक्षेण गृह्यते न वेति संशयानिवृत्तेः। नापि चरमो व्यभिचारात्। नहि नगरस्थेन स्वेनानुपलब्धो गवय एतावतैवारण्यकोपलब्धस्य तस्यापलापसंभवः। उक्तञ्च लीलावतीकारेण सर्वादृष्टेश्च संदेहात् स्वादृष्टेर्व्यभिचारत इति। तस्मात्प्रत्यक्षप्रवृत्तिप्रतिकूलाभावविशिष्टं प्रत्यक्षं यत्र न प्रवर्त्तते तदत्यन्तासदिति निश्चेतुं शक्यं नतु प्रत्यक्षाप्रवृत्तिमात्रात्मिकमप्यसदिति। अन्यथा पुरुषप्रधानमहत्स्वर्गापूर्वदेवताद्दीनामतीन्द्रियाणामत्यन्ताभावः स्यात्॥

१ प्रत्यक्षप्रतिबन्धकास्तु विप्रकर्षति गच्छतः पतत्रिणो ग्रहणेऽतिदूरत्वम्। नेत्रगतकज्जलग्रहणेऽति सामीप्यमेवं रूपशब्दादिग्रहणे श्राव्यवधिरत्वादयः तथा विषयग्रहणे मनसः कामाद्यभिव्याप्तिर्यथा कामाद्यभिव्याप्तमनास्कीतालोकमध्यवर्तिनमिन्द्रियसन्निकृष्टमप्यर्थं न पश्यति। परमाणवादिविषयतायां सौक्ष्म्यमेव प्रतिकूलं। सन्निपत्तपदार्थग्रहणे हस्तादिव्यवधानम्। क्वचिदभिभवोऽपि प्रतिबन्धको यथा ग्रहनि सौरीभिर्भाभिरभिभूतं चतुर्नक्षत्रग्रहादिग्रहेसमये भवति। क्वचित्समानाभिहारप्रातिकूल्यं यथा जलाशयेभ्युद्विमुक्तजलबिन्दुग्रहणे नेत्रासामर्थ्यम्। क्वचिदनुद्भवो यथा क्षीरदध्याद्यवस्थायां दधिघृतादिविवेचनाऽसामर्थ्यम्। एवं सति दृढतरप्रमाणान्तरप्रसिद्धे वस्तुनि प्रत्यक्षाप्रवृत्तावेतदन्यतमः प्रतिबन्धकः कल्प्यते नतु तदभावादेवाप्रवृत्तिरिति। उक्तञ्च साङ्ख्यमूलकारेण सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

[1][As Nature is not perceived but inferred] It might now be objected: the objects knowable by inference are such as have been already known by perception and again are doubtful, but Nature being not like such should be held as non-existent. This objection is untenable. Inasmuch as all disputants agree as to every effect presupposing a cause, the intellect and other effects also their exesitence being otherwise impossible must have a cause, which cannot be other than Nature, therefore the non-existence of Nature is but a falsehood.

[2]It may be now urged: Admitting that the production of the intellect and other effects being impossible otherwise, there must exist a cause of these, but it might be the cause established by some other system and not the Nature which is asserted by yourself. To this we reply that on the examination of the various systems, the doctrine asserted in the aphorisms of Kapila—i. e. in the Sánkhya Philosophy, which establishes Nature as the Primal agency is reasonable; the others being false doctrines or mere semblances of doctrines are invalid. For instance the original cause established by the doctrine of Buddha:—the existent is produced from the non-existent "which is contradictory to the doctrine of Sánkhya "the existent is produced from the existent," is not worthy of being asserted by learned persons, because causation between an existent and a non-existentis impossible; moreover how can the non-existent i.e. unreal cause be identical with [the effects such as] sound and the like, which are but modified states of Purity [Sattva] Passion and Darkness, for an identity is not found between an entity and a non-entity. The fact that every product is intimately and constantly united with its cause is well observed in the cases of thread and cloth, and the like, [therefore if a non-entity were the cause of all things] every speaker would talk of the cloth &c., as constantly connected with an unreality, and say the non-existing cloth or the non-existing jar—or it is not a cloth or not a jar [instead of saying the existing cloth or the existing jar, or there is the cloth, or the jar]; and there would be no notion of the constant relation of an object with the reality, in the shape of it as a real thing.

G. D.

१ ननु क्वचित्प्रत्यक्षप्रसिद्धस्य क्वचित्सन्देहादनुमानविषयता न त्वस्य तदस्तीत्यभाव एव युक्त इति चेत्र कारणं हि कार्य्यानुमापकं भवतीति सर्ववाद्यभिमतं तथा च महदादि कार्य्यान्यथा ऽनुपपत्त्यैव प्रधानसिद्धिरिति न तदभावो युक्तः ॥

२ ननु कार्य्यान्यथानुपपत्त्या कारणसिद्धौ तंत्रान्तराभिमतकारणं सेत्स्यति नतु त्वदभिमतप्रधानसिद्धिरिति चेत्र मतपर्य्यालोचनेन यन्मतं कपिलसूत्रनिबद्धं प्रधानसाधनानुगुणं तदेव युक्तिसहमन्यत्तु बाह्यमतवन्मताभासत्वाद्वाध्यमेव। तद्यथा। असतः सज्जायत इति बौद्धमतेन प्रधानसिद्धिः सतः सज्जायत इति साङ्ख्यमतविरुद्धत्वाच्च पण्डितमुखमण्डनायालं सदसतोः कार्य्यकारणभावासंभवात् किञ्च असदेवेकं कारणं सत्त्वादिरूपशब्दाद्यात्मकञ्च स्यात् सदसतोस्तादात्म्यादर्शनात् कार्य्ये हि कारणसमवेतं तन्तुपटादिस्थलेषु सुप्रसिद्धं तथाच घटो ऽसन् घटो ऽसच्चित्यसत्समवेतं सर्वो व्यवहर्त्ता व्यवहारेचतु सदिदमिति सत्तावैचित्र्येण प्रतीतिः स्यात् ॥

॥ यजुर्वेदः, भाष्यानुवाद्याभ्यां समेतः ॥

(अत्युत्कृष्टकागजादिभिः स्वराङ्काद्यैश्चातियत्नतो मुद्रयणीयः)

इतः शौरश्रावणमासादेवास्माभिः प्रतिमासमेकैकखण्डः प्रचार्यः लघु-'फुलिस्कप्'-आकारीयाष्टचत्वारिंशत्पृष्ठात्मकः। तत्र, मूलं पुस्तकाकारेण, टीकातु तयैवोद्वोधेभागयोरनुवाद-स्तु पृथगंशः प्रतिपृष्ठं स्तम्भद्वयानुसारतः स्यास्यति।

मूल्यम्—प्रतिखण्डस्य १) प्रेरणव्ययस्त्वस्माकं
प्रतिद्वादशखण्डात्मिकम्१०) न तु क्रेतृणाम्।

'प्रत्न-कम्र-नन्दिनी'- याहकैस्त्वर्द्धमूल्येनैव प्राप्तव्यमिति शम्॥

कलिकाता-सत्ययन्त्रालयः
१० नं गोवागानष्ट्रीट्।) श्रीसत्यव्रतसामश्रमी।

List of books printed and published and for sale by E. J. Lazarus and Co., at the Medical Hall Press, Benares.

ATMA PURAṆA, containing all the principles of Vedántism by ŚANKARÁNAND, with commentary by *Kákárám Pandit.* Rs. 16-0. Published at Ganpat Krishanaji's, Bombay.

THE LAGHU KAUMUDI, a Sanskrit grammar with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College Benares. *Price* 8 *Rs.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHRA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares. Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

VAISESHIKHA APHORISMS OF KAṆADA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADEŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNAVA DHARMA PRAKÁS ARTHAT MANUSMRITI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230, Price, Rs. 5-0-0.

SIDDHANTA KAUMUDI VYÁKARAṆ, 8vo demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 100. Benares, September 1st, 1874. Vol. IX.

काशिकायाः

द्वितीयाध्यायस्य द्वितीयः पादः ।

पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ॥ १ ॥

एकदेशो ऽस्यास्तीत्येकदेशी अवयवी, तद्वाचिना सुबन्तेन सह पूर्वापराधरोत्तरशब्दाः सामर्थ्यादेकदेशवचनाः समस्यन्ते, तत्पुरुषश्च समासो भवति । एकाधिकरणग्रहणमेकदेशिनो विशेषणम्, एकं चेदधिकरणमेकद्रव्यमेकदेशि भवति । षष्ठीसमासापवादोयं योगः । पूर्वं कायस्य, पूर्वकायः । अपरकायः । अधरकायः । उत्तरकायः । एकदेशिनेति किम् । पूर्वं नाभेः कायस्य* । एकाधिकरणइति किम् । पूर्वं छात्राणामामन्त्रय । कथं मध्याह्नः सायाह्न इति । संख्याविसायपूर्वेस्याह्नस्येति ज्ञापकात्सर्वैकदेशशब्देनाह्नः समासो भवति ॥

अर्द्धं नपुंसकम् ॥ २ ॥

एकदेशिनैकाधिकरणे इति वर्त्तते । समप्रविभागे ऽर्धशब्दो नपुंसकमाविष्टलिङ्गस्तस्येदं ग्रहणम् । अर्द्धमित्येतद् नपुंसकमेकदेशिनैकाधिकरणेन समस्यते, तत्पुरुषश्च समासो भवति । षष्ठीसमासापवादोयं योगः । अर्द्धं पिप्पल्याः, अर्द्धपिप्पली । अर्द्धकोशातकी । नपुंसकमिति किम् । यामार्द्धः । नगरार्द्धः । एकदेशिनेत्येव । अर्द्धं पशोर्देवदत्तस्य । देवदत्तेन सह समासो न भवति । एकाधिकरणइत्येव । अर्द्धं पिप्पलीनाम् ॥

* अत्र 'नाभिशब्देन सह समासो न भवति' । इति पुस्तकान्तरे ऽधिकम् ।

द्वितीयतृतीयचतुर्थतुर्यांण्यन्यतरस्याम् ॥ ३ ॥

एकदेशिनैकाधिकरणइति वर्तते । षष्ठीसमासापवादोयं योगः । अन्यतरस्यांग्रहणात् सोपि भवति । पूरणेति प्रतिषेधश्चात एवान्यतरस्यांग्रहणसामर्थ्याच्च प्रवर्त्तते । द्वितीयादीनि शब्दरूपाणि एकदेशिनैकाधिकरणेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । द्वितीयं भिक्षायाः, द्वितीयभिक्षा । षष्ठीसमासपक्षे भिक्षाद्वितीयं वा । तृतीयं भिक्षायाः, तृतीयभिक्षा । भिक्षातृतीयं वा । चतुर्थं भिक्षायाः, चतुर्थभिक्षा । भिक्षाचतुर्थं वा । तुर्यं भिक्षायाः, तुर्यभिक्षा । भिक्षातुर्यं वा । तुरीयशब्दस्यापीष्यते ॥ तुरीयं भिक्षायाः, तुरीयभिक्षा । भिक्षातुरीयं वा* । एकदेशिनेत्येव । द्वितीयं भिक्षाया भिक्षुकस्य । एकाधिकरणइत्येव । द्वितीयं भिक्षाणाम् ॥

प्राप्तापन्ने च द्वितीयया ॥ ४ ॥

एकदेशिनैकाधिकरणइति निवृत्तम् । द्वितीयासमासे प्राप्ते वचनमिदम् । विधानसामर्थ्यात्सोपि भवति । प्राप्त आपन्न इत्येतौ द्वितीयान्तेन सह समस्येते, तत्पुरुषश्च समासो भवति । प्राप्तो जीविकां, प्राप्तजीविकः । जीविकाप्राप्त इति वा । आपन्नो जीविकाम्, । आपन्नजीविकः । जीविकापन्न इति वा ॥

कालाः परिमाणिना ॥ ५ ॥

परिमाणमस्यास्तीति परिमाणी तद्वाचिना सुबन्तेन सह सामर्थ्यात्परिमाणवचनाः कालशब्दाः समस्यन्ते, तत्पुरुषश्च

* तुरीयशब्दस्येत्यारभ्य भिक्षातुरीयं वेत्यन्तः पाठो बहुषु पुस्तकेषु नोपलभ्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समासो भवति । षष्ठीसमासविषये योगारम्भः *। मासो जातस्य, मासजातः । संवत्सरजातः । ह्यहजातः । अहजातः ॥

नञ् ॥ ६ ॥

नञ समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । न ब्राह्मणो, ऽब्राह्मणः । अवृषलः ॥ नञो नलोपस्तिङि लेपे ॥ * ॥ अपचसि त्वं जाल्म† ॥

ईषदकृता ॥ ७ ॥

ईषदित्ययं शब्दो ऽकृदन्तेन सुपा सह समस्यते, तत्पुरुषश्च समासो भवति ॥ ईषदुणवचनेनेति वक्तव्यम् ॥ * ॥ ईषत्कडारः । ईषत्पिङ्गलः । ईषद्विकटः । ईषदुचतः । ईषत्पीतम् । ईषद्रक्तम्‡ । गुणवचनेनेति किम् । इह न भवति । ईषद्राग्र्यः ॥

षष्ठी ॥ ८ ॥

षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । राज्ञः पुरुषो, राजपुरुषः । ब्राह्मण कम्बलः ॥ क्रियोगा च षष्ठी समस्यतइति वक्तव्यम् ॥ * ॥ दध्नप्रव्रश्चनः । पलाशशातनः । किमर्थमिदमुच्यते । 'प्रतिपदविधाना षष्ठी न समस्यते' इति वक्ष्यति, तस्यायं पुरस्तादपकर्षः ॥

याजकादिभिश्च ॥ ९ ॥

पूर्वेण समासः सिद्ध एव तस्य कर्त्तरि चेति प्रतिषेधे प्राप्ते वचनमिदमारभ्यते प्रतिप्रसवार्थम् । याजकादिभिः सह षष्ठी समस्यते, तत्पुरुषश्च समासो भवति । ब्राह्मणयाजकः । क्षत्रिययाजकः । याजक । पूजक । परिचारक । परिषेचक§ । खातक । अध्यापक । उत्सादक । उद्वर्त्तक‖ । होतृ । पोतृ । हर्तृ । भर्तृ । रथगणक । पत्तिगणक ॥ तत्स्थैश्च गुणैः षष्ठी समस्यतइति वक्तव्यम् ॥ * ॥ चन्दनगन्धः । कपित्थरसः ॥ गुणान्तरेण तरनोपश्चेति वक्तव्यम् ॥ * ॥ सर्वेषां श्वेततरः, सर्वश्वेतः । सर्वेषां महत्तरः, सर्वमहान् । 'न निर्धारणे' इति प्रतिषेधे प्राप्ते वचनमिदम् । सर्वशुक्ला गौः¶ ॥

न निर्द्धारणे ॥ १० ॥

पूर्वेण समासे प्राप्ते प्रतिषेध आरभ्यते । निर्द्धारणे या षष्ठी सा न समस्यते । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम् । क्षत्रियो मनुष्याणां शूरतमः । कृष्णा गवां संपन्नक्षीरतमा । धावत्रध्वगानां शीघ्रतमः ॥ प्रतिपदविधाना च षष्ठी न समस्यतइति वक्तव्यम् ॥ * ॥ सर्पिषो ज्ञानम् । मधुनो ज्ञानम् * ॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन ॥ ११ ॥

पूरणगुणसुहितार्थ सद् अव्यय तव्य समानाधिकरण इत्येतैः सह षष्ठी न समस्यते । अर्थशब्दः प्रत्येकमभिसंबध्यते, तेन स्वरूपविधिर्न भवति । पूरणार्थे । छात्राणां पञ्चमः । छात्राणां दशमः । गुण । बलाकायाः शौक्ल्यम् । काकस्य काण्र्यम् । सुहितार्थास्तृप्त्यर्थाः । फलानां सुहितः । फलानां तृप्तः । सत् । ब्राह्मणस्य कुर्वन् । ब्राह्मणस्य कुर्वाणः । अव्यय । ब्राह्मणस्य कृत्वा । ब्राह्मणस्य हृत्वा । तव्य । ब्राह्मणस्य कर्त्तव्यम् । तव्यता सानुबन्धकेन समासो भवत्येव । ब्राह्मणकर्त्तव्यम् । समानाधिकरण । शुकस्य मारविदस्य । राज्ञः पाटलिपुत्रकस्य । पाणिनेः सूत्रकारस्य । किं च स्यात् । पूर्वनिपातस्यानियमः स्यात् । अनन्तरायां तु प्राप्तौ प्रतिषिद्धायां विशेषणं विशेष्येणेति भवत्येव समासः । पूर्वनिपातश्च तदा नियोगतो विशेषणस्यैव † ॥

क्तेन च पूजायाम् ॥ १२ ॥

मतिबुद्धिपूजार्थेभ्यश्चेति वक्ष्यति तस्येदं ग्रहणम् । पूजाग्रहणमुपलक्षणार्थम् । क्तो यः पूजायां विहितस्तेन षष्ठी न समस्यते । राज्ञां मतः । राज्ञां बुद्धः । राज्ञां पूजितः । पूजायामिति किम् । छात्रस्य हसितं, छात्रहसितम् ॥

अधिकरणवाचिना च ॥ १३ ॥

'क्तो ऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य' इति वक्ष्यति, तस्येदं ग्रहणम् । अधिकरणवाचिना क्तेन षष्ठी न समस्यते । इदमेषां यातम् । इदमेषां भुक्तम् ॥

कर्म्मणि च ॥ १४ ॥

क्तेनेति निवृत्तम् । कर्म्मग्रहणं षष्ठीविशेषणम् । कर्म्मणि च या षष्ठी सा न समस्यते । उभयप्राप्तौ कर्म्मणीति षष्ठ्या इदं ग्रहणम् । आश्चर्यो गवां दोहो ऽगोपालकेन‡ । रोचते ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं देवदत्तेन । विचित्रा सूत्रस्य कृतिः पाणिनिना ॥

तृजकाभ्यां कर्तरि ॥ १५ ॥

कर्तृग्रहणं षष्ठीविशेषणम् । कर्त्तरि या षष्ठी सा तृचा

---

* षष्ठीसमासापवादो ऽयं योगः इति पा० २ ।

† नञो नलोपेत्यारभ्य ज्ञाल्मेत्यन्तः पाठो बहुषु पुस्तकेषु नोपलभ्यते ॥

‡ अत्र 'अकृतेति किम् । ईषदभुक्तम्' । इत्यधिकं कुत्र चित् ।

§ परिवेषकेति पाठान्तरम् ॥

‖ हर्तृ,वर्तक,इत्यधिको क्व चित् ॥

¶ गुणान्तरेणेत्यारभ्य सर्वशुक्ला गौरित्यन्तः पाठो बहुषु पुस्तकेषु न दृश्यते ॥

* क्तो ऽविदर्थस्य करणे इति षष्ठीति क्व चिदधिकमत्र ॥

† अनन्तरायामित्यारभ्य विशेषणस्यैवेत्यन्तः पाठो बहुषु पुस्तकेषु न दृश्यते ।

‡ अशिक्षितेन गोपालेनेति पाठान्तरम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ऽकेन च सह न समस्यते । भवतः शायिका । भवत आसिका । भवतो ऽयगामिका । तृच् कर्त्तर्येव विधीयते, तत्प्रयोगे कर्तरि षष्ठी नास्ति । तस्मात्तृज्ग्रहणमुत्तरार्थम् । कर्तरीति किम् । इत्तुभक्तिकां मे धारयसि ॥

कर्त्तरि च ॥ १६ ॥

कर्त्तरि च यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते । सामर्थ्यादकस्य विशेषणार्थं कर्तृग्रहणमितरत्र व्यभिचाराभावात् । अपां स्रष्टा । पुरां भेत्ता । वज्रस्य भर्त्ता । ननु च भर्तृशब्दो ह्ययं याज्ञकादिषु पठ्यते * । संबन्धिशब्दस्य पतिपर्यायस्य तत्र ग्रहणम् † । अकः खल्वपि । ओदनस्य भोजकः । सक्तूनां पायकः ॥

नित्यं क्रीडाजीविकयोः ॥ १७ ॥

नेति निवृत्तं न तृजकौ । नित्यं समासो विधीयते । क्रीडायां जीविकायां च नित्यं षष्ठी समस्यते, तत्पुरुषश्च समासो भवति । तृच् क्रीडाजीविकयोर्नास्तीत्येक एवोदाह्रियते । उद्दालकपुष्पभञ्जिका । वारणपुष्पप्रचायिका । जीविकायाम् । दन्तलेखकः । नखलेखकः । क्रीडाजीविकयोरिति किम् । ओदनस्य भोजकः ॥

कुगतिप्रादयः ॥ १८ ॥

नित्यमिति वर्त्तते । कुशब्दो ऽव्ययं गृह्यते, गत्यादिसाहचर्यात्, न द्रव्यवचनः । कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते, तत्पुरुषश्च समासो भवति । कुः पापार्थे । कुपुरुषः । गति । उररीकृतम् । यदूरीकरोति । प्रादयः । दुर्निन्दायाम् । दुष्पुरुषः । स्वती पूजायाम् । सुपुरुषः । अतिपुरुषः । आङीषदर्थे । आपिङ्गलः । प्रायिकं चैतदुपाधिवचनम्, अन्यत्रापि हि समासो दृश्यते । कोष्णम् । कदुष्णम् । कवोष्णम् । दुष्कृतम् । अतिस्तुतम् । आबद्धुम् । इति ॥ प्रादयो गताद्यर्थे प्रथमया ॥ * ॥ प्रगत आचार्यः, प्राचार्यः । प्रान्तेवासी ॥ अत्यादयः क्रान्ताद्यर्थे द्वितीयया ॥ * ॥ अतिक्रान्तः खट्वाम्, अतिखट्वः । अतिमालः ॥ अवादयः क्रुष्टाद्यर्थे तृतीयया ॥ * ॥ अवक्रुष्टः कोकिलया, अवकोकिलः ॥ पर्यादयो ग्लानाद्यर्थे चतुर्थ्या ॥ * ॥ परिग्लानो ऽध्ययनाय, पर्यध्ययनः । अलं कुमार्यै, अलंकुमारिः ॥ निरादयः क्रान्ताद्यर्थे पञ्चम्या ॥ * ॥ निष्क्रान्तः कौशाम्ब्याः, निष्कौशाम्बिः । निर्वाराणसिः ॥ इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् ॥ * ॥ वाससीव ॥ प्रादिप्रसङ्गे कर्मप्रवचनीयानां प्रतिषेधो वक्तव्यः ॥ * ॥ वृत्तं प्रति विद्योतते विद्युत् । साधुर्दैवदत्तो मातरं प्रति ॥

उपपदमतिङ् ॥ १९ ॥

नित्यमिति वर्तते । उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह समस्यते नित्यं, तत्पुरुषश्च समासो भवति । कुम्भकारः । नगरकारः । अतिङिति किम् । ओदनाहारको व्रजति । ननु च सुप् सुपेति वर्त्तते, तत्र कुनस्तिङन्तेन सह समासप्रसङ्गः । एवं तर्हि ज्ञापयति एतयोर्योगयोः सुप् सुपेति न संबध्यतइति । तेन गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेरित्येतदुपपन्नं भवति । अश्वक्रीती । धनक्रीती ॥

अमैवाव्ययेन ॥ २० ॥

पूर्वेणैव समासे सिद्धे नियमार्थं वचनम् । अव्ययेनोपपदस्य यः समासः सोऽमैव भवति, नान्येन । खादुंकारं भुङ्क्ते । संपचंकारं भुङ्क्ते । लवणंकारं भुङ्क्ते । अमैवेति किम् । कालसमयवेलासु तुमुन् । कालो भोक्तुम् । * एवकारकरणमुपपदविशेषणार्थम् । अमैव यत्तुल्यविधानमुपपदं तस्य समासो यथा स्यात्, अमा चान्येन च यत्तुल्यविधानं तस्य मा भूत् । अग्रे भुक्त्वा । अग्रे भोजम् ॥

तृतीयाप्रभृतीन्यन्यतरस्याम् ॥ २१ ॥

अमैवेत्यनुवर्त्तते । उपदंशस्तृतीयायामित्यतः प्रभृति यान्युपपदानि तान्यमैवाव्ययेन सहान्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । उभयत्र विभाषेयम् । यदमैव तुल्यविधानमुपपदं तस्य प्राप्ते, यथोपदंशस्तृतीयायामिति । यत्पुनरमा चान्येन च तुल्यविधानं तस्याप्राप्ते, यथा अव्यये यथाभिप्रेताख्याने क्त्रः क्त्वाणमुलाविति । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशं भुङ्क्ते । उच्चैःकारमाचष्टे । उच्चैः कारम् । अमैवेत्येव । पर्याप्तिवचनेष्वलमर्थेषु । पर्याप्तो भोक्तुम् । प्रभुर्भोक्तुम् ॥

क्त्वा च ॥ २२ ॥

अमैवेति पूर्वयोगे ऽनुवृत्तं तेनान्यत्र न प्राप्नोतीति वचनमारभ्यते । क्त्वाप्रत्ययेन सह तृतीयाप्रभृतीन्युपपदानि अन्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति । उच्चैःकृत्य । उच्चैः कृत्वा । अव्यये यथाभिप्रेताख्याने इति क्त्वाप्रत्ययः । समासपदे ल्यबेव । तृतीयाप्रभृतीनीत्येव । अलं कृत्वा । खलु कृत्वा ॥

शेषो बहुव्रीहिः ॥ २३ ॥

†उपयुक्तादन्यः शेषः । शेषः समासो बहुव्रीहिसंज्ञो भवति ।

---

* पठ्यते इत्यस्यार्थे 'तत्र पाठसामर्थ्यात्समासेन भवितव्यम् । नैतदस्ति' इति क्व चिदधिकम् ।

† यद्ग्रहणमित्यस्यार्थे 'इत्त तु क्रियाशब्दस्य' इति पाठः कुत्र चिदधिकः ।

* 'समयो भोक्तुम् । वेला भोक्तुम्' । इत्यधिकं क्व चित् ।

† तत्पुरुष इति निवृत्तमिति क्व चिदधिकोऽत्र ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कश्च शेषः । यत्रान्यः समासो नोक्तः । वक्ष्यति । अनेकमन्यपदार्थे । चित्रगुः । शबलगुः । कृष्णोत्तरासङ्गः । शेष इति किम् । उन्मत्तगङ्गम् । लोहितगङ्गम् । बहुव्रीहिप्रदेशाः न बहुव्रीहावित्येवमादयः ॥

अनेकमन्यपदार्थे ॥ २४ ॥

अनेकं सुबन्तमन्यपदार्थे वर्तमानं समस्यते, बहुव्रीहिश्च समासो भवति । प्रथमार्थमेकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति । प्राप्तमुदकं यामं, प्राप्तोदको यामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । चित्रगुर्देवदत्तः । वीरपुरुषको यामः । प्रथमार्थे तु न भवति । वृष्टो देवे गतः । अनेकग्रहणं किम् । बहूनामपि यथा स्यात् ।

सुसूक्ष्मजटकेशेन सुलभाजिनवाससा ।
पुत्री पर्वतराजस्य कुतो हेतोर्विवाहिता * ॥

बहुव्रीहिः समानाधिकरणानामिति वक्तव्यम् ॥ * ॥ व्यधिकरणानां मा भूत् । पञ्चभिर्भुक्तमस्य । अव्ययानां च बहुव्रीहिर्वक्तव्यः ॥ * ॥ उच्चैर्मुखः । नीचैर्मुखः । सम्प्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः ॥ * ॥ कण्ठे स्थितः कालो ऽस्य, कण्ठेकालः । उरसिलोमा । उष्ट्रस्य मुखमिव मुखं यस्य स, उष्ट्रमुखः । खरमुखः ॥ समुदायविकारपशूनाश्च बहुव्रीहिरुत्तरपदलोपश्चेति वक्तव्यम् ॥ * ॥ केशानां संघातः, केशसंघातः । केशसंघातश्चूडा ऽस्य केशचूडः । सुवर्णस्य विकारो ऽलंकारो ऽस्य सुवर्णालंकारः ॥ प्रादिभ्यो धातुजस्योत्तरपदस्य लोपश्च वा बहुव्रीहिर्वक्तव्यः ॥ * ॥ प्रपतितं पर्णमस्य, प्रपर्णः । प्रपतितं पलाशमस्य, प्रपलाशः ॥ नञो ऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्च वक्तव्यः ॥ * ॥ अविद्यमानः पुत्रो यस्य, अपुत्रः । अविद्यमानभार्यः, अभार्यः ॥ सुबधिकारे ऽस्तिक्षीरादीनां बहुव्रीहिर्वक्तव्यः ॥ * ॥ अस्तिक्षीरा ब्राह्मणी । अस्त्यादयो निपाताः ॥

संख्या ऽव्ययासन्नादूराधिकसंख्याः संख्येये ॥ २५ ॥

संख्येये या संख्या वर्त्तते तया सहाव्ययासन्नादूराधिकसंख्याः समस्यन्ते, बहुव्रीहिश्च समासो भवति । अव्यय । उपदशाः । उपविंशाः । आसन्नदशाः । आसन्नविंशाः । अदूरदशाः । अदूरविंशाः । अधिकदशाः । अधिकविंशाः । संख्या । द्वित्राः । त्रिचतुराः । द्विदशाः । संख्येयेति किम् । पञ्च ब्राह्मणाः । अव्ययासन्नादूराधिकसंख्या इति किम् । ब्राह्मणाः पञ्च । संख्येये इति किम् । अधिका विंशतिर्गवाम् ॥

दिङ्नामान्यन्तराले ॥ २६ ॥

दिशां नामानि दिङ्नामानि । दिङ्नामानि सुबन्तानि अन्तराले वाच्ये समस्यन्ते, बहुव्रीहिश्च समासो भवति । दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदन्तरालं, दक्षिणपूर्वा दिक् । पूर्वोत्तरा । उत्तरपश्चिमा । पश्चिमदक्षिणा ॥ सर्वनाम्नो वृत्तिमात्रे * पुंवद्भावः ॥ * ॥ नामग्रहणं रूढ्यर्थम् । इह मा भूत् । ऐन्द्राश्च कौबेर्याश्च दिशोर्यदन्तरालमिति ॥

तत्र तेनेदमिति सरूपे ॥ २७ ॥

तत्रेति सप्तम्यन्तं गृह्यते । तेनेति तृतीयान्तम् । सरूपग्रहणं प्रत्येकमभिसंबध्यते । तत्रेति सप्तम्यन्ते सरूपे पदे तेनेति च तृतीयान्ते इदमित्येतस्मिंश्चर्थे समस्येते, बहुव्रीहिश्च समासो भवति । इतिकरणश्चेह विवक्षार्थो लौकिकमर्थमनुसार्यति । ततो ग्रहणं प्रहरणं कर्मव्यतिहारो युद्धं च समासार्थ इति सर्वमितिकरणाल्लभ्यते । यत्तत्रेति निर्दिष्टं ग्रहणं चेत्तद्भवति, यत्तेनेति निर्दिष्टं प्रहरणं चेत्तद्भवति, यदिदमिति निर्दिष्टं युद्धं चेत्तद्भवति । केशेषुकेशेषु च गृहीत्वा इदं युद्धं वृत्तं, केशाकेशि । कचाकचि । दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं वृत्तं, दण्डादण्डि । मुशलामुशलि । इच् कर्मव्यतिहारइति इच् समासान्तः, स चाव्ययम् । अन्येषामपि दृश्यतइति पूर्वपदस्य दीर्घत्वम् । सरूपग्रहणं किम् । हलैश्च मुसलैश्च प्रहृत्य इदं युद्धं वृत्तम् ॥

तेन सहेति तुल्ययोगे ॥ २८ ॥

सहेत्येतच्छब्दरूपं तुल्ययोगे वर्तमानं तेनेति तृतीयान्तेन सह समस्यते, बहुव्रीहिश्च समासो भवति । सह पुत्रेणागतः, सपुत्रः । सच्छात्रः । सकर्मकरः । तुल्ययोगइति किम् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । विद्यमानैरेव दशभिः पुत्रैर्भारं वहतीत्यर्थः । कथं सकर्मकः सलोमकः सपक्षक इति । नह्यत्र तुल्ययोगो गम्यते किं तर्हि विद्यमानता । प्रायिकं तुल्ययोगइति विशेषणमन्यत्रापि समासो दृश्यते ॥

चार्थे द्वन्द्वः ॥ २९ ॥

अनेकमिति वर्तते । अनेकं सुबन्तं चार्थे वर्त्तमानं समस्यते, द्वन्द्वसंज्ञश्च समासो भवति । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः । तत्र समुच्चयान्वाचययोरसामर्थ्यान्नास्ति समासः । इतरेतरयोगे समाहारे च समासो विधीयते । प्लक्षश्च न्यग्रोधश्च, प्लक्षन्यग्रोधौ । धवश्च खदिरश्च पलाशश्च, धवखदिरपलाशाः । वाक्च त्वक्च, वाक्त्वम् । वाग्दृषदम् । द्वन्द्वप्रदेशाः द्वन्द्वे चेत्येवमादयः ॥

उपसर्जनं पूर्वम् ॥ ३० ॥

समासइति वर्त्तते । उपसर्जनसंज्ञकं समासे पूर्वं प्रयोक्त-

* सुसूक्ष्मजटकेशेन सुलताजिनवाससा ।
समन्तशितिरन्ध्रेण द्वयोर्वृत्तौ न सिध्यति ॥ इति पा० २

* वृत्तिमात्रे इत्यस्यार्थे पूर्वपदस्येत्यपि कुत्र चित् पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यम् । पूर्ववचनं परप्रयोगनिवृत्त्यर्थम् । अनियमो हि स्यात् । द्वितीया । कष्टश्रितः । तृतीया । शङ्कुलाखण्डः * । चतुर्थी । यूपदारु । पञ्चमी । वृकभयम् । षष्ठी । राजपुरुषः । सप्तमी । अक्षशौण्डः ॥

राजदन्तादिषु परम् ॥ ३१ ॥

पूर्वनिपाते प्राप्ते परप्रयोगार्थं वचनम् । राजदन्तादिषु परमुपसर्जनं प्रयोक्तव्यम् । न केवलमुपसर्जनस्य, अन्यस्यापि यथालक्षणं विहितस्य पूर्वनिपातस्यापवादः परनिपातो विधीयते । दन्तानां राजा, राजदन्तः । वनस्याग्रे, अग्रेवणम् । निपातनादलुक् । राजदन्तः । अग्रेवणम् । लिप्तवासितम् । नग्नमुषितम् । सिक्तसंमृष्टम् । मृष्टलुञ्चितम् । अवक्लिन्नपक्वम् । अर्पितोप्तम् । उप्तगाढम् । पूर्वकालस्य परनिपातः । उलूखलमुसलम् । तण्डुलकिण्वम् । दृषदुपलम् । आरण्यायनवन्थकी । चित्ररथबाह्लीकम् । आवन्त्यश्मकम् । शूद्रार्यम् । स्नातकराजानौ । विष्वक्सेनार्जुनौ । अस्तिभुवम् । दारगवम् । शब्दार्थौ । धर्मार्थौ । कामार्थौ । अनियमश्चात्रेष्यते । अर्थशब्दौ । अर्थधर्मौ । अर्थकामौ । तत्कथं वक्तव्यमिदम् । धर्मादिषूभयमिति । वैकारिमतम् । गजवाजम् । गोपालधानीपूलासम् । पूलासकक्करण्डम् । स्थूलपूलासम् । उशीरबीजम् । सिञ्जास्यम् । चित्रास्वाती । भार्यापती । जायापती । जम्पती । दम्पती । जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते । पुत्रपती । पुत्रपशु । केशश्मश्रु । श्मश्रुकेशौ । शिरोबीजम् । सर्पिर्मधुनी । मधुसर्पिषी । आद्यन्तौ । अन्तादी । गुणवृद्धी । वृद्धिगुणौ ॥

द्वन्द्वे घि ॥ ३२ ॥

पूर्वमिति वर्त्तते । द्वन्द्वे समासे घ्यन्तं पूर्वं प्रयोक्तव्यम् । पटुगुप्तौ । मृदुगुप्तौ । अनेकप्राप्तावेकस्य नियमः, शेषे त्वनियमः । पटुमृदुशुक्लाः । पटुशुक्लमृदवः । द्वन्द्वइति किम् । विस्पष्टपटुः ॥

अजाद्यदन्तम् ॥ ३३ ॥

द्वन्द्वइति वर्त्तते † । अजाद्यदन्तं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम् । उष्ट्रखरम् । उष्ट्रशशकम् ॥ बहुष्वनियमः ॥ * ॥ अश्वरथेन्द्राः । इन्द्ररथाश्वाः ॥ द्वन्द्वे घ्यजाद्यदन्तं विप्रतिषेधेन ॥ * ॥ इन्द्राग्नी । इन्द्रवायू । तपरकरणं किम् । अश्वावृषौ वृषाश्वे इति वा ॥

अल्पाच्तरम् ॥ ३४ ॥

द्वन्द्वइति वर्त्तते । अल्पाच्तरं शब्दरूपं द्वन्द्वे समासे पूर्वं प्रयोक्तव्यम् । प्लक्षश्च न्यग्रोधश्च, प्लक्षन्यग्रोधौ । धवखदिरपलाशाः । बहुष्वनियमः । शङ्खदुन्दुभिवीणाः । वीणाशङ्खदुन्दुभयः ॥ ऋतुनक्षत्राणामानुपूर्व्येण समानात्तराणां पूर्वनिपातो वक्तव्यः ॥ * ॥ हेमन्तशिशिरवसन्ताः । चित्रास्वाती । कृत्तिकारोहिण्यौ । समानात्तराणामिति किम् । ग्रीष्मवसन्तौ ॥ लघ्वक्षरं पूर्वं निपततीति वक्तव्यम् ॥ * ॥ कुशकाशम् । शरशादम् ॥ अभ्यर्हितं च पूर्वं निपततीति वक्तव्यम् ॥ * ॥ मातापितरौ । अङ्गामेधे । दीक्षातपसी ॥ वर्णानामानुपूर्व्येण पूर्वनिपातः ॥ * ॥ ब्राह्मणक्षत्रियविट्शूद्राः । समानात्तराणामित्यत्र नास्ति ॥ भ्रातुश्च ज्यायसः पूर्वनिपातो वक्तव्यः ॥ * ॥ युधिष्ठिरार्जुनौ ॥ संख्याया अल्पीयस्याः पूर्वनिपातो वक्तव्यः ॥ * ॥ द्वित्राः । त्रिचतुराः । नवतिशतम् ॥

सप्तमीविशेषणे बहुव्रीहौ ॥ ३५ ॥

सर्वोपसर्जनत्वाद्बहुव्रीहेरनियमे प्राप्ते नियमार्थं वचनम् । सप्तम्यन्तं विशेषणं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम् । कण्ठेकालः । उरसिलोमा । विशेषणम् । चित्रगुः । शबलगुः ॥ सर्वनामसंख्ययोरुपसंख्यानम् ॥ * ॥ सर्वश्वेतः । सर्वकृष्णः । द्विशुक्लः । द्विकृष्णः । अनयोरेव मिथः संप्रधारणायां परत्वात्संख्यायाः पूर्वनिपातः । द्व्यन्यः । त्र्यन्यः ॥ वा प्रियस्य पूर्वनिपातः ॥ * ॥ गुडप्रियः । प्रियगुडः ॥ सप्तम्याः पूर्वनिपाते प्राप्ते गड्वादिभ्यः सप्तम्यन्तं परम् ॥ * ॥ गडुकण्ठः । गडुशिराः । कथं वल्हेगडुः । प्राप्तस्य चाबाधा व्याख्येया ॥

निष्ठा ॥ ३६ ॥

* निष्ठान्तं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम् । कृतकटः । भिन्नभिन्नः । अवमुक्तोपानत्कः । आहूतसुब्रह्मण्यः । ननु च विशेषणमेवात्र निष्ठा, नैष नियमो, विशेषणविशेष्यभावस्य विवक्षानिबन्धनत्वात् । कटे कृतमनेनेति वा विग्रहीतव्यम् ॥ निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम् ॥ * ॥ शार्ङ्गजग्धी । पलाण्डुभक्षितौ । मासजातः । संवत्सरजातः । सुखजातः । दुःखजातः । कथं कृतकटः, भुक्तौदनः । प्राप्तस्य चाबाधा व्याख्येया ॥ प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम् ॥ * ॥ अस्युद्यतः । दण्डपाणिः । कथमुद्यतगदः उद्यतासिः । प्राप्तस्य चाबाधा व्याख्येया ॥

वा ऽऽहिताग्न्यादिषु ॥ ३७ ॥

निष्ठेति पूर्वनिपाते प्राप्ते विकल्प उच्यते । आहिताग्न्यादिषु निष्ठान्तं पूर्वं वा प्रयोज्यम् । अग्न्याहितः । आहिताग्निः । जातपुत्रः । पुत्रजातः । जातदन्तः । जातश्मश्रुः । तैल-

* किरिकाण इत्यधिकमत्र क्व चित् ।

† पूर्वमिति चेति क्व चिदधिकम् ।

* बहुव्रीहाविति वर्तत इति क्व चिदधिकमत्र ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पीतः । घृतपीतः । ऊढभार्यः । गतार्थः । आकृतिगणश्चायम् । तेनगडुकण्ठप्रभृतय इहैव द्रष्टव्याः ॥

कडाराः कर्मधारये ॥ ३८ ॥

गुणशब्दानां विशेषणत्वात्पूर्वनिपाते प्राप्ते विकल्प उच्यते । कडारादयः शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः । कडारजैमिनिः । जैमिनिकडारः । कडार । गडुल । काण । खञ्ज । कुण्ठ । खञ्जर । खलति । गौर । वृद्ध । भिक्षुक । पिङ्गल । तनु । वटर । कर्मधारयइति किम् । कडारपुरुषो यामः ॥

इति जयादित्यरचितायां काशिकायां वृत्तौ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

काशिकायाः

द्वितीयाध्यायस्य तृतीयः पादः ।

अनभिहिते ॥ १ ॥

अनभिहितइत्यधिकारोयं वेदितव्यः । यदित ऊर्ध्वमनुक्रमिष्यामो ऽनभिहितइत्येवं तद्वेदितव्यम् । अनभिहिते अनुक्ते अनिर्दिष्टे कर्मादौ विभक्तिर्भवति । केनानभिहिते, तिङ्कृत्तद्धितसमासैः, परिसंख्यानम् । वक्ष्यति कर्म्मणि द्वितीया । कटं करोति । यामं गच्छति । अनभिहितइति किम् । तिङ् । क्रियते कटः । कृत् । कृतः कटः । तद्धित । शत्यः । शतिकः । समास । प्राप्तमुदकं यं यामं, प्राप्तोदको यामः । परिसंख्यानं किम् । कटं करोति भीष्ममुदारं दर्शनीयम् । बहुषु बहुवचनमित्येवमादिना संख्या वाच्यत्वेन विभक्तीनामुपदिष्टा, तत्र विशेषणार्थमिदमारभ्यते, अनभिहितकर्मादाश्रयेष्वेकत्वादिषु द्वितीयादयो वेदितव्या इति ॥

कर्मणि द्वितीया ॥ २ ॥

द्वितीयादयः शब्दाः पूर्वाचार्यैः सुपां त्रिकेषु स्मर्यन्ते, तैरेवात्र व्यवहारः । कर्मणि कारके या संख्या तत्र द्वितीया विभक्तिर्भवति । कटं करोति । यामं गच्छति ।

उभसर्वतसोः कार्या धिग्उपर्यादिषु त्रिषु ।
द्वितीया ऽऽम्रेडितान्तेषु ततो ऽन्यत्रापि दृश्यते ॥ * ॥

उभयतो यामम् । सर्वतो यामम् । धिग्देवदत्तम् । उपर्युपरि यामम् । अध्यधि यामम् । अधोऽधो यामम् ॥ अभितःपरितःसमयानिकषाहाप्रतियोगेषु च दृश्यते ॥ * ॥ अभितो यामम् । परितो यामम् । समया यामम् । निकषा यामम् । हा देवदत्तम् । बुभुक्षितं न प्रति भाति किं चित् ॥

तृतीया च होश्छन्दसि ॥ ३ ॥

कर्मणीति वर्त्तते । द्वितीयायां प्राप्तायां तृतीया विधीयते, चशब्दात्सा च भवति । छन्दसि विषये जुहोतेः कर्मणि कारके तृतीया विभक्तिर्भवति द्वितीया च । यवाग्वा ऽग्निहोत्रं जुहोति । यवागूमग्निहोत्रं जुहोति । छन्दसीति किम् । यवागूमग्निहोत्रं जुहोति ॥

अन्तरान्तरेण युक्ते ॥ ४ ॥

द्वितीया स्वर्यते न तृतीया । अन्तराऽन्तरेणशब्दौ निपातौ साहचर्याद्गृह्येते । आभ्यां योगे द्वितीया विभक्तिर्भवति । षष्ठ्यपवादो योगः । तत्रान्तराशब्दो मध्यमाधेयप्रधानमाचष्टे । अन्तरेणशब्दस्तु तच्च विनार्थं च । अन्तरा त्वां च मां च कमण्डलुः । अन्तरेण त्वां च मां च कमण्डलुः * । अन्तरेण पुरुषकारं न किं चिल्लभ्यते । युक्तग्रहणं किम् । अन्तरा तक्षशिलां च पाटलिपुत्रं क्षुद्रस्य प्राकारः ॥

कालाध्वनोरत्यन्तसंयोगे ॥ ५ ॥

कालशब्देभ्यो ऽध्वशब्देभ्यश्च द्वितीया विभक्तिर्भवति अत्यन्तसंयोगे गम्यमाने † । क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः संबन्धो ऽत्यन्तसंयोगः । मासमधीते । संवत्सरमधीते । मासं कल्याणी । संवत्सरं कल्याणी । मासं गुडधानाः । संवत्सरं गुडधानाः । अध्वनः खल्वपि । क्रोशमधीते । योजनमधीते । क्रोशं कुटिला नदी । योजनं कुटिला नदी । क्रोशं पर्वतः । योजनं पर्वतः । अत्यन्तसंयोगइति किम् । मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥

अपवर्गे तृतीया ॥ ६ ॥

कालाध्वनोरत्यन्तसंयोगइति वर्त्तते । अपवर्गः फलप्राप्तौ सत्यां क्रियापरिसमाप्तिः । अपवर्गे गम्यमाने कालाध्वनोरत्यन्तसंयोगे तृतीया विभक्तिर्भवति । मासेनानुवाको ऽधीतः । संवत्सरेणानुवाको ऽधीतः । अध्वनः । क्रोशेनानुवाको ऽधीतः । योजनेनानुवाको ऽधीतः । अपवर्गइति किम् । क्रोशमधीतो ऽनुवाकः । मासमधीतः । कर्तृव्यावृत्तौ फलसिद्धेरभावात् तृतीया न भवति । मासमधीतो ऽनुवाको न चानेन गृहीतः ॥

सप्तमीपञ्चम्यौ कारकमध्ये ॥ ७ ॥

कालाध्वनोरिति वर्त्तते । कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवतः । अह्न भुक्त्वा देवदत्तो ह्नह्नि ह्नहाद्वा भोक्ता । ह्नह्नि ह्नहाद्वोक्ता । कर्तृशक्त्योर्मध्ये कालः । इहस्थो ऽयमिष्वासः क्रोशे लक्ष्यं विध्यति ।

---

* तव मम मध्ये कमण्डलुरित्यर्थं इत्यधिकं क्व चित् ।

† षष्ठ्यपवादो ऽयं योग इत्यधिकं क्व चित् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्रोशाल्लक्ष्यं विध्यति। कर्तृकर्मणोः कारकयोः कर्मापादानयोः कर्माधिकरणयोर्वा मध्ये क्रोशः। संख्यातानुदेशो न भव,त्यस्वरितत्वात् ॥

कर्मप्रवचनीययुक्ते द्वितीया ॥ ८ ॥

कर्मप्रवचनीयैर्युक्ते द्वितीया विभक्तिर्भवति। अनुर्लक्षणे। शाकल्यस्य संहितामनु प्रावर्षत्। आगस्त्यमन्वसिञ्चत्प्रजाः ॥

यस्मादधिकं यस्य चेश्वरवचनं तच्च सप्तमी ॥ ९ ॥

कर्मप्रवचनीययुक्तइति वर्त्तते। यस्मादधिकं यस्य चेश्वरवचनं कर्मप्रवचनीयैर्युक्ते तत्र सप्तमी विभक्तिर्भवति। उप खार्ष्यां द्रोणः। उप निष्के कार्षापणम्। यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी विभक्तिर्भवति। अधि ब्रह्मदत्ते पञ्चालाः, अधि पञ्चालेषु ब्रह्मदत्तः, इति। द्वितीयापवादो योगः ॥

पञ्चम्यपाङ्परिभिः ॥ १० ॥

अप आङ् परि इत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी विभक्तिर्भवति। अप त्रिगर्तेभ्यो वृष्टो देवः। आ पाटलिपुत्राद्वृष्टो देवः। परिपरि त्रिगर्तेभ्यो वृष्टो देवः। अपेन साहचर्यात्परेर्वर्जनार्थस्य ग्रहणम्। तेनेह न भवति। वृत्तं परि विद्योतते विद्युत् ॥

प्रतिनिधिप्रतिदाने च यस्मात् ॥ ११ ॥

मुख्यसदृशः प्रतिनिधिः। दत्तस्य प्रतिनिर्यातनं प्रतिदानम्। यस्मात्प्रतिनिधिर्यत्तश्च प्रतिदानं तत्र कर्मप्रवचनीययुक्ते पञ्चमी विभक्तिर्भवति। अभिमन्युरर्जुनतः प्रति। प्रद्युम्नो वासुदेवतः प्रति। मापानस्मै तिलेभ्यः प्रतियच्छति। ननु च प्रतिनिधिप्रतिदाने कर्मप्रवचनीययुक्ते न तु यतः प्रतिनिधिप्रतिदाने। नैष दोषः। संबन्धसंबन्धात्तस्यापि योगो ऽस्त्येव ॥

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि ॥ १२ ॥

गत्यर्थानां धातूनां चेष्टाक्रियाणां परिस्पन्दक्रियाणां कर्मणि कारके ऽध्ववर्जिते द्वितीयाचतुर्थ्यौ भवतः। यामं गच्छति। यामाय गच्छति। यामं व्रजति। यामाय व्रजति। गत्यर्थग्रहणं किम्। ओदनं पचति। कर्मणीति किम्। अश्वेन व्रजति। चेष्टायामिति किम्। मनसा पाटलिपुत्रं गच्छति। अनध्वनीति किम्। अध्वानं गच्छति। अध्वन्यर्थग्रहणम्। पन्थानं गच्छति। मार्गं गच्छति। आस्थितप्रतिषेधश्चायं विज्ञेयः। आस्थितः संप्राप्तः, आक्रान्त उच्यते। यत्र उत्पथेन पन्थानं गच्छति, तत्र भवितव्यमेव चतुर्थ्या। पथे गच्छतीति। द्वितीयाग्रहणं किम्। न चतुर्थ्येव विकल्प्येत। अपवादविषये ऽपि यथा स्यात्। यामं गन्ता। यामाय गन्ता। क्रुद्धोगलक्षणा षष्ठी न भवति ॥

चतुर्थी संप्रदाने ॥ १३ ॥

संप्रदाने कारके चतुर्थी विभक्तिर्भवति। उपाध्यायाय गां ददाति। माणवकाय भिक्षां ददाति। देवदत्ताय रोचते। पुष्पेभ्यः स्पृहयति। इत्यादि ॥ चतुर्थीविधाने तादर्थ्यउपसंख्यानम् ॥ * ॥ यूपाय दारु। कुण्डलाय हिरण्यम्। रन्धनाय स्थाली। अवहननायोलूखलम् ॥ क्रुपिसंपद्यमाने चतुर्थी वक्तव्या ॥ * ॥ मूत्राय कल्पते यवागूः। उच्चाराय कल्पते यवागूः। क्रुपीत्यर्थनिर्देशः। मूत्राय संपद्यते यवागूः। मूत्राय जायते यवागूः ॥ उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या ॥ * ॥

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् ॥

हितयोगे चतुर्थी वक्तव्या ॥ * ॥ गोभ्यो हितम्। अरोचकिने हितम् ॥

क्रियार्थोपपदस्य च कर्मणि स्थानिनः ॥ १४ ॥

क्रिया क्रियार्था उपपदं यस्य सो ऽयं क्रियार्थोपपदः। तुमुन्ण्वुलौ क्रियायां क्रियार्थायामित्येष विषयो लक्ष्यते। क्रियार्थोपपदस्य च स्थानिनो ऽप्रयुज्यमानस्य धातोः कर्मणि कारके चतुर्थी विभक्तिर्भवति। द्वितीयापवादो योगः। एधेभ्यो व्रजति। पुष्पेभ्यो व्रजति। क्रियार्थोपपदस्येति किम्। प्रविश पिण्डीम्। प्रविश तर्पणम्। भवितरि स्थानी न तु क्रियार्थोपपदः। कर्मणीति किम्। एधेभ्यो व्रजति शकटेन। स्थानिन इति किम्। एधानाहर्तुं व्रजति ॥

तुमर्थाच्च भाववचनात् ॥ १५ ॥

तुमुना समानार्थस्तुमर्थः। तुमर्थभाववचनप्रत्ययान्तात् प्रातिपदिकाच्चतुर्थी विभक्तिर्भवति। भाववचनाश्चेति वक्ष्यति, तस्येदं ग्रहणम्। पाकाय व्रजति। त्यागाय व्रजति। भूतये व्रजति। संपत्तये व्रजति। तुमर्थादिति किम्। पाक,-स्त्यागो, रागः। भाववचनादिति किम्। कारको व्रजति ॥

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च ॥ १६ ॥

नमः स्वस्ति स्वाहा स्वधा ऽलं वषट् इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। नमो देवेभ्यः। स्वस्ति प्रजाभ्यः। स्वाहा ऽग्नये। स्वधा पितृभ्यः। अलं मल्लो मल्लाय। अलमिति पर्याप्त्यर्थग्रहणम्। प्रभुर्मल्लो मल्लाय। शक्तो मल्लो मल्लाय। वषडग्नये। वषडिन्द्राय। चकारः पुनरस्यैव समुच्चयार्थः। तेनाशीर्विवक्षायामपि षष्ठीं बाधित्वा चतुर्थ्येव भवति। स्वस्ति गोभ्यो भूयात्। स्वस्ति ब्राह्मणेभ्यः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मन्यकर्मण्यनादरे विभाषा ऽप्राणिषु ॥ १७ ॥

मन्यतेः कर्मणि, मन्यकर्मणि । मन्यकर्मणि प्राणिवर्जिते विभाषा चतुर्थी विभक्तिर्भवति अनादरे गम्यमाने । अनादरस्तिरस्कारः । न त्वा तृणं मन्ये । न त्वा तृणाय मन्ये । न त्वा बुसं मन्ये । न त्वा बुसाय मन्ये । मन्यतियहणं किम् । न त्वा तृणं चिन्तयामि । विकरणनिर्देशः किमर्थः । न त्वा तृणं मन्वे । अनादरइति किम् ।

अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम् ।
अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति ॥

अप्राणिष्विति किम् । न त्वा शृगालं मन्ये ॥ यदेतदप्राणिष्विति तदनावादिष्विति वक्तव्यम् ॥ * ॥ व्यवस्थितविभाषा च ज्ञेया । न त्वा नावं मन्ये । नावमुत्तीर्णो न नाव्यम् । न त्वा ऽन्नं मन्ये । यावन्न भुक्तं श्राद्धम् । प्राणिषु तूभयम् । न त्वा काकं मन्ये । न त्वा शृगालं मन्ये । इह चतुर्थी द्वितीया च भवतः । न त्वा श्वानं मन्ये । न त्वा शुने मन्ये । युष्मदः कस्माच्च भवति चतुर्थी, एतदपि हि मन्यतेः कर्म, व्यवस्थितविभाषाविज्ञानादेव न भवति ॥

कर्तृकरणयोस्तृतीया ॥ १८ ॥

कर्त्तरि करणे च कारके तृतीया विभक्तिर्भवति । देवदत्तेन कृतम् । यज्ञदत्तेन भुक्तम् । करणे । दात्रेण लुनाति । परशुना छिनत्ति ॥ तृतीयाविधाने प्रकृत्यादीनामुपसंख्यानम् ॥ * ॥ प्रकृत्या ऽभिरूपः । प्रकृत्या दर्शनीयः । प्रायेण याज्ञिकः । प्रायेण वैयाकरणः । गार्ग्यो ऽस्मि गोत्रेण । समेन धावति । विषमेण धावति । द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून् क्रीणाति । सहस्रेण पशून् क्रीणाति ॥

सहयुक्तेऽप्रधाने ॥ १९ ॥

सहार्थेन युक्तेऽप्रधाने तृतीया विभक्तिर्भवति । पुत्रेण सहागतः पिता । पुत्रेण सह गोमान् । पितुरत्र क्रियादिसंबन्धः शब्देनोच्यते, पुत्रस्य तु प्रतीयमान, इति तस्याप्राधान्यम् । सहार्थेन च योगे विधानात्पर्यायप्रयोगेपि भवति । पुत्रेण सार्द्धमिति । विनापि सहशब्देन भवति । वृद्धो यूनेति निदर्शनात् । अप्रधानइति किम् । शिष्येण सहोपाध्यायस्य गौः ॥

येनाङ्गविकारः ॥ २० ॥

अङ्गशब्दो ऽत्राङ्गसमुदाये शरीरे वर्तते, येनेति च तदवयवो हेतुत्वेन निर्दिश्यते । येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया विभक्तिर्भवति । अक्ष्णा काणः । पादेन खञ्जः । पाणिना कुण्ठः * । अवयवधर्मेण समुदायो व्यपदिश्यते । अङ्गविकार इति किम् । अक्षि काणस्य ॥

इत्थंभूतलक्षणे ॥ २१ ॥

* कुणिरिति पाठान्तरम् ।

कं चित्प्रकारं प्राप्त इत्थंभूत,स्तस्य लक्षणमित्थंभूतलक्षणं, ततस्तृतीया विभक्तिर्भवति । अपि भवान् कमण्डलुना छात्रमद्राक्षीत् । छात्रेणोपाध्यायम् । शिखया परिव्राजकम् । इह न भवति । कमण्डलुपाणिश्छात्र इति । लक्षणस्य समासे ऽन्तर्भूतत्वात् । इत्थंभूत इति किम् । वृत्तं प्रति विद्योतनम् * ॥

संज्ञो ऽन्यतरस्यां कर्मणि ॥ २२ ॥

संपूर्वस्य जानातेः कर्मणि कारके द्वितीयायां प्राप्तायामन्यतरस्यां तृतीया विभक्तिर्भवति । पित्रा संजानीते । पितरं संजानीते । मात्रा संजानीते । मातरं संजानीते † ॥

हेतौ ॥ २३ ॥

फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते । तद्वाचिनस्तृतीया विभक्तिर्भवति । धनेन कुलम् । कन्यया शोकः । विद्यया यशः ॥

अकर्तर्यृणे पञ्चमी ॥ २४ ॥

हेताविति वर्त्तते । कर्त्तृवर्जितं यदृणं हेतुस्ततः पञ्चमी विभक्तिर्भवति । तृतीयापवादो योगः । शताद्बद्धः । सहस्राद्बद्धः । अकर्त्तरीति किम् । शतेन बन्धितः । शतमृणं च भवति, प्रयोजकत्वाच्च कर्त्तृसंज्ञम् ॥

विभाषा गुणेऽस्त्रियाम् ॥ २५ ॥

हेताविति वर्त्तते । गुणे हेतावस्त्रीलिङ्गे विभाषा पञ्चमी विभक्तिर्भवति ‡ । जाड्याद्बद्धः । जाड्येन बद्धः । पाण्डित्याद् मुक्तः । पाण्डित्येन मुक्तः । गुणग्रहणं किम् । धनेन कुलम् । अस्त्रियामिति किम् । बुद्ध्या मुक्तः । प्रज्ञया मुक्तः ॥

षष्ठी हेतुप्रयोगे ॥ २६ ॥

हेतोः प्रयोगो हेतुप्रयोगः । हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी विभक्तिर्भवति । अन्नस्य हेतोर्वसति ॥

सर्वनाम्नस्तृतीया च ॥ २७ ॥

सर्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्योत्ये तृतीया विभक्तिर्भवति षष्ठी च । पूर्वेण षष्ठ्यामेव प्राप्तायामिदमुच्यते । कस्य हेतोर्वसति । केन हेतुना वसति ॥ यस्य हेतोर्वसति । येन हेतुना वसति ॥ निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् ॥ * ॥ किं निमित्तं वसति । केन निमित्तेन वसति । कस्मै निमित्ताय वसति । कस्मान्निमित्ताद्वसति । कस्य निमित्तस्य व-

* इत्थंभूत इत्यारभ्य विद्योतनमित्यन्तः पाठो बहुषु पुस्तकेषु न दृश्यते ।

† संपूर्वः किम् । मातरं जानाति । पितरं जानाति । कर्मणीति किम् । पूरेण पुत्रं संजानीते पिता । इत्यधिकं क्व चित् ।

‡ तृतीयापवादो ऽयं योग इत्यधिकं कुत्र चित् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सति। कस्मिंश्चिन्मित्ते वसति। एवं कारणहेत्वोरप्युदाहार्यम्। अर्थग्रहणं चैतत्। पर्यायोपादानं तु स्वरूपविधिर्मा विज्ञायीति। तेनेहापि भवति। किं प्रयोजनं वसति। केन प्रयोजनेन वसति। कस्मै प्रयोजनाय वसति। कस्मात्प्रयोजनाद् वसति। कस्य प्रयोजनस्य वसति। कस्मिन् प्रयोजने वसति॥

अपादाने पञ्चमी ॥ २८ ॥

अपादाने कारके पञ्चमी विभक्तिर्भवति। ग्रामादागच्छति। पर्वतादवरोहति। वृकेभ्यो बिभेति। अध्ययनात्पराजयते। पञ्चमीविधाने ल्यब्लोपे कर्म्मण्युपसंख्यानम् ॥ * ॥ प्रासादमारुह्य प्रेक्षते, प्रासादात्प्रेक्षते॥ अधिकरणे चोपसंख्यानम् ॥ * ॥ आसने उपविश्य प्रेक्षते, आसनात्प्रेक्षते। शयनात्प्रेक्षते॥ प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या ॥ * ॥ कुतो भवान्, पाटलिपुत्रात्॥ यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या ॥ * ॥ गवी धुमतः सांकाश्यं चत्वारि योजनानि। कार्त्तिक्या आयहायणी मासे॥ तद्युक्तात्काले सप्तमी वक्तव्या ॥ * ॥ कार्त्तिक्या आयहायणी मासे ॥ अध्वनः प्रथमा सप्तमी च वक्तव्या ॥ * ॥ गवी धुमतः सांकाश्यं चत्वारि योजनानि, चतुर्षु योजनेषु वा॥

अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ॥ २९ ॥

अन्य आरात् इतर ऋते दिक्शब्द अञ्चूत्तरपद आच् आहि इत्येतैर्योगे पञ्चमी विभक्तिर्भवति। अन्य इत्यर्थग्रहणम्। तेन पर्यायप्रयोगेपि भवति। अन्यो देवदत्तात्। भिन्नो देवदत्तात्। अर्थान्तरं देवदत्तात्। विलक्षणो देवदत्तात्। आराच्छब्दो दूरान्तिकार्थे वर्त्तते। तत्र दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामिति प्राप्ते पञ्चमी विधीयते। आराद्देवदत्तात्। आराद्यज्ञदत्तात्। इतर इति निर्दिश्यमानप्रतियोगी पदार्थे उच्यते। इतरो देवदत्तात्। ऋते इति अव्ययं वर्जनार्थे। ऋते देवदत्तात्। ऋते यज्ञदत्तात्। दिक्शब्दः। पूर्वो ग्रामात्। उत्तरो ग्रामात्। पूर्वो ग्रीष्माद्वसन्तः। उत्तरो ग्रीष्मो वसन्तात्। दिक्शब्द इत्यत्र शब्दग्रहणं देशकालवृत्तिनापि दिक्शब्देन योगे यथा स्यात्। इतरथा हि दिग्वृत्तिनैव स्यात्। इयमस्याः पूर्वेति। इह तु न स्यात्। अयमस्मात्पूर्वः काल इति। अञ्चूत्तरपद। प्राक् ग्रामात्। प्रत्यक् ग्रामात्। ननु चायमपि दिक्शब्द एव। षष्ठ्यतसर्थप्रत्ययेनेति वक्ष्यति, तस्यायं पुरस्तादपकर्षः। आच्। दक्षिणा ग्रामात्। उत्तरा ग्रामात्। आहि। दक्षिणाहि ग्रामात्। उत्तराहि ग्रामात्॥

षष्ठ्यतसर्थप्रत्ययेन ॥ ३० ॥

दक्षिणोत्तराभ्यामतसुजिति वक्ष्यति, तस्येदं ग्रहणम्। अतसर्थेन प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति। दक्षिणतो ग्रामस्य। उत्तरतो ग्रामस्य। पुरस्माद् ग्रामस्य। उपरि ग्रामस्य। उपरिष्टाद्ग्रामस्य॥

एनपा द्वितीया ॥ ३१ ॥

एनबन्यतरस्यामदूरे पञ्चम्या इति वक्ष्यति। तेन युक्ते द्वितीया विभक्तिर्भवति। पूर्वेण षष्ठ्यां प्राप्तायामिदं वचनम्। दक्षिणेन ग्रामम्। उत्तरेण ग्रामम्। षष्ठ्यपीष्यते। दक्षिणेन ग्रामस्य। उत्तरेण ग्रामस्य। तदर्थं योगविभागः कर्तव्यः॥

पृथग्विनानानाभिस्तृतीया ऽन्यतरस्याम् ॥ ३२ ॥

पञ्चमीग्रहणमनुवर्त्तते। पृथक् विना नाना इत्येतैर्योगे तृतीया विभक्तिर्भवति अन्यतरस्यां पञ्चमी च। पृथग् देवदत्तेन। पृथग् देवदत्तात्। विना देवदत्तेन। विना देवदत्तात्। नाना देवदत्तेन। नाना देवदत्तात्। पृथग्विनानानाभिरिति योगविभागो द्वितीयार्थः।

विना वातं विना वर्षं विद्युत्पतनं विना।
विना हस्तिकृतान्दोषान्केनैमौ पातितौ द्रुमौ॥

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य ॥ ३३ ॥

स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्यो ऽसत्त्वकवचनेभ्यः करणे कारके ऽन्यतरस्यां तृतीया भवति। पञ्चम्यत्र पत्ते विधीयते, तृतीया तु करणइत्येव सिद्धा। यदा तु धर्ममात्रं करणतया विवक्ष्यते न द्रव्यं,तदा स्तोकादीनामसत्त्ववचनता। स्तोकान्मुक्तः। स्तोकेन मुक्तः। अल्पान्मुक्तः। अल्पेन मुक्तः। कृच्छ्रान्मुक्तः। कृच्छ्रेण मुक्तः। कतिपयान्मुक्तः। कतिपयेन मुक्तः। असत्त्ववचनस्येति किम्। स्तोकेन विषेण हतः। अल्पेन मधुना मत्तः। करणइति किम्। क्रियाविशेषणे कर्मणि मा भूत्। स्तोकं मुञ्चति॥

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥ ३४ ॥

पञ्चम्यनुवर्त्तते। दूरान्तिकार्थैः शब्दैर्योगे षष्ठी विभक्तिर्भवत्यन्यतरस्यां पञ्चमी च। दूरं ग्रामात्। दूरं ग्रामस्य। विप्रकृष्टं ग्रामात्। विप्रकृष्टं ग्रामस्य। अन्तिकं ग्रामात्। अन्तिकं ग्रामस्य। अभ्याशं ग्रामात्। अभ्याशं ग्रामस्य। अन्यतरस्यांग्रहणं पञ्चम्यर्थम्। इतरथा हि तृतीया पत्ते स्यात्॥

दूरान्तिकार्थेभ्यो द्वितीया च ॥ ३५ ॥

पञ्चम्यनुवर्त्तते। दूरान्तिकार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति, चकारात्पञ्चमी तृतीयापि समुच्चीयते। दूरं ग्रामस्य। दूराद्ग्रामस्य। दूरेण ग्रामस्य। अन्तिकं ग्रामस्य। अन्तिकाद्ग्रामस्य। अन्तिकेन ग्रामस्य। प्रातिपदिकार्थे विधानम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

असत्त्ववचनग्रहणं चानुवर्त्तते । सत्त्वशब्देभ्यो यथायथं विभक्तयो भवन्ति । दूरः पन्याः । दूराय पथे देहि । दूरस्य पथः स्वम् ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ चतुर्थोऽध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

॥ संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥

एवमुत्क्रान्तिगतिगन्तव्या अतीताः । अथेदानीं गन्तव्यं प्राप्तस्य स्वरूपं निर्णीयते । इदं हि छान्दोग्ये प्रजापतिवाक्ये श्रूयते । "एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इति । तत्र संशय्यते । किं परं ज्योतिरुपसंपन्नस्य स्वर्गंवदागन्तुकरूपेण संबन्धरूपाभिनिष्पत्तिरत्राभिप्रेता, उत स्वाभाविकस्वरूपाविर्भावरूपेति । किं पुनः प्रतिभाति । आगन्तुकरूपेण संबन्धरूपेति । अनिनिष्पत्तेरुत्पत्तिपर्यायत्वात् । मोक्षशास्त्रस्य च पुरुषार्थावबोधित्वात् । सुषुप्त्यादावात्मस्वरूपस्यापुरुषार्थत्वदर्शनात् । स्वरूपाविर्भावस्य मोक्षस्वरूपत्वे मोक्षशास्त्रस्यापुरुषार्थविषयत्वापत्तौ देवादिवदागन्तुकावस्थान्तरप्राप्तेरेवाभिनिष्पत्तिपदार्थत्वं स्वीकार्यमिति प्राप्ते ब्रूमः । "संपद्ये"ति । परं ज्योतिरुपसंपद्य प्रत्यगात्मा स्वस्वरूपेणैवाविर्भवति नतु केनचिदागन्तुकेन । कुतः । स्वेनशब्दात् । स्वेन रूपेणेति विशेषणात् । अन्यथा स्वशब्दोक्तिवैयर्थ्यात् । अभिव्यक्तिरेवात्राभिनिष्पत्तिः ॥ १ ॥

ननु स्वरूपस्य नित्यप्राप्तत्वात् कोऽत्र विशेष इति चेत् । तत्राह ॥

॥ मुक्तः प्रतिज्ञानात् ॥ २ ॥

सर्वबन्धविनिर्मुक्त एवात्र स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते । कुतः । प्रतिज्ञानात् । "य आत्मे"त्युपक्रम्य "एतं त्वेव ते भूयोऽनुव्याख्यास्यामी"ति भूयो भूय उक्त्वा "एष संप्रसाद" इत्यादि "निष्पद्यत"इत्यन्तं प्रजापतिनाभिधानात् । कर्मसंज्ञकाविद्यासंकुचितज्ञानादिधर्मकस्य नित्यप्राप्तत्वेऽपि तद्रूपबन्धविनिर्मुक्तस्याविर्भूतापहतपाप्मत्वादिगुणकदम्बकस्य जाग्रदाद्यवस्यातीतस्य स्वरूपस्याप्राप्तत्वात् । इह त्वपरिच्छिन्नज्ञानापहतपाप्मत्वादिगुणाश्रयस्य स्वरूपस्याभिनिष्पत्तिरिति विशेषस्य सत्त्वात् ॥ २ ॥

यत् तूक्तम् । "सुषुप्त्यादावात्मस्वरूपस्यापुरुषार्थत्वदर्शना"दित्यादि "स्वीकार्ये"मित्यन्तं, तत्रोत्तरम् ॥

॥ आत्मा प्रकरणात् ॥ ३ ॥

स्वरूपेणैवापहतपाप्मत्वादिगुणकोऽयमात्मा, नागन्तुकधर्मकः । कुतः । प्रकरणात् । "य आत्मापहतपाप्मे"त्यादिना प्रजापतिविद्यायां श्रवणात् । प्रकरणं चेदं जीवात्मविषयमित्युक्तं "पुरस्तादुत्तराच्चेदाविर्भूतस्वरूप"स्त्वित्यत्र । अतो नोक्तदोषः । सुषुप्तौ तु कर्मणापहतपाप्मत्वादेस्तिरोभावेनात्मयाथात्म्यापकाशादपुरुषार्थत्वम् । तथा चापहतपाप्मत्वादिगुणानां परं ज्योतिरुपसंपन्नस्याविर्भावमात्रत्वाच्च जन्यत्वादिकल्पनावकाशः । तथा च स्मर्यते शौनकेन ।

"यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषग्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥
यथोदपानखननात् क्रियते न जलान्तरम् ।
सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥
तथा हेयगुणध्वंसादवबोधादयो गुणाः ।
प्रकाश्यन्ते न जन्यन्ते नित्याः स्वाभाविका हि ते" ॥

इत्यादि ।

तस्मान्ज्ञानानन्दादिगुणानां ब्रह्मापत्तौ कर्मणः प्रतिबन्धकस्य नाश आविर्भावोऽविरुद्धः ।

न च भौतिकज्योतिरेवात्र श्रूयत इति वाच्यम् । "तदेव ज्योतिषां ज्योति"रिति श्रुत्यन्तरे ज्योतिःशब्दस्य ब्रह्मवाचकत्वदर्शनात् । विस्तृतं चैत"ज्ज्योतिर्दर्शना"दित्यत्रेति संक्षेपः ॥ ३ ॥

॥ अविभागेन दृष्टत्वात् ॥ ४ ॥

अथ स्वस्वरूपाभिनिष्पन्नो मुक्तः प्रत्यगात्मा किं परब्रह्मणो विभागेन स्वात्मानमनुभवति, उताविभागेनेति विचिकित्सायां "परमं साम्यमुपैति", "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता", "मम साधर्म्यमागता" इत्यादिश्रुतिस्मृतिभ्यो मुक्तस्य परमात्मना साम्यसाहित्यादिदर्शनाद्विभक्तमनुभवतीति पूर्वः पक्षः । राद्धान्तस्तु "ऐतदात्म्यमिदं सर्वं", "तत्त्वमसि", "एष सर्वभूतान्तरात्मा", "अयमात्मा ब्रह्मे"त्यादिश्रुतिभ्योऽविभागेन ब्रह्मात्मकतया ब्रह्मापृथक्सिद्धमात्मानमनुभवति । कुतः । दृष्टत्वात् । "आत्मेति तूपगच्छन्ती"त्युक्तन्यायेन स्वात्मनोऽप्यात्मतयाहं ब्रह्मास्मीत्युपासनेन यथावस्थितस्य ब्रह्मात्मकस्य स्वस्वरूपस्य दृष्टत्वात् ।

न च तथात्वेऽत्यन्ताभेद एव सिद्ध इति वाच्यम् । ब्रह्मात्मीयस्य तदात्मकत्वतदपृथक्त्वाद्यनुभवितृरूपस्यापि सत्त्वात् । "ऐतदात्म्यमिदं सर्वं"मित्यादिघटकश्रुत्योभयत्वस्य सूपपन्नत्वात् ॥ ४ ॥

॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

प्रत्यगात्मा परं ज्योतिरुपसंपद्य स्वाभाविकेन स्वस्वरूपे-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

णाविर्भवतीत्युक्तम् । तत्र कीदृशं तत्स्वरूपमितीदानीं चिन्त्यते । किमपहतपाप्मत्वादिगुणकमेवास्य स्वाभाविकं स्वरूपमुत चैतन्यमात्रमथोभयरूपमिति संशये, प्रथमं तावत् प्राप्तमपहतपाप्मत्वादिगुणकमित्याह । "ब्राह्मेणे"ति । ब्राह्मेणापहतपाप्मत्वादिसत्यसंकल्पत्वावसानेन गुणेन विशिष्टः सचयमाविर्भवतीति जैमिनिराचार्यो मन्यते स्म । अपहतपाप्मत्वादयो हि दहरवाक्ये ब्रह्मगुणा उक्ताः । तेषां प्रजापतिवाक्ये प्रत्यगात्मन्यपि "य आत्मापहतपाप्मे"त्यादिनोपन्यासात् । आदिना "जक्षत् क्रीडन् रममाण"इत्यादिश्रुत्युक्ता जक्षणादयः सर्वज्ञत्वादयश्च गृह्यन्ते । अपहतपाप्मत्वादिसर्वज्ञत्वसर्वेश्वरत्वादिरूपब्रह्मधर्मसंपन्नचैतन्यस्वरूपाविर्भावो मोक्ष इति जैमिनेर्मतम् ॥ ५ ॥

॥ चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चिति चिद्रूपे ब्रह्मण्युपसंचो युक्तस्तन्मात्रेण चैतन्यमात्रेण स्वरूपेणाविर्भवतीत्यौडुलोमिराचार्यो मन्यते स्म । कुतः । तदात्मकत्वात् । "स यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन, एवं वा अरे अयमात्मानन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एवे"त्यादिसावधारणश्रुत्या तावन्मात्रात्मकत्वाद्,विज्ञानमात्रस्वरूपत्वादस्य प्रत्यगात्मनः । अपहतपाप्मादिशब्दास्त्वविद्यात्मकविकारसुखदुःखादिधर्मेभ्यस्तस्य व्यावृत्तिपराः कथंचित् तत्रैव नेयाः । अनश्वाद्यावृत्तोऽश्व इत्यादिवदपहतपाप्मानपहतपाप्मतो व्यावृत्तो मुक्तजीव इत्यर्थः । चैतन्यमात्रस्वरूपेणाभिनिष्पत्तिर्मोक्ष इत्यौडुलोमेर्मतम् ॥ ६ ॥

अथ सूत्रकारः स्वमतमाह ॥

॥ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवमपि चैतन्यमात्रस्वरूपत्वनिरूपणे सत्यपि पूर्वभावात् पूर्वोक्तब्रह्मभावादपहतपाप्मत्वादिसंपन्नविज्ञानस्वरूपाविर्भावादविरोधं मोक्षस्वरूपं भगवान् बादरायणो मन्यते । कुतः । उपन्यासात् । प्रजापतिवाक्येऽपहतपाप्मत्वादीनामपि विज्ञानघनस्वरूप एव मुक्तजीव उपन्यासात्, प्रतिपादनात् ।

नच विज्ञानघन एवेत्यवधारणं गुणान्तरं न सहते, यथा सैन्धवघनस्य रसघन एवेत्यवधारणं रसाश्रयद्रव्यरूपस्पर्शादिगुणान्तरं सहते । रसघन एवेत्यवधारणप्रयोजनं तु रसवद्द्रव्यान्तरेषु द्राम्रादिफलेषु त्वगादिप्रदेशभेदाद्रसभेदः । सैन्धवघनस्तु सर्वत्रैकरसः । एवमत्रापि जडवस्तुव्यावृत्त्या सर्वत्र स्वप्रकाशोऽयमात्मेति स्वप्रकाशतावधारणं क्रियते विज्ञानघन एवेति । अपहतपाप्मत्वादिसंपन्नज्ञानघनीभूतस्वरूपाविर्भावपूर्वकत्वे सति श्रीभगवत्स्वरूपगुणादिविषयकानवच्छिन्नानुभूत्या स्थितिर्मोक्ष इति श्रीसूत्रकारसिद्धान्तः । एवं च न केनापि वाक्येन विरोधः । तथाहि, "परं ज्योतिरुपसंपद्ये"ति वाक्यं यावदात्मवृत्त्यनवच्छिन्नब्रह्मानुभवितृत्वं ब्रह्मभावपदार्थं वदति । परं ज्योतिःशब्दाभिधेयं परब्रह्मभूतं श्रीपुरुषोत्तममुपसंपद्य साक्षात् स्वात्मत्वेनानुभूय स्वेन रूपेण तत्स्वरूपगुणादिविषयकानवच्छिन्नानुभवितृत्वरूपेण तदात्मकतयावतिष्ठत इति श्रुत्यर्थः । "निरञ्जनः परमं साम्यमुपैती"त्यत्र परमं साम्यं भावपदेनाभिधीयते । परमसाम्यं च स्वरूपेण गुणादिना च सादृश्यम् । तथा च ज्ञानस्वरूपत्वात् स्वरूपसादृश्यम्,अपरिच्छिन्नज्ञानधर्मकत्वाद्गुणसादृश्यं च । तत्त्वं नाम तद्विद्वत्वे सति तद्भूतभूयोधर्मवत्त्वम् । नियन्तृत्वस्वान्तर्यवत्त्वाभावेन ब्रह्मभिन्नत्वे सति सार्वज्ञ्याद्यपहतपाप्मत्वादिभूयोब्रह्मगतधर्मवत्त्वाल्लक्षणसमन्वयः । "सर्वं हि पश्यः पश्यती"ति सार्वज्ञ्यश्रुतेः ।

नच "स्वराड् भवती"ति श्रुतिविरोध इति वाच्यम् । तस्या अपि स्वाराज्यसाम्यस्य ब्रह्मादिवन्दनीयत्वस्य तत्र सत्त्वात् ।

नापि "नारायणे सायुज्यमाप्नोती"ति श्रुतिविरोध इति वाच्यम् । तस्या अपि त्वदभिप्रेतार्थपरत्वाभावात् । सह युज्यत इति सयुक्, सयुजो भावः सायुज्यं, नित्यसंबन्ध इत्यर्थः । भगवता नित्यसंबन्धोऽत्र भावपदार्थः ।

न चैक्यमेव तदर्थ इति वाच्यम् । सायुज्यस्य शक्यार्थाभावात् ।

ननु ।

"यथा नद्यः स्यन्दमानाः समुद्रे
अस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान् नामरूपाद्विमुक्तः
परात् परं पुरुषमुपैति साम्यम्" ॥

इति श्रुतिविरोध इति चेन्न । तत्रापि भेदस्य सत्त्वात् । नहि जले निक्षिप्तं जलान्तरं स्वरूपैक्यं भजते, किंतु नित्ययोगमेव । सावयवद्रव्यत्वात् । नद्यादीनां प्रावृहादिऋतुविशेषे वृद्धिह्रासदर्शनाच्च ।

नच समुद्रे वृद्धिह्रासादर्शनादैक्यमेवेति वाच्यम् । सावयवद्रव्यत्वेन नदीदृष्टान्तेन च तत्राप्यनुमातुं शक्यत्वात् । तरङ्गेषु भेददर्शनाच्च । "यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति गौतमे"ति श्रुत्यन्तरेण सादृश्यस्यैव लाभाच्च । श्रुत्यर्थस्तु काश्मीरिचरणैर्विस्तृतस्तत्रैव द्रष्टव्यः ।

नच "ब्रह्म वेद ब्रह्मैव भवती"ति सावधारणश्रुतिविरोध इति वाच्यम् । बृहज्ज्ञानगुणयोगेन तत्तायास्तत्रापि सुवच-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्वात्। अन्यथा "ब्रह्मविदाप्नोति पर"मिति कर्मकर्तृबोधकश्रुतिबाधस्य तवापि साम्यात्।

ननु,

"ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परं तप"।

इत्यादिवाक्येऽन्तःप्रवेशोक्तेरन्तः प्रविष्टस्य भेदानुपलब्धेरभेदसिद्धिरिति चेत्। श्रीभगवतो विश्वरूपविग्रह एव प्रवेशस्य विवक्षितत्वात्। भिन्नस्यैव प्रवेशघटनाच्च।

"तत्रैकस्थं जगत् कृत्स्नं यस्याद्य सचराचरम्।
मम देहे गुडाकेश",

इति श्रीमुखोक्तेः। "पश्यामि देवांस्तव देवदेह" इति श्रोतुरर्जुनस्यानुभवपूर्वकोक्तेश्च।

अयमभिप्रायः। प्रवेशो नाम स्वस्य चेतनाचेतनात्मकविश्वस्य च ब्रह्मात्मकत्वात्,"ऐतदात्म्यमिदं सर्वं"मिति श्रुतेस्तत्तादात्म्यानुभवपूर्वकं विश्वरूपे भगवति चिच्छक्त्यात्मनावस्थानम्। विश्वरूपस्य ब्रह्मणः श्रीपुरुषोत्तमस्य जगदाधारत्वात् सर्वं जगत् सर्वदैव तत्रावतिष्ठते। परापरात्मकशक्तिरूपत्वाद्विश्वस्य। इति निर्विवादः। "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूता"मिति श्रीमुखोक्तेः। तथैव सर्वाधिकारिकाणामधिकाररूपाः शक्तयोऽपि तस्यैवैकान्ततया तत्रैव तासामवस्थानात् सृष्टिसमये तत्तदधिकारयोग्यतापन्नान् पुण्यात्मनो ब्रह्मरुद्रादिपदव्यारोहणार्हान् जीवविशेषांस्तत्तद्वैराजैकदेशकार्यरूपजगत्सर्जनसंहरणादियोग्याभिः स्वासाधारणशक्तिभिर्युनक्ति। प्रलयसमये तु तान् विश्वाधिकारिणो ब्रह्मादींस्ताभिर्वियुनक्ति। परं तु तासां शक्तीनां स्वाभाविकत्वनित्यत्वादिभिस्तत्र नित्यावस्थानात् स्थितिरव्यभिचारिणी। तथाचोक्तं विष्णुधर्मे।

"ब्रह्मा शंभुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः।
एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा॥
जगत्कार्यावसाने तु वियुज्यन्ते च तेजसा"।

इत्यादिना। तथैव मुक्तानामपि विश्वरूपे भगवति तदात्मकत्वस्वरूपाविर्भावपूर्वकं तच्छाश्वत्यानुभूत्यावस्थानमप्यविरुद्धम्। तच्छक्तित्वाविशेषादिति। वेदान्तरत्नमञ्जूषायां श्रीपुरुषोत्तमाचार्यचरणैस्तथैवोक्तत्वात्। स च श्रीभगवद्गीतैकादशाध्यायोऽत्र प्रमाणत्वेनानुसंधेय इति। तत् सिद्धं मोक्षावस्थायामपि स्वरूपभेदावस्थानम्। भेदज्ञानादपि मोक्षश्रवणात्। "जुष्टं यदा पश्यत्यन्यमीशं," "तन्महिमानमिति वीतशोकः," "पृथगात्मानं प्रेरितारं च मत्वा","जुष्टस्ततस्तेनामृतत्वमेती"त्यादिभिस्तथैवोक्तं सिद्धान्तसेतुकायां श्रीसुन्दरभट्टपादैः। श्रीभगवदनवच्छिन्नानुभूत्या स्थितिर्भगवत्प्राप्तिः। सैव भगवद्भावापत्तिरिति। तथा चाह पराशरः।

"निरस्तातिशयाह्लादसुखभावैकलक्षणम्।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता"॥

इति। भगवत्प्राप्तिर्भेषजं संसाररोगस्येति योजना। तामेव विशिनष्टि। "निरस्ते"ति। निरस्तोऽतिशयाह्लादो यस्मात् तथाभूतेन सुखेन भावो भासनमवस्थानमेकमसाधारणं लक्षणं यस्याः सा। कालादिपरिच्छेदरूपव्यभिचारशून्यत्वं दर्शयन्नाह। "एकान्तात्यन्तिकी"ति। एकान्ता केवलभगवच्छब्दवाच्यैकविषयिका, अत एवात्यन्तिकी निरतिशयेति यावत्। तत्र शास्त्रं प्रमाणयति। "मते"ति। शास्त्रमुखेनेति शेष इति संक्षेपः।

केचित् तु "प्रतिबिम्बो जीवः, बिम्बस्थानीयो हीश्वरः,उभयानुस्यूतं शुद्धं चैतन्यमिति मुक्तस्य यावत्सर्वमुक्ति सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वसत्यकामत्वादिगुणगणाढ्येश्वरभावापत्तिरिष्यते। यथानेकेषु दर्पणेष्वेकस्य मुखस्य प्रतिबिम्बे सत्येकस्य प्रतिबिम्बस्योपाधिविलये बिम्बभावापत्तिस्तथैकस्मिन् प्रतिबिम्बे विद्योदयेन तदुपाधिविलये तत्प्रतिबिम्बस्य बिम्बभावेनावस्थानस्यावश्यंभावात्।

नच मुक्तस्याविद्यावत् सत्यकामत्वादिगुणविशिष्टसर्वेश्वरत्वानुपपत्तिरिति वाच्यम्। तदविद्याभावेऽपि तदानीं बद्धपुरुषान्तराविद्यायाः सत्त्वात्। नहीश्वरस्येश्वरत्वं सार्वज्ञ्यादिगुणवैशिष्ट्यं च स्वाविद्याकृतम्। तस्य निर्गुणनिरञ्जनत्वात्। किंतु बद्धपुरुषाविद्याकृतमेवेति राद्धान्तः। सूत्रकारोऽपि "एवमप्युपन्यासा"दिति सिद्धान्तसूत्रेण वस्तुदृष्ट्या चैतन्यमात्रत्वेऽपि पूर्वोक्तगुणकलापस्योपन्यासाद्बद्धगतस्य मायामयस्य बद्धपुरुषव्यवहारदृष्ट्या संभवाच्च श्रुतिद्वयविरोध इत्यविरोधं वदन्नुक्तसिद्धान्तमेव मेने। भाष्यकारश्च सूत्रत्रययुक्तार्थपरत्वेन व्याकुर्वंश्चेश्वरभावापत्तिं स्पष्टमनुमेने। भामतीप्रबन्धप्रभृतयश्च श्रुत्युपबृंहितमिदं सूत्रजातं भगवतो भाष्यकारस्योदाहृतं वचनजातं च तथैवानुवर्तन्ते।

तस्मान्मुक्तानामीश्वरभावापत्तेरवश्याभ्युपेयत्वादसंभव एव प्रतिबिम्बेश्वरवादे दोषः। तदाहुः कल्पतरुकाराः।

"न मायाप्रतिबिम्बस्य विमुक्तैरुपसृप्यते"।

इतीत्याहुः। तत् तुच्छम्। असंभवात्। तथाहि, न तावत् परेशजीवयोर्बिम्बप्रतिबिम्बभावः संभवति। पूर्वमेव निरस्तत्वात्।

नापि मुक्तस्य यावत्सर्वमुक्ति सार्वज्ञ्यादिसंपन्नेश्वरभावेनावस्थानं पुनर्भावान्तरापत्तिरिति वक्तुं शक्यते। अनुपपन्नत्वात्।

तथाहि, मुक्तस्येश्वरभावापत्तिः स्वरूपेण विवक्षिता, सार्वज्ञ्यादिधर्मेण वा। नाद्यः। स्वरूपनाशापत्तेः। "स्वेन रूपेणा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भिनिष्पद्यते" इति श्रुत्या स्वरूपापत्तेरेव विधानाच्च तु स्वरूपनाशस्य ।

एतदुक्तं भवति । ईश्वरभावापत्तिः किं जले निक्षिप्तजलवदेकीभावेन पृथग्ग्रहणायोग्यत्वमात्रं वा, जीवस्वरूपबाधो वा ।

आद्ये, दृष्टापत्तिः । तवाभिप्रेताद्वैतभङ्गश्च ।

अन्त्ये,स्वरूपनाशापत्तिरिति ।

किंच, विश्वप्रतिबिम्बरूपावीशजीवौ वस्तुरूपौ मिथ्यानिर्वचनीयौ वा, शशशृङ्गवत् तुच्छौ वा ।

नाद्यः । परपक्षप्रवेशात् ।

नापि द्वितीयः । बन्धमोक्षादिप्रतिपादनस्य वैयर्थ्यात् । वस्तुभूतद्वितीयनिर्विशेषस्य बन्धानर्हत्वेन बद्धस्य चावस्तुत्वेन को बद्धो मुक्तश्चेति प्रश्नस्य निरुत्तरत्वात् ।

अत एव न तृतीयः । मे माता वन्ध्येतिवच्छास्त्रप्रणयनादौ वाक्यमूकत्वापत्तेः ।

नापि सार्वज्ञ्यादिधर्मेणेति द्वितीयः । विकल्यासहत्वात् । को वात्र भावपदार्थः । सार्वज्ञ्यकल्याश्रयत्वं वा, सार्वज्ञ्याद्याश्रयत्वं वा ।

नाद्यः । अनङ्गीकारात् । अपसिद्धान्तापत्तेः । परपक्षप्रवेशाच्च ।

नान्त्यः । प्रमाणाभावात् । असंभवाच्च । अन्यथानेकेश्वरत्वापत्तेः ।

किंच, नहि भगवदीयैश्वर्यस्य मायामयत्वे पुनर्निवृत्तौ च मानमस्ति । यतस्तन्निवृत्त्या पुनर्भावान्तरापत्तिः सुवचा स्यात् ।

नच

"भूयश्चान्ते विश्वमायानिवृत्तिः" ।

इति श्रुतिरेवात्र मानमिति वाच्यम् । तस्याः परमेश्वरभावापत्तिरूपमोक्षप्रतिबन्धकीभूतविश्वमायानिवृत्तिविधानपरत्वात् ।

"मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" ।

इति श्रीमुखोक्तेः ।

एताभ्यां श्रुतिस्मृतिभ्यां भगवदनुग्रहमहत्तमसाधनपरिपाकेन जीवानामेव भगवन्मायातरणं प्रतिपाद्यते । तत्रैव तयोः प्रामाण्यं च सूपपन्नम् । न तु भगवतः स्वाभाविकनित्यसार्वज्ञ्यादिनिवृत्तौ । तथात्वेऽनाप्तत्वप्रसङ्गात् ।

एतेन यदुक्तं "परमेश्वरस्यैश्वर्यं, सार्वज्ञ्यादिसत्यसंकल्पत्वादिवैशिष्ट्यं च बहुजीवाविद्याकल्पितं, न स्वाभाविकम्, तस्य निर्विशेषत्वात्, न त्वीश्वराविद्याकृतं, तस्यानिरञ्जनत्वात्," इति । तदपि निरस्तम् । स्वबुद्धिपरिकल्पितत्वेन प्रमाणशून्यत्वात् । प्रत्युत तत्प्रत्यनीकस्वाभाविकत्वश्रवणात् । "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी"ति ।

यदप्युक्तं,सिद्धान्तसूत्रस्य वस्तुदृष्ट्या चिन्मात्रत्वेऽपि पूर्वोक्तगुणकलापस्योपन्यासाद्यवगतस्य मायामयस्येत्यादिना विवक्षितार्थपरत्वम् । तदपि स्वकपोलकल्पितम् । सूत्रार्थस्य पूर्वमेवोक्तत्वात् । किं तावत् । यदि चैतन्यमात्रापत्तिरेव मोक्षस्वरूपमभिप्रेतम्, तर्ह्यौडुलोमिपक्षानुगामित्वमेव भवतां श्रेष्ठम् । किं पुनः सूत्रकारमिदानीम् । सूत्रकृद्भिः कुत्रापि पारमेश्वरीयैश्वर्यादिधर्माणां मायिकत्वानभिधानात्, अपितु "विवक्षितगुणोपपत्तेश्च," "सर्वधर्मोपपत्तेश्चे"त्यादिसूत्रैरुपपत्तयात्यादरेणाभ्युपगमात् ।

नापि तस्य त्वदभिप्रेतनिर्विशेषत्वयोगः । ईशत्वनिर्विशेषत्वयोः सामानाधिकरण्यासंभवात् । अन्यथा सर्वप्रमाणाविषयत्वेन शशशृङ्गसाम्यापत्तेः । प्रमाणविषयत्वे च सविशेषत्वस्यावश्यंभावित्वाच्चेति संक्षेपः ।

एकविंशतिप्रकारकदुःखध्वंसो मोक्ष इति गौतमीयानामभ्युपगमः । तथाहि, तदत्यन्तविमोक्षोऽपवर्ग इति । अत्र तच्छब्देन सूत्रोपात्तानामेकविंशतिप्रकारकदुःखानां परामर्शः । तानि च शरीरं, षडिन्द्रियवर्गः, षड्विषयाः, षड्बुद्धयः, सुखं, दुःखं चेति । आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखतत्प्रागभावासमानकालिकत्वम् । सुषुप्त्यादौ दुःखध्वंसस्य दुःखासमानकालिकस्य सत्त्वात् "तत्प्रागभावे"ति । उपान्त्यदुःखध्वंसस्य तत्प्रागभावासमानकालिकत्वाद् "दुःखे"ति । तत्र शरीरेन्द्रियविषयबुद्धीनां दुःखसाधनत्वाद् दुःखत्वम् । दुःखस्य स्वरूपतः । पूर्वापरदुःखसंबलितत्वात् सुखस्यापि दुःखत्वमिति । "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति सूत्रादिति । तच्च । तस्य पुरुषार्थत्वाभावात् पुरुषव्यापारासाध्यत्वात् । अतीतस्य स्वविरोधिगुणान्तरनाश्यत्वात् । आगामिनः स्वकारणनाशेन नाश्यत्वात् । वर्तमानस्यापि स्वोत्पत्तिगुणनाश्यत्वात् ।

किंच, नित्यसुखाभिव्यक्तिर्मुक्तिर्न दुःखप्रहाणमात्रम् । नैतावन्मात्रमुद्दिश्य प्रवृत्तिः संभवति । प्रवृत्तिसामान्यं प्रतीष्टसाधनताज्ञानस्य प्रवर्तकत्वात् ।

नन्वनिष्टाभावसाधनताज्ञानमपि प्रवर्तकमिति चेत् । न । अनिष्टाभावस्यापीष्टसिद्ध्यैव विनियोगात् । कण्टकविद्धपादस्य कण्टकापनयने प्रवृत्तिर्न केवलं कण्टकाभावोद्देशेन, किंतु यथेष्टप्रचाररूपेष्टसिद्ध्यर्थेति प्रसिद्धम् ।

तस्मान्मुक्तौ नित्यसुखानुभवोऽप्यकामेन त्वयाभ्युपगन्तव्य इति दिक् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ दुःखनिवृत्तिमात्रं मोक्षः । आनन्दादिशब्दाश्च दुःखाभावमात्रावलम्बिनः । यदि च सुखं रागेण वर्तेत । ततो बन्ध एव स्यात् । रागस्य बन्धहेतुत्वात् । देहेन्द्रियमनसां निवृत्तौ विज्ञानोत्पत्तिहेत्वभावान्मुक्तो निःसंज्ञः पाषाणकल्पोऽवतिष्ठते । इति वैशेषिका आहुः ।

तत् तुच्छम् । असंभवात् । तथाहि, यदुक्तं, "रागो बन्धहेतु"रिति । तदयुक्तम् । शास्त्रादयं विभागो गम्यते । यथा स्वदारगमनं धर्माय, परदारगमनं चाधर्माय । तथाविधविषयको रागो बन्धहेतुः । निरतिशयानन्दपरात्मविषयकश्च रागो मोक्षहेतुः ।

नाप्यानन्दादिशब्दो दुःखाभाववचनः । शतगुणोत्तरक्रमेणोत्कर्षापकर्षौ प्रतिपाद्य निरतिशयस्य ब्रह्मानन्दस्योपदेशात् । "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह," "आनन्दं ब्रह्मणो विद्वान् बिभेति कुतश्चने"ति मन्त्रात् । नहि निरुपाख्यस्याभावस्योत्कर्षापकर्षौ संभवतः । लोकेऽपि दुःखतारतम्यं सुखतारतम्यं च परस्परविलक्षणं प्रत्यक्षेणानुभूयते ।

किंच, यदि पाषाणकल्प एव मोक्षोऽभीष्टः । तर्हि पाषाणादीनामेव मुक्तत्वमभ्युपगन्तव्यं देवानांप्रियैस्तर्कनिपुणैः । किं कल्पशब्दप्रयोगप्रयासेनेति संक्षेपः ।

सांख्यास्तु चैतन्यस्वभाव आत्मा, तस्य द्रष्टुः स्वरूपे चैतन्यमात्रेऽवस्थानमसंप्रज्ञातयोगनिष्पन्नो मोक्ष, इति मन्यन्ते । तच्चिन्त्यम् । ब्रह्मानन्दाभावे निरतिशयानन्दापत्त्यभावात् ।

पातञ्जलास्तु,असतो ब्रह्मभावस्य योगानुष्ठानाज्जन्म मोक्ष इत्याहुः । तदपि चिन्त्यम् । असतो जन्मायोगात् । शशशृङ्गादावतिव्याप्तेश्च । "ब्रह्मैव सन् ब्रह्माप्येती"ति श्रुतिविरोधाच्च । पञ्चक्लेशादिध्वंसश्चास्मत्पक्षेऽपि समान एवेत्यलं प्रासङ्गिकेन ।

तस्मात् पूर्वोक्तलक्षणा भगवद्भावापत्तिरेव मोक्ष इति सिद्धम् । स च मोक्षो भगवदनुग्रहैकलभ्यतत्साक्षात्कारैकलभ्यः । साक्षात्कारश्च प्राप्तध्रुवस्मृतीनां भुक्तप्रारब्धकर्मणामेव । "यमेवैष वृणुते तेन लभ्यः,"

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरावरे" ॥

"यदा पश्यः पश्यते रुक्मवर्ण"मित्यादिश्रुतिभ्यः । तस्मिन्निति, सर्ववेदान्तप्रसिद्धे ब्रह्मणि श्रीपुरुषोत्तमे, दृष्टे साक्षादनुभूते सति, हृदयग्रन्थिः, अनादिकर्मनिरूपितमायासंबन्धः, "कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु"ति श्रीमुखोक्तेर्भिद्यते ध्वंसमापद्यते स्वयमेवेति । कर्मकर्तृप्रयोगः साधनान्तरनिरपेक्षत्वसौकर्यद्योतनार्थः । "सूर्यप्रकाशे तमोवत् तत्कार्यभूताः सर्वसंशया आत्मपरमात्मसाधनफलसंबन्धादिविषयकाः स्वयमेव च्छिद्यन्ते । "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष" इति श्रुत्यन्तरात् । तत्र हेतुमाह । "क्षीयन्ते चास्ये"ति । अस्य भगवत्प्रसादैकविषयस्य चरमजन्मनो विदुषः साक्षाद्दृष्टः संचितक्रियमाणप्रारब्धाख्यानि सर्वकर्माणि पुण्यापुण्यरूपाणि क्षीयन्ते, क्षयमापद्यन्ते । परमेश्वरं विशिनष्टि । "परावरे" इति । लोकदृष्ट्या मनुष्यादिभ्यः पर उत्कृष्टा ब्रह्मरुद्रादयोऽवरे निकृष्टा यस्मात् तस्मिंस्तित्यर्थः ।

ननु "कर्माणी"त्यत्र कर्मपदं प्रारब्धेतरद्विविधकर्मपरमेव ।

नच बहुवचनविरोध इति वाच्यम् । एकैकस्यापि संचितादिकर्मणोऽसंख्यत्वात् । अन्यथा साक्षात्कारसमय एव विदुषो देहपातप्रसङ्गात् । जीवन्मुक्त्यभावप्रसङ्गाच्च । इति चेन्न । दृष्टापचत्वात् ।

नच तथात्वे तदधिगमे,"उत्तरपूर्वाघयो"रिति सूत्रबाधः, तत्र प्रारब्धेतरस्यैव कर्मणो विनाशोक्तेरिति वाच्यम् । तस्य निदिध्यासनपरिपाकध्रुवस्मृत्याख्यपरोक्षज्ञानविषयत्वेन पूर्वमेव व्याख्यातत्वात् ।

नच परोक्षज्ञानेन तथात्वासंभवः । श्रुतिप्रमाणसिद्धत्वात् । स्मृतिलम्भ इति पूर्वोक्तश्रुतेः ।

किंच, अपरोक्षज्ञानान्मूलाज्ञाननिवृत्तिरभिप्रेता न वेति ।

नाद्यः । कारणनाशे कार्यस्थित्ययोगात् । भावरूपकार्यस्य निरुपादानस्थित्यदर्शनात् ।

सोपादानं चेत् । किमत्रोपादानम् । ब्रह्मैवान्यद्वा ।

नाद्यः । ब्रह्मणोऽकारणत्वेन तदुपादानत्वासंभवात् । अन्यथा कारणस्य नित्यत्वेन कार्यस्यावश्यंभावादनिर्मोक्षप्रसङ्गो दुर्वारः ।

न द्वितीयः । अविद्यातत्कार्याभ्यामन्यस्याभावात् ।

तस्मान्मूलाविद्यानाशे तत्कार्यस्य प्रारब्धस्याप्यवश्यातुमशक्यत्वम् । तन्तुनाशे पटस्येव ।

नच प्रारब्धजन्यभोगनिर्वाहकतया कियत्कालमविद्याया अनुवृत्त्यङ्गीकार इति शङ्कनीयम् । विद्याया अविद्योपमर्दैकस्वभावहानिप्रसङ्गात् । "यस्मिन् सत्यग्निमत्त्वे यस्य सत्त्वं, यद्व्यतिरेके च यस्याभावस्तत् साध्य"मिति लक्षणोक्तेः । तथा च यस्मिन् ब्रह्मापरोक्षज्ञाने सत्यविद्यानिवृत्तेः सत्त्वं, तद्व्यतिरेके चाविद्यानिवृत्त्यभाव इति सिद्धान्तभङ्गाच्च ।

नच प्रारब्धभोगोत्तरकाल एव तथाभूतस्वभावो ब्रह्मसाक्षात्कारस्येति वाच्यम् । एकस्य स्वभावद्वयासंभवात् ।

नचावरणविक्षेपशक्तिमत्या मूलाविद्याया ब्रह्मसाक्षात्कारेणावरणशक्तिनाशेऽपि प्रारब्धकर्मजन्यवर्तमानदेहनिर्वाहाय

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विक्षेपशक्त्यंशानुवृत्तिरिति वाच्यम् । एकस्या अविद्याया युगपत् स्थितिनिवृत्त्योर्विरुद्धत्वात् ।

नच शक्तिनिवृत्तिमात्रमेव विवक्षितम् । शक्तिशक्तिमतोरभेदात् । भेदे च मूलाज्ञाननिवृत्तिप्रसङ्गः । निवर्तकाभावात् ।

नच प्रारब्धनिवृत्तिरेव तन्निवर्तिकेति वाच्यम् । कार्यनाशस्य कारणनाशकत्वायोगात् । अतिव्याप्तिप्रसङ्गात् । प्रमाणशून्यत्वाच्च ।

नच पूर्वज्ञानमेव तन्निवर्तकमिति वाच्यम् । तस्य शक्तिनिवृत्तावेवोपक्षीणत्वात् ।

नच स्वरूपात्मकज्ञानमेव तन्निवर्तकमिति वाच्यम् । तस्य तदविरोधित्वाभ्युपगमात् । अन्यथापसिद्धान्तापत्तेः ।

द्वितीये, ज्ञानेनाविद्यानिवृत्त्यभावपत्ते ज्ञानस्यैव वैयर्थ्यापत्तिः । अनिर्मोक्षप्रसङ्गश्च । "तमेव विदित्वातिमृत्युमेती"त्यादिश्रुतिव्याकोपश्च । तदर्थशास्त्रारम्भवैयर्थ्यं च ।

किंच, विरोधिसाक्षात्कारोदये सर्वथा लेशतोऽप्यविद्यानुवृत्त्यसंभव एवेत्यकामेन त्वयाङ्गीकरणीयम् । अन्यथा कृतनिदिध्यासनस्य ब्रह्मसाक्षात्कारोदयेन सविलासाविद्यानिवृत्तिरिति सिद्धान्तभङ्गः स्यात् ।

एतेन क्षालितलशुनभागानुवृत्तिर्लशुनवासनाकल्पाऽविद्यासंस्कारानुवृत्तिरिति पक्षोऽपि निरस्तः । दोषसाम्यात् । नहि सूर्योदये लेशतोऽपि तमोऽनुवृत्तिः केनचिदनुन्मत्तेन दृष्टा श्रुता चोपपत्ता वेति भावः ।

ननु दग्धपटन्यायेनानुवृत्ता मूलाविद्येवेति चेत्र । अनिवृत्तिप्रसङ्गस्य पूर्वमेवोक्तत्वात् । दृष्टान्तवैषम्याच्च । दग्धपटस्याच्छादनादिकार्यकारित्वासंभवात् । अस्य तु पूर्ववत् सर्वकार्यकारित्वस्य प्रत्यक्षप्रमाणसिद्धत्वात् ।

नचान्यदृष्टैव तस्य कार्यकारित्वमिति वाच्यम् । तर्हि द्वैतस्य सत्त्वं तव श्रीमुखेनैव सिद्धम् । अद्वैतभङ्गात् । शास्त्रप्रमाणशून्यत्वाच्च ।

किंच, का वाऽविद्यानिवृत्तिः । आत्मस्वरूपैव, तदन्या वा ।

नाद्यः । तस्याः पूर्वमेव सिद्धत्वेन ज्ञानस्य वैयर्थ्यप्रसङ्गात् ।

द्वितीये । सती वासती वोभयात्मिका वानिर्वाच्या वा ।

नाद्या । अद्वैतभङ्गात् ।

न द्वितीया । ज्ञानसाध्यत्वायोगात् । निवर्त्याभावाच्चिवर्तकस्य ज्ञानस्य दिवसे दीपस्येवान्धकाराभावाद्वैयर्थ्यमेव ।

नापि तृतीया । इतरेतरविरोधात् ।

नापि चरमा । अनिर्वाच्यस्य सादेरज्ञानोपादानकत्वनियमेन मुक्तावपि तदुपादानाज्ञानानुवृत्त्यापत्तेः । ज्ञाननिवर्त्यत्वापत्तेश्च ।

नच प्रकारचतुष्टयोत्तीर्णपञ्चमप्रकारा इति । आनन्दबोधोक्तेरिति वाच्यम् । प्रमाणशून्यत्वात् ।

तस्माज्जीवन्मुक्तिरिति परिभाषामात्रैव । जन्मान्धस्य कमलनयनसमाख्यावत्, दरिद्रस्य लक्ष्मीनिधादिसमाख्यावच्चोपहासमात्रत्वात् । प्रारब्धेन कर्मणा निबध्यमानानां तत्कार्यभूतकाममात्सर्यादिवह्निप्रज्वलतां सतां मुक्तावयमित्यज्ञजनवाचकतामात्रत्वात् ।

ननु "तस्य तावदेव चिर"मिति श्रुतिसिद्धत्वाज्जीवन्मुक्तेः कथमप्रामाण्यमिति चेत् । गतत्रपाणां न किमप्यशोभनम् । श्रुतौ "यावद्व विमोक्ष्ये"इति प्राणाभावं, "चिर"मिति कालव्यवधानं "संपत्स्ये" इति भविष्यन्निर्देशं च कण्ठरवेणोच्चार्यमाणमपश्यतां यथाकामं प्रजल्पतां किमप्याश्चर्यं नास्तीति भावः ।

ननु जीवन्मुक्त्यनङ्गीकार उपदेष्टृभावेन वेदान्तसंप्रदायोच्छेदापत्तिः । सा च तवाप्यनिष्टतमा । अज्ञस्योपदेष्टृत्वाचार्यत्वाद्यसंभवात् । "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन" इति श्रीमुखोक्तेः । अन्यथाचार्याणामनाप्तत्वप्रसङ्गेन तदुक्तसिद्धान्तस्याप्रामाण्यमावयोः समानं स्यात् । इति चेत्र । आवयोः सामान्याभावात् । अस्मत्सिद्धान्ते संप्रदायप्रवर्तकानां नित्यमुक्तश्रीपुरुषोत्तमपरिजनावतारत्वाच्छ्रीभगवदवतारवत्, "स एकधा भवति त्रिधा भवती"ति श्रुतेरुक्तलक्षणध्रुवस्मृतिमत आचार्यस्योपदेष्टृत्वसंभवाच्चोक्तदोषावकाशः ।

ननु तव मतेऽविद्यानिवृत्तिः किमात्मिकाभिप्रेतेति चेत् । शृणु । अनादिमायासंबन्धो वा, तत्प्रयुक्तानादिकर्मात्मको बन्धो वा, वेदान्तसाध्यज्ञानप्रागभावो वा, विद्याशब्दवाच्यः । तस्य निवृत्तिर्ध्वंसाभावः । स च यावदात्मद्रव्यनवच्छिन्नैकरसब्रह्मसाक्षात्कारानुभूतिसमानाधिकरणाभावरूपानन्दलक्षणो धर्मविशेषः । तदाश्रयो मुक्त इति यावत् ।

किंच, उक्तलक्षणानुभूतेरंशत्रयत्वेऽपि न केनाप्यंशेनानित्यत्वादिकल्पनावकाशः । क्रियाजन्यत्वाभावात् ।

तथाहि, क्रिया तावच्चतुर्विधा । उत्पादनप्रापणसंस्कारविकारभेदात् । तत्रोत्पादनं नाम प्रागभावप्रतियोगित्वे सत्युत्तरकालिकसत्तायोगः । यथा कटादेः । प्रापणं चाप्राप्तिक्रियायोगः । यथा रूपादिसाक्षात्कारः । संस्करणं च वस्तुनि योग्यताविशेषसंपादनम् । तद् द्विविधम् । गुणाधानं, मलापकर्षणं च । तत्र गुणविशेषसंबन्धरूपं गुणाधानम् । यथोपनयनादियोगः, राज्याद्यभिषेको वा । दोषध्वंसलक्षणं द्वितीयम् । यथा दर्पणादिमलनिराकरणम् । विक्रिया च परिणामादिमत्त्वम् । यथा दुग्धादीनां दध्याद्यवस्थापत्तिरिति विवेकः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अंशत्रैविध्यं च । आश्रयविषयस्वरूपभेदात् । तत्र न तावदाश्रयतोऽस्याः क्रियाजन्यत्वम् । आश्रयस्तावत् प्राप्तः क्षेत्रज्ञः, स च नोत्पाद्यः । अजत्वात् । यच्चैवं, तच्चैवम्, । कटादिवत् । इत्यनुमानात् । "न जायते म्रियते वा विपश्चि"दित्यादिश्रुतेः । "न जायते म्रियते वा कदाचि"दित्यादिस्मृतेश्च ।

नापि प्राप्तियोग्यत्वम् । स्वरूपत्वेन नित्यप्राप्तत्वात् । प्रमाणान्तरानपेक्षत्वाच्च । यच्चैवं, तच्चैवम् । रूपादिवत् । इत्यनुमानात् । नहि कस्यचित् स्वप्राप्तौ प्रमाणापेक्षा । संशयाद्यभावात् । नायं विकारार्हः । षड्विकारशून्यस्वरूपत्वात् । जीवात्मा न विकार्यः । षड्विकारहीनत्वात् । यच्चैवं, तच्चैवम् । दध्यादिवत् । इत्यनुमानात् । "अविकार्योऽयमुच्यत"इति श्रीमुखोक्तेश्च ।

नाप्ययमात्मा संस्कार्यः । ज्ञानादिनित्यगुणाश्रयत्वानुमानात् । गुणानाशानर्हत्वात् । राजादिवत् । "नहि विज्ञातेर्विपरिलोपो विद्यते" । अविनाशित्वात् । "अविनाशी वा अरे आत्मानुच्छित्तिधर्मा,""ज्ञोऽत एवे"त्यादिशास्त्राच्च । नित्यनिर्दोषविज्ञानरूपत्वेन मलापकर्षणानर्हत्वात् । यच्चैवं, तच्चैवम् । दर्पणादिवत् । इत्यनुमानात् । "आत्मापहतपाप्मे"त्यादिश्रुतेश्च ।

नन्वात्मनोऽनाद्यविद्यायोगोऽभिप्रेतो न वा ।

नाद्यः । अविद्यासंपर्के सति तथाभूतायाः दोषापकर्षणसंस्कार्यतायाः अवश्यंभावात् । तथात्वे वासंस्कार्यत्वसिद्धान्तभङ्गात् ।

न द्वितीयः । बन्धमोक्षव्यवस्थानुपपत्तेः । तत्प्रतिपादकश्रुतिव्याकोपाच्च । बन्धमोक्षाभ्युपगमसिद्धान्तभङ्गाच्च । इति चेत् । स्वरूपे पूर्वोक्तप्रकारेण सर्वदोषसंसर्गाभावेऽपि तद्धर्मभूतज्ञानमनादिकर्मात्मकाविद्यया संकुचितं घटस्थदीपप्रभेव । सैव बद्धावस्थेति भण्यते । "अज्ञानेनावृतं ज्ञान"मिति श्रीमुखोक्तेः । भूयो भगवत्प्रसादादुक्तलक्षणबन्धनस्य तत्साक्षात्कारेण ध्वंसे सति पूर्वोक्तलक्षणो मोक्ष इति सर्वं समञ्जसमिति भावः ।

तस्मादाश्रयतोऽस्याः क्रियाजन्यत्वासंभवाच्च तत्तार्हत्वमिति सिद्धम् ।

नापि विषयतोऽस्यास्तत्तायोगः । विषयश्चास्याः परब्रह्मभूतो भगवान् वासुदेवः । तस्य क्रियाजन्यत्वाभावे विवाद एव नास्ति । सर्वास्तिकानां संमतत्वात् । सर्वशास्त्रसिद्धत्वात् ।

नापि स्वरूपतोऽस्यास्तत्तायोगः संभावनार्हः । तस्याः शाश्वतत्वात् । "नहि विज्ञातु"रिति श्रुतेः । आत्मनिष्ठा ब्रह्मविषयिकानुभूतिः शाश्वती । स्वाभाविकत्वात् । क्रियाजन्यत्वाभावाच्च । आत्मवत् । इत्यनुमानात् । "आनन्दं ब्रह्मणो विद्वा"निति मन्त्राच्च ।

ननु ब्रह्मानुभूतिः शाश्वती चेत् । तर्हि सर्वैरुपलभ्येत । न तु तदस्ति । तस्माच्च तथेति । योग्यानुपलब्धिप्रमाणबाध्यत्वात् तत्साध्यस्य । अन्यथा सर्वमोक्षप्रसङ्गः ।

किंच, तस्या मानसक्रियारूपध्यानजन्यत्वेनोक्तहेत्वोरभयोरप्याभासत्वम् । ब्रह्मानुभूतिर्न शाश्वती । मानसव्यापारात्मकध्यानजन्यत्वात् । बाह्यक्रियाजन्यस्वर्गादिवत् । इत्यनुमानात् । इति चेत् । शङ्काविषयासिद्धेः । तथाहि शङ्का वयमेऽत्र नित्यमुक्तो बद्धमुक्तश्च । तयोर्नित्यानुभूतिलक्षणमोक्षस्य निर्विवादत्वात् । बद्धस्य तत्र विषयत्वात् कथं शङ्कागन्धावकाशः । अन्यथा ब्रह्मणोऽपि सर्वस्य बाह्याभ्यन्तरव्यापकत्वेन प्राकृतैरनुपलब्ध्याऽसत्त्वमिति शङ्केत देवानांप्रियैः ।

नच ब्रह्मणः "सत्यं ज्ञानम्," "सदेव सोम्येदमग्र"इत्यादिशास्त्रसिद्धत्वाच्चोक्तशङ्कावकाश इति वाच्यम् । प्रकृतेऽपि तुल्यत्वात् । "सदा पश्यन्ति सूरय" इत्यादिना नित्यमुक्तानां "सर्वं हि पश्यः पश्यती"त्यादिना बद्धमुक्तानां च ब्रह्मानुभूतेस्तथात्वश्रवणात् ।

यदप्युक्तम् । मोक्षस्य मानसक्रियात्मकध्यानजन्यत्वेन हेत्वोराभासत्वमिति । तत् तुच्छम् । ध्यानस्य तत्प्रतिबन्धकनिवर्तनेनैवोपयोगित्वाच्च तज्जन्यत्वं मोक्षस्येति नोक्तदोषः । प्रत्युत ध्यानजन्यत्वादिति त्वत्प्रयुक्तहेतोरेव स्वरूपासिद्धत्वेनाभासत्वसिद्धिः ।

किंच, त्वदुक्तहेतोस्त्वत्पक्षेऽपि व्याप्तिर्वक्तुं शक्या । दोषसाम्यात् ।

तथाहि, त्वत्पक्षे वृत्तेः प्रत्यक्षहेतुत्वेन तस्या अपि मानसव्यापारत्वसाम्येन दोषस्तुल्य एव ।

तस्माच्च केनाप्यंशेनाच्च विकारित्वजन्यत्वानित्यत्वादिशङ्कावकाश इति सिद्धम् ।

ननु ध्यानस्य ब्रह्मसाक्षात्कारहेतुत्वे ब्रह्मण उपास्यत्वप्रसङ्गः । उपास्यस्यैव ध्येयत्वात् । तथात्वे च ब्रह्मत्वहानिप्रसक्तिः । "यद्वाचानभ्युदितं येन वागभ्युद्यते । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते,"इत्यादिनोपास्यस्य कण्ठरवेण ब्रह्मत्वनिषेधश्रवणात् । इतिचेत् । तस्य प्रतीकाद्युपासनाविषयनिषेधपरत्वात् । तथाहि,लोकवेदयोरारोप्यस्यैव निषेधविषयत्वं न प्रमाणसिद्धस्य वस्तुन इति न्यायस्य सर्वसंमतत्वात् । यथा नद्यादिजले गङ्गात्वमारोप्य नेयं गङ्गेति निषेधसंभवो न साक्षाद्वागीश्यां विष्णुपादोदक्याम् । तस्याः प्रत्यक्षागमप्रमाणसिद्धत्वात् । यथा वः पञ्चाग्निविद्यायां पुरुषादावुपासनार्थमग्नित्वमारोपितं रूपकेण छन्दोगैः । तन्निषेधश्चेदनर्हत्वाभावात्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संभवत्येव, न तु प्रत्यक्षप्रमाणसिद्धे हवनीयाग्नौ तत्स्पर्शावकाशो वक्तुं शक्यः,प्रामाणिकत्वात् । एवं प्रकृतेऽप्यतद्वस्तुषु "नाम ब्रह्मेत्युपासीत","मनो ब्रह्मेत्युपासीते"त्यादिश्रुत्योपासनार्थं नामादिप्रतीकेष्वारोपितब्रह्मत्वस्यैव निषेधान्न सर्वेश्वरे साक्षाद्ब्रह्मणि श्रीवासुदेवे तत्स्पर्शावसरः । सर्ववेदान्तसिद्धत्वात् । तज्जिज्ञासार्थमेव शारीरकशास्त्रारम्भाच्च । तच्च नेदं ब्रह्मेतीदंकारेणैव द्योत्यमानम् । नात्र श्रुतत्यागाश्रुतकल्पनोद्भावनावकाशः । इदंकारास्पदसर्वप्रपञ्चात्यन्तविलक्षणं ब्रह्मेति श्रुत्यर्थः । इतरथा प्रमाणसिद्धस्यापि निषेध्ययोगे ब्रह्मस्वरूपस्यापि निषेधविषयत्वं शक्यते वक्तुम् । तुल्ययोगक्षेमत्वात् ।

ननु ब्रह्मण उपास्यत्वे मोक्षे सशरीरत्वप्रसङ्गः । तथात्वे च "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति,""अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत" इत्यन्वयव्यतिरेकश्रुतेर्मोक्षेऽपि दुःखानुभवो दुर्वारः । तथात्वे च कथमिव नित्यानवच्छिन्नानन्दापत्तिसंभव इति चेन्न । उक्तश्रुतेः कर्मजन्यप्राकृतशरीरविषयकत्वात् । अप्राकृतशरीरस्य श्रुतिप्रमाणसिद्धत्वात् । "जक्षत् क्रीडन् रममाण" इति श्रुतेः । अन्यथा परमेश्वरेऽपि तत्संभावना कल्पनीया पण्डितंमन्यैर्वेदाभिमानिभिः । तथात्वे च सार्वज्ञ्यनित्यत्वाद्यसंभवेनेश्वरत्वस्यैव नाशात् । "यः सर्वज्ञः", "एष सर्वेश्वरः सत्यकामः","य आत्मापहतपाप्मे"त्यादिश्रुतिकदम्बलक्षणं,

"सर्वज्ञः सर्वकृत् सर्वशक्तिज्ञानबलादिमान् ।
अन्यूनश्चाप्यवृद्धश्च स्वाधीनोऽनादिमान् वशी ॥
कामतन्द्राभयक्रोधकामादिभिरसंयुतः ।
निरवद्यः परः प्राप्तैर्निरधिष्ठोऽवरक्रमः" ॥

"वेदाहं समतीतानि,""मत्तः परतरं नान्यत्,""अतोऽस्मि लोके वेदे च,""सर्वस्य चाहं हृदी"त्यादिस्मृतिकदम्बलक्षणं च तत्प्रतिपादकं सर्वमपि वेदान्तशास्त्रं दत्ततिलाञ्जलि स्यात् । तथात्वे च बाह्यपक्षात् को विशेषः । शून्यस्य सत्तायास्तैरप्यङ्गीकृतत्वात् । इत्यलं प्रासङ्गिकविस्तरेण ॥ ७ ॥

मुक्तस्य श्रीपुरुषोत्तमानुग्रहादाविर्भूतसत्यसंकल्पत्वमुक्तम् । अथ तदेव निरूपयति ॥

॥ संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

एवं हि मुक्तमधिकृत्य छान्दोग्ये श्रूयते । "स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वाऽन्यैर्वा ज्ञातिभिर्वा स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ती"त्यादि । तत्र संशयः । किमत्र मुक्तस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षात् संकल्पात्,उत परमात्मन इव संकल्पमात्रादेव भवतीति । तत्र किं युक्तम् । निमित्तान्तरसहितादिति । लोके राजादीनां सत्यसंकल्पतयोक्तानामपि कार्यनिष्पत्तौ प्रयत्नान्तरसापेक्षत्वदर्शनात् । संकल्पादेवेत्यवधारणं तु विज्ञानघन एवेतिवद्व्यविष्यतीति प्राप्ते,आह । "संकल्पादेवे"ति । संकल्पमात्रादेवास्य तत्प्राप्तिः । कुतः । तच्छ्रुतेः । "संकल्पादेवास्य पितरः समुत्तिष्ठन्ती"त्यवधारणेन संकल्पादेव पित्रादिसमुत्थानश्रवणात् । अन्यथावधारणबाधः ।

नचेह सत्यकामत्वाद्युपन्यासबलमुक्तस्य प्रयत्नान्तरसापेक्षत्वे वाक्यान्तरं दृश्यते, येनावधारणस्य विज्ञानघन एवेतिवद् व्यवस्था स्यात् । लोके हि सत्यसंकल्पत्वाभावादेव प्रयत्नान्तरापेक्षत्वम् । नहि परमात्मव्यतिरिक्तः कश्चित् सत्यसंकल्पोऽस्ति । मुक्तस्य तु तत्प्रसादात् तत्साम्यमुपागतस्य तथात्वमस्त्येवेति ॥ ८ ॥

॥ अत एवानन्याधिपतिः ॥ ९ ॥

अत एव परमात्मानुग्रहाविर्भूतसत्यसंकल्पादेव हेतोर्मुक्तोऽनन्याधिपतिः श्रीवासुदेवेतराधिपतिशून्यः । "स स्वराड् भवती"ति श्रुतेः । स्वेनान्तरात्मना परब्रह्मणा राजत इति स्वराट् ।

नचाऽधिपतिसामान्यनिषेधदर्शनात् संकोचे मानाभावाच्च कथमुक्तार्थसिद्धिरिति शङ्क्यम् । अन्यपदसंनिवेशस्यैव संकोचे दृढप्रमाणत्वात् । अन्यथानधिपतिरित्येव सूत्रितं स्यादित्यर्थः ॥ ९ ॥

अथ तस्य दिव्यविग्रहवत्त्वप्रदर्शनायारभ्यते । तत्रैवं विशय्यते । किं मुक्तस्य देहेन्द्रियादियोगोऽस्ति, उत नास्ति । आहोस्विदस्ति संकल्पमस्ति च नास्ति चेति । तत्र प्रथमं बादरिपक्षमाह ॥

॥ अभावं बादरिराह ह्येवम् ॥ १० ॥

मुक्तस्य न सन्ति देहादयः । अन्यथा दुःखादियोगस्याप्यनपहतिप्रसङ्गात् । हि यतो मुक्तस्यैवं शरीराद्यभावं "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति,""अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत"इत्यन्वयव्यतिरेकाच्छ्रुतिराहेति बादरिराचार्यो मन्यते ॥ १० ॥

॥ भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिराचार्यो मुक्तस्य देहादयः सन्तीति मन्यते । कुतः । "स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्चैकादशधा स्मृतः" ।

"शतं च दश चैकश्च सहस्राणि च विंशतिः" ।

इति हि भूमविद्यायां मुक्तस्य विविधः कल्प आम्नायते । नहि विविधशरीरमन्तरैकस्याच्छेद्यस्याणुपरिमाणस्यात्मनो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैविध्यं संभवति । अशरीरत्वश्रुतिस्तु कर्मजन्यशरीराभावपरेत्युक्तं पुरस्तात् ॥ ११ ॥

अथ स्वमतेन सिद्धान्तमाह ॥

॥ द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

अतः "संकल्पादेवे"ति श्रुतेः ।

यद्वा "मनसैवैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके"इत्यशरीरस्यैव भोगश्रुतेः । "स एकधा भवती"ति सशरीरत्वश्रुतेश्च । इत्युभयविधश्रवणाद्धेतोर्मुक्तस्य शरीरादिभावाभावोभयविधं भगवान् बादरायणो मन्यते । तथात्वे चोभयश्रुतिर्नो विरुध्यते । तत्र दृष्टान्तमाह । "द्वादशाहव"दिति । यथा "द्वादशाहमृद्विकामा उपेयुः,""द्वादशाहेन प्रजाकामं याजये"दित्युपैतियजतिभ्यां चोदनाभ्यां संकल्पभेदेन द्वादशाहस्य सत्रत्वमहीनत्वं च भवति । तद्वत् शरीरादिमत्त्वं तदभावश्च संकल्पाधीनं मुक्तस्येति ज्ञेयम् । तस्य सत्यसंकल्पत्वयोगेऽपि शरीरादिसर्जने प्रवृत्त्यभावादित्यर्थः ॥ १२ ॥

ननु देहाद्यभावे कथं भोगसिद्धिरिति चेत् तत्राह ॥

॥ तन्वभावे संध्यवदुपपत्तेः* ॥ १३ ॥

स्वसृष्टतन्वाद्युपकरणाभावे भगवत्सृष्टैरुपकरणैरेव मुक्तस्य सर्वभोगोपपत्तेः । संध्यवत्, स्वप्नवत् । यथा स्वप्ने पूर्वोक्तरीत्या परमेश्वरसृष्टैः शरीरेन्द्रियैर्बहुजीवो भुङ्क्ते । तद्वन्मुक्तोऽपीत्यर्थः ।

नच स्वप्ने जीव एव सृष्टेति वाच्यम् । पूर्वमेव विस्तरशो निरस्तत्वात् ।

तस्माल्लीलाप्रवृत्तपरमेश्वरसृष्टैरेव पितृलोकादिभिर्मुक्तस्यापि लीलारसास्वाद उपपद्य इत्यर्थः ॥ १३ ॥

॥ भावे जाग्रद्वत् ॥ १४ ॥

स्वसृष्टतन्वादिपितृलोकादिभावे जाग्रत्पुरुषभोगवन्मुक्तस्य लीलारसभोगोपपत्तिः । यथा परमेश्वरो लीलारसं भुङ्क्ते, तथा मुक्तानामपि पितृलोकादिकं स्वलीलार्थं स्वयमेव सृष्ट्वा स्वसृष्टैकदेशमुक्तपितृलोकादिकं तान् भोजयति, कदाचिच्च मुक्ता अपि परमात्मप्रसादेनाविर्भूतसत्यसंकल्पवत्तया परमात्मलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृजन्तीति सर्वमनवद्यम् ॥ १४ ॥

अथ मुक्तात्मनोऽणुपरिमाणत्वेऽपि धर्मभूतज्ञाने रसार्थं वसुदेवादिपितृलोकं सृजते, सृष्ट्वा च तैर्मनुष्यधर्मलीलतामनेकशरीरव्यापकतामाह ॥

॥ प्रदीपवदावेशस्तथाहि दर्शयति ॥ १५ ॥

यथा प्रदीप एक एवैकस्मिन् प्रदेशे स्थितोऽपि स्वप्रभयानेकदेशेष्वाविशति, तथासौ स्वरूपेणाणुत्वेऽपि धर्मभूतचैतन्येनानेकशरीरेषु व्याप्य तद्गतभोगादिकमनुभवतीति । तथाहि दर्शयति श्रुतिः । "स चानन्त्याय कल्पत" इति । ज्ञानसंकोचाभ्यां बद्धमुक्तयोर्विशेषो बोध्यः । तत्र बद्धस्य भोगेन तत्कर्मैव नियामकं, मुक्तस्य तु परमात्मसंकल्पायत्तस्वेच्छैवेति भावः ॥ १५ ॥

ननु "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तर"मिति श्रुत्या ज्ञानसामान्यनिषेधात् कथं मुक्तस्य सर्वज्ञत्वमिति चेत् । तत्राह ॥

॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

नहीदं वाक्यं मुक्तविषयं, यत् स्वाप्ययसंपत्त्योरन्यतरापेक्षं तत्, तत्र स्वाप्ययः सुषुप्तिः, "स्वमपीतो भवति तस्मादेनं स्वपिती"त्याचक्षत इति श्रुतेः । संपत्तिश्चोत्क्रान्तिः, मरणमिति यावत् । "वाङ्मनसि संपद्यत"इत्यारभ्य"तेजः परस्यां देवताया"मिति श्रवणात् । हि यतः सुषुप्तिमरणयोर्जीवस्य विशेषज्ञानाभाववत्त्वं मोक्षदशायां सर्वज्ञत्वं च श्रुत्यैवाविष्कृतम् । तथाहि । छान्दोग्ये "नाहं खल्वयं संप्रत्यात्मानं जानात्यमुमहमस्मीति, नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामी"ति सुषुप्तौ विशेषज्ञानाभावं निरूप्य तत्रैव वाक्ये मुक्तमधिकृत्य "स वाशेष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोक" इति सर्वत्वमाह । "सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश"इति श्रुत्यन्तरात् । मरणे च "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती"ति विशेषज्ञानाभावमाह । विनश्यति, न पश्यतीत्यर्थः ।

एवं च प्राज्ञेनात्मनेति श्रुतेः सुषुप्तिमरणयोरन्यतरविषयकत्वाच्च मुक्तपरत्वमिति मुक्तस्य ज्ञानानन्त्यमुपपन्नम् ॥ १६ ॥

॥ जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

मुक्तैश्वर्यं किं जगत्सृष्ट्यादिव्यापाररूपमुत परमात्मस्वरूपगुणाद्यनुभवरूपमिति संशये किं तावद्युक्तम् । साम्यश्रुतेर्जगत्सृष्ट्यादिव्यापाररूपमिति प्राप्ते, आह । "जग"दिति । मुक्तस्यैश्वर्यं जगत्सृष्टिस्थितिनियमनरूपव्यापारेतरं भवितुमर्हति । कुतः । प्रकरणात् । सृष्ट्यादिनिर्णयेषु सर्वत्र परस्यैव प्रक्रान्तत्वात् । "सदेव सोम्येदमग्र आसीत्," "तदैक्षत बहु स्यां प्रजायेय,""यतो वा इमानि भूतानि जायन्ते," "ब्रह्म वा इदमग्र आसीत्,""आत्मा वा इदमेक एवाग्र आसी"दित्यादिश्रुतेः ।

किंच,तत्र तत्र जगद्व्यापारप्रकरणे मुक्तस्यासंनिहितत्वादपि न तस्य सृष्ट्यादिकर्तृत्वमिति ॥ १७ ॥

*—दुपपद्यत इति शंकरसंमतः पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ प्रत्यक्षोपदेशान्नेति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

ननु प्रत्यक्षश्रुतिः "स स्वराड् भवति, तस्य सर्वेषु लोकेषु कामचारो भवती,"ति, छान्दोग्ये,"आप्नोति स्वाराज्यं सर्वेऽस्मै देवा बलिमावहन्ती"ति,तैत्तिरीयके च, मुक्तस्य प्रत्यक्षेण श्रुत्या जगद्व्यापारोपदेशात् तद्वर्जनं न युक्तमिति चेन्न । कुतः । आधिकारिकमण्डलस्थोक्तेः । आधिकारिका लोकनीयमानाधिकारे नियुक्ता हिरण्यगर्भादयः, तेषां मण्डलानि लोकाः, तत्स्थभोगा मुक्तानुभवविषया इति तया श्रुत्योच्यते ॥ १८ ॥

एवं तर्हि बद्धमुक्तयोः को वा विशेष इति चेत् । तत्राह ॥

॥ विकारावर्ति च तथाहि स्थितिमाह ॥ १९ ॥

चशब्दोऽवधारणे । विकारे जन्मादिषट्के न वर्तत इति विकारावर्ति, जन्मादिविकारशून्यं, निखिलदोषास्पृष्टमाहात्म्यं निरतिशयकल्याणगुणाब्धिसविभूतिकं ब्रह्मैव मुक्तोऽनुभवति । तद्विभूत्यन्तर्गतत्वेन हिरण्यगर्भादिभोगानुभवोऽप्यविरुद्धः । तदाश्रितत्वात् सर्वस्येति भावः । तथाहि मुक्तस्थितिमाह श्रुतिः । "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथ सोऽभयं गतो भवति", "रसो वै सः", "रसं ह्येवायं लब्ध्वानन्दीभवति, येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात"मित्याद्या । सविभूतिकब्रह्मानुभवितृत्वेनैव सर्वानुभवितृत्वात् । "मुक्तस्य तस्य सर्वेषु लोकेषु कामचारो भवती"त्याद्युच्यते ॥ १९ ॥

॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

परस्यैव जगत्कारणत्वसर्वनियन्तृत्वादिव्यापारस्वातन्त्र्यं,-नमुक्तस्य । तस्य तु परब्रह्मानुभवितृत्वमेवेत्येवं श्रुतिस्मृती दर्शयतः । "एष सर्वेश्वरः,""एष भूताधिपतिः,""एष भूतपालः," "एष सेतुर्विधरण एषां लोकानामसंभेदाय,""एतस्य वा अक्षरस्य प्रशासने गार्गि,"इत्यादिश्रुतिः । "अहं सर्वस्य प्रभवः," "मत्तः परतरं नान्य"दित्यादिस्मृतिः ॥ २० ॥

इतश्च जगद्व्यापारेतरं मुक्तैश्वर्यमित्याह ॥

॥ भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

यथा सर्वज्ञत्वसर्वशक्तिमत्त्वादिसद्गुणाश्रयस्य परमात्मनः स्वविभूत्यनुभवानन्दरूपभोगः सदैकरसः,तथा तन्मात्रभोगः सविभूतिब्रह्मयाथात्म्यानुभवितॄणां मुक्तानामपि समः । न तु स्वरूपेण ते ब्रह्मसमाः । तेषामणुपरिमाणकत्वात् । अतो भोगमात्रसाम्याल्लिङ्गाज्जगद्व्यापारवर्जं मुक्तानामैश्वर्यमिति निश्चीयते। "ब्रह्मविदाप्नोति पर"मित्युपक्रम्य "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिते"ति, "परमं साम्यमुपैती"त्यादिश्रुतिभ्यः । मात्रपदान्मुक्तगम्यैश्वर्यस्य स्वतन्त्रताव्यावृत्तिरपि बोध्यते ॥ २१ ॥

तत्र पुनरावृत्तिशङ्कां वारयति ॥

॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

एवं परब्रह्मोपासनया विमुक्तनिःशेषाविद्यामार्गस्य तत्तल्लोकं गतस्य तद्भावमापन्नस्य न तस्मात् पुनरावृत्तिर्भवति । कुतः । शब्दात् । "एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते,""स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते,""एतदमृतमभयमेतत् परायणमेतस्मान्न पुनरावर्तन्ते," "अस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्", "तयोर्ध्वमायन्नमृतत्वमेति," "इह न पुनरावृत्ति"रित्यादिपरविद्याप्रकरणगतश्रुतिभ्यः ।

"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।
तच्च प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" ॥

इत्यादिस्मृतिभ्यश्च ।

अयं भावः । यथा परमात्मा सर्वज्ञः सर्वकारणं सर्वसद्गुणसमुद्रः सर्वनियन्तेति शब्दादवगम्यते तथा निवृत्तसर्वाविद्यस्य परब्रह्मभावापन्नस्य मुक्तस्यापि न पुनरावृत्तिरिति शब्दादेवावगम्यते । परमात्मापि तादृशं स्वातिप्रियं ज्ञानिनं लब्ध्वा न कदाचिदपि स्वस्मात् स्वलोकाच्च वियोक्तुमिच्छतीति स्वयमेवाह ।

"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" ।

इत्यादिना । सूत्रावृत्तिः शास्त्रपरिसमाप्तिद्योतनार्था ।

भगवद्भावसंपत्तिं मुक्तिं श्रुतिमुखेरिताम् ।
फलं वेदान्तशास्त्रस्य प्रावोचद्बादरायणः ॥
सर्ववेदशिरोगीतस्तर्कातीतश्च यो हरिः ।
ध्यानेन मुक्तिदः कृष्णस्तं मुकुन्दं गुरुं श्रये ॥
कृष्णाज्ञया श्रुतिपथं प्रथितुं पृथिव्यां
तैलङ्गविप्रवरमूर्तिधरः स देवः ।
निम्बार्कदेशिकवरः करुणाकरः श्री-
चक्रावतारमतिराद्रियतां मदुक्तिम् ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणकमलमकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य चतुर्थपादविवृतिः समाप्ता ॥ ४ ॥

समाप्ता चेयं वृत्तिर्वेदान्तकौस्तुभप्रभा नामेति शिवम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ उपसंहारवर्णनम् ॥

कारंकारं स्वगुरुचरणेभ्यो नमस्कारवारं
धारंधारं शिरसि शरणं तद्गतं भूतिसारम् ।
श्यामं धामोरसि तदनिशं भावये भागधेयं
नन्दादीनामपिच निखिलं राधिकागोपिकायाः ॥ १ ॥

पश्यन्नस्या अप्रसिद्धिं प्रभाया
दौर्लभ्यं चानङ्कनात् पुस्तकस्य ।
निम्बार्काचार्योक्तसिद्धान्तभूयं
विद्वच्चेतोहारितां दृश्यतां च ॥ २ ॥

विद्यादिमां बुधाली
काशीविद्यासुधाब्धिभायोगात् ।
इत्याशाभृदकार्षं
मुद्रणमस्या विपश्चितां तुष्टै ॥ ३ ॥

मुद्रादोषान्मुद्रकाणां प्रमादा-
दस्मद्भान्त्या चेद् भवेत् क्वाप्यशुद्धिः ।
सा चन्तव्या कोविदैरत्यशुद्ध-
मेकं पुस्तं प्राप्य जातप्रवृत्तेः ॥ ४ ॥

संग्रामानेकजेता रिपुनिकरशिरःकर्तनाबाप्तकीर्तिः
खड्गक्षेपेषु दक्षः पतति विधिवशाद् यस्य कस्यापि घातात् ।
इन्द्रादीनां प्रशास्ता गुरुरपि भवति भ्रान्तिभाक् क्वापि काले
ब्रूतार्या मेयबुद्धिर्मतिमदनुचरस्तर्हि कोऽहं वराकः ॥ ५ ॥

श्रीमद्गुरुश्चन्द्रवणिग्वरस्य
सरस्वतीसद्मनि विद्यमानम् ।
लब्धं मया पुस्तकमेतदर्हं
विद्वद्विनोदस्य, तदाङ्कि यत्नात् ॥ ६ ॥

अमुद्रितं क्वापि तथोत्तमं य-
न्मनीषिणां स्यादुपकारकारि ।
तन्मुद्रणमित्थं स्वपतेर्नियोगः
प्रवृत्तिहेतुर्भ्रमसिन्धुसेतुः ॥ ७ ॥

आशापूर्तिकरः परः स जगतां संप्रार्थितोमेश्वरः
साहाय्यं तनुतां प्रचारणविधौ गङ्गाच्छहारोऽमरः ।
अस्यामेयगुणस्य पादयुगलेऽत्यन्तं निपत्यार्थये
विद्वद्वृन्दहृदङ्गरोचनमियं कुर्याच्चिराय प्रभा ॥ ८ ॥
काशीस्थराजसंबन्धिपाठशालीयपण्डितः ।
सांख्यशास्त्राधिकार्यस्मि चिपाठी नाम वेचनः ॥ ९ ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्ल्केसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता

तत्र द्वासप्ततिमादिपरिच्छेदाः

७२–किं च विवेकविद्योतितधिया दृष्टे तु नियतक्रमानुसारिण्या आत्मसमवेतप्रत्यक्षज्ञानपरम्परायास्तदुत्पादकस्य जगदीश्वरस्यैवागाधज्ञानदयादिकमनुमातुं युज्यते । तदीयैः सर्वज्ञत्वसर्वशक्तिमत्त्वदयालुत्वादिभिरेव च सर्वाणि प्राकृतिककार्याण्युपपादयितुं शक्यन्ते । अचेतनजडद्रव्यसत्तानुमापकं लिङ्गं तु लोके न क्वाप्युपलभ्यते । न वा तेन विना किमपि प्राकृतिकं कार्यमनुपपद्यमानं प्रतीयते येन तत्सत्ता ऽऽक्षिप्येत । यदि कोऽपि विद्वान् क्षोदिष्ठस्यापि प्राकृतिकविषयस्य सिद्धेर्जडद्रव्यसापेक्षत्वं तत्सत्तया लघिष्ठयाऽपि युक्त्या संभवं तादृशपदस्य किमप्यर्थबोधजनकत्वं वा केनापि प्रकारेण प्रदर्शयेत् तर्हि तदहं सस्पृहं जिज्ञासे । मम त्वेतत् सर्वमसंभाव्यमेव प्रतिभाति । यतो ह्यस्य न तावज्ज्ञाननिमित्तत्वं शक्यते वक्तुं येन तत्सत्ता कल्प्येत । अस्मादादिसंबन्धेन ज्ञाननिमित्तत्वाभावस्य पूर्वमेव स्पष्टं प्रतिपादितत्वात् । ईश्वरं प्रत्यप्यस्य ज्ञानजननिमित्तत्वाभावस्यैव युक्तत्वात् । तस्य स्वयमेव सर्वकार्यकर्तृत्वे सिद्धे तस्य निमित्तान्तरापेक्षित्वस्य कल्पनाया वैयर्थ्यात् । तदभ्युपगमेऽप्यस्मन्मतानपाय एवेत्यन्यदेतत् ॥

७३–अथ लोकप्रसिद्धानि भौतिकाधिकरणसत्ताकल्पनाबीजानि तेषां क्रमिकनिराकरणस्यानुसारेण तन्मूलके ऽर्थे विद्वज्जनसंमत्यपचयक्रमाश्च निरूप्यन्ते । तथाहि । आदौ जना रूपपरिमाणादिनिखिलगुणानां निस्संशयमात्मबहिर्भूतत्वमवजगमुः । येन तादृशगुणानामात्मातिरिक्तस्य किंचिदचेतनाधिकरणस्य कल्पनं तेषामावश्यकं प्रत्येष्ट । आधारमन्तरा गुणावस्थानस्याऽसंभवात् । ततश्च दिनेषु गच्छत्सु रूपरसशब्दादिनैमित्तिकगुणानामात्ममात्रनिष्ठत्वमवगम्य केवलमाकारगत्यादिसांसिद्धिकगुणानामेव भौतिकाधिकरणकत्वं नैमित्तिकानां तेषां त्वात्माधिकरणकत्वमेवेत्यमन्यन्त । परं तूक्तपरिच्छेदेषु सर्वविधस्यापि गुणस्यात्मातिरिक्ताधिकरणकत्वाभावस्य सम्यङ्निरूपितत्वाज्जडद्रव्यकल्पनं निर्मूलम्, तस्य गुणाधिकरणतायाः वस्तुस्थितिबाधितत्वात् सर्वथा ऽसंभाव्यं चेत्यन्यत्र विस्तरः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

७४—यद्यपि भौतिकाधिकरणवादिन इदमनुमन्येरन् यज्जडद्रव्यं प्रत्यक्षीभूतानां गुणानामालम्बक्षते एव कल्पितमासीत्। परं तु तत्साधकहेतुष्वेव मिथ्याभूतेषु तत्साध्यमधिकरणमप्यलीकमेवेति न कोपि तत्र कथमपि विश्वासं कुर्यात्। तथापीदं मिथ्यामतं लौकिकजनमनस्सु तथा बद्धमूलमस्ति यथा तत्सर्वात्मनोन्मूलयितुं न शक्यते। अत एव तत्प्रतिपाद्ये वस्तुनि स्वयमशक्यरक्षणे ऽलीके ऽपि तद्वाचकं शब्दं तावत्परिहर्तुं न शक्नुमः। परं त्विदं न जानीमो यत्कीदृशमत्तानिमित्ताद्धनियताधेबोधनतात्पर्येण तादृशं पदं प्रयुञ्ज्म इति। यतो ह्यस्मदात्मगतानामिन्द्रियजन्यानां कल्पनाजन्यानां वा ज्ञानानां कृतमस्माज्ज्ञानविशेषात्तादृशमचेतनमज्ञेयनिमित्तमनुमीयेत। किं वा सर्वसमर्थे परमेश्वरे तथाभूतं वस्त्वन्तरं संभवति यत्स्वप्रेरित एवेश्वरो ऽस्मासु ज्ञानानि जनयतीत्यत्रास्मानीपदपि विश्वासयेत्॥

७५—अस्ति चैतन्मिथ्यामतप्राबल्यस्य परमविलक्षणं परिशोचनीयं चोदाहरणं यन्मनुष्यास्सत्स्वपि विवेकप्रमाणेषु विप्रतिपत्तेषु जडधीपरिकल्पितस्याऽनिर्वाच्यस्य किंचिन्मात्रापरपर्यायस्य कृते ईदृशं महान्तमनुरागं दधते। यत्प्रवेशनेन ते आत्मानमीश्वरविधानात्तिरोधातुं सर्वस्मात्सांसारिककार्याच्च तं परमात्मानं निस्सारयितुं कामयन्तइव प्रतीयन्ते। परं तु यद्यपि यूयं कामं जडद्रव्यसत्ताविषयकं स्वविश्वासं स्थिरीकर्तुं सर्वा युक्तीः परित्यज्य तथाविधवस्तुसत्तासंभावनामात्राश्रितं स्वमतं गोपायितुं च प्रयतध्वे, तादृशदुर्बलसंभावनां प्रमाणीकर्तुं निरन्तरमयौक्तिककल्पनारचनाश्चानुवर्तध्वे, तथापि सर्वोयं प्रयासः परमेश्वरात्मगतकतिपयाज्ञेयज्ञानविशेषसाधनपर एव प्रतीयते। यतो ह्यीश्वरं प्रति ज्ञाननिमित्तानीति भवदुक्तिगतानां तादृशनिमित्तानां वास्तविकत्वे तु तेषां ज्ञानातिरिक्तत्वं संभावयितुं न शक्यते॥

७६—सन्तु वेश्वरात्मनि तथाभूतानि ज्ञानानि। जडद्रव्यपदेनापि वा तान्यभिधीयन्ताम्। नात्रास्माकमाग्रहः। यच्च तेषु परिमाणगत्यादिज्ञेयगुणानामज्ञेयाधिकरणत्वमारोप्यते तदेव खल्वसंभवं प्रतीयते। अचेतनवस्तूनां ज्ञेयगुणगणाधारतायास्तुतरां बाधितत्वात्॥

केशवशास्त्री
मराठोपाह्वः

THE VRITTA-RATNAKARA
OR
THE OCEAN OF METRES
BY
KEDARA BHATTA.

(Continued from page 46.)

In the Vaitáliya there should be six instants in the odd quarters and eight in the even; but they should not be continuously all long, or all short (but should be intermixed with both long and short letters). Also there should be a Ra-gaṇa, a short and a long letter at the end of each quarter. The even instants should not be dependents on the following odd ones *i. e.* the even and odd instants should not together form a long instant.

That is called the Aupachhandasika where there is a Ra-gaṇa and Ya-gaṇa at the end of the quarters of the Vaitáliya, the rest (standing) as before (*i. e.* like the Vaitália) That is an Apátaliká, when there is a Bha-gaṇa at the end of the quarters of the Vaitáliya, the rest (standing) as before.

That is a Dakshinántiká when in all the quarters of the Vaitáliya, the second short is joined to the third (and thereby together form one long letter).

That is an Udíchyavritti when in the odd quarter of the Vaitáliya the second short is joined to the following one (and thereby together form one long letter). That is a Práchyavritti when in the even quarters of the Vaitáliya, the fifth short is joined to the fourth (which thereby form one long letter).

That is a Pravrittaka the odd and even quarters of which are that of the Udíchyavritti and the Práchyavritti (*i. e.* the odd quarters are those of the Udíchyavritti and the even quarters of the Práchyavritti). That is the Aparántiká, all the quarters of which are made of the even quarters of the Pravrittaka. That is the Chárúhásiní whose quarters are made of the odd quarters of the Pravrittaka.

Here ends the section on the Vaitáliya class of metres.

That is a Vaktra, in the Anushṭubh class of metres, (having eight letters in each quarter) in which there is no Na-gaṇa or Sa-gaṇa immediately after the first letter; and there is a Ya-gaṇa immediately after the fourth letter.

That is a Pathyá-vaktra, in the odd quarters of which there is a Ja-gaṇa after the fourth letter, (the rest being like the Vaktra).

That is a Viparíta-Pathya-Vaktra, in the odd quarters of which there is a Ja-gaṇa after the fourth letter (the rest as the Vaktra).

That is a Chapalá-Vaktra, in the odd quarters of which

CC-0. Sampurnanand University Collection. Digitized by eGangotri

there is a *Na-gaṇa* after the fourth letter, (the rest as Vaktra).

That is the Yugma-vipulá, in the even quarters of which the seventh letter is short (the rest as Vaktra).

In the opinion of the sage Saitava, Vípulá is that, in all the quarters of which the seventh letter is short, (the rest as Vaktra).

That is the *Bha-Vipulá* in all the quarters of which there is a *Bha-gaṇa* after the fourth letter.

Similarly that is the Ra-Vipulá in all the quarters of which there is a *Ra-gaṇa* after the fourth letter. In the same way that is a Na-Vipulá after the fourth letter of whose quarters there is a Na-gaṇa.

And so Ta-Vipulá when a Ta-gaṇa follows the fourth letter; and so on.

Here ends the section on the Vaktraclass of metres.

That is the Achala-dhriti each of whose quarters consists of sixteen short instants.

That is the Mátrásamaka (having sixteen inants in each quarter) of which the ninth instant is short and the final letter long.

That is the Viśloka, in each of whose quarters there is a *Ja-gaṇa* or a *Na-gaṇa* and a short letter after the fourth instant.

That is the Navásiká in each of whose quarters there is a *Ja-gaṇa* or a *Na-gaṇa* after the eighth instant.

That is the *Chitrá* whose fifth, eighth, and ninth instants are short.

That is the Upachitrá when the ninth and tenth instants form one (long) letter.

That is the Pádákulakam whose quarters have the characterstic of the quarters of the Mátra-sama and other metres mentioned in this section. Its metre is irregular except that each quarter contains (an equal) number of instants (numbering sixteen).

The difference between the number of letters in a metre and the numbers of its instants gives the number of its long letters, in that metre. The difference between the number of the instants and the long letters gives the number of letters; or the difference between the number of letters and long letters gives the number of its short letters. The half of the difference between the numbers of instants and short letters in a metre gives the number of its long letters. The above is a certain and invariable rule (for knowing the numbers of letters, long letters, and instants of a metre).

Here ends the section on the Mátrásamaka class of metres.

That is the Sikhá whose first half has twenty-eight short letters and one long letter at the end; and whose second half consists of thirty short letters together with a long letter at the end.

That is the Khanjá whose halves are like those of the Sikhá with the order inverted (*i. e.* the first half of the Sikhá being the second half of the Khanjá and *vice versâ*).

That is the Anangakríṛá whose first half consists of sixteen long letters and whose second half of thirty-two short letters.

That is the Atiruchirá, in both the halves of which there are twenty-seven short letters, with a long letter at the end (of each half).

Here ends the Second Chapter of the Vrittaratnákara.*

IN THE UKTÁ,

[1] That metre is called Śrí whose quarter consists of a long letter.

IN THE ATYUKTÁ,

That is Strí whose quarter consists of two long letters.

IN THE MADHYÁ,

That is Nârî whose quarter consists of one Ma-gaṇa.

That is Mrigí whose quarter consists of one Ra-gaṇa.

IN THE PRATISHṬHÁ,

That is Kanyá whose quarter consists of one long letter and one Ma-gana.

IN THE SUPRATISHṬHÁ,

That is Pankti whose quarter consists of one Bhagaṇa and two long letters.

IN THE GÁYATRÍ,

That is Tanumadhyâ whose quarter consists of one Ta-gaṇa and one Ya-gaṇa.

That is Saśivadaná whose quarter consists of a Nagaṇa and a Ya-gaṇa.

That is Vasumatî whose quarter consists of a Tagaṇa and a Sa-gaṇa.

That is Vidyullekhâ whose quarter consists of two Ma-gaṇas.

IN THE USHṆIH,

That is Madalekhâ whose quarter consists of a Magaṇa and a Sa-gaṇa.

That is Kumáralalitá, whose quarter consists of a Yagaṇa, a Sa-gaṇa and a long letter.

* FOOT NOTE. In p. 45, of the July number of the Pandit, for "one Pavvi" read "Pabyeka." In the same page, for "Rules for one hunred..." read "This work consists of one hundred and thirty-six verses (slokas) in six chapters." The author of the Setu holds that this numbering is an effective step in the prevention of subsequent additions and interpolations in the body of the work.

[1] As the Metres treated in this chapter are Sama, the characteristic of one quarter will answer for the remaining three.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

IN THE ANUSHṬUBH,

That is Chitrâ whose quarter consists of two Bha-gaṇas and two long letters.

That is Vidyunmâlâ whose quarter consists of two Ma-gaṇas and two long letters.

That is Máṇavaka whose quarter consists of a Bha-gaṇa, a Na-gaṇa, a short and a long letter.

That is Hansarutam whose quarter consists of a Ma-gaṇa, a Na-gaṇa and two long letters.

That is Samánikâ whose quarter has a Ra-gaṇa, a Ja-gaṇa, a long and a short letter.

That is Pramáṇikâ whose quarter consists of a Ja-gaṇa, a Ra-gaṇa, a short and a long letter,

That is ‖ Vitâna which is different from the last two.

That is Náráchaka whose quarter consists of a Ta-gaṇa, a Ra-gaṇa, a short and a long letter.

IN THE VRIHATI,

That is Halamukhî which has a Ra-gaṇa, a Na-gaṇa and a Sagaṇa *(in each of its quarters.*)*

That is Bhujagasiśubhritá which has two Na-gaṇas and a Ma-gaṇa,

That is Bhadriká which has a Ra-gaṇa, a Na-gaṇa and (again) a Ra-gaṇa.

IN THE PANKTI,

That is known as Suddhavirâṭ, which has a Ma-gaṇa a Sa-gaṇa, a Ja-gaṇa and a long letter.

That is Paṇava which has a Ma-gaṇa, a Na-gaṇa a Ya-gaṇa and a long letter.

That is Mayûrasáriṇî which has a Ra-jaṇa, a Ja-gaṇa (again) a Ra-gaṇa and a long letter.

That is Rukmavatî which has a Bha-gaṇa, a Ma-gaṇa, a Sagaṇa and a long letter.

That is Mattá which is made of a Ma-gaṇa, a Bha-gaṇa, a Sa-gaṇa and a long letter.

That is Manoramá which has a Na-gaṇa, a Ra-gaṇa a Ja-gaṇa and a long letter.

That is Upasthitá which has a Ta-gaṇa, two Ja-gaṇas and a long letter.

That is Dipakamálá which has a Bha-gaṇa, a Ma-gaṇa, a Ja-gaṇa and a long letter.

That is Hansî whose quarter is made of a Ma-gaṇa, a Bha-gaṇa, a Na-gaṇa and a long letter.

IN THE TRISHṬUBH,

That is Indravajrá whose quarter has two Ta-gaṇas, a Ja-gaṇa and two long letters.

That is Upendravajrá whose quarter has a Ja-gaṇa, a Ta-gaṇa, (again) a Ja-gaṇa and after that two long letters.

That is an Upajáti whose quarters are made of the quarters of the preceeding two.

Similarly they give the name of Upajáti to any metre that is made of the quarters of different other metres.

* Upajátis are of fourteen different kinds, inasmuch as, one of the two (Indravajra and Upendravajrá) may be found in one, two, or three quarters of the Upajáti

That is Sumukhî which has a Na-gaṇa, two Ja-gaṇas, a short and a long letter.

That is Dodhaka which has three Bha-gaṇas, and two long letters.

That is Sálinî which has a Ma-gaṇa, two Ta-gaṇas and two long letters; the cæsura falling on the fourth letter and the seventh following it.

That is Vátormi which has a Ma-gaṇa, a Bha-gaṇa, a Ta-gaṇa and two long letters.

That is Bhramaravilasita which has a Ma-gaṇa, a Bha-gaṇa, a Na-gaṇa, a short and a long letter.

That is Rathoddhatá which has a Ra-gaṇa, a Na-gaṇa, (again) a Ra-gaṇa, a short and a long letter.

That is Svágatá which has a Ra-gaṇa, a Na-gaṇa, a Bha-gaṇa and two long letters.

That is Vrittá which has two Na-gaṇas, a Sa-gaṇa and two long letters.

That is Bhadriká which has two Na-gaṇas, a Ra-gaṇa, a short and a long letter.

That is Śyeniká which has a Ra-gaṇa, a Ja-gaṇa, (again) a Ra-gaṇa, a short and a long letter.

That is Mauktika-Málá which has a Bha-gaṇa, a Ja-gaṇa, a Na-gaṇa and two long letters.

That is Upasthitam which has a Ja-gaṇa a Sa-gaṇa, a Ta-gaṇa and two long letters.

That is Upachitrá which has three Sa-gaṇas, a short and a long letter.

That is Śrî which has a Bha-gaṇa, a Ta-gaṇa, a Na-gaṇa, and two long letters, the cæsural pause being on the fifth letter and the sixth following it.

‖ The author of the Setu holds that all Anushtubhs except Samánikâ and Pramáṇikâ are Vitánas. The quarter in which the characteristic of the Vitána is given in the text, consists of a Jagaṇa, a Tagaṇa, and two long letters.

* The words "in each of its quarters" are understood here and are to be repeated at the end of each of the following rules throughout the chapter except where mention of the quarter is otherwise made.

* If I stand for Indravajrá and U for Upendravajrá, then the fourteen kinds of Upajátis made of the two metres will be represented as follows. U I I I, I U I I, U U I I, I I U I, U I U I, I U U I, I I I U, I U I U, U U I U, I I U U, U I U U, I U U U.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

*That is Kupurusha-janíṭá which has two Na-gaṇas, a Ra-gaṇa, and two long letters.

*That is Anavasitá which has two Na-gaṇas, a Ya-gaṇa, a Bha-gaṇa and two long letters.

*That is Vidhvankmálá which has three Ta-gaṇas and two tong letters.

That is Sándrapadá which has a Bha-gaṇa, a Ta-gaṇa, a Na-gaṇa, a long and a short letter.

*That is Síkhandita which has a Ja-gaṇa, a Sa-gaṇa, a Ta-gana and two long letters.

IN THE JAGATÍ,

That is called Chandra-vartma which is made of a Ra-gaṇa, a Na-gaṇa, a Bha-gaṇa and a Sa-gaṇa.

That is called Vanśastha which has a Ja-gaṇa, a Ta-gaṇa, (again) a Ja-gana and a Ra-gaṇa.

That is Indra-vansá which is made of two Ja-gaṇas, a Ja-gaṇa and a Ra-gaṇa.

That is known as Totaka which consists of four Sa-gaṇas.

That is Drutavilambita which has a Na-gaṇa, two Bha-gaṇas and a Ra-gaṇas.

That is Puṭa which has two Na-gaṇas, a Ma-gaṇa, and a Ya-gaṇa; the cæsural pause being on the eighth letter and the fourth (following it).

That is [1]Pramuditavadaná which has two Na-gaṇas, and two Ra-gaṇas.

That is Kusuma-vichitrá which has a Na-gaṇa, a Ya-gaṇa, (again) a Na-gaṇa and (again) a Ya-gaṇa.

That is Jaloddhatagati, which has a Ja-gaṅa, a Sa-gaṇa (again) a Ja-gaṇa and (again) a Sa-gaṇa; with the cæsural pause on the sixth letter and the sixth (following it).

That is Bhujanga-prayáta which is made of four Ya-gaṇas.

That is Sragvinî which consists of four Ra-gaṇas.

That is Priyamvadá which consists of a Na-gaṇa, a Bha-gaṇa, a Ja-gaṇa and a Ra-gaṇa.

That is Maṇi-málá which consists of a Ta-gaṇa, a Ya-gaṇa, (again) a Ta-gaṇa and (again) a Ya-gaṇa, the cæsural pause falling on every sixth letter (*i. e.* on the sixth and twelfth letter of each quarter).

That is called Lalitá, by the wise, which has a Ta-gaṇa, a Bha-gaṇa, a Ja-gaṇa, and a Ra-gaṇa.

That is Pramitákshará which is made of a Sa-gaṇa, a Ja-gaṇa and (again) two Sa-gaṇas.

That is Ujvalá which has two Na-gaṇas, a Bha-gaṇa and a Ra-gaṇa.

That is Vaisvadevî which has two Ma-gaṇas and two Ya-gaṇas; the cæsural pause being on every fifth letter and on every seventh following it.

That is Jaladhara-málá which has a Ma-gaṇa, a Bha-gaṇa, a Sa-gaṇa, and (again) a Ma-gaṇa; the cæsural pause being on every fourth letter and on every eighth following it.

That is Vanamáliká which has a Na-gaṇa, a Ja-gaṇa, a Bha-gaṇa, and a Ya-gaṇa.

That is Prabhá which has two Na-gaṇas and two Ra-gaṇas; the cæsural pause falling on every seventh letter and the fifth following it.

That is Málatî which has a Na-gaṇa. two Ja-gaṇas and a Ra-gaṇa.

(To be continued.)

*The metres marked with an asterisk are Supplementary. They are given in the appendix in the printed edition of Calcutta, but are omitted in the lithographed edition of Benares.

[1]Pramuditavadaná, Prabhá, and Gauri do not differ except in their cæsura. Some hold that they are one and the same, but variously named by different writers.

List of books printed and published and for sale by E. J. Lazarus and Co., at the Medical Hall Press, Benares.

ATMA PURAṆA, containing all the principles of Vedántism by ŚANKARÁNAND, with commentary by *Kákárám Pandit.* Rs. 16-0. Published at Ganpat Krishanaji's, Bombay.

THE LAGHU KAUMUDI, a Sanskrit grammar with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College Benares. *Price* 8 *Rs.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚAŚTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares. Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚAŚTRI. Rs. 1-4.

VAIŚESHIKA APHORISMS OF KANÁDA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADEŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNAVA DHARMA PRAKÁS ARTHAT MANUSMRITI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230, Price, Rs. 5-0-0.

SIDDHÁNTA KAUMUDI VYÁKARAN, 8vo demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 101. Benares, October 1st, 1874. Vol. IX.

काशिकायाः

द्वितीयाध्यायस्य तृतीयः पादः ।

सप्तम्यधिकरणे च ॥ ३६ ॥

सप्तमी विभक्तिर्भवत्यधिकरणे कारके, चकाराद्दूरान्तिकार्थेभ्यश्च । कटे आस्ते । शकटे आस्ते । स्थाल्यां पचति । दूरान्तिकार्थैभ्यः खल्वपि । दूरे ग्रामस्य । अन्तिके ग्रामस्य । आभ्याशे ग्रामस्य । दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयो भवन्ति, द्वितीयातृतीयापञ्चमीसप्तम्यः ॥ सप्तमीविधाने ल्यब्लोपे न्यधिकरणस्य कर्मण्युपसंख्यानम् ॥ * ॥ अधीती व्याकरणे । परिगणिती यास्निके । आम्नाती छन्दसि ॥ साध्वसाधुप्रयोगे च सप्तमी वक्तव्या ॥ * ॥ साधुर्देवदत्तो मातरि । असाधुः पितरि ॥ कारकाहीणां च कारकत्वे सप्तमी वक्तव्या ॥ * ॥ चट्टेषु भुञ्जानेषु दरिद्रा आसते । ब्राह्मणेषु तरत्सु वृषला आसते ॥ अकारकार्हाणां चाकारकत्वे सप्तमी वक्तव्या ॥ * ॥ दरिद्रेष्वासीनेषु चट्टा भुञ्जते । वृषलेष्वासीनेषु ब्राह्मणास्तरन्ति ॥ तद्विपर्यासे च सप्तमी वक्तव्या ॥ * ॥ चट्टेष्वासीनेषु दरिद्रा भुञ्जते । ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति ॥ निमित्तात्कर्मसंयोगे सप्तमी वक्तव्या ॥ * ॥

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु * चमरीं हन्ति सीम्नि पुष्कलको हतः ॥

यस्य च भावेन भावलक्षणम् ॥ ३७ ॥

सप्तमीति वर्तते । भावः क्रिया । यस्य च भावेन यस्य च क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी विभक्तिर्भवति । प्रसिद्धा च क्रिया क्रियान्तरं लक्षयति । गोषु दुह्यमानासु गतः । दुग्धास्वागतः । अग्निषु हूयमानेषु गतः । हुतेष्वागतः । भावेनेति किम् । यो जटाभिः स भुङ्क्ते । पुनर्भावग्रहणं किम् । यो भुङ्क्ते स देवदत्तः ॥

षष्ठी चानादरे ॥ ३८ ॥

पूर्वेण सप्तम्यां प्राप्तायां षष्ठी विधीयते, चकारात्सापि भवति । अनादराधिक्ये भावलक्षणे भाववतः षष्ठीसप्तम्यौ विभक्ती भवतः । रुदतः प्राव्राजीत् । रुदति प्राव्राजीत् । क्रोशतः प्राव्राजीत् । क्रोशति प्राव्राजीत् । क्रोशन्तमनादृत्य प्रव्रजित इत्यर्थः ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ ३९ ॥

षष्ठीसप्तम्यौ वर्तेते । स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत इत्येतैर्योगे षष्ठीसप्तम्यौ विभक्ती भवतः । गवां स्वामी । गोषु स्वामी । गवामीश्वरः । गोष्वीश्वरः । गवामधिपतिः । गोष्वधिपतिः । गवां दायादः । गोषु दायादः । गवां साक्षी । गोषु साक्षी । गवां प्रतिभूः । गोषु प्रतिभूः । गवां प्रसूतः । गोषु प्रसूतः । षष्ठ्यामेव प्राप्तायां पक्षे सप्तमीविधानार्थं वचनम् ॥

आयुक्तकुशलाभ्यां चासेवायाम् ॥ ४० ॥

षष्ठीसप्तम्यौ वर्तेते । आयुक्तो व्यापारितः * कुशलो निपुणः ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः । आसेवा तात्पर्यम् । आयुक्तः कटकरणस्य ।

* बालेष्विति पाठान्तरम् ।

* व्यापृत इति बहुषु पुस्तकेषु पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आयुक्तः कटकरणे । कुशलः कटकरणस्य । कुशलः कटकरणे । आसेवायामिति किम् । आयुक्तो गौः शकटे । ईषदयुक्त इत्यर्थः । तत्र सप्तम्येवाधिकरणे भवति ॥

यतश्च निर्द्धारणम् ॥ ४१ ॥

षष्ठीसप्तम्यौ वर्तेते । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणम् । यतो निर्द्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवतः । मनुष्याणां क्षत्रियः शूरतमः । मनुष्येषु क्षत्रियः शूरतमः । गवां कृष्णा संपन्नक्षीरतमा । गोषु कृष्णा संपन्नक्षीरतमा । अध्वगानां धावन्तः शीघ्रतमाः । अध्वगेषु धावन्तः शीघ्रतमाः ॥

पञ्चमी विभक्ते ॥ ४२ ॥

यतश्च निर्द्धारणमिति वर्तते । षष्ठीसप्तम्यपवादो योगः । विभागो विभक्तम् । यस्मिन्निर्द्धारणाश्रये विभक्तमस्ति ततः पञ्चमी विभक्तिर्भवति । माथुराः पाटलिपुत्रेभ्यः सुकुमारतराः । आढ्यतराः ॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ॥ ४३ ॥

साधु निपुण इत्येताभ्यां योगे ऽर्चायां गम्यमानायां सप्तमी विभक्तिर्भवति, न चेत् प्रतिः प्रयुज्यते । मातरि साधुः । पितरि साधुः । मातरि निपुणः । पितरि निपुणः । अर्चायामिति किम् । साधुर्भृत्यो राज्ञः । तत्त्वकथने न भवति । अप्रतेरिति किम् । साधुर्देवदत्तो मातरं प्रति ॥ अप्रत्यादिभिरिति वक्तव्यम् ॥ * ॥ साधुर्देवदत्तो मातरं परि । मातरमनु ॥

प्रसितोत्सुकाभ्यां तृतीया च ॥ ४४ ॥

प्रसित उत्सुक इत्येताभ्यां योगे तृतीया विभक्तिर्भवति, चकारात्सप्तमी च । प्रसितः प्रसक्तो, यस्तत्र नित्यमेवावबद्धः स उच्यते । केशैः प्रसितः । केशेषु प्रसितः । केशैरुत्सुकः । केशेषूत्सुकः ॥

नक्षत्रे च लुपि ॥ ४५ ॥

तृतीयासप्तम्यावनुवर्तेते । लुबन्तावत्रशब्दात् तृतीयासप्तम्यौ विभक्ती भवतः । पुष्येण पायसमश्नीयात् । पुष्ये पायसमश्नीयात् । मघाभिः पललौदनम् । मघासु पललौदनम् । नक्षत्रइति किम् । पञ्चालेषु वसति । लुपीति किम् । मघासु यज्ञः । इह कस्माच्च भवति । अद्य पुष्यः । अद्य कृत्तिका । अधिकरणइति वर्तते । वचनं तु पक्षे तृतीयाविधानार्थम् ॥

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥४६॥

प्रातिपदिकार्थः सत्ता । लिङ्गं स्त्रीलिङ्गपुंलिङ्गनपुंसकानि । परिमाणं, द्रोणः खारी आढकम् * । वचन,मेकत्वद्वित्वबहुत्वानि । मात्रशब्दः प्रत्येकमभिसंबध्यते । प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे प्रथमा विभक्तिर्भवति । प्रातिपदिकार्थमात्रे । उच्चैः । नीचैः । लिङ्गग्रहणं किम् । कुमारी, वृत्तः, कुण्डम्, इत्यत्रापि यथा स्यात् । परिमाणग्रहणं किम् । द्रोणः, खारं, आढकम्, इत्यत्रापि यथा स्यात् । वचनग्रहणं किम् । एकत्वादिपूक्तेष्वपि यथा स्याद् । एकः, द्वौ, बहवः । प्रातिपदिकग्रहणं किम् । निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तं ततो ऽपि यथा स्यात् । प्रलम्बते । अध्यागच्छति ॥

* 'परिमाणं प्रस्थादि' इति पा० २ ।

संबोधने च ॥ ४७ ॥

आभिमुख्यकरणं संबोधनम्, तदधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोतीति वचनमारभ्यते । संबोधने च प्रथमा विभक्तिर्भवति । हे देवदत्त । हे देवदत्तौ । हे देवदत्ताः ॥

सा ऽऽमन्त्रितम् ॥ ४८ ॥

संबोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं भवति । तथा चैवोदाहृतम् । आमन्त्रितप्रदेशा आमन्त्रितं पूर्वमविद्यमानवद् इत्येवमादयः * ॥

एकवचनं संबुद्धिः ॥ ४९ ॥

आमन्त्रितप्रथमाया यदेकवचनं तत्संबुद्धिसंज्ञं भवति । हे पटो । हे देवदत्त । संबुद्धिप्रदेशा एङ्ह्रस्वात्संबुद्धेरित्येवमादयः ॥

षष्ठी शेषे ॥ ५० ॥

कर्मादिभ्यो ऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसंबन्धादिः शेषस्तत्र षष्ठी विभक्तिर्भवति । राज्ञः पुरुषः । पशोः पादः । पितुः पुत्रः ॥

ज्ञो ऽविदर्थस्य करणे ॥ ५१ ॥

† ज्ञानातेरविदर्थस्याज्ञानार्थस्य करणे कारके षष्ठी विभक्तिर्भवति । सर्पिषो जानीते । मधुनो जानीते । सर्पिषा करणेन प्रवर्ततइत्यर्थः । प्रवृत्तिवचनो ज्ञानातिरविदर्थः । अथ वा मिथ्याज्ञानवचनः । सर्पिषि रक्तः प्रतिहतो वा । चित्तभ्रान्त्या तदात्मना सर्वमेव बाह्यं प्रतिपद्यते । मिथ्याज्ञानमज्ञानमेव । अविदर्थस्येति किम् । स्वरेण पुत्रं जानाति ॥

अधीगर्थदयेशां कर्मणि ॥ ५२ ॥

शेषइति वर्तते । अधीगर्थाः स्मरणार्थाः । दय दानगतिरक्षणेषु । ईश ऐश्वर्ये । एतेषां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति । मातुरध्येति । मातुः स्मरति । सर्पिषो दयते । सर्पिष ईष्टे । मधुन ईष्टे । कर्मणीति किम् । मातुर्गुणैः स्मरति । शेषइति किम् । मातरं स्मरति ॥

क्तस्य प्रतियत्ने ॥ ५३ ॥

* 'आमन्त्रितस्य च' इत्येवमादयः । इति पा० २

† अत्र 'शेषइत्यनुवर्तते' इत्यधिकं क्व चित् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सतो गुणान्तराधानं प्रतियत्नः। करोतेः कर्मणि कारके शेषत्वेन विवक्षिते प्रतियत्ने गम्यमाने षष्ठी विभक्तिर्भवति। एधोदकस्योपस्कुरुते। शस्त्रपत्रस्योपस्कुरुते। प्रतियत्नइति किम्। कटं करोति। कर्मणीति किम्। एधोदकस्योपस्कुरुते प्रज्ञया। शेषइत्येव। एधोदकमुपस्कुरुते ॥

रुजार्थानां भाववचनानामज्वरेः ॥ ५४ ॥

रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। चौरस्य रुजति रोगः। चौरस्यामयत्यामयः। रुजार्थानामिति किम् ॥

यति जीवन्तमानन्दो नरं वर्षशतादपि।
जीव पुत्रक मामेवं तपःसाहसमाचर * ॥

भाववचनानामिति किम्। नदी कूलानि रुजति। अज्वरेरिति किम्। चौरं ज्वरयति ज्वरः ॥ अज्वरिसंतापेरिति वक्तव्यम् ॥ * ॥ चौरं संतापयति तापः। शेषइत्येव। चौरं रुजति रोगः ॥

आशिषि नाथः ॥ ५५ ॥

नाथृ नाथृ याच्ञोपतापैश्वर्याशीःषु पठ्यते, तस्याशीःक्रियस्य कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। सर्पिषो नाथते। मधुनो नाथते। आशिषीति किम्। माणवकमुपनाथति, अङ्ग पुत्रकाधीष्व ॥

जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ ५६ ॥

जासि निप्रहण नाट क्राथ पिष् इत्येतेषां धातूनां हिंसाक्रियाणां कर्मणि कारके षष्ठी विभक्तिर्भवति। जसु हिंसायां, जसु ताडने, इति च चुरादौ पठ्यते तस्येदं ग्रहणं, न दैवादिकस्य जसु मोक्षणे, इत्यस्य †। चौरस्योज्जासयति। वृषलस्योज्जासयति। निप्रहण इति संघातविग्रहीतविषयंस्तयहणम्। चौरस्य निप्रहन्ति। चौरस्य निहन्ति। चौरस्य प्रहन्ति। चौरस्य प्राणहन्ति। चौरस्योच्चाटयति। वृषलस्योच्चाटयति। चौरस्य क्राथयति। वृषलस्य क्राथयति। निपातनाद्वृद्धिः। अयं हि घटादौ पठ्यते, अथ क्रथ क्रथ क्रथ हिंसार्थो इति, तत्र घटादयो मित इति मित्संज्ञायां मितां ह्रस्व इति ह्रस्वत्वं स्यात्। चौरस्य पिनष्टि। वृषलस्य पिनष्टि। हिंसायामिति किम्। धानाः पिनष्टि। शेषइत्येव। चौरमुज्जासयति। एषामिति किम्। चौरं हिनस्ति। निप्रहण इति किम्। चौरं विहन्ति ‡ ॥

* कल्याणी खलु गाथेयं लौकिकी प्रतिभाति मे।
यति जीवन्तमानन्दो नरं वर्षशतादपि ॥
इति पाठान्तरम् ॥

† अत्र 'अहिंसार्थत्वात्, इत्यधिकं क्व चित्।

‡ एषामित्यारभ्य विहन्तीत्यन्तः पाठो बहुषु पुस्तकेषु न दृश्यते।

व्यवहृपणोः समर्थयोः ॥ ५७ ॥

व्यवहृ पण इत्येतयोः समर्थयोः समानार्थयोः कर्मणि कारके षष्ठी विभक्तिर्भवति। द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः। शतस्य व्यवहरति। सहस्रस्य व्यवहरति। शतस्य पणते। सहस्रस्य पणते। आयप्रत्ययः कस्माच भवति। स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते * ॥ समर्थयोरिति किम्। शलाकां व्यवहरति। विक्षिपतीत्यर्थः। ब्राह्मणान् पणायते। स्तौतीत्यर्थः। शेषइत्येव। शतं पणते ॥

दिवस्तदर्थस्य ॥ ५८ ॥

व्यवहृपणिसमानार्थस्य दीव्यतेः कर्मणि षष्ठी विभक्तिर्भवति। शतस्य दीव्यति। सहस्रस्य दीव्यति। तदर्थस्येति किम्। ब्राह्मणं दीव्यति। योगविभाग उत्तरार्थः ॥

विभाषोपसर्गे ॥ ५९ ॥

दिवस्तदर्थस्येति नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्प उच्यते। उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके विभाषा षष्ठी विभक्तिर्भवति। शतस्य प्रतिदीव्यति। सहस्रस्य प्रतिदीव्यति। शतं प्रतिदीव्यति। सहस्रं प्रतिदीव्यति। उपसर्गस्येति किम्। शतस्य दीव्यति। तदर्थस्येत्येव। शलाकां प्रतिदीव्यति ॥

द्वितीया ब्राह्मणे ॥ ६० ॥

ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया विभक्तिर्भवति। ग्रामस्य तदहः सभायां दीव्येयुः। अनुपसर्गस्य षष्ठ्यां प्राप्तायामिदं वचनम्। सोपसर्गस्य तु छन्दसि व्यवस्थितविभाषयापि सिद्धति।

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने ॥ ६१ ॥

प्रेष्य इति इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषस्यैकवचनं, तत्साहचर्यात् ब्रुविरपि तद्विषय एव गृह्यते। प्रेष्यब्रुवोर्हविषः कर्मणः षष्ठी विभक्तिर्भवति देवतासंप्रदाने सति। अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य। अग्नये छागस्य हविषो वपाया मेदसोनुब्रूहि। प्रेष्यब्रुवोरिति किम्। अग्नये छागं हविर्वेषां मेदो जुहुधि। हविष इति किम्। अग्नये गोमयान् प्रेष्य। देवतासंप्रदानइति किम्। माणवकाय पुरोडाशं प्रेष्य ॥ हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः ॥ * ॥ इन्द्राग्निभ्यां छागं हविर्वेषां मेदः प्रस्थितं प्रेष्य ॥

चतुर्थ्यर्थे बहुलं छन्दसि ॥ ६२ ॥

छन्दसि विषये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति† बहुलम्। पुरुषमृगश्चन्द्रमसः। पुरुषमृगश्चन्द्रमसे। गोधा कालका दार्वा-

* अत्र 'न तु व्यवहारार्थस्य' इत्यधिकं क्व चित्।

† अत्र 'देवतासंप्रदाने सति' इत्यधिकं क्व चित्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

घाटस्ते वनस्पतीनाम् । ते वनस्पतिभ्यः । बहुलग्रहणं किम् । कृष्णो राज्ञे, हिमवतो हस्ती ॥ षष्ठ्यर्थे चतुर्थी वक्तव्या ॥ * ॥ या खर्वेण पिबति तस्यै खर्वो जायते । या दतो धावति तस्यै श्यावदन् । या नखानि कृन्तति तस्यै कुनखः । या ऽऽङ्क्ते तस्यै काणः । या ऽभ्यङ्क्ते तस्यै दुश्चर्मा । या केशान् प्रलिखति तस्यै खलतिः । अहल्यायै जारः ॥

यजेश्च करणे ॥ ६३ ॥

यजेर्धातोः करणे कारके छन्दसि बहुलं षष्ठी विभक्तिर्भवति । घृतस्य यजते । घृतेन यजते । सोमस्य यजते । सोमेन यजते * ॥

क्त्वोऽर्थप्रयोगे काले ऽधिकरणे ॥ ६४ ॥

छन्दसि बहुलमिति निवृत्तम् । क्त्वोऽर्थानां प्रत्ययानां प्रयोगे काले ऽधिकरणे षष्ठी विभक्तिर्भवति । पञ्चकृत्वो ऽह्नो भुङ्क्ते । द्विरह्नो ऽधीते । क्त्वोर्थग्रहणं किम् । अह्नि शेते । रात्रौ शेते । प्रयोगग्रहणं किम् । अहनि भुक्तम् । गम्यते हि द्विस्त्रिश्चतुर्वेति, न त्वप्रयुज्यमाने भवति । कालग्रहणं किम् । द्विः कांस्यपात्र्यां भुङ्क्ते । अधिकरणइति किम् । द्विरह्नो भुङ्क्ते । शेषइत्येव । द्विरह्न्यधीते ॥

कर्तृकर्मणोः कृति ॥ ६५ ॥

कृत्प्रयोगे कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति । भवतः शायिका । भवत आसिका । कर्मणि । अपां स्रष्टा । पुरां भेत्ता । वज्रस्य भर्त्ता । कर्तृकर्मणोरिति किम् । शस्त्रेण भेत्ता । कृतीति किम् । तद्धितप्रयोगे मा भूत् । कृतपूर्वी कटम् । भुक्तपूर्वं ओदनम् । शेषइति निवृत्तं, पुनः कर्मग्रहणात् । इतरथा हि कर्तरि च कृतीति ब्रूयात् ॥

उभयप्राप्तौ कर्मणि ॥ ६६ ॥

पूर्वेण षष्ठी प्राप्ता नियम्यते । उभयप्राप्ताविति बहुव्रीहिः । उभयोः प्राप्तिर्यस्मिन्कृति सोयमुभयप्राप्तिस्तत्र कर्मण्येव षष्ठी विभक्तिर्भवति, न कर्तरि । आश्चर्यो गवां दोहो ऽगोपालकेन । रोचते मे ओदनस्य भोजनं देवदत्तेन । साधु खलु पयसः पानं यज्ञदत्तेन । बहुव्रीहिविज्ञानादिह नियमो न भवति । आश्चर्यमिदमोदनस्य नाम पाको ब्राह्मणानां च प्रादुर्भावइति ॥ अकाकारयोः स्त्रीप्रत्ययोः प्रयोगे नेति वक्तव्यम् ॥ * ॥ भेदिका देवदत्तस्य काष्ठानाम् । चिकीर्षा देवदत्तस्य कटस्य ॥ शेषे विभाषा ॥ * ॥ अकाकारयोः स्त्रीप्रत्ययोर्ग्रहणात् तदन्तेनाशेषः स्त्रीप्रत्यय एव गृह्यते । विचित्रा हि सूत्रस्य कृतिः पाणिनेः पाणिनिना वा ॥ के चिदविशेषेणैव विभाषामिच्छन्ति ॥ शब्दानामनुशासनमाचार्येण, आचार्यस्येति वा ॥

* अत्र 'करणइति किम् । अन्यत्र मा भूत्' इत्यधिकं क्व चित् ।

क्तस्य च वर्तमाने ॥ ६७ ॥

न लोकाव्ययनिष्ठेति प्रतिषेधे प्राप्ते पुनः षष्ठी विधीयते । क्तस्य वर्तमानकालविहितस्य प्रयोगे षष्ठी विभक्तिर्भवति । राज्ञां मतः । राज्ञां बुद्धः । राज्ञां पूजितः । क्तस्येति किम् । ओदनं पचमानः । वर्तमानइति किम् । यामं गतः ॥ नपुंसके भावउपसंख्यानम् ॥ * ॥ छात्रस्य हसितम् । मयूरस्य नृत्तम् । कोकिलस्य व्याहृतम् ॥ शेषविज्ञानात् सिद्धम् ॥ * ॥ तथा च कर्तृविवक्षायां तृतीयापि भवति । छात्रेण हसितमिति ॥

अधिकरणवाचिनश्च ॥ ६८ ॥

क्तोधिकरणे चेति वक्ष्यति, तस्य प्रयोगे षष्ठी विभक्तिर्भवति । अयमपि प्रतिषेधापवादो योगः । इदमेषामासितम् । इदमेषां शयितम् । इदमह्नः सृप्तम् । इदं वनकर्षेर्यातम् । इदमेषां भुक्तम् । इदमेषामाशितम् । द्विकर्मकाणां प्रयोगे कर्तरि क्तेति द्वयोरपि षष्ठी द्वितीयावत् । नेता ऽश्वस्य यामस्य चैत्रः । अन्ये प्रधाने कर्मण्याहुः । तदा नेताश्वस्य यामं चैत्रः * ॥

न लोकाव्ययनिष्ठाखलर्थतृनाम् ॥ ६९ ॥

कर्तृकर्मणोः कृतीति षष्ठी प्राप्ता प्रतिषिध्यते । न उ उक अव्यय निष्ठा खलर्थ तृन् इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति । ल र्इति शतृशानचौ कानच्कसू किकिनौ च गृह्यन्ते । ओदनं पचन् । ओदनं पचमानः । ओदनं पेचानः । ओदनं पेचिवान् । पपिः सोमम् । ददिर्गाः । उ । कटं चिकीर्षुः । ओदनं बुभुक्षुः । कन्यामलंकरिष्णुः । इष्णुचोपि प्रयोगे निषेधः । † उक । आगामुकं वाराणसीं रत्त आहुः ॥ उकप्रतिषेधे कर्मेर्भावायामप्रतिषेधः ॥ * ॥ दास्याः कामुकः । अव्यय । कटं कृत्वा । ओदनं भुक्त्वा ॥ अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः ॥ * ॥ पुरा सूर्यस्योदेतोराधेयः । पुरा क्रूरस्य विसृपो विरप्शिन् । निष्ठा । ओदनं भुक्तवान् । देवदत्तेन कृतम् । खलर्थे । ईषत्करः कटो भवता । ईषत्पानः सोमो भवता । तृचिति प्रत्याहारग्रहणं, लटः शतृशानचावित्यारभ्य आ तृनो नकारात् । तेन शानन्चानशशतृतृनामपि प्रतिषेधो भवति । सोमं पवमानः । नटमाघ्नानः । अधीयन् पारायणम् । कर्ता कटान् । वदिता जनापवादान् ॥ द्विषः शतुर्वा वचनम् ॥ * ॥ चौरं द्विषन् । चौरस्य द्विषन् ॥

अकेनोर्भविष्यदाधमर्ण्ययोः ॥ ७० ॥

अकस्य भविष्यति काले विहितस्येनस्तु भविष्यति चाधमर्ण्ये च विहितस्य प्रयोगे षष्ठी विभक्तिर्न भवति । कटं कारको व्रजति । ओदनं भोजको व्रजति । इनः खल्वपि । यामं गमी । यामं

* द्विकर्मकाणां प्रयोगइत्यारभ्य यामं चैत्र इत्येतत्पर्यन्तो ग्रन्थो बहुषु पुस्तकेषु नास्ति ।

† इष्णुचो ऽपि प्रयोगे निषेध इति बहुषु पुस्तकेषु नास्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गामी। आधमर्ण्ये । शतं दायी । सहस्रं दायी । भविष्यदाधमर्ण्ययोरिति किम् । यवानां लावकः । सक्तूनां पायकः । अवश्यं करी कटस्य । इह कस्माच्च भवति वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शक इति । भविष्यदधिकारे विहितस्याकर्म्येदं ग्रहणम् ॥

कृत्यानां कर्तरि वा ॥ ७१ ॥

कर्तृकर्मणोः कृतीति नित्यं षष्ठी प्राप्ता कर्त्तरि विकल्प्यते । कृत्यानां प्रयोगे कर्तरि वा षष्ठी विभक्तिर्भवति, न कर्मणि * । भवता कटः कर्तव्यः । भवतः कटः कर्तव्यः । कर्त्तरीति किम् । गेयो माणवकः साम्नाम् ॥ उभयप्राप्तौ कृत्ये षष्ठ्राः प्रतिषेधो वक्तव्यः ॥ * ॥ क्रष्टव्या ग्रामं शाखा देवदत्तेन । नेतव्या ग्राममज्ञा देवदत्तेन ॥

तुल्यार्थैरतुलोपमाभ्यां तृतीया ऽन्यतरस्याम् ॥ ७२ ॥

तुल्यार्थैः शब्दैर्योगे तृतीया विभक्तिर्भवत्यन्यतरस्यां, पक्षे षष्ठी च, तुलोपमाशब्दौ वर्जयित्वा । शेषे विषये तृतीयाविधानात् तया मुक्ते षष्ठ्येव भवति । तुल्यो देवदत्तेन । तुल्यो देवदत्तस्य । सदृशो देवदत्तेन । सदृशो देवदत्तस्य । अतुलोपमाभ्यामिति किम् । तुला देवदत्तस्य नास्ति । उपमा कृष्णस्य न विद्यते । वेति वर्तमाने ऽन्यतरस्यांग्रहणमुत्तरसूत्रे तस्य चकारेणानुकर्षणार्थम् । इतरथा हि तृतीयानुकृष्येत ॥

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥७३॥

आशिषि गम्यमानायाम् आयुष्य मद्र भद्र कुशल सुख अर्थ हित इत्येतैर्योगे चतुर्थी विभक्तिर्भवति । चकारो विकल्पानुकर्षणार्थः । शेषे चतुर्थीविधानात्तया मुक्ते षष्ठी विभक्तिर्भवति । अत्रायुष्यादीनां पर्यायग्रहणं कर्त्तव्यम् ॥ * ॥ † आयुष्यं देवदत्ताय भूयात् । आयुष्यं देवदत्तस्य भूयात् । चिरं जीवितं देवदत्ताय देवदत्तस्य वा भूयात् । मद्रं देवदत्ताय भूयात् । मद्रं देवदत्तस्य । भद्रं देवदत्ताय । भद्रं देवदत्तस्य । कुशलं देवदत्ताय । कुशलं देवदत्तस्य । निरामयं देवदत्ताय । निरामयं देवदत्तस्य । सुखं देवदत्ताय । सुखं देवदत्तस्य । शं देवदत्ताय । शं देवदत्तस्य । अर्थो देवदत्ताय । अर्थो देवदत्तस्य । प्रयोजनं देवदत्ताय । प्रयोजनं देवदत्तस्य । हितं देवदत्ताय । हितं देवदत्तस्य । पथ्यं देवदत्ताय । पथ्यं देवदत्तस्य । आशिषीति किम् । आयुष्यं देवदत्तस्य तपः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥

* 'न कर्मणी'ति कुत्र चिन्नास्ति ।

† अत्रेत्यारभ्य कर्तव्यमित्यन्तः पाठो बहुत्र नास्ति ।

अथ द्वितीयाध्यायस्य चतुर्थः पादः ॥

द्विगुरेकवचनम् ॥ १ ॥

द्विगुः समासः एकवचनं भवति । एकस्य वचनमेकवचनम् । एकस्यार्थस्य वाचको भवतीत्यर्थः । तदनेन प्रकारेण द्विग्वर्थस्यैकवद्भावो विधीयते, द्विग्वर्थं एकवद्भवतीति । समाहारद्विगोश्चेदं ग्रहणं नान्यस्य । पञ्चपूलाः समाहृताः पञ्चपूली । दशपूली । द्विग्वर्थस्यैकत्वादनुप्रयोगेप्येकवचनं भवति । पञ्चपूलीयं शोभनेति ॥

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ॥ २ ॥

एकवचनमिति वर्त्तते । अङ्गशब्दस्य प्रत्येकं वाक्यपरिसमाप्त्या त्रीणि वाक्यानि संपद्यन्ते । प्राण्यङ्गानां द्वन्द्व एकवद्भवति, तथा तूर्याङ्गानां सेनाङ्गानां च । प्राण्यङ्गानां तावत् । पाणिपादम् । शिरोग्रीवम् । तूर्याङ्गानाम् । मार्दङ्गिकपाणविकम् । वीणावादकपरिवादकम् । सेनाङ्गानाम् । रथिकाश्वारोहम् । रथिकपादातम् । हस्त्यश्वादिषु परत्वात्पशुद्वन्द्वे विभाषयैकवद् भवति । इतरेतरयोगे समाहारे च द्वन्द्वो विहितः, तत्र समाहारस्यैकत्वात्सिद्धमेवैकवचनम् । इदं तु प्रकरणं विषयविभागार्थम् । प्राण्यङ्गादीनां समाहार एव द्वन्द्वः । दधिपयआदीनामितरेतरयोग एव । वृत्तमृगादीनामुभयत्रेति ॥

अनुवादे चरणानाम् ॥ ३ ॥

चरणशब्दः शाखानिमित्तकः पुरुषेषु वर्तते । चरणानां द्वन्द्व एकवद्भवति, अनुवादे गम्यमाने । प्रमाणान्तरावगतस्यार्थस्य शब्देन संकीर्त्तनमात्रमनुवादः । उदगात्कठकालापम् । प्रत्यष्ठात्कठकौथुमम् । कठकालापादीनामुदयप्रतिष्ठे प्रमाणान्तरावगते यदा पुनः शब्देनानूद्येते तदैव मुदाहरणम् । यदा तु प्रथमत एवोपदेशस्तदा प्रत्युदाहरणम् । अनुवादइति किम् । उदगुः कठकालापाः । प्रत्यष्ठुः कठकौथुमाः ॥ स्येणोरद्यतन्यां चेति वक्तव्यम् ॥ * ॥ स्येणोरिति किम् । अनन्दिषुः कठकालापाः । अद्यतन्यामिति किम् । उदयन्ति कठकालापाः ॥

अध्वर्युक्रतुरनपुंसकम् ॥ ४ ॥

अध्वर्युवेदे यस्य क्रतोर्विधानं सो ऽध्वर्युक्रतुः । अध्वर्युक्रतुवाचिनां शब्दानामनपुंसकलिङ्गानां द्वन्द्व एकवद्भवति । अध्वर्युक्रतुरनपुंसकं द्वन्द्व इति गौणो निर्देशः । अर्काश्वमेधम् । सायाह्नातिरात्रम् । अध्वर्युक्रतुरिति किम् । इषुवज्रौ । उद्भिद्बलभिदौ । अनपुंसकमिति किम् । राजसूयवाजपेये । इह कस्माच्च भवति दर्शपौर्णमासौ, क्रतुशब्दः सोमयज्ञेषु रूढः ॥

अध्ययनतो ऽविप्रकृष्टाख्यानाम् ॥ ५ ॥

अध्ययनेन निमित्तेन येषामविप्रकृष्टा प्रत्यासत्ता आख्या

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तेषां द्वन्द्व एकवद्भवति। पदक्रममक्रमम्। क्रमक्रवार्त्तिकम्। संपाठः पदानां क्रमस्य च प्रत्यासत्तः। अध्ययनत इति किम्। पिता-पुत्रौ। अविप्रकृष्टाख्यानामिति किम्। याज्ञिकवैयाकरणौ॥

जातिरप्राणिनाम्॥ ६॥

जातिवाचिनां शब्दानां द्वन्द्व एकवद्भवति, प्राणिनो वर्जयित्वा। आराशस्त्रि। धानाशष्कुलि। जातिरिति किम्। नन्दकपाञ्चजन्यौ। अप्राणिनामिति किम्। ब्राह्मणक्षत्रियविट्शूद्राः। नञिवयुक्तन्यायेन द्रव्यजातीनामयमेकवद्भावो न गुणक्रियाजातीनाम्। रूपरसगन्धस्पर्शाः। गमनाकुञ्चनप्रसारणानि। जातिपरत्वे च जातिशब्दानामयमेकवद्भावो विधीयते, न नियतद्रव्यविवक्षायाम्। इह कुण्डे बदरामलकानि तिष्ठन्तीति॥

विशिष्टलिङ्गो नदी देशो ऽग्रामाः॥ ७॥

विशिष्टलिङ्गानां भिन्नलिङ्गानां नदीवाचिनां शब्दानां देशवाचिनां च ग्रामवर्जितानां द्वन्द्व एकवद्भवति। नद्यवयवो द्वन्द्वो नदीत्युच्यते। देशावयवश्च देशः। नदी देश इत्यसामानिर्देश एवायम्। उद्धश्च इरावती च, उद्धेरावति। गङ्गाशोणम्। देशः खल्वपि। कुरवश्च कुरुक्षेत्रं च, कुरुकुरुक्षेत्रम्। कुरुकुरुजाङ्गलम्। विशिष्टलिङ्ग इति किम्। गङ्गायमुने। मद्रकेकयाः। नदी देश इति किम्। क्रुञ्चमयूर्यौ। अग्रामा इति किम्। जाम्बवश्च शालूकिनी च, जाम्बवशालूकिन्यौ। नदीग्रहणमदेशत्वात्। जनपदो हि देशः। तथा च पर्वतानां ग्रहणं न भवति। कैलासश्च गन्धमादनं च, कैलासगन्धमादने॥ अग्रामा इत्यत्र नगराणां प्रतिषेधो वक्तव्यः॥ * ॥ इह मा भूत्। मथुरा च पाटलिपुत्रं च, मथुरापाटलिपुत्रम्। उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः॥ * ॥ सैर्यं च नगरं, केतवतं च ग्रामः, सैर्यकेतवते॥

क्षुद्रजन्तवः॥ ८॥

अपरिचितपरिमाणः क्षुद्रः। क्षुद्रजन्तुवाचिनां द्वन्द्व एकवद्भवति। दंशमशकम्। यूकालिक्षम्। क्षुद्रजन्तव इति किम्। ब्राह्मणक्षत्रियौ॥

क्षुद्रजन्तुरनस्थिः स्यादथ वा क्षुद्र एव यः।
शतं वा प्रसृतौ येषां के चिदा नकुलादपि॥

आ नकुलादपीतीयमेव स्मृतिः प्रमाणमितरासां तद्विरोधात्॥

येषां च विरोधः शाश्वतिकः॥ ९॥

विरोधो वैरं, शाश्वतिको नित्यः। येषां शाश्वतिको विरोधस्तद्वाचिनां शब्दानां द्वन्द्व एकवद्भवति। मार्जारमूषकम्। श्वशृगालम्। अहिनकुलम्। शाश्वतिक इति किम्। गौपालिशालङ्कायनाः कलहायन्ते। चकारः पुनरस्यैव समुच्चयार्थः। तेन पशुशकुनिद्वन्द्वे विरोधिनामनेन नित्यमेकवद्भावो भवति। अश्वमहिषम्। काकोलूकम्॥

शूद्राणामनिरवसितानाम्॥ १०॥

निरवसानं, बहिष्करणम्। कुतो बहिष्करणं, पात्रात्। यैर्भुक्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः, न निरवसिताः, अनिरवसिताः। अनिरवसितशूद्रवाचिनां शब्दानां द्वन्द्व एकवद्भवति। तक्षायस्कारम्। रजकतन्तुवायम्। अनिरवसितानामिति किम्। चण्डालमृतपाः॥

गवाश्वप्रभृतीनि च॥ ११॥

गवाश्वप्रभृतीनि कृतैकवद्भावानि द्वन्द्वरूपाणि साधूनि भवन्ति। गवाश्वम्। गवाविकम्। गवैडकम्। अजाविकम्। अजैडकम्। कुब्जवामनम्। कुब्जकैरातकम्। पुत्रप्रात्तम्। श्वचण्डालम्। स्त्रीकुमारम्। दासीमाणवकम्। शाटीपिच्छकम्। उष्ट्रखरम्। उष्ट्रशश्म्। मूत्रशकृत्। मूत्रपुरीषम्। यकृन्मेदः। मांसशोणितम्। दर्भशरम्। दर्भपूतीकम्। अर्जुनशिरीषम्। तृणोलपम्। दासीदासम्। कुटीकुटम्। भागवतीभागवतम्। गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं, रूपान्तरे तु नायं विधिर्भवति। गोश्वम्। गोश्वौ। पशुद्वन्द्वविभाषैव भवति॥

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्॥ १२॥

वृक्ष मृग तृण धान्य व्यञ्जन पशु शकुनि अश्ववडव पूर्वापर अधरोत्तर इत्येतेषां द्वन्द्वो विभाषैकवद्भवति। प्लक्षन्यग्रोधम्। प्लक्षन्यग्रोधाः। रुरुपृषतम्। रुरुपृषताः। कुशकाशम्। कुशकाशाः। व्रीहियवम्। व्रीहियवाः। दधिघृतम्। दधिघृते। गोमहिषम्। गोमहिषाः। तित्तिरिकपिञ्जलम्। तित्तिरिकपिञ्जलाः। अश्ववडवम्। अश्ववडवौ। पूर्वापरम्। पूर्वापरे। अधरोत्तरम्। अधरोत्तरे॥ बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनितृद्रजन्तुधान्यतृणानाम्॥ * ॥ एषां बहुप्रकृतिरेव द्वन्द्व एकवद्भवति, न द्विप्रकृतिः। बदरामलके। रथिकाश्वारोहौ। प्लक्षन्यग्रोधौ। रुरुपृषतौ। हंसचक्रवाकौ। यूकालिक्षे। व्रीहियवौ। कुशकाशौ॥

विप्रतिषिद्धं चानधिकरणवाचि॥ १३॥

परस्परविरुद्धं विप्रतिषिद्धम्। विप्रतिषिद्धार्थानां शब्दानामनधिकरणवाचिनामद्रव्यवाचिनां द्वन्द्व एकवद्भवति। विभाषानुकर्षणार्थश्चकारः। शीतोष्णम्। शीतोष्णे। सुखदुःखम्। सुखदुःखे। जीवितमरणम्। जीवितमरणे। विप्रतिषिद्धमिति किम्। कामक्रोधौ। अनधिकरणवाचीति किम्। शीतोष्णे उदके॥

न दधिपयआदीनि॥ १४॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथायथमेकवद्भावे प्राप्ते प्रतिषेध आरभ्यते । दधिपयआदीनि शब्दरूपाणि नैकवद्भवन्ति । दधिपयसी । सर्पिर्मधुनी । मधुसर्पिषी । ब्रह्मप्रजापती । शिववैश्रवणौ । स्कन्दविशाखौ । परिव्राट्कौशिकौ * । प्रवर्ग्योपसदौ । शुक्लकृष्णौ । इध्मबर्हिषी । निपातनाद्वीर्घः । दीक्षातपसी । श्रद्धातपसी । मेधातपसी । अध्ययनतपसी । उलूखलमुसले । आज्यावसाने । श्रद्धामेधे । चक्षुस्रामे । वाङ्मनसे ॥

अधिकरणैतावत्त्वे च ॥ १५ ॥

नेति वर्त्तते । अधिकरणं वर्त्तिपदार्थः, स हि समासस्यार्थस्याधारः, तस्यैतावत्त्वे परिमाणे गम्यमाने द्वन्द्वो नैकवद्भवति । यथायथमेकवद्भावः प्राप्तः प्रतिषिध्यते । दश दन्तोष्ठाः । दश मार्दङ्गिकपाणविकाः ॥

विभाषा समीपे ॥ १६ ॥

अधिकरणैतावत्त्वस्य समीपे विभाषा द्वन्द्व एकवद्भवति । उपदशं दन्तोष्ठम् । उपदशा दन्तोष्ठाः । उपदशं मार्दङ्गिकपाणविकम् । उपदशा मार्दङ्गिकपाणविकाः । अव्ययस्य संख्यया ऽव्ययीभावोपि विहितो बहुव्रीहिरपि, तत्रैकवद्भावपक्षे ऽव्ययीभावो ऽनुप्रयुज्यते, इतरत्र बहुव्रीहिः ॥

स नपुंसकम् ॥ १७ ॥

यस्यायमेकवद्भावो विहितः स नपुंसकलिङ्गो भवति द्विगुर्द्वन्द्वश्च । पञ्चगवम् । दशगवम् । द्वन्द्वः खल्वपि । पाणिपादम् । शिरोग्रीवम् । परलिङ्गतापवादो योगः । अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते ॥ * ॥ पञ्चपूली । दशरथी ॥ वा ऽऽबन्तः स्त्रियामिष्टः ॥ * ॥ पञ्चखट्वम् । पञ्चखट्वी ॥ अनो नलोपश्च वा च द्विगुः स्त्रियाम् ॥ * ॥ पञ्चतक्षम् । पञ्चतक्षी ॥ पात्रादिभ्यः प्रतिषेधो वक्तव्यः ॥ * ॥ पञ्चपात्रम् । चतुर्युगम् । त्रिभुवनम् ॥

अव्ययीभावश्च ॥ १८ ॥

अव्ययीभावश्च समासो नपुंसकलिङ्गो भवति । अधिस्त्रि । उपकुमारि । उन्मत्तगङ्गम् । नीहितगङ्गम् । पूर्वपदार्थप्रधानस्यालिङ्गतैव प्राप्ता, ऽन्यपदार्थप्रधानस्याभिधेयवल्लिङ्गता, ऽतदिदमुच्यते । अनुक्तसमुच्चयार्थश्चकारः ॥ पुण्यसुदिनाभ्यामहः क्लीबतेष्यते ॥ * ॥ पुण्याहम् । सुदिनाहम् ॥ पथः संख्याव्ययादेः क्लीबतेष्यते ॥ * ॥ त्रिपथम् । चतुष्पथम् । विपथम् । सुपथम् ॥ क्रियाविशेषणानां च क्लीबतेष्यते ॥ * ॥ † मृदु पचति । शोभनं पचति ॥

* परिव्राजककौशिकौ । इति पा० २

† क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता च वक्तव्या ॥ * ॥ इति पा० २ ।

तत्पुरुषो ऽनञ्कर्मधारयः ॥ १९ ॥

अधिकारोयमुत्तरसूत्रेष्वपतिष्ठते । नञ्समासं कर्मधारयं च वर्जयित्वा ऽन्यस्तत्पुरुषो नपुंसकलिङ्गो भवतीत्येतदधिकृतं वेदितव्यम् । यदित ऊर्द्धमनुक्रमिष्यामस्तत्र । वक्ष्यति विभाषा सेनासुरेति । ब्राह्मणसेनम् । ब्राह्मणसेना । तत्पुरुष इति किम् । दृढसेनो राजा । अनञिति किम् । असेना । अकर्मधारय इति किम् । परमसेना ॥

संज्ञायां कन्थोशीनरेषु ॥ २० ॥

संज्ञायां विषये कन्थान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, सा चेत् कन्था उशीनरेषु भवति । सैाशमिकन्थम् । आहूरकन्थम् । संज्ञायामिति किम् । वीरणकन्था । उशीनरेष्विति किम् । दाक्षिकन्था । परवल्लिङ्गतापवाद इदं प्रकरणम् ॥

उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥ २१ ॥

उपज्ञायतइत्युपज्ञा उपक्रम्यतइत्युपक्रमः । उपज्ञा च उपक्रमश्च उपज्ञोपक्रमम् । तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति तदाद्याचिख्यासायां तयोरुपज्ञोपक्रमयोरादेराचिख्यासायां गम्यमानायाम् । आख्यातुमिच्छा आचिख्यासा । यद्युपज्ञेयस्योपक्रम्यस्य चार्थस्यादिराख्यातुमिष्यते तत एतद्भवति । पाणिन्युपज्ञमाकालापकं * व्याकरणम् । पाणिनेरुपज्ञानेन प्रथमतः प्रणीतमाकालापकं व्याकरणम् । व्याड्युपज्ञं दुष्करणम् । आद्योपक्रमं प्रासादः । नन्दोपक्रमाणि मानानि । दर्शनीयोपक्रमं सुकुमारम् । उपज्ञोपक्रममिति किम् । वाल्मीकिश्लोकाः । तदाद्याचिख्यासायामिति किम् । देवदत्तोपज्ञो रथः । यज्ञदत्तोपक्रमो रथः ॥

छाया बाहुल्ये ॥ २२ ॥

विभाषा सेनासुराच्छायेति विभाषां वक्ष्यति, नित्यार्थमिदं वचनम् । छायान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति बाहुल्येगम्यमाने । पूर्वपदार्थधर्मो बाहुल्यम् । शलभादीनां हि बहुत्वं गम्यते । शलभच्छायम् । इषुच्छायम् । बाहुल्यइति किम् । कुड्यच्छाया ॥

सभा राजामनुष्यपूर्वा ॥ २३ ॥

सभान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, सा चेत्सभा राजपूर्वा ऽमनुष्यपूर्वा च भवति । इनसभम् । ईश्वरसभम् । इहकस्माच्च भवति । राजसभा । पर्यायवचनस्येष्यते । तदुक्तम् । जितपर्यायस्यैव राजाद्यर्थमिति । अमनुष्यपूर्वा । रक्षःसभम् । पिशाचसभम् । इहकस्माच्च भवति काष्ठसभा । अमनुष्यशब्दो रूढिरूपेण रक्षःपिशाचादिष्वेव वर्त्तते । राजामनुष्यपूर्वेति किम् । देवदत्तसभा ॥

* क्व चिद् 'अकालकम्' इति पा० २ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अशाला च ॥ २४ ॥

अशाला च या सभा तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति । संघातवचनो ऽत्र सभाशब्दो गृह्यते । स्त्रीसभम् । दासीसभम् । दासीसंघात इत्यर्थः । अशालेति किम् । अनाथसभा । अनाथकुटीत्यर्थः ॥

विभाषा सेनासुराच्छायाशालानिशानाम् ॥ २५ ॥

सेना सुरा छाया शाला निशा इत्येवमन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति विभाषा । ब्राह्मणसेनम् । ब्राह्मणसेना । यवसुरम् । यवसुरा । कुड्यच्छायम् । कुड्यच्छाया । गोशालम् । गोशाला । श्वनिशम् । श्वनिशा ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ २६ ॥

समाहारद्वन्द्वे नपुंसकलिङ्गस्य विहितत्वाद् इतरेतरयोगद्वन्द्वस्येदं ग्रहणम् । परस्य यल्लिङ्गं तद्भवति द्वन्द्वस्य तत्पुरुषस्य च । उत्तरपदलिङ्गं द्वन्द्वतत्पुरुषयोर्विधीयते । कुक्कुटमयूर्यावमे । मयूरीकुक्कुटावमौ । तत्पुरुषस्य । अर्द्धं पिप्पल्याः, अर्द्धपिप्पली । अर्द्धकोशातकी । अर्द्धनखरञ्जनी ॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः ॥ * ॥ द्विगुः । पञ्चसु कपालेषु संस्कृतः पुरोडाशः पञ्चकपालः । प्राप्तो जीविकां, प्राप्तजीविकः । आपन्नो जीविकाम्, आपन्नजीविकः । अलं जीविकायै । अलंजीविकः । गतिसमास । निष्क्रान्तः कौशाम्ब्याः निष्कौशाम्बिः ॥

पूर्ववदश्ववडवौ ॥ २७ ॥

अश्ववडवयोर्विभाषैकवद्भाव उक्तस्तत्रैकवद्भावादन्यत्र परवल्लिङ्गतायां प्राप्तायामिदमारभ्यते । अश्ववडवयोः पूर्ववल्लिङ्गं भवति । अश्वश्च वडवा चाश्ववडवौ । अर्थातिदेशश्चायं न निपातनं, तत्र द्विवचनमतन्त्रं, वचनान्तरेपि पूर्ववल्लिङ्गता भवति । अश्ववडवान्, अश्ववडवैरिति ॥

हेमन्तशिशिरावहोरात्रे च च्छन्दसि ॥ २८ ॥

पूर्ववदिति वर्तते । हेमन्तशिशिरौ अहोरात्रे इत्येतयोश्छन्दसि विषये पूर्ववल्लिङ्गं भवति । हेमन्तशिशिरावृतूनां प्रीणामि । अहोरात्रे इदं ब्रूमः । परवल्लिङ्गतापवादो योगः । अर्थातिदेशश्चायं न निपातनं, तेन द्विवचनमतन्त्रं, वचनान्तरेपि पूर्ववल्लिङ्गता भवति । पूर्वपन्नाश्चितयः, अपरपन्नाः पुरीषम्, अहोरात्राणीष्टकाः । छन्दसीति किम् । दुःखे हेमन्तशिशिरे । अहोरात्राविमौ पुण्यौ । छन्दसि लिङ्गव्यत्यय उक्तस्तस्यैवायं प्रपञ्चः ॥

रात्राह्नाहाः पुंसि ॥ २९ ॥

कृतसमासान्तानां निर्देशः । रात्र अह्न अह इत्येते पुंसि भाष्यन्ते । परवल्लिङ्गतायां स्त्रीनपुंसकयोः प्राप्तयोरिदं वचनम् । द्विरात्रः । त्रिरात्रः । चतूरात्रः । पूर्वाह्णः । अपराह्णः । मध्याह्नः । द्व्यहः । त्र्यहः । अनुवाकादयः पुंसीति वक्तव्यम् ॥ * ॥ अनुवाकः । शंयुवाकः । सूक्तवाकः ॥

अपथं नपुंसकम् ॥ ३० ॥

अपथशब्दो नपुंसकलिङ्गो भवति । अपथमिदम् । अपथानि गाहते मूढः । इह कस्माच्च भवति, अपथो देशः, ऽपथा नगरी । तत्पुरुष इति वर्त्तते ॥

अर्धर्चाः पुंसि च ॥ ३१ ॥

अर्द्धर्चादयः शब्दाः पुंसि नपुंसके च भाष्यन्ते । अर्धर्चः । अर्धर्चम् । गोमयः । गोमयम् । शब्दरूपाश्रया चेयं द्विलिङ्गता क्वचिदर्थभेदेनापि व्यवतिष्ठते । यथा पद्मशङ्खशब्दौ निधिवचनौ पुंलिङ्गौ । जलजे उभयलिङ्गौ । भूतशब्दः पिशाचे उभयलिङ्गः । क्रियाशब्दस्याभिधेयवल्लिङ्गम् । सैन्यवशब्दो लवणे उभयलिङ्गः । यौगिकस्याभिधेयवल्लिङ्गम् । सारशब्द उत्कर्षे पुंलिङ्गो न्यायादनपेते नपुंसकं, नैतत्सारमिति । धर्म इत्यूर्ध्वे पुंलिङ्गः । तत्साधने नपुंसकम् । तानि धर्माणि प्रथमान्यासन् । अर्द्धर्च । गोमय । कषाय । कार्षापण । कुतप । कपाट । शङ्ख । चक्र । गूथ । यूथ । ध्वज । कबन्ध । पद्म । गृह । सरक । कंस । दिवस । यूप । अन्धकार । दण्ड । कमण्डलु । मण्ड । भूत । द्वीप । द्यूत । चक्र । धर्म । कर्मन् । मोदक । शतमान । यान । नख । नखर । चरण । पुच्छ । दाडिम । हिम । रजत । सक्तु । पिधान । सार । पात्र । घृत । सैन्धव । औषध । आढक । चषक । द्रोण । स्वलीन । पात्रीव । षष्टिक । वार । बाण । प्रोथ । कपित्थ । शुष्क । शील । शुल्ब । सीधु । कवच । रेणु । कपट । सीकर । मुसल । सुवर्ण । यूप । चमस । वर्ण । क्षीर । कर्ष । आकाश । अष्टापद । मङ्गल । निधन । निर्यास । जृम्भ । वृत्त । पुस्त । त्वेडित । शृङ्ग । शङ्कुल । मधु । मूल । मूलक । शराव । शाल । वप्र । विमान । मुख । प्रयीव । शूल । वज्र । कर्पट । शिखर । कल्क । नाट । मस्तक । वलय । कुसुम । तृण । पङ्क । कुण्डल । किरीट । अर्बुद । अङ्कुश । तिमिर । आश्रम । भूषण । इल्कस । मुकुल । वसन्त । तडाग । पिटक । विटङ्क । माष । कोश । फलक । दिन । दैवत । पिनाक । ममर । स्थाणु । अनीक । उपवास । शाक । कर्पास । चषाल । खण्ड । दर । विटप । रण । बल । मल । मृणाल । हस्त । सूत्र । ताण्डव । गाण्डीव । मण्डप । पटह । सौध । पार्श्व । शरीर । फल । छल । पुर । राष्ट्र । विश्व । अम्बर । कुट्टिम । मण्डल । ककुद । तोमर । तोरण । मञ्चक । पुङ्ख । मध्य । बाल ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वल्मीक । वर्ष । वस्त्र । देह । उद्यान । उद्योग । स्नेह । स्वर । संगम । निष्क । क्षेम । शूक । क्षत्र । पवित्र । यौवन । पानक । भूषिक । वल्कल । कुञ्ज । विहार । लोहित । विषाण । भवन । अरण्य । पुलिन । दृढ । आसन । ऐरावत । शूर्प । तीर्थ । लोमश । तमाल । लोह । दण्डक । शपथ । प्रतिसर । दाह । धनुस् । मान । तङ्क । वितङ्क । मत्र । सहस्र । प्रोदन । प्रवाल । शकट । अपराह्ण । नीड । शकल । * अर्द्धर्चादिः ॥

वृद्धमो ऽन्वादेशे ऽशनुदात्तस्तृतीयादौ ॥ ३२ ॥

आदेशः कथनम्, अन्वादेशो ऽनुकथनम् । इदमोन्वादेशविषयस्याशादेशो भवत्यनुदात्तस्तृतीयादौ विभक्तौ परतः । आभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् । अस्मै छात्राय कम्बलं देहि, अथो अस्मै शाटकमपि देहि । अस्य छात्रस्य शोभनं शीलम्, अथो अस्य प्रभूतं स्वम् † । अशादेशवचनं साकच्कार्थम् । इमकाभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतम् । नेह पश्चादुच्चारणमात्रमन्वादेशः, किं तर्हि एकस्यैवाभिधेयस्य पूर्वं शब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेशः । तेनेह न भवति देवदत्तं भोजय, इमं च यज्ञदत्तमिति ॥

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥ ३३ ॥

अन्वादेशे अनुदात्त इति वर्तते । एतदो ऽन्वादेशविषयस्य अशादेशो भवति अनुदात्तस्त्रतसोः परतः । तौ चापि त्रतसावनुदात्तौ भवतः । एतस्मिन् ग्रामे सुखं वसामः । अथो अत्र युक्ता अधीमहे । एतस्माच्छात्राच्छन्दोधीष्व, अथो अतो व्याकरणमप्यधीष्व । सर्वानुदात्तं पदं भवति । एतदो ऽशित्यशादेशे लब्धे पुनर्वचनमनुदात्तार्थम् ॥

द्वितीयाटौस्स्वेनः ॥ ३४ ॥

अन्वादेशे अनुदात्त इति वर्त्तते । द्वितीया टा ओस् इत्येतेषु परत इदमेतदोरन्वादेशविषययोरेनश्शब्द आदेशो भवति अनुदात्तः । इदमो मण्डूकप्लुतिन्यायेनानुवृत्तिः । इमं छात्रं छन्दोध्यापय । अथो एनं व्याकरणमध्यापय । अनेन छात्रेण रात्रिरधीता । अथो एनेनाहरप्यधीतम् । अनयोश्छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम् । एतदः खल्वपि । एतं छात्रं छन्दो ऽध्यापय, अथो एनं व्याकरणमप्यध्यापय । एतेन छात्रेण रात्रिरधीता, अथो एनेनाहरप्यधीतम् । एतयोश्छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम् । एनदिति नपुंसकैकवचने वक्तव्यम् ॥ * ॥ प्रक्षालयैनत् । परिवर्त्तयैनत् । इह कस्माच्च भवति । अयं दण्डो हरानेन । एतमातं ङितं विद्यादिति । यत्र किं चिद् विधाय वाक्यान्तरेण पुनरन्यदुपदिश्यते सो ऽन्वादेशः । इह तु वस्तुनिर्देशमात्रं कृत्वा एकमेव विधानम् ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ प्रस्तावना ॥

सरलं सुजने खलेऽतिवक्रं
करुणासिन्धुमपारमात्मभक्ते ।
अतिकोपनमासुरे कदम्बे
परमं धाम भजामि रामसंज्ञम् ॥ १ ॥

प्राचीनसत्कवीनां
सत् काव्यं मृगयता मया लब्धम् ।
चम्पूनामकमकाव्यं
चम्पूनामुत्तमं मनोहरणम् ॥ २ ॥

कविकर्णपूररचितं
वासवदत्तादिभिः समानगुणम् ।
अपहायाखिलमस्मा-
देतन्मुद्रार्थमस्मि दत्तमतिः ॥ ३ ॥

कः सति सुधासमुद्रे
धत्ते बुद्धिं सरःसु मलिनेषु ।
पक्के चूतफले को
लभ्ये कुरुते धियं फलेऽन्यस्मिन् ॥ ४ ॥

श्रीमद्विक्रमप्रभुवर-
साहेबाख्यस्य काव्यतत्त्वविदः ।
संमतिमाज्ञायाहं
प्रावर्तिषि मुद्रणाय हृष्टमनाः ॥ ५ ॥

अमृतस्यामृतसिन्धो
योगः संशोभते न चान्यच्च ।
काव्यं सुधामयमिदं
काशीविद्यासुधानिधेर्योग्यम् ॥ ६ ॥

---

* कुणप । मुण्ड । पूत । मद्र । कंस । लोमन । लिङ्ग । सीर । क्षत । ऋण । कडार । वर्ण । पूर्ण । पणव । विशाल । वुस्त । पुस्तक । पल्लव । निगड । खल । स्थूल । शार । नाल । प्रवर । कटक । कण्टक । क्षाल । कुमुद । पुराण । जाल । स्कन्ध । ललाट । कुङ्कुम । कुशल । विडङ्ग । पिण्याक । आर्द्र । हल । कटक । योध । बिम्ब । कुक्कुट । कुडप । खण्डल । पञ्चक । वसु । उद्यम । स्तन । स्तेन । क्षत्र । कलह । पालक । हल । वर्चस्क । कूर्च । तण्डक । तण्डुल । इत्येते पुस्तकान्तरेष्वधिकाः ॥

† 'अस्माच्छात्राच्छन्दो ऽधीष्व । अथो अस्माद्व्याकरणमप्यधीष्व' । इदमत्राधिकं क्व चित् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सूरिमनःकैरवमपि
काशीविद्यासुधानिधेर्योगात् ।
प्राप्य विकाशं लभता-
मेतत्काव्यामृतौघनिस्यन्दम् ॥ ७ ॥
स्वोत्कर्षहेतुं किल मन्यमाना
व्यासा अमूं निह्नुवते स्म चम्पूम् ।
वृन्दावनस्था, अधुना तु सर्वे
बुधा रसास्वादसुखं भजन्ताम् ॥ ८ ॥
वृन्दावने भागवतप्रसङ्गे
चम्पा अमुष्या वचसां व्रजानाम् ।
शुश्रूषयाकृष्टहृदो जनौघाः
परःसहस्रा मिलिता अभूवन् ॥ ९ ॥
सुखवर्तिनीतिनाम्ना
वृन्दावनचक्रवर्तिना विहिता ।
व्याख्यास्ति मुद्रयिष्ये
तामपि सार्धं सुखप्रबोधाय ॥ १० ॥
एकं हरिश्चन्द्रवणिग्वरस्य
सरस्वतीसद्मन एव पुस्तम् ।
परं भवानन्दसुधीन्द्रवर्या-
दापं दुरापं बहुधातिशुद्धम् ॥ ११ ॥
अस्ति प्रसिद्धालवरेतिसंज्ञा
सुराजधानी तदधीशमान्यः ।
तद्राजसंबन्धिसुधीप्रधान-
मयं भवानन्दबुधोऽस्ति गौडः ॥ १२ ॥

अथास्याश्चम्पा निर्माता कविकर्णपूरो वेदयुगबाणेन्दुमिते (१५२४) खीष्टाब्दे नदियाभिधप्रदेशान्तःपातिकाञ्चनपल्लीनामग्रामे वैद्यकुलोद्भवशिवानन्दसेननाम्नः श्रीकृष्णचैतन्यमहाप्रभुप्रियपार्षदात् प्रादुर्बभूव । अस्य कवेः पूर्वं परमानन्ददास इत्यभिधानमासीत् ।

किंतु कृष्णचैतन्यमहाप्रभुचरणैः स्वविततीर्णकाव्यशक्तेरेतत्कवेः काव्यामृतरसतुष्टैः कवीनां कर्णपूरोऽसीति मत्या कविकर्णपूर इति नामान्तरमकारि । स्वयं हृदोपदिश्यापि श्रीनाथपण्डितद्वारा पुनरुपदिष्टश्च ।

एतच्चास्य चम्पूकाव्यस्य व्याख्याकृता "तथाही"त्यारभ्य कृष्णचैतन्यचरितामृतस्यगद्येनाभिहितम् । तदहमपि प्रदर्शयामि ।

"तथाहि कथा श्रीकृष्णचैतन्यचरितामृते । एकदा महाप्रभुर्द्वित्रप्रियमहचरसङ्गी स्वपार्षदप्रवरस्यैतत्पितुः श्रीशिवानन्दसेनस्य सपरिजनस्य रथयात्रादर्शनच्छलेन स्वचरणान्तिकमागतस्यावासमागतः, तेन च ससंभ्रमं वन्दितचरणः, तत्र च बाल्यविलासं प्रपञ्चयन्तं पञ्चवर्षवयसमेतं पित्रा कारिवन्दनमालोक्य साधुस्त्वयं पुत्रो जात इत्यभिनन्द्य कृपयैतच्छिरसि चरणं दिधीर्षुर्बाल्यावेशेन मुखं व्यादत्तवन्तमेनं कौतुकेन चरणाङ्गुष्ठमास्वादयामास, दिव्यकाव्यकर्तृत्वशक्तिमप्यस्यलक्षितं संचारयामास, वद वद कृष्ण कृष्णेत्युवाच च, ततोऽसौ शिशुरुत्फुल्लमुखो बूहि बूहीति पित्रादिभिः प्रयुज्यमानोऽपि यदि नानुजगाद, प्रभुरपि विस्मयमभिनीय विश्वमेव कृष्णनाम ग्राहयितुमहमशकं न पुनरिममेकमेवेत्युवाच, तदा श्रीस्वरूपगोस्वामिभिरुक्तं, भगवता स्वयमेव स्वनाम महामन्त्रमुपदिष्टोऽस्मि कथं पुनस्तमुच्चैरुच्चारयामीत्येवमस्य गभीरं हृदयमनुमोयत इति, परे द्यवि वत्स वद किंचिदित्युक्त एव प्रभुणा, शीघ्रं पद्यमेकं बबन्ध ।

श्रवसोः कुवलयमक्ष्णो-
रञ्जनमुरसो महेन्द्रमणिदाम ।
वृन्दावनतरुणीनां
मण्डनमखिलं हरिर्जयति ॥ १ ॥

इति ।

ततः संतुष्टेन भगवता कविकर्णपूर इति नाम तद्दिनमारभ्य कृतवता तदभीष्टं मन्त्रराजमपि हृदैव स्वयमुपदिश्यापि लोकरीतिख्यापनाय समये श्रीनाथपण्डितद्वारापि पुनरसावुपदिदेश" इति ।

अनेन कविकर्णपूरेणालंकारकौस्तुभचैतन्यचन्द्रोदयगौरगणोद्देशदीपिकाबृहत्कृष्णगणोद्देशदीपिकानन्दवृन्दावनचम्पादयोऽनेके काव्यग्रन्था रचिताः ।

एतेषु प्रथमोऽलंकारादिज्ञानाय रसव्यङ्ग्यध्वनिगुणादिविषयमयश्चतुर्भिः परिच्छेदैर्द्विसहस्रसंख्यश्लोकैः पूरितः किरणनाम्न्या यन्यकर्तुरेव टिप्पण्या भूषितोऽलंकारकौस्तुभो नाम । द्वितीयः कृष्णचैतन्यलीलोद्बोधको दशभिरङ्कैः पूरितः सहस्रत्रयसंख्याकश्लोकमितो रूपगोस्वामिप्रणीतचैतन्यचन्द्रोदयनाटकनामा । यदन्ते कृष्णचैतन्यमहाप्रभुजन्मशको नाटकनिर्माणशकश्च प्रदर्शितः । तथा च तत्रत्यपद्यम् ।

"शाके चतुर्दशशते रविवाजियुक्ते(१४०७)
गौरो हरिर्धरणिमण्डल आविरासीत् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्मिंश्चतुर्नवतिभाजि (१४९४)तदीयलीला-
ग्रन्थोऽयमाविरभवत् कतमस्य वक्त्रात्" ॥

इति ।

तृतीयो गौरगणोद्देशदीपिकानामको मन्दाक्रान्ताप्रभृति-दीर्घच्छन्दोभी रचितः सपादद्विशतसंख्याकश्लोकमितश्चैतन्याचार्यपार्षदवर्णनरूपः । चतुर्थो बृहत्कृष्णगणोद्देशदीपिकाभिधः कृष्णचैतन्यगणोद्देशश्च उक्तवरैरेव विस्तारितैर्विंशयैः पूर्णः पञ्चशतसंख्याकश्लोकमितः । पञ्चमो भगवल्लीलावर्णनात्मको गद्यपद्यरचनासंवलितो द्वाविंशतिस्तबकः प्रायो द्वादशसहस्रश्लोकसंख्यामितः सम्प्रत्येव मुद्रणाय प्रस्तोष्यमाण आनन्दवृन्दावनचम्पूसमाख्यः । स्तवकविषयविभागश्च टीकाकृता प्रदर्शितः । तथाहि ।

"नन्दोत्सवादिरासान्तां हेलादोलादिकाधिकाम् ।
श्रीकृष्णलीलां जयन्य कर्णपूरो महाकविः ॥
एकेन स्तवकेनाह वृन्दारण्यं तदास्पदम् ।
बाल्यलीलां ततः षड्भिः प्रादुर्भावमुखां हरेः ॥
ततस्तु पञ्चदशभिर्लीलां कैशोरवर्तिनीम् ।
एवं ह्याधिक्या चम्पूर्विंशत्या स्तवकैः कृता ॥

इति ।

यद्यप्यस्या निर्माणसमयो मया नोपलब्धस्तथापि चैतन्यचन्द्रोदयनाटकोक्तशकसामीप्यमस्या अप्यनुसंधेयम् । तच्चाटकस्यास्याश्चम्वाश्चैककर्तृकत्वात् ।

अस्याश्चम्वात्वं तु,

"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते" ।

इति लक्षणादवसेयम् ।

एतट्टीकाकारश्च कश्चन वृन्दावनचक्रवर्ती प्रतिभाति । तथा च तदन्यपद्यम् ।

राधासरस्तीरकुटीरवर्तिनः
प्राप्तव्यवृन्दावनचक्रवर्तिनः ।
आनन्दचम्पूविवृतिप्रवर्तिनः
सन्तो गतिर्मे सुमहानिवर्तिनः ॥

इति ।

अत्र दीर्घदीर्घेषु गद्येषु यावन्मूलवाक्यं तावन्मात्रव्याख्याया झटिति बुद्धावारोहणार्थं मूलवाक्यमध्ये व्याख्यायां चाङ्का उपन्यस्ताः । अतिह्रस्वेषु गद्येषु बहुवाक्यान्तेऽप्युभयत्रोपन्यस्ताः । क्वचिच्च टीकाभावान्मूलवाक्यान्त एवेत्यप्यनुसंधेयम् ।

असौ वारं वारं निरूप्यमाणनामा पूर्वं प्रतिपादितजन्मशको गौरो हरिरिति कृष्णचैतन्यमहाप्रभुरिति कृष्णचैतन्य इत्यभिधीयमानः पूर्वावस्थायां विश्वंभरेति प्रसिद्धनामा कालवशादुत्सन्नं भक्तिमार्गं पुनः संस्कृत्य प्रचारयितुमवशिष्टेतत्कृत्यः श्रीकृष्णपरमात्मैव साक्षात् परमेश्वरो गौरवर्णधारी नवद्वीपनगर्यां पुरंदरमिश्राच्छचीनामतत्पत्न्यां प्रादुर्बभूवेति भक्तिमार्गावलम्बिभिर्बहुदेशीयैर्लक्षशस्तन्मतानुयायिभिर्मन्यते । उक्तमेतच्चैतन्यचन्द्रोदयनामनाटके । तथाहि,

"गौडद्वोणी जयति कतमा पुण्यतीर्थावतंस-
प्राया यासौ वहति नगरीं श्रीनवद्वीपनाम्नीम् ।
यस्यां चामीकरचयरुचेरीश्वरस्यावतारो
यस्मिन् मूर्ता पुरि पुरि परिस्यन्दते भक्तिदेवी" ॥
"कालान्नष्टं भक्तियोगं निजं यः
प्रादुष्कर्तुं कृष्णचैतन्यनामा ।
आविर्भूतस्तस्य पादारविन्दे
गाढं गाढं लीयतां चित्तभृङ्गः" ॥

इति ।

"वैराग्यविद्यानिजभक्तियोग-
शिक्षार्थमेकः पुरुषः पुराणः ।
श्रीकृष्णचैतन्यशरीरधारी
कृपाम्बुधिर्यस्तमहं प्रपद्ये" ॥

इति ।

"गौरत्विषा कपिशयन् ककुभः समन्ता-
दानन्दभोगपरिलोपितबाह्यवृत्तिः ।
आबालवृद्धतरुणैरथ लक्षसंख्यै-
र्लोकैरभूत् प्रणयिभिः परिपूज्यमानः" ॥

इति च ।

अस्य प्रचारणीयं मतं तु श्रीकृष्ण एव सविशेषं ब्रह्म तस्योपासनं सनन्दनाद्युपगीतमविकलः पुरुषार्थः, तस्य साधनं नामसंकीर्तनप्रधानो विविधभक्तियोग इति ।

यदा चैषोऽवततार तदा शंभुरद्वैताचार्यनाम्ना, संकर्षणो नित्यानन्दावधूतनाम्ना, नारदः श्रीवासनाम्नाविरासीत् ।

एवमन्येऽपि केचन प्रियसहचराः पार्षदाः, केचन सहायाः, केचन शिष्या इति ।

अस्य ज्येष्ठभ्राता विश्वरूपस्तु दारपरिग्रहमकृत्वैव स्वीयं महः पुरीश्वरे संन्यास्य पूर्वमेव परिव्रज्य तिरोभूतः । तथा च चैतन्यचन्द्रोदयपद्यानि ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अद्वैताचार्यवर्यो भगवदनवमं शाम्भवं धाम साक्षा-
न्नित्यानन्दावधूतो महह इति महितं हन्त सांकर्षणं यः।
श्रीकान्तश्रीपतिभ्यामपि सह विजयी श्रीलरामेण सार्धं
कोऽपि श्रीवासनामा द्विजकुलतिलको नारदीयं हि तेजः॥

आचार्यरत्नहरिदासमुरारिगङ्गा-
दासादयः सहगदाधरपण्डिताद्याः।
विद्यानिधिप्रभृतयोऽपि च वासुदेवा-
चार्यादयः सहमुकुन्दमुखास्तथान्ये॥

श्रीवक्रेश्वरवान् नृसिंहसहितः शुक्लाम्बरेणाच्युतः
श्रीदामोदरशंकरौ च जगदानन्दं च मुख्यं दधत्।
नानाभावविलासलास्यरसिकः प्रेमास्पदानां गणो
यद्बाल्यावधि बान्धवः स जगतीत्राणाय भूमिं गतः॥

अस्यायजस्त्वकृतदारपरिग्रहः सन्
संकर्षणः स भगवान् भुवि विश्वरूपः।
स्वीयं महः किल पुरीश्वरमार्पयित्वा
पूर्वं परिव्रजित एव तिरोबभूव" ॥

इति। तथास्य प्रभोः प्रियपरिजनाः श्रीदामोदरस्वरूपश्री-रामानन्दरायरूपसनातनाद्या नमस्कृतिपरैतच्चम्पूपद्धव्याख्यात्राभिहिताः।

अपरं च।

श्रीवल्लभाचार्य इति प्रसिद्धः
श्रीकृष्णचैतन्यमहाप्रभुश्च।
काश्मीरिवर्यो बुधकेशवोऽमी
मिथश्च मित्राणि मिथः सहायाः॥

तदेवंप्रभावः कृष्णचैतन्यमहाप्रभुः कृतदारपरिग्रहः कियन्तं कालं नीत्वाथ सातिशयं विरक्तः कलत्रमपि परित्यज्य काषायवसनो वृन्दावनमधुवास। अन्ते च ततः परावृत्य जगन्नाथपुर्यां तनुमहासीदित्यादिकथाविस्तरश्चैतन्यचन्द्रोदयादौ द्रष्टव्यः।

अस्यैव भगवतः कृपया कविकर्णपूरस्य काव्यनिर्माणप्रौढिमाजनीति कविकर्णपूरेण चैतन्यचन्द्रोदयेऽभिहितम्।

"अस्योच्छिष्टप्रसादादयमजनि मम प्रौढिमा काव्यरूपी" इत्यादीति, कृतं पल्लवितेनेति शिवम्।

तातप्रतिश्रुतवचःपरिपालनाय
राज्यं जहौ रविसमा वनमध्युवास।
हत्वा जगद्द्विषुगणं भरतानुरोधा-
दङ्गीचकार च ससीतमजं तमीडे॥
स एव भगवान् मम प्रसुवतान्मनोवाञ्छितं
करोतु सफलं श्रमं प्रथितिमेतु चम्पूरियम्।
अहर्निशमनेकधा स्वजनकामनावाप्तये
तनोति वपुरञ्जसा निजजनानुकम्पापरः॥
काशीस्थराजसंबन्धिपाठशालीयपण्डितः।
सांख्यशास्त्राधिकार्यस्मि त्रिपाठी वेचनाभिधः॥

॥ अथानन्दवृन्दावननामकस्य ॥

॥ चम्पूकाव्यस्य ॥

॥ सटीकप्रथमस्तवकारम्भः ॥

॥ श्रीगणेशाय नमः ॥

वन्दे कृष्णपदारविन्दयुगलं यस्मिन् कुरङ्गीदृशां
वक्षोजप्रणयीकृते विलसति स्निग्धोऽङ्गरागः स्वतः।
काश्मीरं तलशोणिमोपरितनः कस्तूरिकां नीलिमा
श्रीखण्डं नखचन्द्रकान्तिलहरी निर्व्याजमातन्वते॥१॥

॥ अथ तद्व्याख्या ॥

वत्सास्वाद्य मुहुः स्वया रसनया प्रापय्य सत्काव्यतां
देयं भक्तजनेषु भाविषु सुरैर्दुष्प्रापमेतत् त्वया।
इत्याज्ञापयतेव येन निदधे श्रीकर्णपूरानने
बाल्ये स्वाङ्घ्रिदलामृतं गतिरसौ चैतन्यचन्द्रोऽस्तु नः॥
नितान्तनैसर्गिककृष्णसार-
लीलाढ्यमुच्चैः पदमात्मनीनम्॥
श्रीरूपसंमत्यनुकूलमेव।
पूर्वैः श्रितं संश्रयते सुमेधाः॥
नन्दोत्सवादिरासान्तां होलादोलादिकाधिकाम्।
श्रीकृष्णलीलां जयन्य कर्णपूरो महाकविः॥
एकेन स्तबकेनाह वृन्दारण्यं तदास्पदम्।
बाल्यलीलां ततः षड्भिः प्रादुर्भावमुखां हरेः॥
ततस्तु पञ्चदशभिर्लीलां कैशोरवर्तिनीम्।
एवं द्व्यधिकया चम्पूविंशत्या स्तबकैः कृता॥

अथ सोऽयं कविमुकुटमणिरास्वादितचरणसौरस्यं पुमरपि मनोमधुपराजेनोपभुज्यमानापूर्वनवनवमाधुर्यसंपत्ति श्रीभगवच्चरणकमलमानन्दावेशेन वन्दमान एव तच्चिदंशपरममङ्गलसुधाधारापरंपरया निर्मीयमाणे प्रत्यूहतापानुद्गमगमकेऽपि प्रबन्धे सदाचारसंमाननार्थमवश्यकर्तव्यं मङ्गलाचरणमप्यनुप-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्जयति । वन्द इति । अहं कृष्णपदारविन्दयुगलं वन्दे, यस्मिन् कृष्णपदारविन्दयुगले, कुरङ्गीदृशां, प्रस्तोष्यमाणत्वाद् व्रजसुन्दरीणाम्, अङ्गरागः स्वतः स्वभावसिद्धः सन् विलसति ।

अत्र यस्मिन्निति पदं तत्पदनिरपेक्षमेव । यथोक्तं काव्यप्रकाशे । "यच्छब्दस्सूत्तरवाक्यार्थगतत्वेनोपात्तः सामर्थ्यात् पूर्ववाक्यार्थगतस्य तच्छब्दस्योपादानं नापेक्षते । यथा ।

"साधु चन्द्रमसि पुष्कलैः कृतं मीलितं यदभिरामताधिके ।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः" ॥

इति । कीदृशे, तासां वक्त्रोजप्रणयीकृते, वक्त्रोजयोः स्तनयोः, प्रणयः प्रेम, आश्लेषलक्षणं सख्यं वा, यस्य तथाभूतीकृते । अर्थात् ताभिरेवेत्यर्थः ।

यद्वा, वक्त्रोजाभ्यामेव प्रणयीकृते, प्रणयोऽस्यास्तीति प्रणयि, तथाभूतीकृते । तथाभावस्य सनातनत्वेऽपि "येन शुक्लीकृता हंसाः शुकाश्च हरितीकृता" इतिवच्चिप्रत्ययः । अभूततद्भावोऽत्र प्राकट्यसमयमात्रदृष्ट्या वा । तेन तासां स्तनाश्लेषेण यद्यपि तदीयोऽङ्गरागोऽपि चरणद्वये संभवति तथापि त्रैकालिकतत्सङ्गसूचनार्थं स्वभावादेवासौ तिष्ठतीति भावः ।

यद्वा, निरन्तरतदाश्लेषात् तत्तदङ्गरागप्रलेपपीनःपुन्येनैव स्वाभाविकतां गतश्चरणकमलतलादेः शोणिमादिगुणोऽभूदित्युत्प्रेक्ष्यत इति भावः ।

तमेव विवृणोति, तलशोणिमा, चरणयुगस्य तलस्यारुणिमा, काश्मीरं, स्तनायमण्डलवर्ति कुङ्कुमम्, उपरितनः उपरिस्थः, नीलिमा, श्यामलता, कस्तूरिकां, स्तनाधोमण्डलवर्तिमृगमदं, तथा नखचन्द्राणां कान्तितरङ्गः, श्रीखण्डं,स्तनमध्यमण्डलवर्तिचन्दनं, निर्व्याजं यथा स्यात्, तदेवेदं न तु शोणिमादिकम्, इत्येवम्, आतन्वते, विस्तारयन्ति, ज्ञापयन्ति तलशोणिमादय इति ।

काश्मीरस्य जातिभेदेन हिङ्गुलवर्णत्वमपि प्रसिद्धम् । यथा, "रमाननाभं नवकुङ्कुमारुणं", "त्विष्यत्कपोलारुणकुङ्कुमानना" इत्यस्य वैष्णवतोषिणीव्याख्या च, "वाह्लीकदेशोद्भवकुङ्कुमस्यारुण्यमभिव्यक्तमिति । अत एवामरे तत्पर्याये, "रक्तसंकोचपिशुनं धीरलोहितचन्दन"मिति । अभिधानान्तरे च, "कुङ्कुमं रुधिरं रक्तमसृग्गुक्तं च पीतन"मिति । वर्णभेदेन नामभेद इति ॥ १ ॥

शोणस्निग्धाङ्गुलिदलकुलं जातरागं परागैः
श्रीराधायाः स्तनमुकुलयोः कुङ्कुमक्षोदरूपैः ।
भक्तश्रद्धामधुनखमहःपुञ्जकिञ्जल्कजालं
जङ्घानालं चरणकमलं पातु नः पूतनारेः ॥ २

वर्णितमेवार्थमवितृप्त्या पुनरत्यन्तसर्वोत्कृष्टतमत्वप्रतिपादकांशविशेषमाविष्कृत्य वर्णयंस्तथाभूत एव तत्र स्वाभीष्टवस्तुप्रार्थनया व्यञ्जयति । शोणेति । पूतनारेः श्रीकृष्णस्य चरणकमलं नोऽस्मान् पातु, स्वपादसंवाहनादिसेवायां नियोजनार्थं रक्षतु, "पूतनारे" रित्येतत् प्रतिबन्धकदुरितकूटदमने तत्कृपैव गतिरिति भावः । कीदृशं, शोणाः स्निग्धा अङ्गुलय एव दलकुलं यत्र तत्, श्रीराधायाः स्तनावेव मुकुलौ तयोः कुङ्कुमचूर्णरूपैः परागैरेव तदाश्लेषलब्धैर्जातरागम्, अन्यस्य परागैरन्यस्य रागवत्त्वेत्याश्चर्यम्, भक्तानां श्रद्धैव मधु यत्र तत्, सत्यामेव श्रद्धायां तन्माधुर्यानुभवाच्छ्रद्धैव मधित्युपचारेणोच्यते सातत्येन तदाधिक्ये प्रवर्तनार्थम्, सा च भक्तानामेव संभवेदिति,अथापि भक्तपदोपादानाद्व्यन्तरकालभवा विशिष्टैवासक्तिरूपा ज्ञेया । भक्तिरसामृतसिन्धौ "श्रद्धा रतिर्भक्तिरनुक्रमिष्यती"त्यत्र श्रद्धापदस्य तथा व्याख्यानात्, न तु प्राथमिक्येव सामान्यभूता, तदानीं माधुर्यानुभवयोग्यतानुत्पत्तेरिति । जङ्घे एव नाले यस्य तत् ॥ २ ॥

माधुर्यैर्मधुभिः सुगन्धि भजनस्वर्णाम्बुजानां वनं
कारुण्यामृतनिर्झरैरुपचितः सत्प्रेमहेमाचलः ।
भक्ताम्भोधरधोरणीविजयिनी निष्कम्पशम्पावलि-
र्देवो नः कुलदैवतं विजयतां चैतन्यकृष्णो हरिः ॥ ३ ॥

तदेवं तच्चरणारविन्दमाधुरीवर्णनात्मनस्तत्सेवैकलालसत्वमभिव्यञ्ज्य पुनस्तमेव कलियुगाविर्भावितगौरस्वरूपं स्वलोचनसाक्षादनुभूतचरसौन्दर्यमाधुर्यं भगवन्तं श्रीकृष्णचैतन्यदेवं वर्णयति । माधुर्यैरिति । चैतन्यनामा कृष्णश्चैतन्यकृष्णः, शाकपार्थिवादिः, प्रेम्णा भक्तचेतोहरणात् स्वमाधुर्येण स्वपर्यन्तवैकुण्ठनाथादिसर्वचेतोहरणाद्वा हरिः, विजयतां, विशेषेण स्वांशेभ्योऽपि परमोत्कर्षमाविष्करोतु । कीदृशः, भजनानि नवविधानि श्रवणकीर्तनादीन्येव स्वर्णाम्बुजानि, विरलप्रचारत्वात्, भक्तसरोवराविर्भावित्वाच्च, तेषां वनं, तद्रूपः, अनेन श्रवणादिसाधनभक्तिमयस्वरूपं, गौराकृतित्वं, भक्तमनोमधुकरामोदकत्वं,चोक्तम् । कीदृशं वनं, माधुर्यैर्मधुभिः सुगन्धि । अम्बुजपक्षे, माधुर्यैरेव मधुभिरिति, मधूनामप्यत्र वैलक्षण्यम् । भजनपक्षे साधनदशायामपि तेषां श्रवणादीनां केवलरागप्रवर्त्यमानत्वेनैश्वर्यज्ञाननिरपेक्षत्वेन तत्तद्द्भुतलीलादिनिष्ठानां यानि माधुर्याणि रोचकत्वलक्षणानि, तान्येव मादकत्वान्मधूनि, तैः सुगन्धि, गर्वयुक्तम् । वैकुण्ठनाथादिविषयेभ्यो भजनेभ्योऽप्यात्मपरमोत्कर्षाविष्कारात्, किं पुनर्ज्ञानयोगादिभ्य इति । "गन्धो गन्धक आमोदे लेशे संबन्धगर्वयो"रिति विश्वः । अनेन स्वमाधुर्यामोदितनिखिलभुवनत्वमुक्तम् । पुनः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कीदृशः, सतां शोभनानां प्रेम्णां महाराशिरूपत्वाद्धेमाचलः, कनकगिरिमेरुः, तत्र सतामिति जात्या हेमाचल इति प्रमाणेन च प्रेम्णामन्यप्रेमत उत्कर्षः सूचितः, अनेन पूर्वोक्तताद्दशश्रवणादिसाधनभक्तजनसाध्यप्रेमभक्तिमयस्वरूपत्वमप्युक्तम्, तथाभूताचलः । कीदृशः, भजनप्रवृत्तिकारणानि कारुण्यान्येवामृतानि, तन्मयैर्निर्झरैरुपचितः । वास्तवी कारुण्यशक्तिः प्रेमभक्तिनिष्ठैव तदाधारेणोदयमाना प्रतीयते । प्रेमांशं विना तस्यास्तत्रानुदयदर्शनात् । तथाह्युक्तं भक्तिरसामृतसिन्धौ जातरतिभक्तनिरूपणे, "उत्पन्नरतयः सम्यगि"त्यादिना साधकस्य जातरतिकत्वम्, उदाहृतं चैकादशस्कन्धवचनं,"प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यम"इति । अनेन स्वकृपामृतधारास्वपि तज्जगज्जीवकत्वमुक्तम् । अथोत्पन्नप्रेमैव भगवत्साक्षात्स्वरूपप्रकाशचमत्कारेण स्वाधारमलंकरोतीति द्योतयन् विशिनष्टि, निष्कम्पानां स्थिराणां शम्पानां विद्युतामावलिः श्रेणी तद्रूपः । सा कीदृशी, भक्ता एवाम्भोधराः, प्रेमामृतवर्षणशीलत्वात्, तेषां धोरणी श्रेणी, तत्रैव विजयिनी परमोत्कर्षेण स्थायिनी । अनेन प्रेमभक्तिमज्जनमात्रलभ्यसाक्षात्स्वरूपप्रकाशत्वमुक्तम् ।

तदेवं तदीयशुद्धसत्त्वविशेषस्वरूपमेव प्रथमं भक्तेषु श्रवणकीर्तनादिरूपेण तिष्ठति, तदेव दृढाभ्यासेनासक्त्या, अनश्वरस्वरूपतामापद्यते, तत्प्रेमैव सपरिकरभगवत्साक्षात्स्वरूपप्रकाशानुभवचमत्कारतां प्राप्नोतीति वैष्णवसिद्धान्तोऽपि ध्वनित इति ॥ ३ ॥

नमस्यामोऽस्यैव प्रियपरिजनान् वत्सलहृदः
प्रभोरद्वैतादीनपि जगदघौघक्षयकृतः ।
समानप्रेमाणः समगुणगणास्तुल्यकरुणाः
स्वरूपाद्या येऽमी सरसमधुरास्तानपि नुमः ॥ ४ ॥

नमस्याम इति । वत्सलहृदोऽर्थान्मादृशेषु सर्वेषु येऽमी स्वरूपाद्याः, श्रीदामोदरस्वरूपश्रीरामानन्दरायरूपसनातनाद्याः । कीदृशाः, अस्य प्रभोरेव समानप्रेमाणः । यद्वा, परस्परमेव समानस्तारतम्येन मादृशैर्लक्षयितुमशक्यः प्रेमा येषां ते, तानपि, नुमः स्तुमः । अपिकारादद्वैतादीनपि नुमः, तानपि नमस्याम इत्युभयत्रैवोभयं योजनीयम् । प्रभोरद्वैतादीन्, प्रभोः स्वरूपाद्या, इति श्लेषभङ्गया तच्छक्तिमया एव त इति बोधितम् ॥ ४ ॥

गुरुं नः श्रीनाथाभिधमवनिदेवान्वयविधुं
नुमो भूषारत्नं भुव इव विभोरस्य दयितम् ।
यदास्यादुन्मीलन्निरवकरवृन्दावनरहः-
कथास्वादं लब्ध्वा जगति न जनः क्वापि रमते ॥ ५ ॥

अवनिदेवा विप्रास्तद्वंशे विधुं चन्द्रं, तेन विप्रान्वयस्य समुद्रत्वमुक्तम् । भुवः पृथिव्या भूषारत्नमिव । "उद्धाहुरिव वामन" इति, "क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूर"मिति, "एकावयवसंस्थेन भूषणेनेव कामिनी"त्यादिप्रयोगदर्शनात्-"दिवेन सह नित्यसमासवचनं विभक्त्यलोप"इत्यस्य प्रायिकत्वप्रतिपादनाद्ध्रस्तप्रयोगोऽयं नानुपपन्न इति । चन्द्रोऽपि शिवमूर्तेर्भूषारत्नं भवति, अस्य विभोः श्रीचैतन्यदेवस्य, यदास्यादुन्मीलन्त्या निरवकरायाः निर्दोषायाः वृन्दावनस्य रहःसंबन्धिकथायाः आस्वादं, तस्य विधुत्वात् तन्मुखोद्गीर्णत्वेन कथाया अमृतत्वमिति भावः, क्वापि जगति भोग्यस्थले न रमते, नासक्तो भवति । वृन्दावनं शीघ्रमागच्छतीति भावः । एतेन स्वस्य वृन्दावनवासे हेतुरपि दर्शितः ।

अत्र यद्यपि श्रीगुरुवन्दनानन्तरमेव देवतावन्दनं श्रीसूतादिषु दर्शनात् सदाचारप्राप्तं, तथापि शुकादौ विपर्ययेणापि दर्शनादविरुद्धमेवेदम् । किं वा, वस्तुतो दीक्षागुरुरप्यस्य श्रीभगवानेव, तदाज्ञापारवश्येनैव गुर्वन्तराश्रयणं, तथाहि, कथा श्रीचैतन्यचरितामृते, "एकदा महाप्रभुर्द्विजप्रियसहचरसङ्गी स्वपार्षदप्रवरस्यैतत्पितुः श्रीशिवानन्दसेनस्य सपरिजनस्य रथयात्रादर्शनच्छलेन स्वचरणान्तिकमागतस्यावासमागतस्तेन च ससंभ्रमं वन्दितचरणकमलस्तत्र च बाल्यविलासं प्रपञ्चयन्तं पञ्चवर्षवयसमेतं पित्राकारितवन्दनमालोक्य साधुस्तवायं पुत्रो जात इत्यभिनन्द्य कृपयैतच्छिरसि चरणं दिधीर्षुर्बाल्यावेशेन मुखं व्यादत्तवन्तमेनं कौतुकेन चरणाङ्गुष्ठमास्वादयामास, दिव्यकाव्यकर्तृत्वशक्तिमप्यलक्षितं संचारयामास, वदवद कृष्णकृष्णेत्युवाच च, ततोऽसौ शिशुरुत्फुल्लमुखो ब्रूहि ब्रूहीति पित्रादिभिः प्रयुज्यमानोऽपि यदि नानुजगाद, प्रभुरपि विस्मयमभिनीय विश्वमेव कृष्णनाम ग्राहयितुमहमशकं न पुनरिममेकमेवेत्युवाच, तदा श्रीस्वरूपगोस्वामिभिरुक्तं, भगवता स्वयमेव स्वनाममहामन्त्रमुपदिष्टोऽसि कथं पुनस्तमुच्चैरुच्चारयामीत्येवमस्य गम्भीरं हृदयमनुमीयत इति, परे द्यवि वत्स वद किंचिदित्युक्त एव प्रभुणा शीघ्रं पद्यमेकं बबन्ध ।

"श्रवसोः कुवलयमक्ष्णोरञ्जनमुरसो महेन्द्रमणिदाम ।
वृन्दावनतरुणीनां मण्डनमखिलं हरिर्जयति" ॥
इति,

ततः संतुष्टेन भगवता कविकर्णपूर इति नाम तद्दिनमारभ्य कृतवता तदभीष्टमन्त्रराजमपि हृदैव स्वयमुपदिश्यापि लोकरीतिख्यापनाय समये श्रीनाथपण्डितद्वारापि पुनरसावुपदिदेश" इति ॥ ५ ॥

गते स्वस्वाभीष्टं पदमहह चैतन्यभगवत्-
परीवारे पश्चाद्गतवति च तस्मिन् निजपदम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विलुप्ता वैदग्ध्यी प्रणयरसरीतिर्विगलिता
निरालम्बो जातः सुकविकृतेः परिमलः ॥ ६ ॥

प्रारिप्सिते काव्ये वर्णयितव्यस्य रसस्य प्रेम्णश्च सामस्त्येनास्वादकानदृष्ट्वा खिद्यमानाह । निजपदं प्रपञ्चागोचरं निजधाम, प्रकाशविशेषमित्यर्थः । तदानीं तत्परिवाराणां क्रियतां प्राकट्येऽपि तच्छोकव्याकुलत्वेन वैदग्ध्याद्यनाविष्कारेण तदन्तिकगमनोन्मुखत्वेन च गत इत्युक्तं, भाविकालदृष्ट्या वा । परिमलश्चर्वणाविशेषविमर्दोत्थ आस्वादचमत्काररूपमनोहरगन्धः, "विमर्दोत्थे परिमलो गन्धे जनमनोहरे" इत्यमरः । तेन कवितायाः पुष्पमञ्जरीत्वारोपेणास्वादनीयरसत्वं ध्वनितं, निरालम्बः, तदास्वादकतादृशरसिकभक्तमधुपानां विरलप्रचारत्वादिति भावः ॥ ६ ॥

तव स्तवं किं करवाणि वाणि
प्राणी न वक्तुं क्षमते त्वदीहाम् ।
यतः सुबद्धेव तनोषि मानं
तमन्यथा सन्तमपि क्षिणोषि ॥ ७ ॥

श्रीभगवत्प्रसादजनितवैचित्रीकां स्ववाणीं संबोधयंस्तया श्रीभगवन्तमेव स्तोतुं प्रतिजानीते । तवेति । सुष्ठु बद्धेव सती मानमादरं तनोषि, अन्यथा न सुष्ठु बद्धा सती वर्तमानमपि तं मानं क्षिणोषि नाशयसि; येन दृढं बध्यसे तस्यैव मानं विस्तारयसीति विचित्रा तव चेष्टेत्यर्थः । अतः किमिति स्तवं करवाणि, सुष्ठु बध्नाम्येवेति भावः ॥ ७ ॥

मातर्वाणि तवानिशं करुणया लब्धप्रमोदा वयं
किं नु त्वां स्तुमहे त्वयैव यजतां तोयेन कस्तोयधिम् ।
यत्तत् प्रत्युपकुर्महे भगवतः कृष्णस्य लीलामृत-
स्रोतस्येव निमज्जयामि भवतीं नोत्थेयमस्मात् पुनः ॥ ८ ॥

ननु प्रणयरसनया हृदि बध्वापि भक्तैर्भगवान् स्तूयत एवेत्यतः स्तवे को दोषस्तत्राह । तव करुणया लब्धः प्रमोदो यैस्ते वयं किं नु भोस्त्वयैव वाण्यैव त्वां वाणीं स्तुमहे, जलेनैव जलधिं जलाशयं कः पूजयतु, स्तवसाधनस्यान्यस्याभावाच्च स्तुमह इत्यर्थः । त्वत्कर्तृकानन्ददानस्येतदेव प्रत्युपकरणं कुर्महे, कृष्णस्यैव लीलामृतस्रोतस्येव निमज्जयाम्येवेत्यर्थसौन्दर्यादेवकारस्त्रिष्वेव योजनीयः । अस्मादमृतस्रोतसो भवत्या पुनर्नोत्थातव्यमिति । "स्रोतोऽम्बुवेगेन्द्रिययो"रिति विश्वः ॥ ८ ॥

आत्मनः प्रियतया तनुभाजां
नात्मनः कृतिषु दूषणदृष्टिः ।
सर्वतस्तिमिरमस्यति दीपो
नात्ममूलतिमिरं विनिहन्ति ॥ ९ ॥

ननु पूर्वपूर्वमहाकविकृतकाव्येष्वप्यर्वाचीनैर्मम्मटादिभिर्दोषोत्थापनात् काव्यनिर्माणे कोऽयमाग्रहः । सत्यम् । ये विद्वांसः परकृते काव्ये दोषान् विचिन्वन्ति तत्कृतेऽप्यन्ये तथेत्यनवस्थितिरेवेत्यर्थान्तरन्यासेनाह । तनुभाजामात्मनः प्रियतया हेतुना, आत्मा हि प्रियो भवतीत्यत आत्मनः कृतिषु दूषणदृष्टिर्न स्यात्, किंतु सा परकृतिष्वेव स्यादित्यर्थः । अस्यति दूरीकरोति, आत्ममूलतिमिरं दीपमूलस्यमन्धकारं, दीपान्तरेण तस्यापि नाशः संभवतीति भावः ॥ ९ ॥

निर्मलेऽपि सुजनाः स्वचरित्रे
दोषमेव पुरतः प्रथयन्ते ।
उज्ज्वलेऽपि सति धाम्नि पुरस्ता-
द्धूममेव वमति स्फुटमग्निः ॥ १० ॥

साधूनां कवीनां पुनरन्य एव स्वभाव इत्याह । पुरतः प्रथममेव प्रथयन्ते ख्यापयन्ति, पर्यालोचयन्तीत्यर्थः, स्वचरित्रे स्वक्रियायां न तु परकृते धाम्नि, स्वीये तेजसि निर्मलेऽपि सति ॥ १० ॥

अर्थादिपर्याकलनं विनापि
प्रह्लादयन्ते सुकवेर्वचांसि ।
विनावगाहादपि दृष्टिमात्रा-
न्मनः पुनन्त्येव हि पुण्यनद्यः ॥ ११ ॥

ध्वनिगुणालंकाराद्यवगाहनसमर्थ एव जने काव्यमिदं सफलीभविष्यति नान्यत्रेति चेदत आह । अर्थादीनाम्, अर्थशब्दगुणालंकाररसानां, पर्यालोचनं विनापि मनः पुनन्ति किं पुनर्देहेन्द्रियादीन्, पुण्यनद्यः श्रीगङ्गाद्याः ॥ ११ ॥

तावत् पदानि जायन्ते निर्दोषाणि पृथक् पृथक् ।
यावत् स्वरसनासूच्या तानि यत्नाति नो कविः ॥ १२ ॥

ननु परकरिष्यमाणं दोषासञ्जनं किमिति प्रथमं स्वयमेवोरीकुरुषे, निर्दोषैरेव पदैः किमिति न निबध्नासि, तत्राह । तावदिति । मिलितानि कृत्वा रसनासूच्या अन्यत्ने निर्दोषीकरणमतिदुष्करमेवेति भावः । तेन सहृदयहृदयविक्षेपका रसापकर्षका दोषा एव हेयाः । केचिद्यमकानुप्रासाद्यनुरोधेनोपादेया अपि । सर्वथा निर्दोषस्य काव्यस्यैकान्तमसंभवादिति प्राचीनैरप्युक्तमिति ॥ १२ ॥

निर्मलयसि भुवनतलं
सततान्विष्येन परमलेन ।
खलरसने संमार्जनि
तदपि च भीतिर्भवत्स्पर्शे ॥ १३ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गुणालंकाररसोत्कर्षेऽपि केवलं दोषमेव ये गृह्णन्ति ते परकीर्तिलोपचिकीर्षवः खला दूरे परिहार्या इत्याह । निर्मलयसीति । हे खलजिह्वे संमार्जनि स्वर्णमणिमयस्थलेऽपि कथंचिदलक्षितमकिंचित्करं सूक्ष्मतृणशर्करादिखण्डरूपं मलमेव ग्रहीतुं तत्र पवित्रस्थले निजस्पर्शादपाविद्यमपि कर्तुं प्रविशसीति भावः ॥ १३ ॥

न लवोऽपि लवेन च व्यथायाः
परिवृद्धौ विदुनोति यस्य सर्वः ।
न खलो नखलोमतो मतोऽन्यः
स्तमबद्धाः किल के न संत्यजेयुः ॥ १४ ॥

यस्य लवेन छेदेन व्यथाया लवोऽपि लेशोऽपि न भवति । यस्य परिवृद्धौ सत्यां सर्वो जनो विदुनोति विशेषेणोपतप्तो भवति । दुनोतिरयमकर्मकोऽप्यस्ति । "देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमी"त्यादिगीतगोविन्दादिदृष्टेः, * तथाभूतादखलोमतः खलोऽन्यो न मतः, न ज्ञातः, ये नखा यानि लोमानि च छेदयितुमिष्टानि तत्स्वरूप एव खलोऽनुभूतः, तादृग्यादित्यर्थः, तमेतादृशम्, अबद्धाः स्वतन्त्राः किल निश्चितं के न संत्यजेयुः । ये बद्धास्तत्पारवश्यबन्धने पतितास्त एव न त्यजेयुरिति । नखलोमापि कारागारस्था एव न त्यजेयुरित्यनेनापि साधर्म्यम् । तमित्यस्य पुंस्त्वनिर्देशो दार्ष्टान्तिकपक्षस्यैव प्राधान्यात् । पूर्वत्र तनुभाक्शब्दोक्तानां विदुषां परकृतकाव्यदोषोद्धृत्या तच्चिष्टरसालंकारगुणादिप्रकाशकत्वेन च घटपटादिनिष्ठतिमिरमात्रहारकतत्तद्रूपादिप्रकाशकदीपेन साधर्म्यं, खलानां पुनः सतोऽपि गुणालंकारादीनाच्छाद्य काव्यदोषोपचिकीर्षया केवलदोषासज्जनमेव कुर्वतां मुखपाण्यादिसौन्दर्याच्छादकदेहशैथाकनखलोमसाधर्म्यमिति विवेकः । आत्मन इत्यादिद्वयं सामान्यत एव साधूनामुत्तमत्वतारतम्यज्ञापकम् । तथा निर्मलयसीत्यादिद्वयं खलानामधमत्वतारतम्यज्ञापकम् । इत्येवं पद्यचतुष्टयं मध्यमपद्यद्वयानुरोधेन काव्यप्रकरण एव व्याख्यातमिति ॥ १४ ॥

आनन्दवृन्दावननामधेयां
चम्पूमिमां कृष्णचरित्रचित्राम् ।
मनोविनोदाय रसग्रहाणां
चक्रे स्वमोदाय च कर्णपूरः ॥ १५ ॥

इमां चम्पूं "गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयत" इत्याद्युक्तलक्षणाम्, आनन्दानां वृन्दमवति पालयति तथाभूतं नामधेयं यस्यास्तां, श्लेषेणानन्दरूपं वृन्दावनसंबन्धिकृष्णचरित्रं च वर्णनीयत्वेन वर्तते यत्र तत्तथाभूतं नामधेयं यस्यास्ताम् । श्लेषेण कर्णपूर इति रसग्रहाणां कर्णावानन्देन पूरयतीति सः । कविकर्णपूर इति नाम्नो भगवता कृतत्वात् स्वकर्तृत्वदोषसहनेनापि तन्निर्देशः । तत्राप्यतिलज्जया कविशब्दाप्रयोगः ॥ १५ ॥

यथा तथा स्युः कुसुमानि माला
चिचायते गुम्फनकौशलेन ।
तत्रापि चेत् तानि सुसौरभाणि
भवन्ति रम्याणि तदा पुनः किम् ॥ १६ ॥

सुसौरभाणि दशमस्कन्धसंबन्धिकृष्णचरित्ररूपत्वेन रम्याणि, तत्रापि वृन्दावनीयत्वेन सर्वचित्ताकर्षकत्वात् ॥ १६ ॥

अस्ति सकलवैकुण्ठसारमपि न[1] वैकुण्ठसारं, वग्रभूतेष्वपि न वग्रभूतेषु चिन्महसुः समुत्पन्नम्, अकृतमपि कृतकं, प्रकृतिसिद्धमप्यप्रकृतिसिद्धम्, अत एव नित्यभूतमप्यनित्यभूतं, सुरसार्थबहुलमपि सुरसार्थदुर्लभम् ॥ १७[2] ॥

वर्णनीयानां श्रीकृष्णविलासमहारत्नानां खनिभूतत्वात् प्रथमं सपरिकरं वृन्दावनं वर्णयति । अत्र दीर्घदीर्घेषु गद्येषु सुखबोधार्थं वाक्यमध्येऽप्यङ्का देयाः, अतिह्रस्वेषु तेषु बहुवाक्यान्तेऽपि, क्वापि टीकाभावादपीत्येवमत्र नास्ति नियम इति । वृन्दावनं नाम वनमस्ति, वर्तमानप्रयोगोऽस्य नित्यत्वबोधकः, सकलेभ्यो वैकुण्ठेभ्यः सारं श्रेष्ठमपि नवैकुण्ठसारं, न वै निश्चितं कुण्ठः सारो बलं यस्य तत्, सतापि महता परमैश्वर्येण न कुण्ठीभूतं, महामाधुर्यरूपबलमस्येत्यर्थः । एवमादिषु शब्दमात्रेणैव विरोधाभास इति । वग्रभूतेषु केदाररूपेषु चिन्महःसु, सम्यगुत्पन्नमिति प्रतीतिमात्रत्वज्ञापनाय, वस्तुतस्त्वनादिसिद्धमेव, "पुंनपुंसकयोर्वग्रः केदारः क्षेत्र"मित्यमरः, चिन्महसामपि जातिपरिमाणाभ्यामुत्कर्षमाह, नवानि नित्यनवनवद्वासमानानि च, अनुरागविवर्तमयत्वात्, प्रभूतानि प्रचुरतमानि च, परिपूर्णतमत्वात्, तेषु । अकृतकमकृत्रिमं, कृतकं कृतं कं सुखं येन तत् । प्रकृत्या स्वभावेन स्वरूपशक्त्यैव सिद्धं, न प्रकृत्या मायाशक्त्या सिद्धम् । अकारो विष्णुस्तस्य नित्यरूपाणि भूतानि प्राणिनः पृथिव्यादीनि वा यत्र तत् । "युक्ते त्मादावृते भूतं प्राण्यतीते समे त्रि"ष्वित्यमरः । शोभना रसास्वादा येषां तथाभूतैरर्थैः फलादिवस्तुभिः, शृङ्गारादिरसैर्वा, बहुलं, सुराणां देवानां सार्थैः समूहैर्दुर्लभम् । "संघसार्थौ तु जन्तुभि"रित्यमरः ॥ १७ ॥

* न्वाद् दृष्टात्, इति पाठान्तरम् ।

१ केवलं विरोधाभासालंकारानुरोधेन नञः पृथक् कृतिरेतादृशस्थलेषु बोध्या । अर्थान्तरे तु यथासंभवमेकपदत्वं नवप्रभूतेषु, नवकुलैः, नतमालैः, इत्यादौ । पृथक्पदत्वं वा न वै कुण्ठसारं; इत्यादौ ज्ञेयम् ।

२ इमां संख्यामारभ्य न श्लोकसंख्यापरताङ्कानां, किंतु गद्यानां सुखबोधायेति, क्वचिच्च श्लोकपरतायेति यथासंभवं प्रायः स्मरणीयम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विपल्लवैरपि विपल्लवस्याप्यपदैः, अप्रसवैरपि सुप्रसवैः, लीलायतनैरप्यलीलायतनैः शाखिभिराकीर्णं, मन्दारबहुलमप्यमन्दारं, बकुलैरपि न बकुलैः, तमालैरपि न तमालैरुपशोभितम् ॥ १८ ॥

शाखिभिर्वृक्षैराकीर्णं व्याप्तम् । कीदृशैः, विशिष्टाः पल्लवा येषां तैः, विपदां लवस्य लेशस्याप्यपदैः । न विद्यते प्रसवो जन्म येषां तैः, नित्यसिद्धत्वात्, शोभनाः पुण्यफलादयो येषां तैः । "प्रसवस्तु फले पुष्पे वृक्षाणा'मिति विश्वः । लीलानामायतनैर्गृहरूपैः, अलीनां भ्रमराणाम्, इला वाचस्तासामयतनं यत्राभावः सौलभ्यं यत्र तैः । "भूगोवाचस्त्विडा इला" इत्यमरः । मन्दारैर्देवतरुभिर्बहुलम्, अमन्दानामुत्तमानामेवारो गमनं यत्र तत् । ऋ गतौ, घञन्तः । नवकुलैर्नूतनसमूहैः । नता नम्रा माला श्रेणी येषां तैः ॥ १८ ॥

किं बहुना भगवद्वपुरिवोज्जृम्भमाणमन्मथकरजलेखारक्तचन्दनधवलकुचप्रियालतालीभृङ्गरूपं पुरुकरुणं च ॥ १९ ॥

उज्जृम्भमाणेनोद्गच्छता मन्मथेन कामेन हेतुना याः करजलेखा नखलेखास्ताभी रक्तौ चन्दनेन धवलौ कुचौ यासां ताः प्रिया एव लतास्यस्तासु भृङ्गरूपं, पक्षे, उज्जृम्भमाणं प्रकाशमानं मन्मथादीनां वृक्षभेदानां रूपं सौन्दर्यं यत्र तत् । तत्र मन्मथः कपित्थः, करजलेखा करञ्जश्रेणी, रक्तचन्दनधवौ प्रसिद्धौ,लकुचो डेहुआ इति ख्यातः, अत्र क्वचिदपभ्रंशभाषा प्रायो गौडीयानामेव लिख्यते, तालो ताडिपत्र इति ख्यातः, भृङ्गं गुडत्वक्,इति "कपित्थे स्युर्दधित्थयाहिमन्मथाः", "करञ्जश्च करञ्जके", "लकुचो लिकुचो डहुः", "राजादनः पियालः स्यात्," "तालो खर्जूरी च तृणद्रुमाः", "त्वक्पत्रं सूत्कटं भृङ्ग"मित्यमरः । पुरुकरुणं बहुकृपायुक्तं, बहुकरुणवृत्तयुक्तं च । इत्येवमादिपूज्जृम्भमाणेत्यादिशब्दमात्रसाम्येनैवोपमा, सकलकलं पुरमेतज्ज्ञातं सम्प्रति सितांशुबिम्बमिवेत्यादिवत्,विरोधाभास इवोपमाभासोऽयमिति कश्चित् ॥ १९ ॥

मुनिमण्डलमिव शाण्डिल्यलोमशादिसहितमुपनतवानप्रस्थगणं च, गायत्रीजपाकुलितं च,समरस्थलमिवाम्लानबाणकरवीरकुलाकुलितं चर्मनिर्मितक्रीडं च, पीलुपरिवृतं च ॥ २० ॥

शाण्डिल्येति स्पष्टम्, पक्षे शाण्डिल्यो बिल्वतरुः, लोमशो जटामांसी, "बिल्वे शाण्डिल्यशैलूषौ," जटामांसी जटिला लोमशा मिसि"त्यमरः, वानप्रस्थस्तृतीयाश्रमी, मुहुआ इति ख्यातो मधूकश्च, "मधूके तु गुडपुष्पमधुद्रुमौ", "वानप्रस्थमधुष्ठीला"वित्यमरः । गायत्रीति स्पष्टम् । पक्षे गायत्री खदिरः, जपा, ओड्रपुष्पं, "गायत्री बालतनयः खदिरो दन्तधावनः," ओड्रपुष्पं जपा", इत्यमरः । समरस्थलं युद्धस्थानम्, अम्लानबाणयुक्तः करो यस्य तथाभूतेन वीरकुलेनाकुलितं व्याप्तं, पक्षे,अम्लानादीनां कुलेन व्याप्तम् । अम्लानस्तु महासहा," "नीला झिण्टी द्वयोर्बाणः," इत्यमरः । चर्मभिर्यौधविशेषैः कर्तृभिर्भूर्जवृक्षैः करणैश्च निर्मिता क्रीडा यत्र तत् । "भूर्जे चर्मभृदुत्वचा"वित्यमरः, पीलुर्हस्ती वृक्षभेदश्च, "द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलव" इत्यमरः ॥ २० ॥

कुरुपाण्डवायोधनमिव गाङ्गेयारुष्करार्जुनशरपरिपूर्णं शिखण्डिमण्डितं च, स्वमिव निरन्तराशोकातिमुक्तपुरुषप्रायम् ॥ २१ ॥

आयोधनं युद्धं, गाङ्गेयस्य भीष्मस्य,अरुष्करा व्रणकरा येऽर्जुनशरास्तैः परिपूर्णं, "व्रणोऽस्त्रियामीर्ममरु"रित्यमरः, पक्षे गाङ्गेयं स्वर्णं, तच्चामा नागकेशरः, अरुष्करो भल्लातकी, अर्जुनशरौ प्रसिद्धौ । "नागकेशरः काञ्चनाह्वयः", "वीरवृक्षोऽरुष्करोऽग्निमुखो भल्लातकी त्रिष्वि"त्यमरः, शिखण्डी द्रुपदपुत्रः, पक्षे मयूरः, यद्वा शिखण्डिपदेन * कथंचिद्गुञ्जायूथिकयोरप्यभिधानं, "गुञ्जायां यूथिकायां शिखण्डिनी"ति विश्वः । स्वमिव वृन्दावनमिव निरन्तरं सदाशोकाः शोकरहिता अतिमुक्ता मुक्तानतिक्रान्ता भक्ता ये पुरुषास्तत्प्रायं, "प्रायो भूम्न्यन्तगमने चे"त्यमरः, पक्षे निरन्तरा निरवकाशा निबिडा इति यावत्, अशोकाः, अतिमुक्ता माधवीलताः, पुरुषाः पुंनागाः, तत्प्रायम् । "अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता", "पुंनागे पुरुषस्तुङ्ग" इत्यमरः ॥ २१ ॥

निरन्तरालविराजमानज्योतिश्चक्रमप्यविकर्तनमनिशेशमभीमं विबुधमजीवमकविगम्यममन्दं विकेतु वितमो निस्तारकम् ॥ २२ ॥

निरन्तरालं निबिडं यथा भवत्येवं विराजमानं ज्योतिश्चक्रं यत्र तथा भूतमपि,अविकर्तनं, सूर्यरहितम्,अनिशेशं चन्द्रशून्यमित्यादि, इत्येवमर्थमुद्भाव्य विरोधः । वस्त्वर्थश्च निबिडं विराजमानं ज्योतिषां कान्तीनां चक्रं समूहो यस्य तत्, यद्वा निरन्तरं सर्वदा,अलवि,लवश्छेदस्तद्रहितं, केनाप्यनाश्यमित्यर्थः, राजमानज्योतिः प्रदीप्ततेजस्कं चक्रं सुदर्शनाख्यं यत्र तत्, "चक्रेण रहिता मथुरे"ति श्रुतेः, यद्वा निरन्तरमेव,अलविराजमानं, रविणा विनैव राजमानमित्यर्थः, रलयोरैक्यस्मरणात्, ज्योतिश्चक्रं प्रकाशमण्डलं यत्र तत्, अविकर्तनमि-

* गुञ्जार्थे पुंधत्वाभावासंभवं विज्ञाय कथंचिदित्युक्तिः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्यादि सूर्यचन्द्रादिरहितमित्येषोऽर्थोऽत्रापि पक्षे संगमनीयः, "न तत्र सूर्यो न च चन्द्रतारके," 'न तद्भासयते सूर्यः" इत्यादिश्रुतेः, कविः शुक्रः, मन्दः शनिः, तमो राहुः, अर्थान्तरं च, न विद्यते विशेषेण कर्तनं कालादिभिर्नाशो यत्र तत्, अनिशमेवेशः श्रीकृष्णो यत्र, अनिशमीष्टे, इति वा, अभीमं न भूमिविकारः, अप्राकृतत्वात्, विशिष्टा बुधा विज्ञा यत्र तत्, अजीवम्, अविद्यावृतपुरुषरहितं, न कवेः पण्डितस्यापि गम्यं, दुर्ज्ञेयत्वात्, अमन्दमुत्तमं, विकेतु, उत्पातादिचिह्नरहितं, "केतुर्ध्वजौ पताकायां ग्रहोत्पातादिलक्ष्म चे"ति विश्वः, वितमो विगततमोगुणं, निस्तारकं निस्तारकर्तृ ॥ २२ ॥

स्वतेजसा तु सुभास्वत् सुपीयूषकिरणं सुमङ्गलं सुबुधं सुजीवं सुकविगम्यं सुभानवं सुकेतु सुतमः सुतारकम् ॥ २३ ॥

नन्वन्यदेशवत् तत्रापि सूर्यादयः प्रतीयन्त एवेत्याशङ्क्याह, स्वतेजसेत्यादि, स्वकान्त्या तु सुभास्वदिति, स्वीयचिच्छक्तिप्रकाशविशेषमयत्वादप्राकृता एव सूर्यादयः प्राकृता इव प्रतीयन्ते, श्रीकृष्णस्य नरलीलत्ववत् तत्परिवाराणां तेषामपि तथालीलत्वमित्यर्थः, तथाह्युक्तं भागवतामृते, "प्राकृतेभ्यो ग्रहेभ्योऽन्ये चन्द्रसूर्यादयो ग्रहाः । लीलास्थैरनुभूयन्ते तथापि प्राकृता इवे"ति । सुभानवं शोभनो भानुपुत्रः शनिर्यत्र तत्, सुभास्वदित्यादीनां पूर्ववदर्थान्तरं च, सुभास्वत्, शोभनच्छवियुक्तं, शोभनाः पीयूषमयाः किरणा अंशवो यत्र तत्, शोभनाभिर्भाभिः कान्तिभिर्नवं, सुकेतु शोभनपताकं, सुतमः शोभनं सुखदायि तमोऽन्धकारो यत्र तत्, व्रजाङ्गनानां कृष्णाभिसारसाहाय्यकारित्वात्, शोभनं तारकं मोक्षदायकशक्तिविशेषो यत्र तत् ॥ २३ ॥

भूविशेषकमपि न भूविशेषकं, सदा सक्षणमपि क्षणरहितं, व्यापकमपि नव्यापकं, किंचन निखिलगुणवृन्दावनं वृन्दावनं नाम वनम् ॥ २४ ॥

भुवः, पृथिव्या विशेषकं तिलकरूपं, "तमालपत्रतिलकचित्रकाणि विशेषक"मित्यमरः, न भूविशेषकं, प्राकृतो भूमिविशेषो न तदित्यर्थः, "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्त"इति कत्वन्तस्य क्लीवत्वम् । अयमर्थः, यथा महावैकुण्ठनाथाद्यंशिनोऽपि श्रीकृष्णस्य नरलीलत्वं, तथा तद्धाम्नो वृन्दावनस्यापि महावैकुण्ठाद्यंशित्वेऽपि भूविशेषलीलत्वं, तत एव भूतिलकायमानत्वं, वस्तुतः सिद्धान्ते तु श्रीकृष्णस्य नराकृतित्वेऽपि न प्राकृतनरत्वं यथा तथा वृन्दावनस्यापि भूविशेषाकृतित्वेऽपि न प्राकृतभूविशेषत्वमिति, एतदेवास्य वैकुण्ठतो वैलक्षण्यं, यद्युगपदेव वास्तवमिथोविरोधिधर्मद्वयाश्रयत्वेनाक्षतत्वेऽपि क्षतकत्वं, क्षणराहित्येऽपि क्षणमाहित्यं, परिच्छिन्नत्वेऽपि व्यापकत्वम । इत्येवं प्रायः सर्वत्रैवार्थान्तरं विनैव सिद्धान्तविशेषप्रतिपत्त्यै व्याख्येयमिति । सक्षणं सोत्सवं, क्षणेन विकारहेतुकालेन रहितं, यद्वा, निर्व्यापारस्थितिरहितं, "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण" इत्यमरः, व्यापारोऽत्र भगवल्लीलैव । नव्यस्य स्तव्यस्य वस्तुनः प्रेम्णः श्रीकृष्णस्य वा, आपकं प्रापकम् । गु स्तुतावित्यस्य रूपम् । निखिलगुणवृन्दानामवनं पालनं यत्र तत् ॥ २४ ॥

यत्र हि ।

क्वचिन्मरकतस्थली कनकगुल्मवीरुद्द्रुमाः
क्वचित् कनकवीथिका मरकतस्य वल्ल्यादयः ।
क्वचित् कमलरागभूः स्फटिकगुल्मवीरुद्द्रुमाः
क्वचित् स्फटिकवाटिकाः कमलरागवल्ल्यादयः ॥२५॥

वर्णवैविध्यादौचित्येन सौन्दर्यवैचित्रीमाह, क्वचिन्मरकतमणिमयी स्थली, अकृत्रिमभूमिः, तत्र कनकमया गुल्मलताद्रुमाः, सन्तीत्यर्थः, पूर्वोक्तस्यास्तीत्यस्य वचनपरिणामेनाप्यनुषङ्गः । एवमग्रेऽपि यथासंभवं ज्ञेयम् । कनकवीथिका कनकमयी वर्त्मभूमिः, यद्वा, क्वचिद्वनभूमौ कनकपङ्क्तिः, स्वर्णश्रेण्येव, नतु मृत्तिकापुञ्जः, तत्रैव मरकतस्य वल्लिगुल्मद्रुमाः ॥ २५ ॥

किंच,

क्वचिन्मरकतद्रुमाः कनकवल्लिभिर्वेल्लिताः
क्वचित् कनकपादपा मरकतस्य वल्लीजुषः ।
क्वचित् स्फटिकभूरुहाः कमलरागवल्लीभृतो
द्रुमाः कमलरागजाः स्फटिकवल्लिभाजः क्वचित् ॥२६॥

न केवलं भूमिद्रुमाद्योरेव परमौचित्येन परस्परविजातीयवर्णत्वमयतया सौन्दर्यं, किंतु परस्परमिलितयोर्वृक्षवल्ल्योरपीत्याह, क्वचिदिति, वेल्लिता व्याप्ताः, "वेल्लितं कुटिले प्रोक्तं वाच्यवद्विधुते प्लुते"इति विश्वः, एवमत्र पूर्वोक्ता वक्ष्यमाणाश्च वृक्षजातय एव काश्चिन्मरकतादिमणिमय्यः, केवलं पत्राकृतिस्कन्धविन्यासादिभिरेव परिचीयन्ते, काश्चन स्वरूपेणापि स्थिता ज्ञेयाः, भगवतो विचित्रलीलौपयिकत्वात्, अत एव क्वचिदिति शब्दप्रयोगः ।

न चैवमादीनामेतादृशत्वस्य कविवर्णनमात्रप्रमाणत्वं वाच्यम् । बहुतरपुराणागमसंहिताश्रुतिभिरप्येवमेवोक्तत्वात् । किंतु तथाभूतत्वेन कदाचित् कैश्चिद्दृश्यते, न दृश्यते चेत्यादि स्तवकान्ते सप्रमाणकं व्याख्यास्यत इति ॥ २६ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्र च ।

न सोऽस्ति मणिभूरुहो विविधरत्नशाखो न यः
सुचित्रमणिपल्लवा न खलु या न शाखाश्च ताः ।
न तेऽपि मणिपल्लवा विविधरत्नपुष्पा न ये
न पुष्पनिकरोऽप्यसौ विविधगन्धबन्धुर्न यः ॥ २७ ॥

अथैकस्मिन्नपि वृक्षे तथा वर्णवैचित्र्यमाह, स मणिभूरुहो नास्ति, विविधरत्नमय्यः शाखा यस्य तथाभूतो यो न स्यात्, ताश्च शाखा न सन्ति, सुचित्रा बहुवर्णा मणिमयाः पल्लवा यासु तथाभूता या न स्युः, तेऽपि विचित्रा मणिपल्लवा न सन्ति, ये विविधरत्नमयपुष्पा न स्युः, असौ पुष्पनिकरोऽपि नास्ति, विविधा मालत्यादिगन्धाः स्वगन्धसजातीयत्वाद्बन्धवो यस्य तथाभूतो यो न भवति, विविधानां गन्धानामाश्रयरूपत्वाद्बन्धुरिति वा ॥ २७ ॥

यत्र च ।

विहारमणिपर्वतप्रकरतः पतद्भिर्मणि-
द्रवैरिव सुनिर्झरैः स्वयमितस्ततः पूरिता ।
स्थलस्थलरुहां मणीतरमणीभिराकल्पिता
तथा मणिपतत्रिभिर्विलसितालवालावली ॥ २८ ॥

येषु वृक्षेष्वालवालानामावल्यस्ति, कीदृशी, स्थलानां स्थलरुहां वृक्षाणां च मणिभ्य इतरमणीभिः, आ सम्यक् कल्पिता निर्मिता, विहारसंबन्धिमणिमयपर्वतानां प्रकरतो गलद्भिर्मणिद्रवैरिव सुन्दरनिर्झरैः पूरिता ॥ २८ ॥

येऽमीतरवः परमेष्ठिन इव स्वयंभुवः, धूर्जटय इव सुजटाः, तरणय इव सुच्छायाः, सनकादय इव सदाबालाः, चन्द्रा इव समाह्लादिपादाः, धनुर्भृत इव सुबलितकाण्डाः, विलासिन इव सुवल्कलाः, सुरसैनिका इव सदाच्छविशाखाः ॥ २९ ॥

स्वयमेव भवन्तीति स्वयंभुवः,तरुपक्षे, "जटाजट इति ख्यातः शिफाजटे"इत्यमरः, तरणयः सूर्याः, छायाकान्तिरातपाभावश्च, सन्ति शोभनान्याबालानि येषां ते, आह्लादिनः पादाः किरणा अङ्घ्रयश्च येषां ते, "पादा रश्म्यङ्घ्रितूर्यांशा" इत्यमरः,काण्डा बाणास्तरुणशरीरयष्टयश्च, सुष्ठु वलन्त्यः कलाश्चतुष्षष्टिसंख्या येषां, क्विबन्तो वल धातुः,सदा, अच्छो निर्मलो विशालः कार्तिकेयो यत्र,पक्षे सदा च्छविः कान्तिर्यासु तथाभूताः शाखा येषाम् ॥ २९ ॥

काण्डा इव योधा इव सुपत्राः, स्वर्गा इव वर्षा इव विलसत्सुमनसः ॥ ३० ॥

सुपत्राः' काण्डपक्षे सुपताः,योधपक्षे सुवाहनाः,वृक्षपक्षे सुदलाः, "पत्त्र वाहनपक्षयोः,""पत्त्रं पलाशं छदन"मित्यमरः । सुमनसो देवाः, मालत्यः,पुष्पाणि च,"सुमनसस्त्रिदिवेशा दिवौकसः,""सुमना मालती जातिः," "स्त्रियः सुमनसः पुष्प" मित्यमरः ॥ ३० ॥

कर्मयोगा इव शरा इव, अव्यभिचारिफला अबीजसमुत्पन्ना अनारोपितश्रेणिबन्धा अपरिपालितवर्धिता अनभिषिक्तस्निग्धा असमयनियमपुष्पफलाः ॥ ३१ ॥

न व्यभिचारीणि फलानि, कर्मयोगपक्षेऽदृष्टानि, शरपक्षे लोहमयायाणि, वृक्षपक्षे शस्यानि येषां ते । "लाभे शस्ये शराद्यये व्युष्टौ च फलके फल"मिति शाश्वतः । बीजं विनैव समुत्पन्नाः, कर्मणामनादित्वान्मूलबीजस्याज्ञेयत्वनाभावात्, शराणां बाणानामपि शरवृक्षोद्भवत्वात् तेनैक्यं, ततश्च तेषां च बीजं विनैव स्वजटोत्पन्नत्वात्, तरूणामप्यत्रत्यानां वस्तुतो नित्यसिद्धत्वात् । त्रिष्वपि पक्षेषु तुल्योऽर्थः । नारोपितः केनापि श्रेणिबन्धो येषां ते, कर्मणां धारावाहिस्वरूपत्वात्,शरवृक्षाणामपि स्वत एव श्रेणीबद्धत्वात्, अत्रत्यतरूणामपि भगवदिच्छया तथाभूतत्वात् । अपरिपालिता अपि वर्धिताः, अनभिषिक्ता अपि स्निग्धाः, न समयस्य नियमो येषां तथाभूतानि पुष्पाणि फलानि च येषां ते, शरपक्षे फलं निष्पत्तिः, 'फलं बीजे च निष्पत्ता"विति त्रिकाण्डशेषः ।

कर्मपक्षे भोगात् प्राक् परिणामविशेषाः पुण्यानि ॥ ३१ ॥

चित्रलेखा इव सुकविव्याहारा इवान्यूनानतिरिक्ताः, सर्वएव समकालमेवाङ्कुरितपल्लवितमुकुलितकुसुमितफलितपच्यमानपक्वफलास्तदवस्था एव सर्वदा जरीजृभ्यन्ते ॥ ३२ ॥

चित्राणां लेखाः श्रेणय इव सुकवीनां व्याहारा उक्तय इव न्यूनातिरेकदोषरहिताः । एककालमेवाङ्कुरिताश्च, पल्लविताश्च, मुकुलिताश्च, कुसुमिताश्च, तथा पच्यमानानि पक्वानि च फलानि येषां ते पच्यमानपक्वफलाश्च ते, तथा तदवस्था वर्णितावस्थाः सन्त एव जरीजृभ्यन्ते, अतिशयेन प्रकाशन्ते ॥ ३२ ॥

किंच

येषां बिम्बितपल्लवैरुभयतो विस्तारभाजामिव
प्रस्कारस्फटिकालवालवलये स्फायन्मयूखाङ्कुरे ।
स्नातुं निःसलिलेऽपि पूर्णसलिलभ्रान्त्या भृशं पक्षिण-
श्चञ्चुभिः परितो विकीर्य गहतो धुन्वन्ति मज्जन्ति च ॥ ३३ ॥

येषां तरूणां प्रस्कारस्य प्रवृद्धस्य स्फटिकस्यालवालानां वलये मण्डले निःसलिलेऽपि पूर्णसलिलभ्रान्त्या पक्षिणः स्नातुं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गरुतः पत्तांश्चञ्चूभिर्विकीर्य धुन्वन्ति कम्पयन्ति. "गरुत्पत्तच्छदाः पत्त्र"मित्यमरः, मज्जन्ति स्नान्ति च। वलये कीदृशे, स्फायन्तो वर्धमाना मयूखानां स्फटिकरश्मीनामङ्कुरा यत्र तस्मिन्। येषां कीदृशानां, तत्र बिम्बितैः प्रतिबिम्बितैः पल्लवैरुभयतोऽधश्चोपरि च विस्तारभाजामिव ॥ ३३ ॥

क्वचन।

आवाले ज्वलदिन्द्रनीलघटिते तद्रोचिषामूर्मिभिः
कालिन्दीपयसेव वातचपलेनापूरिते सर्वतः।
लक्ष्यन्ते तरवस्त एव कतिचिद्रोमाञ्चिताः कोरकै-
र्ध्यानावस्थितकृष्णकान्तिपटलश्लेषप्रवृत्ता इव ॥ ३४ ॥

तद्रोचिषामिन्द्रनीलकान्तीनामूर्मिभिरेव वातचपलीकृतेन कालिन्दीजलेनेव पूरित आवाले प्रतिबिम्बितत्वेन तत्रैव तरवो ध्यानेनावस्थितमुपस्थितीकृतं यत् कृष्णकान्तिपटलं तस्याश्लेषे प्रेम्णालिङ्गनकर्मणि प्रवृत्ता इव लक्ष्यन्ते ॥ ३४ ॥

अन्ये च।

केऽप्यालवालकुरुविन्दमयूखवृन्दै-
र्लाक्षारसैर्निरवधीव कृताभिषेकाः।
अन्तर्न मान्तमिव संततमेधमानं
कृष्णानुरागरसमेव समुद्वमन्ति ॥ ३५ ॥

केऽपि तरव आवालरूपाणां कुरुविन्दानां रत्नविशेषाणां मयूखवृन्दैरेव लाक्षारसैर्निरवधीव निरन्तरमिव कृतोऽभिषेको येषां ते। उत्प्रेक्षितमप्यर्थमपह्नुत्या पुनरन्यथा संभावयति, कृष्णानुरागरसमेव सम्यगुद्वमन्ति, मूलेनोद्गिरन्ति, न ते लाक्षारसा इत्यर्थः। अन्ययोगव्यवच्छेदक एवकार एवापह्नुतिलिङ्गम्। कथमुद्वमन्ति। अन्तः आत्मदेहमध्ये, न मान्तम्, अवकाशमप्राप्नुवन्तम्। कुतः। संततमेधमानं सदा वर्धमानम् ॥ ३५ ॥

सर्व एव भगवदवतारा इव चिदात्मकतया विविधशक्तिमत्त्वेन चालौकिका एव लोके लौकिकवद्दृश्यन्ते ॥ ३६ ॥

नन्वेवंभूतत्वेन किमिति सर्वैरेव लौकैः प्रकटं न दृश्यन्ते, तत्राह, सर्व एवेति, ततश्च तेषां यथा प्राकृततुल्याकारचेष्टादीनामपि वास्तवत्वचिन्मयत्वोपास्यत्वादिकं शास्त्रे निर्णीतं न तु मायिकत्वमपि, तथामीषां च ॥ ३६ ॥

यत्र च।

विलासिन्य इव ललितपत्राङ्कुराः, स्वाधीनभर्तृका इव प्रियेण तरुणाभिरामेण सदोपगूढाः, अनुरागिण्य इव समुत्कलिकाः, नाकसंसद इव विलसत्सुपर्वाणः ॥ ३७ ॥

*–स्वैर्नि–इति पा०।

पत्राङ्कुराः पत्रलेखाः, पत्राण्यङ्कुराश्च। प्रियेण कीदृशेन, तरुणश्चासावभिरामश्चेति तया तेन। पक्षे तरुणेति नृतीयान्तम्, उत्कलिका, उत्कण्ठा। "उत्कण्ठोत्कलिके समे" इत्यमरः। पक्षे, उत्कृष्टा कलिका। नाकसंसदः स्वर्गसभाः, विलसन्तः सुपर्वाणो देवा यत्र, पक्षे विलसन्ति शोभनपर्वाणि यासु ताः[1]: ॥ ३७ ॥

पुष्पवत्योऽपि नीरजस्काः, वक्रा अपि न वक्राः, चञ्चला अपि नाचिररोचिषः, सततभ्रमरा अप्यभ्रमराः, मरुदान्दोलिता अपि न मरुत्स्पृष्टाः सर्वा एव सर्वकामप्रदा वीरुधः ॥ ३८ ॥

नीरजस्का मालिन्यरहिताः, पुष्पवत्यः स्त्रियो हि रजस्वला भवन्ति, एतास्तु न तथेति विरोधः। वक्रा अनृजुशरीरा अपि न वक्रा न क्रूराः। पत्रपुष्पफलादिभिः सर्वेषां प्रियाचरणात्। "वक्रः स्यात् कुटिले क्रूरे," इति विश्वः। नाचिररोचिषः, किंतु चिरसमयव्यापिकान्तयः, चञ्चला विद्युतो हि, अचिररोचिषो भवन्ति। "विद्युच्चञ्चला चपलापि चे"त्यमरः। सततभ्रमरा निरन्तरं भ्रमरयुक्ताः, न भ्रमं रान्ति ददतीति ताः। न मरुद्भिर्दैवैः स्पृष्टाः, कृष्णलीलास्पदत्वात्। "मरुतो पवनामरा"वित्यमरः ॥ ३८ ॥

यत्र च।

मणिमयालवालोपरि कृतोपधानतयेव सुखसुप्तेनेव विभुग्नवृन्तेन फलनिकुरम्बेण परितः कृतमूलमण्डनैरिव नारिकेलपोतैरभितोऽभिरमणीयानि ॥ ३९ ॥

यत्र च वृन्दावने कानिचिदुपवनानि सन्ति। कीदृशानि, नारिकेलानां पोतैरभितः सर्वतोऽभिरमणीयानि, पोताः, पोथा इति ख्याताः। कीदृशैः, विभुग्नवृन्तेन सता भूमिलग्नेन फलनिकुरम्बेण परितः कृतानि मूलस्य मण्डनानि यैस्तैः। फलसमूहेन कीदृशेन, आवालोपरि कृतमुपधानं येन तस्य भावस्तत्ता तया हेतुना सुखं सुप्तेनेव। जनैरुत्प्रेक्ष्यमाणेनेत्यर्थः ॥ ३९ ॥

तनुमध्यमामध्यमानामिव करग्राह्याणां फलनिकराणां भरेणाधोमुखैरभितो विलम्बमानैर्वृन्दैः परितः कृतकण्ठमण्डनैरिव पूगतरुभिरितस्ततः कमनीयानि ॥ ४० ॥

पूगतरुभिर्गुवाकवृक्षैः कमनीयानि। कीदृशैः। फलनिकराणां वृन्दैः कान्दीति ख्यातैः परितश्चतुर्दिक्षु कृतानि कण्ठस्य मण्डनानि येषां तैः[2]। वृन्दैः कीदृशैः। भरेणाधोमुखैः, अत एवा-

१ श्रियमगद्यान्तस्थेन वीरुध इत्यनेनान्वयः।

२ इदमर्धस्य स्पष्टत्वादलेखो व्याख्यायां क्वचित् क्वचिदवसेयः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भितः सर्वतो विलम्बमानैः । तनुमध्यमा उत्तमाङ्गनास्तासां मध्यमानां मध्यदेशानामिव करयाह्याणां, मुष्टिमात्रयाह्यत्वात्, पक्वे वृन्ताणामत्यनुच्छ्रितत्वान्मूले स्थित्वैव करेणैव ग्रहीतुं शक्यानां फलनिकराणाम् । "मध्यमं चावलग्नं च मध्योऽस्त्री"-त्यमरः ॥ ४० ॥

परिपाकेऽपि नारङ्गलतां[1] नारङ्गलताफलनिकुरम्बेण सततसमुदितामितमङ्गलपरम्परापरं परागतान्यग्रहमिव नभस्तलं विदधानानि ॥ ४१ ॥

नारङ्गलता नारङ्गि इतिख्याता, तस्याः फलसमूहेन सततसमुदिता, अमिता अपरिमिता, मङ्गलस्य मङ्गलग्रहस्य परम्परा क्रमवाहुल्यं,तत्परं नभस्तलं, विदधानानि कुर्वाणानि, मङ्गलस्य लोहितवर्णत्वादाकाशगतत्वाच्चैतत्फलसाधर्म्यम् । तेनैव हेतुना परागतः परास्तोऽन्यग्रहो यत्र तथाभूतमिवोत्प्रेक्ष्यमाणमित्यर्थः । फलनिकुरम्बेण कीदृशेन । परि, सर्वतो भावेन, पाकेऽपि सति, न, अरम्, अतिशयेन गलता स्रवता ॥ ४१ ॥

सुपल्लवलीलतानटनेन लवलीलतानटनेन नयनरञ्जनानि* ॥ ४२ ॥

लवलीलताया लोग्राति इति ख्याताया नटनेन । मन्दपवनान्दोलितत्वात् । कीदृशेन । शोभनाः स्युः पल्लवा यस्यां तथाभूता लीला यस्यास्तस्या भावः सुपल्लवलीलता तस्या अनटनमगमनं किंतु स्थितिरेव यस्मिंस्तेन नटनेन ॥ ४२ ॥

केशरिनखरशिखरविदारविकसन्मौक्तिकनिकरेण रुधिरारुणेन करिकलभकुम्भनिवहेन कृतोपमैः परिपाकविलोहितैर्[2]विदीर्यमाणतया व्यक्तबीजराजिभिस्तत्कालापतितशुक्रचरणाघातसमधिकावनतैः फलनिकरैः सुललितेन निखिलदिग्वधूसीमन्तसिन्दूरपूरमनुभावयत्सु कुसुमसमूहेषु सदालिमीलतावनेन दालिमीलतावनेन चमत्कारकारीणि ॥ ४३ ॥

दालिमीलताया वनेन, डनयोरैक्यं, यमकानुरोधात् । कीदृशेन । निखिलानां दिग्वधूनां सीमन्तस्य सिन्दूरपूरम्,अनुभावयत्सु, ज्ञापयत्स्विति यावत्, पुष्पसमूहेषु, सदा,अलीनां भ्रमराणां मीलतां मीलत्वं रसतृप्ततया तत्ताम्, अवतीति तथा तेन । मील स्मील निमेषणे, पचाद्यः । पुनः कीदृशेन । फलनिकरैः सुष्ठु ललितेन । कीदृशैस्तैः । विदीर्यमाणतया व्यक्ता बीजराजिर्येषां तैः । तस्मिन्नेव काले, आपतितानां शुकानां चरणाघातेन समधिकं यथा स्यात् तथा, अवनतैः । करिकलभानां हस्तिशावकानां कुम्भनिवहेन सह कृतोपमा येषां तैः । कुम्भनिवहेन कीदृशेन । केशरिणां सिंहानां नखरशिखरैर्नखाग्रैर्विदारादृिकसन्तो मौक्तिकनिकरा यस्मिंस्तेन । अत एव रुधिरेण हेतुनारुणेन, तदुद्गतत्वान्मौक्तिकानामप्यारुण्यं प्रान्तगतं ज्ञेयम् ॥ ४३ ॥

षड्ऊर्मिखर्जूरहितानि खर्जूरहितानि ॥ ४४ ॥

षड्ऊर्मय एव खर्जूर्व्याधिविशेषः, "कण्डूः खर्जूश्च कण्डूये"त्यमरः, तया रहितानि, "शोकमोहौ जरामृत्यू क्षुत्पिपासे षड्ऊर्मयः", पक्षे खर्जूरैर्वृन्तभेदैर्हितानि ॥ ४४ ॥

निःसारितैकोमलेन कोमलेन[3] मृद्वीकामधुरेण मृद्वीकामधुरेणावान्तरकाननेन मनोहारीणि ॥ ४५ ॥

निःसारितानि दूरीकृतानि, अकसां स्थानानां मलानि तृणपर्णजम्बालादीनि यत्र तेन, मृद्वीकाभिर्द्राक्षाभिर्मधुरेण, "मृद्वीका गोस्तनी द्राक्षे"त्यमरः, अत एव मृद्वीनामङ्गनानां कामधुरा वाञ्छितभारो यत्र तेन ॥ ४५ ॥

अभितः फलिनीभिः फलिनीभिश्च परमरमणीयानि ॥ ४६ ॥

फलवतीभिः प्रियङ्गुभिः, "प्रियङ्गुः फलिनी फली"त्यमरः ॥ ४६ ॥

सकामजनमनांसीव सफलकर्मरङ्गाणि, स्वरङ्गनानीव ललितरम्भाणि, संगीतानीव विविधरमणीयतालानि, कर्मकाण्डानीव निरवधि सुपाककण्टकिफलानि, रूपकोपरूपकाणीव सफलशैलूषाणि,मेरुमन्दारयङ्गविशेषतेजांसीव जम्बूजनितश्यामिमानि,नारायणतपांसीव बदरिकावनाधिकरणानि, कानिचिदुपवनानि ॥ ४७ ॥

सफले स्वर्गादिसाधके कर्मणि रङ्गः कर्तव्यत्वेनोत्साहो येषु तानि,पक्षे फलसहितः कर्मरङ्गः कामरङ्ग इति ख्यातो वृक्षो येषु तानि,स्वः स्वर्गस्य,अङ्गनानि प्राङ्गणानि,ललिता रम्भा तत्राभ्यप्सरा नाट्यार्थमागता येषु तानि,पक्षे रम्भा कदलीवृक्षः, साला नृत्यवाद्यनिष्ठास्तालवृक्षाश्च, सुष्ठु पाके परिणामे सति कण्टकयुक्तानि फलानि स्वर्गादीनि येषु, पातशङ्कामात्सर्यासूयादिदोषबाहुल्यात्,पक्षे सुपक्वपनसफलानि,रूपकाणि नाटकादीनि, उपरूपकाणि नाटिकादीनि, सफलाः सार्थकाः शैलूषा नटा यत्र तानि, "शैलूषा जायाजीवाः कृशाश्विनः,

१ निपतोऽपि यमकसौष्ठवपतित्वे नारङ्गलता, इत्यादौ मुद्रणरीतिलोऽसंमतोऽपि संधिरङ्गीकृतो ज्ञेयः ।

* जनरञ्जनानि, इति पा० ।

२ परिपाकविलोहितैरिति सुस्पष्टत्वादुपेक्षितं व्याख्यात्रा ।

३ एतत्कोमलशब्दयदृच्छाख्यात्रा सुस्पष्टार्थपदानि प्राय उपेक्षिष्यन्त इति तर्कमयेऽपि ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भरता इत्यपि नटा"इत्यमरः, पक्षे शैलूषा बिल्ववृक्षाः, "बिल्वे शाण्डिल्यशैलूषा"वित्यमरः, मेरुमन्दारौ नाम सुमेरुवर्तिपर्वतः, तत्रैव द्वीपाख्यापकस्य महाजम्बूवृक्षस्य सत्त्वात्, बदरिकावनं बदरिकाश्रमोऽधिकरणमाश्रयो येषां तानि, पक्षे बदरीवनस्याधिकरणानीति षष्ठीतत्पुरुषः ॥ ४७ ॥

॥ शेषमये ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिका ।

तच्च सप्तप्रतितमादिपरिच्छेदाः ॥

७७—ननु प्रत्यक्षोपलब्धानां रूपपरिमाणादिगुणानां जडाचेतनाधिकरणत्वासंभवश्चेत् तदितरेषामेव गुणविशेषाणां तादृशमधिकरणमस्तु । ते गुणविशेषास्तु तज्ज्ञानयोग्येन्द्रियान्तरासत्त्वादस्माकं तथैव ज्ञातुमशक्या यथा जनुषान्धस्य शुक्लकृष्णादयो वर्णाः । यदि चास्माकं तादृशगुणग्रहणसमर्थमिन्द्रियान्तरमभविष्यत्तर्हि तत्सत्ताविषये वयं तथैव निस्सन्देहा अभविष्याम यथा जनुषान्धाश्चक्षुःप्राप्तुत्तरं रूपालोकादिसद्भावविषये इति चेदुच्यते । यद्येवं जडद्रव्यपदेनाज्ञेयगुणानामज्ञेयमधिकरणमित्येव विवक्ष्यते तर्हि तादृशोऽभिनवपदार्थः क्वाप्यस्तु मा भूद्वा अस्माकं तु स सर्वथोपेक्ष्य एव । तस्य प्रकृतविचारबहिर्भूतत्वात् इदृशां स्वयमज्ञेयानाम् अज्ञातमूलकानां च पदार्थानां भावाभावविचारणापि काकदन्तपरीक्षावच्चितरां निष्फलैव ॥

७८—किं चापूर्वेन्द्रियान्तरसंभावनायामपि तादृशजडद्रव्यपदार्थस्याभिव्यक्तिर्न संभवति । यतो हि सर्वेषामिन्द्रियाणामद्य यावत् प्रत्यक्षज्ञानाविष्कर्तृत्वस्यैव दृष्टत्वात् तथाविधापूर्वेन्द्रियान्तरेणापि तुल्यन्यायादभिनवप्रत्यक्षान्तराण्येवाविष्क्रियेरन् । न च तेषां प्रत्यक्षाणामचेतनाधिकरणकत्वमापादयितुं शक्यते । तस्य रूपपरिमाणगत्याद्यधिकरणनिरूपणोक्तदिशैव निराकर्तुं शक्यत्वात् । पूर्वोक्तं गुणानामात्मकाधिकरणकप्रत्यक्षज्ञानानतिरिक्तत्वं तु न केवलमिदानींतनोपलब्धगुणानामेव किं तु निखिलसंभवनीयगुणानामपि बोध्यम् ॥

७९—ननु मा भूज्जडद्रव्यसत्ता युक्तिसिद्धा । मास्तु वा कोपि तदुपयोगः प्रदर्शयितुं शक्यः । तादृशपदार्थोपि सर्वथा दुर्ज्ञेय एव वास्ताम् । तथापि किमेतैः । नैतावता जडद्रव्यसत्तायास्तस्य साधारणाधिकरणत्वस्य ज्ञाननिमित्तत्वस्य वा बाध आपादयितुं शक्यते । पदार्थानां दुर्ज्ञेयतानिमित्तेनाभावकल्पनाया अनौचित्यादिति चेच्छ्रूयताम् । यद्येवमर्थनिरपेक्षमेव शब्दाः प्रयुञ्ज्येरंस्तर्हि ते निष्कम्पं प्रयुज्यन्ताम् । द्वौ द्वौ मिलित्वा सप्त भवन्तीत्यप्युच्यताम् । नात्र वयं द्व्यादिपदानि तेषां प्रायिकार्थबोधतात्पर्येण प्रयुक्तान्यपि तु किं चिद्विलक्षणदुर्ज्ञेयार्थबोधनतात्पर्येणेत्यादिविवरणैस्तद्बाधितार्थकत्वं च परिहर्तव्यम् । अनयैव रीत्या ज्ञाननिमित्तं निर्गुणं जडमचेतनमधिकरणमित्यादिर्भवतां प्रलापोपि संगच्छेत । उक्तोदाहरणमिवार्थबोधजननसमर्थश्च स्यात् ॥

८०—अथ भौतिकाधिकरणपक्षं परित्यज्य जडद्रव्यपदार्थं आधाराधेयातिरिक्तं गुणगुणिनोर्ज्ञानात्मनोश्च भिन्नं परिमाणशून्यं निश्चलमचेतनमविभाज्यं क्वचिदपि देशे ऽतिष्ठद्वावान्तरमित्येव लक्ष्येत चेद्भौतिकाधिकरणपक्षे ज्ञाननिमित्तपक्षे चाशङ्कितानां दोषाणां न कतमोप्यापद्येत । अनेन व्यतिरेकिलक्षणेन सर्वेषां तेषां निरायासमेव परिहर्तुं शक्यत्वादिति चेच्च किंचिदेतदपि । तथाहि । लोके यादृशार्थबुबोधयिषया ऽवस्तु असत्त्वमित्यादि पदानि प्रयुज्यन्ते तादृशार्थबोधजननतात्पर्येणैव साधु मन्यसे चेद् द्रव्यपदमपि प्रयुञ्जीथाः स्ववचनपरिपाट्यां तेषां पदानां परस्परम् अपरपर्यायतां च विदध्याः । यतोहि त्वदुक्तलक्षणस्यावस्त्वसत्त्वमित्यादिपदबोध्यार्थलक्षकत्वमेव प्रतीयते । तद्घटकानां समुदितानां विशकलितानां वा पदानामवस्त्वादिपदबोध्यार्थसमानार्थस्यैवोपस्थापकत्वात् ।

८१—ननूक्तलक्षणशरीरे साधारणसत्ताबद्वस्तुवाचकस्याभावव्यावर्तकस्य भावपदस्य विशेष्यतयोपादानात्साधारणपदार्थस्य तल्लक्ष्यत्वे कथं तदभावलक्षणं भवितुमर्हतीत्युच्यते चेत्सत्यम् ॥ ये खल्वात्मानं साधारणधर्मप्रत्यक्षज्ञानसमर्थं मन्यन्ते तएव तादृशभावपदबोध्यसाधारणसत्ताकवस्तुनः प्रत्यक्षत्वं सद्भावं च कथयेरन् । मम तु तदखिलानां बुद्ध्यगम्यवस्तूनां मूर्धाभिषिक्तं प्रतिभाति । यद्यपि भिन्नभिन्नज्ञानशक्तिका भिन्नभिन्नजातीया भूयिष्ठाः प्राणिनःस्युर्येषां ज्ञानशक्तयो मदात्मगतज्ञानशक्तिभ्योऽत्यन्तं महत्तरा उत्कृष्टतराश्च भवेयुः । तेषां बुद्धावनन्तशक्तिमता परमात्मना प्रादुर्भावयितुं शक्यानां ज्ञानानां च स्वीयैरल्पिष्ठैः परिच्छिन्नैरिन्द्रियैरियत्ताकरणम् उपहास्यं मन्मौर्ख्याव्यापकं च स्यात् । शब्दादूर्पमिवाद्य यावन्मदनुभूतज्ञानेभ्यः परस्परं च विभिन्नरूपाणां तादृशज्ञानानामानन्त्यस्य संभवात् । एवमहं शक्यसत्ताकानामनन्तानन्तज्ञानात्मनां ग्रहणे स्वबुद्धिवैकल्यं प्रकामं स्वीकुर्याम्, तथापि ज्ञातृज्ञेययोरात्मज्ञानयोरतिरिक्तं तादृशसाधारणसत्तावद्वस्तु न कथमप्यनुमन्येय । तस्य सर्वथा बाधितत्वात् । तदभिधानमपि वाक्छलमात्रम् इति कृतमङ्कुरितेन ॥

केशवशास्त्री

CC-0. Sampurnanand University Collection. Digitized by eGangotri

SÁNKHYATATTVAPRADÍPA
OR
THE PRINCIPLES OF
THE SÁNKHYA PHILOSOPHY.

(Continued from page 70.)

[1] Now the doctrine of certain Vedántins "the universe is an illusory product of the existent" is also not sound. For this even is far from establishing the doctrine that the existent is produced from the existent; inasmuch as if the absolute spirit, which is void of duality, be experienced as dual, the perception of such a duality would indeed be false like the conception of identity of a string with a serpent or with a piece of garland of flowers. Consequently the perception of the world having impossibility or a matter of sublation for its object and thus being unreal, a knowledge of truth would be annihilated. If you say you grant it, we say you cannot: because in that case the questioning and answering between a teacher and pupil being unauthenticated, the practical notion must also be entirely undone; and activity of any person towards performing observances of the veda or practical acts likewise being thus impossible there would be neither fruition of fructescent retributions nor emancipation. Nay the principle of Vedánta Philosophy would be violated: for Vedántins do not admit modification or product of the absolute spirit. And it has been said: "The universe is the illusory product of the absolute spirit" is a thought of those who are not thoroughly acquainted with the system of Vedánta, while the sages accept the absolute spirit as ever unmodifiable and self-beatitude."

[2] The doctrine of Kaṇáda and Gautama i. e. of the Vaiśeshika and Nyáya Philosophy, that non-existent is produced from the existent, i.e. effect or product, a binary atomic aggregate previously non-existent is produced from the existent cause—atom, is likewise not good. Because an atom being the material cause of a binary atomic aggregate, which was antecedently non-existent, must also be the cause of the horn of a hare, of the flower of sky and the like; all these being equally non-existent; and because co-inherence between existent and non-existent is impossible: for if an existent be identical with non-existent, the former would also be non-existent. It must not be said that by non-existence of a product is meant merely that it is the object of its antecedent non-existence, and not that it is non-existent in the trinal time, like a colour of the air. For we ask whether such non-existence is caused by the product as the object of the non-existence, or the non-existence itself is the cause of the product's being the object of such non-existence? The first alternative we reject; for in that case all existent phenomena or products would be spoken of as non-existent like flowers of the sky and the like, since they all being equally non-existent are [according to your dogma] objects of antecedent non-existence. Consequently qualities and generality existing in the products must be annihilated; for these being characteristics of an existent should not remain in a non-reality. Nor can it be urged that this product, binary atomic aggregate, differs from other unreal things, such as the hair of a tortoise and the like; because when qualities and generality &c. are absent, there exists no characteristic attribute or differentia in it. The second alternative in like manner cannot be maintained. Forif non-existence be cause of an object of antecedent non-existence then the horn of a man and the like must also be objects of antecedent non-existence, and hence all non-existent would be brought into existence, inasmuch as it is by rule that antecedent non-existence produces its object; consequently the difference between existent and non-existent would for ever be departing from the world. It is for this reason that the doctrine of the Nyáya and Vaiśeshika Philosophy is not good. Therefore the doctrine of Sánkhya "the existent is produced from the existent" that is, the effect which existed previous to its production is brought to manifestation through the agency of the operators, is reasonable.

[3] It cannot be objected that from the acceptance of this

---

१ अथ सद्विवर्त्तोऽयमप्यज्ञ इति यद्वेदान्तिमतं तदप्यसाधु । अनेनापि सतः सज्जायत इति मतसिद्धिर्न स्यादद्वयस्य सद्वयतया भाने रज्जोः सकलखण्डसर्पाद्यात्मना भानवदशान्तिरेव स्यात् । बाधविषयतया च रज्जुसर्पप्रत्ययवत्प्रपञ्चज्ञानस्याप्रमाणतया प्रमारूपज्ञानमेवास्तमियात् ॥

न चेष्टापत्तिर्गुरुशिष्योत्तरप्रश्नयोरप्रमाणत्वाद्व्यवहारमात्रोच्छेदः स्यात् । लौकिकवैदिककर्म्मानुष्ठाने च कस्यचित्प्रवृत्त्यनुपपत्त्या भोगापवर्गौ न स्यातामिति तच्छास्त्राप्रामाण्यं स्यात् । अपसिद्धान्तश्च नहि वेदान्तिमते ब्रह्मविवृत्तिर्भवति । उक्तञ्च बालाव् प्रतिविवर्त्तोऽयं ब्रह्मणः सकलं जगत् । अविवर्तितमानन्दमास्थिताः ऋतिनः सदेति ॥

२ सतोऽसज्जायत इति सतः परमाणोरसद्द्व्यणुकाख्यङ्कार्य्यं जायते इति कणभक्षाक्षचरणमतमपि न युक्तिसहं तथाहि परमाणुहि द्व्यणुकसमवायिकारणं द्व्यणुकञ्चासदित्यसत्त्वाविशेषाच्छशशृङ्गादिसमवायिकारणतापि परमाणोः स्यात्सदसतोः समवायासम्भवाच्च । असता तादात्म्ये सतोऽप्यसत्त्वं स्यात् । नन्वसत्त्वं नाम प्रागभावप्रतियोगित्वं नतु वायुरूपादिवच्चिकालासत्त्वमिति चेन्न । किमिदं प्रागभावप्रतियोगित्वमसत्त्वं प्रागभावप्रतियोगित्वादसत्त्वमसत्त्वाद्वा प्रागभावप्रतियोगित्वं नाद्यः सर्वेषाङ्कार्य्यपदार्थानामसत्त्वाविशेषेणाकाशपुष्पादिष्विवासत्त्वेनैव व्यवहारः स्यात्तदाप्यसत्त्वात् प्रागभावप्रतियोगित्वात् तथा च कार्य्यपदार्थगतगुणसामान्यादीनामुच्छेदः स्यात्तेषां भावधर्म्मत्वेनासत्त्वे ऽनवस्थानात् । नच कूर्म्मलोमादेरस्य असतो विशेषः सामान्यादेरभावाभेदकधर्म्माभावात् । नापि चरमः असत्त्वात्प्रागभावप्रतियोगित्वे नरशृङ्गादीनामपि प्रागभावप्रतियोगित्वं स्यात्प्रागभावस्य च स्वप्रतियोगित्वोत्पादकत्वनियमेन सर्वेषामसतां सत्त्वं स्यात्सदसद्विभागश्च जगति दुर्ललाञ्छनः स्यादिति न तार्किकवैशेषिकमतं विचारसहम् तस्मात्सतः सज्जायत इति साङ्ख्यमतमेव युक्तिसहं सतः कारणात्स्वोत्पत्तेः प्रागपि सदेव कार्य्यङ्कारणव्यापारादभिव्यक्तिमाप्नोति ॥

३ नव सिद्धसाधनताकारणवैयर्थ्यञ्चेति वाच्यङ्कार्य्यसत्त्वेपि तदभिव्यक्तौ कारणमपेक्षणवदिति न किञ्चिदवद्यम् ॥ असत्कार्य्यपक्षे तु कारणवैयर्थ्यं स्फुटमेव न ह्यसतः कारणसम्बन्धो निरूपयितुं शक्यते तस्मात्सम्यङ्मेव सम्यद्धेन जन्यते । असंबद्धस्य जन्यत्वे सर्वं सर्वस्मात्स्यात्कार्य्य-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

doctrine would follow uselessness of a cause, and the fault of establishing what has been already established. For though the effect exists even previous to its production the cause will nevertheless be useful to its manifestation.

Thus there is nothing defective in the doctrine of Sánkhya. While according to your supposition that product does not exist previous to its production ineffectualness of the cause is evident, because the relation of the non-existent effect with the existent cause could scarcely be demonstrated, inasmuch as the connected effect only could be produced by the connected cause. For if an unrelated product be originated by an unrelated cause, then everything would come out of everything; and the relation of causation would be destroyed. Moreover if a product were non-existent [before its production] it could never be brought into existence, through the operation of the causes. It is said in the Tattva Kaumudí "whatever is blue can never be made yellow even by hundred-fold skill." Nor can it be urged seeing that the water-pot does not exist before and exists after the operation of the causes existence and non-existence are the two properties of it; because it has been asserted that as a quality is the characteristic of an existent, the existence of the subject is proved thereby alone, since there is no other possible alternative. Thus it is established that the product exists before as well as after the operation of the causes.

Nor is the operation of the causes non-immediate cause as regards the manifestation of the product, for in other cases also mere manifestation is observed through the causes, for instance the manifestation of rice by pounding paddy-corn with a pestle, of oil by pressing sesamum-seeds, and of milk by milking cows. But an example of production of a non-existent thing has been seen nowhere. Hence it is concluded that the product existent previous to its production is manifested by the operation of the cause, or since in consequence of the relation of the cause with antecedently non-existent product being impossible, the non-existent cannot be produced by the existent.

The above statement is confirmed by the authorities of Sánkhya. "The causes which associate with an existent have no relation with a non-existent, and he who desires production of the non-existent falls into errors

कारणनियमश्चास्तमियात् ॥ असच्चेत्कार्य्यं न कारणव्यापारात्सत्प्रवितुमर्हति । उक्तञ्च तत्त्वकौमुद्याम् । नहि नीलं शिल्पसहस्रेणापि पीतङ्कर्तुं शक्यमिति ॥ नच कारणव्यापारात्पूर्वं घटोऽनन्संश्च व्यापारानन्तरमिति घटस्य सत्त्वासत्त्वे धर्म्यविरुद्धत्वाच्च धर्म्मस्य भावधर्म्मत्वेनैव धर्म्मिणः सत्त्वं सुस्थमित्यन्यथानुपपत्त्या साधितमिति सदेव कार्य्यङ्कारणव्यापारात्पूर्वमिव प्रागपि । कारणव्यापारस्तु तदभिव्यक्तावनन्यथासिद्धोऽन्यत्रापि कारणव्यापारादभिव्यक्तिरेव दृश्यते यथाघातेन धान्येषु तण्डुलानामवघातेन तिलेषु तैलस्य दोहनेन सौरभेयीणामभ्यसद्यति । असदुत्पत्तौ तु न दृष्टान्तोऽस्ति । तस्मात्सदेव कार्य्यङ्कारणव्यापारेणाभिव्यज्यते । असतो कारणसम्बन्धासम्भवाच्च तस्य तदुत्पादकत्वम् ॥

sion." Moreover even the related cause produces the same effect for which it has the efficiency. The Efficiency of the cause is inferred from its effect. For instance apprehension of colour is produced by the sight, and not by any other organ of sense; it is therefore concluded that sight alone is the efficient cause of the knowledge of colour. Hence whether this effectual power or efficiency exist either in the efficient cause or in the feasible effect or in both it would follow that every thing would come out of every thing. For if this efficiency be said to reside in the effect, how would the non-existent product be substratum of it. Again the efficient cause produces the feasible effect, and the feasible effect is identical with the cause, but as the cause is existent, how is it possible that the product which does not differ from the cause should be non-existent? And it is said "the efficient cause alone is producer of the feasible effect." And the thread and the cloth are not different substances, because they are the material cause and the product. Inasmuch as things which differ from each other could not stand in the relation of the substantial cause and product, like a horse and a tree. Moreover there is another reason why the threads and cloth are not different things viz, conjunction and non-contact are not observed between them. For conjunction has been seen where things are different, as in the case of a string and water-pot, a bowl and jujubes and the like, and non-contact also between distinct objects is observed as in the case of Sumeru and Vindhya the mountains. But in the present case for want of conjunction and non-contact cloth is not distinct object from the threads. The evidence demonstrating identity of a cause and its effect is stated by the teachers of Sánkhya: "The cloth does not differ from the threads because it is their production; and whatever differs from any thing is not its product as a cow or a horse: but the cloth is the product of the threads therefore it does not differ from the thread.

The effect does not differ from its cause, in substance is proved also from its not having a different weight, thus the identity of the cause and its effect being proved, the cloth is not a different thing from the threads, but the threads themselves situated in a particular positions are cloth.

G. D.

(To be continued.)

॥ उक्तञ्च साङ्ख्याचार्य्यैः । असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः । असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ किञ्च सम्बद्धमपि तदेव करोतियत्रयत्कारणं शक्तं शक्तिश्च कार्य्यैकाधिगम्या यथा चक्षुषा रूपज्ञानं भवति नेन्द्रियान्तरेणेतीदमेव तत्र शक्तमित्यधिगम्यते । तथा च सा शक्तिः शक्तकारणाग्रया शक्यकार्य्याग्रया सर्वत्र वास्यादन्ते सर्वस्मात्सर्वं स्यात् । अथ कार्य्ये सा शक्तिस्तदा कथमसतः कार्य्यस्य शक्त्याश्रयता । तथा च शक्तेन शक्यमुत्पाद्यते शक्यञ्च कारणान्मत्कारणञ्च सदिति कथं तदभिन्नङ्कार्य्यमसत्स्यात् । उक्तञ्च शक्तस्य शक्यकरणादिति । उपादानोपादेयभावग्रहणाच्च न भेदस्तन्तुपटयोर्योश्च भेदो न तयोरुपादानोपादेयभावो यथा शशविषाणयोः । इतोऽपि नार्थान्तरत्वं तन्तुपटयोः संयोगाप्राप्त्यदर्शनात । अर्थान्तरत्वे संयोगो दृष्टो रज्जुघटकुण्डबदिरादौ । अप्राप्तिरपि दृष्टा सुमेरुविन्ध्ययोरिव । इह च संयोगप्राप्त्योरभावात्र तन्तुभ्योऽर्थान्तरं पटः ॥

कार्य्यकारणयोरभेदसाधकमप्यमाणञ्चोक्तं साङ्ख्याचार्य्यैः । तद्यथा नपटस्तन्तुभ्यो भिद्यते तद्धर्म्मत्वादिह यद्यतो भिद्यते तत्तस्यधर्म्मो न भवति यथा गोरश्वस्य धर्म्मश्च पटस्तन्तूनां तस्माच्चार्थान्तरम् । गुरुत्वान्तरारम्भादपि न कारणादर्थान्तरङ्कार्य्यम् । एवमभेदेसिद्धे तन्तव एव तेन तेन संस्थानविशेषेण परिणताः पटो न तु तन्तुभ्योऽर्थान्तरम् ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपद्मद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 102. Benares, November 2nd, 1874. Vol. IX.

काशिकायाः

द्वितीयाध्यायस्य चतुर्थः पादः ।

आर्द्धधातुके ॥ ३५ ॥

आर्द्धधातुके इत्यधिकारो ऽयं,ण्यत्क्त्रियार्थेजित इति यावत् । यदित ऊर्द्धमनुक्रमिष्यामस्तदार्द्धधातुके वेदितव्यम् । वक्ष्यति हनो वध लिङि । वध्यात् । आर्द्धधातुक इति किम् । हन्यात् । विषयसप्तमी चेयं न परसप्तमी । तेनार्द्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद्यथाप्राप्तं प्रत्यया भवन्ति । भव्यम् । प्रचेयम् । आख्येयम् ॥

अदो जग्धिर्ल्यप्ति किति ॥ ३६ ॥

अदो जग्धिरादेशो भवति ल्यपि परतः, तकारादौ च किति प्रत्यये । प्रजग्ध्य । विजग्ध्य । जग्धः । जग्धवान् । इकार उच्चारणार्थो नानुबन्धः । तेन नुम्च भवति । एवं वच्यादीनामपि । इह कस्माच्च भवति अचम् । अचाण्ण इति निपातनात् ।

जग्धौ सिद्धेन्तरङ्गत्वात्ति कितीति ल्यबुच्यते ।
ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् ॥

तीति किम् । अद्यते । कितीति किम् । अत्तव्यम् ॥

लुङ्सनोर्घस्लृ ॥ ३७ ॥

लुङि सनि च परतो ऽदो घस्लृ आदेशो भवति । ऌदित्करणमङर्थम् । लुङि । अघसत् । अघसताम् । अघसन् । सनि । जिघत्सति । जिघत्सतः । जिघत्सन्ति ॥ घस्लृभावे ऽच्युपसंख्यानम् ॥ * ॥ प्रात्तीति प्रघसः ॥

घञपोश्च ॥ ३८ ॥

घञि अपि च परतो ऽदो घस्लृ आदेशो भवति । घासः । प्रघसः । उपसर्गे ऽद इत्यप् ॥

बहुलं छन्दसि ॥ ३९ ॥

छन्दसि विषये बहुलमदो घस्लृ आदेशो भवति । घस्ताक्नूनम् । सग्धिश्च मे । न च भवति । आत्तामद्म मध्यतो मेद उद्भृतम् । अन्यतरस्यांग्रहणमेव कस्माच्च क्रियते तदेवोत्तरार्थमपि भविष्यति । कार्यान्तरार्थं बहुलग्रहणम् । घस्तामित्यत्रोपधालोपो न भवति ॥

लिट्यन्यतरस्याम् ॥ ४० ॥

लिटि परतो ऽदो ऽन्यतरस्यां घस्लादेशो भवति । जघास । जक्षतुः । जक्षुः । आद । आदतुः । आदुः ॥

वेञो वयिः ॥ ४१ ॥

लिट्यन्यतरस्यामिति वर्त्तते । वेञो वयिरादेशो भवति अन्यतरस्यां लिटि परतः । इकार उच्चारणार्थः । उवाय । ऊयतुः । ऊयुः । पक्षे, ऊवतुः । ऊवुः । लिटि वयो य इति यकारस्य संप्रसारणं प्रतिषिध्यते । वश्चास्यान्यतरस्यां किति इति वकारो विधीयते । ववौ । ववतुः । ववुः । वेञ इति संप्रसारणं न भवति ॥

हनो वध लिङि ॥ ४२ ॥

हन्तेर्धातोर्वध इत्ययमादेशो भवति लिङि परत आर्धधातुके । वध्यात् । वध्यास्ताम् । वध्यासुः । अकारान्तश्चायमादेशः, तत्राकारस्य लोपो भवति । तस्य स्थानिवद्भावादवधीदिति हलन्तलक्षणा वृद्धिरतो हलादेर्लघोरिति न भवति ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लुङि च ॥ ४३ ॥

लुङि च परतो हनो वध इत्ययमादेशो भवति। अवधीत्। अवधिष्टाम्। अवधिषुः। योगविभाग उत्तरार्थः। आत्मनेपदेषु लिङि विकल्पो मा भूत् ॥

आत्मनेपदेष्वन्यतरस्याम् ॥ ४४ ॥

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। आत्मनेपदेषु परतो हनो लुङ्यन्यतरस्यां वध इत्ययमादेशो भवति। आवधिष्ट। आवधिषाताम्। आवधिषत। न च भवति। आहत। आहसाताम्। आहसत * ॥

इणो गा लुङि ॥ ४५ ॥

इणो गा इत्ययमादेशो भवति लुङि परतः। अगात्। अगाताम्। अगुः। लुङीति वर्त्तमाने पुनर्लुङ्ग्रहणमात्मनेपदेष्वन्यतरस्यामित्येतन्मा भूत्। इह त्वविशेषेण नित्यं च भवति। अगात्। अगायि भवता ॥ इण्वदिक इति वक्तव्यम् ॥ * ॥ अध्यगात्। अध्यगाताम्। अध्यगुः ॥

णौ गमिरबोधने ॥ ४६ ॥

णौ परत इणो ऽबोधनार्थस्य गमिरादेशो भवति। इकार उच्चारणार्थः। गमयति। गमयतः। गमयन्ति। अबोधनइति किम्। प्रत्यापयति। इण्वदिक इत्येव। अधिगमयति ॥

सनि च ॥ ४७ ॥

सनि परत इणो ऽबोधनार्थस्य गमिरादेशो भवति। जिगमिषति। जिगमिषतः। जिगमिषन्ति। अबोधनइत्येव। अर्थान्नतीषिषति। इण्वदिक इत्येव। अधिजिगमिषति। योगविभाग उत्तरार्थः। इङश्चेति सत्येव यथा स्यात् † ॥

इङश्च ॥ ४८ ॥

इङश्च सनि परतो गमिरादेशो भवति। अधिजिगांसते। अधिजिगांसेते। अधिजिगांसन्ते ॥

गाङ् लिटि ॥ ४९ ॥

गाङादेशो भवतीङो लिटि परतः। अधिजगे। अधिजगाते। अधिजगिरे। गाङोनुबन्धग्रहणं विशेषणार्थं, गाङ्कुटादिभ्य इत्यत्रास्य ग्रहणं यथा स्यात्। नहि स्यानिवद्भावेन गाङिति रूपं लभ्यते ॥

विभाषा लुङ्लृङोः ॥ ५० ॥

लुङि लृङि च परत इङो विभाषा गाङादेशो भवति। आदेशपक्षे गाङ्कुटादिभ्य इति ङित्त्वं, घुमास्थागापाजहातिसां हलीतीत्वम्। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। न च भवति। अध्येष्ट। अध्येषाताम्। अध्येषत। लृङि खल्वपि। अध्यगीष्यत। अध्यगीष्येताम्। अध्यगीष्यन्त। न च भवति। अध्येष्यत। अध्येष्येताम्। अध्येष्यन्त ॥

णौ च संश्चङोः ॥ ५१ ॥

इङो गाङ् विभाषेति वर्त्तते। णावितीङ्पेक्षा परमप्रमी संश्चङोरिति च ण्यपेक्षा। णौ सन्यरे चङ्यरे च परत इङो विभाषा गाङादेशो भवति। अधिजिगापयिषति। न च भवति। अध्यापिपयिषति। चङि खल्वपि। अध्यजीगपत्। अध्यापिपत् ॥

अस्तेर्भूः ॥ ५२ ॥

अस्तेर्धातोर्भूः इत्ययमादेशो भवति आर्द्धधातुके। भविता। भवितुम्। भवितव्यम् *। इह कस्माच्च भवति, ईहांमास, ईहांमासतुः, ईहांमासुः। क्त्वानुप्रयुज्यते लिटीति प्रत्याहारग्रहणेनास्तेर्ग्रहणसामर्थ्यात्। तथा चोच्यते।

"अनुप्रयोगे तु भुवा ऽस्त्यबाधनं
स्मरन्ति कर्तुर्वचनं मनीषिणः"

इति ॥

ब्रुवो वचिः ॥ ५३ ॥

ब्रुवो वचिरादेशो भवति आर्धधातुकविषये। इकार उच्चारणार्थः। वक्ता। वक्तुम्। वक्तव्यम्। स्यानिवद्भावेन कर्त्राभिप्रायक्रियाफलविवक्षायामात्मनेपदं भवति। ऊचे। वक्ष्यते ॥

चक्षिङः ख्याञ् ॥ ५४ ॥

चक्षिङः ख्याञादेशो भवत्यार्धधातुके। आख्याता। आख्यातुम्। आख्यातव्यम्। स्यानिवद्भावेन नित्यमात्मनेपदं न भवति। ञकारानुबन्धकरणसामर्थ्यात् † ॥ ख्शादिरप्ययमादेश इष्यते ॥ * ॥ आक्ष्याता। आक्ष्यातुम्। आक्ष्यातव्यम् ॥ वर्जने प्रतिषेधो वक्तव्यः ॥ * ॥ दुर्जनाः संचक्ष्याः। वर्जनीया इत्यर्थः ॥ असनयोश्च प्रतिषेधो वक्तव्यः ॥ * ॥ नृवत्ता रात्तसाः। हिंसार्थो ऽत्र धातुः। अने खल्वपि। विचक्षणः पण्डितः ॥ बहुलं संज्ञाछन्दसोरिति वक्तव्यम् ॥ * ॥ अवधकगात्रविचक्षणाजिरादर्थम् ॥

वा लिटि ॥ ५५ ॥

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। लिटि परतश्चक्षिङः ख्याञादेशो वा भवति। आचख्यौ। आचख्यतुः। आचख्युः। न च भवति। आचचक्षे। आचचक्षाते। आचचक्षिरे ॥

---

* 'आङो यमहन इत्यात्मनेपदम्। हनः सिजिति कित्त्वम्। अनुदात्तोपदेशेति नलोपः। झस्यादङ्गादिति सिचो लोपः' इति पुस्तकान्तरे ऽधिकम्।

† अत्र 'णौ मा भूत्' इति क्व चिदधिकम्।

* अत्र 'आर्धधातुकइति किम्। अस्ति। स्तः। सन्ति'। इति क्व चिदधिकम्।

† अत्र, आख्यास्यति। आख्यास्यते।' इति क्व चिदधिकम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अजेर्व्यघञपोः ॥ ५६ ॥

अजेर्धातोर्वीत्ययमादेशो भवत्यार्धधातुके परतो घञपौ वर्जयित्वा । प्रवायकः । प्रवयणीयः । अघञपोरिति किम् । समाजः । उदाजः । अपि तु, समजः । उदजः । समुदोरजः पशुष्वित्यप् । दीर्घोच्चारणं किम् । प्रवीताः ॥ घञपोः प्रतिषेधे क्यप उपसंख्यानम् ॥ * ॥ समज्या ॥ वलादावार्धधातुके विकल्प इष्यते ॥ * ॥ प्रवेता । प्राजिता । प्रवेतुम् । प्राजितुम् ॥

वा यौ ॥ ५७ ॥

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । यु इति ल्युटो ग्रहणम् । यौ परभूते अजेर्वा वी इत्ययमादेशो भवति । प्रवयणो दण्डः । प्राजनो दण्डः । प्रवयणमानय । प्राजनमानय ॥

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥ ५८ ॥

ण्यादयो गोत्रप्रत्ययाः । ण्यान्तात् क्षत्रियगोत्राद् आर्षाद् ञितश्च परयोरणिञोर्यूनि लुग्भवति । ण्यान्तात्तावत् । कुर्वादिभ्यो ण्य,स्तस्माद्यूनि इञ् । तस्य लुक् । कौरव्यः पिता । कौरव्यः पुत्रः । ननु च कौरव्यशब्दस्तिकादिषु पठ्यते, ततः फिञा भवितव्यं, कौरव्यायणिरिति । क्षत्रियगोत्रस्य तत्र ग्रहणं कुरुनादिभ्यो ण्य इत्यनेन विहितस्य । इदं तु ब्राह्मणगोत्रम् । कुर्वादिभ्यो ण्य इति ण्यः । क्षत्रिय । ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यण् । तस्माद्यूनि इञ् । तस्य लुक् । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । आर्ष । ऋष्यण् । तस्माद्यूनि इञ् । तस्य लुक् । वासिष्ठः पिता । वासिष्ठः पुत्रः । ञित् । अनृष्यानन्तर्ये बिदादिभ्योञ् । तस्माद्यूनि इञ् । तस्य लुक् । बैदः पिता । बैदः पुत्रः । अणः खल्वपि । तिकादिभ्यः फिञ् । तस्माद्यूनि प्राग्दीव्यतो ऽण् । तस्य लुक् । तैकायनिः पिता । तैकायनिः पुत्रः । एतेभ्य इति किम् । शिवादिभ्यो ऽण् । तस्माद् यूनि अत इञ् । तस्य न लुग्भवति । कौहडः पिता । कौहडिः पुत्रः । यूनीति किम् । वामरथ्यस्य छात्राः वामरथाः । कुर्वादिभ्यो ण्य इति ण्यस्तस्मात् कण्वादिभ्यो गोत्र इति शैषिको ऽण् । तस्य लुग्न भवति । अणिञोरिति किम् । दाक्षेरपत्यं युवा दाक्षायणः * ॥ अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् ॥ * ॥ बौधिः पिता । बौधिः पुत्रः । जाबालिः पिता । जाबालिः पुत्रः । औदुम्बरिः पिता । औदुम्बरिः पुत्रः । भाण्डीजङ्घिः पिता । भाण्डीजङ्घिः पुत्रः । साल्वावयवलक्षण इञ् । तस्मात्फक् । तस्य लुक् ॥ पैलादिदर्शनात् सिद्धम् ॥

* अत्र 'यञिञोश्चेति फको लुग्न भवति' इति पुस्तकान्तरे ऽधिकम् ।

पैलादिभ्यश्च ॥ ५९ ॥

पैल इत्येवमादिभ्यश्च युवप्रत्ययस्य लुग्भवति । पीलाया वेत्यण् । तस्मादणो द्व्यच इति फिञ् । तस्य लुक् । पैलः पिता । पैलः पुत्रः । अन्ये पैलादय इञन्तास्तेभ्य इञः प्राचामिति लुकि सिद्धे ऽप्रागर्थः पाठः । पैल । शालङ्कि । सात्यकि । सात्यकामि । देवि । औदमज्जि । औदव्रजि । औदमेघि । औदबुद्धि । दैवस्थानि । पैङ्गलायनि । राणायनि । रोहक्षिति । भौलिङ्गि । औद्गाहमानि । औज्जिहानि * ॥ तद्राजाच्चाणः ॥ आकृतिगणोयम् ॥

इञः प्राचाम् ॥ ६० ॥

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुग्भवति । गोत्रविशेषणं प्राग्ग्रहणं, न विकल्पार्थम् । पान्नागारेरपत्यं युवा । यञिञोश्चेति फक् । तस्य लुक् । पान्नागारिः पिता । पान्नागारिः पुत्रः । मान्थरैषणिः पिता । मान्थरैषणिः पुत्रः । प्राचामिति किम् । दाक्षिः पिता । दाक्षायणः पुत्रः ॥

न तौल्वलिभ्यः ॥ ६१ ॥

अनन्तरेण प्राप्तो लुक् प्रतिषिध्यते । तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य न लुग्भवति । तौल्वलिः पिता । तौल्वलायनः पुत्रः । तौल्वलि । धारणि । रावणि । पारणि । दैलीपि । दैवलि । दैवमति । दैवयज्ञि । प्रावाहणि । मान्धातकि । आनुहारति । श्वाफल्कि । आनुमति । आहिंसि । आसुरि । आयुधि । नैमिषि । आसिबन्धकि । बैकि । पौष्करसादि । वैरकि । वैलकि । वैहति । वैकर्णि । कारेणुपालि । कामलि † ॥

तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥ ६२ ॥

ते तद्राजाः ञ्यादयस्तद्राजा इति वक्ष्यति,तस्य तद्राजसंज्ञस्य प्रत्ययस्य बहुषु वर्त्तमानस्य अस्त्रीलिङ्गस्य लुग्भवति, तेनैव चेत्तद्राजेन कृतं बहुत्वं भवति । अङ्गाः । वङ्गाः । पुण्ड्राः । मगधाः । लोहध्वजाः । व्रीहिमताः । तद्राजस्येति किम् । औपगवाः । बहुष्विति किम् । आङ्गः । तेनैव ग्रहणं किम् । प्रियो वाङ्गो येषां तइमे प्रियवाङ्गाः । अस्त्रियामिति किम् । आङ्ग्यः स्त्रियः ॥

यस्कादिभ्यो गोत्रे ॥ ६३ ॥

बहुषु तेनैवास्त्रियामिति सर्वमनुवर्तते । यस्क इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु वर्त्तमानस्यास्त्रीलिङ्गस्य लुग्भवति, तेनैव चेद् गोत्रप्रत्ययेन कृतं बहुत्वं भवति ।

* अत्र 'रागक्षति । राणि । सौमनि । ऊहमानि' । एते पुस्तकान्तरेधिकाः ।

† अत्र 'रान्धकि । आसुराहति । प्राणाहति । पौष्कि । कान्दकि । दौषकगति । आन्तराहति' । एते पुस्तकान्तरेष्वधिकाः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रत्ययविधेश्चान्यत्र लौकिकस्य गोत्रस्य ग्रहणमित्यनन्तरापत्येपि लुग्भवत्येव । यस्काः । लभ्याः । बहुष्वित्येव । यास्कः । तेनैवेत्येव । प्रिययास्काः । अस्त्रियामित्येव । यास्क्यः स्त्रियः । गोत्रइति किम् । यास्काश्छात्राः । यस्क । लभ्य । दुह्य । अयःशूण । तृणकर्ण । एते पञ्च शिवादिषु पठ्यन्ते । ततः परेभ्यः षड्भ्य इञ् * । सदामत्त । कम्बलभार । अङ्गियोग । कर्णाटक । पिण्डीजङ्घ । बकसक्थ । ततः परेभ्यश्चतुर्भ्यो गृष्ट्यादिभ्यश्चेति ढञ् । बस्ति । कुद्रि † । अजबस्ति । मित्रयु । ततः परेभ्यो द्वादशभ्य इञ् । रत्नामुख । जङ्घारथ । मन्यक । उत्कास । कटुकमन्यक । पुष्करसत् । विपपुट । उपरिमेखल । क्रोष्टुमान । क्रोष्टुपाद । शीर्षमाय । पुष्करसच्छब्दाद् बाह्वादिपाठादिञ् । खरपशब्दो नडादिषु पठ्यते । ततः फक् । पदक । वर्मक । एताभ्यामत इञ् । भलन्दनशब्दात् शिवादिभ्यो ऽण् । भडिल । भण्डिल । भडित । भण्डित । एतेभ्यश्चतुर्भ्यो ऽश्वादिभ्यः फञ् ॥

यञञोश्च ॥ ६४ ॥

बहुषु तेनैवास्त्रियां गोत्रइति चानुवर्तते । यञो ऽञश्च गोत्रप्रत्ययस्य बहुषु वर्तमानस्यास्त्रीलिङ्गस्य लुग्भवति । गर्गादिभ्यो यञ् । गर्गाः । वत्साः । अत्रः खल्वपि । अनृष्यानन्तर्ये विदादिभ्यो ऽञ् । विदाः । उर्वाः । बहुष्वित्येव । गार्ग्यः । वैदः । तेनैवेत्येव । प्रियगार्ग्याः । प्रियवैदाः । अस्त्रियामित्येव । गार्ग्यः स्त्रियः । वैद्यः स्त्रियः । गोत्रइत्येव । द्वीपादनुसमुद्रं यञ् । द्वैप्याः । उत्सादिभ्यो ऽञ् । औत्साश्छात्राः ॥ यञादीनामेकद्व्योर्वा तत्पुरुषे पष्ठ्या उपसंख्यानम् ॥ * ॥ गार्ग्यस्य कुलं, गार्ग्यकुलं, गर्गकुलं वा । गार्ग्ययोः कुलं, गार्ग्यकुलं, गर्गकुलं वा । एवं वैदस्य कुलं, वैदकुलं, विदकुलं वा । वैद्ययोः कुलं, वैदकुलं, विदकुलं वा । यञादीनामिति किम् । आङ्गकुलम् । एकद्व्योरिति किम् । गर्गाणां कुलं, गर्गकुलम् । तत्पुरुषइति किम् । गार्ग्यस्य समीपमुपगार्ग्यम् । षष्ठ्या इति किम् । परमगार्ग्यः ॥

अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥ ६५ ॥

अत्र्यादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति । अत्रिशब्दादितश्चानित्र इति ढक् । इतरेभ्य फक्ण्य् । अत्रयः । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः । बहुष्वित्येव । आत्रेयो, भार्गवः । तेनैवेत्येव । प्रियात्रेयाः । प्रियभार्गवाः । अस्त्रियामिति किम् । आत्रेय्यः स्त्रियः ॥

* अत्र पुस्तकान्तरे 'सप्तभ्य इञ्' इति पाठः, तदनुसारेण कर्णाटक इत्येतदुत्तरं 'पर्णाडक' इत्येतदधिकम् ।

† विश्रि । कद्रु । इति पा० २

बह्वचः इञः प्राच्यभरतेषु ॥ ६६ ॥

बह्वचः प्रातिपदिकाद् य इञ् विहितः प्राच्यगोत्रे भरतगोत्रे च वर्तते तस्य बहुषु लुग्भवति । पक्षागाराः । मन्थरेषणाः । भरतेषु खल्वपि । युधिष्ठिराः । अर्जुनाः । बह्वच इति किम् । वैकयः । पैप्पयः । प्राच्यभरतेष्वितिकिम् । बालाकयः । हास्तिदासयः । भरताः प्राच्या एव तेषां पुनर्ग्रहणं ज्ञापनार्थम्, अन्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति, तेन इञः प्राचामिति भरतानां युवप्रत्ययस्य लुग्न भवति । आर्जुनिः पिता । आर्जुनायनः पुत्रः ॥

न गोपवनादिभ्यः ॥ ६७ ॥

गोपवनादिभ्यः परस्य प्रत्ययस्य लुग्न भवति । बिदाद्यन्तर्गणोयम् । ततो ऽञो गोत्रप्रत्ययस्य यञञोश्चेति लुक् प्राप्तः प्रतिषिध्यते । गौपवनाः । शैयवाः । गोपवन । शिग्रु । बिन्दु । भाजन । अश्व । अवतान । श्यामाक । श्वापर्ण । एतावन्त एवाष्टौ गोपवनादयः । परिशिष्टानां हरितादीनां प्रमादपाठः । ते हि चतुर्थे बिदादिषु पठ्यन्ते । तेभ्यश्च बहुषु लुग्भवत्येव । हरिताः । किंदासा इति ॥

तिककितवादिभ्यो द्वन्द्वे ॥ ६८ ॥

तिकादिभ्यः कितवादिभ्यश्च द्वन्द्वे गोत्रप्रत्ययस्य बहुषु लुग्भवति । तैकायनयश्च कैतवायनयश्च । तिकादिभ्यः फिञ् । तस्य लुक् । तिककितवाः । वाङ्क्वरयश्च भाण्डीरथयश्च । अत इञ् । तस्य लुक् । वङ्क्वरभण्डीरथाः । औपकायनाश्च लामकायनाश्च । नडादिभ्यः फक् । तस्य लुक् । उपकलमकाः । पाफकयश्च नारकयश्च । अत इञ् । तस्य लुक् । पफकनरकाः । बाकनखयश्च श्वागुदपरिणद्वयश्च । अत इञ् । तस्य लुक् । बकनखश्वगुदपरिणद्वाः । उब्जशब्दादत इञ् । ककुभशब्दाच्छिवाद्यण् । तयोर्लुक् । औब्जयश्च काकुभाश्च उब्जककुभाः । लाङ्कयश्च शान्तमुखयश्च । अत इञ् । तस्य लुक् । लङ्कशान्तमुखाः । उरसशब्दस्तिकादिषु पठ्यते ततः फिञ् । लङ्कटशब्दादिञ् तयोर्लुक् । औरसायनयश्च लाङ्कटयश्च, उरसलङ्कटाः । भाष्टकयश्च कापिष्ठलयश्च । अत इञ् । तस्य लुक् । भष्टककपिष्ठलाः । कार्ष्णाजिनयश्च कार्ष्णसुन्दरयश्च । अत इञ् । तस्य लुक् । कृष्णाजिनकृष्णसुन्दराः । आग्निवेश्यश्च दासेरकयश्च । अग्निवेशशब्दाद् गर्गादिभ्यो यञ् । दासेरकशब्दादत इञ् । तयोर्लुक् । अग्निवेशदासेरकाः ॥

उपकादिभ्यो ऽन्यतरस्यामद्वन्द्वे ॥ ६९ ॥

उपक इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति अन्यतरस्यां द्वन्द्वे चाद्वन्द्वे च । अद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थम् । एतेषां च मध्ये त्रयो द्वन्द्वास्तिककितवादिषु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पठ्यन्ते । उपकलमकाः । अष्टकक्रपिष्टलाः । कृष्णाजिनकृष्णसुन्दराः । इति । तेषां पूर्वेणैव नित्यमेव लुग्भवति । अद्वन्द्वे त्वनेन विकल्पः । उपकाः । औपकायनाः । लमकाः । लामकायनाः । अष्टकाः । आष्टकयः । कपिष्टलाः । कापिष्ठलयः । कृष्णाजिनाः । कार्ष्णाजिनयः । कृष्णसुन्दराः । कार्ष्णसुन्दरय इति । परिशिष्टानां च द्वन्द्वे ऽद्वन्द्वे च विकल्प इति । षण्डारक । अण्डारक । गडुक । सुपर्यक । सुपिष्ट । मयूरकर्ण । खारीजङ्घ । शलाबल । पतञ्जल । कठेरणि । कुर्पीतक । काशकृत्स्न । निदाघ । कलशीकण्ठ । दामकण्ठ । कृष्णपिङ्गल । कर्णक । पर्णक । जटिलक । बधिरक । जन्तुक । अनुलोम । अर्द्धपिङ्गलक । प्रतिलोम । प्रतान । अनभिहित * ॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥ ७० ॥

आगस्त्यकौण्डिन्ययोरणो यञश्च बहुषु लुग्भवति, परिशिष्टस्य च प्रकृतिभागस्य यथासंख्यमगस्ति कुण्डिनच् इत्येतावादेशौ भवतः । अगस्तयः । कुण्डिनाः । चकारः स्वरार्थः । मध्योदात्तो हि कुण्डिनशब्दस्तदादेशेपि तथा स्यात् । अगस्त्यशब्दाद्दृष्यण् । कुण्डिनिशब्दाद्गर्गादित्वाद्यञ् । तयोर्गोत्रे लुगचीति लुकि प्रतिपिद्धे आगस्तीयाश्छात्रा इति बहुलत्वणश्छो भवति । कौण्डिन्ये त्वणेव भवितव्यं कण्वादिभ्यो गोत्रइति, तत्र विशेषो नास्ति । कौण्डिनाश्छात्राः ॥

सुपो धातुप्रातिपदिकयोः ॥ ७१ ॥

सुपो विभक्तेर्धातुसंज्ञायाः प्रातिपदिकसंज्ञायाश्च लुग्भवति । तदन्तर्गतास्तद्ग्रहणेन गृह्यन्ते । धातोस्तावत् । पुत्रीयति । घटीयति । प्रातिपदिकस्य । कष्टश्रितः । राजपुरुषः । धातुप्रातिपदिकयोरिति किम् । वृत्तः । प्लुतः ॥

अदिप्रभृतिभ्यः शपः ॥ ७२ ॥

अदिप्रभृतिभ्य उत्तरस्य शपो लुग्भवति । अत्ति । हन्ति । द्वेष्टि ॥

बहुलं छन्दसि ॥ ७३ ॥

छन्दसि विषये शपो बहुलं लुग्भवति । अदिप्रभृतिभ्य उक्तस्ततो न भवत्यपि । वृत्रं हनति । अहिः शयते । अन्येभ्यश्च भवति । आध्वं नो देवाः ॥

यङो ऽचि च ॥ ७४ ॥

यङो लुग्भवति अचि प्रत्यये परतः । चकारेण बहुलग्रहणमनुकृष्यते, न तु छन्दसीति, तेन छन्दसि भाषायां च यङो लुग्भवति । लोलुवः । पोपुवः । सनीस्रंसः । दनीध्वंसः । बहुलग्रहणादनच्यपि भवति । शाकुनिको लालपीति । दुन्दुभिर्वावदीति ॥

जुहोत्यादिभ्यः श्लुः ॥ ७५ ॥

शवनुवर्तते न यङ् । जुहोत्यादिभ्य उत्तरस्य शपः श्लुर्भवति । लुकि प्राप्ते श्लुविधानं द्विर्वचनार्थम् । जुहोति । बिभेति । नेनेक्ति ॥

बहुलं छन्दसि ॥ ७६ ॥

छन्दसि विषये बहुलं शपः श्लुर्भवति । यत्रोक्तं तत्र न भवति, अन्यत्रापि भवति । जुहोत्यादिभ्यस्तावच्च भवति । दाति प्रियाणि । धाति प्रियाणि । अन्येभ्यश्च भवति । पूर्णां विवष्टि । जनिमा विवक्ति ॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ ७७ ॥

लुगनुवर्तते, न श्लुः । गाति स्था घु पा भू इत्येतेभ्यः परस्मैपदेषु परतः सिचो लुग्भवति परस्मैपदेषु परतः । अगात् । अस्थात् । घु । अदात् । अधात् । अपात् । अभूत् ॥ गापोर्यग्रहणे इणपिबत्योर्यग्रहणम् ॥ * ॥ गायतेः पातेश्च न भवति । अगासीवटः । अपासीच्चषः । परस्मैपदेष्विति किम् । अगासातां यामौ देवदत्तेन ॥

विभाषा घ्राधेट्शाच्छासः ॥ ७८ ॥

घ्रा धेट् शा छा सा इत्येतेभ्य उत्तरस्य सिचः परस्मैपदेषु विभाषा लुग्भवति । धेटः पूर्वेण प्राप्ते विभाषार्थं वचनम् । परिशिष्टानामप्राप्ते । अघ्रात् । अघ्रासीत् । अधात् । अधासीत् । अशात् । अशासीत् । अच्छात् । अच्छासीत् । असात् । असासीत् । परस्मैपदेष्वित्येव । अघ्रासातां सुमनसौ देवदत्तेन ॥

तनादिभ्यस्तथासोः ॥ ७९ ॥

तनादिभ्य उत्तरस्य सिचस्तथासोः परतो विभाषा लुग्भवति । अतत । अतथाः । अतनिष्ट । अतनिष्ठाः । अमात । अमाथाः । असनिष्ट । असनिष्ठाः । जनसनखनामित्यात्वम् । थासा साहचर्यादात्मनेपदस्य तशब्दस्य ग्रहणं, परस्मैपदे न भवति । अतनिष्ट यूयम् ॥

मन्त्रे घसह्वरणशवृदहाहच्छगमिजनिभ्यो लेः ॥ ८० ॥

मन्त्रविषये घस ह्वर णश वृ दह आत् वृच् छ गमि जनि इत्येतेभ्य उत्तरस्य लेर्लुग्भवति । घस । अत्तवमीमदन्त पितरः । ह्वरेति ह्वाकौटिल्ये । माह्वार्मित्रस्य त्वम् । नश । प्रणड्मर्त्यस्य । वृ इति वृङ्वृञोः सामान्येन ग्रहणम् । सुरुचो वेन आवः । दह । मान आधक् । आदिति आकारान्तग्रहणम् । प्रा पूरणे । आ ऽप्रा द्यावापृथिवी अन्तरिक्षम् । वृञ् । मानो अस्मिन्म-

* चूडारक । उदङ्क । सुधायुक । अवन्धक । पदञ्जल । अनुपद । अपजघ्न । कमक । लेखाभ । कमन्दक । पिञ्जल । मयूरकर्ण । मदाघ । कदामत्त । दामकपठ । एते पुस्तकान्तरे ऽधिकाः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हाधने परावर्क् । कृ । अक्रन् कर्म कर्मकृतः । गमि । अग्मन् । जनि । अज्ञत वा अस्य दन्ताः । ब्राह्मणे प्रयोगोयम् । मन्त्रग्रहणं तु छन्दस उपलक्षणार्थम् ॥

आमः ॥ ८१ ॥

आमः परस्य लेर्लुग् भवति । ईहांचक्रे । ऊहांचक्रे । ईक्षांचक्रे ॥

अव्ययादाप्सुपः ॥ ८२ ॥

अव्ययादुत्तरस्यापः सुपश्च लुग्भवति । तत्र शालायाम् । यत्र शालायाम् । सुपः खल्वपि । कृत्वा । हित्वा ॥

नाव्ययीभावादतोम्त्वपञ्चम्याः ॥ ८३ ॥

पूर्वेण लुक् प्राप्तः प्रतिषिध्यते । अदन्तादव्ययीभावादुत्तरस्य सुपो न लुग्भवति, अमादेशस्तु तस्य सुपो भवत्यपञ्चम्याः । तस्मिन् प्रतिषिद्धे पञ्चम्याः श्रवणमेव भवति । उपकुम्भं तिष्ठति । उपकुम्भं पश्य । उपमणिकं तिष्ठति । उपमणिकं पश्य । अत इति किम् । अधिस्त्रि । अधिकुमारि । अपञ्चम्या इति किम् । उपकुम्भादानय ॥

तृतीयासप्तम्योर्बहुलम् ॥ ८४ ॥

पूर्वेण नित्यमम्भावे प्राप्ते वचनमिदम् । तृतीयासप्तम्योर्विभक्त्योर्बहुलमम्भावो भवति, अव्ययीभावे । उपकुम्भेन कृतम् । उपकुम्भं कृतम् । उपकुम्भे निधेहि । उपकुम्भं निधेहि ॥ सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यममिति वक्तव्यम् ॥ * ॥ सुमद्रम् । सुमगधम् । उन्मत्तगङ्गम् । लोहितगङ्गम् । एकविंशतिभारद्वाजम् । बहुलवचनात्सिद्धम् ॥

लुटः प्रथमस्य डारौरसः ॥ ८५ ॥

लुडादेशस्य प्रथमपुरुषस्य परस्मपदस्यात्मनेपदस्य च डा रौ रस् इत्येते आदेशा भवन्ति यथासंख्यम् । कर्त्ता । कर्त्तारौ । कर्त्तारः । आत्मनेपदस्य । अध्येता । अध्येतारौ । अध्येतारः । प्रथमस्येति किम् । श्वः कर्त्तासि । श्वो ऽध्येतासे ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ
द्वितीयाध्यायस्य चतुर्थः पादः ॥
समाप्तश्चाध्यायः ॥ :: ॥

॥ अथ तृतीयाध्यायस्य प्रथमः पादः ॥

प्रत्ययः ॥ १ ॥

अधिकारोयम् । प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते । आ पञ्चमाध्यायपरिसमाप्तेर्यानित ऊर्ध्वमनुक्रमिष्यामः प्रत्ययसंज्ञास्ते वेदितव्याः प्रकृत्युपपदोपाधिविकारागमान्वर्जयित्वा । वक्ष्यति, तव्यत्तव्यानीयरः । कर्त्तव्यम् । करणीयम् । तैत्तिरीयम् । प्रत्ययप्रदेशाः प्रत्ययलोपे प्रत्ययलक्षणमित्येवमादयः ॥

परश्च ॥ २ ॥

अयमप्यधिकारो योगेयोगउपतिष्ठते, परिभाषा वा । परश्च स भवति धातोर्वा प्रातिपदिकाद्वा यः प्रत्ययसंज्ञः । कर्तव्यम् । तैत्तिरीयम् । चकारः पुनरस्यैव समुच्चयार्थः,तेनोणादिषु परत्वं न विकल्प्यते ॥

आद्युदात्तश्च ॥ ३ ॥

अयमप्यधिकारः परिभाषा वा । आद्युदात्तश्च स भवति यः प्रत्ययसंज्ञः । अनियतस्वरप्रत्ययप्रसङ्गे ऽनेकाक्षु च प्रत्ययेषु देशस्यानियमे सति वचनमिदमादेरुदात्तार्थम् । कर्तव्यम् । तैत्तिरीयम् ॥

अनुदात्तौ सुप्पितौ ॥ ४ ॥

पूर्वस्यायमपवादः । सुपः पितश्च प्रत्यया अनुदात्ता भवन्ति । दृषदौ । दृषदः । पितः खल्वपि । पचति । पठति ॥

गुप्तिज्किद्भ्यः सन् ॥ ५ ॥

गुप गोपने, तिज निशाने, कित निवासे, एतेभ्यो धातुभ्यः सन्प्रत्ययो भवति । प्रत्ययसंज्ञा चाधिकृतैव । जुगुप्सते । तितिक्षते । चिकित्सति ॥ निन्दाक्षमाव्याधिप्रतीकारेषु सन्निष्यते, ऽन्यत्र यथाप्राप्तं प्रत्यया भवन्ति ॥ * ॥ गोपायति । तेजयति । सङ्केतयति । गुपादिष्वनुबन्धकरणमात्मनेपदार्थम् ॥

मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥ ६ ॥

मान पूजायां, बध बन्धने, दान अवखण्डने, शान अवतेजने, इत्येतेभ्यो धातुभ्यः सन्प्रत्ययो भवति, अभ्यासस्य चेकारस्य दीर्घादेशो भवति । मीमांसते । बीभत्सते । दीदांसते । शीशांसते । उत्तरसूत्रे वाग्रहणं सर्वस्य शेषो विज्ञायते, तेन क्व चिन्न भवत्यपि । मानयति । बाधयति । दानयति । निशानयति ॥ अत्रापि सन्नर्थविशेषइष्यते ॥ * ॥ मानेर्जिज्ञासायां, बधेर्वैरूप्ये, दानेरार्जवे, शानेर्निशाने ॥

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ ७ ॥

इषिकर्म यो धातुरिषिणैव समानकर्तृकस्तस्मादिच्छायामर्थे वा सन्प्रत्ययो भवति । कर्मत्वं समानकर्तृकत्वं च धातोरर्थद्वारकम् । कर्तुमिच्छति, चिकिर्षति । जिहीर्षति । धातुग्रहणं किम् । सोपसर्गादुत्पत्तिर्मा भूत् । प्रकर्तुमैच्छत्, प्राचिकीर्षत् । कर्मण इति किम् । करणान्मा भूत् । गमनेनेच्छति । समानकर्तृकादिति किम् । देवदत्तस्य भोजनमिच्छति यज्ञदत्तः । इच्छायामिति किम् । कर्तुं जानाति । वावचनाद्वाक्यमपि भवति । धातोरिति विधानादत्र सन आर्द्धधातु-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कसंज्ञा भवति, न पूर्वत्र ॥ आशङ्कायामुपसंख्यानम् ॥ * ॥ शङ्के पतिष्यति कूलम् । पिपतिषति कूलम् । श्वा मुमूर्षति ॥ इच्छासन्नन्तात्प्रतिषेधो वक्तव्यः ॥ * ॥ चिकीर्षितुमिच्छति । विशेषणं किम् । जुगुप्सिषते । मीमांसिष्टे ॥

शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थकः ।
सरूपः प्रत्ययो नेष्टः सन्नन्ताच्च सनिष्यते ॥

सुप आत्मनः क्यच् ॥ ८ ॥

कर्मण इच्छायां वेत्यनुवर्त्तते । इषिकर्मण एषितुरेवात्मसंबन्धिनः सुबन्तादिच्छायामर्थे वा क्यच्प्रत्ययो भवति । आत्मनः पुत्रमिच्छति पुत्रीयति । सुबग्रहणं किम् । वाक्यान्मा भूत् । महान्तं पुत्रमिच्छति । आत्मन इति किम् । राज्ञः पुत्रमिच्छति । ककारो नः क्यङिति सामान्यग्रहणार्थः । चकारस्तद्विधानार्थः ॥ क्यचि मान्ताव्ययप्रतिषेधो वक्तव्यः ॥ * ॥ इदमिच्छति । उच्चैरिच्छति । नीचैरिच्छति ॥ छन्दसि परेच्छायामिति वक्तव्यम् ॥ * ॥ मा त्वा वृका अघायवो विदन् ॥

काम्यच्च ॥ ९ ॥

सुबन्तात्कर्मण आत्मेच्छायां काम्यच् प्रत्ययो भवति । आत्मनः पुत्रमिच्छति, पुत्रकाम्यति । वस्त्रकाम्यति । योगविभाग उत्तरत्र क्यचोनुवृत्त्यर्थः । ककारस्येत्संज्ञा प्रयोजनाभावाच्च भवति । चकारादित्वाद्वा काम्यवः ॥ उपयट्काम्यति ॥

उपमानादाचारे ॥ १० ॥

क्यङनुवर्त्तते, न काम्यच् । उपमानात्कर्मणः सुबन्तादाचारेर्थे वा क्यच्प्रत्ययो भवति । आचारक्रियायाः प्रत्ययार्थत्वात्तदपेक्षयैवोपमानस्य कर्मता । पुत्रमिवाचरति, पुत्रीयति छात्रम् । प्रावारीयति कम्बलम् ॥ अधिकरणाच्चेति वक्तव्यम् ॥ * ॥ प्रासादीयति कुड्ये * । पर्यङ्कीयति मञ्चके ॥

कर्तुः क्यङ् सलोपश्च ॥ ११ ॥

आचार इत्यनुवर्त्तते । उपमानात्कर्तुः सुबन्तादाचारेर्थे वा क्यङ् प्रत्ययो भवति, सकारस्य च लोपो भवति । अन्वाचयशिष्टः सलोपस्तदभावेपि क्यङ् भवत्येव । श्येनइवाचरति काकः, श्येनायते । कुमुदं पुष्करायते । सलोपविधावपि वाग्रहणं संबध्यते, व्यवस्थितविभाषा च भवति । ओजायते । अप्सरायते । पयायते । पयस्यते ।

ओजसोप्सरसो नित्यं पयसस्तु विभाषया । †

सलोपविधौ च कर्तुरिति स्थानषष्ठी संपद्यते, तत्रालोन्त्यनियमे सति, 'हंसायते' 'सारसायते' इति सलोपो न भवति ॥ आचारे ऽवगल्भक्लीबद्रोडिभ्यः क्विब्वा वक्तव्यः ॥ * ॥ अवगल्भते । अवगल्भायते । क्लीबते । क्लीबायते । द्रोडते । द्रोडायते ॥ सर्वप्रातिपदिकेभ्य इत्येके ॥ * ॥ अश्वइवाचरति, अश्वायते । गर्दभायते । अश्वति । गर्दभति ॥

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ॥ १२ ॥

भृश इत्येवमादिभ्यः प्रातिपदिकेभ्यो ऽच्यन्तेभ्यो भुवि भवत्यर्थे क्यङ् प्रत्ययो भवति, हलन्तानां च लोपः । अच्वेरिति प्रत्येकमभिसंबध्यते । किमर्थं पुनरिदमुच्यते, यावता भवतियोगे च्विर्विधीयते तेनोक्तार्थत्वाच्च्यन्तेभ्यो न क्यङ् भविष्यति । तत्सादृश्यप्रतिपत्त्यर्थं तर्हि च्विप्रतिषेधः क्रियते । अभूततद्भावविषयेभ्यो भृशादिभ्यः क्यङ्प्रत्ययः । अभृशो भृशो भवति, भृशायते । शीघ्रायते । भृश । शीघ्र । मन्द । चपल । पण्डित । उत्सुक । उन्मनस् । अभिमनस् । सुमनस् । दुर्मनस् । रहस् । रेहस् । शश्वत् । बृहत् । बेहत् । नृपत् । शुचि । अधर । ओजस् । वर्चस् । * भृशादिः । अच्वेरिति किम् । भृशीभवति ॥

लोहितादिडाज्भ्यः क्यष् ॥ १३ ॥

लोहितादिभ्यो डाज्न्तेभ्यश्च भवत्यर्थे क्यष् प्रत्ययो भवति । लोहितायति । लोहितायते । डाज्न्तेभ्यः । पटपटायति । पटपटायते । लोहितडाज्भ्यः क्यष्वचनं, भृशादिभ्वितराणि यानि लोहितादिषु पठ्यन्ते तेभ्य क्यङेव, अपरिपठितेभ्यस्तु क्यषेव भवति । वर्मायति । वर्मायते । निद्रायति । निद्रायते । करुणायति । करुणायते । कृपायति । कृपायते । आकृतिगणोयम् । तथा च ककारः सामान्यग्रहणार्थोनुबध्यते नः क्यङिति । नहि पठितानां मध्य नकारान्तः शब्दोस्ति । क्रभ्वस्तिभिरिव क्यषापि योगे डाज् भवतीत्येतदेव वचनं ज्ञापकम् । अच्वेरित्यनुवृत्तेरभूततद्भावे क्यष् विज्ञायते । लोहित । नील । हरित । पीत । मद्र । फेन । मन्द । लोहितादिः ॥

कष्टाय क्रमणे ॥ १४ ॥

क्यङनुवर्त्तते, न क्यष् । कष्टशब्दाच्चतुर्थीसमर्थात्क्रमणेर्थे ऽनार्जवे क्यङ् प्रत्ययो भवति । कष्टाय कर्मणे क्रामति, कष्टायते । अत्यल्पमिदमुच्यते ॥ सत्रकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम् ॥ * ॥ कण्वचिकीर्षा । पापचिकीर्षा, तस्यामेतेभ्यः क्यङ् प्रत्ययो भवति । सत्रायते । कष्टायते । कृच्छ्रायते । गहनायते । कण्वचिकीर्षायामिति किम् । अजः कष्टं क्रामति ॥

कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः ॥ १५ ॥

रोमन्थशब्दात्तपःशब्दाच्च कर्मणो यथाक्रमं वर्त्तिचरोरर्थयोः

* अत्र कुट्यामिति युक्तः पाठ इति पदमञ्जर्याम् ।

† "सकारस्येष्यते लोपः शब्दशास्त्रविचक्षणैः" ॥
इत्युत्तरार्धमधिकमत्र क्व चित् ।

* विमनस् । रभस् । दृढ । रोहत् । शुचिस् । अरजस् । अत्रैते पुस्तकान्तरे ऽधिकाः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्यङ् प्रत्ययो भवति । रोमन्यं वर्त्तयति, रोमन्यायते गौः ॥ हनुचलनइति वक्तव्यम् ॥ * ॥ इह मा भूत् । कोटो रोमन्यं वर्त्तयति ॥ तपसः परस्मैपदं च ॥ * ॥ तपश्चरति, तपस्यति ॥

वाष्पोष्मभ्यामुद्गमने ॥ १६ ॥

कर्मण इति वर्त्तते । बाष्पशब्दादूष्मशब्दाच्च कर्मण उद्गमनेर्थे क्यङ् प्रत्ययो भवति । बाष्पमुद्गमति, बाष्पायते । ऊष्मायते ॥ फेनाच्चेति वक्तव्यम् ॥ * ॥ फेनमुद्गमति, फेनायते ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ॥ १७ ॥

शब्द वैर कलह अभ्र कण्व मेघ इत्येतेभ्यः करणे करोत्यर्थे क्यङ् प्रत्ययो भवति । शब्दं करोति, शब्दायते । वैरायते । कलहायते । अभ्रायते । कण्वायते । मेघायते ॥ सुदिनदुर्दिननीहारेभ्यश्चेति वक्तव्यम् ॥ * ॥ सुदिनायते । दुर्दिनायते । नीहारायते ॥ अटाट्टाशीकाकोटापोटासोटाकुट्टायहणं कर्त्तव्यम् ॥ * ॥ अटायते । अट्टायते । शीकायते । कोटायते । पोटायते । सोटायते । कुट्टायते * ॥

सुखादिभ्यः कर्तृवेदनायाम् ॥ १८ ॥

कर्मयहणमनुवर्त्तते । सुख इत्येवमादिभ्यः कर्मभ्यो वेदनायामर्थे ऽनुभवे क्यङ् प्रत्ययो भवति, वेदयितुश्चेत्कर्त्तुः संबन्धीनि सुखादीनि भवन्ति । सुखं वेदयते, सुखायते । दुःखायते । कर्तृयहणं किम् । सुखं वेदयति प्रसाधको देवदत्तस्य । सुख । दुःख । तृप्त† । गहन । कृच्छ्र । अस्र । अलीक । प्रतीप । करुण । कृपण । सोढ । सुखादिः ॥

नमोवरिवश्चित्रङः क्यच् ॥ १९ ॥

करणइति वर्त्तते । नमस् वरिवस् चित्रङ् इत्येतेभ्यो वा क्यच्प्रत्ययो भवति, करणविशेषे पूजादौ । नमसः पूजायाम् । नमस्यति देवान् । वरिवसः परिचर्यायाम् । वरिवस्यति गुरून् । चित्रङ आश्चर्ये । चित्रीयते । ङकार आत्मनेपदार्थः ॥

पुच्छभाण्डचीवराण्णिङ् ॥ २० ॥

करणइति वर्त्तते । पुच्छ भाण्ड चीवर इत्येतेभ्यो णिङ् प्रत्ययो भवति, करणविशेषे ॥ पुच्छादुदसने पर्यसने वा ॥ * ॥ उत्पुच्छयते । परिपुच्छयते ॥ भाण्डात्समाचयने ॥ * ॥ संभाण्डयते ॥ चीवरादर्जने परिधाने वा ॥ * ॥ संचीवरयते भिक्षुः । ङकार आत्मनेपदार्थः । णकारः सामान्ययहणार्थः, णेरनिटीति ॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ २१ ॥

मुण्ड मिश्र श्लक्ष्ण लवण व्रत वस्त्र हल कल कृत तूस्त इत्येतेभ्यः करणे णिच् प्रत्ययो भवति । मुण्डं करोति, मुण्डयति । मिश्रयति । श्लक्ष्णयति । लवणयति । व्रताद्भोजने तच्चित्तश्च । पयो व्रतयति । वृषलाचं व्रतयति । वस्त्रात्समाच्छादने । संवस्त्रयति । हलं गृह्णाति, हलयति । कलं गृह्णाति, कलयति । हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थम् । अजहलत् । अचकलत् । कृतं गृह्णाति, कृतयति । तूस्तानि विहन्ति, वितूस्तयति केशान् । विशदीकरोतीत्यर्थः ॥

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ॥ २२ ॥

एकाच् यो धातुर्हलादिः क्रियासमभिहारे वर्त्तते तस्माद्यङ् प्रत्ययो भवति । पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः । पुनःपुनः पचति, पापच्यते । यायज्यते । भृशं ज्वलति, जाज्वल्यते । देदीप्यते । धातोरिति किम् । सोपसर्गादुत्पत्तिर्मा भूत् । भृशं प्राटति । एकाच इति किम् । भृशं जागर्ति । हलादेरिति किम् । भृशमीक्षते ॥ सूचिसूत्रिमूच्यट्यर्त्यशूर्णोतीनां यहणं यङ्विधावनेकाजहलाद्यर्थम् ॥ * ॥ सोसूच्यते । सोसूच्यते । मोमूच्यते । अटाट्यते । अरार्यते । अशाश्यते । प्रोर्णोनूयते । भृशं शोभते । भृशं रोचतइत्यत्र नेष्यते, ऽनभिधानात् ॥

नित्यं कौटिल्ये गतौ ॥ २३ ॥

गतिवचनाद्धातोः कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति । कुटिलं क्रामति, चङ्क्रम्यते । दन्द्रम्यते । नित्ययहणं विपर्यासनियमार्थं, गतिवचनाच्चित्यं कौटिल्यएव भवति, न तु क्रियासमभिहारे । भृशं क्रामति ॥

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥ २४ ॥

लुप सद चर जप जभ दह दश गृ इत्येतेभ्यो भावगर्हायां धात्वर्थेगर्हायां यङ् प्रत्ययो भवति । गर्हितं लुम्पति, लोलुप्यते । एवं सासद्यते । चञ्चूर्यते । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । निजेगिल्यते । भावगर्हायामिति किम् । साधु जपति । भावयहणं किम् । साधनगर्हायां मा भूत् । मन्त्रं जपति वृषलः । नित्ययहणं विपर्यासनियमार्थमनुवर्त्तते । एतेभ्यो नित्यं भावगर्हायामेव भवति, न तु क्रियासमभिहारे । भृशं लुम्पति ॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ २५ ॥

सत्यादिभ्यश्चूर्णपर्यन्तेभ्यश्चुरादिभ्यश्च णिच् प्रत्ययो भवति । सत्यमाचष्टे, सत्यापयति ॥ अर्थवेदसत्यानामापुग्वक्तव्यः ॥ * ॥ अर्थमाचष्टे, अर्थापयति । वेदापयति । आपुग्वचनसामर्थ्यादृिलोपो न भवति * । पाशाद्विमोचने । विपाशयति ।

---

* अट्टाटाशीकाकोटापोटासोटासट्टाधुट्टाएट्टायहणं कर्तव्यमिति पुस्तकान्तरे पाठः ॥ भाष्यपुस्तकेषु तु बहुषु 'अटाट्टाशीकाकोटापोटासोटाघुट्टाल्लुट्टायहणं कर्तव्यम्' इति पाठः ।

† तृप्तेत्यस्य स्थाने तीव्रेति पाठान्तरम् ।

* अयं क्वाचित्कः पाठ इति पदमञ्जर्याम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रूपाद्दर्शने । रूपयति । वीणयोपगायति, उपवीणयति । तूलेनानुकूणाति, अनुतूलयति । श्लोकैरुपस्तौति, उपश्लोकयति । सेनया ऽभियाति, अभिषेणयति । लोमान्यनुमार्ष्टि, अनुलोमयति । त्वचं गृह्णाति, त्वचयति । अकारान्तस्त्वचशब्दः । वर्मणा संनह्यति, संवर्मयति । वर्णं गृह्णाति, वर्णयति । चूर्णैरवध्वंसयति, अवचूर्णयति । चुरादिभ्यः स्वार्थे । चोरयति । चिन्तयति । स्वाभाविकत्वादर्थाभिधानस्य यथास्वं प्रत्ययार्था निर्दिश्यन्ते ॥

हेतुमति च ॥ २६ ॥

हेतुः स्वतन्त्रस्य कर्त्तुः प्रयोजकः, तदीयो व्यापारः प्रेषणादिलक्षणो हेतुमान्, तस्मिन्नभिधेये धातोर्णिच् प्रत्ययो भवति । कटं कारयति । ओदनं पाचयति ॥ तत्करोतीत्युपसंख्यानं सूत्रयत्याद्यर्थम् ॥ * ॥ सूत्रं करोति, सूत्रयति ॥ आख्यानात्कृतस्तदाचष्टइति णिच् ङल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम् ॥ * ॥ आख्यानात्कृदन्ताणिञ्चक्तव्यस्तदाचष्टइत्येतस्मिन्नर्थे, ङल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकं भवति । कंसवधमाचष्टे, कंसं घातयति । बलिबन्धमाचष्टे, बलिं बन्धयति । राजागमनमाचष्टे, राजानमागमयति ॥ आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम् ॥ * ॥ आरात्रिविवासमाचष्टे, रात्रिं विवासयति ॥ चित्रीकरणे प्रापि ॥ * ॥ उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं संभावयते, सूर्यमुद्गमयति ॥ नक्षत्रयोगे ञि ॥ * ॥ पुष्ययोगं जानाति, पुष्येण योजयति । मघाभिर्योजयति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ प्रथमस्तबकावशेषः ॥

यस्य च कालातीतस्यापि षड्भिरेव ऋतुभिर्भगवल्लीलौपयिकतयाप्राकृतैरपि प्राकृतैरिव भासमानैः कृतविभागाः षड्विभागाः ॥ ४८ ॥

यस्य वृन्दावनस्य षड्विभागाः सन्ति, कीदृशाः, षड्भिः, ऋतुभिः, कृता विभागाः प्रतिस्वं विशिष्य भागा येषां ते ॥ ४८ ॥

यथा वर्षाहर्षः शरदामोदो हेमन्तसंतोषः शिशिरसुखाकरो वसन्तकान्तो निदाघसुभगश्चेति ॥ ४९ ॥

तानेवाह, वर्षाहर्ष इति, वर्षाभिर्हर्षयिष्यति हर्षयतीति वा सः, सुखं करोतीति "सुखप्रियादानुलोम्ये" इति डाच् प्रत्ययान्तः, सुखानामाकर इति वा ॥ ४९ ॥

तेषु भगवद्भक्तियोग इव सततघनरसदः, ब्रह्मानन्दसाक्षात्कार इव सदा-नन्दच्चिररोचिः, पार्वतीविग्रह इव सदा समुत्कण्ठितनीलकण्ठः, न्याययन्थ इव सदात्यूहकोलाहलः, गरुत्वानिव सदा-सारङ्गरुतं बिभ्राणः, दिनकर इव विकासितककुभावलिः ॥ ५० ॥

तेषु विभागेषु मध्ये वर्षाहर्षो नाम विभागः कीदृशः, सततं घनं निबिडं रसं क्वणानुरागलक्षणं ददातीति सः, पक्षे घनरसो जलं, "मेघपुष्पं घनरस" इत्यमरः । सतामानन्ददं चिरं रोचिः प्रकाशो यत्र, पक्षे सदा नन्दन्ती, अचिररोचिर्विद्युच्च सः । नीलकण्ठो महेशो मयूरश्च । सदा, अत्यूहे,अतिशयतर्के विचारात् कोलाहलो यत्र सः, पक्षे दात्यूहकोलाहलेन सह वर्तमानः, दात्यूहो डाहुक इति ख्यातः पक्षी । गरुत्वान् गरुडः, सदासारं[1] सदाबलं गरुतं पक्षं बिभ्राणः, पक्षे सदा सारङ्गाणां चातकानां रुतं शब्दं पुष्णन् "सारङ्गश्चातके भृङ्गे" इति मेदिनी । ककुभानां दिशाम्, आवलिः श्रेणी "टापं चापि ङलन्तानां"मिति वचनाद् दिशा वाचेत्यादिवत् ककुभाशब्दोऽपि टाबन्तो दृष्टः, तथा च कश्यपः,

"भूमिपुत्रादयः सर्वे यस्यामस्तमिते रवौ ।
दृश्यन्ते ककुभायां वै ततोऽनिष्टं विनिर्दिशेत्" ॥

इति, पक्षे ककुभोऽर्जुनवृक्षः ॥ ५० ॥

लीलौपयिकतया लघुलघु निपतदम्बुकणनिकरनिरन्तरोत्पद्यमाननवमृदुलतृणाङ्कुरान् मरकतमणिशिलाकिरणाङ्कुरनिकुरम्बसंभालनया परितः परिहाय मरकतमणिभूमिष्वेव तत्किरणक्रन्दली[2]र्वास्यच्छेद्यशस्यधियाचामद्भिश्चमूरुचयैरभितोऽभितः शोभमानः ॥ ५१ ॥

लीलौपयिकतया, स्पृहणीयत्वेनेत्यर्थः,लघुलघु यथा स्यात् तथा निपतताम्बुकणानां निकरेण हेतुना निरन्तरमुत्पद्यमाना नवा मृदुलास्तृणाङ्कुरास्तान्,मरकतमणिशिलानां किरणाङ्कुरा एवैते नूनं भवन्ति न पुनस्तृणाङ्कुरा इति संभावनया सम्यग्दृष्ट्या निरूपणेन, परित इति वामतो दक्षिणतः पृष्ठतश्च, परित्यज्य,आचामद्भिर्भुञ्जानैः, यद्यैवाचमनमतृप्तिकरं तथैव तेषामवास्तवत्वादतर्पकत्वाद् भक्षणाभिनयमात्रमिति भावः,चमूरवो मृगभेदाः ॥ ५१ ॥

मृदुमृदु संचरदिन्द्रगोपनिकरैरितस्ततः सजीवैरिव क्रमलरागशकलैः कलितं, नवतृणाङ्कुरमयहरितपट्टकूर्पा-

---

१ सदा सारङ्गरुतमित्यर्थानुरोधात् सदासारं गरुतमित्यर्थेऽपि संधिरङ्गीकृतः । एवमग्रेऽपि यथासंभवमूह्यम् ।

२ वास्यच्छेद्येत्यादिवत् स्पष्टार्थाः शब्दाः प्रायो व्याख्यात्रा परित्यज्यन्त इति, एवमेवाग्रेऽप्यूह्यम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सकं भुवो वक्षसि निधापयन्निव लघुतरशीकरनिकरवाहिकदम्बपरिमलविमलजलधरानिलशीतलः स किल वर्षाहर्षो नाम ॥ ५२ ॥

मृदुमृदु यथा स्यात् तथा संचरद्भिरिन्द्रगोपसमूहैः, इन्द्रगोपा लोहितवर्णसूक्ष्मकीटविशेषास्तैः सजीवैः प्राणवद्भिरिव पद्मरागखण्डैः कलितं जटितं, नवतृणाङ्कुरमयं हरितं हरिद्वर्णं पट्टकूर्पासकं पट्टकञ्चुलिकां निधापयन्नर्पयन्निव,"चोलः कूर्पासकोऽस्त्रिया"मित्यमरः। लघुतरशीकरनिकरवाहिनेति मान्द्यं, कदम्बानां परिमलो यत्र तेनेति सौगन्ध्यं,विमलजलधरसंबन्धिनेति शैत्यमुक्तम् । तथाभूतेनानिलेन शीतलः स्निग्धोऽयं वर्षाहर्षो विभागः,नतु प्राक्तननिदाघवद्रूक्ष इति भावः ॥ ५२ ॥

किंच,

समुन्मिषितमालतीकुसुमसुस्मिता मेदिनी
कदम्बतरुकोरकैः पुलकिता वनानां ततिः ।
अजस्रगलदस्रभृद्घनपयःकणानां गणै-
रपि द्युरमणीसमं यदनुरागमातन्वते ॥ ५३ ॥

सम्यगुन्मिषितैर्विकसितैर्मालतीनां कुसुमैरेव शोभनं स्मितं यस्याः सा मेदिनी,तथा पुलकिता पुलकवती वनानां श्रेणी, तथा द्युरमणी द्यौरेव रमणी, साप्यजस्रं निन्तरं गलदस्रं बिभर्ति, कैः, घना मेघास्तत्संबन्धिपयःकणानां गणैः, यत्, यत्र वर्षाहर्षविभागे, समं तुल्यमेव, अनुरागं, स्मितपुलकाश्रूणां हर्षानुभावत्वात्, आतन्वते विस्तारयन्ति, तिस्रो मेदिनीवनततिद्युरमण्योऽनुरागिण्य इवोत्प्रेक्ष्यन्त इत्यर्थः ॥ ५३ ॥

किंच, यत्र,

पुरंदरधनुर्लतातिलकचारुभालस्थला
तडित्कनककेतकीदललसत्तमःकुन्तला ।
विलोलविसकण्ठिकाविमलमालभारिण्यसौ
नवोन्नतपयोधरा हरिमनोहरा दिग्वधूः ॥ ५४ ॥

दिग्वधूः, दिगेव वधूः, हरेर्मनोहरा, अपूर्वशोभयेत्यर्थः, पुरंदरधनुर्लतेव तदाकारं तिलकं तेन चारु सुन्दरं भालस्थलं यस्याः सा । तडितो विद्युत एव कनककेतकीदलानि तैर्लसन्ति तमांस्येव कुन्तलाः केशा यस्याः सा । विलोलाभिर्विसकण्ठिकाभिर्बकपङ्क्तिभिरेव विमलमालभारवती । "इष्टकेषीकामालानां चिततूलभारिष्वि"ति ह्रस्वत्वम् । "बलाका विसकण्ठिके"त्यमरः । पयोधरः स्तनो मेघश्च । "स्त्रीस्तनाब्दौ पयोधरा"वित्यमरः ॥ ५४ ॥

सारङ्गीकुलकाकुकर्षणविधेराश्वासवाङ्मानिनी-
मानक्षोदनपेषणीभ्रमिवलत्सुस्निग्धमन्द्रध्वनिः ।
नृत्यन्मत्तमयूरमौरजरवः प्राणेशविश्लेषिणी-
प्राणाकर्षणमन्त्रपाठनिनदो मेघस्वनः श्रूयते ॥ ५५ ॥

सारङ्गीकुलानां चातकीसमूहानां काकुभिर्वैक्लव्यव्यञ्जकध्वनिविकारैर्यः कर्षणस्य विधिर्विधानम्, आगत्यास्मान् शीघ्रं जीवयेति यत् प्रार्थनकरणं, तस्माद्धेतोः, आश्वासवाक्, औत्कण्ठ्येन मा विषीदथैषोऽहं वर्षामीत्येवमाकारेत्यर्थः । मानिनीनां मानस्य क्षोदनी पेषणी, तस्या भ्रमिश्चूर्णीकरणार्थं घूर्णनं, ततो हेतोर्बलन् सुस्निग्धो मन्द्रो गम्भीरश्च ध्वनिः । नृत्यतां मत्तमयूराणां मौरजो मुरजसंबन्धी रवः । प्राणेशात् स्वकान्ताद्विश्लेषवतीनां प्राणाकर्षणः प्राणनिष्काशको मन्त्रपाठस्य निनदः शब्दो मेघस्वनः श्रूयत इति । श्रूयमाणः सन्नेवमुत्प्रेक्ष्यत इति भावः ॥ ५५ ॥

कदाचिदपि यत्र ।

दात्यूहाः परितो रुवन्ति गणशः कोयष्टिकाः सर्वतो
मण्डूकाः प्रचलाकिनस्तत इतो धाराधरा व्योमनि ।
आसाराः पयसां झपज्झपदिति स्निग्धातिमन्द्रस्वराः
सर्वे मुग्धदृशां रतान्तसमये स्वापोत्सवं कुर्वते ॥५६॥

कोयष्टिकाः, टिटहीति ख्याताः, गणशो, गणे गणे स्वीये वर्तमाना इत्यर्थः, प्रचलाकिनो मयूराः, झपज्झपदिति वृष्टिशब्दानुकरणम् ॥ ५६ ॥

यत्र च ।

मध्ये गौरी परिणतफलैर्नम्रशालै रसालै-
रन्ते श्यामा रुचिभिरभितः पक्वजम्बूफलानाम् ।
प्रान्ते पाण्डुः स्फुटसुरभिभिः सूचिभिः केतकाना-
मुद्यानश्रीः स्फुरति विविधैर्वर्णकैश्चित्रितेव ॥ ५७ ॥

वर्णकैर्हरितालादिघटितैर्मध्ये गौरी पीतवर्णा, कुतः, परिणतानि पक्वानि फलानि येषां तैः, अत एव नम्राः शालाः स्कन्धशाखा येषां तैः,"स्कन्धशाखाशाले"इत्यमरः,एवंभूतैरसालैर्वर्षापरिणामिभिराम्रभेदैर्हेतुभिः । अन्ते तद्बहिर्मण्डले श्यामा । प्रान्ते प्रकृष्टेऽन्ते, सर्वतो बहिर्मण्डल इत्यर्थः, सूचिभिः सूचितुल्यैः पुष्पदलैः । अत्र, आम्राणां श्रेष्ठत्वान्मध्यस्थत्वं, जम्बूनां ततोऽवरत्वेन श्यामतया बहिष्ठत्वात् तदीयमरकतप्राग्वीरायमाणत्वं, केतकानां निष्फलत्वेनापकृष्टानां सूचितुल्यपुष्पदलतया शक्त्यस्त्रधारितदीयरक्षकगणायमानत्वमिति विवेक्तव्यम् ॥ ५७ ॥

द्वितीयस्तु भगवच्चरण इव कमलाकरलालितः, हरिभक्तजन इव निरवकरजीवनः परमनिर्मलाशश्च ॥५८॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वितीयः शरदामोदो नाम विभागः कमलायाः करास्यां लालितो मृदुमृदु संवाहितः, पक्षे कमलाकरैस्तडागैर्लालितो ललितीकृतः । निरवकरं निर्दोषं, जीवनं जीवितं जलं च यत्र सः, परमनिर्मला आशा भक्तिविषया दिशश्च यत्र सः ॥ ५८ ॥

वैकुण्ठनाथमिव विलसच्चक्रं प्रफुल्लपद्मं च, भगवतः पाण्डवदूत्यमिव समदधार्तराष्ट्रहेलितम्, अध्यात्मयोगमिव संचरत्परमहंसं, रामायणमिवाभिरामलक्ष्मणालापम् ॥ ५९ ॥

पुनः कीदृशः, परितो जलाशयम्, आ सम्यक्, दधानो धारयन्, पुष्णाविति वा । जलाशयमेव विशिनष्टि, चक्रं सुदर्शनं चक्रश्चक्रवाकपक्षी च, प्रफुल्ला प्रसन्ना लक्ष्म्यो यत्र, पक्षे प्रविकसितानि पद्मानि कमलानि यत्र तडागे । भगवतः श्रीकृष्णस्य पाण्डवदूत्यं भागवतप्रसिद्धं समदैर्धृतराष्ट्रपुत्रैर्दुर्योधनाद्यैर्हेलितमवज्ञातं, पक्षे मत्तानां धार्तराष्ट्राणां हंसविशेषाणां हेलितं हेला यत्र तं, "धार्तराष्ट्राः सितेतरैः," "हेला लीले"-ति चामरः । संचरत्परमहंस ईश्वरः, पक्षे संचरणशीलो राजहंसो यत्र, परमः श्रेष्ठो वा तम् । अभिरामो रामलक्ष्मणयोरालापो यत्र तं, पक्षे,अभिरामः कमनीयो लक्ष्मणायाः सारस्या आलापो यत्र तं, "हंसस्य योपिद्रटा सारसस्य तु लक्ष्मणे"त्यमरः ॥ ५९ ॥

भगवद्यश इव कुवलयामोदं, ज्वलनदिग्विभागमिव प्रभिन्नपुण्डरीकं,नैर्ऋतकोणमिव कुमुदमदामोदितमधुकरं, सायं समयमिव विलसद्रक्तसंध्यकं परितो जलाशयमादधानः ॥ ६० ॥

कुः पृथिवी तस्या वलयस्य मण्डलस्यामोद आनन्दो यतस्तत्,पक्षे कुवलस्य नीलोत्पलस्यामोदो गन्धो यत्र तम् । ज्वलनो वह्निः, प्रभिन्नो मत्तः पुण्डरीकस्तत्त्रामा दिग्गजो यत्र तं,"प्रभिन्नो गर्जितो मत्त" इत्यमरः, पक्षे प्रभिन्नानि विकसितानि प्रभेदयुक्तानि वा पुण्डरीकाणि यत्र तम् । कुमुदो नैर्ऋतकोणस्थो दिग्गजस्तस्य मदेनामोदिता मधुकरा यत्र तं, पक्षे कुमुदेषु मदामोदिता मधुकरा यत्र तम् । "ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजा"इत्यमरः । विकसन्ती विराजन्ती रक्तसंध्या यत्र तं, पक्षे विकसन्ति स्फुटन्ति रक्तसंध्यकानि यत्र तं, "हल्लकं रक्तसंध्यक"मित्यमरः ॥ ६० ॥

समरसमारम्भ इव विलसच्चन्द्रहासः, सत्यकाल इव पूर्णभावेन मदमुदितवृषविलासः, शरदामोदो नाम ॥ ६१ ॥

समरो युद्धं, चन्द्रहासः खड्गश्चन्द्रप्रकाशश्च, वृषो धर्मः पुंगवश्च ॥ ६१ ॥

यत्र च,

दुर्जनवचनोत्तप्ताः सुजना इव बहिरुष्णतामन्तः शीतलतां दधाना महाह्रदाः[1] ॥ ६२ ॥

उष्णतां कृत्रिमकोपं तप्तवर्णत्वं च, अन्तः शीतलतां दयां शीतत्वं च, दधानाः सुजना इव ह्रदा यत्र शरदामोदविभागे ताः ॥ ६२ ॥

यत्र च,

श्रीखण्डखण्डाङ्गरागा इव दिगङ्गनानां, पवनावधूतसितसिचयाञ्चलखण्डा इव नभोलक्ष्म्याः, वितत्यातपे दत्तानीव कर्तनीयतूलकानि पवनकन्यकानां, सिततरजलदशकलानि ॥ ६३ ॥

यत्र च सिततराण्यतिश्वेतानि जलदशकलानि मेघखण्डानि श्रीखण्डस्य चन्दनस्य खण्डभूता अङ्गरागा इव, उत्प्रेक्ष्यन्त इत्यर्थः । पुनस्तेषामाकाशमध्यगतत्वं चाञ्चल्यं च विलोक्यान्यथोत्प्रेक्षते । पवनेनावधूतानां चालितानां सितवस्त्राणामञ्चलखण्डा इवाकाशशोभाभूतायाः स्त्रियाः । पुनरपि लघूनामेव तेषां प्रतितन्तुं विस्तारमालोक्य ततोऽप्यन्यथोत्प्रेक्षते, कर्तनीयानि सूत्रनिर्माणयोग्या न, तूलकानि, कार्पासभवानीत्यर्थः । अत एव वितत्य विस्तार्य सूर्यातपे दत्तान्यर्पितानि पवनकन्यकानामिति । अत एव पवनेन पित्रा शोषणार्थमातपे स्वयमेव चाल्यमानानीत्यर्थः ॥ ६३ ॥

येषां च प्रतिबिम्बे तरणिदुहितुरम्भसि संभृतविलाससंभारे सति तस्या एव सलिलगतानि सैकतान्तराणीव, अथवा भगवदवगाहनसौभाग्यमिवासादयितुकामा सुरसरिदेव गर्भवासमाससादेति सकलैरनुमीयते ॥ ६४ ॥

येषां सितमेघखण्डानां प्रतिबिम्बे, कुत्र, तरणिदुहितुर्यमुनाया अम्भसि, तस्या एव यमुनाया एव, सैकतान्तराणि, वालुकामयपुलिनान्तराणीव लक्ष्यन्त इत्यर्थः । "सैकतं सिकतामय"मित्यमरः । मेघखण्डानां चाञ्चल्यात् प्रतिबिम्बानामपि प्रवाहवच्चाञ्चल्यमालोक्यान्यथोत्प्रेक्षते । अथवेति । आसादयितुकामा प्राप्तुकामा सुरसरिद्गङ्गा गर्भवासं यमुनाया गर्भे वासम् ॥ ६४ ॥

विकचकमलकह्लारहल्लकामोदमेदुरः सप्तच्छदसौरभदानगन्धिरन्धितपुष्पंधयोऽन्धकारितदिग्वलयः पवनमतङ्गजश्च यत्र परमामोदमातनोति ॥ ६५ ॥

[1] अत्र पुस्तकान्तरे व्याख्या नैवास्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विकचानां कमलादीनामामोदैर्गन्धैर्मेदुरः, "सान्द्रः स्निग्धस्तु मेदुर" इत्यमरः, सप्तच्छदः, छाइतन इति ख्यातो वृक्षः, तस्य सौरभेण दानगन्धिर्मदगन्धिः, "हस्तिनां मदो दान"-मित्यमरः। अत एवान्धिता व्याकुलीकृताः पुष्पंधया भ्रमरा येन सः, "नासिकास्तनयोर्धमाधेटोः, नाडीमुष्ट्योश्चेति" योगविभागात् खश् प्रत्ययः। "उन्मीलच्छिन्नकान्तिकेतकसमाकृष्टात्तिपुष्पंधय" इति कविकल्पलता। परममामोदं गन्धमानन्दं च ॥६५॥

कूजत्सारसकाञ्चिका मृदुनदत्कादम्बपादाङ्गदा
चक्राह्वस्तनमण्डला दरदलद्राजीवकोशानना।
नीलाम्भोरुहलोचना मधुकरश्रेणीभ्रमद्भ्रूलता
यत्राभाति परागरञ्जितवसना मूर्तेव देवी शरत् ॥ ६६ ॥

कादम्बः कलहंसः, दर ईषद्वलन् प्रस्फुटन् राजीवकोश एवानने यस्याः सा, पराग एव रञ्जि दृष्टिरञ्जकं वसनं यस्याः सा ॥ ६६ ॥

किंच,

या किल देवहूतिरिव कर्दमे प्रस्थिते कपिलास्यनिरीक्षणक्षणा ॥ ६७ ॥

कर्दमे श्रीकपिलदेवपितरि पद्भ्यं च प्रस्थिते प्रव्रजिते सति, पक्षे गते नष्टे सतीत्यर्थः, कपिलस्य स्वपुत्रस्य, पक्षे संचरन्तीनां कपिलानामास्यनिरीक्षणे मुखदर्शन उत्सवो यस्याः, पक्षे समयविशेषो यस्यां सा। "कालविशेषोत्सवयोः क्षण"इत्यमरः ॥ ६७ ॥

किंच,

स्थलकमलवनान्तः कौसुमं यस्य तल्पं
विमलबहलतारं व्योम मुक्तावितानम्।
विकसितचलकाशाश्चामराणां समूहः
स ऋतुरतुलकान्तिर्यत्र राजेव रेजे ॥ ६८ ॥

स ऋतुर्यत्र विभागे राजेव रेजे दीप्तिं चकार, कौसुमं पतितकुसुमदलमयं मुक्तावितानं मुक्तामयश्चन्द्रातपः, विकसिताः पवनेन चलाः काशाः काशपुष्पाणि ॥ ६८ ॥

किंच,

अत्याकृष्टा इव हरिदिभैर्व्योमवृक्षस्य शाखाः
प्रत्याक्रान्ता इव जलधरैर्नम्रतां याः समीयुः।
दूरं याताः किमिव हरितस्तैर्विमुक्ता इहेत्थं
वर्षाहर्षात् क्षणमुपगता यत्र तन्वन्ति तर्कम् ॥ ६९ ॥

वर्षाहर्षात् प्रदेशाद्यत्र शरदामोदे, उपगता जना इत्थमेवं तर्कमूहं तन्वन्ति, वर्षाहर्षे, आकाशस्य सर्वतो मेघावृतत्वाद्दिशां निकटवर्तित्वं हस्तप्राप्यमिव मत्वा, शरदामोदे तु तदभावाद्दिशां दूरवर्तित्वं लोचनाभ्यामप्यगम्यं परामृश्यैवमुत्प्रेक्षन्त इत्यर्थः। व्योमैव वृक्षस्तस्य शाखा हरिदिभैर्दिग्गजैरत्याकृष्टा इव, अत्यन्तमाकृष्याधः पातिता इवेत्यर्थः, याः शाखा जलधरैर्मेघैस्तेषां साहाय्यकारिभिरिव प्रत्याक्रान्ताः, उपर्यारुह्याक्रान्ता इव नम्रतां समीयुः प्राप्ताः। इह शरदामोदे तु हरितः, ता दिशः, किमिव दूरं याताः, यतस्तदीयैर्हस्तिभिर्व्योमवृक्षस्य शाखा न कृष्यन्त इति भावः। तत्र कारणमिव तर्कयन्तो विशिंषन्ति, तैर्जलधरैर्विमुक्ता इव,* तच्छाखाक्रमणार्थं तदुपरि मेघैरत्र नारुह्यन्ते, अतः साहाय्याभावात् स्वीयगजानामतिदूरस्थशाखाकर्षणाशक्तेर्निवृत्ता इत्यनुमीयत इति भावः ॥ ६९ ॥

अथ तृतीयोऽपि यत्र भीम इव महासहामोदमेदुरः, अर्जुन इव मधुसूदनप्रियसहचरः, महेश इवानुगतबाणः, कैलास इव सहावलोध्रः ॥ ७० ॥

यत्र विभागेषु तृतीयो हेमन्तसंतोषः, महत् सहो बलं यस्य सः, मोदेन हर्षेण स्निग्धः, इति पदद्वयं, पक्षे महासहा पुष्पविशेषवाची टाबन्तः, "अस्त्रानस्तु महासहा" इत्यमरः। मधुसूदनः श्रीकृष्णः, पक्षे मधुसूदनानां भ्रमराणां प्रियः सहचरः पीतझिण्टी यत्र सः, "इन्दिन्दिरश्चञ्चरीको रोलम्बो मधुसूदन"इति त्रिकाण्डशेषः, "पीता कुरण्टको झिण्टी तस्मिन् सहचरी द्वये"रित्यमरः। बाणो बलिपुत्रः, पक्षे नीलझिण्टी, "नीला झिण्टी द्वयोर्बाणा", इत्यमरः। अवलया भार्यया दुर्गया सह वर्तमानः, उः शंभुस्तं धरतीति सहावलोध्रः, पक्षे हाव उल्लासको भावविशेषः, सहावो लोध्रो वृक्षो यत्र सः ॥ ७० ॥

श्रीभागवतग्रन्थ इव मधुरशुकोदितः, आयुर्वद इव प्रवीणहारीतः, साधुसङ्ग इव सदामदलावः, भगवदुपासक इव क्रमशीतलीभवज्जीवनः ॥ ७१ ॥

मधुरश्चासौ शुकाद् व्यासपुत्रात्, उदित उदयं प्राप्तश्चेति स तथा, पक्षे मधुरं शुकानामुदितं कूजितं यत्र सः। हारीतस्तच्छास्त्रप्रवर्तको मुनिः, पक्षे हरिताल इति ख्यातः पक्षिविशेषः। मदमहंकारं लुनातीति सः, पक्षे सततमदयुक्तो लावः पक्षिविशेषो यत्र सः। "तित्तिरिः ककुभो लाव" इत्यमरः। क्रमेणोत्तरोत्तरप्राप्यमाणाधिक्येन भजनेन शीतेन च शीतलीभवन्ति जीवनानि जीवितानि जलानि च यस्य यत्र च सः ॥ ७१ ॥

* क्ताः, इति, इति पा०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अहरहरुपचीयमानदोषोऽपि निर्दोषः, पद्मिनीग्लानिकरोऽपि क्षणदादैर्घ्येण पद्मिनीमहोत्सवकरः, स खलु हेमन्तसंतोषो नाम ॥ ७२ ॥

अहरहः प्रतिदिनमुपचीयमाना वर्धमाना दोषा रजनी येन सः, टाबन्तो दोषाशब्दोऽनव्ययोऽप्यस्ति,

"ततः कथाभिः समतीत्य दोषा-
मारुह्य सैन्यैः सह पुष्पकं तु" ।

इति भट्टिप्रयोगात् । "प्रारम्भो दोषायाः प्रदोष" इत्यमरटीकासु प्रदोषशब्दव्याख्यानाच्च । पद्मिन्यः कमलस्तम्बाः, क्षणदा रात्रिः, पद्मिन्यः सल्लक्षणस्त्रियः ॥ ७२ ॥

यत्र,

नवदिनकरकिरणपरामर्शोन्मुखजनमनांसि दिवसमुखानि, अभिनवारुणकिरणनिकरनिपातधिषणतया हरिणरमणीभिः क्षणमुपसेव्यन्ते कुरुविन्दमणिमयधरणितलानि नोपगम्यन्ते च हिमकरकिरणनिकरधिया स्फटिकमणिशिलाविलासवीथयः ॥ ७३ ॥

दिवसमुखानि प्रभातानि, अभिनवानामरुणस्य सूर्यस्य किरणानां निपाते धिषणा निश्चयवती बुद्धिर्यासां तासां भावस्तत्ता तया हेतुना, उपसेव्यन्ते, शीतत्राणार्थमित्यर्थः, स्फटिकमणिमयीनां शिलानां विलासो यासु तथा भूता वीथयो भूमिप्रदेशाः पङ्क्तयो वा ॥ ७३ ॥

किं बहुना शीतभीतेनेव भगवता किरणमालिनापि दहनदिगुपकण्ठ एव सोत्कण्ठमालम्ब्यते ॥ ७४ ॥

उपकण्ठं निकटदेशः, कण्ठस्य समीपमुपकण्ठं तस्मिन्निति सप्तम्यन्ततया व्याख्याने भगवतापि परदारकण्ठे सोत्कण्ठमालम्ब्यत इति द्वितीयोऽपि विरोधो ज्ञेयः ॥ ७४ ॥

नवनवाङ्कुरनिकराकारकिरणक्रन्दलेषु मरकतमणिवीथीपरिसरेषु सचकितमभितोऽभितो निरीक्षमाणाश्चमूरुमण्यो यवाङ्कुरधियेव चरन्त्यो निरवधि व्रजचमूरुनयनानयनचमत्कारं कारयन्ते ॥ ७५ ॥

क्रन्दलं समूहः, "क्रन्दलं तु समूहे स्यादुपरागे नवाङ्कुरे", इति विश्वः, सचकितम्,अभितोऽभितः कर्षका अत्र सन्ति न वा सन्तीति निरीक्षमाणाश्चमूरवो मृगविशेषास्तेषां रमण्यः ॥ ७५ ॥

यत्र च,

क्रमाद्वानोरुष्मा हसति हिमयोगेन महता
वलन्ते वक्षोजद्वयपरिसरेष्वूष्मविभवाः ।
क्रमाद्वैर्घ्यं रात्रेर्भवति हसिमा वाम्यरहसो
वधूनां शीतार्तप्रियतमपरिष्वञ्जनविधौ ॥ ७६ ॥

वाम्यरहसो वाम्यसुरतस्य, "रहोऽतिगुह्ये सुरते चे"ति विश्वः, हसिमा ह्रस्वत्वं, "प्रे ह्रे वे"ति तिकारस्य संयोगपूर्वस्यापि लघुत्वं, प्रियतमेति प्रेमैवात्र हेतुरिति व्यज्यते ॥ ७६ ॥

कुरुवककुसुमानि केशपाशे-
ष्वलककुलेषु वहन्ति लोध्रधूलीः ।
स्रजमुरसि महासहाप्रसूने-
र्व्रजसुदृशो न मणीन्द्रमण्डनानि ॥ ७७ ॥

"अस्थानस्तु महासहा", "तत्र शेणे कुरुवक", इत्यमरः, न मणीन्द्रेति, तेषां शैत्यात् ॥ ७७ ॥

कालीयकालेपनमङ्गरागे
लीलागृहे केवलधूपधूमः ।
ताम्बूलमेलादिकटुप्रयोगं
नोष्णेतरो यत्र गुणो गुणाय ॥ ७८ ॥

कालीयकं कलम्बक इति ख्यातम्, उष्णेतरः शीतो गुणो यत्र न गुणाय किंतु दोषायैव ॥ ७८ ॥

अथ चतुर्थोऽपि यत्र,

सुहृत्समागम इव समुल्लसितबन्धुजीवः, विश्वकर्मेव कुन्दारोपितप्रभाकरः, भगवद्वैकुण्ठनाथ इव सर्वेदा-नवदमनकः, महावर्षागम इव समुल्लासितमरुवकामोदः ॥ ७९ ॥

चतुर्थः शिशिरसुखाकरः, बन्धूनां जीव आत्मा, पक्षे बन्धुजीवः पुष्पविशेषः । स्वदुहितुः संज्ञायाः कठोरतत्तेजःसंश्लेषदुःखदूरीकरणाय कुन्दे चक्रभमावारोपितः प्रभाकरः सूर्यो येन, पक्षे कुन्दपुष्पे,आरोपितां सम्यग्जनितां, कान्तिं करोतीति स तथा, "कुन्दश्चक्रभमौ माघ्ये",इति विश्वः । सर्वेषां दानवानां दमनं यस्मात् सः, पक्षे सर्वेदा नवानि दमनकानि दोना इति ख्यातानि यत्र सः । सम्यगुल्लासितो मरुभूमावपि बकानां हर्षो येन सः, पक्षे मरुवकस्यामोदः । "भवेन्मरुवकः पुष्पभिच्छल्यद्रुफणिझके,"इति मेदिनी ॥ ७९ ॥

मुनिसमाज इव समुदितभारद्वाजः, लङ्कासमर इव क्रमशो वर्धमानमानवासरः ॥ ८० ॥

भारद्वाजः भरद्वाजवंशः, भरद्वाजपक्षिसमूहश्च । "व्याघ्राटः स्याद्भरद्वाज" इत्यमरः । लङ्कायां समरो युद्धं, मानवो मनुवंशोद्भवो राघवश्च, आसरो राक्षसश्च, "क्रव्यादोऽस्रप आसर", इत्यमरः, क्रमशो वर्धमानौ तौ यत्र सः, पक्षे वर्धमानं मानं परिमाणं येषां तथाभूता वासरा दिवसा यत्र सः ॥ ८० ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दयितपद्मिनीवियोगनिर्विण्णतयेव कृतोत्तरापथप्रयाणेन सकलजनोपसेवितपादेन किरणमालिना विरोचमानः शिशिरसुखाकरो नाम ॥ ८१ ॥

दयिता पद्मिन्येव दयितपद्मिनी सल्लक्षणवती स्त्री तस्या वियोगेन निर्विण्णता किमतः परं गार्हस्थ्याश्रमेणेति निर्वेदस्तया हेतुनेव कृतमुत्तरापथे वैराग्यार्थमिव प्रयाणं येन तेन, ततश्च सकलजनैरुपसेविता निजपावित्र्यार्थमिव पादाः शीतनिवर्तकिरणा एवाङ्घ्रयो यस्य तेन किरणमालिना सूर्येण ॥ ८१ ॥

यत्र

अन्तर्वर्तमानमणिगणकिरणक्रन्दलैरिव ज्वलतः समुदित्वरैर्धूमायमानैर्ज्वलबाष्पैरलक्षितज्वलानि सरित्सरसीपल्वलानि धूमानुमितवह्निमत्तयेव झटित्यनासेवमानाभिर्हरिणतरुणीभिः सचकितमीक्ष्यमाणानि वासरमुखानि ॥ ८२ ॥

सरिदादीनि झटिति शीघ्रं न.आ.सम्यक् सेवमानाभिः, कुतः, धूमैरनुमितो वह्निस्तद्वत्तया,अलक्षितज्वलत्वात् सरिदादीन्येव वनानि वितर्क्य,एतानि वह्निमन्ति धूमेभ्य इत्येवमनुमायेत्यर्थः, झटित्यनेन पूर्वपूर्वसंचारे तत्र जलस्य दृष्टचरत्वस्मरणात् संदेहेन विशेषतो निभालनार्थं वासरमुखानि प्रभातानि निरीक्ष्यमाणानि, प्रकाशाकाङ्क्ष्येत्यर्थः ॥ ८२ ॥

यवसशिखरसमुदीर्णविमलमौक्तिकजालधिया निशानिस्यन्दितुहिनकणपटलानि भगवता विभावसुनापि निजकोमलकरायेण ह्रियमाणानि यत्र दिवसमुखेषु मुहूर्तादेव विरलायन्ते ॥ ८३ ॥

यवसानां तृणानां शिखरेषु समुदीर्णानि विमलानि मौक्तिकजालान्येवैतानि, इति धिया निशायां निस्यन्दितुं शीलं येषां तानि हिमकणवृन्दानि, भगवतापि विभावसुना सूर्येणापि, श्लेषेण धनवतापि, बिभेत्यनेन प्रकाशत्वात् सम्यङ्निभालयितुं शक्नुवता, कराः किरणा एव करास्तदर्थेन, निजेत्यतिलोभात्, नष्यन्त्वरेत्यर्थः, कुत एतदवसीयते, तत्राह, यत्रेति, दिवसमुखेष्वेव रात्रौ तु सम्यक् स्थितानीत्यर्थः, मुहूर्तादेवेति, तत्रापि चैर्यकर्मणि दक्षतेति भावः ॥ ८३ ॥

घनतरदलनिकरविस्तारतया निरस्तहिमनिपातचटुलविटपिनिकरतलमध्यमध्यास्य मन्थरमभ्यस्यमानरोमन्थमधुरैरतीतशीतभीतिभिरभितः कृष्णसारनिकुरम्बैरतिरमणीयाश्च यत्र वासरान्ताः ॥ ८४ ॥

घनतरा अतिनिबिडा दलनिकरा यत्र तथाभूतो विस्तारो येषां तद्भावेन हेतुना निरस्तो हिमानां निपातस्तेन चटुलाः श्लाघनीया विटपिनिकरा वृक्षसमूहास्तेषां तलमध्यमध्यास्य तत्रोपविश्य मन्थरं यथा स्यात् तथाभ्यस्यमानेन रोमन्थेन मधुरैर्दर्शनीयैरित्यर्थः, "चटुलः सुन्दरे चले" इति धरणिः। निगीर्णघासादीनां पुनः सम्यक् चर्वणं रोमन्थः ॥ ८४ ॥

परितप्रायःपिण्डप्रकाण्डसदृशतरणिबिम्बविनिपातजलधिजलोद्भूतबाष्पैरिव तुहिनकणैर्मलीमसेभ्यो दिशां मुखेभ्यः स्वस्वनिवासोन्मुखमुखरखगनिकरवितततनभस्तलानि निशामुखानि ॥ ८५ ॥

परितप्तमयःपिण्डप्रकाण्डं श्रेष्ठ लोहपिण्डं, "प्रकाण्डमुद्दृतल्लजौ प्रशस्यवाचकानी"त्यमरः, "प्रशंसावचनैश्चे"ति समासः, तत्सदृशस्य तरणिबिम्बस्य सूर्यमण्डलस्य निपातेनैव हेतुना जलधिजलेभ्य उद्भूतैर्बाष्पैरूष्मभिरिवोत्प्रेक्ष्यमाणैर्हिमकणैः स्वस्वनिवासान् प्रत्युन्मुखैर्मुखरैस्तदा गमनकाले कूजद्भिः खगनिकरैर्व्याप्तं नभस्तलं येषु तानि ॥ ८५ ॥

परितश्च,

विनमदतिघनकिसलयनिकरसमासङ्गसङ्गतोष्मकुलायकुलकल्पस्थलविशेषकृतसुखशयनानां निष्कूजस्तिमितैस्तरुभिरतिरम्याः शीतभिया चक्रोरैरप्यनभिपेव्यमाणशशधरकान्तिकन्दलीकाः क्षणदाः ॥ ८६ ॥

विशेषेण नमतामतिनिबिडानां किसलयनिकराणां समासङ्गेन हेतुना संगतः प्राप्त ऊष्मा यत्र तथाभूतः कुलायकुलकल्पो नीडसमूहसदृशः स्थलविशेस्तत्र कृतं सुखेन शयनं यैस्तेषां खगमिथुनानां, "स्त्रीपुंसौ मिथुन"मित्यमरः,निष्कूजं शीतनिवर्तकोष्मसुखानुभवेन कूजनाभावः,निर्मक्षिकमितिवत् समासः,तेन हेतुना तत्सुखज्ञापनोत्थस्वानन्तरसेन स्तिमितैरव्याकुलत्वेनार्द्रैः खगवत्सलैस्तरुभिः[2] ॥ ८६ ॥

किंच,

गाढालिङ्गनरङ्गमेव शयनं मानोऽपमानं गतो
दीर्घैव प्रियसंकथा न रजनी क्षीणेति निद्रायहः।
आलेपः परिरम्भणव्यवहितेः कर्तेति दूरे प्रियः
स्पर्शोष्मा प्रिययोः स यत्र शिशिरः कालोऽप्यतिप्रेमदः ॥ ८७ ॥

रजनी न क्षीणा, इति हेतोर्निद्रायामग्रहः,न ग्रहः,आग्रहो नास्तीत्यर्थः. आलेपः कुङ्कुमादिसंबन्धी दूरे त्यक्त इत्यर्थः,

---

१ लिपितोऽपि यमकप्रतीत्यर्थं संगत इत्यत्र सपरसवर्णः सङ्गत इत्येवं मुद्रित इति ।

२–स्तिमितैः खग इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुतः,परिरम्भणस्य व्यवहितेव्यवधानस्य कर्ता, इति हेतोः, ततश्च प्रिययोः स्त्रीपुरुषयोर्गाढालिङ्गनेन स्पर्शं य ऊष्मा स एव प्रियः ॥ ८७ ॥

नहि भवति तदानीं संभवो दैवगत्या
क्व नु दिनमणिभासो गोचराः पद्मिनीनाम् ।
तदपि कुतुकयोगादावलिः पद्मिनीना-
मुषसि भजति यस्मिन् पृष्ठतः सादरं ताः ॥ ८८ ॥

तदानीं पद्मिनीनां पद्मस्तम्बानां संभवो जन्मैव न भवति, क्व नु पुनर्दिनमणेः स्वनायकस्य सूर्यस्य भासः किरणास्तासां गोचराः, स्युरित्यर्थः, तदपि तथापि, यस्मिन् शिशिरसुखाकरे पद्मिनीनां सल्लक्षणस्त्रीणां श्रेणी,उषसि प्रभाते ता दिनमणिभासः पृष्ठदेशेन सेवत इत्याश्चर्यम् ॥ ८८ ॥

कचभरमधि बन्धुजीवमाला
दमनकपल्लवबल्लभोऽवतंसः ।
उरसि च नवकुन्दकोरकाणां
स्रगिति वधूर्न दधे मणीन्द्रभूषाम् ॥ ८९ ॥

दमनकपल्लव एव वल्लभो यत्र सः ॥ ८९ ॥

अथ पञ्चमोऽपि यत्र,

प्रियसंयोग इवाभिनवोत्कलिकाकुलरसालः, भगवत्तत्त्वज्ञानाभ्यास इव सदोच्छ्वसदतिमुक्तः, भगवद्भक्त इव प्रफुल्लरक्ताशोकः, शास्त्रार्थ इव नवस्तवकोविदारः ॥ ९० ॥

पञ्चमो वसन्तकान्तः, अभिनवानामुत्कलिकानामुत्कण्ठानां समूहेन रसालः सरसः, पक्षे, अभिनवमुद्गतानां कलिकानां कुलं यत्र तथाभूतो रसाल आम्रवृक्षो यत्र सः । उच्छ्वसन्तः प्रेमानुभावरूपोच्छ्वासवन्तः, अतिमुक्ता मुक्तानपि महिम्नातिक्रान्ता भक्ता यत्र सः, पक्षे,उच्छ्वसन्तोऽतिमुक्ता माधव्यो यत्र सः । प्रफुल्लश्च रक्तश्च भगवत्यनुरागी,अशोकः शोकरहितश्चेति कर्मधारयः, पक्षे प्रफुल्लो रक्ताशोको यत्र सः । नवो नवीनः स्तवः श्लाघा येषां तथाभूतानां कोविदानामारो गमनं प्रवेशो यत्र सः, पक्षे नवस्तवको नूतनमुकुलयुक्तः कोविदारः काञ्चनार इति ख्यातो वृक्षो यत्र सः ॥ ९० ॥

महासमरसमावेश इव प्रभिन्नपुंनागनिकरः, मत्त इव मधुरसामोदमन्दारः, रघुनाथसेनासंनिवेश इव विलङ्कत्कपिकः, जीव इव संसारसुखलवं गत्वामोदितः[1] ॥ ९१ ॥

प्रभिचानां मत्तानां पुंनागानां पुरुषहस्तिनां समूहो यत्र सः, "प्रभिचो गर्जितो मत्त" इत्यमरः, पक्षे विकसितानां प्रभेदवतां वा पुंनागवृक्षाणां निकरो यत्र सः । मधुनो रसस्यामोदेन मन्दमियर्ति गच्छतीति सः, पक्षे मधुरः सामोदो मन्दारवृक्षो यत्र सः । विलसन्तः कपयो वानरा यत्र सः, पक्षे विलसत् कं सुखं येषां तथाभूताः पिकाः कोकिला यत्र सः, "सुखशीर्षजलेषु क"मिति विश्वः, । संसारेषु संसृतिषु सुखलवं सुखलेशं गत्वा प्राप्यामोदित आनन्दयुक्तः, पक्षे सम्यक् सारं सुखं यस्मात् तथाभूतं लवङ्गं यत्र सः संसारसुखलवङ्गो वसन्तः स्वयमेव, तस्य भावस्तत्त्वं तेनामोदितः सुगन्धियुक्तः ॥ ९१ ॥

इक्ष्वाकुवंश इव सदावलमानवकुलः, स्वरसमूह इव स्फुटसप्रलापः, दानप्रवाह इव प्रभिन्नकरीरः, रागीव सदा-मन्दकुसुमाशुगो वसन्तकान्तो नाम ॥ ९२ ॥

सदावलं मानवकुलं मनुवंशसमूहो, मनुष्यसमूहस्तत्तत्प्रजारूपो वा यत्र सः, पक्षे सदा वलमानानि वकुलानि यत्र सः, वलतिरयं शानच्प्रत्ययान्तः । स्फुटाः स्पष्टाः सप्तभिर्नैपादाद्यैरेव लापा आलापा यत्र सः, पक्षे स्फुटां प्रफुल्लां सप्तलामाप्नोतीति सः, "सप्तला नवमालिके"त्यमरः । प्रभिचकरिभ्यो मत्तहस्तिभ्य ईरति गच्छति स्रवतीति यावत्, पक्षे विकसितकरीरवृक्षः । अमन्दः कुसुमाशुगः कामो यस्य सः, पक्षे मन्दः कुसुमसंबन्धी वायुर्यत्र । "आशुगो वायुविशिखा" वित्यमरः ॥ ९२ ॥

यत्र हि,

हिमविगमविमलतयामृतकरोऽपि मृतकरोपितप्राण इव परिरभते मधुरजनीर्मधुरजनीः ॥ ९३ ॥

अस्य विशेषतः कामोद्दीपनत्वं वर्णयति, अमृतकरश्चन्द्रः, श्लेषेण, अमृतमयहस्तः सन् मधुरजनीर्वसन्तरात्रीः, श्लेषेण मधुरा वधूः, "समाः क्षपाजनीवध्व"इत्यमरः, परिरभते, आलिङ्गति, कीदृशीः, मधुरा जनिरुत्पत्तिर्यासां ताः, मृतकेष्वपि रोपिताः प्राणा येनेति, सर्वैसुखदायीत्यर्थः ॥ ९३ ॥

मधुराका मधुरा-काशते ॥ ९४ ॥

मधोर्वसन्तस्य राका पूर्णचन्द्रा रात्रिर्मधुरा सती काशते प्रकाशते, अत्र मधुराका मधुराकेति चतुर्भिरक्षरैर्यमकम् । एवमुपरिष्टादपि चतुष्पञ्चादिभिर्ज्ञेयम् ॥ ९४ ॥

का-मधुरा-का-मधुरारामरामणीयकवती न भवति ॥ ९५ ॥

का का मधुरा कामिनी, मधुरेष्वारामेषु रामणीयकवती रमणीयत्ववती न भवति, अपितु सर्वैवेत्यर्थः, रामणीयकस्य सनातनत्वेऽप्यत्राधिक्यविवक्षया कथनम् ॥ ९५ ॥

यत्र च,

१ देवकुसुमपक्षे लवङ्ग इति पदे परसवर्णोऽनुसंधेयः,एकपदत्वात् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शीलितकुसुमोपवनः पवनः सेवितारामा रामाः समदास्तरुणास्तरुणा कुसुमितेनामितेनानिशविहारा विहाराः ॥ ९६ ॥

तत्र हेतुं वर्णयति,शीलितं पुष्पोद्यानं येन तथाभूतः पवनः,अत एव रामा व्रजतरुण्योऽपि सेवितारामाः,पुष्पचयनच्छलेन प्राप्तोपवनाः, अत एव तरुणा युवानः समदाः, अत्र वर्णनीयस्य यूनः श्रीकृष्णस्यैकत्वेऽपि बहुत्वं प्रकाशबाहुल्यापेक्षयेति ज्ञेयं, कीदृशाः, तरुणा वृक्षेण कुसुमितेन पुष्पितेन,अमितेनापरिमितेन हेतुना,अनिशं विहारो येषां ते, अत एव विहारा विगलितहाराः,विशिष्टहारा इति वा ॥ ९६ ॥

कुसुमरजःपूर्णा अपि दिगवला गवलाभा मधुकरैर्नीरजसो नीरजसोत्कण्ठैरपि ॥ ९७ ॥

कुसुमानां रजोभिः पूर्णा अपि नीरजसो निर्मलाः, अत एव तद्गन्धेन बलादाकृष्यमाणत्वान्नीरजेषु सोत्कण्ठैरपि मधुकरैर्दिगवला दिगङ्गना एव गवलाभाः, गवलं शुषिरभेदः,श्यामत्वचिक्कणत्वाभ्यां तदाभाः,न तु सरांसि गवलाभानीत्यर्थः, "गवलं माहिषं शृङ्ग"मित्यमरः,व्यवधानेनापि विरोधो यमकानुरोधादेव ॥ ९७ ॥

मकरन्दकरन्ददानान्[1]पिन-पिवति कुसुमसमूहान् समूहान् मधुकरनिकरो निकरोति मत्ततयाततया प्रकामकामहेलालसमहेलालसदाननगन्धेन ॥ ९८ ॥

मकरन्दरूपं करं ददानान् प्रयच्छतोऽपि कुसुमसमूहान् न पिबति, प्रत्युत निकरोति, तिरस्करोतीत्यर्थः,"निकरः स्यात् परिभवे,"इति धरणिः,तेन मधुकरनिकरस्य राजकीयपुरुषत्वं वसन्तस्य राजत्वमारोपितं,कीदृशान्, समूहान्, सम्यगूहः कथमस्माकं मकरन्दं न गृह्णाति किमपराद्धमस्माभिरित्येवंलक्षणस्तर्को येषां तान्, प्रकामं यथा स्यात् तथा कामहेला कामसूचकभावविशेषस्तया, सज्जृम्भतयालसानां सालसतामभिनयन्तीनां, महेलानां महिलानां, लसता,आननगन्धेन,या मत्तता तया, आततया विस्तृतया । "महेला महिला चे"ति द्विरूपकोशः ॥ ९८ ॥

यत्र च,

किंशुकचञ्चवः किं-शुकचञ्चवः किममी वनान्ता इत्यसंपलाशपलाशविपिनमनुतर्कयन्ति चञ्चरीकाः ॥ ९९ ॥

किंशुकानां कीराणां चुञ्चवः, "चञ्चुश्चुञ्चुस्तलस्ताल" इति द्विरूपकोशः, किममी वनान्ता वनप्रदेशाः, कीदृशाः, किंशुकैः पलाशैः ग्रथिताः, "तेन वित्तश्चुञ्चुप्चणपा"विति चुञ्चुप् प्रत्ययः,इति संदेहेन, असंपलाशं सम्यक् पत्ररहितं पलाशविपिनं, चञ्चरीका भ्रमराः ॥ ९९ ॥

किं बहुना,

माकन्दानां कलितकलिकास्वादनः कोकिलोऽयं
चञ्चच्चञ्चुर्यदयमनदत् कण्ठमूलं धुनानः ।
यासीभूतः सह कलिकया यच्च लब्धावकाशो
मूर्तो नादः कुहुरिति बहिर्याति यच्च द्विरेफः ॥ १०० ॥

माकन्दानामाम्राणां कलितं क्षुतं कलिकानामास्वादनं येन सः, तदैव स्वप्रतिवादिकोकिलनिनदमाकर्ण्य यदयमनदत् कूजितवान्, चञ्चन्ती चञ्चुर्यस्य सः, कण्ठमूलं कम्पयन्, ततश्च कलिकया सह यासीभूतो यासत्वं प्राप्तो द्विरेफो लब्धावकाशः सन् बहिर्याति, कीदृशः, कुहुरिति नादो मूर्तो मूर्तिमत्त्वेनोत्प्रेक्षित इत्यर्थः, "कुहूः, स्यात् कोकिलालापनष्टेन्दुकलदर्शये।" रिति मेदिनी, "कुहूर्दीर्घान्ता ह्रस्वान्ता चे"त्यमरटीका, तेन भ्रमरस्य मुकुललग्नस्य कोकिलागमनाननुसंधानं कोकिलस्यापि भ्रमरोऽयं न कलिकेत्यवधानेऽप्यसामर्थ्यं, तथा यासमुखत्वेऽप्युच्चैः कूजनं च मत्तत्वयैवेति ज्ञेयं, यत्र वसन्ते ॥ १०० ॥

किंच,

मदकलकलकण्ठकण्ठघण्टा-
ध्वनिनिकरानुमितस्वतन्त्रचारः ।
प्रतिसरति स यच्च मत्तरामा-
कलकलदः स्मरगन्धसिन्धुरेन्द्रः ॥ १०१ ॥

कलकण्ठाः कोकिलाः, स्वतन्त्रचारः स्वच्छन्दगामी, स्मर एव गन्धसिन्धुरेन्द्रो महामत्तदुर्दान्तहस्तिवर्यः ॥ १०१ ॥

पुंनागैरवतंसनं विदधती वासन्तिकाभिः स्रजं
गुच्छार्धे बकुलैर्ललाटफलके सिन्दूरकं किंशुकैः ।
चाम्पेयैः कुचकञ्चुकं कटितटे शोणाम्बरं चञ्चुलै-
र्नित्यं मूर्तिमती सती विजयते श्रीर्यच्च पौष्पाकरी ॥ १०२ ॥

गुच्छार्धं हारभेदं, "हारभेदा यष्टिभेदा गुच्छगुच्छार्धगोस्तनाः" इत्यमरः, चञ्चुलैरशोकैः, पुष्पाकरो वसन्तस्तदीया ॥ १०२ ॥

स्मितकुसुमजुषो मरन्दबाष्पाः
प्रविलसदङ्कुरजातरोमहर्षाः ।
निरवधि किल यच्च भावबत्यो
वनलतिकाः कति-का न संलसन्ति ॥ १०३ ॥

का वनलतिकाः कति न संलसन्ति ॥ १०३ ॥

अथ षष्ठोऽपि यत्र,

---

१ लिपितोऽपि यमकसौष्ठवप्रतीत्यर्थं मकरन्दकरं ददानानित्यर्थेऽपि पदविभागमनादृत्य परसवर्णोऽङ्गीकृतः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काश्मीरदेश इव सततोत्पद्यमानतया सुरभितया च विलसत्कपीतनः, कासार इव प्रफुल्लमल्लिकाद्यालितः, शरत्काल इव संपन्नपाटलः, नाक इव सदोत्फुल्लशक्रः ॥ १०४ ॥

षष्ठो निदाघसुभगः, विलसत् कं सुखं यस्मात् तथाभूतं पीतनं कुङ्कुमं यत्र सः, "अथ कुङ्कुमं, काश्मीरजन्माग्निशिखवरवाह्लीकपीतन"मित्यमरः, पक्षे विलसन् कपीतनः, शिरीषो यत्र सः, "शिरीषस्तु कपीतन"इत्यमरः । प्रफुल्लैर्मल्लिकाद्यैर्हंसभेदैरलितः शोभितः, "अल भूषणे" धातुः, "मल्लिनैर्मल्लिकात्तास्ते" इत्यमरः, पक्षे प्रफुल्लाभिर्मल्लिकाभिः बालितः शोधितः । पाटलः शरद्भवधान्यविशेषः, "आशुव्रीहिः पाटलः स्या"दित्यमरः, पक्षे पाटला पुष्पभेदः, । शक्र इन्द्रः कुटजवृक्षश्च, "अथ कुटजः शक्रो वत्स"इत्यमरः ॥ १०४ ॥

कमलाकर इव स्फुटत्तरशतपत्रकः, पर्वतगतबह्न्यनुमानप्रयोग इव नियतधूम्याटः, प्रह्लादान्वय इव प्रचण्डविरोचनः, वैष्णवजन इव स्पृहणीयविधुपादः ॥ १०५ ॥

शतपत्रं कमलं शतपत्रकः पक्षिविशेषश्च, "अथ स्याच्छतपत्रकः । दार्वीघाट" इत्यमरः । नियतामव्यभिचरितां धूम्यां धूमसमूहम्, अटति गच्छति, अनुसंधत्त इति यावत्, समूहार्थे यत् प्रत्ययः, पक्षे नियतो धूम्याटः पक्षिविशेषो यत्र सः, "कलिङ्गभृङ्गधूम्याटा"इत्यमरः । विरोचनः प्रह्लादपुत्रः सूर्यश्च । विधुर्विष्णुश्चन्द्रश्च, पादश्चरणः किरणश्च ॥ १०५ ॥

ईश्वर इवाखण्डनमज्जनसुखः, साधुजनसङ्ग इव क्रमहीयमानदोषावसरः, हरिभक्त इव सदानुकूलजगत्प्राणः, पुण्यवान् जन इव भद्रश्रीरसविलाससुखो निदाघसुखदो नाम ॥ १०६ ॥

अखण्डं पूर्णं नमतां जनानां सुखं यस्मात् सः, पक्षे न विद्यते खण्डनं यस्य तथाभूतं मज्जने सुखं यत्र सः । क्रमेण हीयमानः क्षीयमाणो दोषाणां वैगुण्यानां रात्रीणां चावसर उद्गमः क्षणश्च यत्र सः । सदानुकूला जगतां प्राणा यत्र सः, तथाचोक्तं,

"येनार्चितो हरिस्तेन तर्पितानि जगन्त्यपि ।
रज्यन्ति जन्तवस्तत्र स्थावरा जङ्गमा अपि" ॥

इति, पक्षे जगत्प्राणः पवनः, "जगत्प्राणसमीरणा"इत्यमरः । भद्रा श्रीरविच्छिवा संपत्तिस्तया रसविलासात् शृङ्गारादिविलासात् सुखं यस्य सः, भद्रश्रीरसश्चन्दनद्रवः, "भद्रश्रीश्चन्दनोऽस्त्रिया"मित्यमरः ॥ १०६ ॥

यत्र च,

घनघर्मजनितमर्मबाधया सर्वतः पलायमानेनेव शैत्यगुणेन व्रजपद्मिनीजनस्तनदुर्गाश्रय एव केवलं विधीयत इव[1] ॥ १०७ ॥

यत्र च,

तरवो वीरुधश्च निदाघपीडिता इव निरन्तरमन्योन्यं लघुलघु विचलद्भिः किशलयव्यजनैः सदयं वीजयन्तीव निजनिजघनविटपच्छाययाच्छाद्य शिशिरीकृतेन मणिमयालवालसलिलेन कृपाप्रपामिवोपकल्प्य परमातिथ्यकुशला इव खगमृगकुलस्य पिपासानिरासाय यतन्ते विश्रमयन्ति च पुण्यवत्स्विव सदाच्छायेषु निजतलेषु ॥ १०८ ॥

कृपाप्रपां कृपया पानीयशालिकां यतन्ते, तरव इति पूर्वस्यैवानुषङ्गः, विश्रमयन्ति विगतश्रमं कुर्वन्ति, विभक्तिविपरिणामेन खगमृगकुलमेव, छाया कान्तिरातपाभावश्च ॥ १०८ ॥

यत्र च,

खरतरदिनमणिकिरणानुविद्धदिनमणिमणिपटलसमुद्घटितदहनदाहनिर्वापणचणमणिमयविहारशिखरिशिखरनिःस्यन्दमानशिशिरतरनिर्झरजलप्रपातशीतलेषु घनतरविटपिविटपनिवारितवासरमणिमयूखजालेषु वनपथेषु परस्परकरासङ्गभङ्गिमरङ्गवत्यो क्वणक्वणायमानमणिनूपुरनिनदसरसं तादृश्यपि निदाघे वसन्तकाल इव सकुतुकं खेलन्ति व्रजदेव्यः ॥ १०९ ॥

खरतररतितीक्ष्णैर्दिनमणिकिरणैरनुविद्धेभ्यो दिनमणिमणिपटलेभ्यः सम्यगुद्घटितो यो दहनादिव दाहस्तस्य निर्वापणचणैर्निर्वापणेन प्रशस्तैर्मणिमयविहारपर्वतशिखराच्चिःस्यन्दमानैः शिशिरतरैर्निर्झरसंबन्धिजलप्रपातैः शीतलेषु ॥ १०९ ॥

यत्र च,

दिवसकरकरनिकरज्वालजटालतया विषमविषधरनिश्वासा इव करालतराः स्वयमेव स्वस्वमेवोत्तापयन्तः संततमनिर्वृता इव प्रतिसलिलाशयं मज्जन्तोऽपि चात्मानं निर्वापयितुमसमर्था इव व्रजपद्मिनीजनस्तनपरिमलमिलनार्थमिवोपसर्पन्ति शीतला भवितुमनिलाः[2] ॥ ११० ॥

यत्र च,

१ न व्याख्यायि गद्यं सुस्पष्टतयैवेतदिति ।

२ परित्यक्तं गद्यमिदं स्फुटार्थतयैव व्याख्यातम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दिवसादिव साध्वसात् क्षणदाप क्षणदापतिरुचिरा रुचिरामणीयकं जनानां तदा तदासङ्गेन ते निदाघमेव श्लाघन्ते ॥ ११० ॥

यत्र च निदाघे क्षणदा रात्रिः क्षणदापतिना चन्द्रेण रुचिरा सती रुचिरामणीयकं रोचकत्वेन रमणीयत्वप्राप प्राप्नवती, तत्र हेतुमुत्प्रेक्षते, जनानां दिवसादिव घर्मदुःसहाद्दिनादिव साध्वसाद्भयात्, तद्विलोक्य कृपया निवारयितुमित्यर्थः, तदासङ्गेन तस्यां रात्रावासक्त्या तच्छैत्यसुखानुभवजनितया निदाघमेव धन्योऽयं निदाघसमयो यत्रैवैतादृशी रात्रिरिति श्लाघन्ते॥ १११ ॥

कर्पूरत्वसरेणुबन्धुभिरपां निस्यन्दिभिर्विन्दुभि-
श्चञ्चच्चामरचारुमारुतधुतैर्मुक्ताविताने रपि ।
आकीर्णे जलयन्द्रवेश्मनि सरोवाप्यादिमध्यस्थिते
कृष्णो यच मुदा निदाघदिवसे शेते समं कान्तया ॥११२॥

कर्पूराणां त्वसरेणुबन्धुभिः सूक्ष्मकणसहितैरपां बिन्दुभिर्निःस्यन्दिभिर्निततरां स्रवद्भिर्मुक्तामयैर्वितानैश्चाकीर्णे व्याप्ते, तेर्द्रयैः कीदृशैः, चञ्चतां चञ्चलानां चामराणां चारुणा मारुतेन धुतैः कम्पितैः ॥ ११२ ॥

भालप्रान्तनिबद्धकुन्तलभरो मुक्ताम्रजा स्थूलया
वासः काञ्चनवारिहारि पवनस्यन्दानुमेयं दधत् ।
मल्लीकोरकमालया दृततरश्रीखण्डपङ्केन च
द्विचेण प्रियमण्डनेन च कृताकल्पो हरिः खेलति ॥११३॥

भालस्य प्रान्ते निबद्धो द्विधा विभक्तः कुन्तलभरो यस्य सः, वास उत्तरीयं पवनस्य स्यन्देन चलनेनानुमेयमनुमातुं शक्यं नान्यथेति,अतिसूक्ष्मत्वात्, काञ्चनजलमिव हारि मनोहरं, द्विचेणेति, बहुतराणां धारणासहनात्, तत्रापि प्रियेति, स्वतः शैत्यगुणकेनेत्यर्थः ॥ ११३ ॥

कर्णालंकरणं शिरीषकुसुमैरुत्तंसनं पाटले-
र्मालां मल्लिभिरङ्गदादि कुटजैः संपादयन्त्यात्मनः ।
आलीभिर्वनराजिभिः सह सदृभूषाभिरीशाङ्गयः
सेव्यन्ते दिवसावसानसमये यस्मिन् निदाघश्रिया॥११४॥

उत्तंसनं शिरोभूषणम् ॥ ११४ ॥

एवं द्वन्द्वशो द्वन्द्वशश्च ऋतुभिर्विभेदिता अपरेऽपि त्रयो विभागा इति नवकाननमेव वृन्दावनं, मूलभूतं तु षड्भिरेव ऋतुभिरुपशोभितमित्यङ्गाङ्गिभावेन दशविभागमिति ॥ ११५ ॥

एवं वृन्दावनस्य षड्विभागान् वर्णयित्वा अपरमपि विभागचतुष्कं तत्तद्गुणेनैव वर्णितप्रायमुट्टङ्कयति, द्वन्द्वशो द्वन्द्वश इति, अत्र शसैव वीप्सावगतौ द्विर्वचनं नोपपद्यत इति न वाच्यम्,एकैकशो देहीत्यादौ द्विर्वचनेनैव तदवगतौ पुनः शस्प्रत्ययदर्शनात्,तथा ह्युक्तं न्यासकारेणापि,"भोजंभोजं व्रजतीत्यादौ द्विर्वचनसापेक्षेणैव णमुला पापच्यत इत्यादौ द्विर्वचननिरपेक्षेणैव यङाभीक्ष्ण्यमुच्यते, यथा ह्येक एव भारः कदाचिदेकेनैव केनचिद्वह्यते कदाचिदन्यसापेक्षेणैव केनचि"दिति । द्वन्द्वशो द्वन्द्वशो द्वयेन द्वयेन कृत्वा, ऋतुभिः शरदादिभिर्विभेदिता विभेदं प्रापिताः,यथा शरद्वैमन्तयोर्वर्णितत्वल्लक्षणवत्त्वेन शरद्वैमन्तसंज्ञेष एकः, शिशिरवसन्तकान्तोऽन्यः, निदाघवर्षाहर्षोऽपरः, इति त्रयो विभागा अङ्गाङ्गिभावेनेति षड्ऋतुकविभागः सर्वर्तुसुखदनामा खल्वङ्गी, वर्षाहर्षादयस्तदङ्गानीत्यर्थः ॥ ११५ ॥

॥ शेषमग्रे ॥

THE ADVAITA-MAKARANDA,

A SUMMARY OF THE VEDÁNTA SYSTEM, BY LAKSHMÍ-DHARA,

WITH THE COMMENTARY OF SVAYAM-PRAKÁŚA.

(Concluded from Vol. 8, page 180.)

XXIV. The author proceeds to evince that in like manner bliss is not a quality but the essence of spirit.

Text.

(24). It is I that am bliss, naught else; for were it aught else, that could not be bliss, since were that not for my sake it would not be dear, and were it for my sake it would not be dear *per se*.

Commentary.

I the soul am bliss itself, have bliss for my essence, and have not bliss merely as a quality. Were felicity a quality, and not spirit itself, it might be accounted bliss, but would not be bliss. If you ask why, we propose the following dilemma: Is this bliss, which is not soul, not an adjunct of soul, or is it an adjunct of soul?

The author shows that the former alternative will not hold good. Were it not for my sake—here the particle *chet* must be supplied from the preceding line—, that is, if it be not an adjunct of soul or self, it will not be dear, will not be an object of delight: for we do not observe snakes and the like, not accessories of self, to be objects of delight.

He shows that the second alternative will not hold good. Were it for my sake—here also the particle *chet* is to be supplied—were it for my sake, were it an adjunct or accession to me, it would not be desirable *per*

CC-0. Sampurnanand University Collection. Digitized by eGangotri

se: for we do not observe a wife, a child, or the like accession to self or soul to be *per se* objects of delight. For bliss is dear to all, and bliss is desirable *per se*, and not only mediately or indirectly; and hence it must be the soul itself, the very self.

You ask how. Hear then. There are four modes of all things in the universe, according as they are (1) self, (2) desirable, (3) undesirable, (4) indifferent. Now bliss, as the universal end of pursuit, cannot be undesirable, like tigers and such like objects; and for the same reason it cannot be indifferent like a clod of earth and the like; nor is it co-extensive with the desirable, for we observe it in the adjuncts of the desirable, in a wife or child for instance: it follows therefore, by the method of residues that it is the soul itself, or very self.

If you ask, why it may not be an object of delight as accessory to self: we demand what the cause of bliss in the soul may be, whereby bliss is rendered desirable to the soul or self as an adjunct. If you reply that the soul is determinant of bliss, you must then tell us of some subject to be gratified by self thus determining bliss; for we see that garlands, sandal-wood, and similar causes of pleasure, are subservient to something ulterior to themselves. Now the relation of act and agent is repugnant to the nature of spirit; and we see naught else to which it can be subservient. Soul then is not desirable as the determinant of bliss, but as being bliss itself; and bliss is not dear as an adjunct to the soul but as very self.

You object: Consciousness assures us that pleasure or bliss comes into being and ceases to be; how can it be self? We refuse the objection, for this (apparently generable and destructible bliss) is the object of a modification manifesting it (in the internal organ illusorily). All this is stated in the Brahmānanda: "Self, the adjunct, the indifferent, the undesirable, among these four self is dearest, the adjunct is dear, the undesirable and the indifferent are ulterior to those two (to self and to the appendages of self). Such is the order of the universe; and such is the doctrine of Yájñavalkya. Food and the like things are desirable conditionally as determinants of pleasure. To whom should self be subservient, by being like food and the like, because of agreeableness to self? In one and the same thing there cannot exist the nature both of cause and of effect."

Sarvajñátma-Muni also states in the following lines that self is identical with bliss: "That for the sake of which every thing exists, whatever it may be; that which by its own essence escapes subserviency; that they explain to be bliss, who know the character of felicity; that is identical with the self-presented self; thence is its being blissful." And in the Brahma gítá it is written: "Self-conscious spirit, Śiva is directly characterised as supreme felicity, as manifested to consciousness as the highest object of delight. Not everything is desirable to the desire of every one; but self is most desirable to the desire of self: wherefore is not self, ye gods, most desirable, and characterised as bliss?

It is then beyond controversy that according to revelation, the consciousness of the speculative, and the deliverances of the erudite, soul or self has bliss for its essence.

XXV. Here an objection may be started. The indivisible and unmingled nature of absolute spirit posited in the Vedic text To be regarded as uniform, is no longer competent; inasmuch as in the manner described it has a threefold nature consisting of the existent, intelligence, and bliss. Now these three (it is urged) the existent, intelligence, and bliss, cannot be asserted to be absolutely identical; for, were they so, the three terms designatory of them, the existent, intelligence, and bliss, could not, as being synonyms, be used in juxtaposition to each other: for words like water-pot, water-jar, pitcher, which have the same denotation, cannot be simultaneously employed. After starting this doubt the author proceeds to prove the indivisibility and uniformity of absolute spirit.

Text.

(25). For the one reality cannot ever be of diverse natures; hence I am absolutely indivisible, transcending the cosmical duality.

Commentary.

The one, secondless, reality, absolute spirit, consisting of the existent, intelligence, and bliss, cannot ever, whether in the time of its illusory concomitants or in the time when there are no illusory concomitants, be of diverse natures, multiform. In these words the term reality is a limitation intended as an argument; because absolute spirit is reality, exists in reality, therefore it cannot ever be of diverse natures. The adoption of the word reality is to imply additionally intelligence and bliss. The sense then is as follows. If the truth (or existence), the intelligence, and the bliss in absolute spirit were different one from the other, we could not prove that the truth was truth, that the intelligence (or cognition) was intelligence, or that the bliss was bliss. You ask why. We reply that truth if different from cognition, could not, as being unconscious like the silver illusorily superposed upon nacre, be true or real.

In the same manner if cognition were different from truth, this untrue cognition, as determined by unconsciousness * would not be cognition. To shew then that truth is truth and intelligence, intelligence, we must allow that they are absolutely identical the one with the other. Accordingly Sarvajñátma-muni says: "In truth

* The unconscious and the untrue or unreal being co-extensive.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

there is the nature of cognition, and in cognition there is truth. This is clearly the case. And while this is the case, there is yet no redundancy both truth and cognition being compatible in the completed principle (or one reality)."

In like manner if bliss were different from intelligence, then as different from intelligence, like water-jars and the like unconscious things, it could not be blissful. And again if cognition were different from bliss, then as different from bliss, and consequently unconscious like the water-pot and the rest, cognition would not be cognition. Thus to show that cognition and bliss are cognition and bliss, we must grant that they are absolutely identical the one with the other. This is also stated by the same authority. " Without doubt there is found in the nature of bliss the nature of knowledge and in the nature of knowledge the nature of bliss: and while this is the case there is no room for redundancy, bliss and cognition being compatible in the completed principle."

In like manner if bliss were different from truth, then as being untrue like the silver illusorily superposed upon nacre, bliss could not be blissful. Again if truth were different from bliss, the unblissful resultant, like the silver illusorily superposed upon nacre, would be untrue. We must therefore affirm absolute identity also between truth and bliss. This is also set out by the same authority: " It is current beyond controversy that in the nature of bliss there is the nature of truth, and in the nature of truth the nature of bliss: and while this is the case, there is no room for redundancy, truth and bliss being compatible in the same completed principle."

The same is evidently inferrible in regard to eternity absoluteness, purity, &c. in undifferenced being. Nor should it be contended that if these be absolutely identical with one another, the terms which denote them, truth and so forth, are synonymous. A difference in the sense of the terms must be allowed. The term truth is applicable to truth consisting of absolute spirit identified with the highest and with the not highest reality, with space, and conditioned supreme spirit. The term cognition again is applicable to knowledge in its conditionate form of two cognitions, a higher and a lower, and identified respectively with self-conscious spirit and with modifications of the internal sensory. The term bliss again is applicable to bliss in a higher and in a lower form identified respectively with self-conscious spirit and with modifications of the internal sensory. All this is set out by the same Sarvajñātma-Muni: " In space and the like there is one reality, in the self-presented self there is another reality. From juxtaposition of both there emerges a third reality. And to all these the term real is applicable. In a modification of the understanding there is one nature of cognition, in the apprehension of the self-presented self there is another. From juxtaposition of both there emerges a third, And the term knowledge is applicable to all. In a modification of the understanding there is one blissfulness, in the self-presented self there is another blissfulness. From juxtaposition of both emerges a third blissfulness. And the selfsame term bliss is applicable to all." In short there being a diversity in the denotable matter, the terms cannot be synonymous.

Starting the difficulty, How then if there is a diversity in the denotable matter can truth and the rest be absolutely identical? the author answers that they are identical, inasmuch as, while the denotation is diverse, there is an absolute identity in all that is implicated.

This he does in the words Hence I am absolutely indivisible, transcending the cosmical duality. Inasmuch as truth, knowledge, and bliss, as reciprocally identical, consist each of truth and knowledge and bliss, and inasmuch as they are not synonymous, they transcend the cosmical diversity, the duality generated by illusory concomitants such as the universe and space. Hence I am absolutely indivisible, purely uniform not multiform; that is, I am uniform and indivisible consisting of reality, intelligence, and beatitude, denoted with the implication of a portion by the terms reality, intelligence, and beatitude. Thus the uniformity set out in the text To be regarded as uniform, is accounted for.

XXVI. The author now proceeds to expound by means of implication by abandonment of a portion the absolute identity of individuated and absolute spirit, the text That art thou &c., confirmed as it is in the manner above set out by argumentations which evince that the individuated soul is absolute spirit.

Text.

(26). Undefiled by disengagement from unconsciousness, limitation, and relativity, I am uniform glory, implicated in the text That art thou.

Commentary.

Undefiled, pure, not repugnant to unity, by disengagement by abandonment of unconsciousness, limitation and the relativity from which gives rise to them. Unconsciousness is unconsciousness of deity; limitation, the limitation of individuated spirit. By these two terms there is a subaudition of all the other contradictory attributes residing in individuated spirit and the Lord. Relativity is the total connection determined by the illusory concomitants the interior sensory and its illusion, which gives rise to the unconscious limitation, and other like modes, both in the individuated spirit and in the Lord Implicated in the text, the grand text, That art thou to be understood by implication derelictive and non-derelictive of the denotation. The essence of the implicate is set out in the words *uniform glory*. I am glory that,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

is truth, knowledge, bliss; I am the self-presented self. Here as in former places corroborative argumentation should be taken into account. If self were other than absolute spirit, the nature of self would not be definable as interiority to all things. Again, if absolute spirit were other than self, the nature of absolute spirit would not be definable as illimitable greatness. This we find set out by the same authority (Sarvajñātma-Muni): "In the non-dual there is the nature of self-presented self, and in self-presented self likewise there is the nature of non-duality. And if this be the case there is no room for a redundancy: for the objects designated by That and thou are compatible in the completed principle." The words That and thou, it should be added, as having a diverse denotation, are not synonymous: a statement which we find made by the same author: "Though if we take the non-derelicted portion the difference of the two terms be an absolute minimum, yet taking the derelicted portion, the two terms remain. There is therefore no propriety in overlooking that which is external in thee, luminousness of non-dual self though thou be." The meaning of the text is set forth in a lucid manner in the Brahmagītā by Brahmā who knows the import of all the Vedas: "Revelation does not intimate that the body and the like things are as the objects denotable by the words thou and I, the meaning of those words; the revelation is That art thou. For the text speaks by dereliction of the part of the sentence indicative of that which is repugnant to the unity of things, and by implication of that which is not repugnant, viz. intelligence. And in the signification of That there is identity with the signification of the word thou, without any repugnant portion, but with implication only of causality and so forth in the designate (of the term That.) It declares moreover the identity of the signification of the word That with the word thou to consist in intelligence, that, to wit, of the supreme spirit, pure consciousness, which is the designate of the terms That and thou; an identity which is self-evident: for such is the import of the text, ye orthodox."

In short, then, it is established by revelation, argumentation, and the deliverances of the most erudite, that individuated spirit is in its essence the existent intelligence, beatitude, eternal, pure, enlightened, unconditioned.

XXVII. The author now concludes this sectional treatise with a reference to its end, viz. the incorporeal emancipation, characterised as the permanent state of being absolute spirit self-luminous and illimitably blissful, and the emancipation during life definable as the permanent state of being absolute spirit accompanied with manifestations of the organism, organs &c., until the exhaustion of fructescent merits, in the individual soul when it presents to itself as itself absolute spirit the essence whereof has been set forth.

Text.

(27). I am the full glory self-evident, without beginning and without end, in which the illusory appearance of the universe, the individuated spirit, the disciple, the master, and the Lord, is brought to an end.

Commentary.

I am that wherein the illusory phantasmagoria consisting of the universe, individuated spirit, disciple, master, and the Lord, is brought to a period or sublated in the state of living emancipation, and altogether annulled in the state of incorporeal emancipation That these two modes of emancipation are the fruit of knowledge has been declared also by Sarvajñátma-Muni: "A living emancipation there is, as is attested by consciousness; and a shadow of duality there is therein, as is attested by consciousness; and a slight degree of retention of this shade of duality there is: of this matter one's own consciousness is the evidence. The theosophist therefore after abiding in a state of living emancipation for the consummation of the fruition of fructescent merits, and after experiencing the resultant fruition which has lost its savour, attains finally to absolute isolation." I am the self-evident, self-luminous, glory, brightness, without beginning and without end, full, containing the whole *pleroma*.

XXVIII. The author now solicits the activity of theosophists upon the sectional treatise which he has constructed, and which is a summary of the kernel of the significance of the Upanishads.

Text.

(28). Be this Nectar of Monism, of the sage Lakshmídhara, culled from the autumn lotuses of verses, sipped by the theosophistic bees.

Commentary.

Lakshmídhara is the name of the author. He is a sage, all-knowing, intuiting the transcendent. His verses are autumn lotuses. Of these is composed this Nectar of Monism patent to all men. The principle of Monism is the unconditioned, or absolute spirit. Nectar is the sweets of flowers; as it is said in the Brahma-gítá: "This nectar when a man has once obtained, he becomes eternally beatified in all places; nor otherwise the blessed gods." Theosophists are bees, familiar with the sweets of the unconditioned. By them be it sipped, be it frequented again and again, till the absolute cessation of illusion; as it is said by Bhárathí-tírtha: "If after reflection he recognise not himself intuitively as absolute spirit, let him reflect again and again until the intuition comes."

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Though much remains that might be said on each verse of the text, yet as we took in hand to analyse it for the unintelligent and unindustrious, we desist, lest we add to the difficulty or the extent of our commentary.

The Commentator's Epilogue.

The Manifestation of the Sweets of the Nectar of Monism was composed by Svayam-prakáśa the ascetic, at the behest of Purushottama.

This Manifestation of the Sweets is to be reverently learnt by those excellent inquirers who wish to taste the joys of absolute being.

Bathe joyously ye excellent aspirants to emancipation, scorched by the sun of three-fold affliction, in the Manifestation of the Sweets, as in the Ganges.

Let the learned forgive the shortcomings of my intellect, as shown in what is set forth in the explanation; may the Lord who has Ambā as half his body, be gracious as a father towards the shortcomings of a son.

Let my suppliant mind hover like a bee at the twin lotus-feet of Kaivalyānanda Yogīndra, which distil the sweets of emancipation, frequented by pure swans, unsullied.

I ever celebrate Śivānanda Yogīndra, whose understanding is immersed in the ocean of intelligence, the repository of good qualities, who teaches to men the highest principle, absolute spirit.

I adore the husband of Jánakí the crest-gem of the all-wise, the lord of lords, whose frame is as tender as a lotus, the ambrosial ocean of tenderness and beauty.

I adore Siva, decorated with the lunar digit, whose slightest smile beatifies his votaries, whose left side (Ambā) is delighted with his beauty, fully satisfied with his own felicity, who laughs exultantly, and I adore Ambā.

A. E. G.

FINIS.

THE VRITTA-RATNÁKARA

OR

THE OCEAN OF METRES

BY

KEDÁRA BHAṬṬA.

(Continued from page 94.)

IN THE ATIJAGATI.

That is Mattamayúra which has a Ma-gaṇa, a Ta-gaṇa, a Ya-gaṇa, a Sa-gaṇa and a long letter; the cæsural pause being on the fourth letter and the ninth (following it).

That is Chancharíkávalí which has a Ya-gaṇa, a Ma-gaṇa, two Ra-gaṇas and a long letter;

That is Atiruchirá which has a Ja-gaṇa, a Bha-gaṇa, a Sa-gaṇa, (again) a Ja-gaṇa and a long letter; the cæsural pause being on the fourth letter and the ninth (following it).

That is Kshamá which has two Na-gaṇas, a Ja-gaṇa, a Ta-gaṇa and a long letter; the cæsural pause being on the seventh letter and the sixth (following it).

That is Manjubháshiṇí which has a Sa-gaṇa, a Ja-gaṇa, (again) a Sa-gaṇa, (again) a Ja-gaṇa, and a long letter; the cæsura being on the fourth letter and the ninth (following it).

That is Chandriká which has two Na-gaṇas, a Ta-gaṇa, a Ra-gaṇa and a long letter; the cæsura on the fourth letter and the ninth following it.

That is Praharshiní which has a Ma-gaṇa, a Na-gaṇa, a Ja-gaṇa, a Ra-gaṇa, and a long letter; the cæsura on the third letter and the tenth (following it).

IN THE ŚAKVARÍ.

That is Asamvádhá which has a Ma-gaṇa, a Ta-gaṇa, a Na-gaṇa, a Sa-gaṇa and two long letters; the cæsura being on the fifth letter and the ninth (following it).

That is Aparájitá which has two Na-gaṇas, a Ra-gaṇa, a Sa-gaṇa, a short and a long letter; the cæsura on the seventh letter and the seventh (following it).

That is Praharaṇa-kaliká which has two Na-gaṇas, a Bha-gaṇa, (again) a Na-gaṇa, a short and a long letter.

That is Vasantá-tilaká which has a Ta-gaṇa, a Bha-gaṇa, two Ja-gaṇas, and two long letters.

The Vasantatilaká has been called Sinhoddhatá by the sage Káśyapa; the sage Saitava calls it Uddharshiṇí: and Ráma gives to it the name of Madhu-Mádhaví.

That is Indu-vadaná which has a Bha-gaṇa, a Ja-gaṇa, a Sa-gaṇa, a Na-gaṇa, and two long letters.

That is Alolá which has a Ma-gaṇa, a Sa-gaṇa, (again) a Ma-gaṇa, a Bha-gaṇa and two long letters: the cæsura on the seventh letter and the seventh following it.

IN THE ATIŚAKVARÍ.

That is Saśikalá which has fourteen short and one long letter: (the cæsura on the seventh letter and the eighth (following it).

Śaśikalá is termed Málá or Sraj if the cæsural pause be on the sixth letter and the ninth (following it).

It is also called Maṇi-guṇa-nikara should the cæsura fall on the eighth letter and the ninth (following it).

That is Má-lini which has two Na-gaṇas, a Ma-gaṇa and two Ya-gaṇas; the cæsura on the eighth letter and the seventh (following it).

That is Prabhadraka which has a Na-gaṇa, a Ja-gaṇa, a Bha-gaṇa (again) a Ja-gaṇa and a Ra-gaṇa.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

That is Elá which has a Sa-gaṇa, a Ja-gaṇa, two Na-gaṇas and a Ya-gaṇa: the cæsura being on the fifth letter and the tenth (following it).

That is Chandra-lekhá which has a Ma-gaṇa, a Ra-gaṇa, (again) a Ma-gaṇa, and two Ya-gaṇas: the cæsura being on the seventh letter and the eighth (following it).

In the Ashṭí.

That is Rishabha-gaja-vilasitam which has a Bha-gaṇa, a Ra-gaṇa, three Na-gaṇas and a long letter: the cæsura being on the seventh letter and the ninth, (following it.)

That is Váṇiní which has a Na-gaṇa, a Ja-gaṇa, a Bha-gaṇa, (again) a Ja-gaṇa, a Ra-gaṇa, and a long letter.

That is Panchachámara which has short letters and long letters alternately.

That is Kha-gati which has five Bha-gaṇas and a long letter.

In the Atyashṭi.

That is Sikhariṇí which has a Ya-gaṇa, a Ma-gaṇa a Na-gaṇa, a Sa-gaṇa, a Bha-gaṇa, a short and a long letter the cæsura on the sixth letter and the eleventh, following it.

That is Prithví which has a Ja-gaṇa, a Sa-gaṇa, (again) a Ja-gaṇa and a Sa-gaṇa, a Ya-gaṇa, a short and a long letter; the cæsura on the eighth and the ninth (following it).

That is Vansa-patra-patitam which has a Bha-gaṇa, a Ra-gaṇa, a Na-gaṇa, (again) a Bha-gaṇa, and a Na-gaṇa, a short and a long letter: the cæsura on the tenth letter and the seventh (following it).

That is Hariṇí which has a Na-gaṇa, a Sa-gaṇa, a Ma-gaṇa, a Ra-gaṇa, (again) a Sa-gaṇa, a short and a long letter: the cæsura on the sixth, the tenth and the seventeenth letter.

That is Mandákrántá which has a Ma-gaṇa, a Bha-gaṇa, a Na-gaṇa, two Ta-gaṇas and two long letters: the cæsura on the fourteenth and the seventeenth letter.

That is Narkuṭaka which has a Na-gaṇa, a Ja-gaṇa, a Bha-gaṇa, two Ja-gaṇas, a short and a long letter: the cæsura on the seventh letter and the tenth (following it).

It is termed Kokilaka if the cæsura be on the seventh, the thirteenth and the seventeenth letter.

In the Dhrití.

That is Kusumitalatá-vellitá which has a Ma-gaṇa, a Ta-gaṇa, a Na-gaṇa, and three Ya-gaṇas; the cæsura on the fifth, eleventh and the eighteenth letter.

That is Hariṇa-pluta which has a Ma-gaṇa, a Sa-gaṇa two Ja-gaṇas, a Bha-gaṇa and a Ra-gaṇa: the cæsura on the eighth, the thirteenth and the eighteenth letter.

That is Mahá-máliká which has two Na-gaṇas and four Ra-gaṇas.

That is Aśva-gati which has five Bha-gaṇas and a Sa-gaṇa.

In the Atidhrit.

That is Pancharchámara which has two Na-gaṇas, followed by long and short letters alternately.

That is Megha-visphúrjita which has a Ya-gaṇa, a Ma-gaṇa, a Na-gaṇa, a Sa-gaṇa, two Ra-gaṇas, and a long letter: the cæsura on the sixth, the twelfth and the ninteenth letter.

That is Sárdúlavikriṛita which has a Magaṇa, a Sa-gaṇa, a Ja-gaṇa, (again) a Sa-gaṇa, two Ta-gaṇas and a long letter: the cæsura on the twelfth letter and the seventh (following it).

In the Krite.

Let that be known as Suvadaná which has a Ma-gaṇa, a Ra-gaṇa, a Bha-gaṇa, a Na-gaṇa, a Ya-gaṇa, (again) a Bha-gaṇa, a short and a long letter: the cæsura on the seventh, the fourteenth, and the eleventh letter.

That is Vritta which has three Ra-gaṇas, and Ja-gaṇa (coming alternately); a long and a short letter.

In the Prakriti.

That is known as Sragdhará which has a Ma-gaṇa, a Ra-gaṇa, a Bha-gaṇa, a Na-gaṇa, and three Ya-gaṇas: the cæsura on the seventh, the fourteenth and the twenty first letter.

In the Ákríti.

That is Bhadraka which has a Bha-gaṇa, a Ra-gaṇa, a Na-gaṇa, (again) aRa-gaṇa, aNa-gaṇa, and aRa-gaṇa, and a Na-gaṇa, and a long letter: the cæsura on the tenth and the twenty second letter.

In the Vikriti.

That is Lalita which has a Na-gaṇa, a Ja-gaṇa, a Bha-gaṇa, (again) a Ja-gaṇa, a Bha-gaṇa, a Ja-gaṇa, and Bha-gaṇa; a short and a long letter: the cæsura on the eleventh and the twelfth (following it).

That is Mattákriṛá which has two Ma-gaṇas, a Ta-gaṇa, four Na-gaṇas, a short and a long letter: the cæsura on the eighth and the fifteenth (following it).

In the Sanskriti.

That is Tanví which has a Bha-gaṇa, a Ta-gaṇa, a Na-gaṇa, a Sa-gaṇa (again) two Bha-gaṇas, a Na-gaṇa, and a Ya-gaṇa: the * cæsura on the twelfth letter and the twelfth (following it).

* The Commentator Sulhana enterprets that the cæsura is on the fifth, the twelfth and the twentyfourth letter. This though apparently correct does not agree with the rule explicitly laid down by Pingala in his Aphorisms.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

IN THE ATIKRITI.

That is Krauncha-padá which has a Bha-gaṇa, a Ma-gaṇa, a Sa-gaṇa, (again) a Bha-gaṇa, and four Na-gaṇas, and a long letter: the cæsura on the fifth, tenth, the eighteenth and the twenty-fifth letter.

IN THE UTKRITÍ.

That is Bhujanga-vijimbhrita which has two Ma-gaṇas, a Ta-gaṇa, three Na-gaṇas, a Ra-gaṇa, a Sa-gaṇa, a short and a long letter; the cæsura on the eighth the nineteenth and the twenty-sixth letter.

That is Apaváha which has a Ma-gaṇa, six Na-gaṇas, a Sa-gaṇa and two long letters; the cæsura on the ninth, the fifteenth and the twenty-sixth letter.

IN THE DANḌAKA.

That is Chandavrishṭi-prayáta which has a couple of Na-gaṇas and seven Ra-gaṇas.

[1] By the addition of a Ra-gaṇa to each quarter (of the above) are formed Arṇa, Arṇava, Vyála, Jímúta, Lilákara, Uddáma, Saṅkha and several others.

The learned have called that as Prachitaka which has a couple of Na-gaṇas and seven Yagaṇas.

Sô much for the third chapter of the Vritta-ratnákara on *Sama* metres.

[1] Two Na-gaṇas and eight Ra-gaṇas in each quarter make Arṇa. Two Na-ganas and nine Ra-gaṇas make Arṇava and so on.

(To be continued.)

॥ यजुर्वेदः, भाष्यानुवादाभ्यां समेतः ॥

(अत्युत्कृष्टकागजादिभिः स्वराङ्काद्यैश्चातियत्नतो मुद्रयणीयः)

इतः शौरश्रावणमासादेवास्माभिः प्रतिमासमेकैकखण्डः प्रचार्यः लघु-'फुलिस्कैप्'-आकारीयाष्टचत्वारिंशत्पृष्ठात्मकः । तत्र, मूलं पुस्तकाकारेण, टीकातु तयैवोर्द्धाधोभागयोरनुवादस्तु पृथगंशः प्रतिपृष्ठं स्तम्भद्वयानुसारतः स्यास्यति ।

मूल्यम्—प्रतिखण्डस्य १) प्रतिद्वादशखण्डात्मिकम्१०) प्रेरणाव्ययस्त्वस्माकं न तु क्रेतृणाम् ।

'प्रत्र-कम्र-नन्दिनी'- याहकैस्त्वर्द्धमूल्येनैव प्राप्तव्यमिति शम् ॥

कलिकाता-सत्ययन्त्रालयः १० नं गोवागानष्ट्रीट् । श्रीसत्यव्रतसामश्रमी ।

List of books printed and published and for sale by E. J. Lazarus and Co., at the Medical Hall Press, Benares.

ATMA PURAṆA, containing all the principles of Vedántism by ŚAṄKARÁNAND, with commentary by *Kákárám Pandit.* Rs. 16-0. Published at Ganpat Krishanaji's, Bombay.

THE LAGHU KAUMUDÍ, a Sanskrit grammar with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College Benares. *Price* 8 *Rs.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares, Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

VAIŚESHIKA APHORISMS OF KAṆÁDA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADEŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNAVA DHARMA PRAKÁS ARTHAT MANUSMRITI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230, Price, Rs. 5-0-0.

SIDDHÁNTA KAUMUDI VYÁKARAN, 8vo. demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS. AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 103. Benares, December 1st, 1874. Vol. IX.

काशिकायाः

॥ तृतीयाध्यायस्य प्रथमः पादः ॥

कण्ड्वादिभ्यो यक् ॥ २७ ॥

कण्डूञ् इत्येवमादिभ्यो यक् प्रत्ययो भवति । द्विविधाः कण्ड्वादयो धातवः प्रातिपदिकानि च । तत्र धात्वधिकारादातुभ्य एव प्रत्ययो विधीयते, न तु प्रातिपदिकेभ्यः । तथा च गुणप्रतिषेधार्थः ककारोऽनुबध्यते ।

धातुप्रकरणाद्धातुः कस्य चासञ्ज्ञनादपि ।
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः ॥

कण्डूञ्, कण्डूयति । कण्डूयते । ञित्त्वात्कर्त्रभिप्राये क्रियाफलइत्यात्मनेपदम् । कण्डूञ् । मन्तु । हृणीञ् । वल्गु । अस्त्र । मनस् । महीङ् । लेट् । लोट् । दरस् । दरज् । दरञ् । दुवस् । मेधा । कुपुभ । मगध । तन्तस् । पम्पस् । सुख । दुःख । सपर । अर । भिषज् । भिष्णज् । दपुध । चरण । चुरण । भुरण । तुरण । भुरण । गद्गद । एला । केला । खेला । लिट् । लोट् * ॥

गुपूधूपविच्छिपणिपनिभ्य आयः ॥ २८ ॥

गुपू रक्षणे, धूप संतापे, विच्छ गतौ, पण व्यवहारे स्तुतौ च, यन च, इत्येतेभ्यो धातुभ्य आयप्रत्ययो भवति । गोपायति । धूपायति । विच्छायति । पणायति । पनायति । स्तुत्यर्थेन यनिना साहचर्यात्तदर्थः पणिः प्रत्ययमुत्पादयति न व्यवहारार्थः । शतस्य पणते । सहस्रस्य पणते । अनुबन्धश्च केवले चरितार्थस्तेनायप्रत्ययान्ताच्चात्मनेपदं भवति ॥

* असुञ् । हृणीङ् । रूपय । पुरण । अत्रेते पुस्तकान्तरे अधिकाः एवमञ्ज्यर्थमनास्थिताः ।

ऋतेरीयङ् ॥ २९ ॥

ऋतिः सौत्रो धातुर्गृणायां वर्त्तते तत ईयङ् प्रत्ययो भवति । ङकार आत्मनेपदार्थः । ऋतीयते । ऋतीयेते । ऋतीयन्ते । ऋतेश्छङीति सिद्धे ईयङ्वचनं ज्ञापनार्थं धातुविहितानां प्रत्ययानामायबादयो न भवन्तीति ॥

कर्मेर्णिङ् ॥ ३० ॥

कर्मेर्धातोर्णिङ् प्रत्ययो भवति । णकारो वृद्ध्यर्थः । ङकार आत्मनेपदार्थः । कामयते । कामयेते । कामयन्ते ॥

आयादय आर्द्धधातुके वा ॥ ३१ ॥

आर्द्धधातुकविषये आर्द्धधातुकविवक्षायामायादयः प्रत्यया वा भवन्ति । गोप्ता । गोपायिता । अर्तिता । ऋतीयिता । कमिता । कामयिता । नित्यं प्रत्ययप्रसङ्गे तदुत्पत्तिरार्द्धधातुकविषये विकल्प्यते, तत्र यथायथं प्रत्यया भवन्ति । गुप्तिः । गोपाया ॥

सनाद्यन्ता धातवः ॥ ३२ ॥

सन् आदिर्येषां ते सनादयः । सनादयोन्ते येषां ते सनाद्यन्ताः । सनाद्यन्ताः समुदाया धातुसंज्ञा भवन्ति । प्रत्ययग्रहणपरिभाषैव पदसंज्ञायामन्तवचनेन लिङ्गेन प्रतिपिद्धा सती पुनरिहान्तवचनेन प्रतिप्रसूयते । चिकीर्षति । पुत्रीयति । पुत्रकाम्यति ॥

स्यतासी लृलुटोः ॥ ३३ ॥

स्वरूपमुत्सृष्टानुबन्धं सामान्यमेकमेव तस्मिन् लुटि च परतो धातोर्यथासंख्यं स्यतासी प्रत्ययौ भवतः । करिष्यति । अकरिष्यत । अकरिष्यत् । श्वः कर्ता । इदित्करणमनुनासिकलोपप्रतिषेधार्थम् । मन्ता । संगन्ता ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सिब्बहुलं लेटि ॥ ३४ ॥

धातोः सिप् प्रत्ययो भवति बहुलं लेटि परतः। जोषिषत्। तारिषत्। मन्दिषत्। न च भवति, पतात्ति विद्युत्। उदधिं च्यावयाति ॥

कास्प्रत्ययादाममन्त्रे लिटि ॥ ३५ ॥

कास शब्दकुत्सायां, ततः प्रत्ययान्तेभ्यश्च धातुभ्य आम् प्रत्ययो भवति लिटि परतो ऽमन्त्रविषये। कासाञ्चक्रे। प्रत्ययान्तेभ्यः। लोलूयाञ्चक्रे। अमन्त्रइति किम्। कृष्णो नोनाव ॥ कास्यनेकाच इति वक्तव्यं चुलुम्पाद्यर्थम् ॥ * ॥ चुलुम्पाञ्चकार। दरिद्राञ्चकार ॥

आमो ऽमित्त्वमदन्तत्वादगुणत्वं विदेस्तथा।
आस्कासोरविधानाच्च परूपं कतन्तवत् ॥

इजादेश्च गुरुमतो ऽनृच्छः ॥ ३६ ॥

इजादिर्यो धातुर्गुरुमान् ऋच्छतिवर्जितस्तस्माच्च लिटि परत आम्प्रत्ययो भवति। ईह चेष्टायाम्। ऊह वितर्के। ईहाञ्चक्रे। ऊहाञ्चक्रे। इजादेरिति किम्। ततक्ष। ररक्ष। गुरुमत इति किम्। इयज। उवप। अनृच्छ इति किम्। आनर्च्छ। आनर्च्छतुः। आनर्च्छुः ॥ ऋणातेश्च प्रतिषेधो वक्तव्यः ॥ * ॥ प्रोर्णुनाव। अथवा,

वाच्य ऋणोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्।
आमश्च प्रतिषेधार्थमेकाचश्चेडुपयहात् ॥

दयायासश्च ॥ ३७ ॥

दय दानगतिरक्षणेषु, अय गतौ, आस उपवेशने, एतेभ्यश्च लिटि परत आम्प्रत्ययो भवति। दयाञ्चक्रे। पलायाञ्चक्रे। आसाञ्चक्रे ॥

उषविदजागृभ्यो ऽन्यतरस्याम् ॥ ३८ ॥

उष दाहे, विद ज्ञाने, जागृ निद्राक्षये, एतेभ्यो लिटि परतो ऽन्यतरस्यामाम् प्रत्ययो भवति। ओषाञ्चकार। उवोष। विदाञ्चकार। विवेद। जागराञ्चकार। जजागार। विदेरदन्तत्वप्रतिज्ञानादाम्नि गुणो न भवति ॥

भीह्रीभृहुवां श्लुवच्च ॥ ३९ ॥

जिभी भये, ह्री लज्जायां, डुभृञ् धारणपोषणयोः, हु दानादनयोः, एतेभ्यो लिटि परत आम्प्रत्ययो भवत्यन्यतरस्याम्, श्लाविव चास्मिन्कार्यं भवति। किं पुनस्तत्, द्वित्वमित्त्वं च। बिभयाञ्चकार। बिभाय। जिह्रयाञ्चकार। जिह्राय। बिभराञ्चकार। बभार। जुहवाञ्चकार। जुहाव ॥

क्ञ्वानुप्रयुज्यते लिटि ॥ ४० ॥

आम्प्रत्ययस्य पश्चात्क्ञ्वनुप्रयुज्यते लिटि परतः। क्ञ्वजिति प्रत्याहारेण क्ञ्वस्तयो गृह्यन्ते, तत्सामर्थ्यादस्तेर्भूभावो न भवति। पाचयाञ्चकार। पाचयाम्बभूव। पाचयामास ॥

विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ॥ ४१ ॥

विदाङ्कुर्वन्त्वित्येतदन्यतरस्यां निपात्यते। किं पुनरिह निपात्यते। विदेर्लोट्याम्प्रत्ययो गुणाभावो लोटो लुक्, क्ञश्च लोट्परस्यानुप्रयोगः। अत्र भवन्तो विदाङ्कुर्वन्तु। विदन्तु। इतिकरणः प्रदर्शनार्थः, न केवलं प्रथमपुरुषबहुवचनं, किं तर्हि, सर्वाण्येव लोड्वचनान्यनुप्रयुज्यन्ते। विदाङ्करोतु। विदाङ्कुरुतात्। विदाङ्कुरुतामित्यादि ॥

अभ्युत्सादयांप्रजनयांचिक्कयांरमयामकः पावयांक्रियाद्विदामक्रन्नितिच्छन्दसि ॥ ४२ ॥

अभ्युत्सादयामित्येवमादयश्छन्दसि विषये ऽन्यतरस्यां निपात्यन्ते। सदिजनिरमीणां ण्यन्तानां लुङ्याम्प्रत्ययो निपात्यते। चिनोतेरपि तत्रैवाम्प्रत्ययो द्विर्वचनं कुत्वं च। अक्करिति चतुर्भिरपि प्रत्येकमनुप्रयोगः संबध्यते। पावयाङ्क्रियादिति पवतेः पुनातेर्वा ण्यन्तस्य लिङ्याम् निपात्यते, क्रियादिति चास्यानुप्रयोगः। विदामक्रन्निति विदेर्लुङ्याम् निपात्यते, गुणाभावश्च, अक्रन्निति चास्यानुप्रयोगः। अभ्युत्सादयामकः। अभ्युदसीषददिति भाषायाम्। प्रजनयामकः। प्राजीजनदिति भाषायाम्। चिक्कयामकः। अचैषीदिति भाषायाम्। रमयामकः। अरीरमदिति भाषायाम्। पावयाङ्क्रियात्। पाव्यादिति भाषायाम्। विदामक्रन्। अवेदिषुरिति भाषायाम् ॥

च्लि लुङि ॥ ४३ ॥

धातोश्च्लिः प्रत्ययो भवति लुङि परतः। इकार उच्चारणार्थः, चकारः स्वरार्थः। अस्य सिजादीनादेशान्वक्ष्यति तत्रैवोदाहरिष्यामः ॥

च्लेः सिच् ॥ ४४ ॥

च्लेः सिजादेशो भवति। इकार उच्चारणार्थः, चकारः स्वरार्थः। अकार्षीत्। अहार्षीत्। आगमानुदात्तत्वं हि प्रत्ययस्वरमिव चित्स्वरमपि बाधेतेति स्यानिन्यादेशे च द्विश्चकारोनुबध्नाति ॥ स्पृशमृशकृषतृपदृपां सिच्वा वक्तव्यः ॥ * ॥ अस्प्राक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। अकार्षीत्। अक्राक्षीत्। अकृक्षत्। अतृपत्। अताप्सीत्। अतार्प्सीत्। अदृपत्। अद्राप्सीत्। अदार्प्सीत् ॥

शल इगुपधादनिटः क्सः ॥ ४५ ॥

शलन्तो यो धातुरिगुपधस्तस्मात्परस्य च्लेरनिटः क्स आदेशो भवति। दुह। अधुक्षत्। लिह। अलिक्षत्। शल

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति किम् । अभैत्सीत् । अच्छैत्सीत् । इगुपधादिति किम् । अधात्तीत् । अनिट इति किम् । अकोषीत् । अमोषीत् ॥

श्लिष आलिङ्गने ॥ ४६ ॥

श्लिषेर्धातोरालिङ्गनक्रियावचनात्परस्य च्लेः क्त आदेशो भवति । आलिङ्गनमुपगूहनं परिष्वङ्गः । अत्र नियमार्थमेतत् । आश्लिषत्कन्यां देवदत्तः । आलिङ्गनइति किम् । समाश्लिषज्जतु काष्टम् ॥

न दृशः ॥ ४७ ॥

पूर्वेण क्तः प्राप्तः प्रतिषिध्यते । दृशेर्धातोः परस्य च्लेः क्तादेशो न भवति । अस्मिन्प्रतिषिद्धे इरितो वेत्यङ्सिचौ भवतः । अदर्शत् । अद्राक्षीत् ॥

णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् ॥ ४८ ॥

सिजपवादश्चङ्विधीयते । ण्यन्तेभ्यो धातुभ्यः श्रि द्रु स्रु इत्येतेभ्यश्च परस्य च्लेश्चङादेशो भवति कर्तृवाचिनि लुङि परतः । ङकारो गुणवृद्धिप्रतिषेधार्थः, चकारश्चङीति विशेषणार्थः । अचीकरत् । अजीहरत् । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । कर्त्तरीति किम् । अकारयिषातां कटौ देवदत्तेन ॥ क्रमेरुपसंख्यानम् ॥ * ॥ आयादय आर्द्धधातुके वेति यदा णिङ्नास्ति तदैतदुपसंख्यानम् । अचक्रमत । णिङ्पक्षे सन्वद्भावः । अचीक्रमत ।

नाक्रमिष्ट सुखं यान्ति सुयुक्तैर्वडवारथैः ।
अथ पत्क्रामिणो यान्ति ये ऽचीक्रमतभाषिणः ॥

विभाषा धेट्श्व्योः ॥ ४९ ॥

धेट् पाने, टुओश्वि गतिवृद्ध्योः, एताभ्यामुत्तरस्य च्लेर्विभाषा चङादेशो भवति । धेटस्तावत् । अदधत् । सिच्पक्षे विभाषा घ्राधेडिति लुक् । अधात् । अधासीत् । श्वयतेः खल्वपि । अशिश्वियत् । अङोप्यत्र विकल्प इष्यते । अश्वत् । अश्वयीत् । कर्त्तरीत्येव । अधिषातां गावौ वत्सेन ॥

गुपेश्छन्दसि ॥ ५० ॥

गुपेः परस्य च्लेश्छन्दसि विषये विभाषा चङादेशो भवति । यत्रायप्रत्ययो नास्ति तत्रायं विधिः । इमावो मित्रावरुणौ गृहानजूगुपतम् । अगौप्तम् । अगोपायिष्टमिति वा । भाषायां तु चङन्तं वर्जयित्वा शिष्टं रूपत्रयं भवति ॥

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ॥ ५१ ॥

ऊन परिहाणे, ध्वन शब्दे, इल प्रेरणे, अर्द्द गतौ याचने च, एतेभ्यो धातुभ्यो ण्यन्तेभ्यः पूर्वेण च्लेश्चङि प्राप्ते छन्दसि विषये न भवति । काममूनयीः । औनिनर्दिति भाषायाम् । मा त्वाग्निर्ध्वनयीत् । अदिध्वनदिति भाषायाम् । काममैलयीः । ऐलिलदिति भाषायाम् । मैनमर्द्दयीत् । आर्द्दिददिति भाषायाम् ॥

अस्यतिवक्तिख्यातिभ्यो ऽङ् ॥ ५२ ॥

असु क्षेपणे, वच परिभाषणे, ब्रूञादेशो वा । ख्या प्रकथने । चक्षिङादेशो वा । एभ्यः परस्य च्लेरङादेशो भवति कर्तृवाचिनि लुङि परतः । अस्यतेः पुषादिपाठादेवाङि सिद्धे पुनर्ग्रहणमात्मनेपदार्थम् । पर्यास्यत । पर्यास्येताम् । पर्यास्यन्त । वक्ति । अवोचत् । अवोचताम् । अवोचन् । ख्याति । आख्यत् । आख्यताम् । आख्यन् । कर्त्तरीति किम् । पर्यासिषातां गावौ वत्सेन ॥

लिपिसिचिह्वश्च ॥ ५३ ॥

लिप उपदेहे, षिच क्षरणे, ह्वेञ् स्पर्द्धायाम्, एतेभ्यश्च परस्य च्लेरङादेशो भवति । अलिपत् । असिचत् । आहूत् । पृथग्योग उत्तरार्थः ॥

आत्मनेपदेष्वन्यतरस्याम् ॥ ५४ ॥

पूर्वेण प्राप्ते विभाषा आरभ्यते । लिपि सिचि ह्वु आत्मनेपदेषु परतश्च्लेरङादेशो भवति अन्यतरस्याम् । स्वरितञित इत्यात्मनेपदम् । अलिपत । अलिप्त । असिचत । असिक्त । अहूत । अह्वास्त ॥

पुषादिद्युताद्यृदितः परस्मैपदेषु ॥ ५५ ॥

पुषादिभ्यो द्युतादिभ्यः ऋदिद्भ्यश्च धातुभ्यः परस्य च्लेः परस्मैपदेषु परतो ऽङादेशो भवति । पुषादिर्दिवाद्यन्तर्गणो गृह्यते, न भ्वादिक्र्यादयन्तर्गणः । पुष । अपुषत् । द्युतादि । अद्युतत् । अश्वितत् । ऋदिद्भ्यः । गॄ । अगमत् । शकॢ । अशकत् । परस्मैपदेष्विति किम् । व्यद्योतिष्ट । अलोटिष्ट ॥

सर्त्तिशास्त्यर्त्तिभ्यश्च ॥ ५६ ॥

सृ गतौ, शासु अनुशिष्टौ, ऋ गतौ, इत्येतेभ्यः परस्य च्लेरङादेशो भवति । सर्त्ति । असरत् । शास्ति । अशिषत् । अर्त्ति । आरत् । पृथग्योगकरणमात्मनेपदार्थम् । समरन्त । चकारः परस्मैपदेष्वित्यनुकर्षणार्थः । तच्चोत्तरत्रोपयोगं यास्यति ॥

इरितो वा ॥ ५७ ॥

इरितो धातोः परस्य च्लेरङादेशो वा भवति । भिदिर् । अभिदत् । अभैत्सीत् । छिदिर् । अच्छिदत् । अच्छैत्सीत् । परस्मैपदेष्वित्येव । अभित्त । अच्छित्त ॥

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुस्विभ्यश्च ॥ ५८ ॥

वेति वर्त्तते । जॄष् वयोहानौ, स्तम्भुः सौत्रो धातुः । म्रुचु म्लुचु गत्यर्थौ । युचु म्लुचु स्तेयकरणे । ग्लुञ्चु गत्यर्थः । टुओश्वि गतिवृद्ध्योः । एतेभ्यो धातुभ्यः परस्य च्लेर्वा ऽङादेशो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवति। अजरत्। अजारीत्। अस्तभत्। अस्तम्भीत्। अमुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। अग्रुचत्। अग्रोचीत्। अग्लुचीत्। अग्लोचीत्। अग्लुचत्। अग्लुञ्चीत्। अश्वत्। अश्वयत्। अशिश्वियत्। ग्लुचुग्लुञ्च्वोरेकतरोपादानेपि रूपत्रयं सिद्ध्यत्यर्थभेदात्तु द्वयोरुपादानं कृतम्। के चित्तु वर्णयन्ति द्वयोरुपादानसामर्थ्याद् ग्लुञ्चेरनुनासिकलोपो न भवति। अग्लुञ्चदिति॥

कृमृदृरुहिभ्यश्छन्दसि॥ ५९॥

कृ मृ दृ रुहि इत्येतेभ्यः परस्य च्लेश्छन्दसि विषये ऽङादेशो भवति। शकलाङ्गुष्ठकोकरत्। अथोऽमरत्। अदरदर्थान्। पर्वतमारुहत्। अन्तरिक्षाद्दिवमारुहम्। छन्दसीति किम्। अकार्षीत्। अमृत। अदारीत्। अरुक्षत्॥

चिण् ते पदः॥ ६०॥

पद गतौ, अस्माद्धातोः परस्य च्लेश्चिणादेशो भवति तशब्दे परतः। सामर्थ्यादात्मनेपदैकवचनं गृह्यते। उदपादि सस्यम्। समपादि भैक्षम्। तइति किम्। उदपत्साताम्। उदपत्सत॥

दीपजनबुधपूरितायिप्यायिभ्यो ऽन्यतरस्याम्॥ ६१॥

चिण् तइति वर्त्तते। दीपी दीप्तौ, जनी प्रादुर्भावे, बुध अवगमने, पूरी आप्यायने, तायृ संतानपालनयोः, ओप्यायी वृद्धौ, एतेभ्यः परस्य च्लेस्तशब्दे परतो ऽन्यतरस्यां चिणादेशो भवति। अदीपि। अदीपिष्ट। अजनि। अजनिष्ट। अबोधि। अबुद्ध। अपूरि। अपूरिष्ट। अतायि। अतायिष्ट। अप्यायि। अप्यायिष्ट॥

अचः कर्मकर्त्तरि॥ ६२॥

अजन्ताद्धातोः परस्य च्लेः कर्मकर्त्तरि तशब्दे परतश्चिणादेशो भवति। प्राप्तविभाषेयम्। अकारि कटः स्वयमेव। अकृत कटः स्वयमेव। अलावि केदारः स्वयमेव। अलविष्ट केदारः स्वयमेव। अच इति किम्। अभेदि काष्ठं स्वयमेव। कर्मकर्त्तरीति किम्। अकारि कटो देवदत्तेन॥

दुहश्च॥ ६३॥

दुह प्रपूरणे, अस्मात्परस्य च्लेश्चिणादेशो भवत्यन्यतरस्याम्। अदोहि गौः स्वयमेव। अदुग्ध गौः स्वयमेव। कर्मकर्त्तरीत्येव। अदोहि गौर्गोपालकेन॥

न रुधः॥ ६४॥

रुधिर् आवरणे, अस्मात्परस्य च्लेः कर्मकर्त्तरि चिणादेशो न भवति। अन्ववारुद्ध गौः स्वयमेव। कर्मकर्त्तरीत्येव। अन्ववारोधि गौर्गोपालकेन॥

तपोनुतापे च॥ ६५॥

नेति वर्त्तते। तप संतापे, अस्मात्परस्य च्लेश्चिणादेशो न भवति कर्मकर्त्तर्यनुतापे च। अनुतापः, पश्चात्तापः। तस्य ग्रहणमकर्मकर्त्रर्थं, तत्र हि भावकर्मणोरपि प्रतिषेधो भवति। अतप्त तपस्तापसः। अन्ववातप्त पापेन कर्मणा॥

चिण् भावकर्मणोः॥ ६६॥

धातोः परस्य च्लेश्चिणादेशो भवति भावे कर्मणि तशब्दे परतः। भावे तावत्। अशायि भवता। कर्मणि खल्वपि। अकारि कटो देवदत्तेन। अहारि भारो यज्ञदत्तेन। चिण्ग्रहणं विस्पष्टार्थम्॥

सार्वधातुके यक्॥ ६७॥

भावकर्मवाचिनि सार्वधातुके परतो धातोर्यक् प्रत्ययो भवति। आस्यते भवता। शय्यते भवता। कर्मणि। क्रियते कटः। गम्यते ग्रामः। ककारो गुणवृद्धिप्रतिषेधार्थः। यग्विधाने कर्मकर्त्तर्युपसंख्यानं विप्रतिषेधाद्धि यकः शपो बलीयस्त्वम्। क्रियते कटः स्वयमेव। पच्यते ओदनः स्वयमेव॥

कर्त्तरि शप्॥ ६८॥

कर्तृवाचिनि सार्वधातुके परतो धातोः शप्प्रत्ययो भवति। पकारः स्वरार्थः, शकारः सार्वधातुकार्थः। भवति। पचति॥

दिवादिभ्यः श्यन्॥ ६९॥

दिव् इत्येवमादिभ्यो धातुभ्यः श्यन्प्रत्ययो भवति। शपोपवादः। नकारः स्वरार्थः, शकारः सार्वधातुकार्थः। दीव्यति। सीव्यति॥

वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः॥ ७०॥

उभयत्र विभाषेयम्। टुभ्राशृ टुभ्लाशृ दीप्तौ, भ्रमु अनवस्थाने, भ्रमु चलने, द्वयोरपि ग्रहणम्। क्रमु पादविक्षेपे, क्लमु ग्लानौ, त्रसी उद्वेगे, त्रुटी छेदने, लष कान्तौ, एतेभ्यो वा श्यन् प्रत्ययो भवति। भ्राशते। भ्राश्यते। भ्लाशते। भ्लाश्यते। भ्रमति। भ्राम्यति। क्रामति। क्राम्यति। क्लामति। क्लाम्यति। त्रसति। त्रस्यति। त्रुटति। त्रुट्यति। लषति। लष्यति॥

यसो ऽनुपसर्गात्॥ ७१॥

यसु प्रयत्ने दैवादिकः तस्मान्नित्यं श्यनि प्राप्ते ऽनुपसर्गाद्विकल्प उच्यते। यसोनुपसर्गाद्वा श्यन्प्रत्ययो भवति। यस्यति। यसति। अनुपसर्गादिति किम्। आयस्यति। प्रयस्यति॥

संयसश्च॥ ७२॥

सोपसर्गार्थ आरम्भः। संपूर्वाच्च यसेर्वा श्यन्प्रत्ययो भवति। संयस्यति। संयसति॥

स्वादिभ्यः श्नुः॥ ७३॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

षुञ् अभिषवे, इत्येवमादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति। शपोपवादः। सुनोति। सिनोति॥

श्रुवः शृ च॥ ७४॥

श्रुवः श्नुप्रत्ययो भवति तत्संनियोगेन श्रुवः शृ इत्ययमादेशो भवति। शृणोति। शृणुतः। शृण्वन्ति॥

अक्षोऽन्यतरस्याम्॥ ७५॥

अक्षू व्याप्तौ भौवादिकः, अस्मादन्यतरस्यां श्नुप्रत्ययो भवति। अक्ष्णोति। अक्षति॥

तनूकरणे तक्षः॥ ७६॥

तक्षू त्वक्षू तनूकरणे, अस्मात्तनूकरणे वर्त्तमानादन्यतरस्यां श्नुप्रत्ययो भवति। अनेकार्थत्वाद्धातूनां विशेषेणोपादानम्। तक्षति काष्ठम्। तक्ष्णोति काष्ठम्। तनूकरणइति किम्। संतक्षति वाग्भिः॥

तुदादिभ्यः शः॥ ७७॥

तुद व्यथने, इत्येवमादिभ्यो धातुभ्यः शप्रत्ययो भवति। शपोपवादः। शकारः सार्वधातुकसंज्ञार्थः। तुदति। नुदति॥

रुधादिभ्यः श्नम्॥ ७८॥

रुधिर् आवरणे, इत्येवमादिभ्यो धातुभ्यः श्नम् प्रत्ययो भवति। शपोपवादः। मकारो देशविध्यर्थः। शकारः श्नाच लोप इति विशेषणार्थः। रुणद्धि। भिनत्ति॥

तनादिकृञ्भ्य उः॥ ७९॥

तनु विस्तारे, इत्येवमादिभ्योधातुभ्यः कृञश्च उप्रत्ययो भवति। शपोपवादः। तनोति। सनोति। तृणोति। कृञः खल्वपि। करोति। तनादिपाठादेव उप्रत्यये सिद्धे करोतेरुपादानं नियमार्थम्, अन्यत्तनादिकार्यं मा भूदिति। तनादिभ्यस्तथासोरिति विभाषा सिचो लुङ्ग भवति। अकृत। अकृषाः॥

धिन्विकृण्व्योर च॥ ८०॥

हिवि धिवि जिवि प्रीणनार्थाः, कृवि हिंसाकरणयोः, इत्येतयोर्द्धात्वोरुप्रत्ययो भवत्यकारश्चान्तादेशः। धिनोति। कृणोति। अतो लोपस्य स्थानिवद्भावाद्गुणो न भवति॥

क्र्यादिभ्यः श्ना॥ ८१॥

डुक्रीञ् द्रव्यविनिमयइत्येवमादिभ्यो धातुभ्यः श्नाप्रत्ययो भवति। शपोपवादः। शकारः सार्वधातुकसंज्ञार्थः। क्रीणाति। प्रीणाति॥

स्तभ्नुस्तुभ्नुस्कभ्नुस्कुभ्नुस्कुञ्भ्यः श्नुश्च॥ ८२॥

आद्याश्चत्वारो धातवः सौत्राः। स्कुञ् आप्रवणे। एतेभ्यः श्नाप्रत्ययो भवति, श्नुश्च। स्तभ्नाति। स्तभ्नोति। स्तुभ्नाति। स्तुभ्नोति। स्कभ्नाति। स्कभ्नोति। स्कुभ्नाति। स्कुभ्नोति। स्कुनाति। स्कुनोति। उदित्त्वप्रतिज्ञानात्सौत्राणामपि धातूनां सर्वार्थत्वं विज्ञायते नैतद्विकरणविषयत्वमेव॥

हलः श्नः शानज्झौ॥ ८३॥

हल उत्तरस्य श्नाप्रत्ययस्य शानज्झादेशौ भवति झौ परतः। मुष्णाण। पुष्णाण। हल इति किम्। क्रीणीहि। हाविति किम। मुष्णाति। श्न इति स्थानिनिर्देश आदेशसंप्रत्ययार्थः। इतरथा हि प्रत्ययान्तरमेव सर्वविषयं विज्ञायेत॥

छन्दसि शायजपि॥ ८४॥

छन्दसि विषये श्नः शायजादेशो भवति, शानजपि। गृभाय जिह्वया मधु। शानचः खल्वपि। बधान पशुम्॥

व्यत्ययो बहुलम्॥ ८५॥

यथायथं विकरणाः शवादयो विहितास्तेषां छन्दसि विषये बहुलं व्यत्ययो भवति। व्यतिगमनं व्यत्ययो व्यतिहारः विषयान्तरे विधानं, क्व चिद्विकरणता क्व चिच्चिविकरणता च। आखण्डा शुष्मस्य भेदति। भिनत्तीति प्राप्ते। स च न मरति। न म्रियतइति प्राप्ते। द्विविकरणता। इन्द्रो वस्तेन नेषतु। नयत्विति प्राप्ते। त्रिविकरणता। इन्द्रेण युजा तरुषेम वृत्रम्। तीर्यास्मेति प्राप्ते। बहुलग्रहणं सर्वविधिव्यभिचारार्थम्।

सुप्तिङुपग्रहलिङ्नराणां कालहलच्स्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोपि हि सिद्ध्यति बाहुलकेन॥

लिङ्याशिष्यङ्॥ ८६॥

आशिषि विषये यो लिङ् तस्मिन्परतश्छन्दसि विषये ऽङ् प्रत्ययो भवति। शपोपवादः। छन्दस्युभयथेति लिङः सार्वधातुकसंज्ञाप्यस्ति। स्यागागमिवचिवदिशकिरुहयः प्रयोजनम्। स्या। उपस्येयम्। गा। सत्यमुपगेयम्। गमि। गमेम जानतो गृहान्। वचि। मन्त्रं वोचेमाग्नये। विदेयमेनां मनसि प्रविष्टाम्। शकि। व्रतं चरिष्यामि तच्छकेयम्। रुहि। स्वर्गं लोकमारुहेयम्॥ दृशेरग्वक्तव्यः॥ * ॥ पितरं च दृशेयं मातरं च॥

कर्मवत्कर्मणा तुल्यक्रियः॥ ८७॥

कर्मणि क्रिया कर्म, कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवद्भवति। यस्मिन्कर्मणि कर्तृभूतेपि तद्वत्क्रिया लक्ष्यते यथा कर्मणि, स कर्त्ता कर्मवद्भवति। कर्माश्रयाणि कार्याणि प्रपद्यते। कर्तरि शबिति कर्तृग्रहणमिहानुवृत्तं प्रथमया विपरिणम्यते। यगात्मनेपदचिण्चिण्वद्भावाः प्रयोजनम्। भिद्यते काष्ठं स्वयमेव। अभेदि काष्ठं स्वयमेव। कारिष्यते कटः स्वयमेव। वत्करणं स्वाश्रयमपि यथा स्यात्। भिद्यते कुसूलेनेति। अकर्म-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काणां भावे लः सिद्धो भवति। लिङ्याशिष्यङिति द्विलकारको निर्देशः। तत्र लानुवृत्तेर्लान्तस्य कर्त्ता कर्मवद्भवतीति कुसूलाद् द्वितीया न भवति। कर्मणेति किम्। करणाधिकरणाभ्यां तुल्यक्रियस्य मा भूत्। साध्वसिश्छिनत्ति। साधु स्थाली पचति। धात्वधिकारात्समाने धातौ कर्मवद्भावः। इह न भवति। पचत्योदनं देवदत्तः, राध्यत्योदनः स्वयमेवेति। कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्ता कर्मवद्भवति, न कर्तृस्थभावकानां न कर्तृस्थक्रियाणाम्॥

कर्मस्थः पचतेर्भावः कर्मस्था च भिदेः क्रिया।
मासासिभावः कर्तृस्थः कर्तृस्था च गमेः क्रिया॥

तपस्तपःकर्मकस्यैव॥ ८८॥

तप संतापे, अस्य कर्ता कर्मवद्भवति, स च तपःकर्मकस्यैव नान्यकर्मकस्य। क्रियाभेदाद्विध्यर्थमेतत्। उपवासादीनि तपांसि तापसं तपन्ति। दुःखयन्तीत्यर्थः। स तापसस्त्वगस्थिभूतः स्वर्गाय तपस्तप्यते। अर्जयतीत्यर्थः। पूर्वेणाप्राप्तः कर्मवद्भावो विधीयते। तप्यते तपस्तापसः। अतप्त तपस्तापसः। तपःकर्मकस्यैवेति किम्। उत्तपति सुवर्णं सुवर्णकारः॥

न दुहस्नुनमां यक्चिणौ॥ ८९॥

दुह स्नु नम् इत्येतेषां कर्मकर्तरि यक्चिणौ कर्मवद्भावापदिष्टौ न भवतः। दुहेरनेन यक् प्रतिषिद्ध्यते। चिण् दुहेश्चेति पूर्वमेव विभाषितः। दुग्धे गौः स्वयमेव। अदुग्ध गौः स्वयमेव। अदोहि गौः स्वयमेव। प्रस्नुते गौः स्वयमेव। प्रास्नोष्ट गौः स्वयमेव। नमते दण्डः स्वयमेव। अनंस्त दण्डः स्वयमेव॥ यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानम्॥ * ॥ कारयति कटं देवदत्तः। कारयते कटः स्वयमेव। अचीकरत्कटं देवदत्तः। अचीकरत कटः स्वयमेव। उत्पुच्छयते गौः स्वयमेव। उदपुपुच्छत गौः स्वयमेव। श्रथ्नाति ग्रन्थं देवदत्तः। श्रथ्नीते ग्रन्थः स्वयमेव। अश्रन्थिष्ट ग्रन्थः स्वयमेव। ग्रथ्नाति श्लोकं देवदत्तः। ग्रथ्नीते श्लोकः स्वयमेव। अग्रन्थिष्ट श्लोकः स्वयमेव। ब्रवीति श्लोकं देवदत्तः। ब्रूते श्लोकः स्वयमेव। अवोचच्छ्लोकं देवदत्तः। अवोचत श्लोकः स्वयमेव। आत्मनेपदविधाने ऽकर्मकाणाम्। हन्ति माणवकं देवदत्तः। आहते माणवकः स्वयमेव। आवधिष्ट माणवकः स्वयमेव, आहतेति वा। विकुर्वते सैन्धवाः स्वयमेव। व्यकृषत सैन्धवाः स्वयमेव॥

कुषिरजोः प्राचां श्यन्परस्मैपदं च॥ ९०॥

कुष निष्कर्षे, रञ्ज रागे, अनयोर्धात्वोः कर्मकर्तरि प्राचामाचार्याणां मतेन श्यन्प्रत्ययो भवति, परस्मैपदं च। यगात्मनेपदयोरपवादौ। कुष्यति पादः स्वयमेव। रज्यति वस्त्रं स्वयमेव। प्राचांग्रहणं विकल्पार्थम्। कुष्यते। रज्यते। व्यवस्थितविभाषा चेयम्। तेन लिङ्लिङोः स्यादिविषये च न भवतः। चुकुषे पादः स्वयमेव। ररञ्जे वस्त्रं स्वयमेव। कोषिषीष्ट पादः स्वयमेव। रङ्क्षीष्ट वस्त्रं स्वयमेव। कोषिष्यते पादः स्वयमेव। रङ्क्ष्यते वस्त्रं स्वयमेव। अकोषि पादः स्वयमेव। अरञ्जि वस्त्रं स्वयमेव॥

धातोः॥ ९१॥

धातोरित्ययमधिकारो वेदितव्यः। आ तृतीयाध्यायपरिसमाप्तेः, यदित ऊर्ध्वमनुक्रमिष्यामो धातोरित्येवं तद्वेदितव्यम्। वक्ष्यति। तव्यत्तव्यानीयर इति। कर्त्तव्यम्। करणीयम्। धातुग्रहणमनर्थकम्। यङ्विधौ धात्वधिकारात्। कृदुपपदसंज्ञार्थं तर्हि। अस्मिन्धात्वधिकारे ते यथा स्यातां, पूर्वत्र मा भूतामिति। आर्धधातुकसंज्ञार्थं च द्वितीयं धातुग्रहणं कर्तव्यम्। धातोरित्येवं विहितस्य यथा स्यात्। इह मा भूत्। लूभ्यां लूभिरिति॥

तत्रोपपदं सप्तमीस्थम्॥ ९२॥

तत्रैतस्मिन्धात्वधिकारे तृतीये यत्सप्तमीनिर्दिष्टं तदुपपदसंज्ञं भवति। वक्ष्यति। कर्मण्यण्। कुम्भकारः। स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थम्। इतरथा हि सप्तमी श्रूयते यत्र तत्रैव स्यात्। स्तम्बेरमः, कर्णेजप इति। यत्र वा सप्तमीश्रुतिरस्ति सप्तम्यां जनेर्ड इति। उपसरजो, मन्दुरज इति। स्थग्रहणात्तु सर्वत्र भवति। गुरुसंज्ञाकरणमन्वर्थसंज्ञाविज्ञाने सति समर्थपरिभाषाव्यापारार्थम्। पश्य कुम्भं करोति कटमिति प्रत्ययो न भवति। उपपदप्रदेशा उपपदमतिङित्येवमादयः॥

कृदतिङ्॥ ९३॥

अस्मिन्धात्वधिकारे तिङ्वर्जितः प्रत्ययः कृत्संज्ञको भवति। कर्तव्यम्। करणीयम्। अतिङिति किम्। चीयात्। स्तूयात्। कृत्प्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः॥

वा ऽसरूपो ऽस्त्रियाम्॥ ९४॥

अस्मिन्धात्वधिकारे ऽसमानरूपः प्रत्ययो ऽपवादो वा बाधको भवति स्त्र्यधिकारविहितप्रत्ययं वर्जयित्वा। ण्वुल्तृचावुत्सर्गौ, इगुपधज्ञाप्रीकिरः क इत्यपवादः, तद्विषये ण्वुल्तृचावपि भवतः। विक्षेपकः। विक्षेप्ता। विक्षिपः। असरूप इति किम्। कर्मण्यणित्युत्सर्गः, आतोनुपसर्गे क इत्यपवादः, स नित्यं बाधको भवति। गोदः। कम्बलदः। नानुबन्धकृतमसारूप्यम्। अस्त्रियामिति किम्। स्त्रियां क्तिन्नित्युत्सर्गः, अ प्रत्ययादित्यपवादः, स बाधक एव भवति। चिकीर्षा। जिहीर्षा॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कृत्याः प्राङ् खुलः ॥ ९५ ॥

ण्वुल्तृचाविति वक्ष्यति, प्रागेतस्माण्ण्वुल्संज्ञकाद्यानित ऊर्ध्वमनुक्रमिष्यामः कृत्यसंज्ञकास्ते वेदितव्याः । तत्रेवोदाहरिष्यामः । कृत्यप्रदेशाः कृत्यैरधिकार्यवचने कृत्यानां कर्तरि वेत्येवमादयः ॥

तव्यत्तव्यानीयरः ॥ ९६ ॥

धातोरिति वर्तते । धातोस्तव्यत् तव्य अनीयर् इत्येते प्रत्यया भवन्ति । तकाररेफौ स्वरार्थौ । कर्तव्यम् । कर्तव्यम् । करणीयम् ॥ वसेस्तव्यत् कर्तरि णिच्च ॥ * ॥ वास्तव्यः ॥ केलिमर उपसंख्यानम् ॥ * ॥ पचेलिमा मापाः । भिदेलिमानि काष्ठानि । कर्मकर्तरि चायमिष्यते ॥

अचो यत् ॥ ९७ ॥

अञन्ताद्धातोर्यत्प्रत्ययो भवति । तकारो यतोनाव इति स्वरार्थः । गेयम् । पेयम् । चेयम् । जेयम् । अञ्यहणं किम् । यावता हलन्ताण्ण्यतं वक्ष्यति अजन्तभूतपूर्वादपि यथा स्यात् । दित्स्यम् । धित्स्यम् ॥ तकिशसिचतियतिजीनामुपसंख्यानम् ॥ * ॥ तक्कि । तक्यम् । शसि । शस्यम् । चति । चत्यम् । यति । यत्यम् । जनि । जन्यम् ॥ हनो वा वध च ॥ * ॥ वध्यम् । घात्यम् ॥

पोरदुपधात् ॥ ९८ ॥

पवर्गान्ताद्धातोरकारोपधाद्यत्प्रत्ययो भवति । ण्यतोपवादः । शप् । शप्यम् । लभ् । लभ्यम् । पोरिति किम् । पाक्यम् । वाक्यम् । अदुपधादिति किम् । कोप्यम् । गोप्यम् । तपरकरणं तत्कालार्थम् । आप्यम् ॥

शकिसहोश्च ॥ ९९ ॥

शक्लृ शक्तौ, षह मर्षणे, अनयोर्धात्वोर्यत्प्रत्ययो भवति । शक्यम् । सह्यम् ॥

गदमदचरयमश्चानुपसर्गे ॥ १०० ॥

गद व्यक्तायां वाचि, मदी हर्षे, चर गतिभक्षणयोः, यम उपरमे, एतेभ्यश्चानुपसर्गेभ्यो यत्प्रत्ययो भवति । गद्यम् । मद्यम् । चर्यम् । यम्यम् । अनुपसर्गादिति किम् । प्रगाद्यम् । प्रमाद्यम् । यमेः पूर्वेणैव सिद्धे ऽनुपसर्गनियमार्थं वचनम् ॥ चरेराङि चागुरौ ॥ * ॥ आचर्यो देशः । अगुराविति किम् । आचार्य उपनेता ॥

अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ॥ १०१ ॥

अवद्य पण्य वर्या इत्येते शब्दा निपात्यन्ते गर्ह्ये पणितव्यानिरोध इत्येतेष्वर्थेषु यथासंख्यम् । अवद्यमिति निपात्यते गर्ह्ये चेत्तद्भवति । अवद्यं पापम् । अनुद्यमन्यत् । वदः सुपि क्यप् च । पण्यमिति निपात्यते पणितव्यं चेत्तद्भवति । पण्यः कम्बलः । पण्या गौः । पाण्यमन्यत् । वर्येति स्त्रियां निपात्यते अनिरोधश्चेद्भवति । अनिरोधो ऽप्रतिबन्धः । शतेन वर्या । सहस्रेण वर्या । वृत्या ऽन्या । स्त्रीलिङ्गनिर्देशः किमर्थः । वार्या ऋत्विजः ॥

वह्यं करणम् ॥ १०२ ॥

वहेर्धातोः करणे यत्प्रत्ययो निपात्यते । वहत्यनेनेति वह्यं शकटम् । करणइति किम् । वाह्यमन्यत् ॥

अर्यः स्वामिवैश्ययोः ॥ १०३ ॥

ऋ गतौ, अस्माण्ण्यति प्राप्ते स्वामिवैश्ययोरभिधेययोर्यत्प्रत्ययो निपात्यते । अर्यः स्वामी । अर्यो वैश्यः ॥ यतो ऽनाव इत्याद्युदात्तत्वे प्राप्ते स्वामिन्यन्तोदात्तत्वं च वक्तव्यम् ॥ * ॥ स्वामिवैश्ययोरिति किम् । आर्यो ब्राह्मणः ॥

उपसर्या काल्या प्रजने ॥ १०४ ॥

उपसर्येति निपात्यते काल्या चेत्प्रजने भवति । उपपूर्वात्सर्तेर्यत्प्रत्ययः । प्राप्तकाला काल्या । प्रजनः प्रजननं प्रथमगर्भग्रहणम् । गर्भग्रहणे प्राप्तकाला । उपसर्या गौः । उपसर्या वडवा । काल्या प्रजनइति किम् । उपसार्या शरदि मधुरा ॥

अजर्यं संगतम् ॥ १०५ ॥

अजर्यमिति निपात्यते संगतं चेद्भवति । जीर्यतेर्नञ्पूर्वात्संगते संगमने कर्तरि यत्प्रत्ययो निपात्यते । न जीर्यतीत्यजर्यम् । अजर्यमार्यसंगतम् । अजर्यं नोस्तु संगतम् । संगतमिति किम् । अजरिता कम्बलः ॥

वदः सुपि क्यप् च ॥ १०६ ॥

अनुपसर्गइति वर्तते । वदेर्धातोः सुबन्तउपपदे अनुपसर्गे क्यप् प्रत्ययो भवति, चकाराद्यच्च । ब्रह्मोद्यम् । ब्रह्मवद्यम् । सत्योद्यम् । सत्यवद्यम् । सुपीति किम् । वाद्यम् । अनुपसर्गइत्येव । प्रवाद्यम् ॥

भुवो भावे ॥ १०७ ॥

सुप्यनुपसर्गइत्यनुवर्तते । भवतेर्धातोः सुबन्तउपपदे ऽनुपसर्गे भावे क्यप् प्रत्ययो भवति । यत्तु नानुवर्तते । ब्रह्मभूयं गतः । ब्रह्मत्वं गतः । देवभूयम् । देवत्वं गतः । भावग्रहणमुत्तरार्थम् । सुपीत्येव, भव्यम् । अनुपसर्गइत्येव । प्रभव्यम् ॥

हनस्त च ॥ १०८ ॥

सुप्यनुपसर्गइति वर्तते भावइति च । हन्तेर्धातोः सुबन्तउपपदे ऽनुपसर्गे भावे क्यप् प्रत्ययो भवति, तकारश्चान्तादेशः । ब्रह्महत्या । अश्वहत्या । सुपीत्येव, घातः । ण्यन्तु भावे न भवत्यनभिधानात् । अनुपसर्गइत्येव । प्रघातो वर्तते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एतिस्तुशास्वृदृजुषः क्यप् ॥ १०९ ॥

सुप्यनुपसर्गे भावदृति निवृत्तम् । सामान्येन विधानमेतत् । एति स्तु शास् वृ दृ जुष् इत्येतेभ्यः क्यप् प्रत्ययो भवति । इत्यः । स्तुत्यः । शिष्यः । वृत्यः । आदृत्यः । जुष्यः । क्यबिति वर्त्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थम् । ओरावश्यके इति ण्यतं बाधित्वा क्यबेव भवति । अवश्यस्तुत्यः । वृग्रहणे वृञो ग्रहणमिष्यते न वृङः । वार्या ऋत्विजः ॥ शंसिदुहिगुहिभ्यो वेति वक्तव्यम् ॥ * ॥ शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् ॥ आङ्पूर्वादज्जेः संज्ञायामुपसंख्यानम् ॥ * ॥ आज्यं घृतम् । कथमुपेयम् । एरेतद्रूपं, नेणः ॥

ऋदुपधाच्चाकृपिचृतेः ॥ ११० ॥

ऋकारोपधाच्च धातोः क्यप् प्रत्ययो भवति कृपिचृती वर्जयित्वा । वृत्तु । वृत्यम् । वृधु । वृद्ध्यम् । अकृपिचृतेरिति किम् । कल्प्यम् । चर्त्यम् । तपरकरणं किम् । कृत संशब्दने । ण्यदेव भवति । कीर्त्यम् ॥ पाणौ सृजेर्ण्यदुक्तव्यः ॥ * ॥ पाणिसर्ग्या रज्जुः ॥ समवपूर्वाच्च ॥ * ॥ समवसर्ग्या ॥

ईच खनः ॥ १११ ॥

खनेर्धातोः क्यप् प्रत्ययो भवतीकारश्चान्तादेशः । खेयम् । दीर्घनिर्देशः प्रश्लेषार्थः । तत्र द्वितीय इकारो ये विभाषेत्यात्वबाधनार्थः ॥

भृञो ऽसंज्ञायाम् ॥ ११२ ॥

भृञो धातोरसंज्ञायां विषये क्यप् प्रत्ययो भवति । भृत्याः कर्मकराः । भर्तव्या इत्यर्थः । असंज्ञायामिति किम् । भार्या नाम क्षत्रियः ॥ संपूर्वाद्विभाषा ॥ * ॥ संभृत्याः । संभार्याः ।

संज्ञायां पुंसि दृष्टत्वाच्च ते भार्या प्रसिद्ध्यति ।
स्त्रियां भावाधिकारोस्ति तेन भार्या प्रसिद्ध्यति ॥

मृजेर्विभाषा ॥ ११३ ॥

मृजेर्धातोर्विभाषा क्यप् प्रत्ययो भवति । ऋदुपधत्वात् प्राप्तविभाषेयम् । परिमृज्यः । परिमार्ग्यः ॥

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ ११४ ॥

राजसूय सूर्य मृषोद्य रुच्य कुप्य कृष्टपच्य अव्यथ्य इत्येते शब्दाः क्यपि निपात्यन्ते । राज्ञा सोतव्यः राज्ञा वा इह सूयते राजसूयः क्रतुः । सूसर्त्तिभ्यां क्यप् सर्त्तेरुत्वं सुवतेर्वा रुडागमः । सरति सुवति वा सूर्यः । मृषापूर्वस्य वदतेः पत्ते यति प्राप्ते नित्यं क्यब् निपात्यते । मृषोद्यम् । रोचतेऽसौ रुच्यः । कर्त्तरि क्यप् । गुपेरादेः कुत्वं च संज्ञायाम् । कुप्यम् । गोप्यमन्यत् । कृष्टे पच्यन्ते कृष्टपच्याः । कर्मकर्त्तरि निपातनम् । न व्यथते अव्यथ्यः ॥

भिद्योद्यौ नदे ॥ ११५ ॥

भिदेरुञ्छेश्च क्यब् निपात्यते नदेऽभिधेये । उञ्छेर्धत्वं च । भिनत्ति कूलं भिद्यः । उञ्छत्युदकं उद्यः । नदइति किम् । भेत्ता । उञ्छिता ॥

पुष्यसिद्ध्यौ नक्षत्रे ॥ ११६ ॥

पुषेः सिधेश्चाधिकरणे क्यब् निपात्यते नक्षत्रे ऽभिधेये । पुष्यन्त्यस्मिन्नर्था इति पुष्यः । सिद्ध्यन्त्यस्मिन्निति सिद्ध्यः । नक्षत्रइति किम् । पोषणं, सेधनम् ॥

विपूयविनीयजित्या मुज्जकल्कहलिषु ॥ ११७ ॥

विपूय विनीय जित्य इत्येते शब्दा निपात्यन्ते यथासंख्यं मुञ्ज कल्क हलि इत्येतेष्वर्थेषु बोध्येषु । विपूर्वात्पवतेर्नयतेश्च तथा जयतेर्यति प्राप्ते कर्मणि क्यञ्निपात्यते । विपूयो मुञ्जः । विपाव्यमन्यत् । विनीयः कल्कः । विनेयमन्यत् । जित्यो हलिः । जेयमन्यत् ॥

प्रत्यपिभ्यां ग्रहेश्छन्दसि ॥ ११८ ॥

प्रति अपि इत्येवंपूर्वाद्ग्रहेः क्यप् प्रत्ययो भवति छन्दसि विषये । मत्तस्य न प्रतिगृह्यम् । तस्माच्चापिगृह्यम् । छन्दसीति किम् । प्रतिग्राह्यम् । अपिग्राह्यम् ॥

पदास्वैरिबाह्यापक्ष्येषु च ॥ ११९ ॥

पदे ऽस्वैरिणि बाह्यायां पक्ष्ये चार्थे ग्रहेर्द्धातोः क्यप् प्रत्ययो भवति । पदे तावत् । प्रगृह्यं पदं, यस्य प्रगृह्यसंज्ञा विहिता । अवगृह्यं पदं, यस्यावग्रहः क्रियते । अस्वैरी परतन्त्रः । गृह्यका इमे । गृहीतका इत्यर्थः । बाह्यायाम् । ग्रामगृह्या सेना । नगरगृह्या सेना । ग्रामनगराभ्यां बहिर्भूतेत्यर्थः । स्त्रीलिङ्गनिर्द्देशादन्यत्र न भवति । पत्ते भवः पत्यः । वासुदेवगृह्याः । अर्जुनगृह्याः । तत्पक्षाश्रिता इत्यर्थः ॥

विभाषा कृतृषोः ॥ १२० ॥

कृञो वृषश्च विभाषा क्यप् प्रत्ययो भवति । करोतेर्ण्यति प्राप्ते वर्षतेर्ऋदुपधत्वाच्चित्ये क्यपि विभाषारभ्यते । कृत्यम् । कार्यम् । वृष्यम् । वर्ष्यम् ॥

युग्यं च पत्रे ॥ १२१ ॥

युग्यमिति निपात्यते पत्रं चेत्तद्भवति । पतत्यनेनेति पत्रं, वाहनमुच्यते । युग्यो गौः । युग्योश्वः । युग्यो हस्ती । युजेः क्यप् कुत्वं च निपात्यते । पत्रइति किम् । योग्यमन्यत् ॥

अमावस्यदन्यतरस्याम् ॥ १२२ ॥

अमाशब्दः सहार्थे वर्त्तते । तस्मिन्नुपपदे वसेर्द्धातोः कालेऽधिकरणे ण्यत्प्रत्ययो भवति, तत्रान्यतरस्यां वृद्धभावो निपात्यते । सह वसतोस्मिन्काले सूर्याचन्द्रमसाविति अमावास्या ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अमावस्या । एकदेशविकृतस्यानन्यत्वादमावास्याया वेत्यत्रा-मावस्याशब्दस्यापि ग्रहणं भवति ।

अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम् ।
तथैकवृत्तिता तयोः स्वरश्च मे प्रसिद्ध्यति ॥

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि ॥ १२३ ॥

निष्टर्क्यादयः शब्दाश्छन्दसि विषये निपात्यन्ते । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात्सिद्धम् । निष्टर्क्य इति कृती छेदने इत्यस्मान्निस्पूर्वात्क्यपि प्राप्ते ण्यत् । आद्यन्तविपर्ययश्च, निसश्च षत्वं निपात्यते । निष्टर्क्यं चिन्वीत पशुकामः । देवशब्दउपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घस्तुगभावश्च । देवहूयः । प्रपूर्वादुत्पूर्वाच्च नयतेः क्यप् । प्रणीयः । उन्नीयः । उत्पूर्वाच्छिषेः क्यप् । उच्छिष्यम् । मृङ् प्राणत्यागे, स्तृञ् आच्छादने, ध्वृ हूर्छने, एतेभ्यो यत्प्रत्ययः । मर्यः । स्तर्या । स्त्रियामेव निपातनम् । ध्वर्यः । खनेर्यत् । खन्यः । एतस्मादेव ण्यत् । खान्यः । देवशब्दउपपदे यजेर्यत् । देवयज्या । स्त्रीलिङ्गनिपातनम् । आङ्पूर्वात्पृच्छेः क्यप् । आपृच्छ्यः । प्रतिपूर्वात्सीव्यतेः क्यप् षत्वं च । प्रतिषीव्यः । ब्रह्मण्युपपदे वदेर्ण्यत् । ब्रह्मवाद्यः । भाव्यः । स्ताव्यः । भवतेः स्तौतेश्च ण्यत् आवादेशश्च भवति । उपपूर्वस्य चिनोतेर्ण्यदायादेशौ । उपचाय्यपृडम् । पृडे चोत्तरपदे निपातनमेतत् ॥ हिरण्यइति वक्तव्यम् ॥ * ॥ हिरण्यादन्यत्र उपचेयपृडमेव ।

निष्टर्क्ये व्यत्ययं विद्यान्निसः षत्वं निपातनात् ।
ण्यदायादेश इत्येतावुपचाय्ये निपातितौ ॥
ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः ।
ण्यदेकस्माद्यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः ॥

ऋहलोर्ण्यत् ॥ १२४ ॥

पञ्चम्यर्थे षष्ठी, ऋवर्णान्ताद्धातोर्हलन्ताच्च ण्यत्प्रत्ययो भवति । कार्यम् । हार्यम् । धार्यम् । वाक्यम् । पाक्यम् ॥

ओरावश्यके ॥ १२५ ॥

अवश्यंभाव आवश्यकम् । उवर्णान्ताद्धातोर्ण्यत् प्रत्ययो भवत्यावश्यके द्योत्ये । यतोपवादः । लाव्यम् । पाव्यम् । आवश्यके इति किम् । लव्यम् । आवश्यके द्योत्यइति चेत्स्वरसमासानुपपत्तिः । अवश्यलाव्यम् अवश्यपाव्यमिति । नैष दोषः । मयूरव्यंसकादित्वात्समास उत्तरपदप्रकृतिस्वरेच यत्नः करिष्यते॥

आसुयुवपिरपिलपित्रपिचमश्च ॥ १२६ ॥

आङ्पूर्वात्सुनोतेः यु वपि रपि लपि त्रपि चम् इत्येतेभ्यश्च ण्यत् प्रत्ययो भवति । यतोपवादः । आसाव्यम् । याव्यम् । वाप्यम् । राप्यम् । लाप्यम् । त्राप्यम् । आचाम्यम् । अनुक्तसमुच्चयार्थश्चकारः । दभि । दाभ्यम् ॥

आनाय्यो ऽनित्ये ॥ १२७ ॥

आनाय्य इति निपात्यते अनित्ये ऽभिधेये नयतेराङ्पूर्वाण्ण्यदायादेशौ निपात्येते । आनाय्यो दक्षिणाग्निः । रूढिरेषा । तस्मादनित्यविशेषे दक्षिणाग्नावेवावतिष्ठते । तस्य चानित्यत्वं नित्यमजागरणात् । यश्च गार्हपत्यादानीयते दक्षिणाग्निराहवनीयेन सहैकयोनिस्तत्रैतन्निपातनं न दक्षिणाग्निमात्रे । तस्य हि योनिर्विकल्प्यते । वैश्यकुलाद्वित्तवतो भ्राष्ट्राद्वा गार्हपत्याद्वेति ।

आनाय्यो ऽनित्यइति चेद्दक्षिणाग्नौ कृतं भवेत् ।
एकयोनौ तु तं विद्यादानेयो ह्यन्यथा भवेत् ॥

प्रणाय्यो ऽसंमतौ ॥ १२८ ॥

अविद्यमाना संमतिरस्मिन्नित्यसंमतिः । संमननं संमतिः । संमतता पूजा । प्रणाय्य इति निपात्यते ऽसंमतावभिधेये । प्रणाय्यश्चोरः । असंमताविति किम् । प्रणेयोन्यः । यद्येवं कथमेतत् । ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्यायान्तेवासिने नान्यस्मै कस्मै चनेति । संमतिरभिलाषोप्युच्यते । तदभावेन निष्कामतया असंमतिरन्तेवासी भवति । तस्मै निष्कामाय मोक्षार्थं यतमानायान्तेवासिने प्रणाय्याय ब्रह्म प्रब्रूयादिति युज्यते ॥

पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ॥ १२९ ॥

पाय्यादयः शब्दा निपात्यन्ते यथासंख्यं,माने हविषि निवासे सामिधेन्यां चाभिधेयायाम् । पाय्य इति माङो ण्यत्प्रत्यय आदेः षत्वं च निपात्यते । माने । पाय्यं मानम् । मेयमन्यत् । संपूर्वान्नयतेर्ण्यदायादेशावुपसर्गदीर्घत्व च निपात्यते । सान्नाय्यं हविः । सन्नेयमन्यत् । रूढित्वाच्च हविर्विशेषएवावतिष्ठते । निपूर्वाच्चिनोतेर्ण्यदायादेशावादिकुत्वं च निपात्यते । निकाय्यो निवासः । निचेयमन्यत् । धाय्येति धाञो ण्यत्प्रत्ययो निपात्यते सामिधेनी चेत्सा भवति । धाय्या सामिधेनी । धेयमन्यत् । सामिधेनीशब्द ऋग्विशेषस्य वाचकः तत्र च धाय्येति न सर्वा सामिधेन्युच्यते किं तर्हि का चिदेव । रूढिशब्दो ह्ययं तथा चासामिधेन्यामपि दृश्यते धाय्याः शंसत्यग्निर्नेता त्वं सोमक्रतुभिरिति ॥

क्रतौ कुण्डपाय्यसंचाय्यौ ॥ १३० ॥

कुण्डपाय्य संचाय्य इत्येतौ शब्दौ निपात्येते क्रतावभिधेये

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुण्डशब्दे तृतीयान्तउपपदे पिबतेर्द्धातोरधिकरणे यत्प्रत्ययो निपात्यते युक्त्व । कुण्डेन पीयते ऽस्मिन्सोम इति कुण्डपाय्यः क्रतुः । यतो ऽनाव इति स्वरः । संपूर्वाच्चिनोतेर्ण्यदायादेशो निपात्यते। संचीयते ऽस्मिन्सोम इति संचाय्यः क्रतुः। क्रताविति किम् । कुण्डपानम् । संचेयः ॥

अग्नौ परिचाय्योपचाय्यसमूह्याः ॥ १३१ ॥

परिचाय्य उपचाय्य समूह्य इत्येते शब्दा निपात्यन्ते अग्नावभिधेये । परिपूर्वाच्चिनोतेर्ण्यदायादेशो निपात्यते । परिचाय्यः । उपचाय्यः । संपूर्वाद्वहेः संप्रसारणं दीर्घत्वं च निपात्यते । समूह्यं चिन्वीत पशुकामः । अग्नाविति किम् । परिचेयम् । उपचेयम् । संवाह्यम् ॥

चित्याग्निचित्ये च ॥ १३२ ॥

चित्यशब्दो ऽग्निचित्याशब्दश्च निपात्येते । चीयते ऽसौ चित्यो ऽग्निः । अग्निचयनमेवाग्निचित्या । भावे यकारप्रत्ययस्तुक् च । तेनान्तोदात्तत्वं भवति । अग्नावित्येव । चेयमन्यत् ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ प्रथमस्तबकावशेषः ॥

यत्र षड्ऋतुके विभागे,

सीमन्ते नवनीपकं करतले लीलारविन्दं नव-
स्निग्धं लोध्ररजः कपोलफलके बन्धूकमालां गले ।
कर्णे वञ्जुलपल्लवं स्तवकिनं मल्लीस्रजं कुन्तले
बिभ्रत्यो व्रजसुभ्रुवः प्रतिदिनं कृष्णं सदोपासते ॥ ११६ ॥

सीमन्त इति नीपारविन्दादीनि क्रमेण वर्षादिलक्षणसूचकानि । वञ्जुलोऽशोकः ॥ ११६ ॥

यस्मिन् मञ्जुलकुञ्जमण्डपकुलं नानामणीन्द्रालय-
स्पर्धावर्धितसौभगं पिककुलैर्भृङ्गैश्च निष्कूजितम् ।
यस्मिन्नोषधयो ज्वलन्ति रजनौ दीपायिताः सौरभं
कस्तूरीहरिणाङ्गना विदधते लूमैश्चमर्यो मृजाम् ॥ ११७ ॥

यस्मिन् वर्णितलक्षणे वृन्दावने मञ्जुलं कुञ्जमण्डपकुलमस्ति,नानामणीन्द्रा वैदूर्यादयस्तन्मयैरालयैर्गेहैः सह या स्पर्धा तस्यां वर्धितं सौभगं यस्य तत्,निष्कूजितमिति कर्म क्तान्तं, ततश्च ते भृङ्गादय एव यस्य गुणस्तवनार्थं वन्दिजनायन्त इति भावः । लूमैः पुच्छैः, "पुच्छोऽस्त्री लूमलाङ्गूले", इत्यमरः । मृजां मार्जनीकृत्यं, विदधते कुर्वन्ति ॥ ११७ ॥

एवंभूतस्य वृन्दावनस्य मध्ये, इन्द्रनीलमणिहारयष्टिरिव, इन्दीवरमालेव, कज्जलपरिखेव, असितशाटीव, वृन्दाटवीदेव्याः, काचन यमुना नाम नदी ॥ ११८ ॥

इन्द्रनीलेति लावण्येन,इन्दीवरेति शैत्यसौगन्ध्यसौकुमार्यैः, कज्जलेति लोचनरोचकत्वेनांशेन, असितशाटीत्यव्यभिचारिनेपथ्यसाधनत्वेन ॥ ११८ ॥

या खलु सतरङ्गापि नतरङ्गाधायिका, सकमलापि न—श्यत्कमला, ससारसापि विसारसारस्या, मज्जनसुखदापि नमज्जनसुखदा[1] ॥ ११९ ॥

सतरङ्गा तरङ्गसहिता, नतानां नम्रत्वाद्भक्तानां रङ्गस्य प्रेमसुखस्याधायिका, अर्पयित्री । सकमला पद्मसहितापि न श्यन्ति न ह्रासं प्राप्नुवन्ति कमलानि जनानि यस्याः सा, "शो तनूकरणे" शश्वन्तः, "सलिलं कमलं जल"मित्यमरः, "णश अदर्शने" इत्यस्य रूपे प्रथमोपस्थापिते विरोधः । सारसः पत्ती, विसारा मत्स्यास्तेषां सारस्यं यस्यां सा। नमतां जनानां सुखदा ॥ ११९ ॥

विविधलतिकाकारचित्रविचित्रितकञ्चुलिकयेव चिन्मणिशैवाललतिकावितत्या परिवृतवक्षःस्थलविलासिरथाङ्गपयोधरा कलितकह्लारादिपरागपटलचित्रपटा भ्रमद्भ्रमरघटाबद्धवेणिरिन्दीवरनयना विकसदरविन्दमुखी प्रफुल्लहल्लकलसदधरौष्ठी सारससारसनाञ्चितपुलिननितम्बा कलहंसकहंसका मूर्तेव रमणीयतादेवी तरलतरङ्गहस्तेनेव जलजकुसुमैः श्रीकृष्णाराधनमबाधमनिशमेव कुर्वाणा जरीजृभ्यते ॥ १२० ॥

चित्रूपाणां मणिमयीनां शैवाललतिकानां वितत्या निमज्ज्योद्वृत्तत्वेन परिवृतावावृतौ यमुनाया मध्यदेश एव वक्षःस्थलं तत्र विलासिनौ रथाङ्गावेव पयोधरौ यस्याः सा । सारसाः पक्षिण एव कूजनसाधर्म्येण सारसनं काञ्ची तेनाञ्चितः पुलिनरूपो नितम्बो यस्याः सा । कलहंसक[2] एव हंसकः पादकटकं यस्याः सा । जरीजृभ्यतेऽतिशयेन प्रकाशते ॥ १२० ॥

यस्यां चोभयोरेव कूलयोः कुसुमभरभज्यमानविटपविटपिपटलप्रतिबिम्बेन सलिलान्तरेऽपि कुसुमितं काननान्तरमिव व्यञ्जयन्त्यां सह प्रतिबिम्बितं विहगकुलमपि वैसारिणा यच जिघत्सवस्तुण्डेन खण्डयन्तः क्षणमवतिष्ठन्ते ॥ १२१ ॥

---

१ विरोधाभासानुरोधीपदविभागोऽत्र परित्यक्तो, नञर्थेनशब्दादिना समासेऽपि स्फुटतरं तदनुभवात् ।

२ हंसकहंसक इति यमकसौष्ठवप्रतिपत्तये कलहंसशब्दात् कन् प्रत्ययोऽङ्गीकृतः । कलहंसहंसका इति पाठान्तरे हंसहंस इतीयदेव यमकं प्रत्येतव्यम् ;

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कुसुमानां भरेणेव भज्यमानाः प्राप्यमाणभङ्गा विटपाः पल्लवा यस्य तथाभूतस्य विटपिसमूहस्य प्रतिबिम्बेन सह प्रतिबिम्बितं विगहकुलं तत्रस्थपक्षिसमूहं जिघत्सवोऽत्तुमिच्छवो वैसारिणा मत्स्या अवतिष्ठन्ते, "समक्षग्रविभ्यः स्थ" इत्यात्मनेपदम् ॥ १२१ ॥

रजनावपि बिम्बितं नक्षत्रग्रहनिकरमपि सर्वतः केनापि विकीर्णं लाजजालमिव मन्यमानाः शफरा अपि प्रत्येकमनुमुत्कण्ठन्ते ॥ १२२ ॥

शफराः श्रोष्ठीनाममत्स्यभेदाः ॥ १२२ ॥

मध्ये च यस्याः कर्पूरपूरमयानीव तिमिरनिकरोद्वान्तकान्तकौमुदीशकलानीव वृन्दावनदेव्याः* श्रीखण्डखण्डाङ्गरागपटलानीव विस्रस्तवेणीदण्डान्तरान्तराविराजमानमालतीमाल्यखण्डानीव नवानि पुलिनानि ॥ १२३ ॥

कर्पूरप्रवाहमयानीत्यनेन शैत्यसौगन्ध्यशौक्ल्यं ध्वनितं, तत्श्च मृगमदप्रवाहमय्या, अपीति व्यञ्जितयोत्प्रेक्षया जीवितो विरोधोऽपि द्योतितः ।

ननु कर्पूरपूरमयत्वेनोत्प्रेक्षमे चेत् पुलिनानि, तर्हि कथं तेषां स्थैर्यमित्याशङ्क्यान्यथोत्प्रेक्षते तिमिरेति ।

ननु तर्हि कुतः परस्परं पुनरपि बाध्यबाधकत्वाभावस्तेषामित्याशङ्क्य पुनरप्यन्यथोत्प्रेक्षते श्रीखण्डेति ।

ननु तर्हि नदीमध्यगतान्यपि तानि तया कथं न वाहितानीति पुनरप्याशङ्क्य पुनस्तेऽप्यन्यथा नदीसहितान्येव तान्युत्प्रेक्षते विस्रस्तेति ॥ १२३ ॥ ॥

येषु च कुत्रापि नवनवसमुज्जृम्भमाणमरकताङ्कुरायमाणतृणाङ्कुरेषु विविधान्येव कुसुमोपवनान्यन्तरान्तरा मञ्जुलानि कुञ्जानि च प्रतिपुलिनोपवनं चिन्मणिमयमण्डपाश्च ॥ १२४ ॥

येषु पुलिनेषु मध्ये, कुत्रापि केषुचित्, तेनान्यानि बहूनि पुलिनानि तृणगुल्मादिरहितानि स्वच्छवालुकामयानि सन्ति रासनाट्यलीलार्थमिति ॥ १२४ ॥

येषामङ्गनेषु सारससरारिकुररचक्रवाककलहंसादिभिः सह तत्काननचराः शुकपिकजीवंजीवचकोरप्रभृतयो विहंगमाः सरभसमेव कृष्णकथालापेन मधुरगोष्ठीमिव कुर्वन्तो वर्तन्ते, उभयतश्च पार्श्वयोर्यस्या विविधमणिबद्धेषु तटेष्वन्तरान्तरा मरकतकुरुविन्दवैदूर्यविद्रुमादिविविधमणिगणनिर्मिता अवतारः, येषामभिमुखसमानमुद्घटिततया तटयोरेव सोपानपरंपरे शोभादेव्या दशनपङ्क्ती इव दृश्येते ॥ १२५ ॥

सारसादिभिर्जलचरैः, शुकादयः स्थलचराः, यस्या यमुनाया, द्वयोः पार्श्वयोः, अवतीर्यन्त एभिरित्यवतारा, घाट इति ख्याताः ॥ १२५ ॥

उभयतश्च येषां तिरस्कृतमणिमण्डपानि लतामन्दिरमण्डलानि ॥ १२६ ॥

येषामवताराणामेकैकेषाम्, उभयतश्चोभयोरुभयोर्वामदक्षिणपार्श्वयोः ॥ १२६ ॥

तानि च यथा,

चत्वारस्तरवश्चतुर्षु मरुचः कोणेषु तेषामधो
द्वे द्वे चोभयतः प्रिये इव लते विष्वक् तथावर्धताम् ।
तानाक्रम्य परस्परात्तवपुषः पुष्पैः फलैः पल्लवैः
साङ्गोपाङ्गमणीन्द्रमण्डपरुचं कुर्वन्ति सर्वा यथा ॥ १२७ ॥

चतुर्षु कोणेषु चत्वारस्तरवः सरुचः, रुगित्युपलक्षणं, स्थैर्यदैर्घ्यविस्तारैरपि तुल्या ज्ञेयाः, तेषामेकैकशोऽधः, उभयत उभयोरुभयोः पार्श्वयोः, द्वे द्वे, एका दक्षिणे पार्श्वे, एका वामे, एवं द्वे द्वे, विष्वगुपरि चतुर्वर्त्तु च, औचित्यानुरूपेण, तथा, अवर्धतां व्याप्तवत्यौ, "वर्ध छेदनपूरणयो"रित्यस्य परस्मैपदिनो रूपं, यथा तांस्तरूनाक्रम्य परस्परमात्तानि गृहीतानि जटितानि वपूंषि यासां तथाभूताः सत्यः सर्वा अष्टावेव लताः पुष्पादिभिरङ्गोपाङ्गसहितमणिमयमण्डपानामिव रुचं कान्तिं कुर्वन्ति ॥ १२७ ॥

तत्प्रकारो यथा ।

स्तम्भास्तेऽमी वडभ्यो नियतकुसुमिताः
स्कन्धशाखास्तदीया
वल्लीनां पुष्पितानामपि विटपकुलैः
कल्पितानि च्छदींषि ।
केश्चिद् द्वारोऽपि भङ्गीविरचनरुचिरा
भित्तयः केश्चिदन्यैः
पुष्पैः प्रालम्बचूडाकलशविरचना
चामरादीनि केश्चत् ॥ १२८ ॥

ते प्रसिद्धा अमी पूर्वोक्ताश्चत्वारस्तरवो भूमित्वचूभूयोत्थितत्वेन चत्वारः स्तम्भाः, तदीयास्तरुसंबन्धिन्यः स्कन्धशाखा नियतं सुष्ठु वक्रीभूय परस्परं मिलिताश्चतस्रो वडभ्यः, वल्लीनां विटपकुलैः पल्लवसमूहैश्छदींषि छाउनीति ख्यातानि

* वृन्दाटवीदेव्याः, इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कल्पितानि, कैश्चिद्वल्लीनां विटपकुलैर्भङ्ग्या संनिवेशकौशलेन यद् विरचनं तेन रुचिराश्चतस्रो द्वारोऽपि कल्पिताः, तथा तैरेवान्यैः कैश्चिद्वित्तयः, तथा पुष्पैस्तादृशतादृशविन्यासवैशिष्ट्येन स्थितैः प्रालम्बादीनीति, तत्र प्रालम्बानि पटलेभ्यो लम्बमानमाल्यानि, विरचना विविधपत्रावल्यादिभी रचना, "रचना स्यात् परिस्यन्द" इत्यमरः ॥ १२८ ॥

अथ यस्य वृन्दावनस्य मध्ये पुरुषावतार इव सहस्रशिराः सहस्रपात्, महाविनोदीवामलमणिकटको विविधमणिकुण्डलश्च, शब्दग्राम इव विविधधातुयोनिः, ध्रुव इव भूभृत्कुलभूषणोऽपि भगवदनुग्रहेण लङ्घितसकलोपरितनलोकः ॥ १२९ ॥

सहस्रेमसंख्यानि शिरांसि मस्तकानि शृङ्गाणि च, पादाश्चरणाः प्रत्यन्तशैलाश्च, "पादाः प्रत्यन्तपर्वता" इत्यमरः । विनोदो विलासः, कटकं वलयः, पक्षे "कटकोऽस्त्री नितम्बोऽद्रे"रित्यमरः, मणिमयानि कुण्डलानि लातीति सः । धातवो भू-या-वा-दिव-प्रभृतयो मनःशिलादयश्च । भूभृद् राजा पर्वतश्च, "भूभृद् भूमिधरे नृपे," इत्यमरः, उपरितनलोकः स्वर्लोकः, पक्षे वैकुण्ठः ॥ १२९ ॥

सुनासीरनासीर[2] इव दुरवगाहगुहालंकृतः, मलय इव सर्वतो भद्रश्रीरपि न भुजगावासः, हर इव चन्द्रचूडोऽप्यनुयः, भगवानिव विचित्रवनमालः, आनन्द इव महोत्सवेष्टः ॥ १३० ॥

सुनासीर इन्द्रः, नासीरस्तस्य सेना, गुहः कार्त्तिकेयः, पक्षे "देवखातबिले गुहे"त्यमरः । सर्वतो भद्रश्रीश्चन्दनतरुश्च, पक्षे सर्वेभ्योऽपि भद्रा श्रीः समृद्धिर्यस्य सः । पर्वतपक्षे चूडा शृङ्गम्, अनुयः सौम्यः । वनमाला, आपादलम्बिमाल्यं, वनश्रेणी च । महति उत्सवे मङ्गलकर्मणि, इष्टः प्रशस्तः, पक्षे महद्भिरुत्सवैर्वेष्टो वेष्टनं यस्य सः, "उत्सः प्रस्रवण"मित्यमरः ॥ १३० ॥

भूवलय इव लोकालोकरमणीयः, आनन्दकन्दरवटोऽप्यानन्दकन्दरावटः, वनराजीसत्त्वानामप्यवनराजी-सत्त्वानां गोवर्धनो नाम गिरिवरः ॥ १३१ ॥

लोकालोकस्तचामा पर्वतः, पक्षे लोककर्तृकदर्शनम् । आनन्दानां कन्दं मूलं रान्ति तथाविधा वटवृक्षा यत्र सः, आनन्दरूपः कन्दराणामवटो गर्तो यत्र सः । सत्त्वानां प्राणिनामवनेन पालनेन राजितुं शीलं यस्य सोऽवनराजी, सत्त्वानां कीदृशानां, वनराजीषु सत्त्वं वर्तमानत्वं येषां तेषां, मृगादीनामित्यर्थः । विरोधाभासद्योतकोऽपिकारः ॥ १३१ ॥

१ सहस्राणीति वक्तुमुचितम्, जातिपरं वा ।
२ नासिरे पुंस्त्वमपि शिष्टेष्टेः ।

यः खलु कैलासेनापि नोपमीयते, अरूप्यत्वात्, न च मेरुणापि, अजातरूपत्वात् ॥ १३२ ॥

अरूप्यत्वात्, रूपकेण वर्णयितुमशक्यत्वात्, अदृष्टोपमत्वादित्यर्थः, पक्षे रूप्यं रजतं तन्मयत्वाभावात्, कैलासशैलो हि रजतमयो भवति, अयं तु विविधमणिशिलामय इति भावः । अजातरूपत्वात्, नित्यसिद्धरूपत्वात्, मेरुस्तु प्रकृते जन्यरूप इति, पक्षे जातरूपं कनकं तन्मयत्वाभावात्, मेरुर्हि कनकमयो भवतीति ॥ १३२ ॥

यच्च आदिरसवर्णनावर्णसमूह इव रूपकोपरूपकव्यापार इव माधुर्योपयोगी न-टवर्गः ॥ १३३ ॥

आदिरसस्य वर्णनायां यो वर्णसमूहस्तत्र माधुर्योपयोगी टवर्गो न भवति, तथाह्युक्तं,

"मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गो रणौ लघू ।
अवृत्तिर्मध्यवृत्तिश्च माधुर्ये घटना मता" ॥

इति । रूपकोपरूपकयोर्नाटकनाटिकयोर्यो व्यापारस्तत्र माधुर्यमुपयुङ्क्ते, नटानां नर्तकानां वर्गो यत्र गोवर्धने, नटाः शोणालु इति ख्यातास्तेषां वर्गोऽपि माधुर्योपयोगी, "नटकट्टङ्कटुण्टुका" इत्यमरः ॥ १३३ ॥

यच्च किल कालीयकतरुमूलवाहिना निर्झरेण परिमलपरिभावितासूपत्यकासु सकला एव तृणजातयो गन्धतृणतामभिपद्यन्ते ॥ १३४ ॥

कालीयकः कलम्बक इति ख्यातः, भावितासु, वासितासु, उपत्यकासु शैलसमीपवर्तिभूमिषु ॥ १३४ ॥

हरिट्वटुममूलवाहिषु शुकपक्षच्छविषु निर्झरेषु कृतावगाहाः सर्व एव रुरुचमरचमरुगवयगन्धर्वसृमरराहिषशशसंवरप्रभृतयो हरिणजातयो हरिन्मणिघटिता * इव परस्परं न परिचिन्वन्ति, यश्च क्वचन महानीलमणिशिलामयूखच्छविच्छुरितस्फटिकमणिगण्डशैलः कलितनीलनिचोलो हलधर इव दरीदृश्यते, क्वचन चारुचामीकरशिलाकिरणच्छुरिताधोभागमहामरकतगण्डशैलः पीताम्बरो नारायण इव ॥ १३५ ॥

हरिन्मणिर्मरकतं, दरीदृश्यते, दृशिर्यङन्तः, चामीकरं कनकम् ॥ १३५ ॥

क्वचन कनकमणिशिलापट्टसंघट्टभासुरहीरकोपलभित्तिर्हरगौरीविग्रह इव, क्वचन च मरकतगण्डशैलमनूभयतः प्रपातिनिर्झरजलो मण्डलीकृतकोदण्डः शीतापतिरिव ॥ १३६ ॥

*—मणिद्रवघटिता इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनुलतीकृत्य, उभयतो भगद्वये वक्रीभूय प्रपातीनि प्रपतनशीलानि निर्झराणां जलानि यत्र सः ॥ १३६ ॥

क्वचन च रजतगण्डशैलोपरि परिगतकमलरागशिलापट्टसंनिवेशो महाहंसाधिरूढः कमलयोनिरिव ॥ १३७ ॥

कमलयोनिर्ब्रह्मा ॥ १३७ ॥

क्वचन चोच्चतरमणिगण्डशैलशिखरतः प्रबलतरतरसा निस्यन्दमानेन विविधमणिकिरणच्छटाच्छुरितेन निर्मलनिर्झरेण ऋजूभूय लम्बमानः सुरपतिकोदण्ड इव ॥ १३८ ॥

प्रबलतरतरसातिवेगिना निष्यन्दमानेन निष्पतता निर्मलनिर्झरेण हेतुना विविधमणीनां किरणच्छटाभिश्छुरितेन तेनास्य पीतरक्तनीलादिविविधवर्णमयत्वेनेन्द्रधनुःसारूप्यम् ॥ १३८ ॥

क्वचन च विविधमणिपाषाणशबलीभावभासुरस्य सानुनः समुदित्वरेण किरणनिकरेण नभसि निर्मीयमाणः शक्रशरासन इव ॥ १३९ ॥

शबलीभावो मिश्रीभावस्तेन भासुरस्य, विविधकान्तिमत इत्यर्थः, सानुनः प्रस्थदेशस्य, "प्रस्थः सानुरस्त्रियां"मित्यमरः ॥ १३९ ॥

क्वचन च वैदूर्यमणिशिखरशिखासमुद्भूतकिरणकन्दलीभिरनवच्छिन्नधूमलेखाभ्रमेण भ्रमद्भूम्याटनिकर इव ॥१४०॥

धूम्याटो धूमलवर्णः पक्षिविशेषः ॥ १४० ॥

क्वचन च श्रीकृष्णस्य मणिसिंहासनायमानसुसीमसुषीमशिलाविलासः ॥ १४१ ॥

शोभना सीमा यासां तासां सुषीमाणां शीतलानां शिलानां विलासो यत्र सः, "सुषीमः शिशिरो जड" इत्यमरः ॥ १४१ ॥

क्वचन च श्रीकृष्णस्य रासविलासविशेषसमुचितमणिस्थलीपरिसरः, क्वचन च श्रीकृष्णस्य मणिमन्दिरायमाणकन्दरनिकरः, क्वचन च पवनसमुद्भूतविविधकुसुमपरागविततिवितन्यमानकृष्णार्थकसितवितानः, क्वचन चामूलविकसितलोध्रतरुनिकरेणाभितोऽभितः प्रतानितपटकुटिमपटलायमानः ॥ १४२ ॥

वितानश्चान्दोवा इति ख्यातः, प्रतानितैर्विस्तारितैः पटैरेव कुट्टिमं शिल्पचातुर्येणोच्चीकृतमणिबद्धभूभागविशेषस्तत्समूह इवावरन् ॥ १४२ ॥

धवखदिरपलाशशल्लकीनिचुलशिंशपाकरञ्जमधूकपनसप्रियालतालीप्रभृतिभिर्वनराजिभिरपहतातपः सहचनिवैरविसदृशसत्त्वसमाकुलश्च, अपरे तत्पादा अपि तद्गुणा एव ॥ १४३ ॥

शल्लकी गजभक्ष्यगन्धवृक्षः, निचुलो हिजल इति ख्यातः, करञ्जः करंजः, वनराजिभिः कर्त्रीभिः, धवादिभिः करणैः, अपहृत आतपो यत्र सः । सहजं निर्वैरं वैराभावो येषां तैर्विसदृशैर्व्याघ्रमृगादिभिः सत्त्वैः समाकुलः ॥ १४३ ॥

एवमुक्तप्रकारगोवर्धनसमः कश्चन तस्यादूरत एव नन्दीश्वराख्यो द्वितीय इव नन्दीश्वरः क्षितिधरः, यश्च चारुतरधवाक्रीडोऽपि माधवाक्रीडः, किंशुकवानपि न किं-शुकवान्, सुप्रस्थशोभोऽप्यसुप्रस्थशोभः ॥ १४४ ॥

नन्दीश्वरो महेशः, अत एवास्य शुभ्रवर्णत्वमायातम् । चारुतरैर्धववृक्षैराक्रीड उद्यानं यत्र सः, माधवस्य, श्रा सम्यक् क्रीडा यत्र सः, । अत्र नञर्थो माशब्दो विरोधाभासगमकः । शुकवान् किं न, अपितु शुकयुक्तः । असूनां प्राणानां प्रस्था प्रकर्षेण तिष्ठन्ती शोभा भक्ष्यपेयादिवस्तुसौलभ्यलक्षणा यत्र सः । यद्वा न सुष्ठु प्रस्थशः प्रस्थपरिमाणेन भा कान्तिर्यस्य, अपितु महाभारादिपरिमाणेनैव कथंचिदित्यर्थः । "प्रस्थोऽस्त्री सानुमानयो"रित्यमरः ॥ १४४ ॥

वामन इव सुरसार्थसमुत्पादनखनिः-स्यन्दमानसलिलनिर्झरशीतशिवः ॥ १४५ ॥

शोभना रसा त्रिपादपरिमिता प्रार्थिता वृत्तिकरी भूमिः, तदर्थं समुद्गतस्य पादस्य नखाविःस्यन्दमानेन सलिलनिर्झरेण गङ्गाख्येन शीतः शीतलीकृतः शिवो येन सः । यद्वा सुरसार्थं देवसमूहे विषये समुत् सहर्षः, इति पृथक् पदं, तथा पादनखेति पूर्ववदर्थः । गिरिपक्षे सुरसानामर्थानां वस्तूनां सम्यगुत्पादन्यः खनयो यत्र सः, तथा सलिलनिर्झरेषु गङ्गायां घोष इतिवल्लक्षणया तत्तटेषु शीतशिवं शीफमुद्गरीति ख्याता लता यत्र सः । "विदुः शीतशिवं शम्यां शैलेयशतपुष्पयो"रिति विश्वः ॥ १४५ ॥

प्रौढमानिनीजन इव सहचरीप्रसादरचनाभेद्यमनःशिलासारः, हर इव सदोपगूढशैलजः ॥ १४६ ॥

सहचरीभिः सखीभिः प्रसादरचनाभिरेव भेद्यो भेत्तुं शक्यो मन एव शिलासारो यस्य सः, पक्षे सहचरी पीतझिण्टी तस्याः प्रसादरचना प्रफुल्लतापरिपाटी तया, अभेद्य आकृत्या भिवो भवितुमनर्हो मनःशिलासारो यत्र सः । सदा, उपगूढा, आलिङ्गिता, शैलजा पार्वती येन सः । पक्षे, उप समीपे गूढं शैलजं शिलाजतु यत्र सः । "शैलजं तु शिलाजत्वि"त्यमरः ॥ १४६ ॥

१ अत्रोच्चारणसाम्याद्यमकता ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यच्च काचन राजधानी व्रजपुरपुरंदरस्य । यच्च खलु मेखलाशृङ्खलादिष्वेव खल इति, स्वस्वसरःस्वेव मत्सर इति, चन्द्र एव दोषाकर इति, परिमलादिष्वेव मल इति, छत्रचामरादिदण्डेष्वेव दण्ड इति, नीविरसनादिबन्ध इति, चन्दनकुङ्कुमादिपङ्केष्वेव पङ्क इति, समाध्यादौ केवलमाधिरिति, आपीडादौ पीडेति शब्दः श्रूयते ॥ १४७ ॥

आदिशब्देभ्यो यथाक्रमेण व्रीहिखलसुखलम्पटमुखलावण्येषु, तथा धूमलश्यामलकमलेषु, इक्षुदण्डभुजदण्डतिथिनक्षत्रदण्डेषु, तथा काव्यबन्धे, चन्दनकस्तूरीकर्पूरपङ्केषु, तथा राजाधिकारे, तथा स्तनोपपीडालिङ्गने, इति शब्दः श्रूयते, इति पदद्वयेन सर्वत्रान्वयः, तेन खलजनमात्सर्यवैगुण्यादीनां तत्रासंभव इति ॥ १४७ ॥

किंच,

कुन्तलादौ कौटिल्यं, हारादौ लौल्यं, करचरणादिषु रागः, अवलग्नादौ मध्यमाख्या, पलोन्मित एव पलितं, कुसुमादिधूलीष्वेव रजः, अन्धकार एव तमः, रत्नादिष्वेव काठिन्यं, युग्म एव द्वन्द्वं, पवनादौ मन्दता, मध्यादावेव क्षीणता, लोचनादावेव चाञ्चल्यं, जलेष्वेव नीचगामिता, व्यभिचारिभावेष्वेव ग्लानिदैन्यविषादादयः ॥ १४८ ॥

कुन्तलादावित्यत्रादिशब्देभ्यः क्रमेण कटाक्षे, वस्त्राञ्चले, नेत्रान्ततास्वधरोष्ठजिह्वानखे, मध्याङ्गुली, कर्पूरलोध्रधेनुधूलिषु, स्वर्णरजतादिषु, हसिते, केशरोमनखे, किसलये, इति । अत्र, अवलग्नं मध्यदेशः, "मध्यमं चावलग्नं चे"त्यमरः, युग्म एव द्वन्द्वं, न तु कलहे, "द्वन्द्वं कलहयुग्मयो"रित्यमरः. इह व्यभिचारिभावेष्वित्युपलक्षणं, श्रीकृष्णसंबन्धादानन्दविदेकमात्रत्वेन शृङ्गारादिरसेषूपयुक्ताश्चेति पूर्वोक्ताः खलत्वमत्सरत्वाद्योऽपि भावा भूषणावहा एव न तु दूषणाधायकाः, यथा राधाचन्द्रावलीयूथयोः परस्परेष्टानिष्टबाधनसाधनाभ्यां खलत्वमात्सर्यदोषोद्गारादयो दृष्टा एव, तथा श्रीकृष्णपितामहादीनां शतशः श्रुतिस्मृत्यागमवाक्यसाधितनित्यसिद्धभावानामपि पालित्यादिकं वात्सल्यादिरसपोषकत्वा "लोकवल्लीलाकैवल्य"मिति न्यायेन कालिकमिव प्रतीतमप्यविरुद्धमचिन्त्यत्वादेव न तु तर्कविरोधमेव प्रमाय नित्यसिद्धा मुकुन्दवदित्यादिवचनजातमविरुध्यान्यथा प्रतिपत्तव्यम्. "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजये"दिति प्रभासखण्डवचनेन तत्र तत्र तर्कयोजनाया निषिद्धत्वादिति ॥ १४८ ॥

मुक्तादिष्वेव छिद्रं, कटाक्षादिष्वेव तैक्ष्ण्यं, रसविशेष एव कटुता, जातावेव सामान्यं, रजत एव दुर्वर्णता ॥ १४९ ॥

आदिशब्दाभ्यां शृङ्गवंशीननेषु, बुद्धनुरागनखाग्रेषु, दुर्वर्णता दुर्वर्णशब्दवाच्यता, "दुर्वर्णौ रजतं रूप्य"मित्यमरः ॥ १४९ ॥

यच्च च सर्व एव नानागुणखनयोऽपि मुक्तावस्थाः ॥ १५० ॥

सर्वे भगवत्परीवारा यथोचितं नानागुणानां बहुत्वताऽऽद्यपौगण्डबाल्यनिष्ठानां वात्सल्यादिरसपोषकाणां गुणानां खनिरूपा अपि श्रीकृष्णपितामहादयो मुक्तावस्थास्त्यक्तकालिकभावाः, कालकृतविकाररहिता इत्यर्थः, पूर्वोक्तयुक्तेरेव, "विशेषः कालिकोऽवस्था" इत्यमरः । सगुणत्वेऽपि मुक्तावस्थत्वमिति श्रवणाद्विरोधाभासः ॥ १५० ॥

यत्र च,

अरुणोदय इव प्राचीरागमः, उत्सवप्रदेश इव वितानितमणितोरणः, सूर्य इव हरिदश्मरश्मिमहारथ्यः, हरनटनविलास इव महाट्टहासः ॥ १५१ ।

प्राच्या दिशो रागेण रक्तिमा सा शोभा यतः सः, पक्षे प्राचीरैरगमोऽगम्यः । वितानितं वितानयुक्तं विस्तारितं च मणिमयं तोरणं वन्दनमाला सिंहद्वाराख्यबहिर्द्वारं च यत्र सः । हरिदश्मा हरिन्मणिः, तद्वत् रश्मयः किरणा येषां ते महारथ्या महान्तो रथवाहका अश्वा यस्य सः, अत एव हरिदश्व इति सूर्यनाम प्रसिद्धं, "रथ्यो वोढा रथस्य य" इत्यमरः, पक्षे हरिदश्मनां रश्मयो यासु ता महत्यो रथ्याः प्रतोल्यो यत्र सः, "रथ्या प्रतोली विशिखा" इत्यमरः, रथ्या गलीति ख्याताः । अट्टहासो विकटहास्यमट्टालिकाप्रकाशश्च ॥ १५१ ॥

सूर्योदय इव निजमहसोरुचारिमणि-निशान्तः, नारायण इव चामीकरपटलः, ब्रह्मानन्द इवोपयुक्तमुक्तावलीकः, सत्त्वे नानीसार इव विदूरवलभीकः ॥ १५२ ॥

निजस्य महसा तेजसा, उरुचारिमणि सति, अधिकचारुतायां सत्यां, निशाया रात्रेरन्तो नाशो यत्र सः, पक्षे निजमहसा, उरुचारीणि मणिमयानि निशान्तानि मन्दिराणि यत्र सः, "निशान्तवस्त्यसदन"मित्यमरः । चामीकरं स्वर्णं तद्वर्णं पटं जातीति सः, पक्षे पटलं छाउनीति ख्यातम् । उपयुक्ता मुक्तावली मुक्तश्रेणी यत्र सः । पक्षे, उपयुक्तभिराधिक्येन लग्नाभिर्मुक्ताभिरुपलक्षितं वलीकं, छज्जा इति ख्यातं, यत्र सः । "वलीकनीधे पटलप्रान्ते" इत्यमरः । यद्वा, उपयुक्ता मुक्ता आवलीकं वलीकपर्यन्तं यत्र सः । सारो मुख्यः, विदूरा बलानां सेनानां भौर्यस्मात् सः । यमाश्रित्य सेना परेभ्यो न बिभ्यतीत्यर्थः, पक्षे विदूरा वलभी पाडि इति ख्यातमन्तर्गेहोर्ध्ववर्तिं दारुखण्डं यत्र सः ॥ १५२ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चकोरनिकर इव शशधरकान्तगोपानसीमः, रत्नाद्रिरिव विविधरत्नप्रघनः, हर इव सदामहोमाङ्गनः, पुरनिकरः ॥ १५३ ॥

शशधरस्य चन्द्रस्येव कान्तानां कमनीयानां गवां रश्मीनां थाने मर्यादा यस्य सः, पक्षे चन्द्रकान्तमणिमयीभिर्गोपानसीभिर्धाडि इति ख्याताभिर्मा शोभा यस्य सः, "गोपानसी तु वडभी छादने वक्रदारुणी"त्यमरः । विविधै रत्नैः प्रघनोऽतिनिबिडः, पक्षे विविधरत्नमयालिन्दः, "प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठक" इत्यमरः । सदा मह उत्सवो यस्यां सा, उमा पार्वत्यङ्गना यस्य सः, पक्षे सदाम दामयुक्तं हेमाङ्गनं हेमवत्त्वं यत्र सः । पुरनिकरः, उपनन्दादिस्वामिकः ॥ १५३ ॥

यस्य प्रधानतमं ससारप्राचीरं मरकतगृहं हेमपटलं प्रवालस्तम्भालिस्फटिकवृत्तिवैदूर्यवडभि महानीलेन्द्राट्टं विमलकुरुविन्दोपलमहाप्रतीहारं नानाकृति जितविमानावलि पुरम् ॥ १५४ ॥

प्रधानतमं श्रीमच्चन्दस्वामिकं पुरं, प्रतीहारो द्वारं, नानाकृतयो विविधचित्राणि ॥ १५४ ॥

कुड्ये यस्य मणिप्रवेकरचिते शिल्पक्रियाकल्पितैः
प्रत्यासज्य शुकैः समं गृहशुकेष्वासादितस्थेमसु ।
सप्राणाः किममी इमे किमथवेत्युन्मीलतः संशयाद्
दातुं दाडिमबीजकानि सुचिरं मुह्यन्ति मुग्धाङ्गनाः ॥ १५५ ॥

कुड्ये भित्तौ, मणिप्रवेको मणिश्रेष्ठः, "क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमा" इत्यमरः, चित्रितैः शुकैः सह, प्रत्यासज्य प्रत्यासक्तिं कृत्वा, सख्यं विधायेत्यर्थः, अत एवासादितः स्थेमा स्थैर्यं स्वीकृततद्भर्मतया निस्यन्दत्वं यैस्तेषु, उन्मीलतः संशयात्, उन्मीलच्चुद्भवन् यः संशयः संदेहस्तस्माद्धेतोः ॥ १५५ ॥

यच्च पुरे मूर्त इव वात्सल्यरसः, शरीरभृदिव शुद्धसत्त्वं, सार इव सकलसौभाग्यस्य, द्वीप इवानन्दसमुद्रस्य, श्रीनन्दो नाम व्रजराजः । यः खलु भगवत्पितृभावभावुकशुभगंभावुकश्चिद्विलास इव सदैकावस्थः ॥ १५६ ॥

भगवत्पितृभावः पितृत्वं तदेव भावुकं तेन शुभगंभावुकः शुभगो भवतीति सः । सदैकावस्था यस्य सः, श्रीकृष्णस्य चरमकैशोरे नित्यस्थितिवदस्यापि तिलतण्डुलितकेशतापादकप्रथमवार्धके वयसि नित्यस्थितिरित्यर्थः । तथा तथा ध्यायकानां त्रैकालिकानामुपासकानामनादिपरंपरात एव तत्साक्षात्कारश्रवणात्, श्रुतिस्मृत्यागमीयपरःसहस्रवचनेभ्यः । उपलक्षणमेतदन्येषामपि भगवत्परिवाराणां, स्वस्वरसपोषकत्वेन तथातथा भावे, एषैव युक्तिरनुसंधेया ॥ १५६ ॥

यस्य च भगवत्प्रकाशफला कल्पवल्लीव मूर्तिमतीव वात्सल्यरसश्रीः, संचारिणीव तेजोमञ्जरी, स्वकुलयशोदा यशोदा नाम सधर्मचारिणी ॥ १५७ ॥

यस्य च सधर्मचारिणी यशोदा नामेत्यन्वयः ॥ १५७ ॥

यच्च राजधान्यां बहव एव गोदुहः, सर्वे पशुपतयोऽप्यहरा अभवा अनुग्राश्च, गव्याजीवा अपि न गव्या जीवाः ॥ १५८ ॥

गोदुहो गोपाः, अहरा, श्वोररहिताः, अभवाः संसाररहिताः, अनुग्राः सौम्याः । हरादीनां पशुपतिवाचकत्वेन विरोधः । गव्यमेवाजीवो जीविका येषां ते, गौः पृथिवी तद्भवा गव्या, दिगादित्वाद्यत्, ते जीवा गव्याः पार्थिवा न भवन्ति किंतु चिन्मया इत्यर्थः ॥ १५८ ॥

तत्र केचन व्रजराजस्य सनाभयः, केचन परंपरासंबन्धभाजः, तेषामपत्यानि श्रीकृष्णसहचराः, केचन गोदुहो मूर्ता इव भगवद्धर्माः, तत्पत्न्यश्च मूर्ता इव भक्तिवृत्तयः, तदुत्पन्नाः कन्या भगवत्प्रेयस्यः ॥ १५९ ॥

सनाभयः सपिण्डाः ॥ १५९ ॥

ये तु श्रीकृष्णसहचरा बालकास्ते सर्वे सनकादय इव नित्यकौमाराः ॥ १६० ॥

नित्यकौमारा इति, श्रीकृष्णसवयस्त्वात् प्रायो नित्यकैशोरत्वेऽपि तत्क्रियाकारित्वासंभवान्नित्यकौमारा एवोच्यन्ते, अतः श्रीकृष्णसखिषु बलदेवादिकं विना सर्वेषां चेटविटादीनां शृङ्गाररससाहाय्यचातुर्येऽपि सनकादिभिरेव साधर्म्यमिति ॥ १६० ॥

वनप्रदेशा इव सवयसः, हारभेदा इव परस्परतोऽविसदृशगुणाः, शरत्पद्माकरा इव बृहस्पतिवंशा इव सदाच्छविकचाः, ईशानदिग्विभागा इव समदसुप्रतीकाः ॥ १६१ ॥

वयांसि पक्षिणस्तैः सहिताः, पक्षे समानं वयो येषां ते, "खगवाल्यादिनोर्वय" इत्यमरः । गुणाः सूत्राणि सौहार्दोदयश्च । पद्माकरपक्षे सदा, अच्छा निर्मला विकचाः प्रफुल्लाः, पद्मानां प्रफुल्लतैव पद्माकरेऽप्युपचर्यते, बृहस्पतिवंशपक्षे सदाच्छविः सदा कान्तियुक्तः कचः शुक्राचार्यशिष्यत्वेन प्रसिद्धो येषु, सहचरपक्षे कचाः केशाः । सुप्रतीका दिग्गजः, पक्षे समदा मृगमदचर्चायुक्ताः शोभनाः प्रतीका अङ्गानि येषां ते ॥ १६१ ॥

*—परःशत—इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शरद्विलासा इव पद्मास्याः, षड्जमध्यमपञ्चमस्वरा इव समानश्रुतयः, कुसुमसमूहा इव सुघ्राणाः ॥ १६२ ॥

इदानीं मुखादिचरणपर्यन्तं प्रत्येकमङ्गं शब्दसाधर्म्येणोपमिमानो विशिनष्टि । पद्मानामास्या स्थितिर्येषु, "स्यादास्या त्वासनं स्थिति"रित्यमरः, पक्षे पद्मतुल्याननाः । समानास्तुल्यसंख्याकाः श्रुतयो येषां ते, तथाहि, सप्तानां स्वराणां द्वाविंशतिश्रुतिकत्वे षड्जमध्यमपञ्चमानां चतस्रश्चतस्र इति द्वादश श्रुतयः, निषादगान्धारयोर्द्वे द्वे इति चतस्रः, ऋषभधैवतयोस्तिस्रस्तिस्र इति षट्, इत्येवं द्वाविंशतिरिति । पक्षे समानकर्णाः ॥ १६२ ॥

अच्छदेविन इव चञ्चुलाक्षाः, रघुनाथसहाया इवौजस्विसुग्रीवाः, कलभा इव पीनायतहस्ताः, मथ्यमानक्षीरनीरधितरङ्गा इव प्रसन्नक्षोभाः ॥ १६३ ॥

चञ्चलावक्षौ पाशकौ येषां ते, "अक्षमिन्द्रिये ना द्यूताङ्गे", इत्यमरः, पक्षे स्पष्टम् । ओजस्वी सुग्रीवो येषु ते, पक्षे, ओजस्विनी शोभना ग्रीवा येषां ते, कृष्णेन सह कौतुकसंगरार्थं तथौचित्यात् । कलभा हस्तिशावकाः । प्रकर्षेण सीदतीति प्रसत् सदेर्गत्यर्थत्वात् प्रसरन् नवः क्षोभो येषां ते, पक्षे प्रसन्ना वक्षसो भा दाक्षिर्येषां ते ॥ १६३ ॥

करिण इव पीनकटाः, सदासुखिन इव महोरवः, चन्द्रा इव कोमलपादाः, सदैकदशा अपि चिदशैकाधिकाः,ते च श्रीदामसुदामवसुदामसुबलादयः* ॥ १६४ ॥

कटो गण्डः कटिश्च, "गण्डः कटो", इति,"कटो ना श्रोणिफलकं कटि"रिति चामरः । महेनोत्सवेनोरवः प्रवीणाः, पक्षे स्पष्टम् । पादा रश्मयश्चरणाश्च । सदा,एकैव दशा येषां ते, श्रीकृष्णस्य चरमकैशोराविर्भावकाले ये यद्वयसस्ते तथावयस्त्वेन नित्यस्थितिमन्त इत्यभिप्रायः ॥ १६४ ॥

द्वितीयगोदुहां तु ताः कन्याः सुकविता इव सुकुमारपदाः, मनोवृत्तय इव निरुपमजङ्घालताः, वनवासप्रवृत्तरामराज्यश्रिय इव स्ववरजानुगतसकलसौभाग्याः, उत्सवभूमय इव घनोरुरम्भास्तम्भारोपाः ॥ १६५ ॥

अथ भगवत्प्रेयसीरपि चरणादिकेशान्तं तथैवोपमिमानो विशिनष्टि । निरुपमा जङ्घालता शीघ्रगामिता यासां ताः, "जङ्घालोऽतिजव"इत्यमरः, पक्षे स्पष्टम् । शोभनेऽवरजे, कनिष्ठे भरते,अनुगतं सकलं सौभाग्यं यासां ताः, पक्षे स्वयोर्वरयोर्जानुनोर्गतं प्राप्तं सकलं सौभाग्यं किं पुनः सर्वाङ्गेषु यासां ताः । घनो निबिड उरूणां विपुलानां रम्भास्तम्भानामारोपो यासु ताः, पक्षे घनाभ्यामूरुभ्यां रम्भास्तम्भौ सौन्दर्येणालुम्पन्तीति ताः, रलयोरैक्यात् ॥ १६५ ॥

दुरूहयन्त्यवृतय इव प्रकटितटीकाः, बन्धुजनचिरकालासंगतय इव बन्धुरोदराः, भगवन्नामकीर्तय इव सदावर्तनाभीकाः, भगवत्कृपा इव दीनावलग्नाः ॥ १६६ ॥

टीका विवरणं, पक्षे प्रकृष्टा कटितटी यासां ताः । बन्धूनां रोदनं रान्तीति ताः, पक्षे बन्धुरमश्वत्थदलवदुचितानतमुदरं यासां ताः । सदा, आवर्तनेन पुनः पुनरुच्चारणेन न विद्यते भीर्भयं कुतश्चिदपि याभ्यस्ताः, पक्षे सन्, शोभनः, आवर्तो यस्यां तथाभूता नाभी यासां ताः । दीनेष्ववलग्नाः संगताः, पक्षे दीनमवलग्नं मध्यदेशो यासां ताः ॥ १६६ ॥

वर्षाश्रिय * इव नवपयोधराः, हेमन्तश्रिय इव सुवलितायतदोषाः, अभिषेकावसानशिरःश्रिय इव कम्बुकन्धराः, नारायणकरशाखा इव मार्जितकमलाननाः ॥ १६७ ॥

सुष्ठु वलिता प्रतिदिनं वर्धमाना, अत एवायता दीर्घा दोषा रात्रिर्यासु ताः, पक्षे सुवलिते आ-ईषदायते दोषे बाहू यासां ताः । "दोषा रात्रौ भुजेऽपि चे"ति विश्वः । अभिषेकस्यावसानेऽन्ते शिरसः शोभा इव कम्बुः शङ्खस्तदीयं कं जलं धरन्तीति ताः, पक्षे कम्बुवत् त्रिरेखाङ्कितग्रीवाः[1] । करशाखाः कराङ्गुल्यः, मार्जितं कमलाया लक्ष्म्या आननं याभिस्ताः, पक्षे मार्जितं विमलीकृतं कमलमिवाननं यासां ताः ॥ १६७ ॥

वसन्तश्रिय इव तिलकुसुमगन्धवहाः, भगवन्मूर्तय इवेक्षणानुगृहीतकुवलयाः, भगवद्गुणकथा इव श्रवणरम्याः, कुबेरपुरश्रिय इव विलसदलकाभिख्याः, पश्चिमदिग्विभागलक्ष्म्य इवाभिरामकेशकलापाः ॥ १६८ ॥

तिलकुसुमस्य गन्धं वहन्तीति ताः, पक्षे तिलकुसुममिव गन्धवहा नासिका यासां ताः । "क्लीबे घ्राणं गन्धवहा" इत्यमरः । ईक्षणेनावलोकनेनैवानुगृहीतं कुवलयं भूमण्डलं याभिस्ताः, पक्षे, ईक्षणाभ्यां नेत्राभ्यामनुगृहीतं स्पर्धायोग्यत्वासंभवादनुकम्पितं कुवलयं नीलोत्पलं याभिस्ताः । श्रवणेन श्रवणाभ्यां च रम्याः । श्रिय इव संपद इव, विलसन्ती, अलकायाः पुर्या अभिख्या शोभा याभ्यस्ताः । "अभिख्या नामशोभयो"रित्यमरः, पक्षे विलसद्भिरलकैश्चूर्णकुन्तलैः शोभा यासां ताः । अभिरामस्य केशस्य कं जलं तस्येश्वरस्य वरुणस्य कलाः शिल्पानि धान्तीति ताः, पक्षे रमणीयकेशस्य समूहवत्यः ॥ १६८ ॥

---

*—क्वे श्रीदामसुबलादयः, इति पा० ।

* वर्षाद्वय इति पा० ।

१ यतदर्थानुरोधादेव कं धरन्तीत्यर्थोऽपि संधिरेवानुगतः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आसां मध्ये सकलरमणीमौलिमणिमालेव, वैदर्भीरीतिरिव माधुर्योजःप्रसादादिसकलगुणवती सकलालंकारवती रसभावमयी च, कनककेतकीव प्रेमारामस्य, तडिन्मञ्जरीव मधुरिमजलधरस्य, कनकरेखेव सौन्दर्यनिकषपाषाणस्य, कौमुदीवानन्दकुमुदबान्धवस्य, भुजदर्पावलिरिव कुसुमायुधस्य, सारश्रीरिव लावण्यजलधेः, हासलक्ष्मीरिव मधुमदस्य, आकरभूरिव कलाकलापस्य, खनिरिव गुणमणिगणस्य, कापि श्रीराधिका नाम ॥ १६६ ॥

वैदर्भीति । तथोक्तमलंकारकौस्तुभे ।

"अवृत्तिरल्पवृत्तिर्वा समस्तगुणभूषिता ।
वैदर्भी सा तु शृङ्गारे करुणे च प्रशस्यते" ॥

इति । केतकीतो विलक्षणा,अतिमधुरगन्धा कनककेतकी, तत्प्रेम्णः सर्वप्रेमाच्छादकस्ववैभवकत्वमुक्तम् । तडिदिति सर्वमाधुर्यगुणस्यापि मधुरताधायकत्वं तन्माधुर्यस्य, कनकेति सर्वसौन्दर्यगुणेनापि सर्वोत्कृष्टत्वपरीक्षयोत्तीर्णत्वं तत्सौन्दर्यस्य, कौमुदीति सर्वानन्दगुणस्यापि विशिष्टानन्दकत्वाधायकत्वं तच्चिष्टानन्दस्य, तथोक्तं "शशी व्योमोत्सङ्गं शशिनमभितः कान्तिलहरी"ति,भुजदर्पेति निजविजयिनरनारायणावतारिणः श्रीकृष्णस्यापि तयैव विजयात्, तेन च सर्वकान्तागणाशक्यवशीकारस्य कृष्णस्य मानसरोधकत्वं तत्कामनान्वितायाः, सारश्रीरिति सर्वलावण्यस्यापि मूलभूतं संपत्तिरूपत्वं तल्लावण्यस्य,हासेति भुजदर्पेतिवत्, मधुर्वसन्तस्तेन च तत्कामतान्वितायाः समयगतवैलक्षण्यस्यापि सार्वदिकत्वप्रतीतिः, आकरभूरिव खनीनां जन्मभूमिरिव, तेन सर्ववैदग्ध्यगुणस्याविर्भावकप्रकाशलवकत्वं तदीयवैदग्धीनां, खनिरिति तयैवार्थः,गुणाः पूर्वोक्तेभ्यो भिन्ना दयाक्षान्त्यादयो ज्ञेयाः ॥ १६९ ॥

या खलु गौरी च गौरीसहस्राधिका तथापि श्यामा,अनादिरपि किशोरी, सुरूपाप्यसुरूपा सखीनिकुरम्बस्य, सौकुमार्यवती चासौ-कुमार्यवतीह सकलसौभाग्यम् ॥ १७० ॥

गौरी गौरवर्णा । गौरीसहस्रात् पार्वतीसहस्रादप्यधिका । श्यामा,

"शीतकाले भवेदुष्णा, उष्णकाले च शीतला ।
स्तनौ सुकठिनौ यस्याः सा श्यामा परिकीर्तिता" ॥

इत्युक्तलक्षणा, । असुरूपा प्राणरूपा, "पुंसि भूम्न्यसवः प्राणा" इत्यमरः । असौ कुमारी सकलं सौभाग्यमवति वशीकरोति । कीदृशी सौकुमार्यवती ॥ १७० ॥

यां खलु महालक्ष्मीरिति केचन, लीलेति तान्त्रिकाः, आनन्दिनी शक्तिरिति केचिदामनन्ति ॥ १७१ ॥

आनन्दिनी ह्लादिनी, तथा ह्युक्तं, "ह्लादिनी या महाशक्तिः सर्वशक्तिवरीयसी", तत्सारभूतेति, केचिदित्यत्रैव स्वारस्यम्, आनन्दिनीभिः स्वाभिः शक्तिभिरिति रासान्ते स्वयं वर्णयिष्यमाणत्वात् । महालक्ष्म्यास्त्वेतदीयैश्वर्यवैभवमयांशभूतत्वेन, तथा लीलाशक्तेश्च पाद्मकार्त्तिकमाहात्म्यप्रसिद्धा, एतदीयविहारकाननपालिवृन्दत्वेन च, वैष्णवतोषण्यादिषु निर्धारितत्वाच्चेति ॥ १७१ ॥

यस्याश्च विशाखाललितादयः समानगुणरूपास्तत्प्रतिच्छायारूपाः प्रियसख्यः ॥ १७२ ॥

ललिताया ज्येष्ठात्वेऽपि विशाखायाः प्राथम्यं राधया सहैक्यदृष्ट्या, तथा ह्युक्तं, "नामरूपगुणादीनामैक्याच्छ्रीराधिकेव ये"ति ॥ १७२ ॥

द्वितीया चं काचिद् यूथपा चन्द्रावलीव परमाह्लादिनी, प्रकृतिरिव गुणमयी, नयनेन्द्रियवृत्तिरिव रूपवती, अपां वृत्तिरिव रसमयी, कुसुमावलिरिव परमोदारा, श्रीचन्द्रावली नाम ललनारत्नं, यस्याश्च पद्माशैव्यादयः प्रियसख्यः, एवं श्रीराधासपत्ना श्यामा नाम कापि यूथपा, इति बह्व्य एव तत्र यूथपाः ॥ १७३ ॥

वृत्तिशब्देऽत्र स्वरूपवाचकः । कुसुमावलिपक्षे परेषां मोदं हर्षम्, आ सम्यक्, रातीति सा ॥ १७३ ॥

अथ यत्र राजधान्यां मूर्ता इव * भगवद्धर्माश्चोर्वीगीर्वाणाः परमदयालवः शमदमतितिक्षोपरतीनां मूर्तय इवापि सात्वतशास्त्रप्रवक्तारस्तदनुकूलवदभ्यासनिरताः केचन पञ्चराचनिष्ठा व्रजराजकृतदानमात्रप्रतिग्रहीतारस्तदेकयाजकाः ॥ १७४ ॥

उर्वीगीर्वाणा विप्राः, शमो भगवच्चिष्ठबुद्धिता, दम इन्द्रियवशीकारः, तितिक्षा क्षमा, उपरतिर्वैराग्यं, सात्वतशास्त्रं श्रीभागवतादि, नारदपञ्चरात्रोक्तधर्मपराः, तमेकं व्रजराजमेव याजयन्ति नान्यम् ॥ १७४ ॥

ये खलु ज्ञानानन्दयोः कातर्योपयुक्ता अपि न कातर्योपयुक्ताः, विद्याविद्योतेषु परमचातुर्यवन्तोऽपि न चातुर्यवन्तः ॥ १७५ ॥

प्रस्तुतत्वाच्छ्रीकृष्णसंबन्धिनोर्ज्ञानानन्दयोर्मध्ये कातर्यं कातरस्य भावः कातर्यं तत्रोपयुक्ताः, श्रीकृष्णस्यैश्वर्ये केचित् प्र-

* एवेति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विष्टाः केचिन्माधुर्यं चेत्यर्थः, एवमपि न कातर्यं कातरित्व उपयुक्ताः, अन्यानुपघात्यसिद्धान्नज्ञा इत्यर्थः । तथा विद्वानामग्रादशानां विद्योतेषु विचारादिभिः प्रकाशनेषु न चातुर्यमातुरत्वं पराजयस्तद्वन्तः ॥ १७५ ॥

सदारमाधुर्या अपि नरमाधुर्याः, प्रकृतिगुणशाबल्या अपि न प्रकृतिगुणशावल्याः ॥ १७६ ॥

सदैव रमाणां संपत्तीनां धुर्या, दारसहितानामेव माधुर्य येषां ते, इति वा । नराणामिव माधुर्यं येषां ते । प्रकृत्या स्वभावेनैव ये गुणा मैत्र्यादयस्तैः शाबल्यं वैचित्र्यं येषां ते, किंतु न प्रकृत्या गुणैः सत्त्वादिभिः शाबल्यं मिश्रीभावो येषां ते । अप्राकृताः शुद्धसत्त्वमया इत्यर्थः ॥ १७६ ॥

किं बहुना,

तैलिकताम्बूलिकमालिककाम्बविकगान्धिकस्वर्णकारघटकारव्योकारपठकारादयोऽपि चिद्रूपा अपि मनुष्यधर्माणः, मनुष्यधर्माणोऽपि श्रीदा अपि पुण्यजनेश्वरा अपि न कुबेरा नैकपिङ्गा ननरवाहनाः ॥ १७७ ॥

काम्बविकः शङ्खवणिक्, व्योकारो लोहकारकः, मनुष्यधर्माद्यास्त्रयस्तथा कुबेराद्याश्च त्रय एकपर्याया एव यत्तत्वादिति विरोधः, न कुत्सितं वेरं शरीरं येषां ते,नैकः पिङ्गो येषु ते, विष्टितो वेतनतो वा न नरा वहनक्लेशभाजः, नैककीर्त्तिर्नैकयशा इतिवच्चो नलोपाभावः, नशब्देन सह "सुप् सुपे"ति वा समासः ॥ १७७ ॥

किं बहुना,

पुलिन्दा अपि यच्च वर्षाभ्रमरा इव जातिनाम्नैव विकला अपि सकलसुमनसां रतिप्रदाः ॥ १७८ ॥

जातिर्मालतीपुष्पं तच्चाम्नैव विकला अप्यानन्दावेशेन विह्वला अपि सकलसुमनसां सर्वपुष्पाणां रतिप्रदाः,पक्षे पुलिन्देति नाम्नैव विकला निन्द्या अपि सकलदेवानां रतिप्रदाः, "सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकस" इत्यमरः ॥ १७८ ॥

यत्र च,

अतिदीर्घतरमहास्फटिकमणिभित्तिचतुष्टयमधि गोपानसीखण्डाचटुलचरमभागदीर्घतरकनकवंशाकीर्णाश्चतुष्कोणावस्थितमहागोपानसीचतुष्टयावष्टब्धसुस्थितकुरुविन्दमयकौणिकचतुष्टयावष्टब्धमहावडभीकाः ॥ १७९ ॥

यत्र च राजधान्यां महागोगृहाः । कीदृशाः । अतिदीर्घतरे महास्फटिकमणिमये भित्तिचतुष्टये, यानि गोपानसीखण्डानि, चत्वारीत्यर्थात्, तेष्वचटुलैरचञ्चलैः, दृढनिबद्धैरित्यर्थैः, चरमभागो दीर्घतरो येषां तैः कनकमयैर्वंशैर्वंशैरगा इति गौडे ख्यातैः काष्ठखण्डैराकीर्णा व्याप्ताः । पुनः कीदृशाः । चतुर्षु कोणेष्ववस्थितेन, मरकतमयं यन्महागोपानसीचतुष्टयं तत्रावष्टब्धेन, पूर्वा गोपानसी, उपरि गता तुद्रा, इयं तु पटलोपान्तगता महती ज्ञेया, अत एव सुस्थितेन निश्चलेन कुरुविन्दमणिमयेन, कौणिकानां कोणाइच इति ख्यातानां चतुष्टयेन, अवष्टब्धा महावडभी, पाडि इति ख्यातमूर्ध्वगतं दारुखण्डं येषां ते ॥ १७९ ॥

भूधरभूमय इव विमलनानामणिपटलाः, विचक्षणा इव निस्तम्भाः, सहृदया इव विशदप्रकीर्णतराः, महाराजपुरगोपुरनिकरा इव परितो विराजिबहुप्रतीहाराः, स्फुरत्पवनधूतधूलयः परितो महागोगृहाः ॥ १८० ॥

विमलानां नानामणीनां पटलं समूहो येषु ते, पक्षे विमलं नानामणिमयं पटलं छानि इति ख्यातं येषां ते । निस्तम्भा निरहंकाराः स्तूणारहिताश्च । विशदा निर्मलाः प्रकीर्णतरा असंकुचिताः । पुरगोपुराणि पुरद्वाराणि, प्रतीहारा द्वारपाला द्वाराणि च ॥ १८० ॥

येषामङ्गणेषु सरस्वतीशरीरमिव पूर्णिमानक्तमिव सर्वशुक्लं, नीलमणिशैलायमिव श्यामशृङ्गम्, अङ्गनानिकुरम्बमिव घनायतबालहस्तं, भगवच्चक्रमिव महसा—रिपुच्छम् ॥ १८१ ॥

घना निबिडा आयता दीर्घा बालहस्ताः केशसमूहा यस्य, "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे", इत्यमरः, पक्षे बालहस्तः पुच्छपूर्वभागः, "बालहस्तस्तु बालधि"रित्यमरः । महसा तेजसा रिपुं छ्यति छिनत्ति "छो छेदने" कप्रत्ययान्तः, पक्षे महेनोत्सवेन निरन्तरश्रीकृष्णदर्शनजनितेन सारि प्रसरणशीलं पुच्छं यस्य तत् ॥ १८१ ॥

तीर्थसलिलमिवातितर—साखा—न—मितं, गणपतिशरीरमिव महापीनं, मन इवावशम् ॥ १८२ ॥

अतितरसातिवेगेन खानविषये मितं मानयुक्तं, यद्वा खानं लोककर्तृकमज्जनमितं प्राप्तं, पक्षेऽतितरा साखा गलकम्बलस्तया न मितम् । महापीनमतिविपुलं, पक्षे महत्, आपीनमूधो यस्य तत् । "ऊधस्तु क्लीबमापीन"मित्यमरः । अवशमनधीनं, पक्षे न विद्यते वशा बन्ध्या यत्र "वशा बन्ध्ये"त्यमरः ॥ १८२ ॥

॥ शेषमये ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

ब्रह्मसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

तत्र द्व्यशीतितितमादिपरिच्छेदाः ॥

८२—'अथेदानीं धर्ममार्गे शङ्किना दोषाभासास्तावच्चिरूप्यन्ते' । ननु सुविचारसिद्धानां भौतिकपिण्डसिद्धावुपन्यस्तानां हेतूनां यथावत्स्वसाध्यसाधनात्तमत्वेऽपि श्रुतिस्मृत्यादिधर्मपुस्तकेभ्यस्तादृशपिण्डानां सत्त्वं ज्ञानातिरिक्तवस्त्वात्मकत्वं च तावत्स्पष्टं प्रतिपद्यते । तत्र धृतानां बहूनां वृक्षाणां काष्ठोपलनगनदीनगरनरदेहादेः सद्भावे पिण्डात्मकत्वं चान्तराऽनुपपत्तेरिति चेल्लोकप्रसिद्ध्यर्थकशब्दघटितं न किमपिवृत्तं धर्मपुस्तकधृतमधर्मपुस्तकधृतं वाऽस्मत्सिद्धान्ते नोपपद्यत इति ब्रूमः । यतो ह्यस्मच्चयेऽपि नदीनगरादयस्सर्वे विषया वर्तन्त एव । गुणसमुदायो द्रव्यमिति लोकसंमतार्थं तेषां द्रव्यरूपत्वमप्यनुमन्यते । वास्तविककाल्पनिकयोस्सदसद्वस्तुनोरन्तरं च स्वीक्रियते । प्रपञ्चितं चैतत्सविस्तरमूनत्रिंशत्त्रिंशत्त्रयस्त्रिंशषट्त्रिंशत्तमादिपरिच्छेदेषु । किंच श्रुतिस्मृत्यादौ प्राचीनविद्वदभिमतार्थबुबोधयिषया प्रयुक्तं द्रव्यपदम् आत्मबाह्यपदार्थसत्ता च क्वापि संकीर्तिता स्यादित्यपि न संभाव्यते ।

८३—अपरं चात्र बोध्यम् । शब्दानामुचितः प्रयोगो नामोपलब्धवस्तुस्वरूपानुगुणं शब्दैर्वस्तुनिर्देश एवेत्यात्मबाह्यवस्तुसत्तावादिनस्तदितरे च सर्वे मन्यन्ते । प्रयुज्यते चास्मत्सिद्धान्तेषु न कोपि शब्दोऽनुचितं वाङ्मर्यादाविरुद्धं वेत्युचितं प्रयुक्तस्य सुबोधस्य चास्मद्वचनजातस्य सामञ्जस्यमेव । सर्वस्यास्य पूर्वमेव विस्तरशो निरूपितत्वात्पुनरुक्तिभिया न तदत्र पुनर्विभाव्यते ।

८४—नन्वेवं स्थितेऽपि भवत्पक्षे लौकिकवृत्तेभ्योऽतिलौकिकवृत्तेषु न कोप्युत्कर्षविशेषस्संपद्यते । सर्वेषां तेषां विज्ञानमयत्वेन साम्यात् । तथाच खीष्टधर्मपुस्तके प्रसिद्धस्य मोषेशमुनेर्यष्टिविषये किं मन्यते । किमसौ तेन मुनिना तात्त्विकसर्परूपेण परिणामिता नैवाभूत् । किं तत्प्रेक्षकाणां मनस्सु केवलं ज्ञानपरिवर्तनमेवासीत् । किं वोच्यते काणनगरे वैवाहिकभोजनोत्सवे यीशुलोद्धारकस्य खीष्टदेवस्य महिम्ना जलं सुराभावं प्रपेदे । किमसौ खीष्टदेवस्तत्राभ्यागतानां तत्सार्थिणां दृग्घ्राणरसनादेः प्रतारणमेवाकरोत् । येन तेष्वसत्यामेव सुरायां तज्ज्ञानमात्रमजनि । अवर्तन्त चैवंविधानि बहून्यतिलौकिकवृत्तानि । परंतु भवत्पक्षे तेषां सर्वेषां मायामयत्वं कल्पनामयत्वमेववा ऽऽपद्यत इति चेन्नैवम् । अस्मत्पक्षेपि तादृशवृत्तानामवास्तविकत्वस्याऽप्रसक्तेः । वस्तुतएव दण्डस्सर्परूपेण जलं च मद्यरूपेण परिणते आस्ताम् । नैतत्स्वीकारेऽस्मन्मतस्य लेशतोपि हानिस्संभवतीत्युक्तं प्राक् । प्रत्येष्यते चैतत् स्फुटतरं चतुस्त्रिंशपञ्चत्रिंशत्तमपरिच्छेददर्शनात् । तात्त्विकातात्त्विकवस्तुविवेचना तु पूर्वमेव तद्गताशेषदोषाभासनिरासपुरस्सरं तथा व्यक्तं पर्याप्तं च प्रदर्शिता भूयोभूयो निर्दिष्टा चास्ति यथा तस्याः पुनरत्रापि समुल्लेखोऽवश्यमेतद्ग्रन्थाध्येतृबुद्ध्यैनैतान्तं विस्मरणशीलत्वमपकृष्टत्वं वा सूचयेत् । अतोत्रैतावन्मात्रमुच्यते यत्सुरापानायोपस्थिता जनास्सुरां पश्येयुर्जिघ्रेयुरास्वदेरन्नादादितत्कार्याणि चानुभवेयुश्चेत्तस्या वास्तविकत्वेऽस्माकं संदेहलेशोपि नस्यात् ॥ मतान्तरे तु नायं नियमः ।

एवं चान्ततो वास्तविकातिलौकिकवृत्तयाथार्थ्यविषये नास्मन्मतानुसारेण संदेहस्संभवति प्रत्युत प्राचीनविद्वत्संमतसिद्धान्तानुसारेणैव । इत्युक्तावेषोद्भावनमस्मन्मतहितायैव संवृत्तम् ।

८५ एतावता प्रबन्धेन स्वसिद्धान्तेषु संभाव्या दोषाभासा यावच्छक्यं तदुक्तिसंभवप्रदर्शनपुरःसरं निःशेषं व्युदस्ताः । संप्रति तत्रोपलब्धानि कतिपयफलानि तावत् प्रदर्श्यन्ते । प्रथमोपस्थितं फलं त्विदमेव यद् विविधा दुष्करा दुस्तराश्च शङ्का अध्यात्मशास्त्रे कण्टकीभूता आसन् यासां परिहारार्थं निर्णयार्थं वाऽत्र यावद्बुद्धिष्ठैर्विद्वद्भिः प्रयुक्तेष्वपि सुबहुमनोव्यापारेष्वनिर्णीता एव वर्तन्त तास्सर्वा अस्मन्मतोदये तु स्वयमेव विलीयन्ते । यतो हि । भौतिकाः पिण्डाः सचेतनाः सन्ति न वा । किंस्विद्वक्तुं निःशेषं विभक्तुं न शक्यते । कथं चैते जडपदार्थाश्चेतने आत्मनि संस्कारान् जनयन्तीत्यादयस्सर्वे जडद्रव्याश्रिता अनुयोगास्तस्यैवापगमे निरवकाशा जायन्ते । सन्ति चैवमपराण्यपि बहूनि फलानि न केवलमध्यात्मशास्त्रविषयकाणि किंतु धर्मविषयकाण्यपि तानि सर्वाण्युक्तयन्यादेवानायासेनोहितुं शक्यन्ते स्फुटतरं व्याख्यास्यन्ते चोत्तरखण्डे ।

८६—इत्थं चोक्तसिद्धान्तानुसारतो विज्ञानवादे वृत्तिज्ञानस्वरूपज्ञानभेदाज्ज्ञानानां द्वैविध्यं सिद्ध्यति । तत्र वृत्तिज्ञानविषये ज्ञानशून्याः पिण्डा आत्मानं विहाय स्वतन्त्रास्तदज्ञाता एव वर्तन्त इत्यादि स्वयं मन्यमानाः परांश्च बोधयन्तः पुरातनपण्डिता बाह्याभ्यन्तरभेदेन प्रत्यक्षविषयाणां द्वैविध्यं प्रकल्प्याखिलजनमनांसि अज्ञानान्धतामिस्रे भ्रान्तमतसंदोहे पातयां बभूवुः । तानि मतानि चास्माभिः स्वयथार्थानुभवनिकषेण परीक्ष्य निर्मूलानि बाधितानि चेति कृत्वाऽखण्ड्यन्त । तेषां पुनस्सर्वसंदेहवादमूलता चात्र द्रष्टव्या । तत्र हि तात्त्विकपदार्थानामात्मबाह्यत्वमत एवाज्ञेयत्वंमत्वाऽपि तात्त्विकवस्तुस्वरूपानुगुणवस्तुज्ञानानामेव याथार्थ्यं मन्यते । न चैतत्संभवति । अज्ञेयेन तात्त्विकवस्तुस्वरूपेण ज्ञायमानविषयानुगुण्यस्य ज्ञातुमशक्यत्वात् । एवंच तन्मतानुसारतो न कस्यापि वस्तुज्ञानस्य याथार्थ्यं संभाव्यतइत्यागतः सर्वसंदेहवादप्रवेशः ।

केशवशास्त्री

CC-0. Sampurnanand University Collection. Digitized by eGangotri

THE SARVADARSANA-SANGRAHA.

The Prologue.

1. I worship Śiva, the abode of eternal knowledge, the storehouse of supreme felicity; by whom the earth and the rest were produced, in *him* only has this all a maker.

2. Daily I follow my Guru Sarvajna-Vishṇu, who knows all the Agamas, the son of Śārṅgapāṇi, who has gone to the further shore of the seas of all the systems, and has contented the hearts of all mankind by the proper meaning of the term Soul.

3. This synopsis of all the systems is made by the venerable Mádhava, mighty in power, the Kaustubha-jewel of the milk-ocean of the fortunate Sáyaṇa.

4. Having thoroughly searched the Śástras of former teachers, very hard to be crossed, the fortunate Sáyaṇa-Mádhava * the lord has expounded them for the delight of the good. Let the virtuous listen with a mind from which all envy has been far banished; who finds not delight in a garland strung of various flowers?

The Chárváka System.

[We have said in our preliminary invocation "salutation to Śiva, the abode of eternal knowledge, the storehouse of supreme felicity,"] but how can we attribute to the Divine Being the giving of supreme felicity, when such a notion has been utterly abolished by Chárváka, the crest-gem of the atheistical school, the follower of the doctrine of Bṛihaspati? The efforts of Chárváka are indeed hard to be eradicated, for the majority of living beings hold by the current refrain.

> While life is yours, live joyously,
> None can escape Death's searching eye;
> When once this frame of ours they burn,
> How shall we e'er again return?

The mass of men, in accordance with the Śástras of policy and enjoyment, considering wealth and desire the only ends of man, and denying the existence of any thing belonging to a future world, are found to follow only the doctrine of Chárváka. Hence another name for that school is Lokáyata,—a name well accordant with the thing signified.*

In this school the four elements, earth, &c., are the original principles,—from these alone when transformed into the body, intelligence is produced, just as the inebriating power is developed from the mixing of certain ingredients,† and when these are destroyed, intelligence at once perishes also. They quote the Śruti for this [Bṛihad Áraṇy. Up. II. 4. 12.], "springing forth from these elements, itself solid knowledge, it is destroyed when they are destroyed,—after death no intelligence

* Mr. A. C. Burnell, in his preface to his edition of the Vaiṁśa-bráhmaṇa, has solved the riddle of the relation of Mádhava and Sáyaṇa. Sáyaṇa is a pure Dravidian name given to a child who is born after all the elder children have died. Mádhava elsewhere calls Sáyaṇa his 'younger brother,' as an allegorical description of his body, himself being the eternal soul. His use of the term Sáyaṇa-Mádhavah here (not the dual) seems to prove that the two names represent the same person.—I cannot explain the Sáyaṇa of the third śloka. Máyaṇa was the father of Mádhava, and the true reading is probably श्रीमन्मायण.

* "Śankara, Bháskara, and other commentators name the Lokáyatikas, and these appear to be a branch of the Sect of Chárváka" (Colebrooke). Lokáyata may be etymologically analysed as 'prevalent in the world' (*loka*, and *áyata*). Laukáyatika occurs in Páṇini's uktthagaṇa.

† *Kiṇwa* is explained as "a drug or seed used to produce fermentation in the manufacture of spirits from sugar, bassia, &c." Colebrooke quotes from Śankara: "The faculty of thought results from a modification of the aggregate elements in like manner as sugar with a ferment and other ingredients becomes an inebriating liquor; and as betel, areca, lime and extract of catechu chewed together, have an exhilarating property not found in those substances severally."

॥ सर्वदर्शनसङ्ग्रहः ॥

नित्यज्ञानाश्रयं वन्दे निःश्रेयसनिधिं शिवम् ।
येनैव जातं सकलादि तेनैवेदं सकर्तृकम् ॥
पारं गतं सकलदर्शनसागराणाम्
आत्मोचितार्थवरितार्थितसर्वलोकम् ।
श्रीशार्ङ्गपाणितनयं निखलागमज्ञं
सर्वज्ञविष्णुगुरुमन्वहमाश्रये ऽहम् ॥
श्रीमत्सायणदुग्धाब्धिकौस्तुभेन महौजसा ।
क्रियते माधवार्येण सर्वदर्शनसङ्ग्रहः ॥
पूर्वेषामतिदुस्तराणि सुतरामालोड्य शास्त्राण्यसौ ।
श्रीमत्सायणमाधवः प्रभुरुपन्यस्यत्येतत् सतां प्रीतये ॥
दूरोत्सारितमत्सरेण मनसा शृण्वन्तु तत् सज्जनाः ।
माल्यं कस्य विचित्रपुष्परचितं प्रीत्यै न सञ्जायते ॥

अथ कस्य परमेश्वरस्य निःश्रेयसप्रदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्वाकेण दूरोत्सारित्वात् । दुरुच्छेदं हि चार्वाकस्य चेष्टितम् । प्रायेण सर्वप्राणिनस्तावत् । यावज्जीवं सुखं जीवेचास्ति मृत्योरगोचरः । भस्मीभूतस्य देहस्य पुनरागमनं कुत इति लोकगाथामनुरुन्धाना नीतिकामशास्त्रानुसारेणार्थकामावेव पुरुषार्थौ मन्यमानाः पारलौकिकमर्थमपह्नुवानाश्चार्वाकमतस्य लोकायतमित्यन्वर्थमपरं नामधेयम् । तत्र पृथिव्यादीनि भूतानि चत्वारि तत्त्वानि तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यो मदशक्तिवत् चैतन्यमुपजायते तेषु विनष्टेषु सत्सु स्वयं विनश्यति । तदिह विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीति । तत् चैतन्यविशिष्टदेह एवात्मा देहातिरिक्त आत्मनि प्रमाणाभावात् प्रत्यक्षैकप्रमाणवादितया अनुमानादेरनङ्गीकारेण प्रामाण्याभावात् । अङ्गनालिङ्गनादिजन्यं सुखमेव पुरुषार्थः । न चास्य दुःखसम्भिन्नतया पुरुषार्थत्वमेव नास्तीति मन्तव्यमवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव भोक्तव्यत्वात् । तदाह मत्स्यार्थी

CC-0. Sampurnanand University Collection. Digitized by eGangotri

remains."* Therefore the soul is only the body distinguished by the attribute of intelligence, since there is no evidence for any soul distinct from the body, as such cannot be proved, since this school holds that perception is the only source of knowledge and does not allow inference, &c.

The only end of man is enjoyment produced by sensual pleasures. Nor may you say that such cannot be called the end of man as they are always mixed with some kind of pain,—because it is our wisdom to enjoy the pure pleasure as far as we can, and to avoid the pain which inevitably accompanies it; just as the man who desires fish, takes the fish with their scales and bones, and having taken as many as he wants, desists; or just as the man who desires rice, takes the rice, straw and all, and having taken as much as he wants, desists. It is not therefore for us, through a fear of pain, to reject the pleasure which our nature instinctively recognises as congenial. Men do not refrain from sowing rice, because forsooth there are wild animals to devour it; nor do they refuse to set the cooking-pots on the fire, bebecause forsooth there are beggars to pester us for a share of the contents. If any one were so timid as to forsake a visible pleasure, he would indeed be foolish like a beast, as has been said by the poet

The pleasure which arises to men from contact with sensible objects
Is to be relinquished as accompanied by pain,—such is the reasoning of fools;
The berries of paddy, rich with the finest white grains,
What man, seeking his true interest, would fling away, because covered with husk and dust? †

If you object, that, if there be no such thing as happiness in a future world, then how should men of experienced wisdom engage in the agnihotra and other sacrifices, which can only be performed with great expenditure of money and bodily fatigue?—your objection cannot be accepted as any proof to the contrary, since the agnihotra, &c., are only useful as means of livelihood, for the Veda is tainted by the three faults of untruth, self-contradiction and tautology;‡ then again, the impostors who call themselves Vaidic pundits are mutually destructive, as the authority of the jnána-káṇḍa is overthrown by those who maintain that of the karma-káṇḍa, while those who maintain the authority of the jnána-káṇḍa reject that of the karma-káṇḍa; and lastly the three Vedas themselves are only the incoherent rhapsodies of knaves, and to this effect runs the popular saying,

The Agnihotra, the three Vedas, the ascetic's three staves, and smearing oneself with ashes,—
Bṛihaspati says, these are but means of livelihood for those who have no manliness nor sense.

Hence it follows that there is no other hell than mundane pain produced by purely mundane causes, as thorns, &c.; the only Supreme is the earthly monarch whose existence is proved by all the world's eyesight; and the only Liberation is the dissolution of the body. By holding the doctrine that the soul is identical with the body, such phrases as 'I am thin,' 'I am black,' &c. are at once intelligible, as the attributes of thinness, &c. and intelligence will reside in the same subject [the body]; and the use of the phrase 'my body' is metaphorical like 'the head of Ráhu' [Ráhu being really *all head*].

All this has been thus summed up,

In this school there are four elements, earth, water, fire and air;
And from these four elements alone is intelligence produced,—
Just like the intoxicating power from kiṇwa, &c. mixed together;
Since in 'I am fat,' 'I am lean,' these attributes * abide in the same subject,
And since fatness, &c. reside only in the body, † it alone is the soul and no other,
And such phrases as 'my body' are only significant metaphorically.

"Be it so," says the opponent, "your wish would be gained, if inference, &c. had no force of proof; but then they have this force; else, if they had not, then how on perceiving smoke, should the thoughts of the intelligent immediately proceed to fire; or why, on hearing another say 'there are fruits on the bank of the river,' do those who desire fruit proceed at once to the shore?"

All this, however, is only the inflation of the world of fancy.

Those who maintain the authority of inference accept the *sign*, or middle term, as the causer of knowledge which middle term must be found in the minor and be itself invariably connected with the major. ‡ Now this invariable connection must be a relation destitute of any

* Of course Śankara, in his commentary, gives a very different interpretation, applying it to the cessation of individual existence when the knowledge of the Supreme is once attained. Cf. Śabara's Comm. Jaimini Sút. i. i. 5.

† I take कण as here equal to कुड़.—Cf. Atharva V. xi. 3, 5.
अथ्याः कणा गावस्तण्डुला मशकास्तुषाः

‡ See Nyáya Sútras, II. 57.

* I. e. personality and fatness, &c.

† I read देहे for देहः.

‡ Literally "must be an attribute of the subject and have invariable attendedness (*vyápti*.)"

सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदादेयं तावदादाय निवर्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति स यावदादेयं तावदादाय निवर्तते तस्माद्दुःखभयाच्चानुकूलवेदनीयं सुखं त्यक्तुमुचितम्। न हि मृगाः सन्तीति शालयो नोप्यन्ते। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। यदि कश्चिद्वीरुद्रष्टं सुखं त्यजेत् तर्हि स पशुवन् मूर्खो भवेत्। तदुक्तम् त्याज्यं सुखं विषयसङ्गमजन्म पुंसां दुःखोपसृष्टमिति मूर्खविचारणैषा। व्रीहिन् जिहासति सितेतरतण्डुलाढ्यान् को नाम भोस्तुषकणोपहितान् हितार्थी ॥ ननु पारलौकिकसुखाभावे बहुवित्तव्ययशरीरायाससाध्ये अग्निहोत्रादौ विद्वाञ्छ्रुतः कथं प्रवर्तिष्यन्त इति चेत् तदपि न प्रमाणकोटिं प्रवेष्टुमीष्टे अनृतव्याघातपुनरुक्तिदोषैर्दूषिततया वैदिकम्मन्यैरेव धूर्तवर्कैः परस्परं कर्मकाण्डप्रामाण्यवादिभिर्ज्ञानकाण्डस्य। ज्ञानकाण्डप्रामाण्यवादिभिः कर्मकाण्डस्य च प्रतिक्षिप्तत्वेन त्रयी धूर्तप्रला

CC-0. Sampurnanand University Collection. Digitized by eGangotri

condition, accepted or disputed;* and this connection does not possess its power of causing inference by virtue of its *existence*, as the eye, &c. are the cause of perception, but by virtue of its being *known*. What then is the means of this connection's being known?

We will first shew that it is not *perception*. Now perception is held to be of two kinds, external and internal, *i. e.* as produced by the external senses, or by the inner sense, mind. The former is not the required means; for although it is possible that the actual contact of the senses and the object will produce the knowledge of the particular object thus brought in contact, yet as there can never be such contact in the case of the past or the future, the universal proposition† which was to embrace the invariable connection of the middle and major terms in every case, becomes impossible to be known. Nor may you maintain that this knowledge of the universal proposition has the general class as its object, because, if so, there might arise a doubt as to the existence of the invariable connection in this particular case,‡ [as for instance, in this particular smoke as implying fire].

Nor is internal perception the means, since you cannot establish that the mind has any power to act independently towards an external object, since all allow that it is dependent on the external senses, as has been said by one of the logicians, "The eye, &c., have their objects as described; but mind externally is dependent on the others."

Nor can *inference* be the means of the knowledge of the universal proposition, since in the case of this inference, we should also require another inference to establish it, and so on, and hence would arise the fallacy of an ad infinitum retrogression.

Nor can *testimony* be the means thereof, since we may either allege in reply, in accordance with the Vaiśeshika doctrine of Kaṇáda, that this is included in the topic of inference; or else we may hold that this fresh proof of testimony is unable to leap over the old barrier that stopped the progress of inference, since it depends itself on the recognition of a *sign*, in the form of the language used in the child's presence by the old man;* and moreover there is no more reason for our believing on another's word, that smoke and fire are invariably connected, than for our receiving the ipse dixit of Manu, &c., [which of course we Chárvákas reject].

And again, if testimony were to be accepted as the only means of the knowledge of the universal proposition, then in the case of a man to whom the fact of the invariable connection between the middle and major terms had not been pointed out by another person, there could be no inference of one thing [as fire] on seeing another thing [as smoke]; hence, on your own shewing, the whole topic of inference for oneself† would have to end in mere idle words.

Then again *comparison*,‡ &c., must be utterly rejected as the means of the knowledge of the universal proposition, since it is impossible that they can produce the knowledge of the unconditioned connection [*i. e.* the universal proposition], their end is to produce the knowledge of quite another connection, viz., the relation of a name to something so named.

* For the *sandigdha* and *niśchita upádhi* see Siddhánta Muktávali, p. 125. The former is accepted only by one party.

† Literally, the knowledge of the invariable attendedness (as of smoke by fire).

‡ The attributes of the class are not always found in every member,—thus idiots are men, though man is a rational animal; and again, this particular smoke might be a sign of a fire in some other place.

* See Sáhitya Darpaṇa (Dr. Ballantyne's trans. p. 16) and Siddhánta-M. p. 80.

† The properly logical, as distinguished from the rhetorical, argument.

‡ "*Upamána* or the knowledge of a similarity is the instrument in the production of an inference from similarity. This particular inference consists in the knowledge of the relation of a name to something so named." Dr. Ballantyne's Tarka Sangraha.

पमात्रत्वेन अग्निहोत्रादेर्जीविकामात्रप्रयोजनत्वात् । तथा चाभाणकः अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् । बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥ अत एव कण्टकादिजन्यं दुःखमेव नरकं लोकसिद्धो राजा परमेश्वरः देहोच्छेदो मोक्षः । देहात्मवादे च कृशो ऽहं कृशोऽहमित्यादिसामानाधिकरण्योपपत्तिः । मम शरीरमिति व्यवहारो राहोः शिर इत्यादिवदौपचारिकः । तदेतत् सर्वं समयाहि अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः । चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते । किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत् ॥ अहं स्थूलः कृशो ऽस्मीति सामानाधिकरण्यतः । देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः ॥ मम देहोऽयमित्युक्तिः सम्भवेदौपचारिकीति ॥ स्यादेतत्

स्यादेष मनोरथो यद्यनुमानादेः प्रामाण्यं न स्यात् अस्ति च प्रामाण्यं कथमन्यथा धूमोपलम्भनान्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत । नद्यास्तीरे फलानि सन्तीति वचनश्रवणसमनन्तरं फलार्थिनां नदीतीरे प्रवृत्तिरिति । तदेतन्मनोराज्यविजृम्भणम् । व्याप्तिपक्षधर्मताशालि हि लिङ्गं गमकमभ्युपगतमनुमानप्रामाण्यवादिभिः व्याप्तिश्चोभयविधोपाधिविधुरः सम्बन्धः स च स्वसत्तया चतुरादिवचाङ्गभावं भजते किन्तु ज्ञाततया । कः खलु ज्ञानोपायो भवेत् । न तावत् प्रत्यक्षं तच्च बाह्यमान्तरं वाभिमतम् । न प्रथमः तस्य सम्प्रयुक्तविषयज्ञानजनकत्वेन भवति प्रसरसम्भवेऽपि भूतभविष्यतोस्तदसम्भवेन सर्व्वोपसंहारवत्या व्याप्तेर्दुर्ज्ञानत्वात् । न च व्याप्तिज्ञानं सामान्यगोचरमिति मन्तव्यं व्यक्तयोरविनाभावाभावप्रसङ्गात् । नापि चरमः अन्तःकरणस्य बहिरिन्द्रियतन्त्रेण बाह्येऽर्थे स्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः । तदुक्तम् । चतुराद्युक्तविषयं परतन्त्रं बहिर्मन इति । नाप्यनुमानं व्याप्तिज्ञानोपायः तत्र तत्राप्येवमिति

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Again this same absence of a condition,* which has been given as the definition of an invariable connection [*i. e.* a universal proposition,] can itself never be known; since it is impossible to establish that all conditions must be objects of perception, and therefore, although the absence of perceptible things may be itself perceptible, the absence of non-perceptible things must be itself non-perceptible; and thus, since we must here too have recourse to inference, &c., we cannot leap over the obstacle which has already been planted to bar them. Again, we must accept as the definition of the condition, "it is that which is reciprocal or equipollent in extension † with the major term though not constantly accompanying the middle." These three distinguishing clauses, "not constantly accompanying the middle term," "constantly accompanying the major term," and "being constantly accompanied by it" [*i. e.* reciprocal], are needed in the full definition to stop respectively three such fallacious conditions, in the argument to prove the non-eternity of sound, as 'being produced,' 'the nature of a jar,' and the not causing audition;"‡ wherefore the definition holds,—and again it is established by the śloka of the great Doctor beginning *samásama.**

But since the knowledge of the condition must here precede the knowledge of the condition's absence, it is only when there is the knowledge of the condition, that the knowledge of the universality of the proposition is possible, *i. e.* a knowledge in the form of such a connection between the middle term and major term as is distinguished by the absence of any such condition; and on the other hand the knowledge of the condition depends upon the knowledge of the invariable connection. Thus we fasten on our opponents as with adamantine glue the thunderbolt-like fallacy of reasoning in a circle. Hence by the impossibility of knowing the universality of a proposition it becomes impossible to establish inference, &c.†

* The upádhi is the condition which must be supplied to restrict a too general middle term, as in the inference 'the mountain has smoke because it has fire,' if we add wet fuel as the condition of the fire, the middle term will be no longer too general. In the case of a true vyápti there is of course no upádhi.

† Ἀντιστρέφει. We have here our A with distributed predicate.

‡ If we omitted the first clause and only made the upádhi "that which constantly accompanies the major term and is constantly accompanied by it," then in the Naiyáyika argument 'sound is non-eternal, because it has the class of sound,' 'being produced' would serve as a Mimánsaka upádhi, to establish the *vyabhichára* fallacy, as it is reciprocal with 'non-eternal; but the omitted clause excludes it, as an Upádhi must be consistent with *either* party's opinions, and of course the Naiyáyika maintains that 'being produced' *always* accompanies the class of sound. Similarly if we defined the upádhi as 'not constantly accompanying the middle term and constantly accompanied by the major,' we might have as an upádhi 'the nature of a jar,' as this is never found with the middle term (the class or nature of sound only residing in sound, and that of a jar only in a jar,) while at the same time wherever the class of jar is found there is also found non-eternity. Lastly if we defined the upádhi as "not constantly accompanying the middle term, and constantly accompanying the major," we might have as a Mimánsaka upádhi 'the not causing audition' *i. e.* the not being apprehended by organs of hearing; but this is excluded, as non-eternity is not always found where this is, ether being inaudible and yet eternal.

* This refers to an obscure śloka of Udayanáchárya, "where a reciprocal and a non-reciprocal universal-connection (*i. e.* universal propositions which severally do and do not distribute their predicates) relate to the same argument (as *e. g.* to prove the existence of smoke,) there that non-reciprocating term of the second will be a fallacious middle, which is not invariably accompained by the other reciprocal of the first." Thus 'the mountain has smoke because it has fire' (here fire and smoke are non-reciprocating, as fire is not found invariably accompanied by smoke though smoke is by fire,) or 'because it has fire from wet fuel' (smoke and fire from wet fuel being reciprocal and always accompanying each other); the non-reciprocating term of the former (fire) will give a fallacious inference, because it is also, of course, not invariably accompained by the special kind of fire, that produced from wet fuel. But this will not be the case, where the non-reciprocating term *is* thus invariably accompanied by the other reciprocal, as 'the mountain has fire because it has smoke;' here though fire and smoke do not reciprocate, yet smoke will be a true middle, because it is invariably accompained by heat which is the reciprocal of fire.—I wish to add here, once all, that I own my explanation of this, as well as many another, difficulty in the Sarvadarśana-śangraha to my old friend and teacher, Pandit Mohesa Chandra Nyáyaratna of the Calcutta Sanskrit College.

† Cf. Sextus Empiricus, P. Hyp. ii.—In the chapter on the Buddhist system, *infra*, we have an attempt to establish the authority of the universal proposition from the relation of cause and effect or genus and species.

अनवस्थादोष्यप्रसङ्गात्। नापि शब्दस्तदुपायः कणादमतानुसारेणानुमान एवान्तर्भावात् अनन्तर्भावे वा वृद्धव्यवहारूपलिङ्गावगतिसापेक्षतया प्रागुक्तदूषणलङ्गनाजङ्गालत्वात् धूमधूमध्वजयोरविनाभावोऽस्तीति वचनमात्रे मन्वादिवद् विश्वासाभावाच्च। अनुपदिष्टाविनाभावस्य पुरुषस्यार्थान्तरदर्शनेनार्थान्तरानुमित्यभावे स्वार्थानुमानकथायाः कथाशेषत्वप्रसङ्गाच्च। उपमानादिकन्तु दूरापास्तं तेषां संज्ञासंज्ञिसम्बन्धादिबोधकत्वेनानौपाधिकसम्बन्धबोधकत्वासम्भवात्। किञ्च उपाध्यभावोऽपि दुरवगमः उपाधीनां प्रत्यक्षत्वनियमासम्भवेन प्रत्यक्षाणामभावस्य प्रत्यक्षत्वेऽपि अप्रत्यक्षाणामभावस्याप्रत्यक्षतया अनुमानाद्यपेक्षायामुक्तदूषणैनतिवृत्तेः। अपि च साधनाव्यापकत्वे सति साध्यसमव्याप्तिरिति तल्लक्षणं कर्त्तव्यम्। तदुक्तम् अव्याप्तसाधनो यः साध्यसमव्याप्तिरुच्यते स उपाधिरिति। शब्देऽनित्यत्वे साध्ये सकर्तृकत्वं घटत्वमश्रावणत्वं च व्यावर्त्तयितुमुपात्तान्यत्र क्रमतो विशेषणानि त्रीणि। तस्मादिदमनवद्यं समासमेत्यादिनोक्तमाचार्यैश्चेति (१)। तत्र विधध्यवसायपूर्वकत्वाद्विपेधाध्यवसायस्योपाधिज्ञाने ज्ञाते तदभावविशिष्टसम्बन्धरूपं व्याप्तिज्ञानं व्याप्तिज्ञानाधीनं चोपाधिज्ञानमिति परस्पराश्रयवज्रप्रहारदोषो वज्रलेपायते। तस्मादविनाभावस्य दुर्बोधतया नानुमानाद्यवकाशः। धूमादिज्ञानानन्तरमन्याद्यानयने प्रवृत्तिः प्रत्यक्षमूलतयाश्रान्त्या वा युज्यते। क्वचित् फलप्रतिलम्भस्तु मणिमन्त्रौषधादिवत्। यादृच्छिकः। अतस्तत्साध्यमदृष्टादिकमपि नास्ति। नन्वदृष्टानिष्टौ जगद्वैचित्र्यमाकस्मिकं स्यादिति चेत् न तद्वद्रं स्वभावादेव तदुपपत्तेः। तदुक्तम्। अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितेरिति॥ तदेतत् सर्वं बृहस्पतिनाप्युक्तम्। न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः। नैव वर्णाश्रमादीनां क्रियाश्च फलदायिका॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

The step which the mind takes from the knowledge of smoke, &c., to the knowledge of fire, &c., can be accounted for by its being based on a former perception or by its being an error; and that in some cases this step is justified by the result, is accidental just like the coincidence of effects observed in the employment of gems, charms, drugs, &c.

From this it follows that fate, &c.† do not exist, since these can only be proved by inference. But an opponent will say, if you thus do not allow adrishṭa, the various phenomena of the world become destitute of any cause. But we cannot accept this objection as valid, since these phenomena can all be produced spontaneously from the inherent nature of things. Thus it has been said.

The fire is hot, the water cold, refreshing cool the breeze of morn,
By whom came this variety? from their own nature was it born.

And all this has been also said by Brihaspati.

There is no heaven, no final liberation, nor any soul in another world
Nor do the actions of the four castes, orders &c., produce any rea effect.
The Agnihotra, the three Vedas, the ascetic's three staves, and smearing one's self with ashes,
Were made by Nature as the livelihood of those destitute of knowledge and manliness.

If a beast slain in the Jyotishtoma rite will itself go to heaven,
Why then does not the sacrificer forthwith offer his own father?‡
If the Śráddha produces gratification to beings who are dead,
Then here too in the case of travellers when they start, it is needless to give provisions for the journey.

If beings in heaven are gratified by our offering the Śráddha here,
Then why not give the food down below to those who are standing on the housetop?

While life remains, let a man live happily, let him feed on ghee, even though he runs in debt,
When once the body becomes ashes, how can it ever return again?
If he who departs from the body goes to another world,
How is it that he comes not back again, restless for love of his kindred?
Hence it is only as a means of livelihood that Brahmans have established here
All these ceremonies for the dead,—there is no other fruit anywhere?
The three authors of the Vedas were buffoons, knaves and demons.

† *Adrishta, i. e.* the merit and demerit in our actions which produce their effects in future births.

‡ This is an old Buddhist retort, See, Burnouf, *Introd.* p. 209.

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् । बुद्धिपौरुषहीनानां जीविका धातृनिर्मिता ॥ पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति । स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते ॥ मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् । गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम् ॥ स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः । प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते ॥ यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत् । भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥ यदि गच्छेत् परं लोकं देहादेष विनिर्गतः । कस्माद्भूयो न चायाति बन्धुस्नेहसमाकुलः ॥ ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह । मृतानां प्रेतकार्याणि न त्वन्यद्विद्यते क्वचित् ॥ त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः । जर्फरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम् ॥ अश्वस्यात्र हि शिश्नन्तु पत्नीयाग्रं प्रकीर्त्तितम् । भण्डैस्तद्वत् पर-

All the well known formulæ of the pandits, jarphari, turphari, &c.*
And all the obscene rites for the queen commanded in the Aśwamedha,
These were invented by buffoons, and so all the various kinds of presents to the priests,†
While the eating of flesh was similarly commanded by night prowling demons.

Hence in kindness to the mass of living beings must we fly for refuge to the doctrine of Chárváka. Such is the pleasant consummation.

E B. C.

* Rig veda, x. 106.—For the Aśwamedha rites, see Wilson's Rig V. preface, Vol. ii. p. xiii.

† Or this may mean "and all the various other things to be handled in the rites."

ष्त्रैव याज्ञजातं प्रकीर्त्तितम् ॥ मांसानां खादनं तद्वच्छाचरसमीरितमिति ॥ तस्माद्बहूनां प्राणिनामनुग्रहार्थं चार्व्वाकमतमाश्रयणीयमिति रमणीयम् ॥ इति सायणमाधवीये सर्व्वदर्शनसङ्ग्रहे चार्व्वाकदर्शनम् ॥

List of books printed and published and for sale by E. J. Lazarus and Co., at the Medical Hall Press, Benares.

THE LAGHU KAUMUDÍ, a Sanskrit grammar with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College. Benares. *Price* 8 *Rs.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares, Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

VAIŚESHIKA APHORISMS OF KANÁDA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADEŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNAVA DHARMA PRAKÁS ARTHAT MANUSMRITI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230 Price, Rs. 5-0-0.

SIDDHÁNTA KAUMUDI VYÁKARAN, 8vo. demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS. AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 104. Benares, January 1st, 1875. Vol. IX.

काशिकायाः

॥ तृतीयाध्यायस्य प्रथमः पादः ॥

ण्वुल्तृचौ ॥ १३३ ॥

धातोरिति वर्तते । सर्वधातुभ्यो ण्वुल्तृचौ प्रत्ययौ भवतः । कारकः । कर्त्ता । हारकः । हर्त्ता । चकारः सामान्यग्रहणाविघातार्थः । तुश्छन्दसि तुरिष्ठेमेयस्स्विति ॥

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥ १३४ ॥

प्रत्येकमादिशब्दः संबध्यते । त्रिभ्यो गणेभ्यस्त्रयः प्रत्यया यथासंख्यं भवन्ति । नन्द्यादिभ्यो ल्युः, ग्रहादिभ्यो णिनिः, पचादिभ्यो ऽच् । नन्दिग्रहिपचादयश्च न धातुपाठतः संनिविष्टा गृह्यन्ते, किं तर्हि नन्दनरमणेत्येवमादिषु प्रातिपदिकगणेषु अपोद्धृत्य प्रकृतयो निर्दिश्यन्ते ॥ नन्दिवासिमदिदूषिसाधिवर्द्धिशोभिरोषिभ्यो ण्यन्तेभ्यः संज्ञायाम् ॥ नन्दनः । वासनः । मदनः । दूषणः * । साधनः । वर्द्धनः । शोभनः । रोचनः ॥ सहितपिदमेः संज्ञायाम् ॥ सहनः । तपनः । दमनः । जल्पनः । रमणः । दर्पणः । संक्रन्दनः । संकर्षणः । संहर्षणः । जनार्दनः । यवनः † । मधुसूदनः । विभीषणः । लवणः । निपातनाण्णत्वम् । चित्तविनाशनः । कुलदमनः । शत्रुदमनः । इति नन्द्यादिः । ग्रह । उत्सह । उद्वस । उद्भास । स्था । मन्त्र । संमर्द । ग्राही । उत्साही । उद्वासी । उद्भासी । स्थायी । मन्त्री । संमर्दी ॥ रक्षश्रुवसवपशां नौ ॥ निरक्षी । निश्रावी । निवासी । निवापी । निशायी ॥ याचिव्याहृसंव्याहृव्रजवदवसां प्रतिषिद्धानाम् ॥ अपाची । अव्याहारी । असंव्याहारी । अव्राजी । अवादी । अवासी ॥ अचामचित्तकर्तृकाणाम् ॥ प्रतिषिद्धानामित्येव । अकारी । अहारी । अविनायी । अविशायी । विशयी ॥ विषयी देशे ॥ विषयी देशः ॥ अभिभावी भूते ॥ अभिभावी । अपराधी । उपरोधी । परिभावी । परिभवी । इति ग्रह्यादिः ॥ पच । वप । वद । चल । तप । पत । नदट् । भषट् । वस । गरट् । प्लवट् । तरट् । चोरट् । ग्राहट् । जर । मर । क्षर । क्षम । सूदट् । देवट् । मोरट् । सेव । मेष । क्रोध । मेधानर्त्त । व्रण । दर्श । दंश । दम्भ । जारभर । श्वपच * पचादिराकृतिगणः ॥

अज्विधिः सर्वधातुभ्यः पठ्यन्ते च पचादयः ।
अण्बाधनार्थमेव स्यात्सिध्यन्ति श्वपचादयः ॥ †

इगुपधज्ञाप्रीकिरः कः ॥ १३५ ॥

इगुपधेभ्यो जानातेः प्रीणातेः किरतेश्च कप्रत्ययो भवति । विक्षिपः । विलिखः । बुधः । कृशः । जानातीति ज्ञः । प्रीणातीति प्रियः । किरतीति किरः । देवसेवमेषादयः पचादौ पठितव्याः ॥

आतश्चोपसर्गे ॥ १३६ ॥

आकारान्तेभ्यो धातुभ्य उपसर्गउपपदे कप्रत्ययो भवति । णस्यापवादः । प्रस्थः । सुग्लः । सुम्लः ॥

पाघ्राध्माधेट्दृशः शः ॥ १३७ ॥

---

* पुस्तकान्तरे 'भूषणः' । इति पा० तदनुसारेण पूर्वमपि 'मदिभूषिसाधि' इति पा० ।

† पुस्तकान्तरे 'पवनः' । इति पा० २

* क्षर । मोरट् । क्रोध । दंश । दम्भ । एते पदमञ्जरीपर्यालोचनात्तर्क्यते वृत्तिपाठस्था न भवन्तीति । परं तु बहुषु काशिकापुस्तकेषूपलभ्यन्ते ।

† अयं श्लोको बहुषु पुस्तकेषु नास्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पादिभ्यो धातुभ्य उपसर्गउपपदे शप्रत्ययो भवति । उत्पिबः । विपिबः । उज्जिघ्रः । विजिघ्रः । उद्गमः । विधमः । धेट् । उद्धयः । विधयः । उत्पश्यः । विपश्यः । उपसर्गइति के चिदानुवर्तयन्ति । पश्यतीति पश्यः ॥ जिघ्रतेः संज्ञायां प्रतिषेधो वक्तव्यः ॥ * ॥ व्याघ्रः ॥

अनुपसर्गाल्लिम्पविन्दधारिपारिवेदुदेजिचेतिसातिसाहिभ्यश्च ॥ १३८ ॥

अनुपसर्गेभ्यो लिम्पादिभ्यः शप्रत्ययो भवति । लिम्पतीति लिम्पः । विन्दतीति विन्दः । धारयतीति धारयः । पारयतीति पारयः । वेदयतीति वेदयः । उदेजयतीत्युदेजयः । चेतयतीति चेतयः । सातिः सौत्रो धातुः । सातयः । साहयः । अनुपसर्गादिति किम् । प्रलिपः ॥ नौ लिम्पेरिति वक्तव्यम् ॥ * ॥ निलिम्पा नाम देवाः ॥ गवादिषु विन्देः संज्ञायाम् ॥ * ॥ गोविन्दः । अरविन्दः ॥

ददातिदधात्योर्विभाषा ॥ १३९ ॥

दाञो धाञश्च विभाषा शप्रत्ययो भवति । णस्यापवादः । ददः । दायः । दधः । धायः । अनुपसर्गादित्येव । प्रदः । प्रधः ॥

ज्वलितिकसन्तेभ्यो णः ॥ १४० ॥

इतिशब्द आद्यर्थः । ज्वलदीप्तावित्येवमादिभ्यो धातुभ्यः कसगतावित्येवमन्तेभ्यो विभाषा णप्रत्ययो भवति । अचोऽपवादः । ज्वालः । ज्वलः । चालः । चलः । अनुपसर्गादित्येव । प्रज्वलः ॥ तनोतेर्ण उपसंख्यानम् ॥ * ॥ अवतनोतीत्यवतानः ॥

श्याऽऽह्वाम्रसंव्रतीणवसावह्रलिहश्लिषश्वसश्च ॥ १४१ ॥

अनुपसर्गादिति विभाषा चेति निवृत्तम् । श्यैङ आकारान्तेभ्यश्च धातुभ्यः व्यध आसु संसु व्रतीण अवसा अवह्र लिह श्लिष श्वस इत्येतेभ्यश्च णप्रत्ययो भवति । आकारान्तत्वादेव श्यायतेः प्रत्यये सिद्धे पुनर्वचनं बाधकबाधनार्थम् । उपसर्गे कं बाधित्वा ऽयमेव भवति । अवश्यायः । प्रतिश्यायः । दायः । धायः । व्याधः । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः ॥

दुन्योरनुपसर्गे ॥ १४२ ॥

दुनोतेर्नयतेश्चानुपसर्गे णप्रत्ययो भवति । दुनोतीति दावः । नयतीति, नायः । अनुपसर्गइति किम् । प्रदवः । प्रणयः ॥

विभाषा ग्रहः ॥ १४३ ॥

विभाषा ग्रहेर्धातोर्णप्रत्ययो भवति । अचोपवादः । ग्रहः । ग्राहः । व्यवस्थितविभाषा चेयम् । जलचरे नित्यम् । ग्राहः । ज्योतिषि नेष्यते । तत्र ग्रह एव* ॥ भवतेश्चेति वक्तव्यम् ॥ * ॥ भवतीति, भावः । भवः ॥

गेहे कः ॥ १४४ ॥

ग्रहेर्धातोः कप्रत्ययो भवति गेहे कर्त्तरि । गृहं वेश्म । तात्स्थ्याद्वाराश्च । गृह्णन्तीति, गृहा दाराः । गृहाणि वेश्मानि ॥

शिल्पिनि ष्वुन् ॥ १४५ ॥

धातोः ष्वुन्प्रत्ययो भवति शिल्पिनि कर्त्तरि ॥ नृतिखनिरञ्जिभ्यः परिगणनं कर्त्तव्यम् ॥ * ॥ नर्त्तकः । खनकः । रजकः । नर्त्तकी । खनकी । रजकी । रञ्जेरनुनासिकलोपश्च ॥

गास्थकन् ॥ १४६ ॥

गायतेस्थकन्प्रत्ययो भवति शिल्पिनि कर्त्तरि । गायकः । गायिका ॥

ण्युट् च ॥ १४७ ॥

चकारेण ग इत्यनुकृष्यते† । गायतेर्ण्युट्प्रत्ययो भवति शिल्पिनि कर्त्तरि । गायनः । गायनी । योगविभाग उत्तरार्थः ॥

हश्च व्रीह्रिकालयोः ॥ १४८ ॥

चकारेण ण्युडनुकृष्यते । जहातेर्जिहीतेश्च धातोर्ण्युट्प्रत्ययो भवति व्रीह्रौ काले च कर्त्तरि । हायना नाम व्रीहयः । जहत्युदकमिति कृत्वा । काले । हायनः संवत्सरः । जहाति भावानिति ॥

प्रुस्रु‡ल्वः समभिहारे वुन् ॥ १४९ ॥

प्रु सृ लू इत्येतेभ्यो धातुभ्यः समभिहारे वुन्प्रत्ययो भवति । प्रवकः । सरकः । लवकः । समभिहारग्रहणेनात्र साधुकारित्वं लक्ष्यते । साधुकारिणि वुन्विधानात्सकृदपि यः सुष्ठु करोति तत्र भवति । बहुशो यो दुष्टं करोति तत्र न भवति ॥

आशिषि च ॥ १५० ॥

आशिषि गम्यमानायां धातुमात्राद् वुन्प्रत्ययो भवति । जीवतात्, जीवकः । नन्दतात्, नन्दकः । आशीः प्रार्थनाविशेषः । स च क्रियाविषयः । अमुष्याः क्रियायाः कर्त्ता भवेदित्येवमाशास्यते ॥

इति काशिकायां वृत्तौ तृतीयस्याध्यायस्य प्रथमः पादः ॥

---

* जलचरे ग्राह एव । ज्योतिषि ग्रह एव । इति पा० २ ।

† 'थकन् इत्यनुकृष्यते' इति क्व चित् पुस्तके पाठो असंगतः ।

‡ 'सु' इत्येकस्मिन् पुस्तके पाठः, तदनुसारेणोदाहरणमपि सरक इत्यस्य स्थाने सवक इत्येव तत्र ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ तृतीयस्याध्यायस्य द्वितीयः पादः ।

कर्मण्यण् ॥ १ ॥

त्रिविधं कर्म निर्वर्त्यं विकार्यं प्राप्यं चेति । सर्वत्र कर्मण्युपपदे धातोरण्प्रत्ययो भवति । निर्वर्त्यं तावत् । कुम्भकारः । नगरकारः । विकार्यम् । काण्डलावः । शरलावः । प्राप्यम् । वेदाध्यायः । चर्चापाठः । ग्रामं गच्छति, आदित्यं पश्यति, हिमवन्तं शृणोतीत्यत्र न भवत्यनभिधानात् ॥ शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् ॥*॥ मांसशीलः । मांसशीला । मांसकामः । मांसकामा । मांसभक्षः । मांसभक्षा । कल्याणाचारः । कल्याणाचारा ॥ ईक्षितृमिभ्यां चेति वक्तव्यम् ॥*॥ सुखप्रतीक्षः । सुखप्रतीक्षा । बहुक्षमः । बहुक्षमा ॥

क्ष्वावामश्च ॥ २ ॥

क्ष्वेञ् स्पर्द्धायां शब्दे च । वेञ् तन्तुसन्ताने । माङ् माने । एतेभ्यश्च कर्मण्युपपदे ऽण् प्रत्ययो भवति । कप्रत्ययापवादः । स्वर्गक्ष्वायः । तन्तुवायः । धान्यमायः ॥

आतो ऽनुपसर्गे कः ॥ ३ ॥

आकारान्तेभ्यो ऽनुपसर्गेभ्यः कर्मण्युपपदे कप्रत्ययो भवति । अणोपवादः । गोदः । कम्बलदः । पार्ष्णिघ्नम् । अङ्गुलिघ्नम् । अनुपसर्गादिति किम् । गोसंदायः । घडवासंदायः ।

सुपि स्थः ॥ ४ ॥

सुबन्तउपपदे तिष्ठतेः कप्रत्ययो भवति । समस्थः । विषमस्थः* । अत्र योगविभागः कर्त्तव्यः । सुपीति । सुप्याकारान्तेभ्यः कप्रत्ययो भवति । द्वाभ्यां पिबतीति द्विपः । पादपः । कच्छपः । ततः स्थः । स्थश्च सुपि कप्रत्ययो भवति । किमर्थमिदम् । कर्तरि पूर्वयोगः । अनेन भावे यथा स्यात् । आखूनामुत्थानम्,आखूत्थः । शलभोत्थः । इत उत्तरं कर्मणीति च सुपीति च द्वयमप्यनुवर्त्तते । तत्र सकर्मकेषु धातुषु कर्मणीत्येतदुपतिष्ठते । अन्यत्र सुपीति ॥

तुन्दशोकयोः परिमृजापनुदोः ॥ ५ ॥

तुन्दशोकयोः कर्मणोरुपपदयोः परिमृजापनुदोर्धात्वोः कप्रत्ययो भवति । तुन्दपरिमृज आस्ते । शोकापनुदः पुत्रो जातः ॥ आलस्यसुखाहरणयोरिति वक्तव्यम् ॥*॥ आलस्तुन्दपरिमृज उच्यते । तुन्दपरिमार्ज एवान्यः । सुखस्याहर्त्ता शोकापनुदः । शोकापनोद एवान्यः ॥ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ॥*॥ मूलानि विभुजतीति मूलविभुजो रथः । नखमुचानि धनूंषि । काकगुहास्तिलाः । कौ मोदते कुमुदम् ॥

* कूटस्थ इत्यपि क्व चित् ।

प्रे दाज्ञः ॥ ६ ॥

सोपसर्गार्थं आरम्भः । ददातेर्जानातेश्च धातोः प्रेणोपसृष्टात्कर्मण्युपपदे कप्रत्ययो भवति । अणोपवादः । सर्वप्रदः । पथिप्रज्ञः । प्रदृति किम् । गोसंदायः ॥

समि ख्यः ॥ ७ ॥

सोपसर्गार्थं आरम्भः । संपूर्वात्ख्या दृत्येतस्माद्धातोः कर्मण्युपपदे कप्रत्ययो भवति । अणोपवादः । गां संचष्टे, गोसंख्यः ॥

गापोष्टक् ॥ ८ ॥

कर्मण्यनुपसर्गादिति वर्त्तते । गायतेः पिबतेश्च धातोः कर्मण्युपपदे ऽनुपसर्गे टक् प्रत्ययो भवति । कस्यापवादः । शक्रं गायति, शक्रगः । सामगः । शक्रगी । सामगी ॥ सुराशीध्वोः पिबतेरिति वक्तव्यम् ॥*॥ सुरापः । सुरापी । शीधुपः । शीधुपी । सुराशीध्वोरिति किम् । वीरया ब्राह्मणी । पिबतेरिति किम् । सुरां पातीति सुरापा । अनुपसर्गादित्येव । शक्रसंगायः । सामसंगायः ॥ बहुलं छन्दसीति वक्तव्यम् ॥*॥ या ब्राह्मणी सुरापी भवति नैनां देवाः पतिलोकं नयन्ति । या ब्राह्मणी सुरापा भवति नैनां देवाः पतिलोकं नयन्ति ॥

हरतेरनुद्यमने ऽच् ॥ ९ ॥

हरतेर्धातोरनुद्यमने वर्त्तमानात्कर्मण्युपपदे ऽच् प्रत्ययो भवति । अणोपवादः । उद्यमनमुत्क्षेपणम् । अंशं हरतीत्यंशहरः । रिक्थहरः । अनुद्यमनादितिकिम् । भारहारः ॥ अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु ग्रहेरुपसंख्यानम् ॥*॥ शक्तियहः । लाङ्गलयहः । अङ्कुशयहः । यष्टियहः । तोमरयहः । घटयहः । घटीयहः । धनुर्यहः ॥ सूत्रे च धार्यर्थे ॥*॥ सूत्रयहः । सूत्रं धारयतीत्यर्थः । सूत्रयाह एवान्यः ॥

वयसि च ॥ १० ॥

वयसि गम्यमाने हरतेः कर्मण्युपपदे ऽच्प्रत्ययो भवति । उद्यमनार्थोयमारम्भः । कालकृता शरीरावस्था यौवनादिर्वयः । यदुद्यमनं क्रियमाणं संभाव्यमानं वा वयो गमयति तत्रायं विधिः । अस्थिहरः श्वा । कवचहरः क्षत्रियकुमारः ॥

आङि ताच्छील्ये ॥ ११ ॥

आङ्पूर्वाद्धरतेः कर्मण्युपपदे ऽच्प्रत्ययो भवति ताच्छील्ये गम्यमाने । ताच्छील्यं तत्स्वभावता । पुष्पाहरः । फलाहरः । पुष्पाहरणे स्वाभाविकी फलानपेक्षा प्रवृत्तिरस्येत्यर्थः । ताच्छील्यदिति किम् । भारमाहरतीति भाराहारः ॥

अर्हः ॥ १२ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अर्हे पूजायाम्, अस्माद्धातोः कर्मण्युपपदे ऽच् प्रत्ययो भवति । अणोपवादः । स्त्रीलिङ्गे विशेषः । पूजार्हा । गन्धार्हा । मालार्हा ॥

स्तम्बकर्णयो रमिजपोः ॥ १३ ॥

स्तम्ब कर्ण इत्येतयोः सुबन्तयोरुपपदयोर्यथासंख्यं रमिजपोर्धात्वोरच् प्रत्ययो भवति । रमेरकर्मकत्वाज्जपेः शब्दकर्मकत्वात्कर्म न संभवतीति सुपीत्येतदिहाभिसंबध्यते ॥ हस्तिसूचकयोरिति वक्तव्यम् ॥ * ॥ स्तम्बे रमते, सम्बेरमो हस्ती । कर्णे जपतीति, कर्णेजपः सूचकः । हस्तिसूचकयोरिति किम् । स्तम्बे रन्ता । कर्णे जपिता मशकः ॥

शमि धातोः संज्ञायाम् ॥ १४ ॥

शम्युपपदे धातुमात्रात्संज्ञायां विषये ऽच्प्रत्ययो भवति । शंकरः । शंभवः । शंवदः । धातुग्रहणं किम् । यावता धातोरिति वर्त्ततएव । शमिसंज्ञायामिति सिद्धे धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थम् । शंकरा नाम परिव्राजिका । शंकरा नाम शकुनिका । तच्छीला च ॥

अधिकरणे शेतेः ॥ १५ ॥

सुपीति संबध्यते । शेतेर्धातोरधिकरणे सुबन्तउपपदे ऽच्प्रत्ययो भवति । खे शेते खशयः । गर्तशयः ॥ पार्श्वादिषूपसंख्यानम् ॥ * ॥ पार्श्वाभ्यां शेते पार्श्वशयः । उदरशयः । पृष्ठशयः ॥ दिग्धसहपूर्वाच्च ॥ * ॥ दिग्धेन सह शेते दिग्धसहशयः ॥ उत्तानादिषु कर्त्तृषु ॥ * ॥ उत्तानः शेते, उत्तानशयः । अवमूर्द्धा शेते, ऽवमूर्द्धशयः ॥ गिरौ डश्छन्दसि ॥ * ॥ गिरौ शेते गिरिशः ॥

चरेष्टः ॥ १६ ॥

अधिकरण इति वर्त्तते । चरेर्धातोरधिकरणे सुबन्तउपपदे टप्रत्ययो भवति । कुरुषु चरतीति कुरुचरः । मद्रचरः । कुरुचरी । मद्रचरी । प्रत्ययान्तरकरणं ङीर्थम् ॥

भिक्षासेनादायेषु च ॥ १७ ॥

अनधिकरणार्थ आरम्भः । भिक्षा सेना आदाय इत्येतेषूपपदेषु चरेर्धातोष्टप्रत्ययो भवति । भिक्षाचरः । सेनाचरः । आदायचरः ॥

पुरोयतोग्रेषु सर्त्तेः ॥ १८ ॥

पुरस् अयतस् अग्रे इत्येतेषूपपदेषु सर्त्तेर्धातोष्टप्रत्ययो भवति । पुरः सरति, पुरः सरः । अयतः सरः । अग्रेसरः ॥

पूर्वे कर्त्तरि ॥ १९ ॥

पूर्वशब्दे कर्तृवाचिन्युपपदे सर्त्तेर्धातोष्टप्रत्ययो भवति । पूर्वः सरतीति, पूर्वसरः । कर्त्तरीति किम् । पूर्वं देशं सरति, पूर्वसारः ॥

कृञो हेतुताच्छील्यानुलोम्येषु ॥ २० ॥

कर्मण्युपपदे करोतेर्धातोष्टप्रत्ययो भवति । हेतौ ताच्छील्ये आनुलोम्ये च गम्यमाने । हेतुरैकान्तिकं कारणम् । ताच्छील्यं तत्स्वभावता । आनुलोम्यमनुकूलता । हेतौ तावत् । शोककरी कन्या । यशस्करी विद्या । कुलकरं धनम् । ताच्छील्ये । श्राद्धकरः । अर्थकरः । आनुलोम्ये । प्रेषकरः । वचनकरः । एतेष्विति किम् । कुम्भकारः । नगरकारः ॥

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रचेलसंख्याजङ्घाबाह्वर्यतद्धनुररुष्षु ॥ २१ ॥

कर्मणि सुपीति च द्वयमप्यनुवर्त्तते । तत्र यथायोगं सम्बन्धः । दिवादिषूपपदेषु करोतेर्धातोष्टप्रत्ययो भवति । अहेस्वाद्यर्थं आरम्भः । दिवाशब्दो ऽधिकरणवचनः सुपीत्यस्य विशेषणम् । दिवा करोति प्राणिनश्चेष्टायुक्तानिति, दिवाकरः । विभां करोतीति विभाकरः । निशाकरः । प्रभाकरः । भास्करः । सकारस्यनिपातनाद्विसर्जनीयजिह्वामूलीयौ न भवतः । कारकरः । अन्तकरः । अनन्तकरः । आदिकरः । बहुकरः । नान्दीकरः । किंकरः । लिपिकरः । लिबिकरः । बलिकरः । भक्तिकरः । कर्तृकरः । चित्रकरः । चेत्रकरः । संख्या । एककरः । द्विकरः । त्रिकरः । जङ्घाकरः । बाहुकरः । अहस्करः । यत्करः । तत्करः । धनुष्करः । अरुष्करः ॥ किंयत्तद्बहुषु कृञो ऽन्विधानम् ॥ * ॥ किंकरा । यत्करा । तत्करा । बहुकरा । अथ वा ऽजादिषु पाठः करिष्यते ॥

कर्मणि भृतौ ॥ २२ ॥

कर्मणीति स्वरूपग्रहणम् । कर्मशब्दउपपदे कर्मवाचिनि करोतेष्टप्रत्ययो भवति भृतौ गम्यमानायाम् । भृतिर्वेतनम् । कर्म निर्वेशः । कर्म करोतीति, कर्मकरः । भृतक इत्यर्थः । भृताविति किम् । कर्मकारः ॥

न शब्दश्लोककलहगाथावैरचाटुसूचमन्त्रपदेषु ॥ २३ ॥

शब्दादिषूपपदेषु करोतेष्टप्रत्ययो न भवति । हेत्वादिषु प्राप्तः प्रतिषिध्यते । शब्दकारः । श्लोककारः । कलहकारः । गाथाकारः । वैरकारः । चाटुकारः । सूचकारः । मन्त्रकारः । पदकारः ॥

स्तम्बशकृतोरिन् ॥ २४ ॥

स्तम्ब शकृत् इत्येतयोः कर्मणोरुपपदयोरिन्प्रत्ययो भवति ॥ व्रीहिवत्सयोरिति वक्तव्यम् ॥ * ॥ स्तम्बकरिः व्रीहिः । शकृत्करिर्वत्सः । व्रीहिवत्सयोरिति किम् । स्तम्बकारः । शकृत्कारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हरतेर्दृतिनाथयोः पशौ ॥ २५ ॥

दृति नाथ इत्येतयोः कर्मणोरुपपदयोः हरतेर्धातोः पशौ कर्तरि इन्प्रत्ययो भवति । दृतिं हरति,दृतिहरिः पशुः । नाथहरिः पशुः । पशाविति किम् । दृतिहारः । नाथहारः ॥

फलेग्रहिरात्मम्भरिश्च ॥ २६ ॥

फलेग्रहिः आत्मम्भरिः इत्येतौ शब्दौ निपात्येते । उपपदस्य एकारान्तत्वमिन्प्रत्ययश्च ग्रहेर्निपात्येते । फलानि गृह्णातीति, फलेग्रहिर्वृक्षः । आत्मशब्दस्य उपपदस्य मुमागम इन्प्रत्ययश्च भृञो निपात्यते । आत्मानं बिभर्त्ति, आत्मम्भरिः । अनुक्तसमुच्चयार्थश्चकारः । कुक्षिम्भरिः । उदरम्भरिः ॥

छन्दसि वनसनरक्षिमथाम् ॥ २७ ॥

वन षण संभक्तौ, रक्ष पालने,मथे विलोडने,एतेभ्यः कर्मण्युपपदे छन्दसि विषये इन्प्रत्ययो भवति । ब्रह्मवनिं त्वा क्षत्रवनिम् । गोसनिं यो पथिरक्षी श्वानौ । हविर्मथीनाम् ॥

एजेः खश् ॥ २८ ॥

एजृकम्पने इत्यस्माद् ण्यन्तात्कर्मण्युपपदे खश् प्रत्ययो भवति । खकारो मुमर्थः । शकारः सार्वधातुकसंज्ञार्थः । अङ्गमेजयति, अङ्गमेजयः । जनमेजयः ॥ खशप्रत्यये * वातशुनीतिलशर्दुष्वजधेट्तुदजहातीनामुपसंख्यानम् ॥ * ॥ वातमजा मृगाः । शुनिन्धयः । तिलन्तुदः । शर्दुञ्जहा मापाः ॥

नासिकास्तनयोर्ध्माधेटोः ॥ २९ ॥

नासिकास्तनयोः कर्मणोरुपपदयोर्ध्माधेटोर्धात्वोः खशप्रत्ययो भवति ॥ यथासंख्यमत्र नेष्यते ॥ स्तने धेटः ॥ * ॥ स्तनन्धयः ॥ नासिकायां तु ध्मश्च धेटश्च ॥ * ॥ नासिकन्धमः । नासिकंधयः । तच्चैतन्नासिकास्तनयोरिति लक्षणव्यभिचारचिह्नादल्पान्तरस्यापूर्वनिपातनाल्लभ्यते । धेट पित्त्वात् स्त्रियां ङीप् प्रत्ययो भवति । स्तनन्धयी ॥

नाडीमुष्ट्योश्च ॥ ३० ॥

नाडी मुष्टि इत्येतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् प्रत्ययो भवति । अत्रापि घ्यन्तस्यापूर्वनिपातो लक्षणव्यभिचारचिह्नं, तेन संख्यातानुदेशो न भवति । नाडिन्धमः । मुष्टिन्धमः । नाडिन्धयः । मुष्टिन्धयः । अनुक्तसमुच्चयार्थश्चकारः । घटिन्धमः । घटिन्धयः । खारिन्धमः । खारिन्धयः । वातन्धयः । वातन्धमः । पर्वतः ॥

उदि कूले रुजिवहोः ॥ ३१ ॥

रुजो भङ्गे, वह प्रापणे, एताभ्यामुत्पूर्वाभ्यां कूले कर्मण्युपपदे खश् प्रत्ययो भवति । कूलमुद्रुजतीति कूलमुद्रुजो रथः । कूलमुद्वहः ॥

* खशप्रकरणे इति इति बहुषु पुस्तकेषु पाठः ।

वहाभ्रे लिहः ॥ ३२ ॥

वह अभ्र इत्येतयोः कर्मणोरुपपदयोः लिहेर्धातोः खश् प्रत्ययो भवति । वहं लेढीति, वहंलिहो गौः । अभ्रंलिहो वायुः ॥

परिमाणे पचः ॥ ३३ ॥

परिमाणं प्रस्थादि, तस्मिन्कर्मण्युपपदे पचेः खशप्रत्ययो भवति । प्रस्थं पचति, प्रस्थंपचा स्थाली । द्रोणम्पचः । खारिम्पचः कटाहः ॥

मितनखे च ॥ ३४ ॥

मित नख इत्येतयोः कर्मणोरुपपदयोः पचेः खशप्रत्ययो भवति । अपरिमाणार्थं आरम्भः । मितं पचति, मितम्पचा ब्राह्मणी । नखम्पचा यवागूः ॥

विध्वरुषोस्तुदः ॥ ३५ ॥

विधु अरुस् इत्येतयोः कर्मणोरुपपदयोः तुदेर्धातोः खशप्रत्ययो भवति । विधुन्तुदः राहुः । अरुन्तुदः ॥

असूर्यललाटयोर्दृशितपोः ॥ ३६ ॥

असूर्यललाट इत्येतयोः कर्मणोरुपपदयोः दृशितपोर्धात्वोः खशप्रत्ययो भवति । असूर्यम्पश्या राजदाराः । ललाटन्तप आदित्यः । असूर्यं इति चासमर्थसमासोऽयम् । दृशिना नञः संबन्धात् । सूर्यं न पश्यन्तीति । गुप्तिपरं चैतत् । एवं नाम गुप्ता यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्तीति ॥

उरसम्पश्येरम्मदपाणिन्धमाश्च ॥ ३७ ॥

उरसम्पश्य इरम्मद पाणिन्धम इत्येते शब्दा निपात्यन्ते । उरं पश्यतीत्युरसम्पश्यः । इरया माद्यतीतीरम्मदः । पाणयो ध्मायन्ते एष्विति पाणिन्धमाः पन्थानः ॥

प्रियवशे वदः खच् ॥ ३८ ॥

प्रिय वश इत्येतयोः कर्मणोरुपपदयोर्वदेर्धातोः खच्प्रत्ययो भवति । प्रियं वदतीति, प्रियंवदः । वशंवदः । चकारः खचि ह्रस्व इति विशेषणार्थः । खकारो मुमर्थः । प्रत्ययान्तरकरणमुत्तरार्थम् ॥ खच्प्रकरणे गमेः सुप्युपसंख्यानम् ॥ * ॥ मितंगमो हस्ती । मितंगमा हस्तिनी ॥ विहायसो विह च ॥* ॥ * विहायसा गच्छति, विहंगमः ॥ खच्च डिद्वा वक्तव्यः ॥ * ॥ विहंगः । विहंगमः ॥ डे च विहायसो विहादेशो वक्तव्यः ॥ * ॥ विहगः ॥

द्विषत्परयोस्तापेः ॥ ३९ ॥

द्विषत्परयोः कर्मणोरुपपदयोस्तापेर्धातोः खच्प्रत्ययो भ-

* विहायसेति क्व चित् पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वति । तप दाहे, चुरादिः । तप संतापे, भ्वादिः । द्वयोरपि ग्रहणम् । द्विषन्तं तापयति द्विषन्तपः । परन्तपः । द्विषत्परयोरिति द्वितकारको निर्देशः । तेन स्त्रियां न भवति । द्विषतीं तापयति द्विषतीतापः ॥

वाचि यमो व्रते ॥ ४० ॥

वाक्शब्दे कर्मण्युपपदे यमेर्धातोः खच्प्रत्ययो भवति व्रते गम्यमाने । व्रतइति शास्त्रतो नियम उच्यते । वाचंयम आस्ते । व्रतइति किम् । वाग्यामः ॥

पूःसर्वयोर्दारिसहोः ॥ ४१ ॥

पुर् सर्व इत्येतयोः कर्मणोरुपपदयोर्यथासंख्यं दारिसहोर्धात्वोः खच्प्रत्ययो भवति । पुरं दारयति, पुरंदरः । सर्वंसहो राजा ॥ भगे च दारेरिति वक्तव्यम् ॥ * ॥ भगन्दरः ॥

सर्वकूलाभ्रकरीषेषु कषः ॥ ४२ ॥

सर्व कूल अभ्र करीष इत्येतेषु कर्मसूपपदेषु कषेर्धातोः खच्प्रत्ययो भवति । सर्वं कषति, सर्वंकषः खलः । कूलंकषा नदी । अभ्रंकषो गिरिः । करीषंकषा वात्या ॥

मेघर्त्तिभयेषु कृञः ॥ ४३ ॥

मेघ ऋति भय इत्येतेषु कर्मसूपपदेषु कृञः खच्प्रत्ययो भवति । मेघंकरः । ऋतिंकरः । भयंकरः ॥ उपपदविधौ भयादियहणं तदन्तविधिं प्रयोजयति ॥ * ॥ अभयंकरः ॥

क्षेमप्रियमद्रे ऽण् च ॥ ४४ ॥

क्षेम प्रिय मद्र इत्येतेषु कर्मसूपपदेषु करोतेरण् प्रत्ययो भवति, चकारात्खच्च । क्षेमकारः । क्षेमंकरः । प्रियकारः । प्रियंकरः । मद्रकारः । मद्रंकरः । वेति वक्तव्ये पुनरणग्रहणं हेत्वादिषु टप्रतिषेधार्थम् ॥

आशिते भुवः करणभावयोः ॥ ४५ ॥

अन्न सुपीत्युपतिष्ठते । आशितशब्दे सुबन्ते उपपदे भवतेर्धातोः करणे भावे चार्थे खच्प्रत्ययो भवति । आशितो भवत्यनेन, आशितंभव ओदनः । भावे । आशितस्य भवन, माशितंभवं वर्त्तते ॥

संज्ञायां भृतृवृजिधारिसहितपिदमः ॥ ४६ ॥

कर्मणीति च सुपीति च प्रकृतं संज्ञावशाद्व्यधासंभवं संबध्यते भृ तृ वृजि धारि सहि तपि दम इत्येतेभ्यो धातुभ्यः संज्ञायां विषये खच्प्रत्ययो भवति । विश्वंभरा वसुंधरा । रथंतरं साम । पतिंवरा कन्या । शत्रुंजयो हस्ती । युगंधरः पर्वतः । शत्रुंसहः । शत्रुंतपः । अरिंदमः । संज्ञायामिति किम् । कुटुम्बं बिभर्त्तीति कुटुम्बंभारः * ॥

† कुट्टालं बिभर्ति कुट्टालभारः । इत्यधिकं क्व चित् ।

गमश्च ॥ ४७ ॥

गमेर्धातोः सुप्युपपदे संज्ञायां विषये खच्प्रत्ययो भवति । सुतंगमो नाम यस्य पुत्रः सौतंगमिः । योगविभाग उत्तरार्थः ॥

अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ ४८ ॥

संज्ञायामिति नानुवर्त्तते । अन्त अत्यन्त अध्वन् दूर पार सर्व अनन्त इत्येतेषु कर्मसूपपदेषु गमेर्डप्रत्ययो भवति । अन्तगः । अत्यन्तगः । अध्वगः । दूरगः । पारगः । सर्वगः । अनन्तगः । डकारष्टिलोपार्थः । डित्यभस्याप्यनुबन्धकरणसामर्थ्यादिति ॥ डप्रकरणे सर्वचपचयोरुपसंख्यानम् ॥ * ॥ सर्वचगः । पचगः ॥ उरसो लोपश्च ॥ * ॥ उरसा गच्छतीत्युरगः ॥ सुदुरोरधिकरणे ॥ * ॥ सुखेन गच्छत्यस्मिन्निति सुगः । दुर्गः ॥ निरो देशे ॥ * ॥ निर्गो देशः । अपर आह ॥ डप्रकरणेन्येष्वपि * दृश्यत इति ॥ * ॥ स्त्र्यगारगः । ग्रामगः । गुरुतल्पगः ॥

आशिषि हनः ॥ ४९ ॥

ड इति वर्त्तते । आशिषि गम्यमानायां हन्तेर्धातोः कर्मण्युपपदे डप्रत्ययो भवति । तिमिं वध्यात्तिमिहः । शत्रुहः । आशिषीति किम् । शत्रुघातः ॥ दारावाहनो ऽणन्तस्य च टः संज्ञायाम् ॥ * ॥ दारावुपपदे आङ्पूर्वाद्धन्तेरण् प्रत्ययो भवति, अन्तस्य च टकारादेशो भवति, संज्ञायां विषये । दारु आहन्ति,दार्वाघाटः ॥ चारौ वा ॥ * ॥ आङ्पूर्वाद्धन्तेश्चारावुपपदे ऽण्, अन्तस्य वा टकारादेशः । चार्वाघाटः । चार्वाघातः ॥ कर्मणि समि च ॥ * ॥ कर्मण्युपपदे संपूर्वाद्धन्तेरणप्रत्ययो ऽन्तस्य च वा टकारादेशः । वर्णान्संहन्ति, वर्णसंघाटः । पदानि संहन्ति पदसंघाटः । पदसंघातः ॥

अपे क्लेशतमसोः ॥ ५० ॥

अपपूर्वाद्धन्तेः क्लेशतमसोः कर्मणोरुपपदयोर्डप्रत्ययो भवति । क्लेशापहः पुत्रः । तमोपहः सूर्यः । अनाशीरर्थ आरम्भः ॥

कुमारशीर्षयोर्णिनिः ॥ ५१ ॥

हन इति वर्त्तते । कुमार शीर्ष इत्येतयोरुपपदयोः हन्तेर्णिनिः प्रत्ययो भवति । कुमारघाती । शीर्षघाती । निपातनाच्छिरसः शीर्षभावः ॥

लक्षणे जायापत्योष्टक् ॥ ५२ ॥

हन्तेर्जायापत्योः कर्मणोरुपपदयोर्लक्षणवति कर्त्तरि टक्प्रत्ययो भवति । जायाघ्नो ब्राह्मणः । पतिघ्नी वृषली । अथ वा लक्षणे द्योत्ये टक्प्रत्ययः ॥

* अन्यत्रापीति पदमञ्जर्यारूढः पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अमनुष्यकर्तृके च ॥ ५३ ॥

अमनुष्यकर्तृके वर्त्तमानाद्धन्तेर्धातोः कर्मण्युपपदे टक्प्रत्ययो भवति । जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । श्लेष्मघ्नं मधु । पित्तघ्नं घृतम् । अमनुष्यकर्तृके इति किम् । आखुघातः शूद्रः । इह कस्मान्न भवति । चौरघातो हस्ती । कृत्यल्युटो बहुलमिति बहुलवचनादण् भवति ॥

शक्तौ हस्तिकपाटयोः ॥ ५४ ॥

शक्तौ गम्यमानायां हस्तिकपाटयोः कर्मणोरुपपदयोर्हन्तेष्टक्प्रत्ययो भवति । मनुष्यकर्तृकार्थ आरम्भः । हस्तिनं हन्तुं शक्तः । हस्तिघ्नो मनुष्यः । कपाटघ्नश्चोरः । शक्ताविति किम् । विषेण हस्तिनं हन्ति हस्तिघातः ॥

पाणिघताडघौ शिल्पिनि ॥ ५५ ॥

पाणिघ ताडघ इत्येतौ शब्दौ निपात्येते शिल्पिनि कर्तरि । पाणि ताड इत्येतयोः कर्मणोरुपपदयोर्हन्तेर्धातोः कः प्रत्ययो भवति । तस्मिंश्च परतो हन्तेष्टिलोपो घत्वं च निपात्यते * । पाणिघः । ताडघः । शिल्पिनीति किम् । पाणिघातः । ताडघातः ॥ राजघ उपसंख्यानम् ॥ * ॥ राजानं हन्ति राजघः ॥

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ ५६ ॥

आढ्यादिषु कर्मसूपपदेषु च्व्यर्थेष्वच्व्यन्तेषु करोतेर्धातोः करणे कारके ख्युन्प्रत्ययो भवति । च्वेर्विकल्पेन विधानाद् द्विविधाश्च्व्यर्थाः । च्व्यन्ता अच्व्यन्ताश्च । तत्र च्व्यन्ताः पर्युदस्यन्ते । अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणम् । सुभगंकरणम् । स्थूलंकरणम् । पलितंकरणम् । नग्नंकरणम् । अन्धंकरणम् । प्रियंकरणम् । च्व्यर्थेष्विति किम् । आढ्यं तैलेन कुर्वन्ति, अभ्यञ्जयन्तीत्यर्थः । प्रकृतेरविवक्षायामभूतप्रादुर्भावेपि प्रत्युदाहरणं भवति । अच्वाविति किम् । आढ्यीकुर्वन्त्यनेन । ननु च ख्युना मुक्ते ल्युटा भवितव्यम् । न च ल्युटः ख्युनश्च विशेषोस्ति तत्र किं प्रतिषेधेन । एवं तर्हि प्रतिषेधसामर्थ्यात्ख्युन्यसति ल्युडपि न भवति,तेन ल्युटोप्ययमर्थतः प्रतिषेधः । उत्तरार्थश्च च्विप्रतिषेधः क्रियते ॥

कर्त्तरि भुवः खिष्णुच्खुकञौ ॥ ५७ ॥

आढ्यादिषु सुबन्तेषूपपदेषु च्व्यर्थेष्वच्व्यन्तेषु भवतेर्धातोः कर्त्तरि कारके खिष्णुच् खुकञ् इत्येतौ प्रत्ययौ भवतः । अनाढ्य आढ्यो भवति आढ्यंभविष्णुः । आढ्यंभावुकः । सुभगंभविष्णुः । सुभगंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नंभविष्णुः । नग्नंभावुकः । अन्धंभविष्णुः । अन्धंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । कर्तरीति किम् । करणे मा भूत् । च्व्यर्थेष्वित्येव । आढ्यो भविता । अच्वावित्येव । आढ्यीभविता ॥

उदात्तत्वाद्भुवः सिद्धमिकारादित्वमिष्णुचः ।
नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्यते ॥

स्पृशोनुदके क्विन् ॥ ५८ ॥

स्पृशेर्धातोरनुदके सुबन्तउपपदे क्विन्प्रत्ययो भवति । ननु सकर्मकत्वात्स्पृशेः कर्मैवोपपदं प्राप्नोति । नैष दोषः । कर्तरीति पूर्वसूत्रादनुवर्त्तते, तत्कर्तृप्रचयार्थं विज्ञायते । सुबन्तमात्रे चोपपदे कर्तृप्रचयो लभ्यते । घृतं स्पृशति, घृतस्पृक् । मन्त्रेण स्पृशति, मन्त्रस्पृक् । जलेन स्पृशति जलस्पृक् । अनुदकइति किम् । उदकस्पर्शः । नकारः क्विन्प्रत्ययस्य कुरिति विशेषणार्थः ॥

ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ॥ ५९ ॥

ऋत्विगादयः पञ्च शब्दाः क्विन्प्रत्ययान्ता निपात्यन्ते । अपरे त्रयो धातवो निर्दिश्यन्ते । ऋतुशब्दउपपदे यजेर्धातोः क्विन्प्रत्ययो निपात्यते । ऋतौ यजति, ऋतुं वा यजति, ऋतुप्रयुक्तो वा यजति, ऋत्विक् । रूढिरेषा यथाकथं चिदनुगन्तव्या । धृषेः क्विन्प्रत्ययः द्विर्वचनमन्तोदात्तत्वं च निपात्यते । धृष्णोतीति दधृक् । सृजेः कर्मणि क्विन् । अमागमश्च निपात्यते । सृजन्ति तामिति स्रक् । दिशेः कर्मणि क्विन्निपात्यते । दिशन्ति तामिति दिक् । उत्पूर्वात्स्निहः क्विन्नुपसर्गान्तलोपः षत्वं च निपात्यन्ते । उष्णिक् । अञ्चु युजि क्रुञ्च इत्येतेषां धातूनां क्विन्प्रत्ययो भवति । निपातनैः सह निर्देशादत्रापि किं चिदलाक्षणिकं कार्यमस्ति । अञ्चतेः सुबन्तमात्रउपपदे क्विन्प्रत्ययो भवति । प्राङ् । प्रत्यङ् । उदङ् । युजेः क्रुञ्चेश्च केवलादेव । युङ् । युञ्जौ । युञ्जः । सोपपदात्तु सत्सूद्विषेत्यादिना क्विप् भवति । अश्वयुक् । अश्वयुजौ । अश्वयुजः । क्रुङ् । क्रुञ्चौ । क्रुञ्चः । नलोपः कस्मान्न भवति । निपातनसाहचर्यात् ॥

त्यदादिषु दृशो ऽनालोचने कञ्च ॥ ६० ॥

त्यदादिषूपपदेषु दृशेर्धातोरनालोचनेर्थे वर्तमानात्कञ् प्रत्ययो भवति । चकारात्क्विन् च । त्यादृक् । त्यादृशः । तादृक् । तादृशः । यादृक् । यादृशः । कञो ञकारो विशेषणार्थः । ठक् ठञ् कञिति । अनालोचनइति किम् । तं पश्यति तद्दर्शः । तादृगादयो हि रूढिशब्दप्रकारा नैवात्र दर्शनक्रिया विद्यते ॥ समानान्ययोश्चेति वक्तव्यम् ॥ * ॥ सदृक् । सदृशः । अन्यादृक् । अन्यादृशः ॥ दृशेः क्सश्च वक्तव्यः ॥ * ॥ तादृक्षः । यादृक्षः । अन्यादृक्षः । कीदृक्षः ॥

* पाणि ताडेत्यारभ्य निपात्यतइत्यन्तं पुस्तकान्तरे न दृश्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप् ॥ ६१ ॥

सुपीत्यनुवर्त्तते । कर्मग्रहणं तु स्पृशोनुदके क्विबित्यतः प्रभृति न व्याप्रियते । सदादिभ्यो धातुभ्यः सुबन्ते उपपदे उपसर्गेप्यनुपसर्गेपि क्विप्प्रत्ययो भवति । उपसर्गग्रहणं ज्ञापनार्थम् । अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं न भवतीति । वदः सुपि क्यप् चेति । सू इति द्विपा साहचर्यात् सूतेरादादिकस्य ग्रहणं, न सुवतेस्तौदादिकस्य । युजिर् योगे । युज समाधौ । द्वयोरपि ग्रहणम् । विद ज्ञाने । विद सत्तायाम् । विद विचारणे । त्रयाणामपि ग्रहणम् । न लाभार्थस्य विदेः । अकारस्य विवक्षितत्वात् । सत् । शुचिषत् । अन्तरिक्षसत् । उपसत् । सूः । अण्डसूः । शतसूः । प्रसूः । द्विप् । मित्रद्विट् । प्रद्विट् । द्रुह । मित्रध्रुक् । प्रध्रुक् । दुह । गोधुक् । प्रधुक् । युज् । अश्वयुक् । प्रयुक् । विद । वेदवित् । प्रवित् । ब्रह्मवित् । भिद । काष्ठभित् । प्रभित् । छिद । रज्जुच्छिद् । प्रच्छिद् । जि । शत्रुजित् । प्रजित् । नी । सेनानीः । प्रणीः । यामणीः । अयणीः । कथमत्र णत्वं,स एषां यामणीरिति निपातनात् । नयतेः पूर्वपदात् संज्ञायामग इति णत्वम् । राट् । विराट् । सम्राट् । मो राजि समः क्वौ इति मत्वम् । अन्येभ्योपि दृश्यते, क्विप्चेति सामान्येन वक्ष्यति तस्यैवायं प्रपञ्चः ॥

भजो ण्विः ॥ ६२ ॥

उपसर्गे सुपीति वर्त्तते । भजेर्धातोः सुबन्तउपपदे उपसर्गेप्यनुपसर्गेपि ण्विप्रत्ययो भवति । अर्धं भजते, अर्द्धभाक् । उपसर्गेपि । प्रभाक् ॥

छन्दसि सहः ॥ ६३ ॥

उपसर्गे सुपीत्येव । छन्दसि विषये सहेर्धातोः सुबन्तउपपदे ण्विप्रत्ययो भवति । तुराषाट् * । सहेः साडः स इति षत्वम् । अन्येषामपि दृश्यतइति दीर्घत्वम् ॥

वहश्च ॥ ६४ ॥

वहेर्धातोश्छन्दसि विषये सुबन्तउपपदे ण्विप्रत्ययो भवति । प्रष्ठवाट् । दित्यवाट् । योगविभाग उत्तरार्थः ॥

कव्यपुरीषपुरीष्येषु ण्युट् ॥ ६५ ॥

कव्य पुरीष पुरीष्य इत्येतेषु उपपदेषु छन्दसि विषये वहेर्धातोर्ण्युट् प्रत्ययो भवति । कव्यवाहनः पितृणाम् । पुरीषवाहनः । पुरीष्यवाहनः ॥

हव्ये ऽनन्तःपादम् ॥ ६६ ॥

हव्यशब्दे उपपदे छन्दसि विषये वहेर्धातो र्ण्युट् प्रत्ययो भवति, अनन्तः पादं चेद्वहिर्वर्त्तते । अग्निश्च हव्यवाहनः । अनन्तः पादमिति किम् । हव्यवाडग्निरजरः पिता नः ॥

जनसनखनक्रमगमो विट् ॥ ६७ ॥

छन्दसि उपसर्गे सुपीत्यनुवर्त्तते । जन जनने । जनी प्रादुर्भावे । द्वयोरपि ग्रहणम् । तथा षणु दाने । वन षण संभक्तौ । द्वयोरपि ग्रहणम् । जनादिभ्यो धातुभ्यः सुबन्तउपपदे छन्दसि विषये विट् प्रत्ययो भवति । टकारः सामान्यग्रहणविघातार्थः, वेरपृक्तस्येति, विशेषणार्थश्च, विड्वनोरनुनासिकस्यात्किति । आज्ञाः । गोजाः । सन । गोषा इन्द्रो नृषा असि । खन । विसखाः । कूपखाः । क्रम । दधिक्राः । गम । अरेगा उक्षेतृणाम् ॥

अदो ऽनन्ने ॥ ६८ ॥

छन्दसीति निवृत्तम् । अदेर्धातोरन्नवे सुप्युपपदे विट् प्रत्ययो भवति आममत्ति, आमात् । सस्यात् । अनवद्यति किम् । अवादः ॥

क्रव्ये च ॥ ६९ ॥

क्रव्यशब्दउपपदे अदेर्धातोर्विट् प्रत्ययो भवति । क्रव्यमत्ति, क्रव्यात् । पूर्वेणैव सिद्धे वचनमसरूपबाधनार्थम् । तेनाण भवति । कथं तर्हि क्रव्यादः । क्तक्तविक्तशब्दे उपपदे ऽण् तस्य च पृषोदरादिपाठात्क्रव्यभावः । क्तक्तविक्तपक्वमांसभक्तः क्रव्याद उच्यते । आममांसभक्तः । क्रव्यादिति ॥

दुहः कब् घश्च ॥ ७० ॥

दुहेर्धातोः सुप्युपपदे कप्रत्ययो भवति । घकारश्चान्तादेशः । कामदुघा धेनुः * । अर्थदुघा ॥

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥ ७१ ॥

श्वेतवह उक्थशस् पुरोडाश इत्येतेभ्यो ण्विन् प्रत्ययो भवति मन्त्रे विषये । धातूपपदसमुदाया निपात्यन्ते । अलाक्षणिककार्यसिद्ध्यर्थं, प्रत्ययस्तु विधीयतएव । श्वेतशब्दे कर्त्तृवाचिन्युपपदे वहेर्धातोः कर्मणि कारके ण्विन्प्रत्ययो भवति । श्वेता एनं वहन्ति, श्वेतवा इन्द्रः । उक्थशब्दे कर्मणि करणे वा उपपदे शंसतेर्धातोर्ण्विन्प्रत्ययो भवति, नलोपश्च निपात्यते । उक्थानि शंसति उक्थ्यो वा शंसति, उक्थशा यजमानः । दाश दानइत्येतस्य पुरःपूर्वस्य डत्वं, कर्मणि च प्रत्ययः । पुरो दाशन्तएनं पुरोडाः ॥ श्वेतवहादीनां डस्यदस्येति वक्तव्यम् ॥ * ॥ श्वेतवोभ्याम् । श्वेतवोभिः । पदस्येति किम् । श्वेतवाहौ । श्वेतवाहः ॥

अवे यजः ॥ ७२ ॥

* जलाषाट् । पृतनाषाड् इति क्व चिदत्राधिकम् ।

* 'घर्मदुघा धेनुः' । इति पुस्तकान्तरे ऽत्राधिकम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अवे उपपदे यजेर्धातोरिन्वन् प्रत्ययो भवति, मन्त्रे विषये। त्वं यज्ञे वरुणस्यावया असि। योगविभाग उत्तरार्थः॥

विजुपे छन्दसि॥ ७३॥

उपउपपदे यजेश्छन्दसि विषये विच्प्रत्ययो भवति *। उपयड्भीरुर्ध्वं वहन्ति। उपयड्भ्याम्। छन्दोग्रहणं ब्राह्मणार्थम्। चित्करणं सामान्यग्रहणविघातार्थम्, वेरपृक्तस्येति। किमर्थमिदमुच्यते। यावता अन्येभ्योपि दृश्यतइति यजेरपि विच् सिद्ध एव। यजेर्नियमार्थमेतत्। उपयजेश्छन्दस्येव, न भाषायामिति॥

आतो मनिन्क्वनिब्वनिपश्च॥ ७४॥

छन्दसीति वर्त्तते। सुपि उपसर्गेपीति च। आकारान्तेभ्यो धातुभ्यः सुप्युपपदे छन्दसि विषये मनिन् क्वनिब् वनिब् इत्येते प्रत्यया भवन्ति। चकारादिच् भवति। सुदामा। अश्वत्यामा। क्वनिप्। सुधीवा। सुपीवा। वनिप्। भूरिदावा। घृतपावा। विच् खल्वपि। कीलालपाः। शुभंयाः। रामस्योपद्राः॥

अन्येभ्यो ऽपि दृश्यन्ते॥ ७५॥

छन्दसीति निवृत्तम्। अन्येभ्योपि धातुभ्यो ऽनाकारान्तेभ्यो मनिन् क्वनिप् वनिप् इत्येते प्रत्यया दृश्यन्ते, विच्च। सुशर्मा। क्वनिप्। प्रातरित्वा। प्रातरित्वानौ। वनिप्। विजावा। अयेगावा। विच् खल्वपि। रेडसि पर्णे नयेः। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। निरुपपदादपि भवति। धीवा। पीवा। दृशियहणं प्रयोगानुसरणार्थम्॥

क्विप् च॥ ७६॥

सर्वधातुभ्यः सोपपदेभ्यो निरुपपदेभ्यश्च छन्दसि भाषायां च क्विप् प्रत्ययो भवति। उखायाः स्रंसते, उखास्रत्। पर्णध्वत्। वाहाड्वश्यति, वाहाभट्†। अन्येषामपि दृश्यत इति दीर्घः॥

स्थः क च॥ ७७॥

सुप्युपमर्गेपीति च वर्तते। स्था इत्येतस्माद्धातोः सुप्युपपदे कप्रत्ययो भवति, क्विप् च। किमर्थमिदमुच्यते। यावता सुपि स्थ इति कः सिद्ध एव। अन्येभ्योपि दृश्यते इति क्विप्। बाधकबाधनार्थं पुनर्वचनम्। शमि धातोः संज्ञायामचं बाधते। शंस्थः। शंस्थाः॥

* अत्र 'मन्त्रे विषये' इति क्वाचित्को ऽपपाठः॥

† पुस्तकान्तरे 'वाहभट्'। इति पाठः। 'अन्येषामपि दृश्यते इति दीर्घः, इति च नास्ति।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य॥

॥ प्रथमस्तबकावशेषः॥

तपस्विकुलमिव सदासुव्रतं, चिन्तामणिकुलमिव सकलकामदुघं, निदाघकाननमिव सदोत्फुल्लवत्सकं, सुकविकाव्यमिव नानावर्णविन्यासं च नैचिकीनिकुरम्बम्॥ १८३॥

सदासुनियमयुक्तं, पक्षे सदा सुव्रता यत्र तत्। "सुव्रता सुखसंदोह्या" इत्यमरः। सकलान् कामान् दोग्धि पूरयतीति तत्, पक्षे सकला अपि कामदुघा यत्र तत्। सदोत्फुल्ला वत्सकाः कुटजपुष्पाणि शावकाश्च यत्र तत्। नानावर्णानां माधुर्यादिव्यञ्जकाक्षराणां विशिष्टो न्यासः संदर्भो यत्र तत्, पक्षे श्वेतनीलपीतादिवर्णयुक्तम्। पूर्वत्रोक्तं सर्वशुक्लत्वमेकैकं निकुरम्बमपेक्ष्य ज्ञेयम्। अतोऽत्र निकुरम्बमिति जात्यपेक्षयैकवचनम्॥ १८३॥

यत्र च,

भुवि निपतिताः कौमुदीनां सजीवा इव गर्भाः, संचरन्त इव शिलाखण्डाः कैलासस्य, यन्त्रय इव हरहासस्य, हिण्डीरा इव क्षीरसमुद्रस्य, मांसपिण्डा इव शुद्धसत्त्वस्य, तत इतो धावमाना वत्सनिवहाः॥ १८४॥

कौमुदीनामित्यादि शुक्लप्राधान्येन, तत्र कौमुदीनामित्याह्लादकत्वं प्राधान्येनोक्तं, कैलासस्येति श्वेतिमा, हरहासस्येत्यनर्गलप्रफुल्लत्वं, हिण्डीर इति मार्दवं, शुद्धसत्त्वस्येत्यप्राकृतत्वम्। धावमाना इति चानशन्तम्॥ १८४॥

यत्र च,

गण्डशैला इव स्फटिकाचलस्य, महेर्मय इव महोदधेः, मुनय इव सायंगृहाः, जीवन्मुक्ता इव स्वैरचारिणः॥ १८५॥

स्फटिकेति स्वच्छत्वं दृढत्वं च प्राधान्येनोक्तं, महेर्मय इति दुर्वारवेगत्वं, सायमेव गृहा आश्रयितव्यत्वेन वर्तन्ते येषां ते॥ १८५॥

दिग्गजा इव महाविषाणाः, नृपा इव महाककुदाः, मता इव स्तब्धारुणलोचनाः, महागर्ववन्त इव सदाहंवादाः, विरक्ता इव लम्बमानगलकम्बलाः, विविधमणिवप्रोत्थानरेखाशबलितशृङ्गतया नानावर्णविषाणा इव, खुरक्षुण्णमणिधरणिरजोभिरमितो धूसरा मूर्तिमन्तश्चतुष्पादा धर्मा इव महोक्षाः, यस्य गोकुलस्य कलाकलांशेन सुरभिलोकः समपादि॥ १८६॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

महादन्ता बृहच्छृङ्गाश्च । "विषाणं स्यात् पशुशृङ्गेभदन्तयो"रित्यमरः । महाककुदा इति, "प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रिया"मित्यमरः । सदा, अहमेव विद्वान्, शूर, इत्येवं वादो येषां ते । पक्षे हंवा इति शब्दमाददतीति ते । वप्रः प्राचीरकोणादिगतो बुरुज इति ख्यातः । सुरभिलोको गोलोकः ॥ १८६ ॥

यस्य शाखानगरेषु शृङ्गाटकानामभितोऽभितः समसूत्रनिपातपातिता इव श्रेणीकृताः, महाराजविजयसमया इव विलसत्पताकिन्यः, मुक्तास्फोटा इव मौक्तिकप्रालम्बाः, वसन्ततरव इव प्रवालप्रघनाः, विविधमणिघटाघटितविपणिविततयः ॥ १८७ ॥

शाखानगरेषु नगरप्रान्तेषु, शृङ्गाटकानां चतुष्पथानामिति षष्ठी, समसूत्रेत्यनेनान्वयात्, पश्चादभितोऽभितो वर्तमाना इत्यनेनान्वयेऽपि न द्वितीया, नहि प्रसक्तो वचनशतेनापि निवर्तयितुं शक्यत इति न्यायात् । समया इवेति समयाशब्दो भुजाशब्दवट्टाबन्तो द्रष्टव्यः । मुक्तास्फोटाः शुक्तयः, मौक्तिकानां मुक्तानां प्रकृष्ट आलम्बो येषु, पक्षे मौक्तिकैः प्रालम्ब ऋजुलम्बिमाल्यं यासु ताः । प्रवालैः प्रघना निबिडाः, "प्रवालमङ्कुरेऽप्यस्त्री"त्यमरः, पक्षे प्रवालमया अलिन्दा यत्र ताः । "विद्रुमः पुंसि प्रवाल"मित्यमरः । विपणिविततयो हट्टवर्त्मसमूहाः ॥ १८७ ॥

काश्चिद्वसन्तश्रिय इव नानाकुसुमसौरभसुवासिताः, काश्चिन्महाशैलाधित्यका इव विविधगन्धद्रव्यसुगन्धाः, काश्चिन्मणिखनय इव विविधमणिगणकान्तिकन्दलिताः, काश्चिद्विलासिजनवक्षस्तटा इव चन्दनागुरुकस्तूरीघनसारसौरभोद्गाराः, काश्चित् पक्वशालिकेदारविततय इव शालिपरिमलोद्गारगरीयस्यो वणिजां निवासभूताः ॥ १८८ ॥

शैलाधित्यकाः शैलोपरिगता भूमयः । घनसारः कर्पूरम् । शालयो धान्यानि । वणिजामिति माल्यगन्धरत्नचन्दनधान्याद्युपजीविनाम् ॥ १८८ ॥

एवंविधस्य व्रजपुरस्य परितश्च महानगरं जलधितटानीव समुल्लसितविद्रुमाणि, महासैन्यानीव विविधकुञ्जराणि नानाविधगुल्मानि च, तपस्विकुलानीव नानाप्रकारव्रततीव्रतानि, रसिकनिकुरम्बाणीव सदाविलासेनामोदितवयांसि विपिनान्तराणि ॥ १८९ ॥

व्रजपुरस्य संबन्धि महानगरं श्रीमच्चन्दराजाधिवासम्, अभितः, तस्य चतुर्दिक्षु, "अभितः परितः समये"त्यादिना द्वितीया । विद्रुमाः प्रवालाख्यरत्नानि विशिष्टद्रुमाश्च । कुञ्जरा हस्तिनः, पक्षे विविधकुञ्जयुक्तानि । गुल्माः सैन्यविशेषा वीरुधश्च । नानाप्रकारेषु व्रतेषु तीव्र आतः प्रवेशसातत्यं येषां तानि, "अत सातत्यगमने" इत्यस्मात्, पक्षे व्रतत्यो लताः । वयांसि, आयूंषि पक्षिणश्च ॥ १८९ ॥

येषु, अविरलगलदनाविलवल्गुगुग्गुलुनिर्यासपिच्छिलेषु वर्त्मसु परस्परनिबद्धकरकमलमभिसरन्ति विपिनदेव्यः, वनवृषभककुद्दरकर्षणचूर्णीभूतवदरतरुखण्डसमुत्पद्यमानजतुरजोभिरनवरतनिःस्यन्दमानमकरन्दभरनिर्भरतिमिततया चरणकमलेष्वनायासयावकपङ्कानुलेपो जरीजृभ्यते वनदेवतानाम् ॥ १९० ॥

ककुदां दरकर्षणं कण्डूयनार्थमीषद्घर्षणम् । तिमिततया स्तिमितत्वेन, "तिम ष्टिम आर्द्रीभावे" धातुः । जरीजृभ्यन्तेऽतिशयेन प्रकाशन्ते ॥ १९० ॥

मदमुदितरोमन्थमन्थरवनमेषमुखकुहरसमुदीर्णजीर्णकङ्कोलफलसौरभसुवासितानि दिशां मुखानि, वनमहिषविषाणशिखरक्षुण्णसरलसुदारुचारुत्वगामोदमेदुरं गगनतलं, वनकरिकलभघटाभग्नलग्नशल्लकीपल्लवास्तीर्णानि गिरितटानि ॥ १९१ ॥

शल्लकी गजभक्ष्यगन्धवृक्षः । "गजभक्ष्या तु शल्लकी"ति त्रिकाण्डशेषः ॥ १९१ ॥

वनधेनुगणास्वादितगन्धतृणरुचिरशाद्वलसौगन्ध्यबन्धूनि धरणितलानि कर्णपूरीभूतसुललितमरिचगुच्छकाभिरभितः पुलिन्दसुन्दरीभिः करतलभग्नकर्पूरकदलिकानिर्याससंवासितदलितताम्बूलीदलदंशसरसाभिरवगाढा विपिनसीमानः, कपिकुलकवलीकृतनिस्तुलनिस्तलगोस्तनीफलगुच्छसमाच्छन्नानि भुवस्तलानि ॥ १९२ ॥

"वर्तुलं निस्तलं वृत्त"मित्यमरः । गोस्तनी द्राक्षा ॥ १९२ ॥

किं चान्यान्यपि काननानि,

रसालपनसार्जुनक्रमुकनारिकेलासनैः
पलाशवटपर्कटीखदिरबिल्वजङ्घादिभिः ।
मधूकगिरिमल्लिकाबकुलनागपुंनागकै-
रशोकबकपाटलीकनकचम्पकैश्चम्पकैः ॥ १९३ ॥

अन्यानि, वर्णितलक्षणाद्वृन्दावनादितराणि काम्यवनादीनीत्यर्थः । रसालादिभिः परिवृतानीति चतुर्थश्लोकस्थेनान्वयः । क्रमुको गुवाकः । पर्कटी प्लक्षः १९३ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शिरीषधवशिंशपालकुचलोध्रकोषातकी-
प्रियालनटशल्लकीसरलशालपीलवादिभिः ।
कपित्थकरमर्दकैः प्रियकतिन्दुकाम्रातकैः
करीरकरवीरकैः कदलिकालवल्यादिभिः ॥ १९४ ॥

लकुचो डहुः । कोषातकी घियातरोई इति ख्याता । "ज्योत्स्नी पटोलिकायां च कोषातकी"त्यमरः ॥ १९४ ॥

तमालनवमालिकाकनकयूथिकायूथिका-
कुरुण्टकलवङ्गिकादमनकातिमुक्तादिभिः ।
अपि स्थलसरोजिनीविचकिलादिभिः कन्दली-
प्रियङ्गुतुलसीमुखैरपि विचित्रवीरुद्गणैः ॥ १९५ ॥

अतिमुक्तं माधवी । विचकिलो मल्लिका । आद्यन्तयो रसालतुलस्योर्निर्देशः सर्वेषामपि वृक्षाणां मङ्गलमयत्वसूचकः ॥ १९५ ॥

सितासितविलोहितोत्पलसरोजकह्लारकै
रथाङ्गबकसारसैः कुररहंसकारण्डवैः ।
विराजिततरङ्गकैर्विमलवारिभिर्वापिका-
तडागसरसीमुखैः परिवृतानि तोयाशयैः १९६ ॥

तोयाशयैर्जलाशयैः परिवृतानि । कीदृशैः, सितेत्यादिभिर्जलस्थपुष्पैः रथाङ्गादिभिर्जलचरपक्षिभिश्च विराजिताः शोभितास्तरङ्गा येषां तैः । वापीसरस्योर्महदल्पत्वाभ्यां भेदः ॥ १९६ ॥

तेषामेकतमं वृहद्वनं नाम वनं, यच्च व्रजपुरपुरंदरस्य यशोक्तप्रकारं राजधान्यन्तरमास्ते ॥ १९७ ॥

उक्तप्रकारं श्रीनन्दीश्वरमननिक्रम्य १९७ ॥

उक्तमेतदखिलमलौकिकमपि भगवदिच्छया स्वीकृतलोकमध्यपातित्वं मांसचक्षुषो लौकिकमेव पश्यन्ति, नयनदोषवशाच्छङ्खमपि पीतमिव ॥ १९८ ॥

उक्तम्, "अस्ति सकलवैकुण्ठसार"मित्युपक्रम्य वर्णितम् । अलौकिकं प्रकृतिजन्यलोकभिन्नं, केवलसच्चिदानन्दरसमयमपीत्यर्थः । भगवदिच्छयेति, अनादिसिद्धयैवेत्यर्थः । ततश्च तथाभूतत्वेनैवास्य नित्यत्वे द्विपरार्धावसाने प्रपञ्चाभावेऽपि योगमायाकल्पितस्य प्रपञ्चस्यान्तर्वर्तित्वं ज्ञेयम् । तथाभूतस्वरूपत्वेनैवास्य श्रीकृष्णस्य नराकृतित्वेन लौकिकालौकिकसर्वतो विलक्षणलीलादिभिर्महावैकुण्ठनाथादिभ्योऽपि चमत्कारकारित्वमिव महावैकुण्ठादिभ्योऽप्युत्कर्षो निःसीममाधुर्याविष्कारेण भागवतामृतादिषु सिद्धान्ततो घटत इति ।

किंच, प्रपञ्चान्तर्वर्तित्वेऽपि सर्वप्रपञ्चव्यापकत्वमस्य भगवद्विग्रहस्येवातर्क्यतयैवास्ति, एतत्प्रदेशैकदेशेऽपि ब्रह्मणा सपरिकराणां ब्रह्माण्डकोटीनां साक्षाद् दृष्टत्वादिति । लौकिकं देशान्तरसाधारणम् । नयनयोर्दोषः पित्तप्रकोपस्तदुशात् । देशान्तरसाधारण्यमस्य सर्वतो वैलक्षण्येन निरुपाधिचित्ताकर्षकत्वलक्षणमहागुणाननुभवादपि ज्ञेयम् ।

"परानन्दो यस्मिन् नयनपदवीभाजि भविता ।
त्वया विज्ञातव्यो मधुर इव सोऽयं मधुरिपुः" ॥

इति ।

"यत्र प्रकृत्या रतिरुत्तमानां
तत्रानुमेयः परमोऽनुभावः" ।

इत्यादेर्भगवतस्तदीयानां भक्तधामादीनां च चित्ताकर्षकत्वलक्षणगुणेनापि परिचितत्वोक्तेः । अतस्तथाभूतचित्ताकर्षकत्वतारतम्येनापि तेषामुत्कर्षतारतम्यं लक्ष्यते भक्तसुधीभिः । तथैवाकृष्टचेतस्त्वतारतम्येनैव तत्तद्दृष्टुरप्युत्तमत्वतारतम्यं ज्ञायते, न तु वर्णितलक्षणमणिमयवृक्षभूम्यादिमयत्वस्यादर्शनादेवोत्तमत्वहानिकरं मांसचक्षुष्ट्वं वाच्यं, भगवदिच्छया विना दृष्टियोग्यज्ञानैरपि तस्य द्रष्टुमशक्यत्वात् । तथा चोक्तं भागवतामृते ।

"लीलाख्योऽपि प्रदेशोऽस्य कदाचित् किल कैश्चन । शून्य एवेक्ष्यते दृष्टियोग्यैरप्यपरैरपि" ॥

इति । तथा सामान्याकारेण दृष्टानामपि वृक्षगुल्मादिमयभूमीनामपि चिन्मयत्वमेव प्रतिपादितं, न तु तदन्यथात्वम् । अलं विचारविस्तारेण । "मल्लानामशनि"रित्यादौ विराट्त्वेन दृष्टस्य कृष्णस्येव मांसचक्षुभिरनाकृष्टमनस्कैरासुरभावाक्रान्तैरपि दृष्टानां तत्तत्प्रदेशानां नाचिन्मयत्वम् ।

किंच, "कृष्णनिष्ठं स्वरूपं स्याददैत्यैः सुगमं जनैः" ।
इति रीत्या तत्तदर्थकारित्वाभाव इति ॥ १९८ ॥

भगवदिच्छा तु यथा ॥ १९९ ॥

भगवदिच्छेति । तादृशलीलास्थितेस्तद्धेतुकत्वेऽपि तच्छब्देनाभिधानमुपचारेणैव, स च तस्या विलक्षणमाधुर्योपादकतदिच्छामात्रकरसत्वबोधक इति ॥ १९९ ॥

आसाते पितृमातृभावभविकौ कृष्णस्य यत्राधिपा-
वेको नन्द इति प्रथामुप ययावन्या यशोदेति यौ ।
ताभ्यां नित्यकिशोर एष शिशुवत् प्रादुर्भवन् मोदते
लीलायाः किमशक्यमस्ति भगवद्वर्यस्य लीलानिधेः ॥ २०० ॥

"प्रकटाप्रकटा चेति लीला सेयं द्विधोदिते"त्यादिना भागवतामृतोक्तां द्विधाभूताया एव लीलाया नित्यस्थितिपरिपाटीमाह । आसाते इति । यत्र गोकुले यावधिपावधीश्वरावासाते, नित्यं विराजमानौ वर्तेते इत्यर्थः । कीदृशौ । कृष्णस्य पितृमातृभाव एव भविकं मङ्गलं ययोस्तौ । कौ तावित्यपेक्षायामाह ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एको नन्द इति, अन्या यशोदेति प्रथां ख्यातिम्, उप वसुदेवदेवक्यादिभ्योऽप्याधिक्येन ययौ। ताभ्याम्, एव श्रीकृष्णो नित्यकिशोरः शिशुरिव प्रादुर्भवन्। शिशुवदिति कैशोराच्छादनांशमात्रविवक्षया, वस्तुतस्तु शैशवादीनामपि नित्यत्वमग्रिमग्रन्थे स्पष्टमेव स्थापयिष्यते ग्रन्थकृता। मोदत इति वर्तमाननिर्देशाविरन्तरमेव, तत्राप्रकटलीलायां परस्परासंपृक्तस्वरूपैर्बहुभिः प्रकाशैः। प्रकटलीलायां तु कदाचित् क्वचन ब्रह्माण्डवृन्द एकेनैव प्रकाशेन। तत्र प्रत्येकमन्तरान्तरा प्रकटितावान्तरप्रकाशेनेति भेदः।

ननु नित्यकिशोरत्वं शैशवादिमत्त्वं चैकत्र युगपद्विरोधि स्यात्, तत्राह। लीलायाः किमशक्यमस्ति। अचिन्त्यशक्त्या सर्वमपि सुशक्यमेवेत्यर्थः। किमशक्यमित्यनेन सूचितेन दुर्घटत्वेन शैशवादीनामपि नित्यत्वमत्रापि सूचितमभूदेव, इति। भगवद्भ्यो महावैकुण्ठनाथादिभ्योऽपि वर्यस्य श्रेष्ठस्य। केन वर्यत्वमित्यपेक्षायां हेतुगर्भितं विशिनष्टि। लीलानिधेरिति। तदुक्तं "लीलाप्रेम्णा प्रियाधिक्य"मित्यादीति ॥ २०० ॥

वात्सल्यमामोदयितुं तयोस्त-
च्छिशुभवन् पालनलालनाभ्याम्।
अलौकिकैरेव समस्तभावैः
स लौकिकत्वं स्वयमेति लोके ॥ २०१ ॥

ननु तस्य लोकवल्लीलावत्त्वे किं प्रयोजनमित्यपेक्षायां भक्तविनोदनं विना नान्यन्मुख्यं प्रयोजनमिति सामान्येन वक्तुं विशिष्य तदेवैकमाह। तयोर्नन्दयशोदयोः शिशुर्भवन् सन् पालनलालनाभ्यां तत् प्रसिद्धं शैशवादिचेष्टोत्थं वात्सल्यमामोदयितुं प्रकाशयितुं तदादिसर्वभक्तसुखार्थम्। यद्वा, अनुमोदयितुमप्रकटलीलायां तदादितादृशसिद्धान्। प्रकटलीलायां तु साधकान् समस्तानपीत्यर्थः। अलौकिकैः, कुत्राप्यदृष्टाश्चर्यचरेण माधुर्येण तदाच्छादितैश्वर्येण च लोकमतिक्रान्तैः, समस्तभावैः, बाल्यपौगण्डादिभिः, लोके, अप्रकटे प्रकटेऽपि, लौकिकत्वं नरलीलत्वम्, एति प्राप्नोति। स्वयं लौकिकत्वमेतीत्यनेन लौकिकत्वस्यैव स्वयंरूपत्वलक्षणत्वमिति भावः ॥ २०१ ॥

गोगोपगोपीनिकरैर्विलासो-
लोकेऽपि तस्मिन् भवितुं क्षमेत।
बाल्यादिलीलासुरनाशलीले।
लोकं विना नार्हत एव शोभाम् ॥ २०२ ॥

इत्यानन्दवृन्दावने भगवत्स्थानतत्त्ववल्लीविस्तारे प्रथमः स्तवकः ॥ १ ॥ :: :: ॥

ननु कथं केवलं वात्सल्यानुमोदनार्थमित्युच्यते, मधुररसस्य तत्र प्राधान्ये सत्यपीति, तत्राह। तस्मिन् प्रसिद्धेऽलौकेऽपि प्रपञ्चाद्बहिर्भूते महावैकुण्ठीयगोलोकेऽपि विलासः शृङ्गाररसनिष्ठो भवितुं क्षमेत युक्येत, भवतीत्यनुक्त्वा भवितुं क्षमेतेत्यनेन यथा लौकिके माधुर्यपोषेण स्यात् तथा न संभवतीति द्योतयति। "श्रियः कान्ताः","कान्तः परमपुरुष" इति "लक्ष्मीसहस्रशतसंभ्रमसेव्यमान"मित्यादिब्रह्मसंहितानुसारेण सपरिकरस्य श्रीकृष्णस्य देवलीलत्वेनैश्वर्यस्यैव पोषणाधिक्यात्। तथाप्यसौ तत्र शोभत एव। किंतु बाल्यादिलीला तथा,असुरनाशलीला चेति द्वे लोकं विना शोभां नार्हत एव। कृष्णस्य देवलीलत्वमहैश्वर्यमात्कारेण तत्रत्यवात्सल्यस्याकिंचित्करत्वात्, तथा "महानीलनीलाभ"मित्युपक्रम्य, "अतः पूतनादीन् निहन्तुं प्रवृत्त"मित्यादिक्रमदीपिकोक्तानुसारेण ध्यातृणां वैधभक्तानां प्राप्यत्वेन तत्र वर्तमानाया अप्यसुरनाशलीलायाश्च तथैव देवलीलतया महैश्वर्यदृष्ट्या संकोचाद्भावाच्चाप्यवदकिंचित्करत्वमेवेति। अतस्तत्तदनुमोदनोपलक्षणभूतस्य वात्सल्यानुमोदनस्यैव हेतुत्वप्राधान्यात् प्राधान्येन व्यपदेशा भवन्तीति न्यायेन वात्सल्यमामोदयितुमित्युक्तं, न पुनर्मधुररसानुमोदनादीनां हेतुत्वाभाव एव केवलमिति।

गोलोकस्यैश्वर्यमयत्वं भागवताद्यते व्यक्तम्। यथा।

"यत् तु गोलोकनाम स्यात् तच्च गोकुलवैभवम्।
तदात्मवैभवत्वं च तस्य तन्महिमोचितेः" ॥

यथा पातालखण्डे। "अहो मधुपुरी धन्ये"त्यादीति। अतः साधूक्तमत्रापि ग्रन्थकृता वर्णनारम्भ एव, "अस्ति सकलवैकुण्ठसारं वृन्दावनं नाम वन"मिति। तथा ब्रह्मलोकदर्शनप्रस्तावे च श्रीनन्दादीनामनुभवेनापि व्यञ्जयिष्यते चास्यैव गोकुलस्य परमोत्कर्ष इति ॥ २०२ ॥

आनन्दवृन्दावनसुप्रवेशे टीकास्तु दृश्या सुखवर्तिनीयम्।
संशोध्यतामर्हतु तैर्महद्विर्यपां हि सर्वस्वमियं हि लीला ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां प्रथमस्तबकसंगमनम् ॥ १ ॥ :: :: ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ द्वितीयस्तबकारम्भः ॥

अथ तयोः पित्रोस्तथाविधसौभाग्यमेधयितुं राजन्यापदेशसुरेतरयूथपायुतनिर्भरभरभज्यमानवपुषो धरणिदेव्याः परमभीलमाभीलमालोक्य परिदूनेन परमेष्ठिना निवेदितक्षीरोदशायिविज्ञापितमात्मानं च लौकिकलीलया लीला रसयितुमवतितीर्षुरवनितलेऽपि भगवान् श्रीकृष्णः सकलमुक्तप्रकारमाविर्भावयामास ॥ १ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्वितीये स्तबके कृष्णजन्मलीला स्यन्दुये
पुरे बृहद्वने वर्ण्यासमासव्यासतः क्रमात् ॥

तयोर्नन्दयशोदयोरेधयितुं वर्धयितुमित्येको हेतुः, आत्मानं च शृङ्गारादिरसै रसयितुमिति द्वितीयः ।

नन्वेतद्वैतुद्वयं प्रकटलीलायां योगमायाकल्पितप्रपञ्चान्तर्वर्तिषु श्रीगोकुलप्रकाशेषु वर्तत एवेत्यत आह, अवनितलेऽपीति, मायिकप्रपञ्चवर्तिभूर्लोकेऽपि । अत्र त्वसाधारणं तु हेतुत्रयम्, "आत्मारामान्मधुरचरिते"रित्यादिना वक्ष्यते । कीदृशमात्मानं, धरणिदेव्या आभीलं कष्टमालोक्य परिदूनेन परमेष्ठिना ब्रह्मणा तत्त्राणार्थं निवेदितो यः क्षीरोदशायी पालनकर्ता विष्णुस्तेन विज्ञापितम्, अवतारार्थमित्यर्थः, आभीलं कीदृशं, परमं भियं लाति ददातीति तत्, "कष्टं कृच्छ्रमाभील"मित्यमरः । उक्तप्रकारं पितृमातृबन्धुकुलम् ॥ १ ॥

विशेषतस्तूक्तप्रकाराणां नित्यसिद्धानां गोपदुहितॄणां लोकमध्याविर्भावसमये सममेव तत्कामकामिताः श्रुतयो मुनयश्च दण्डकारण्यवासिनः सीतासखस्य दाशरथेर्विलासमालोक्य तथा जातमनोरथास्तत्तत्साधनैः सिद्धदशामापद्यमानास्तत्तत्सौभाग्यभाजनं वपुरासाद्योक्तप्रकाराणां द्वितीयगोपमिथुनानां भवने प्रादुरभूवन् ॥ २ ॥

विशेषत इति, उक्तप्रकारादप्रकटलीलागतादयं तु विशेष इत्यर्थः, नित्यसिद्धानां राधाचन्द्रावल्यादीनां, तासां कामेऽभिलाषे कामितं कामना यासां ताः, सममेव सहैव, श्रुतयो बृहद्वामनादिषु प्रसिद्धाः, तथा तेनैव प्रकारेण स्वेष्टदेवश्रीमदनगोपाले जाते मनोरथो येषां ते ॥ २ ॥

योगमाया च भगवती भगवतो निरुपमा शक्तिरशेषविशेषदुर्घटघटनापटीयस्त्वमुररीकृत्य भगवत्प्रेषितैव तच्चालक्ष्यविग्रहैवावततार ॥ ३ ॥

तत्र गोकुले, यशोदायामित्यर्थः, वसुदेवेन ततो देवक्या ततः कंसादिभिश्च लक्ष्यविग्रहत्वं तस्या अंशभूताया एव, तत्तल्लीलासिद्ध्यर्थं, पूर्णतमा तु गोकुलादन्यत्र क्वापि न गच्छति, पूर्णतमः श्रीकृष्ण इवेति सिद्धान्तः ॥ ३ ॥

तत्र तावद्बृहद्वन एव भगवदवतारतः प्रागेव श्रीनन्दादयोऽवतीर्णाः, भगवदवतारानन्तरं भगवतः सखायः प्रेयस्यश्च नित्यसिद्धाः, अनन्तरं द्विविधा अप्यन्या इति ॥४॥

बृहद्वन एवेति, तदानीं केशिभयेन नन्दीश्वरे तत्पित्रा पर्जन्येन स्थातुमशक्यत्वात्, अन्याः साधनसिद्धा द्विविधाः श्रुतिचर्या मुनिचर्याऽप्यवतीर्णा इति पूर्वेणान्वयः ॥ ४ ॥

एवमासन्ने भगवदवतारसमये चिरसमयसमुपसेदुषी दयिता दयिता[1] इव हर्षभरपृथ्वी पृथ्वी ॥ ५ ॥

तत्र सर्वेषां तत्त्ववस्तूनामुपलक्षणत्वेन प्रथमं पञ्चानामपि भूतानां हर्षेण तात्कालिकवैलक्षण्यमाह, चिरसमयेभ्यो बहुकालानन्तरं समुपसेदुषी सम्यक् समीपमागच्छन्ती दयितः कान्तो यस्याः सा, दयिता इव हर्षभरेण पृथ्वी विपुला, "विसंकटं पृथु बृह"दित्यमरः ॥ ५ ॥

भगवदुपासकमनांसीव सुप्रसन्नानि मोदितभुवनानि भुवनानि ॥ ६ ॥

मोदितभुवनानि, आनन्दितलोकानि, भुवनानि जलानि, "जीवनं भुवनं वन"मित्यमरः ॥ ६ ॥

पाञ्चजन्य इव दक्षिणावर्तः समुज्ज्वलनो ज्वलनोऽपि ॥ ७ ॥

पाञ्चजन्यो विष्णुशङ्खः, सम्यगुत्कर्षेण, ज्वलति द्योतते ॥ ७ ॥

भगवज्जनाङ्गसङ्ग इव शीतलस्निग्धमधुरो जगत्पवनः पवनः ॥ ८ ॥

जगद् विश्वमेव पुनाति ॥ ८ ॥

भगवद्भक्तहृदयमिव नैर्मल्यपुष्करं पुष्करम् ॥ ९ ॥

नैर्मल्येन पुष्करं पुष्कलं, पुष्टमित्यर्थः, यमकानुरोधेन रलयोरैक्यं, पुष्करमाकाशम् ॥ ९ ॥

हरिभजनजनजननानीव सदासुफलानि निराकुलानि कुलानि विटपिनाम् ॥ १० ॥

हरिं भजन्त इति हरिभजना जनास्तेषां जननानि जन्मानि ॥ १० ॥

विबुधद्रुहामायुष इवापलितानि पलितानि ॥ ११ ॥

विबुधद्रुहामसुराणामायुषः पलितानि जराविक्लृप्तानि, आपलितानीव, आगतानीवेति संभावना, तेषामासन्नमरणलक्षणदर्शनात् । "पल गतौ", "पलितं जरसा शौक्ल्यं केशादा"वित्यमरः ॥ ११ ॥

फलोन्मुखानीव दिविषदामाशालतानि-कुरम्बाणि ॥ १२ ॥

कुरम्बाणि कौ पृथिव्यां लम्बमानानि, "रवि लवि" इत्यादिगत्यर्थाः ॥ १२ ॥

हरितो लब्धप्रसादा हरितो लब्धप्रसादा मनोवृत्तय इव भागवतानाम् ॥ १३ ॥

हरितो दिशः, लब्धप्रसादाः प्राप्तप्रकाशाः, हरितो हरिं प्राप्य ॥ १३ ॥

[1] दयिता दयिता इति यमकावनार्थं संधिरनङ्गीकृतः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मन्त्रौषधमणिभिरपहृतानीव धरण्याः क्लिष्टिपाणि विषाणि, प्राणिनामेव दुःखानि प्रशमितानि, शमितानि च भुवनजनमनांसि ॥ १४ ॥

क्लिष्टिपाणि पापिष्ठासुरसमूहभरूपाणि विषाणि, शमितानि शं कल्याणमितानि प्राप्तानि ॥ १४ ॥

प्रवर्तितमिव जनानामङ्गलतामङ्गलतारूप्येन, उल्लसितमिव सकलगुणसभाजनेन सभाजनेन ॥ १५ ॥

अङ्गलतायां मङ्गलस्य यत् तारूप्यं तेन प्रवर्तितमिवेति, कर्मविशेषानुक्तेरङ्गनिष्ठं रूपगुणचेष्टादिकं कर्मसामान्यमेव ज्ञेयं, तच्च वृत्तमपि प्रकर्षेण वर्तितमित्यर्थः सकलैर्गुणैः सभाजनं स्तुतिर्यस्य तथाभूतेन सता ॥ १५ ॥

फलितमिव सकलभुवनजनानां सुकृतेन सुकृतेन, उन्मीलितानीव चक्षुष्मतां चक्षुषामशातानि शातानि ॥ १६ ॥

सुकृतेन सुष्ठु कृतेन पुण्येन, चक्षुषां शातानि सुखानि, अशातान्यदुर्बलानि, "शो तनूकरणे" इत्यस्य रूपं, "शातं शितं च दुर्बले" इति मेदिनी ॥ १६ ॥

एवं परिपूर्णमङ्गलगुणतया दूषणद्वापरान्ते द्वापरान्ते निरन्तरालभाद्रपदे भाद्रपदे मासि मासिते पक्षेऽपक्षे-परहिते हिते रसमये समये गुणगणारोहिणीं रोहिणीं सरति सुधाकरे सुधाकरे योगे ॥ १७ ॥

दूषणस्य द्वापरः संदेहस्तस्याप्यन्तो नाशो यत्र तथाभूते द्वापरयुगस्यान्ते निरन्तरालस्य निबिडस्य भाद्रस्य भद्रसमूहस्य पदे, आश्रये, समूहार्थे भिक्षादित्वादण्, मासितेऽसिते पक्षे, गुणगणमारोढुं शीलं यस्यास्तां सरति प्राप्नुवति सति सुधाकरे, आयुष्मति योगे ॥ १७ ॥

योगेश्वरेश्वरो मध्ये क्षणदायाः क्षणदायाः पूर्णानन्दतया जीववज्जननीजठरसंबन्धाभावाद्बन्धाभावाच्च केवलं विलसत्करुणयारुणया तथाविधलीलालीलासिकया कयाचन पुरंदरदिगङ्गनोत्सङ्ग इव रजनीकरः स्वप्रकाशतया प्रादुर्भावमेव भावयन् ॥ १८ ॥

क्षणदाया रात्रेः, क्षणदाया उत्सवदायिन्या, विलसन्ती या करुणा तयैव, हेतुभूतयेत्यर्थः, अरुणयारुणवर्णया, सर्वजीवं प्रत्यनुरागवत्येत्यर्थः, कीदृश्या, तथाविधानां लीलानामाली श्रेणी तस्या लासिकया प्रकाशिकया, यद्वा तथाविधा करुणाव्यञ्जनमयी लीलैवाली सखी तस्या लासिकया नर्तक्या, कयाचन, अनिर्वचनीयया, भावयन् कुर्वन्, "करोत्यर्थस्य यः कर्ता भवतेः स प्रयोजक" इति स्मृतेः, तथा कथनं प्रादुर्भावादयो लीलाश्चिन्मय्यः स्वतन्त्रा एव वर्तन्ते लोके तासां प्रकटने स्वस्य प्रयोजकतामात्रमिति ज्ञापनार्थम् ॥ १८ ॥

अथ पूर्वपूर्वजनिजनिततपःसौभाग्यफलेनोपलब्धपितृमातृभावयोः श्रीवसुदेवदेवक्योर्वासुदेवस्वरूपेणाविर्भावं भावयित्वा स्तनंधयत्वाभिमानमेव क्षणं तयोः प्रकटय्य पश्चान्नित्यसिद्धपितृमातृभावयोः श्रीनन्दयशोदयोरपि श्रीगोविन्दस्वरूपेण स्वरूपेण तनयतामाससाद ॥ १९ ॥

अथ प्रथममुपलब्धो ज्ञातः पितृमातृभावो याभ्यां तयोः। उपलब्धिस्तु तयोर्नित्यसिद्धत्वं रहस्यत्वाद्वापयतः, "त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति। तदायं सुतपा नामे"त्यादिना तादृशभक्तिप्रचारार्थं तदा तदावतरतः साधकरूपान् तत्तदंशानेव तत्त्वेन निर्दिशतो भगवतो वचनादेव। वस्तुतस्तु नित्यसिद्धयोरेव तयोस्तत्तदंशप्रवेश एव साधनमिद्धत्वव्यापकः। तदानीं भगवता तथोक्तिस्तु तयोर्भक्तिवृद्ध्यर्थमैश्वर्यभावपोषादेव। द्रोणधरांशिनोर्नन्दयशोदयोरपि तथाभूतत्वेऽपि "नित्यसिद्धपितृमातृभावयो"रित्युक्तिस्तदानीं तथात्वेन केनापि तयोरज्ञापितत्वाद्वादरायणिनैव "द्रोणो वसूनां प्रवर" इत्यादिना परीक्षिते प्रोक्तत्वादिति। स्वरूपेण स्वेनैव पूर्णतमेन रूपेण, लीलापुरुषोत्तमाख्येनेत्यर्थः। भागवतामृतेऽप्येवमेवोक्तम्। "व्यूहः प्रादुर्भवेदाद्यो यह आनकदुन्दुभे"रित्यादिना। एतच्चातिरहस्यत्वान्नोक्तं "तत्र कथान्तर" इत्यन्तेन ॥ १९ ॥

तदनु कंसभिया वसुदेवानीतवासुदेवस्वरूपेण सहैक्यं गते सति तच्च शङ्खचक्रादीन्यङ्करूपेण करचरणयोरेव स्थितानि कौस्तुभवैजयन्तीमालाः सहावतीर्णा अपि समयं प्रतीक्षमाणा अलक्ष्यतयैव स्थिताः ॥ २० ॥

तत्र गोविन्दे स्थितानीति, तदङ्गैः सहैक्यं गतानीत्यर्थः। शङ्खचक्रादीनीति, गदायाः करतल एव स्थितिर्ज्ञेया ॥ २० ॥

तच्च च पूर्वमेव नृशंसकंसभिया देवकीतरभार्याकदम्बस्य स्थानान्तरप्रापणविधौ वसुदेवेन प्रियसखस्य श्रीव्रजराजस्य भवन एव प्रापितायां श्रीरोहिणीदेव्यां देवक्याः सप्तमे गर्भे भगवतो धामविशेषे श्रीसंकर्षणे भगवदिच्छयैव भगवत्या योगमायया तद्गर्भप्रापिते सति समये सापि तत्रैव भगवदवतारात् प्रागेव तमजीजनत् ॥ २१ ॥

सापि रोहिणीदेव्यपि तत्रैव व्रजराजस्य भवन एव तं संकर्षणमजीजनत्, जनयामास ॥ २१ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ,

आत्मारामान् मधुरचरितैर्भक्तियोगे विधास्यन्
नानालीलारसरचनया नन्दयिष्यन् स्वभक्तान् ।
दैत्यानीकैर्भुवमतिभरां वीतभारां करिष्यन्
मूर्तानन्दो व्रजपतिगृहे जातवत् प्रादुरासीत् ॥ २२ ॥

प्रादुर्भावे यथापूर्वश्लोकेन कारणत्रयमाह । आत्मारामानिति । "तथा परमहंसानां मुनीनाममलात्मनाम् । भक्तियोगविधानार्थं"मित्यादिभ्यः । वीतभारां गतभारां, जातवत् प्राकृतो बालो यथा जातस्तद्वत् ॥ २२ ॥

आविर्भूतिभूतिसमकालमेवमेव योगमायामायासराहित्येनैव संपादयन् मणिभित्तिभितिमिततनुच्छायाच्छायामिषेण सच्चिदानन्दगुणनिकायकायव्यूहमिव विदधानः कुसुमशोभाभरपराजितापराजितावल्लिमण्डपमिव परमरमणीयतासूति सूतिकासदनं सदनन्दयत् ॥ २३ ॥

सत् सुन्दरं सूतिकासदनमानन्दयत् । कदा । आविर्भूतेराविर्भावस्य या भूतिरुत्पत्तिः । यद्वा, आविर्भूतिरूपा या भूतिः* संपत्तिस्तस्याः समकालम् । एवमेव । अनेनैव प्रकारेण । योगमायां रासमहिषीं विवाहादिषु मूलयन्योक्तानुवादरीत्या युगपदेकस्यैव कायस्य पृथक् पृथग्बहुविधप्रकाशप्रकाशिकां स्वरूपभूताचिन्त्याद्भुतशक्तिमायासराहित्येनैव संपादयन् । तां शक्तिमनालम्ब्यैव तत्कार्यमिव प्रकटयन्नित्युत्प्रेक्षैवेयं नतु तदेवेति । तत्कार्यं प्रतिबिम्बत्वायोगात् । मणिभित्तीनां भितेः भेदाः, संपदादिक्विप्, तासु तिमिताः स्निग्धा यास्तनुच्छायाः, एकस्यैव देहस्य प्रतिबिम्बाः, तासां छाया शोभा तन्मिषेण । प्रतिबिम्बास्ते न भवन्ति किंतु देहा एवेत्यपह्नुत्येत्यर्थः । सच्चिदानन्दगुणानां निकायो येष्वेवंभूतानां कायानां व्यूहं समूहमिव । ततश्च सूतिकासदनं कथंभूतमिव । कुसुमानां शोभाभरेण पराजितं पराक्रान्तं यदपराजितालतामण्डपं तदिव । अत एव रमणीयतायाः सूतिरुत्पत्तिर्यस्मिंस्तत् ॥ २३ ॥

ततश्च ।

अनाघ्रातं भृङ्गैरनपहृतसौगन्ध्यमनिलै-
रनुत्पन्नं नीरेष्वनुपहतमूर्मीकणभरैः ।
अदृष्टं केनापि क्वचन च चिदानन्दसरसो
यशोदायाः क्रोडे कुवलयमिवौजस्तदभवत् ॥ २४ ॥

उक्तलक्षणो मूर्तानन्द एवौजस्तेजःस्वरूपं तद् यशोदायाः क्रोडे कुवलयमिवाभूदित्यन्वयः । अत्र तदादिशब्दानां क्वचिदुद्देश्यलिङ्गत्वं क्वचिद्विधेयलिङ्गत्वं च भवेत्, यथा

"शरीरसाधनापेक्षं नित्यं यत् कर्म तद्यमः ।
नियतस्तु स यत् कर्मानित्यमागन्तुसाधनम्" ॥

इति, अत एवात्र तच्छब्दो विधेयस्यौजसो लिङ्गं धत्त इति । भृङ्गैरनाघ्रातं, पूर्वपूर्वभक्तैर्नारायणादिरूपमेवास्वादितमित्यर्थः । अनिलैरिति, पूर्वपूर्वमहाकवीश्वरैर्नारायणादियश एव वर्णनैर्विस्तारितमित्यर्थः । नीरेष्विति, प्रपञ्चलोकेषु नाविर्भूतमित्यर्थः । ऊर्मीकणेति, प्रपञ्चगतगुणतरङ्गैरस्पृष्टम । क्वचन वैकुण्ठादावपि केनापि जनमात्रेणैव, श्लेषेण ब्रह्मणाप्यदृष्टम् । किंवा, तन्माधुर्यादेः प्रतिक्षणमेव नवनवस्वभावत्वात् तस्याप्यनुरागिभक्तद्वारैरप्यनाघ्रातत्वादिकमिव भवति सदैव, किमुत साक्षात् तदवतारारम्भ एवेति तथोक्तम् । यद्वा, तदानीं लोकैरनुभवेन तथैव प्रतीतत्वात् तथा वर्णितमिति ॥ २४ ॥

निद्राणे सति सूतिकापरिजने माचा समं सर्वतः
सद्योजातशिशुस्वभावसरसं चक्रन्द बालो हरिः ।
ओङ्कारः किमिवातनोद्भगवतः कण्ठोपकण्ठं गत-
स्तल्लीलोत्सवकर्मणोऽस्य महतः प्राङ्मङ्गलद्योतनाम् ॥२५॥

सद्योजातशिशूनां स्वभावेन सरसं यथा स्यात् तथा चक्रन्द । ओङ्कारस्यैव नासास्वरविशेषेण पुनः पुनरुच्चारितस्य तत्क्रन्दनसाजात्यात् तथोत्प्रेक्षते । ओङ्कारः कण्ठस्योपकण्ठं समीपं गतः सन् प्राक् प्रथमारम्भे मङ्गलद्योतनां किमतनोत् । यदुक्तं, "ओङ्कारश्चाथशब्दश्च तेन माङ्गलिकावुभा"विति ॥२५॥

अथ तस्य कलरोदनस्वनमाकर्ण्य तत्कालजागरिता व्रजपुरपुरन्ध्रयोऽभ्यक्तमिव सुरभितमस्नेहेन, उद्वर्तितमिव सौरभ्येण, स्नातमिव माधुर्येण, मार्जितमिव लावण्येन । २६ ॥

ऐक्षिषत दृष्टवत्यः । तत्कालोचितमभ्यङ्गोद्वर्तनादिकं तस्य स्वत एव सिद्धमित्युत्प्रेक्षते । सुरभितमेन निरुपाधिना स्नेहेन, वात्सल्यरतिपरिणामविशेषेण वस्तुप्रभावतो दृढाज्जनितेनेत्यर्थः । अन्योऽभ्यङ्गस्तु स्नेहाश्रयतैलादिनैव भवतीति ततोऽस्य वैलक्षण्यमपि ध्वनितम् । एवमग्रेऽपि ज्ञेयम् । सौरभ्येण स्वतः सिद्धस्वाङ्गसंबन्धिना । उद्वर्तनं तु कस्तूर्यादिगन्धवद्वस्तुघटितमेव भवति । माधुर्यस्यापादमस्तकव्यापित्वात् तेन स्नातमिव । स्नानं तु माधुर्यवत्तैलजलादिना भवति । किंच, तत् स्नानं हि तात्कालिकीं कामपि सर्वाङ्गस्य शोभां जनयति । एतन्माधुर्यं सार्वकालिकीमिति त्वधिकम् । यदुक्तमुज्ज्वलनीलमणौ "रूपं किमप्यनिर्वाच्यं ततो माधुर्यमुच्यते" । लावण्येनेति । तल्लक्षणं तत्रैव ।

* आविर्भूतेर्या भूतिः, इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा ।
प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते" ॥

इति । अन्यत्र मार्जनादेव दर्पणायमानत्वकारिलक्षणकं लावण्यं कस्यापि स्वच्छाङ्गस्यैव जायते, अत्र तु स्वयं लावण्येनैव मार्जनमित्यतिवैशिष्ट्यम् ॥ २६ ॥

अनुलिप्तमिव सौन्दर्येण, भूषितमिव चैलोक्यलक्ष्म्या, पूजितमिव भवनदेव्या गन्धफलीभिरेव सूतिप्रदीपकलिकाप्रतिच्छायाभिः, स्तोकानामप्यवयवकिसलयानामोजसा कुर्वन्तमिव कुवलयकलिकायमानानि सूतिदीपनिकुरम्बाणि ॥ २७ ॥

अनुलेपसूचिताङ्गविन्यस्तैः सौन्दर्यजनकैरेव कुङ्कुमादिभिर्भवति । भूषितमिति, त्रैलोक्यस्यापि लक्ष्म्या समुदितशोभयैव । भूषणं तु यत्किंचिल्लक्ष्मीवद्भिरेव कुण्डलादिभिर्भवति । भवनदेव्या गृहाधिष्ठात्र्या देवतया, गन्धफलीभिश्चम्पकैः । कुवलयं नीलोत्पलं, तत्कलिकासदृशानि । एतेनाभिरूप्यमुक्तम् । तथा च तल्लक्षणम् ।

"यदात्मीयगुणोत्कर्षैर्वस्त्वन्यच्चिकटस्थितम् ।
सारूप्यं नयति प्राज्ञैराभिरूप्यं तदुच्यते" ॥

इति ॥ २७ ॥

अङ्कुरमिव नवनीलमणीन्द्रस्य, पल्लवमिव तमालस्य, कन्दलमिव नवाम्भोदस्य, कस्तूरिकातिलकमिव चैलोक्यलक्ष्म्याः, सिद्धाञ्जनमिव सौभाग्यसंपदः ॥ २८ ॥

श्रीमूर्तिनिष्ठान् गुणानभिव्यज्य साक्षाच्छ्रीमूर्तिस्वरूपं वर्णयति । अङ्कुरमिति स्वच्छत्वेन स्तोकत्वेन च, पल्लवमिति मृदुलत्वेन, कन्दलमिवेत्यतिस्निग्धत्वेन, कस्तूरीतिलकमिति सौरभवत्त्वेन सर्वात्कृष्टत्वेन च, सिद्धाञ्जनमिति चैक्कण्येन सर्वाकर्षणशक्तिमत्त्वेन चोपमा ॥ २८ ॥

सरसीकुर्वन्तमरिष्टमपि सकलारिष्टशमनं, बालकमपि नवालकं, मृदुमधुरतरकरशाखाभिर्भगवल्लक्षणानि मत्स्याङ्कुशादिलक्ष्माणि गोपयितुमिव मुष्टीकृतकरकमलकोरकमुत्तानशायिनं मुकुलिताक्षमैक्षिषत ॥ २९ ॥

अरिष्टमपि सूतिकागृहमपि, सकलान्यरिष्टानि शमयतीति तथा तम् । "अरिष्टं सूतिकागारे तक्रे चिह्ने शुभेऽशुभे", इति विश्वः । नवा अलकाश्चूर्णकुन्तला यस्य तम् ॥ २९ ॥

अनन्तरमासामेव हर्षनिस्वनेन जागरिता जननी च[1] ।
ज्ञात्वा जातमपत्यमीक्षितुमथ न्यञ्चत्तनुस्तत्तना-
वालोक्य प्रतिबिम्बितां निजतनूमन्येति शङ्काकुला ।
गच्छारादिति तन्निरासनपरा पश्यन्त्यमुष्याननं
मुक्ताहारमिवोपढौकितवती स्नेहाश्रुणो बिन्दुभिः ॥ ३० ॥

ईक्षितुं न्यञ्चती तनुर्यस्यास्तथाभूता सती निजतनूमेव तत्तनौ प्रतिबिम्बितामालोक्यान्येति शङ्क्याकुला, मत्प्रसवकाले मायया मदाकारधारिणी बालकहारिका योगिनी काचिदत्र प्रविष्टेति त्रासेन विह्वलेत्यर्थः, ततश्च, आराद् दूरे गच्छेति तन्निरासनपरा, नृसिंहनामस्मृत्या तन्निःसारणप्रवृत्तेत्यर्थः, तदैव भयश्वासेत्यस्यनिःश्वासयोगवशात् प्रतिबिम्बादर्शने सति, अमुष्याननं पश्यन्ती, मुक्ताहारमिवेति निःसीमहर्षावेशेन तत्त्रासमपि विस्मृतवतीति भावः ॥ ३० ॥

अथ कस्तूरीकर्दममिव, श्यामामृतमहोदधिमथनसमुद्भिन्ननवनीतपिण्डमिव, मृगमदरसमेचकितं पयःफेनशकलमिव, सुकुमारतनुरपि संभाव्यमाननिजतनुपारुष्यभयेन स्वाङ्कमारोपयितुं बिभ्यतीव क्षणमवनततनुरेव स्नेहस्रुतपयोधरा पयोधरायमधरपुटे विन्यस्य पयः पाययामास ॥ ३१ ॥

कस्तूरीत्यादित्रयाणामेषां सौकुमार्येणोत्तरोत्तरं वैशिष्ट्यं ज्ञेयम् । तदपि कस्तूरीति सौरभ्यश्यामत्वाभ्यामपि । कर्दमशब्दोऽर्धर्चादिः । श्यामामृतेति स्नेहमयस्वरूपत्वेनापि । अमृतोपमेयम् । तत्र श्यामेति तदीयवर्णसाजात्यार्थम् । अमृतेति तदीयस्नेहस्यातिमधुरत्वार्थम् । मृगमदस्य रसेन मेचकितं श्यामलीकृतम् । दुग्धफेनखण्डमिवेति पाविच्येणापि । "कालश्यामलमेचकः" इत्यमरः । एवं सुकुमारशरीरापि सा जननी स्वबालकस्याङ्गसौकुमार्यमालोक्य तदपेक्षया संभाव्यमानं यच्छ्रीजनेः पारुष्यं कठोरत्वं तस्माद्भयेन, मत्क्रोडाभिमर्शेन व्यथां प्राप्स्यति बालकोऽयमिति शङ्क्या, किंचित् कुब्जीभूयावनततनुः पयोधरायं स्तनायं स्वबाहुहस्तेन धृत्वा कृष्णस्याधरपुटे विन्यस्य ॥ ३१ ॥

तदनु व्रजपुरपुरन्ध्रीभिरभितः शिक्ष्यमाणा निजाङ्कमारोप्य पुनः पयोधरं पाययन्ती स्नेहावेगेन निराबाधरीयमाणं मूर्तममृतरसमिव स्तनरसमशेषपानासमर्थतया मृदुलबिम्बाधरप्रान्ततो निपत्य कपोलतलमाप्लावयन्तं तमथ चीनतराङ्गुलेन निःसारयन्ती स्तनदानतो विरम्य सादरं सस्नेहं तमालोकयन्ती च परमविस्मयमापन्ना ॥ ३२ ॥

सद्योजातबालक एवमङ्के म्रियत इति हस्तनिधापनादिना, अभितः सर्वतोभावेन शिक्ष्यमाणा जननी निराबाधं निर्व्यवधानं यथा स्यात् तथा रोयमाणं क्षरन्तं, "रीङ्स्रवणे" दैवादिकः, तं स्तनरसं चीनतरेणातिसूक्ष्मेणाङ्गुलेन ॥ ३२ ॥

[1] एतद्वयं स्पष्टत्वादुपेक्षितं टीकाकृता ।

* तदैवामुष्या—इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नीलमणिनेव सकलावयवानां, कुरुविन्देनेव बिम्बाधरस्य, कमलरागेणेव पाणिपादस्य, शिखरमणिनेव नखरनिकरस्य, निर्माणमिति मत्वा कदाचिन्मणिमयोऽयमिति च ॥ ३३ ॥

शिखरमणिना माणिक्यभेदेन । "पक्वदाडिमबीजाभं माणिक्यं शिखरं विदु"रित्यभिधानात् ॥ ३३ ॥

इन्दीवरेणेव सकलावयवस्य, बन्धूकेनेव बिम्बाधरौष्ठस्य, जपाकुसुमेनेव पाणिपादस्य, मल्लीकोरकेणेव नखरनिकरस्येति कदाचिदयं कुसुममयो वा केनापि निरमायि, न ममायं तनूज इत्यसंभावनया वितर्कयन्ती ॥ ३४ ॥

पुनश्च तद्बालानामतिमार्दवं परामृश्य मणिमयत्वे काठिन्यं प्रसज्येतेत्यन्यथा संभावयति,इन्दीवरेणेत्यादिना । मल्लीकोरकस्य जातिभेदात् प्रान्तरक्तत्वेन नखसाधर्म्यम् ॥ ३४ ॥

वक्षसि दक्षिणभागे मृणालतन्तुक्षोदसोदरसुभगसुस्निग्धश्रीवत्साख्यरोमराजिलक्ष्म लक्षयित्वा स्तनरसकणनिपातविन्यासविशेषोऽयमिति पुनरपि मृदुतरचीनसिचयाञ्चलेनापसारयन्ती यदा तन्नापसरति तदा किमपीदं महापुरुषलक्षणमिति चिन्तयन्ती ॥ ३५ ॥

मृणालतन्तूनां क्षोदस्य चूर्णस्य सोदरं सदृशं च तत् सुभगं चेत्यादि लक्षयित्वा दृष्ट्वा प्राग्भवं कपोलाग्राविलं स्तनरसं स्मरन्ती निश्चिनोति स्तनरसेति ॥ ३५ ॥

पुनरपि वक्षसो वामभागे लक्ष्मरूपां लक्ष्मीमालोक्य तनुतरपीतविहंगिकापोतेन कृतावासं तमालपल्लवमेवेदं, सह जातयेव विद्युत्कलिकया कलितो जलधराङ्कुर एवायमिति, कनकरेखया रञ्जितं निकषपाषाणशकलमेवेदमिति ॥ ३६ ॥

तनुतरेणातिसूक्ष्मेण पीतवर्णेन विहंगिकापोतेन क्षुद्रपक्षिबालकेन, परंपरितश्लेषेण तु विहंगिका बाहुका, अरका इति* प्रसिद्धा, तस्याः पोतेन, अतिसूक्ष्मया तयेत्यर्थः, लक्ष्मीचिह्नस्यापि तदाकारत्वात् । अत्र पल्लवविहंगिकयोरौत्पत्तिकोऽयं न संयोग इत्यन्योत्प्रेक्षते, सह जातयेति । तत्र कलिकयेति सूक्ष्मत्वविवक्षया । तदपि विद्युतः स्वाभाविकमस्थैर्यमाशङ्क्य कनकरेखयेति । तत्रापि नित्यसंयोगित्वार्थं सह जातयेत्यनुवर्त्यम् ॥ ३६ ॥

पुनर्निभालयन्ती कदाचिदरुणतरकरचरणपल्लवतया चतुष्पञ्चारुणकमलकोषं यमुनातरङ्गमिव मन्यमाना ॥ ३७ ॥

* विहंगिका कावडि इति, इति पा० ।

पुनरिति सामान्यतः प्रथमं सर्वाङ्गमित्यर्थः । चत्वारो वा पञ्चवारुणकमलकोषा यत्र तम् । तत्र पञ्चवेति नाभेरपि रक्तकमलकोषसाम्यमभिप्रेत्येत्यवसीयते ॥ ३७ ॥

सद्यो मकरन्दसंदोहातिपानमदातिशयेन भ्रमणासमर्थतया निश्चलं मधुकरनिकरमिव कुटिलकचकलापं, प्रतिनवान्धतमसाङ्कुरानिवालकप्रकरान्, मुकुलितनीलोत्पले इव लोचने, द्रुततरनीलमणिजलमहाबुद्बुदायमानं गण्डयुगलं श्याममहोलतिकायाः प्रत्यग्रोन्मिषितपल्लवयुगमिव श्रवणयुगलम् ॥ ३८ ॥

ततो मुखारविन्दं पश्यन्ती तदवयवान् क्रमेणोत्प्रेक्षते, सद्य इत्यादिना । प्रतिनवं नवान्, अन्धतमसाङ्कुरानिव । प्रत्यग्रोन्मिषितमभिनवप्रकाशितं, "प्रत्यग्रोऽभिनवो नव्य" इत्यमरः ॥ ३८ ॥

तिमिरद्रुमाङ्कुरायमाणं नासिकाशिखरं, तरणितनयातनुबुद्बुदायमानं नासापुटकं, द्विदलजबाकोरकायमाणमोष्ठाधरं, परिपक्वस्तोकतरयमलजम्बूफलायमानं चिबुकमपि निरूप्य, परिणतमिव मे नयननिर्माणफलमिति मन्यमाना स्नातमिवानन्दजलनिधाविवमात्मानं विदांचकार ॥ ३९ ॥

तिमिरस्यातिनिबिडत्वेनातिकाठिन्येन द्रुमेण रूपकं, ततश्च तस्याङ्कुरतुल्यमिति श्यामत्वचिक्कणत्वयोरपि लाभः । शिखरमयदेशः, तत्पार्श्वद्वयगतं तादृशबुद्बुदद्वयं भवति चेत्, तदा नासिकायाः सादृश्यमित्यर्थः । परिणतमिव परिपाकं प्राप्तमिव । इयं श्रीयशोदा ॥ ३९ ॥

तत्समयसमकालमेव महाभाग तव तनयो जात इति पुरन्ध्रीजनमुखतश्चिरतरनिदाघद्राघिमपरिशुष्यमाणस्य पल्वलस्य विदारविवरं सरसीकृत्य पूरयन्तममृतासारमिव चिरतरतनयवासनाफलप्रतिबन्धपरुषितस्य हृदयस्य परमनिर्वृतिकरं कमपि शब्दमाकर्ण्य सुस्नात इव हर्षवर्षासु, प्रविष्ट इवामृतमहार्णवेष्वालिङ्गित इवानन्दमन्दाकिन्या ॥ ४० ॥

पुरन्ध्रीजनानां मुखतः कमपि शब्दमाकर्ण्य, कमिव, चिरतरस्य बहुकालव्यापकस्य निदाघस्य द्राघिम्णा दीर्घत्वेन हेतुना सर्वतः शुष्यमाणस्य पल्वलस्याल्पसरसः, अमृतासारममृतमयं धारासंपातमिव । निर्वृतिरानन्दः । सुस्नात इति, आपादमस्तकं सर्वाङ्गमेव हर्षपुलकाकुलितं जातमिति भावः । वर्षास्विति, विश्वमपि हर्षपूर्णं मन्यमान इति भावः । प्रविष्ट

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दति स्वकर्तृकप्रवेशोऽपि तादृशानन्दे । आलिङ्गित दत्यानन्दकर्तृकप्रवेशोऽपि स्वस्मिंचित्युभयान्वयेन । आनन्दमहासंमर्दजनितां मूर्च्छां प्राप्तवानिति भावः ॥ ४० ॥

तदवलोकनोत्कण्ठासमुत्पत्तेरयत एव ब्रह्मानन्दसाक्षात्कारचमत्कारेण वपुष्मतेव स्वयमुपव्रज्य सूतिभवनं प्रवेशित इव, चिरसमयसमुपचितसुकृतचयचातुर्येण दत्तहस्तावलम्ब इव, उत्कलिकाभगवत्या पृष्ठतः समधिकं नुन्न इव ॥ ४१ ॥

तामेवानन्दमूर्च्छां सर्वेन्द्रियलयसाधर्म्येणोत्प्रेक्षते, ब्रह्मानन्देति । वपुष्मता मूर्तिमता । तदा सूतिकागृहप्रवेशोऽसंभवचपि, तया, आनन्दमूर्च्छयैव, स्वकारणतद्वार्ताश्रवणानन्दसंस्कारविशेषवशात् कारित इत्यर्थः ।

ननु स्खलनमपि तदा कुतो नाभूत्, तत्राह, चिरसमयेति । सुकृतचयस्य चातुर्यम्, अन्यतो वैलक्षण्येन स्वप्रकाशकारित्वं, तेन कर्त्रा स्वयं दत्तो हस्तावलम्बो यस्य स इति । अयत आकर्षणं पृष्ठतो नुच इति स्वहस्ताभ्यां पृष्ठं धृत्वा बलेन चालित इवेत्यर्थः । "उत्कण्ठोत्कलिके समे" इत्यमरः । उत्कण्ठासमुत्पत्तेरयत एव मूर्च्छाया जातत्वेऽपि तस्याः पश्चादुत्कण्ठायाः प्राकट्यं पूर्वोक्तहेतोरेवेत्यर्थः ॥ ४१ ॥

त्वरितमभ्यर्णमभ्येत्य बीजमिव घनानन्दस्य ॥ ४२ ॥

उत्कण्ठयैव वृद्धिं गच्छन्त्या मूर्च्छाया भङ्गे कृते सति, अभ्यर्णं निकटमभ्येत्य तनयमालोक्य, अलौकिकीं दशामासाद्य स्थितः । कीदृशं, व्रजेश्वरीवपुरेवापराजिता लता तस्याः कुसुममिव । तथा घनानन्दस्य बीजमिवेति । एतस्मादेव स आनन्दो जायत इति भावः; यद्वा तस्य तस्य तदानीमेव निःसीमानन्ददायित्वेऽपि, अये भाविबाल्यपौगण्डादिविलासमयं घनानन्दमपेक्ष्य बीजमिव । तत्सूचकत्वादित्यर्थः ॥ ४२ ॥

अङ्कुरमिव जगन्मङ्गलमङ्गलोदयस्य ॥ ४३ ॥

जगतां मङ्गलस्य मङ्गलेन स्वस्तिमत्त्वेन न त्वल्पकालमात्रस्थरत्वेन य उदयस्तस्य, अङ्कुरमिवेति, पूर्वं गर्भस्थस्यैव तस्य तद्बीजायितत्वसिद्धेरिति भावः ॥ ४३ ॥

पल्लवमिव सिद्धाञ्जनलतायाः ॥ ४४ ॥

सिद्धाञ्जनेति, अञ्जनस्य नेत्रसुखदत्वात्, सिद्धत्वे जगद्वशीकारित्वात्, कृष्णस्यापि स्वसौन्दर्येण तथा भूतत्वात् । तल्लतायास्तु दृश्यवस्तुत्वादङ्कुरबीजदशयोर्वास्तवनिजवर्णानुपलब्धेः । कृष्णस्यापि गर्भस्थितिचित्तस्थितिदशयोर्नयनाननुभूततादृशरूपत्वात् तत्पल्लवायितत्वमेव युक्तमित्यर्थः ॥ ४४ ॥

कुसुममिव चिरतरसमयसमुत्पन्नसुकृतकल्पमहीरुहारामस्य ॥ ४५ ॥

चिरतरेति, चिरतरात् समयात् सम्यगुत्पन्नानां पुण्यकल्पवृक्षाणामारामस्य । कुसुममिवेति पुण्यानां वाञ्छितमहादुर्लभार्थप्रसवित्वात् कल्पवृक्षत्वम् । बहुतरत्वादारामत्वम् । कृष्णस्य तादृशपुण्यचयफलभूतत्वात्, वृक्षाणां च फलप्रयोजनत्वात्, फलस्याप्युत्पत्तिदशायां कुसुमत्वात्, कृष्णस्य तद्विनोत्पन्नस्य तत्कुसुमेनोपमा युक्तैव ॥ ४५ ॥

फलमिव सकलोपनिषत्कल्पलताविततेः, व्रजेश्वरीवपुरपराजितालताया: प्रसूनमिव तनयमालोक्य ॥ ४६ ॥

उपनिषत्कल्पलताश्रेण्यास्तु कृष्णस्य प्राकट्यमनपेक्ष्यापि नित्यविराजमानत्वं प्रतिपादयन्त्यास्तदेकमात्रप्रयोजनायाः फलेनैव सदैव कृष्णस्योपमा युक्तैव । एवं च क्रमेण बीजत्वाङ्कुरत्वपल्लवत्वकुसुमत्वफलत्वानामेकस्यैव यौगपद्येन वर्णनाद्विरोधालंकारः ॥ ४६ ॥

संपन्न इव सकलमनोरथसंपत्त्या, सिद्ध इवानन्दसाक्षात्कारचमत्कारेण, उत्कीर्ण इव, लिखित इव, पुनः सुप्रोत्थित इव, वलमानविपुलकपुलकमानन्दबाष्पकणनिकरानिपातनिस्तिताम्लौकिकीं दशामासाद्य स्थितः ॥ ४७ ॥

संपन्न इति, वैषयिकस्य । सिद्ध इवेतीश्वरस्यापि सर्वसुखस्य प्राप्तिर्व्यञ्जिता । उत्कीर्ण इवेति, आनन्दस्य साक्षात्कारभारेण प्रथमवीक्षित इव, मूढ इवेत्यर्थः । ततस्तेनैव जडीकृतो लिखितश्चित्रित इव । ततस्तं वोढुमशक्यत्वादिव प्राप्तमूर्च्छत्वेनादौ सुप्त इव तत उत्थित इवेति । कृष्णदर्शनसुखं पुनरनुभावयितुमिव चेतनादेव्यैव प्रतिबोधितत्वेनेति भावः । वलमानं विपुलात् कात् सुखाद्धेतोः पुलकं यत्र तद्यथा स्यात् तथा दशामासाद्य स्थितः । वलमानमिति शानजन्तो वलतिः । "सुखशीपंजलेषु क" मिति विश्वः । निस्तिमितां निःशेषेणार्द्रीभूताम् ॥ ४७ ॥

सानन्दैरुपनन्दसन्नन्दादिभिर्भूसुरवरेण पुरोधसा कारितजातकर्मादिक्रियः स्वतनयाभ्युदयाय दीयमानैः कलधौतविषाणखुरैर्मणिमयमाल्यमाल्यमानकण्ठैर्नवप्रसूतैर्गवां निकुरम्बकैरवनिर्निर्जराणां प्रतिगृहमेव सुरभिलोकमेकैकमुत्पादयामास ॥ ४८ ॥

कलधौतेन सुवर्णेन कलधौतेन रूप्येण च यथासंख्यं युक्तानि विषाणानि शृङ्गाणि खुराश्च येषां तैः । "कलधौतं रूपहेम्नो"रित्यमरः । यद्वा, कलधौतयोः स्वर्णरूप्ययोः करैः कि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रणैः, रलयोरैक्यात्, क्रमेण धौतानीव शृङ्गाणि खुराश्च येषां तैः। अवनिनिर्जराणां भूदेवानाम् ॥ ४८ ॥

प्रत्यङ्गनमपि तिलपर्वतं हिरण्यपर्वतं मणिपर्वतमपि तेषामेकैकशो निर्मितवान् निमेषमात्रेणैव व्रजराजः ॥ ४९ ॥

तेषां मध्य एकैकश एकस्यैकस्य विप्रस्य, प्रत्यङ्गनम्, अङ्गनेऽङ्गने, तिलादिपर्वतत्रयं निर्मितवान्। तेन तदानीं दत्तानि वस्तूनि पर्वतादिक्रमेणैव कथंचिद् गणयितुं शक्यानि, न तु टङ्कादिक्रमेणेति भावः ॥ ४९ ॥

तस्य वितरणसमये चिन्तामणिकल्पतरुकामधेनुगणश्च शक्तिहीन इव, रत्नाकरा अपि यादोमात्रावशिष्टा इव, किं बहुना त्रैलोक्यलक्ष्मीरपि लीलापद्मैकशेषा बभूव ॥ ५० ॥

तदालोक्य तदानींतनजनानां संभावनामाह, चिन्तामणीत्यादि। अन्येषां स्वपुरस्थकनकादीनां का कथा। योऽयं नन्दस्य दानावेशो लक्ष्यते, ततश्चिन्तामण्यादीनां गणश्च शक्तिहीनो बभूव। रत्नानि प्रसवितुमित्यर्थात्। भविष्यतीति वक्तव्ये भूतप्रायत्वसंभावनया बभूवेत्युक्तम्। यादोमात्रेति, तदीयरत्नानि त्वानीय दत्तप्रायाण्येवेति भावः ॥ ५० ॥

अनन्तरं च श्रीव्रजपुरपुरंदरस्य शुभकुमार आविरासीदिति जगन्मङ्गलो ध्वनिरध्वन्यध्वनि मुखान्मुखतो यदेव समन्ततः संचचार, तदेव तदयतो वा सानन्दोपनन्दसन्नन्दप्रभृतयः सर्वे एव गोदुहो निजपरिजनैर्विविधपट्टसूचकल्पितशिभिर्मणिमयविहंगिकाभिर्मणिघटपटलपूरितान् घृतदधिनवनीतमथितोदस्विदामिक्षादिविविधगोरसान् समानाय्य विविधमणिमण्डनमण्डिता मङ्गलहारिद्रवसनानुकारिक्षणप्रभाप्रभातिरस्कारचारुचामीकरवसनैः कृताकल्पाः कनकमणिदण्डपाणिकमलाः समुन्मर्यादपरमानन्दवारांनिधेर्महोर्मय इव सकला एव दिशो व्यानशिरे ॥ ५१ ॥

तदयतो वेत्येवमिव संभाव्यत इत्युत्प्रेक्षैवेयं, विहंगिका वाहुकारीति ख्याता,* "विहंगिका भारयष्टि"रित्यमरः, "तक्रं सुदस्विन्मथितं पादाम्बर्धाम्बु निर्जलम्"। "आमिक्षा सा श्रृतोष्णे या क्षीरे स्याद्दधियोगत" इत्यमरः, हरिद्रारसाक्तवसनानां माङ्गल्यात्, तेषां त्वतितुच्छत्वात् तदनुकारिभिरेव क्षणप्रभाया विद्युतोऽपि प्रभायास्तिरस्कारिभि+श्चारुचामीकररसाक्तैर्वसनैः कृत आकल्पो वेशो यैस्ते, व्यानशिरे † व्याप्तवन्तः ॥ ५१ ॥

तत्समकालमेव यावज्जनुरननुभूतप्रभूतामोदमुदितमेदुरमना मनोरथातीतं कमपि तदुदन्तमत्यन्तकमनीयं कर्णावतंसीकृत्य कृत्यपरिहारेण हारेण सता लसता ललितकण्ठोत्कण्ठोत्तरला ॥ ५२ ॥

तत्समकालमेव व्रजराजसदनं नागरीणामावलिरियायेत्यन्वयः। कीदृशी, यावज्जनुर्जन्मपर्यन्तं नानुभूतः प्रभूतः प्रचुर आमोदस्तेन मुदितं प्राप्तहर्षं मेदुरं सान्द्रस्निग्धं मनो यस्याः सा। तदुदन्तं जन्मवार्तां, कृत्यपरिहारेण, तदानींतनगृहकृत्यान्यनपेक्ष्येत्यर्थः। किंच, गमनाङ्गभूतं स्वप्रसाधनादिकृत्यमपेक्षांचकारैवेत्याह, हारेणेत्यादि। सता वर्तमानेन साधुना वा। लसता कान्तिमता, हारेण, ललितः कण्ठो यस्याः सा। उत्कण्ठाभिरुत्तरला ॥ ५२ ॥

तरलायमानमाणिक्यशकलाशकलातिमञ्जिमकङ्कणाकङ्कणायमानहीरकनिकरसुभगाङ्गदाङ्गदात्तिण्यकारिसकलाभरणा ॥ ५३ ॥

तरले हारमध्यगमणौ, अयमानं घटमानं माणिक्यशकलं माणिक्यखण्डं यस्याः सा। अशकलोऽखण्डः पूर्ण एव मञ्जिमा मञ्जुत्वं येषां तानि कङ्कणानि यस्याः सा। "तरलो हारमध्यग" इत्यमरः। कमिति मान्तमव्ययं जलवाचकं, तस्य कणायमानैः कणसदृशैर्हीरकनिकरैः शुभगमङ्गदं यस्याः सा। अङ्गानां दात्तिण्यकारीण्यनुकूलानि सकलान्याभरणानि यस्याः सा ॥ ५३ ॥

भरणार्हमहार्हकाञ्चिकाञ्चितजघना घनारोहारोहातिमुखरकिङ्किणीका ॥ ५४ ॥

भरणार्हेया मञ्जूषिकान्तर एव रक्षणार्हेया, किंच, महार्हेया, उत्सवयोग्यया, उत्सवसमयमात्रधार्ययेत्यर्थः। काञ्चिकया, अनुकम्पितकाञ्च्या, अञ्चितं पूजितं जघनं यस्याः सा। घने निबिडे, आरोहे नितम्बे, आरोह आरोहणं यस्याः सा चासौ मुखरा च किङ्किणी यस्याः सा। "आरोहस्त्ववरोहेऽपि वरारोहाकटावपी"ति मेदिनी ॥ ५४ ॥

* वाहुकविहंगीति ख्याता इति पा०।

* इत्यमरः, गोदुहः कीदृशाः, मङ्गलैर्मङ्गलसूचकैर्हारिद्रैर्हरिद्रारसाक्तैर्वसनैः, तथा तेषां त्वतितुच्छत्वात् तदनुकारिभिस्तत्सदृशैः, माङ्गलिकजन्मोत्सवे हारिद्रवस्त्राणां प्राधान्यात्, क्षणप्रभाणां विद्युत्कान्तीनां तिरस्कारिभिः, इति पा०।

+ स्ते समुन्मर्यादस्य मर्यादातः सम्यगुत्क्रान्तस्य परमानन्दसिन्धोर्व्यानशिरे, इति पा०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कनककमनीयहंसका हंसकान्तगतिर्विलोलकेशबन्धा केशवं धामनिकामकमनीयं तत्कालाविर्भूतमालोकयितुं कनकभाजनोपनीतमङ्गलनिमज्जनिकार्हफलकुसुमदधिदूर्वाक्षतमणिदीपनिकरादिकमतिमृदुलचीनहारिद्रवसनशकलेनापिधाय निजनिजकरकमलतलेनोपगृह्य झणझणायमानमणिनूपुरकलनिनदैर्मुखरयन्तीव दश दिशो व्रजराजसदनमियाय व्रजनगरनागरीणामावलिः ॥ ५५ ॥

हंसकः पादकटकः । हंसस्येव कान्ता गतिर्यस्याः सा । केशवं कृष्णं धाम्ना स्वकान्त्या निकामं यथेप्सितमेव कमनीयम् ॥ ५५ ॥

अनन्तरं प्रविश्य सूतिकाभवनमालोक्य च तमभिनवं नवं नयननिर्माणस्य फलमिव, संविज्जन्मनो विफलीभावाभावमहौषधिपल्लवमिव, निजवात्सल्यसरसो नीलमहोत्पलमिव, चिरं जयेति मङ्गलाशीःप्रसूनैरभ्यर्च्य विनिमिषमनुवेलमीक्षमाणा व्रजेश्वरीसौभाग्यसारः शरीरवानयमिति तामेव स्तुवन्त्यः ॥ ५६ ॥

संविदोऽनुभवमय्या बुद्धेर्जन्मनो विफलीभावो वैफल्यं तस्याभावे निमित्ते महौषधिपल्लवमिव । नयनेति बहिः सुखस्य संविदित्यान्तरस्य सुखस्य, निजेति सुखमयसाहजिकभावस्य च प्रकाशः ॥ ५६ ॥

मुहूर्तानन्तरमलिन्दतलमासाद्य मङ्गलसंगीतिसुरीतिललितवदना अन्तरगुञ्जदलिपुञ्जकलमधुरझङ्कारकोलाहललुलितकमलाः कमलिन्य इव ॥ ५७ ॥

अन्तरे मध्ये गुञ्जतामलिपुञ्जानां कलो मधुरास्फुटध्वनिरेव मधु तद् राति ददाति, वर्धतीति यावत्, तथाभूतो झङ्कारकोलाहलस्तेन लुलितान्याकुलितानि कमलान्यवस्थितत्वान्मुखाकाराणि पुष्पाणि यासां ताः* कमलिन्यः कमललता इव । अत्र मङ्गलसंगीतीनां भ्रमरझङ्कार उपमानं, मुखानां कमलानि, तासां नागरीणां कमलवल्ल्य इति ॥ ५७ ॥

परस्परमतिकौतुकेन केन च नवप्रणयभरसरसकरसरसीरुहकुड्मलेन परस्परवदनशशधरमण्डलमतिविमलसुरभितरतैलहारिद्रद्रवनवनवनीतादिभिरभितो दशनकिरणभरालसलसदमलबन्धूकबन्धुराधरकिशलयं हसन्त्य एव लिपन्त्यो यदा चैलोक्यलक्ष्मीसौभाग्यमधरीचक्रुस्ता नार्यः ॥ ५८ ॥

* ताः, "लुल विमर्दने" सौत्रो धातुः, इति पा० ।

प्रणयस्य भरेणैव सरसेन करकमलकुड्मलेन, दशनकिरणानां दन्तकान्तीनां भरेण भारेणालसं लसतः कान्तिमतोऽमलबन्धूकादपि बन्धुरं सुन्दरमधरकिशलयं यत्र तद्यथा स्यात् तथा हसन्त्यः, अधरीचक्रुर्न्यूनीचक्रुः ॥ ५८ ॥

तदैवाङ्गनभुवि व्रजपुरपुरंदरं समया समयासादितपरमानन्दसंदोहास्त एव गोदुहो महामदमुदिता इवेन्दुकन्दुकैरिव नवनीतपिण्डैः, स्थूलतरकरकानिकरैरिवामिक्षागेन्दुकैः, दधिजलधिकर्दमगोलैरिव, चन्द्रिकापललखण्डैरिव, दधिपिण्डैः ॥ ५९ ॥

अङ्गनभुवीति, अलिन्दे तु स्त्रीभिरावृतत्वेन तत्रानवकाशाद् व्रजपुरस्य पुरंदरमिन्द्रं श्रीनन्दं समया, श्रीनन्दस्य निकट इत्यर्थः, "अभितः परितः समये"त्यादिना द्वितीया, "समयान्तिकमध्ययो"रित्यमरः, गोदुहो गोपाः, कारका वर्षीयसः, आमिक्षाया एव निविडत्वाविस्तुलत्वाच्च गेन्दुकतुल्यत्वं, गोलो गोटा इति ख्यातो वर्तुलपिण्डः, चन्द्रिकायाः पललखण्डैर्मांसपिण्डैरिवेति सुखस्पर्शत्वमुक्तम् ॥ ५९ ॥

परस्परं निःसाध्वसमभिघ्नन्तो मणिमयजलयन्त्रपूरितानां पयोदधिमण्डमथितोदस्विदादीनां दुतर्कनकपयसामिव हारिद्रसलिलानामपि महासुगन्धितैलानां च धारापातैः परस्परं सिञ्चन्तो मृदुमृदङ्गपणवडमरुझर्झरमृदुलमर्दलकुलकोलाहलभेरीप्रभृतिमङ्गलविचित्रवादित्रनिनदानुगततालक्रमं नृत्यन्तो गायन्तश्च मङ्गलसंगीतान्तर्गतचर्चरिकाद्विपदिकाजम्भलिकातेनादिनानाविधगानमनाकलितमपि साक्षात्कारयन्त इव तत्कालाविर्भूतं तमपूर्वकुमारं व्रजराजमाह्लादयांचक्रुः ॥ ६० ॥

चर्चरिकादयो गीतच्छन्दोभेदाः । एवंभूतनानाविधगानं कर्म तमपूर्वं कुमारं प्रयोज्यकर्मभूतं साक्षात्कारयन्त इवानुभावयन्त इव, किंवा गानमेव प्रयोज्यकर्मभूतं साक्षात्कारयन्त इव दर्शयन्त इव, कुमारमित्यर्थः, गानं कीदृशम्,अनाकलितमपि पूर्वमनभ्यस्तमननुभूतमपि, तदानीं भगवदिच्छयैव सहसा स्फुरितमित्यर्थः ॥ ६० ॥

इतस्ततश्च, उर्वीगीर्वाणसंचयमङ्गलाशीःस्वनसहचरवेदनिर्घोषैरभितोऽभितः सकलजनमुखोद्गीर्णजयरवैः, परितश्च, चारुचारणमागधसूतवन्दिवृन्दोपनीतवास्तवस्तवकैरपि, नादब्रह्ममय एव समयः समपादि ॥ ६१ ॥

चारणा नटाः, "सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । वन्दिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः" ॥ इति ॥ ६१ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ततश्च तमभि महोत्सवमहारसं जरयितुमसमर्थैव सा व्रजपुरमूरभूत्, पुरप्रणालिकानिकरमुखनिःसृतदधिदुग्धादिधाराप्रपातमिषेण मुहुर्वमन्तीव सुरभयति स्म च पुरमार्गान् ॥ ६२ ॥

वमन्तीवाभूदिति संबन्धः ॥ ६२ ॥

यद्द्वाराजलगृहीतविहगाकारा नाकिनोऽपि सादरमुपस्पृशन्ति स्म पिबन्ति स्म च ॥ ६३ ॥

नाकिनो देवाः ॥ ६३ ॥

तस्मिन्नेव समये सकला एव धेनवो नवोन्नीतनवनीतहरिद्रातैलरूषिताः कनकमणिभूषणभूषिताः सवत्सा जगत्सारभूता निजनिजमनसि कृष्णाविर्भावभावुकसुभगंभावुका हर्षहंकारवेण मुखरयन्त्यो भुवनतलं नात्मानमपि सस्मरुः किमुताहारपानादि ॥ ६४ ॥

कृष्णाविर्भाव एव भावुकं मङ्गलं तेन सुभगंभावुकाः सुभगा भवन्त्य इत्यर्थः ॥ ६४ ॥

एवमतिकालकलितमहोत्सवमाभीरीनिकुरम्बं भगवती श्रीवसुदेवपत्नी रोहिणी तैलसिन्दूरमाल्यवसनाभरणादिभिरभिपूज्याभिनवशुभकुमाराभ्युदयमभ्यर्थयामास, बहिश्चेतरेतरमनवरतरभसरभसावशात् सह सहर्षकृतयत्नावभृतस्नानास्त एवोपनन्दादयो व्रजपुरपुरंदरं पुरस्कृत्य प्रतिजनमेव मणिमयमण्डनमहार्हवसनमालाचन्दनताम्बूलादिभिरभ्यर्च्य सविनयमभिनवशुभकुमारमङ्गलोदयमाचक्राङ्गुः ॥ ६५ ॥

इत्यानन्दवृन्दावने प्रादुर्भावलीलाविस्तारे द्वितीयः स्तबकः ॥ २ ॥ :: :: ॥

रभसस्य हर्षस्य रभसा वेगस्तद्वशात्, रभसा टाबन्तोऽप्यस्ति, "रभसा हर्षवेगयो"रिति त्रिकाण्डशेषपाठात् ॥ ६५ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां द्वितीयस्तबकसंगमनम् ॥ २ ॥ :: :: ॥

॥ शेषमये ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

वर्क्लसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः अवतारिता ।

तत्र सप्राशीतितमादिपरिच्छेदाः ।

८७—इदं पुनरिहावधेयम् । कस्यापि प्रत्यक्षस्यांऽशतोऽप्यज्ञानासंभवेन रूपपरिमाणगत्याकारादयोगुणास्तेषामात्मगतप्रत्यक्षात्मकत्वपक्षे पर्याप्त्यैव ज्ञायन्त इति नात्र क्वापि संदेहावकाशः । तेषां प्रत्यक्षोपलब्धगुणानां पुनरात्मबाह्यबिम्बभूतवस्तुप्रतिबिम्बात्मकत्वस्याङ्गीकारे तु गुणानां पर्याप्तं ज्ञानं भवितुमशक्यमिति सर्वत्र संदेह एवोदेति । यतोऽस्मिन्पक्षे न तावद्बास्तविकगुणप्रत्यक्षमपितु तत्प्रतिबिम्बभूताभासप्रत्यक्षमेव मन्यते । तथाच वस्तुगतताात्विकरूपपरिमाणादिज्ञानस्याशक्यतया तत्तदिन्द्रियसंबन्धतारतम्यानुसारेण तदाभासज्ञानमेव संभवति । एवं स्थिते पदार्थानामेकरूपत्वेऽपि कथं तद्विषयकज्ञानानां वैविध्यं भवति । तात्विकवस्तुस्वरूपप्रतिरूपकाणि कान्यपि ज्ञानानि सन्ति नवा । यदि स्युः । कानि तानीत्याद्यनुयोगानां निर्णयस्तु दुष्करो बुद्धगम्यश्च । स्वज्ञानानुसारतस्तु यत्किमपि दृश्यते श्रूयतेऽनुभूयते वा तत्सर्वं वस्तुप्रपञ्चगततात्विकपदार्थानन्तगुणाभासमात्रं मृगतृष्णिकारूपमेव वेति समाक्रान्तमखिलं नास्तिवादेन । परंतु सर्वोयं नास्तिवादस्संदेहवादो वा ज्ञानवस्तुनोर्भेदस्य ज्ञानात्मकपदार्थसत्तायाश्च स्वीकारे एव प्रादुर्भवति । शक्येत चात्र सविस्तरं नास्तिकोद्भावितानां हेत्वाभासानां बाह्यवस्तुसत्ताश्रितत्वमनायासेनैव प्रदर्शयितुम् ।

८८—ज्ञानानात्मकजडवस्तुसद्भावकल्पनापक्षे न केवलं तथाभूतवस्तुस्वरूपस्य सप्रमाणं ज्ञानं किंतु तत्सत्ताज्ञानमप्यसंभवि । तथाचेदं पर्यवसितं यत्तत्पक्षपातिनः पण्डिताः स्वेन्द्रियाणि न विश्वसन्ति किंतु दृश्यमानानामनुभूयमानानां च द्यावापृथिव्यादिसर्वपदार्थानां किंबहुना स्वशरीरस्यापि सत्ताया विषये संदिहते । यतो हि छतायामपि भृशं विमर्शक्रियायामवश्यं ते विवशाः स्वीकुर्युर्यत्प्रत्यक्षविषयसत्ताया न साक्षादपि प्रमाणान्तरसिद्धं सोपपत्तिकं ज्ञानमस्तीति । परंतु यदि जनास्तांस्ताञ्छब्दान्समुचितैस्तदीयार्थैर्योजयेयुर्नेपुनस्स्वतन्त्रा बाह्या सत्तेत्यादिभिर्बुध्यगम्यपदार्थवाचकैरतएव भ्रामकैः शब्दैरात्मानं व्यामोहयेयुस्तर्हि निखिलजनमनांस्यावृणवद्भध्यात्मशास्त्रं चोपहास्यतां प्रापयन्त्सर्वोयं संदेहः सहसैव तिरोभवेत् । नचैतदुक्तं यज्जनाः प्रत्यक्षोपलब्धपदार्थानां स्वसत्तायाश्च विषये संदिह्युः । तेषामेव विषयाणां साक्षाच्चतुरादीन्द्रियोपलब्धत्वाविद्यमानत्वयोर्युगपदवस्थानस्यासंभवात् । अचेतनपदार्थास्तित्वस्य ज्ञायमानत्वानतिरिक्तत्वात् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८९—संप्रति नास्तिपक्षखण्डनप्रमाणभूततत्त्वज्ञानव्यवस्थाकरणे ऽत्यावश्यका वस्तु तात्विकवस्तु सत्तेति पदत्रयस्य सुनिश्चितार्थाः प्रदर्श्यन्ते । अन्यथा तादृशपदानामर्थविशेषनिर्धारणमन्तरा तात्विकवस्तुसत्तायास्तदर्थज्ञानसंभवस्य च विषये ऽस्मद्विवादो निरर्थक इव भासेत । तत्र वस्तुपदं ह्यखिलपदार्थव्यक्तीनां साधारणं नाम । तदर्थव्याप्ये परस्परमत्यन्तविजातीये नाममात्रैकसाधारणधर्मके ऽपरजातौ आत्मज्ञाने स्तः । तत्रात्मा सक्रियेऽविभाज्येऽधिकरणात्मको बोध्यः । ज्ञानं तु निष्क्रियमचेतनमाविर्भावतिरोभावशालि परतन्त्रमात्मानमेवाश्रयति । स्वात्मसत्ताज्ञानमात्मविभावनया परात्मसत्ताज्ञानं त्वनुमित्यैव भवति । परंतु तस्य चेतनस्यात्मनो वृत्यतिरिक्तमेव ज्ञानं संभवति । एवं ज्ञानसंबन्धज्ञानान्यपि वृत्तिज्ञानातिरिक्तान्येव बोध्यानि । तानि संबन्धज्ञानानि न स्वसंबन्धिज्ञानात्मकान्यपितु ततो विभिद्यन्तएव । ज्ञानसंबन्धज्ञानाभावेऽपि तादृशसंबन्धसंबद्धज्ञानानां बोधसंभवात् । मम तु मानवीयज्ञानभाषणादीनां विषयाः स्वस्वाशेषजातिविशेषपुरस्कारेण ज्ञानान्यात्मानस्तत्संबन्धाश्चैव प्रतीयन्ते । यावज्ज्ञानव्यक्तिबोधनतात्पर्येण वृत्तिपदप्रयोगो ममासंमत इत्यपि ध्येयम् ।

९०—चक्षुरादीन्द्रियमुद्रितानि प्रत्यक्षापरपर्यायाणि ज्ञानान्येव तात्विकवस्तूनीति कथ्यन्ते । तथैवच तानि प्रकामं कथ्येरन् । नाहं तेषां वास्तविकत्वमपलपामि । केवलं तेषां स्वसाद्यात्मबाह्यत्वमत्यात्मवस्तुविशेषप्रतिमाभूतत्वं वा नानुमन्ये । सर्वस्यापि प्रत्यक्षस्य ज्ञानात्मकत्वाज्ज्ञानस्य च ज्ञानान्तरसाम्यस्यैव संभवात् । किंचेन्द्रियोपलब्धवस्तूनि स्वप्रभवसंबन्धवशाद्बाह्यान्यपि कथ्येरन् । यतो हि तादृशवस्तूनि जीवात्मनि न स्वव्यापारेण किंतु तदतिरिक्तस्या ऽतएव बाह्यस्य परमात्मनः कृत्यैव जन्यन्ते । एवं स्वात्मन्यतिष्ठतां परात्मन्येव वर्तमानानां प्रत्यक्षविषयाणां स्वात्मनिष्ठमभावमादाय लोकप्रसिद्धं विषयाणामात्मबाह्यत्वस्य कथनं च कथमपि संगच्छेत । यथा मयाऽदृष्टस्य पुरुषान्तरदृष्टस्य वृक्षविशेषस्य मदात्मबाह्यत्वम् ।

९१—एवं स्थितेऽपि यदि कश्चिद्विद्वान्मदुक्तसिद्धान्तः पदार्थानां वास्तविकत्वं किंचिदूनयतीति मन्येत तर्हि तस्यायं भ्रम एवेति वदामि । यतोहि परिमाणगत्यादिसकलज्ञेयगुणानामाधारं विहाय स्वातन्त्र्येणावस्थातुमशक्यतयाऽधिकरणसापेक्षत्वं प्राचीनैरपि स्वीक्रियते । इन्द्रियग्राह्यविषयास्तु तादृशगुणसमुदायानतिरिक्ता एव सर्वसंमता इति तेषां स्वातन्त्र्येणालम्बनमन्तराऽवस्थानस्यासंभवो निर्विवाद एव , एवंसति प्रत्यक्षविषयाणामधिकरणनैरपेक्ष्येण सद्भावं निषेधयन्तोवयं नेषदपि प्राचीनाभिमतपदार्थवास्तविकत्वं ह्रासयामो नाप्यस्मिन् विषये किंचिदपूर्वपदार्थस्थापनकृतदोषविशेषभागिनश्च स्मः । एतावानेव विशेषो यदस्मत्पक्षे इन्द्रियोपलब्धाचेतनविषयाणां प्रत्यक्षज्ञानात्मकतया तत्साक्षी परिमाणशून्येऽविभाज्यो ज्ञानेच्छाकृतिमानात्मैवाधारः । भूतपूर्वपण्डितास्तु यास्यवत् तदधिकरणं किंचिद् अचेतनं परिमाणशालि जडद्रव्यापरपर्यायं स्वतो वर्तमानं प्रत्यक्षागोचरं मन्वते । तच्च तेषांनये न केवलं सर्वजीवात्मभ्योऽपितु परमात्मनोपि बहिर्वर्त्तते । परमात्मन्यपि तत्सृष्टतादृशमूर्त्तजडाधिकरणप्रतिबिम्बज्ञानान्येव मन्यन्ते । तत्सृष्टाधिकरणमित्यस्मदुक्तिस्तु प्राचीनमते तादृशाधिकरणानामीश्वरसृष्टत्वमभ्युपेत्यैव बोध्या ।

केशवशास्त्री

SARVA-DARSANA-SANGRAHA

CHAPTER II.

THE BAUDDHA SYSTEM.

At this point the Buddhists remark: As for what you (Chārvākas) laid down as to the difficulty of ascertaining invariable concomitance, Your position is unacceptable, inasmuch as invariable concomitance is easily cognisable by means of identity and causality. It has accordingly been said:

"From the relation of cause and effect, or from identity as a determinant

Results a law of invariable concomitance, through observation, and through negation of non-observation."

On the hypothesis (of the Naiyāyikas) that it is concomitance and non-concomitance (e. g. A is where B is, A is not where B is not) that determine an invariable connection, the unconditiomal attendance of the major or

॥ सर्वदर्शनसङ्ग्रहः ॥

अत्र बौद्धैरभिधीयते यदभ्यधायि अविनाभावो दुर्बोध इति तदसाधीयः, तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात् । तदुक्तम्, कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमो दर्शनान्तरदर्शनात् ॥ अन्वयव्यतिरेकावविनाभावनिश्चायकाविति, ननु पक्षे साध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत्, भूते भविष्यति वर्त्तमाने अनुपलभ्यमाने च व्यभिचारशङ्काया अनिवारणात् । नन्व तथाविधस्थले तावकेऽपि मते व्यभिचारशङ्का दुष्परिहरेति चेत्, मैवं वोचः, विनापि कारणं कार्य्यमुत्पद्यतामित्येवंविधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात् । तदेव आशङ्क्येत यस्मिन्नाशङ्क्यमाने व्याघातादयो नावतरेयुः । तदुक्तं, व्यो

CC-0. Sampurnanand University Collection. Digitized by eGangotri

the middle term would be unascertainable, it being impossible to exclude all doubt with regard to instances past and future, and present but unperceived. If one (a Naiyāyika) rejoin that uncertainty in regard to such instances is equally inevitable on our system, we reply: Say not so, for such a supposition as that an effect may be produced without any cause would destroy itself by putting a stop to activity of any kind; for such doubts alone are to be entertained the entertainment of which does not implicate us in practical absurdity and the like, as it has been said: "Doubt terminates where there is a practical absurdity."

1 By ascertainment of an effectuation, then, of that (viz. of the designate of the middle), is ascertained the invariable concomitance (of the major); and the ascertainment of such effectuation may arise from any one of five causes, in the perceptive cognition or non-cognition of cause and effect. That fire and smoke (for instance) stand in the relation of cause and effect is ascertained by five indications, viz. that an effect is not cognised prior to its effectuation, that the cause being perceived the effect is perceived, that after the effect is cognised there is a non-cognition, the (material) cause being no longer cognised.

2 In like manner an invariable concomitance is ascertained by the ascertainment of identity (e. g a sisu-tree is a tree, or wherever we observe the attributes of a sisu we observe also the attribute arboreity), an absurdity attaching to the contrary opinion, inasmuch as if a sisu-tree should lose its arboreity it would lose its own self. But on the other hand, where there exists no absurdity, and where a (mere) concomitance is again and again observed, who can exclude all doubt of failure in the concomitance? An ascertainment of the identity of sisu and tree is competent in virtue of the reference to the same object (i. e. predication) This tree is a sisu. For reference to the same object (predication) is not competent where there is no difference whatever (e. g.) to say A jar is a jar is no combination of diverse attributes in a common subject), because the two terms cannot, as being synonymous, be simultaneously employed; nor can reference to the same object take place where there is a reciprocal exclusion (of the two terms), inasmuch as we never find (for instance) horse and cow predicated the one of the other.

It has thus been evinced that an effect or a selfsame supposes a cause or a selfsame (as invariable concomitants).

If a man does not allow that inference is a form of evidence *pramāṇa*, one may reply: You merely assert thus much that inference is not a form of evidence: do you allege no proof of this, or do you allege any? The former alternative is not allowable according to the maxim that bare assertion is no proof of the matter asserted. Nor is the latter alternative any better, for if while you assert that inference is no form of evidence you produce some truncated argument (to prove, i. e. infer, that it is none), you will be involved in an absurdity, just as if you asserted your own mother to be barren. Besides, when you affirmed that the establishment of a form of evidence, and of the cognition afforded by it, resulted from its homogeneity, you yourself admitted induction by identity. Again, when you affirmed that the dissentiency of others is known by the symbolism of words, you yourself allowed induction by causality.—When you deny the existence of any object on the ground of its not being perceived, you yourself admit an inference of which non-perception is the middle-term. Conformably it has been said by Tāthāgata:

घातावधिराशङ्केति ॥ तस्मात् तदुत्पत्तिनिश्चयेनाविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनः । कार्य्यस्योत्पत्तेः प्रागनुपलम्भः कारणोपलम्भे सत्युपलम्भः उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलम्भ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते । तथा तादात्म्यनिश्चयेनाप्यविनाभावो निश्चीयते, यदि शिंशपा वृक्षत्वमतिपतेत् स्वात्मानमेव जह्यादिति विपक्षे बाधकप्रवृत्तेः । अप्रवृत्ते तु बाधके भूयः सहभावेोपलम्भेऽपि व्यभिचारशङ्कायाः को निवारयिता । शिंशपावृक्षयोश्च तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते । न ह्यत्यन्ताभेदे तत् सम्भवति पर्य्यायत्वेन युगपदपि प्रयोगायोगात्, नाप्यत्यन्तभेदे गवाश्वयोरनुपलम्भात् । तस्मात् कार्य्यात्मनो कारणमात्मानञ्चानुमापयत इति सिद्धम् । यदि कश्चित् प्रामाण्यमनुमानस्य नाङ्गी-

कुर्य्यात्, तं प्रति ब्रूयात्, अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तत्र न किञ्चन साधनमुपन्यस्यते, उपन्यस्यते वा । न प्रथमः, एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात् । नापि चरमः, अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अशिरस्कवचनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात् । किञ्च प्रमाणतदाभासव्यवस्थापनं तत्सामानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम् । परगता विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्य्यलिङ्गकमनुमानम् । अनुपलब्ध्या कस्यिदर्थे प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम् ॥ तथा चोक्तं तथागतैः । प्रमाणान्तरसामान्यस्थितिरन्यधियां गतेः । प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचिदिति ॥ पराक्रान्तञ्चात्र सूरिभिरिति गन्थभूयस्त्वभयादुपरम्यते । ते च बौद्धाश्चतुर्विधया भावनया परम-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"The admission of a form of evidence in general results from its being present to the understanding of others; The existence of a form of evidence also follows from its negation by a certain person."

All this has been fully handled by great authorities; and we desist for fear of an undue enlargement of our treatise.

These same Bauddhas discuss the highest end of man from four standpoints. Celebrated under the designations of Mādhyamika, Yogāchāra, Sautrāntika, and Vaibhāshika, these Buddhists adopt respectively the doctrines of a universal void (nihilism), an external void (subjective idealism), the inferribility of external objects (representationism), and the perceptibility of external objects (presentationism*). Though the venerated Buddha be only one awakened, (his disciples) are fourfold in consequence of this diversity of views; just as when one has said The sun has set, the adulterer, the thief, the divinity student, and others understand that it is time to set about their assignations, their theft, their religious duties and so forth, according to their several inclinations.

It is to be borne in mind that four points of view have been laid out, viz. (1) All is momentary, momentary; (2) all is pain, pain; (3) all is like itself alone; (4) All is void, void.

Of these points of view, the momentariness of fleeting things, blue and so forth (i. e. whatever be their quality), is to be inferred from their existence; thus, Whatever is is momentary (or fluxional) like a bank of clouds, and like these existing things.* Nor may any one object that the middle-term (existence) is unestablished: for an existence, consisting of practical efficiency, is established by perception to belong to the blue and other momentary things; and the exclusion of existence from that which is not momentary is established provided that we exclude from it the non-momentary succession and simultaneity, according to the rule that exclusion of the continent is exclusion of the contained. Now this practical efficiency (here identified with existence) is contained under succession and simultaneity, and no medium is possible between succession and non-succession (or simultaneity); there being a manifest absurdity in thinking otherwise, according to the rule.

"In a reciprocal contradiction there exists no ulterior alternative;

Nor is there unity in contradictories, there being a repugnance in the very statement."†

And this succession and simultaneity being excluded from the permanent, and also excluding from the permanent all practical efficiency, determine existence of the alternative of momentariness.

Q. E. D.

* The Bauddhas are thus divided into
(1) Mādhyamikas or Nihilists;
(2) Yogāchāras or Subjective Idealists;
(3) Santrāntikas or Representationists;
(4) Vaibhāshikas or Presentaionists.

* Cf. Ferrier's Lectures and Remains, vol. 1 p. 119.

"Suppose yourself gazing or a gorgeous sunset. The whole western heavens are glowing with roseate hues But you are aware that within half an hour all these glorious tints will have faded away into a dull ashen grey. You see them even now melting away before your eyes, although your eyes cannot place before you the conclusion which your reason draws. And what conclusion is that? That conclusion is that you never, even for the shortest time that can be named or conceived, see any abiding colour, any colour which truly *is*. Within the millionth part of a second the whole glory of the painted heavens has undergone an incalculable series of mutations. One shade is supplanted by another with a rapidity which sets all measurement at defiance, but because the process is one to which no measurement applies..... Reason refuses to lay an arrestment on any period of the passing scene, or to declare that it is, because in the very act of being it is not; it has given place to something else. it is a series of fleeting colours, no one of which *is* because each of them continually vanishes in another."

† Principium exclusi medii inter duo contradictoria.

पुरुषार्थं कथयन्ति । ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्व्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्व-वादानातिष्ठन्ते । यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं, यथा गतोऽस्तमर्कं इत्युक्ते जारचौरानूचानादयः स्वेष्टानुसारेणाभिसरणपरस्वहरणसदाचरणादिसमयं बुध्यन्ते । सर्वं क्षणिकं क्षणिकं, दुःखं दुःखं, स्वलक्षणं स्वलक्षणं, शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम् । तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं, यत् सत् तत् क्षणिकं यथा जलधरपटलं, सन्तश्चामी भावा इति । न चायमसिद्धो हेतुरर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात्, व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिन्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च । तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं, न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति, परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकतापि विरुद्धानामुक्तिमात्रविरोधतः, इति न्यायेन व्याघातस्योद्भटत्वात् । तौ च क्रमाक्रमौ स्थायिनः सकाशाद्भावर्त्तमानावर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकेष्वेव सत्त्वं व्यवस्थापयत इति सिद्धम् । नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत्, तदयुक्तं विकल्पासहत्वात्, तथाहि वर्त्तमानार्थक्रियाकरणकालेऽतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति नो वा । आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य क्षेपायोगात्, यद् यदा यत्करणसमर्थं तत् तदा तत् करोत्येव यथा सामग्री स्वकार्य्यं, समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च । द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य, यद् यदा यच्च करोति तत् तदा तत्रासमर्थं यथाहि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Perhaps some one may ask: Why may not practical efficiency reside in the non-fluxional (or permanent)? If so, this is wrong, as obnoxions to the following dilemma. Has your 'permanent' a power of past and future practical efficiency during its exertion of present practical efficiency, or no? On the former alternative (if it has such power), it cannot evacuate such past and future efficiency, because we cannot deny that it has power, and because we infer the consequence, That which can at any time do anything, does not fail to do that at that time, as for instance a complement of causes, and this powerful entity. On the latter alternative (if the permanent has no such power of past and future agency), it will never do anything; because practical efficiency results from power only; what at any time does not do anything, that at that time is unable to do it, as for instance a piece of stone does not produce a germ; and this entity while exerting its present practical efficiency does not exert its past and future practical efficiency. Such is the contradiction.

You will perhaps rejoin; By assuming successive subsidiaries, there is competent to the permanent entity a successive exertion of past and future practical efficiency. If so, we would ask you to explain: Do the subsidiaries assist the entity or not? If they do not, they are not required; for if they do nothing, they can have nothing to do with the successive exertion. If they do assist the thing, is this assistance (or Supplementation) other than the thing, or not? If it is other than the thing, then this adscititious (assistance) is the cause, and the non-momentary entity is not the cause; for the effect will then follow, by concomitance and non-concomitance, the adventitious supplementation. Thus it has been said:

"What have rain and shine to do with the soul? Their effect is on the skin of man;
If the soul were like the skin it would be non-permanent; and if the skin were like the soul there could be no effect produced upon it."

Perhaps you will say: The entity produces its effect, *together with* its subsidiaries. Well, then, (we reply) let the entity not give up its subsidiaries, but rather tie them lest they fly with a rope round their neck, and so produce the effect which it has to produce, and without forfeiting its own proper nature. Besides (we continue) does the additament (or supplementation) constituted by the subsidiaries, give rise to another additament, or not? In either case the afore-mentioned objections will come down upon you like a shower of stones. On the alternative that the additament takes on another additament, you will be embarrassed by a many-sided regress *in infinitum*. If when the additament is to be generated another auxiliary (or additament) be required, there will ensue an endless series of such additaments: this must be confessed to be one infinite regress. For example, let a seed be granted to be productive when an additament is given consisting of a complement of objects such as water, wind, and the like as subsidiaries; otherwise an additament would be manifested without subsidiaries. Now the seed in taking on the additament takes it on with the need of (ulterior) subsidiaries, otherwise as there would always be subsidiaries, it would follow that a germ would always be arising from the seed. We shall now have to add to the seed another supplementation by subsidiaries themselves requiring an additament. If when this additament is given, the seed be productive only on condition of subsidiaries as before, there will be established an infinite regression of additaments to (or supplementations of) the seed, to be afforded by the subsidiaries.

शिलाशकलमङ्कुरे, न चैष वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च । ननु क्रमवत्सहकारिलाभात् स्यादियेऽतीतानागतयोः क्रमेण क्रमणमुपपद्यते इति चेत्, तत्रेदं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्व्वन्ति न वा, न चेत्, नापेक्षणीयास्ते, अकिञ्चित् कुर्व्वतां तेषां तादर्थ्यायोगात् । उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्विद्यते न वा, भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्याच्च भावस्यातीतानागतस्य, आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्य्यस्य । तदुक्तम्, वर्षातपाभ्यां किं व्योम्नश्चर्म्मण्यस्ति तयोः फलम् । चर्म्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फल इति ॥ अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत्, अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा कृत्यं कार्य्यं कुर्य्यात् स्वभावस्यानपायात् । किञ्च सहकारि-

---

न्योऽतिशयः किमतिशयान्तरमारभते न वा, उभयथापि प्रागुक्तदूषणापाणवर्षणप्रसङ्गः । अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादोष्यमपि स्यात्, अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्था ऽऽस्थेया तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थमात्रैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम्, अपरया तदभावेऽप्यतिशयः प्रादुर्भवेत् । बीजं चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते, अन्यथा सर्व्वदोपकारापत्तावङ्कुरस्यापि सदोदयः प्रसज्येत । तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे, तस्मिंश्चोपकारे पूर्व्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता॥ अथोपकारः कार्य्यार्थमपेक्ष्यमाणोऽपि बीजा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Again, we ask, does the supplementation required for the production of the effect, produce its effect independently of the seed and the like, or does it require the seed and the like? On the first alternative (if the supplementation works independently) it would ensue that the seed is in no way a cause. On the second(if the supplementation require the seed), the seed, or whatever it may be, that is thus required, must take on a supplementation or additament, and thus there will be over and over again an endless series of additaments added to the additament constituted by the seed; and thus a second infinite regression is firmly set up.

In like manner the subsidiary which is required will add another subsidiary to the seed or whatever it may be that is the subject of the additions, and thus there will be an endless succession of additaments added to the additaments to the seed which is supplemented by the subsidiaries; and so a third infinite regression will add to your embarrassment.

Now (or the other grand alternative) let it be granted that a supplementation identical with the entity (the seed or whatever it may be) is taken on. If so the former entity. that *minus* the supplementation, is no more, and a new entity identical with the supplementation, and designated (in the technology of Buddhism) *kurvad rūpa* (or effect-producing object) comes into being: and thus the tree of my desires (my doctrine of a universal flux) has borne its fruit.

Practical efficiency, therefore, in the non-momentary, is inadmissible. Nor is practical effiiciency possible apart from succession in time; for such a possibility is redargued by the following dilemma. Is this (permanent) entity (which you contend for) able to produce all its effects simultaneously, or does it continue to exist after production of effects? On the former alternative it will result that the entity will produce its effects just as much at one time as at another; On the second alternative the expectation of its permanency is as reasonable as expecting seed eaten by a mouse to germinate.

That to which contrary determinations are attributed is diverse, as heat and cold; but this thing is determined by contrary attributions:—Such is the argumentation applied to the cloud (to prove that it has not a permanent, but a fluxional, existence). Nor is the midddle-term disallowable,for possession and privation of power and impotence are allowed in regard to the permanent (which you assert) at different times. The concomitance and non-concomitance already described (viz. That which can at any time do any thing, does not fail to do that at that time, and What at any time does not do anything, that at that time is unable to do it) are affirmed (by us) to prove the existence of such power. The negative rule is: What at any time is unable to produce anything, that at that time does not produce it, as a piece of stone, for example, does not pronuce a germ; and this entity (the seed or whatever it may be) while exerting a present practical efficiency. is incapable of past and future practical efficiencies. The contradiction violating this rule is: What at any time does anything, that at that time is able to do that thing, as a complement of causes is able to produce its effect: and this (permanent) entity exerts at time past and time future the practical efficiencies proper to those times.

(To recapitulate). Existence is restricted to the momentary; there being observed in regard to existence a negative rule, that in regard to permanent succession and simultaneity being excluded, existence which contains succession and simultaneity is not cognisable; and

---

दिनिरपेक्षं कार्यं जनयति तत्सापेक्षो वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीये ऽपेक्ष्यमाणेन बीजादिनोपकारेऽतिशय आधेयः, एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवेत्। एवमपेक्ष्यमाणेनोपकारेण बीजादेर्धर्म्मेण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नो ऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावो ऽनतिशयात्मा निवृत्तः, अन्यश्चातिशयात्मा कुर्व्वद्रूपादिपदवेदनीयो जायत इति फलितं ममापि मनोरथदुमेण, तस्मादक्षणिकस्यार्थक्रिया दुर्घटा, नाप्यक्रमेण घटते विकल्पासहत्वात्। तथाहि युगपत्सकलकार्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्तते न वा। प्रथमे तत्कालवत् कालान्तरे ऽपि तावत्

कार्यकरणमापतेत्। द्वितीये स्थायित्वप्रत्याशा मूषिकभक्षितबीजादावङ्कुरादिजननप्रार्थनामनुहरेत्। यद् विरुद्धधर्माध्यस्तं तद्यथा शीतोष्णे। विरुद्धधर्माध्यस्तश्चायमिति जलधरे प्रतिपत्तिसिद्धिः। न चायमसिद्धो हेतुः स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्ययसिद्धत्वात्, तत्रासामर्थ्यसाधको प्रसङ्गतद्विपर्ययौ प्रागुक्तौ समर्थ्यसाधकावभिधीयेते यद् यदा यज्जननासमर्थं तत् तदा तत्र करोति यथा शिलाशकलमङ्कुरम्, असमर्थश्चायं वर्तमानार्थक्रियाकरणकालेऽतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः, यद्यदा यत् करोति तत् तदा तत्र समर्थं यथा सामयी स्वकार्यं, करोति चायमतीतानागतकाले तत्कालवर्तिन्यावर्थक्रिये भाव इति प्रसङ्गव्यत्ययो विपर्ययः, तस्माद्विपक्षे क्रमयोगपद्यव्यावृत्त्या व्यापकानुलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्ययबलाद्गृहीतान्वयव्याप्तिकं सत्त्वं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

there being observed in regard to existence a positive rule, in virtue of a concomitance observed (viz. that the existent is accompanied or 'pervaded' by the momentary), and in virtue of a non-concomitance observed (viz. that the non-momentary is accompanied or 'pervaded by the non-existent). Therefore it has been said by Jñāna-śri :

"What is is momentary, as a cloud, and as these existent things ;

The power of existence is relative to practical efficiency, and belongs to the ideal; but this power exists not as eternal in things eternal (ether &c.);

Nor is there only one form, otherwise one thing could do the work of another ;

For two reasons therefore (viz. succession and simultaneity, a momentary flux is congruous, and remains true in regard to that which we have to prove."

Nor is it io be held, in acceptance of the hypothesis of the Vaiśeshikas and Naiyāyikas, that existence is a participation in the universal form existence ; for were this the case universality, particularity, and co-inhesion (which do not participate in the universal) could have no existence.

Nor is the ascription of existence to universality, particularity and co-inhesion, dependent on any *sui generis* existence, of their own ; for such an hypothesis is operose, requiring too many *sui generis* existences. Moreover the existence of any universal is disproved by a dilemma regarding the presence or non-presence (of the one in the many) ; and there is not presented to us any one form running through all the diverse momentary things, mustard-seeds, mountains and so forth, like the string running through the gems strung upon it. Moreover (we would ask), is universal omnipresent, or present everywhere in its subjicible subjects? If it is everywhere all things in the universe will be confounded together (chaos will be eternal) ; and you will be involved in a tenet you reject, since Praśasta-pāda has said "Present in all its subjects.' Again (if the universal is present only in its proper subjects),does the universal (the nature of a jar) residing in an already existing jar on being attached to another jar now in making, come from the one to attach itself to the other, or not come from it? On the first alternative (if it comes), the universal must be a substance (for substances alone underlie qualities and motions) ; whereas, if it does not come it cannot attach itself to the new jar. Again (we ask) when the jar ceases to exist, does the universal outlast it, or cease to exist, or go to another place? On the first supposition it will exist without a subject to inhere in ; on the second, it will be improper to call it eternal (as you do) ; on the third it will follow that it is a substance (or base of qualities and motions). Destroyed as it is by the malign influence of these and the like objections, the universal is unauthenticated.

Conformably it has been said :

"Great is the dexterity of that which existing in one place, engages without moving from that place in producing itself in another place.

This entity (universality) is not connected with that wherein it resides, and yet pervades that which occupies that place: great is this miracle.

It goes not away, nor was it there, nor is it subsequently divided, it quits not its former repository : what a series of difficulties!"

If you ask: On what does the assurance that the one

क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धं, तदुक्तं ज्ञानश्रिया, यत् सत् तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी। सत्ताशक्तिरिहार्थक्रमेण मितेः सिद्धेषु सिद्धा न सा ॥ नाप्येकैव विधान्यथा परकृतेनापि क्रियादिर्भवेत् । द्वेधापि क्षणभङ्गसंगतिरतः साध्ये च विश्राम्यतीति ॥ न च क्षणभङ्गावस्थानुगतस्वरूपस्वीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात्, न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः प्रयोजकगौरवापत्तेः, अनुगतत्वाननुगतत्वविकल्पपराहतेश्च, सर्वंपमहीधरादिषु विनश्वरेषु क्षणेष्वनुगतस्याकारस्य मणिषु सूत्रवद्भूतगणेषु गुणवच्चाप्रतिभासनाच्च । किञ्च सामान्यं सर्वगतं स्वाश्रयगतं वा, प्रथमे सर्ववस्तुसङ्करप्रसङ्गः, अपसिद्धान्तापत्तिश्च । यतः प्रोक्तं प्रशस्तपादेन स्वविषयसर्वगतमिति । किञ्च विद्यमाने घटे वर्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत् सम्बध्यते, अनागच्छद्वा । आद्ये द्रव्यत्वापत्तिः, द्वितीये सम्बन्धानुपपत्तिः । किञ्च विनष्टे घटे समान्यमवतिष्ठते, विनश्यति, स्थानान्तरं गच्छति वा, प्रथमे निराधारत्वापत्तिः । द्वितीये नित्यत्ववाचो युक्त्ययुक्तिः, तृतीये द्रव्यत्वप्रसक्तिः, इत्यादिदूषणग्रहग्रस्तत्वात् सामान्यमप्रामाणिकम् । तदुक्तम्, अन्यत्र वर्तमानस्य ततो ऽन्यस्थानजन्मनि । तस्मादचलतः स्थानाद्वृत्तिरित्यतियुक्तता ॥ यत्रासौ वर्तते भावस्तेन सम्बध्यते न तु । तद्देशिनं च व्याप्नोति किमप्येतन्महाद्भुतम् ॥ न याति न च तत्रासीदस्ति पश्चाच्च तांशवत् । जहाति पूर्वं नाधारमहो व्यसनसन्ततिरिति ॥

अनुवृत्तप्रत्ययः किमालम्बन इति चेत्. अङ्ग अन्यापोहालम्बन एवेति सन्तोष्टव्यमायुष्मतेति, अलमतिप्रसङ्गेन । सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम्, अन्यथा तद्विवर्त्तयिषूणां तेषां तद्विवृत्त्युपाये प्रवृत्त्यनुपपत्तेः । तस्मात् सर्वं दुःखं दुःखमिति भावनीयम् । ननु किंवदिति पृष्टे दृष्टान्तः कथनीय इति चेन्नैवं, स्वलक्षणानां क्षणानां क्षणिकतया सा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

exists in the many rest? You must be satisfied with the reply that we concede it to repose on difference from that which is different (or exclusion of heterogeneity). We dismiss further prolixity.

That all transmigratory existence is identical with pain is the common verdict of all the founders of institutes, else they would not be found desirous to put a stop to it and engaging in the method for bringing it to an end. We must therefore bear in mind that all is pain and pain alone.

If you object: When it is asked, like what? you must quote an instance,—we reply: Not so, for momentary objects self-characterised, being momentary, have no common characters, and therefore it is impossible to say that this is like that. We must therefore hold that all is like itself alone, like itself alone.

In like manner we must hold that all is void, and void alone. For we are conscious of a determinate negation. This silver or the like has not been seen by me in sleeping or waking. If what is seen were (really) existent, then reality would pertain to the corresponding act of vision, to the (nacre &c.) which is the basis of its particular nature (or hoeceity), to the silver &c. illusorily superposed upon that basis, to the connection between them, to the coinherence, and so forth: a supposition not entertained by any disputant. Nor is a semi-effete existence admissible. No one imagines that one half of a fowl may be set apart for cooking, and the other half for laying eggs. The venerated Buddha, then, having taught that of the illusorily superposed (silver &c.), the basis (nacre &c.), the connection between them, the act of vision, and the *videns*, if one or more be unreal it will perforce ensue that all are unreal, all being equally objects of the negation; the Mādhyamikas excellently wise explain as follows viz, that the doctrine of Buddha terminates in that of a total void (universal baselessness, or nihilism) by a slow progression like steps of a mendicant, through the position of a momentary flux, and through the (gradual) negation of the illusory assurances of pleasurable sensibility, of universality, and of reality.

The ultimate principle, then, is a void emancipated from four alternatives, viz. from realty, from unreality from both (reality and unreality, and from neither (reality nor unreality). To exemplify this: If real existence were the nature of a water-pot and the like, the activity of its maker (the potter) would be superfluous.

If non-existence be its nature the same objection will accrue; as it is said:

"Necessity of a cause befits not the existent, ether and the like for instance;
No cause is efficacious of a non-existent effect, flowers of the sky and the like for instance."

The two remaining alternatives, as self-contradictory, are inadmissible. It has accordingly been laid down by the venerated Buddha in the Alankārāvatāra:

"Of things discriminated by intellect, no nature is ascertained;*
Those things are therefore shown to be inexplicable and natureless."

And again:

"This matter perforce results, which the wise declare, No sooner are objects thought, than they are dissipated.

That is to say, the objects are not determined by any four of the alternatives. Hence it is that it has been said:

"A religious mendicant, an amorous man, and a dog have three views of a woman's person, respectively that it is a carcass, that it is a mistress, and that it is a prey."

A. E. G.

* Cf. Ferrier's Institutes of Metaphysic, p. 213. "If every *complete* object of cognition must consist of object *plus* the subject, the object without the subject must be incomplete that is inchoate—that is, no possible object of knowledge at all. This is the distressing predicament to which matter is reduced by the tactics of speculation; and this predicament is described not unaptly by calling it a *flux*—or as we have depicted it elsewhere, perhaps more philosophically, as a never-ending redemption of nonsense into sense and a never-ending relapse of sense into nonsense."

लक्षण्याभावात् तेनैतेन सदृशमपरमिति वक्तुमशक्यत्वात्। ततः स्वलक्षणं स्वलक्षणमिति भावनीयम्। एवं शून्यं शून्यमपि भावनीयं, स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीति विशिष्टनिषेधस्योपलम्भात्। यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्येदन्तायाः अधिष्ठानस्य च तस्मिन्नध्यस्तस्य रजतत्वादेस्तत्सम्बन्धस्य च समवायादेः सत्त्वं स्यात्, न चैतदिष्टं कस्यचिद्वादिनः। न चार्द्धजरतीन्यायमुचितं न हि कुक्कुट्या एको भागः पाकायापरो भागः प्रसवाय कल्प्यतामिति कल्प्यते। तस्मादध्यस्ताधिष्ठानतत्सम्बन्धदर्शनद्रष्टृणां मध्ये एकस्यानेकस्य वा असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकास्तावदुत्तमप्रज्ञा इत्थमङ्गीकुर्वन् भिक्षुपादप्रसारणन्यायेन क्षणभङ्गाद्यभिधानमुखेन स्यायित्वानुकूलवेदनीयत्वानुगतसर्वसत्यत्वभ्रमव्यावर्तनेन सर्वशून्यतायामेव पर्यवसानम्। अतस्तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव। तथाहि यदि घटादेः सत्त्वं स्वभावस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्रादुःष्यात्। यथोक्तम्, न सतः कारणापेक्षा व्योमादेरिव युज्यते। कार्यस्यासम्भवी हेतुः खपुष्पादेरिवासत इति॥ विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवतालङ्कारावतारे, बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते।

अतो निरभिलप्यास्ते निःस्वभावाश्च दर्शिता इति॥
इदं वस्तु बलायातं यद्वदन्ति विपश्चितः।
यथा यथार्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथेति च॥

न क्वचिदपि पक्षे व्यवतिष्ठन्त इत्यर्थः। दृष्टार्थव्यवहारश्च न स्वप्नव्यवहारवत् संवृत्या सङ्गच्छते। अत एवोक्तम्,

परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ।
कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पना इति॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 105. Benares, February 1st, 1875. Vol. IX.

काशिकायाः

॥ तृतीयाध्यायस्य द्वितीयः पादः ॥

सुप्यजातौ णिनिस्ताच्छील्ये ॥ ७८ ॥

अजातिवाचिनि सुबन्तउपपदे ताच्छील्ये गम्यमाने धातोर्णिनिप्रत्ययो भवति । उष्णभोजी । शीतभोजी । अजातावितिकिम् । ब्राह्मणानामन्त्रयिता । ताच्छील्यइतिकिम् । उष्णं भुङ्क्ते कदा चित् । सुपीति वर्त्तमाने पुनः सुग्रहणमुपसर्गनिवृत्त्यर्थम् ॥ उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानम् ॥ * ॥ उदासारिण्यः । प्रत्यासारिण्यः ॥ साधुकारिणि च ॥ * ॥ साधुकारी । साधुदायी ॥ ब्रह्मणिवदः ॥ * ॥ ब्रह्मवादिनो वदन्ति ॥

कर्त्तर्युपमाने ॥ ७९ ॥

कर्त्तृवाचिनि उपमानउपपदे धातोर्णिनिप्रत्ययो भवति । उपपदकर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानम् । उष्ट्रइव क्रोशति, उष्ट्रक्रोशी । ध्वाङ्क्षरावी । अताच्छील्यार्थं आरम्भः । जात्यर्थो वा । कर्त्तरीतिकिम् । अपूपानिव भक्षयति मापान् । उपमानइतिकिम् । उष्ट्रः क्रोशति ॥

व्रते ॥ ८० ॥

व्रतइति शास्त्रतो नियम उच्यते । व्रते गम्यमाने सुबन्तउपपदे धातोर्णिनिः प्रत्ययो भवति । समुदायोपाधिश्चायं, धातूपपदप्रत्ययसमुदायेन व्रतं गम्यते । स्थण्डिलशायी । अश्राद्धभोजी । कामचारप्राप्तो नियमः, सति शयने स्थण्डिलएव शेते नान्यत्र, सति भोजने ऽश्राद्धमेव भुङ्क्ते न श्राद्धमिति । व्रतेइतिकिम् । स्थण्डिले शेते देवदत्तः । अताच्छील्यार्थं आरम्भः । जात्यर्थो वा ॥

बहुलमाभीक्ष्ण्ये ॥ ८१ ॥

आभीक्ष्ण्ये गम्यमाने धातोर्बहुलं णिनिप्रत्ययो भवति । आभीक्ष्ण्यं पौनःपुन्यं तात्पर्यमासेवा ताच्छील्यादन्यत् । कषायपायिणो गान्धाराः । क्षीरपायिण उशीनराः । सौवीरपायिणो बाह्लीकाः । बहुलग्रहणात्कुल्माषखाद इत्यत्र न भवति ॥

मनः ॥ ८२ ॥

सुपीति वर्त्तते । मन्यतेः सुबन्तउपपदे णिनिप्रत्ययो भवति । दर्शनीयमानी । शोभनमानी । बहुलग्रहणानुवृत्तेर्मन्यतेर्यहणं न मनुतेः । उत्तरसूत्रे हि खश्प्रत्यये विकरणकृतो विशेषः स्यात् ॥

आत्ममाने खश्च ॥ ८३ ॥

आत्मनो मननमात्ममानः । आत्ममाने वर्त्तमानान्मन्यतेः सुप्युपपदे खश्प्रत्ययो भवति । चकाराण्णिनिश्च । यदा प्रत्ययार्थः कर्ता ऽऽत्मानमेव दर्शनीयत्वादिना धर्मेण युक्तं मन्यते तदायं विधिः । दर्शनीयमात्मानं मन्यते दर्शनीयंमन्यः । दर्शनीयमानी । पण्डितंमन्यः । पण्डितमानी । आत्ममानइतिकिम् । दर्शनीयमानी देवदत्तस्य यज्ञदत्तः । अतः सार्वकालिका विधयो वेदितव्याः ॥

भूते ॥ ८४ ॥

भूतइत्यधिकारो वर्त्तमाने लडिति यावत् । यदित कर्द्धुमनुक्रमिष्यामः भूतइत्येवं तद्वेदितव्यम् । धात्वधिकाराच्च धात्वर्थे भूतइति विज्ञायते । वर्त्स्यति, करणे यजः । अग्निष्टोमेनेष्टवान् । अग्निष्टोमयाजी । भूतइतिकिम् । अग्निष्टोमेन यजते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

करणे यजः ॥ ८५ ॥

णिनिरनुवर्त्तते । न खश् । यजतेर्द्धातोः करणउपपदे णिनिप्रत्ययो भवति भूते । अग्निष्टोमयाजी । अग्निष्टोमः फलभावनायां करणं भवति ॥

कर्मणि हनः ॥ ८६ ॥

कर्मणि उपपदे हन्तेर्धातोर्णिनिप्रत्ययो भवति भूते काले । पितृव्यघाती । मातुलघाती । कुत्सितयहणं कर्त्तव्यम् । इह मा भूत् । चोरं हतवान् ॥

ब्रह्मभ्रूणवृचेषु क्विप् ॥ ८७ ॥

कर्मणीति वर्त्तते । ब्रह्मादिषु कर्मसूपपदेषु हन्तेर्द्धातोः क्विप् प्रत्ययो भवति भूते । ब्रह्महा । भ्रूणहा । वृत्रहा । किमर्थमिदमुच्यते । यावता सर्वधातुभ्यः क्विब्विहित एव । ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम् । चतुर्विधश्चात्र नियम इष्यते ॥ ब्रह्मादिष्वेव हन्तेर्नान्यस्मिन्नुपपदे । पुरुषं हतवानिति । ब्रह्मादिषु हन्तेरेव नान्यस्मात्स्यात् । ब्रह्माधीतवानिति । ब्रह्मादिषु हन्तेर्भूतकाले क्विबेव नान्यः प्रत्ययः । तथा भूतकालएव नान्यस्मिन् । ब्रह्माणं हन्ति हनिष्यति वेति । तदेतदुत्सर्गबहुलयहणस्य पुरस्तादपकर्षेणाल्लभ्यते ॥

बहुलं छन्दसि ॥ ८८ ॥

पूर्वेण नियमादप्राप्तः क्विब्विधीयते । छन्दसि विषये उपपदान्तरेपि हन्तेर्बहुलं क्विप्प्रत्ययो भवति । मातृहा सप्तमं नरकं प्रविशेत् । पितृहा । न च भवति । मातृघातः । पितृघातः ॥

सुकर्मपापमन्त्रपुण्येषु कृञः ॥ ८९ ॥

कर्मणीति वर्त्तते, तदसंभवात्सुशब्दं वर्जयित्वा परिशिष्टानां विशेषणं भवति । स्वादिषु कर्मसूपपदेषु करोतेर्द्धातोः क्विप्प्रत्ययो भवति । सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् । अयमपि नियमार्थं आरम्भः । त्रिविधश्चात्र नियम इष्यते ॥ धातुनियमं वर्जयित्वा कालोपपदप्रत्ययनियमः । धातोरनियतत्वादन्यस्मिन्नपपदे भवति । शास्त्रकृत् । भाष्यकृत् ॥

सोमे सुञः ॥ ९० ॥

कर्मणीति वर्त्तते । सोमे कर्मण्युपपदे सुनोतेर्धातोः क्विप् प्रत्ययो भवति । सोमसुत् । सोमसुतौ । सोमसुतः । अयमपि नियमार्थं आरम्भः । चतुर्विधश्चात्र नियम इष्यते ॥ धातुकालोपपदप्रत्ययविषयः ॥

अग्नौ चेः ॥ ९१ ॥

कर्मणीत्येव । अग्नौ कर्मण्युपपदे चिनोतेर्द्धातोः क्विप् प्रत्ययो भवति । अग्निचित् । अग्निचितौ । अग्निचितः । अत्रापि पूर्ववच्चतुर्विधो नियम इष्यते ॥

कर्मण्यग्न्याख्यायाम् ॥ ९२ ॥

चेः कर्मणीति वर्त्तते । कर्मण्युपपदे चिनोतेः कर्मण्येव कारके क्विप् प्रत्ययो भवति अग्न्याख्यायां, धातूपपदप्रत्ययसमुदायेन चेदग्न्याख्या गम्यते । श्येनइव चीयते श्येनचित् । कङ्कचित् । आख्यायहणं रूढिसंप्रत्ययार्थम् । अग्न्यर्थो हीष्टकाचय उच्यते श्येनचिदिति ॥

कर्मणीनि विक्रियः ॥ ९३ ॥

कर्मण्युपपदे विपूर्वात्क्रीणातेर्धातोरिनिप्रत्ययो भवति । कर्मणीति वर्त्तमाने पुनः कर्मयहणं कर्तुः कुत्सानिमित्ते कर्मणि यथा स्यात् । कर्ममात्रे मा भूत् । सोमविक्रयी । रसविक्रयी । इह न भवति । धान्यविक्रायः ॥

दृशेः क्विनिप् ॥ ९४ ॥

कर्मणीत्येव । दृशेर्धातोः कर्म्मण्युपपदे क्विनिप् प्रत्ययो भवति । मेरुदृश्वा । परलोकदृश्वा । अन्येभ्योपि दृश्यन्तइति क्विनिपि सिद्धे पुनर्वचनं प्रत्ययान्तरनिवृत्त्यर्थम् ॥

राजनि युधिकृञः ॥ ९५ ॥

कर्मणीत्येव । राजन्शब्दे कर्म्मण्युपपदे युध्यतेः करोतेश्च क्विनिप् प्रत्ययो भवति । ननु च युधिरकर्मकः । अन्तर्भावितण्यर्थः सकर्मको भवति । राजयुध्वा । राजानं योधितवानित्यर्थः । राजकृत्वा ॥

सहे च ॥ ९६ ॥

सहशब्दे चोपपदे युधिकृञोर्द्धात्वोः क्विनिप्रत्ययो भवति । असत्त्ववाचित्वाच्चोपपदं कर्मणा विशेष्यते । सहयुध्वा । सहकृत्वा ॥

सप्तम्यां जनेर्डः ॥ ९७ ॥

सप्तम्यन्तउपपदे जनेर्धातोर्डः प्रत्ययो भवति । उपसरे जातः उपसरजः । मन्दुरजः ॥

पञ्चम्यामजातौ ॥ ९८ ॥

पञ्चम्यन्तउपपदे जातिवर्जिते जनेर्डः प्रत्ययो भवति । बुद्धिजः । संस्कारजः । दुःखजः । अजाताविति किम् । हस्तिनो जातः । अश्वाज्जातः ॥

उपसर्गे च संज्ञायाम् ॥ ९९ ॥

उपसर्गे चोपपदे जनेर्डः प्रत्ययो भवति संज्ञायां विषये । समुदायोपाधिः संज्ञा । अथेमा मानवीः प्रजाः ॥

अनौ कर्मणि ॥ १०० ॥

अनुपूर्वाद् जनेः कर्मण्युपपदे डः प्रत्ययो भवति । पुमांसमनुजातः पुमनुजः । स्त्र्यनुजः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्येष्वपि दृश्यते ॥ १०१ ॥

अन्येष्वप्युपपदेषु कारकेषु जनेर्डप्रत्ययो दृश्यते । सप्तम्यामित्युक्तमसप्तम्यामपि दृश्यते । न जायते इत्यजः । द्विर्जाताः द्विजाः । पञ्चम्यामजातावित्युक्तं जातावपि दृश्यते । ब्राह्मणजो धर्मः । क्षत्रियजं युद्धम् । उपसर्गे संज्ञायामित्युक्तम् असंज्ञायामपि दृश्यते । अभिज्ञाः । परिज्ञाः । केशाः । अनौ कर्मणीत्युक्तमकर्मण्यपि दृश्यते । अनुजातः । अनुजः । अपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वन्तरादपि भवति कारकान्तरेपि । परितः खाता परिखा । आखा ॥

निष्ठा ॥ १०२ ॥

क्तक्तवतू निष्ठेत्युक्तं स निष्ठासंज्ञकः प्रत्ययो भूते भवति । कृतम् । कृतवान् । भुक्तम् । भुक्तवान् । निष्ठायामितरेतराश्रयत्वादप्रसिद्धिः । संज्ञायां क्तक्तवतू भाव्येते । सतोश्चानयोः संज्ञया भाव्यम् । नैष दोषः । भाविनी संज्ञा विज्ञायते । स भूते भवति यस्योत्पन्नस्य निष्ठेत्येषा संज्ञा भवति । सामर्थ्यात् क्तक्तवत्वोर्विधानमेतत् ॥ आदिकर्मणि निष्ठा वक्तव्या ॥ * ॥ प्रकृतः कटं देवदत्तः । प्रकृतवान् कटं देवदत्तः ॥

सुयजोर्ङ्वनिप् ॥ १०३ ॥

सुनोतेर्यजतेश्च ङ्वनिप् प्रत्ययो भवति । सुत्वा । यज्वा ॥

जीर्यतेरतृन् ॥ १०४ ॥

भूतइति वर्त्तते । जीर्यतेरतृन्प्रत्ययो भवति भूते । जरन् । जरन्तौ । जरन्तः । वासरूपेण निष्ठा । जीर्णः । जीर्णवानिति ॥

छन्दसि लिट् ॥ १०५ ॥

भूत इत्येव । छन्दसि विषये धातोर्लिट् प्रत्ययो भवति । अहं सूर्यमुभयतो ददर्श । अहं द्यावापृथिवी आततान । ननु च छन्दसि लुङ्लङ्लिट इति सामान्येन लिङ्विहित एव । धातुसंबन्धे स विधिरयं त्वविशेषेण ॥

लिटः कानज्वा ॥ १०६ ॥

छन्दसि लिटः कानजादेशो भवति वा । अग्निं चिक्यानः । सोमं सुषुवाणः । वरुणं सुषुवाणः । न च भवति । अहं सूर्यमुभयतो ददर्श । अहं द्यावापृथिवी आततान । लिङ्ग्रहणं किम् । न पूर्वस्यैव प्रकृतस्यादेशविधाने विभक्तिविपरिणामो भविष्यति । लिण्मात्रस्य यथा स्यात् । योपि परोक्षे विहितस्तस्याप्ययमादेशो भवति ॥

क्वसुश्च ॥ १०७ ॥

छन्दसि लिटः क्वसुरादेशो भवति । जक्षिवान् । पपिवान् । न च भवति । अहं सूर्यमुभयतो ददर्श । योगविभाग उत्तरार्थः ॥

भाषायां सदवसश्रुवः ॥ १०८ ॥

सद वस श्रु इत्येतेभ्यः परस्य लिटो भाषायां विषये वा क्वसुरादेशो भवति । आदेशविधानादेव लिडपि तद्विषयेनुमीयते । उपसेदिवान् कौत्सः पाणिनिम् । तेन मुक्ते यथाप्राप्तं प्रत्यया भवन्ति । उपासदत् । उपासीदत् । उपससाद । अनूषिवान्कौत्सः पाणिनिम् । अन्ववात्सीत् । अन्ववसत् । अनूवास । उपशुश्रुवान्कौत्सः पाणिनिम् । उपाश्रौषीत् । उपाशृणोत् । उपशुश्राव । लुङ्लिङ्विषये परस्तादनुवृत्तेः क्वसुर्भवति ॥

उपेयिवाननाश्वाननूचानश्च ॥ १०९ ॥

उपेयिवान् अनाश्वान् अनूचान इत्येते शब्दा निपात्यन्ते । उपपूर्वादिणः क्वसुः, द्विर्वचनमभ्यासदीर्घत्वं तत्सामर्थ्यादेकादेशप्रतिबन्धः, तत्र वस्वेकाजाद्घसामित्यनेकाच्त्वादिगन प्राप्नोति स निपात्यते, अभ्यासस्य श्रवणं धातुरूपस्य यणादेशः । उपेयिवान् । क्रादिनियमात्प्राप्तश्च वस्वेकाजाद्घसामिति प्रतिषिद्धः स पुनरिट् प्रतिप्रसूयते, तेनाजादौ न भवति । उपेयुषः । उपेयुषा । न चात्रोपसर्गोस्तन्त्रं, अन्योपसर्गपूर्वात्रिरुपसर्गाच्च भवत्येव । समीयिवान् । ईयिवान् । वा वचनानुवृत्तेश्च पूर्ववल्लुङादयोपि भवन्ति । उपागात् । उपैत् । उपेयाय । अश्नातेर्नञ्पूर्वात् क्वसुर्निपात्यते, दृढभावश्च । अनाश्वान् । नाशीत् । नाशनात् । नाश । वचेरनुपूर्वात्कर्त्तरि क्वानञ्निपात्यते । अनूचानः । अन्ववोचत् । अन्वब्रवीत् । अनूवाच ॥

लुङ् ॥ ११० ॥

भूतइत्येव । भूतेर्थे वर्त्तमानाद् धातो र्लुङ्प्रत्ययो भवति । अकार्षीत् । अहार्षीत् ॥ वसतेर्लुङ् रात्रिविशेषे जागरणसंततौ वक्तव्यः ॥ * ॥ भवानुषितः । अहमत्रावात्सम् ॥

अनद्यतने लङ् ॥ १११ ॥

भूतइत्येव । अनद्यतनइति बहुव्रीहिनिर्देशः । अविद्यमानाद्यतने भूतेर्थे वर्त्तमानाद्धातोर्लङ् प्रत्ययो भवति । अकरोत् । अहरत् । बहुव्रीहिनिर्देशः किमर्थः । अद्य ह्यो वा अभुनक्त्रहीति व्यामिश्रे मा भूत् ॥ परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये लङुक्तव्यः ॥ * ॥ अरुणद्यवनः साकेतम् । अरुणद्यवनो माध्यमिकानिति ॥

अभिज्ञावचने लृट् ॥ ११२ ॥

अभिज्ञा स्मृतिस्तद्वचनउपपदे भूतानद्यतने लृट् प्रत्ययो भवति । लङोपवादः । अभिजानासि देवदत्त काश्मीरेषु वत्स्यामः । वचनग्रहणं पर्यायार्थम् । अभिजानासि स्मरसि बुध्यसे चेतयसइति ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न यदि ॥ ११३ ॥

यच्छब्दसहिते ऽभिज्ञावचनउपपदे लट्प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । अभिजानासि देवदत्त यत्कश्मीरेष्ववसाम । वासमात्रं स्मर्यते । नत्वपरं किं चिल्लक्ष्यते । तेन उत्तरसूत्रस्य नायं विषयः ॥

विभाषा साकाङ्क्षे ॥ ११४ ॥

यदिति नानुवर्त्तते । उभयत्र विभाषेयम् । अभिज्ञावचनउपपदे यच्छब्दसहिते केवले च विभाषा लट् प्रत्ययो भवति साकाङ्क्षश्चेत्प्रयोक्ता । लक्ष्यलक्षणयोः संबन्धे प्रयोक्तुराकाङ्क्षा भवति । अभिजानासि देवदत्त कश्मीरेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे । अभिजानासि देवदत्त मगधेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे । यदि खल्वपि । अभिजानासि देवदत्त यत्कश्मीरेषु वत्स्यामः, यत्तत्रौदनं भोक्ष्यामहे । अभिजानासि देवदत्त यत्कश्मीरेष्ववसाम, यत्तत्रौदनमभुञ्ज्महि । वासो लक्षणं, भोजनं लक्ष्यम् ॥

परोक्षे लिट् ॥ ११५ ॥

भूतानद्यतनइति वर्त्तते । तस्य विशेषणं परोक्षग्रहणम् । भूतानद्यतनपरोक्षेर्थे वर्तमानाद्धातोर्लिट् प्रत्ययो भवति । ननु धात्वर्थः सर्वः परोक्ष एव । सत्यमेतत् । अस्ति तु लोके धात्वर्थेनापि कारकेषु प्रत्यक्षाभिमानः, स यत्र नास्ति तत्परोक्षमित्युच्यते । चकार । जहार । उत्तमविषयेपि चित्तव्यावेषात् परोक्षता संभवत्येव । तद्यथा । सुप्तोहं किल विललाप ॥ अत्यन्तापह्नवे च लिट्वक्तव्यः ॥ * ॥ कलिङ्गेषु स्थितोसि, नाहं कलिङ्गं जगाम । दक्षिणापथं प्रविष्टोसि, नाहं दक्षिणापथं प्रविवेश ॥

ह्यश्वतोर्लङ् च ॥ ११६ ॥

भूतानद्यतनपरोक्षे ऽर्थे लिटि प्राप्ते ह्यश्वतोरुपपदयोर्लङ् प्रत्ययो भवति । चकाराल्लिट् च । इति ह्याकरोत् । इति ह चकार । श्वदकरोत् । श्वश्चक्रार ॥

प्रश्ने चासन्नकाले ॥ ११७ ॥

भूतानद्यतनपरोक्षइति वर्त्तते । तस्य विशेषणमेतत् । प्रष्टव्यः प्रश्नः । आसन्नकाले पृच्छ्यमाने भूतानद्यतनपरोक्षेर्थे वर्त्तमानाद्धातोर्लङ्लिटौ प्रत्ययौ भवतः । कश्चित्कं चित्पृच्छति । अगच्छद्देवदत्तः । जगाम देवदत्तः । अयजद् देवदत्तः । इयाज देवदत्तः । प्रश्नइति किम् । जगाम देवदत्तः । आसन्नकालइति किम् । भवन्तं पृच्छामि, जघान कंसं किल वासुदेवः ॥

लट् स्मे ॥ ११८ ॥

भूतानद्यतनपरोक्षइति वर्त्तते । स्मशब्दउपपदे भूतानद्यतनपरोक्षे लट् प्रत्ययो भवति । लिटोपवादः । नलेन स्म पुराधीयते । ऊर्णया स्म पुराधीयते ॥

अपरोक्षे च ॥ ११९ ॥

अपरोक्षे च भूतानद्यतनेर्थे वर्तमानाद्धातोः स्मउपपदे लट् प्रत्ययो भवति । एवं स्म पिता ब्रवीति । इति स्मोपाध्यायः कथयति ॥

ननौ पृष्टप्रतिवचने ॥ १२० ॥

अनद्यतने परोक्षइति निवृत्तम् । भूतसामान्ये विधिरयम् । ननुशब्दउपपदे प्रश्नपूर्वके प्रतिवचने भूतेर्थे लट् प्रत्ययो भवति । लुङोपवादः । अकार्षीः कटं देवदत्त, ननु करोमि भोः । अवोचस्त्वं किं चिद्देवदत्त, ननु ब्रवीमि भोः । पृष्टप्रतिवचनइति किम् । नन्वकार्षीन्माणवकः ॥

नन्वोर्विभाषा ॥ १२१ ॥

भूतइत्येव । नशब्दे नुशब्दे चोपपदे पृष्टप्रतिवचने विभाषा लट् प्रत्ययो भवति भूते । अकार्षीः कटं देवदत्त, न करोमि भोः । नाकार्षम् । अहं नु करोमि । अहं न्वकार्षम् ॥

पुरि लुङ्वास्मे ॥ १२२ ॥

अनद्यतनग्रहणमिह मण्डूकप्लुत्यानुवर्त्तते । पुराशब्दउपपदे स्मशब्दवर्जिते भूतानद्यतनेर्थे विभाषा लुङ् प्रत्ययो भवति लट् च । ताभ्यां मुक्ते पक्षे यथाविषयमन्येपि प्रत्यया भवन्ति । वसन्तीह पुरा छात्राः । अवात्सुः पुरा छात्राः । अवसन्निह पुरा छात्राः । ऊषुरिह पुरा छात्राः । अस्मदिति किम् । नलेन स्म पुराधीयते ॥

वर्त्तमाने लट् ॥ १२३ ॥

आरब्धो ऽपरिसमाप्तश्च वर्त्तमानः, तस्मिन्वर्त्तमानेर्थे वर्त्तमानाद्धातोः लट् प्रत्ययो भवति । पचति । पठति ॥

लटः शतृशानचावप्रथमासमानाधिकरणे ॥ १२४ ॥

लटः शतृशानचावित्येतावादेशौ भवतः, अप्रथमान्तेन चेत्तस्य सामानाधिकरण्यं भवति । पचन्तं देवदत्तं पश्य । पचमानं देवदत्तं पश्य । पचता कृतम् । पचमानेन कृतम् । अप्रथमासमानाधिकरणे इति किम् । देवदत्तः पचति । लडिति वर्तमाने पुनर्लङ्ग्रहणमधिकविधानार्थम् । क्व चित् प्रथमासमानाधिकरणेपि भवति । सन्ब्राह्मणः । अस्ति ब्राह्मणः । विद्यते ब्राह्मणः । विद्यमानो ब्राह्मणः । जुहुत् । जुहोति । अधीयानः । अधीते ॥ आङ्याक्रोशे ॥ * ॥ मा पचन् । मा पचमानः । के चिद्विभाषाग्रहणमनुवर्त्तयन्ति नन्वोर्विभाषेति । सा च व्यवस्थिता । तत्र यथादर्शनं प्रयोगा नेतव्याः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संबोधने च ॥ १२५ ॥

प्रथमासमानाधिकरणार्थ आरम्भः। संबोधने च विषये लटः शतृशानचौ प्रत्ययौ भवतः। हे पचन्। हे पचमान ॥

लक्षणहेत्वोः क्रियायाः ॥ १२६ ॥

लक्ष्यते चिह्न्यते येन तल्लक्षणम्। जनको हेतुः। धात्वर्थविशेषणं चैतत्। लक्षणे हेतौ चार्थे वर्त्तमानाद्धातोः परस्य लटः शतृशानचावादेशौ भवतः। तौ चेल्लक्षणहेतू क्रियाविषयौ भवतः। लक्षणे। शयाना भुञ्जते यवनाः। तिष्ठन्तोनुशासति गणकाः। हेतौ। अर्जयन्वसति। अधीयानो वसति। लक्षणहेत्वोरिति किम्। पचति। पठति। क्रियाया इति किम्। द्रव्यगुणयोर्मा भूत्। यः कम्पते सोश्वत्थः। यदुत्प्लवते तल्लघु। यन्निषीदति तद्गुरु। लक्षणहेत्वोरिति निर्द्देशः पूर्वनिपातव्यभिचारचिह्नम् ॥

तौ सत् ॥ १२७ ॥

तौ शतृशानचौ सत्संज्ञौ भवतः। तौ ग्रहणमुपाध्यसंसर्गार्थम्। शतृशानज्मात्रस्य संज्ञा भवति। ब्राह्मणस्य कुर्वन्। ब्राह्मणस्य कुर्वाणः। ब्राह्मणस्य करिष्यन्। ब्राह्मणस्य करिष्यमाणः। सत्प्रदेशाः पूरणगुणसुहितार्थसदव्ययतव्येत्येवमादयः ॥

पूङ्यजोः शानन् ॥ १२८ ॥

पूङो यजेश्च धातोः शानन् प्रत्ययो भवति। पवमानः। यजमानः। यदि प्रत्ययाः शानन्नादयो न लादेशाः, कथं सोमं पवमानो नडमाघ्नान इति षष्ठीप्रतिषेधः। तृन्निति प्रत्याहारनिर्द्देशात्। क्व संनिविष्टानां प्रत्याहारः। लटः शतृ इत्यतः प्रभृति आ तृनो नकारात् ॥ द्विषः शतुर्वा वचनम् ॥ * ॥ चोरस्य द्विषन्। चोरं द्विषन् ॥

ताच्छील्यवयोवचनशक्तिषु चानश् ॥ १२९ ॥

ताच्छील्यं तत्स्वभावता। वयः शरीरावस्था यौवनादिः। शक्तिः सामर्थ्यम्। ताच्छील्यादिषु धातोश्चानश् प्रत्ययो भवति। ताच्छील्ये तावत्। कतीह मुण्डयमानाः। कतीह भूषयमाणाः। वयोवचने। कतीह कवचं पर्यस्यमानाः। कतीह शिखण्डं वहमानाः। शक्तौ। कतीह निघ्नानाः। कतीह पचमानाः ॥

इङ्धार्योः शत्रकृच्छ्रिणि ॥ १३० ॥

इङो धारेश्च धात्वोः शतृप्रत्ययो भवति अकृच्छ्रिणि कर्त्तरि। अकृच्छ्रः सुखसाध्यो यस्य कर्तुर्धात्वर्थः सो ऽकृच्छ्री। अधीयन् पारायणम्। धारयन्नुपनिषदम्। अकृच्छ्रिणीति किम्। कृच्छ्रेणाधीते। कृच्छ्रेण धारयति ॥

द्विषो ऽमित्रे ॥ १३१ ॥

अमित्रः शत्रुः। अमित्रे कर्त्तरि द्विषेर्द्धातोः शतृप्रत्ययो भवति। द्विषन्। द्विषन्तौ। द्विषन्तः। अमित्रइति किम्। द्वेष्टि भार्या पतिम्।

सुञो यज्ञसंयोगे ॥ १३२ ॥

यज्ञेन संयोगो यज्ञसंयोगः। यज्ञसंयुक्ते ऽभिषवे वर्त्तमानात्सुनोतेर्द्धातोः शतृप्रत्ययो भवति। सर्वे सुन्वन्तः। सर्वे यजमानाः सत्रिण उच्यन्ते। संयोगग्रहणं प्रधानकर्तृप्रतिपत्त्यर्थम्। याजकेषु मा भूत्। यज्ञसंयोगइति किम्। सुनोति सुराम् ॥

अर्हः प्रशंसायाम् ॥ १३३ ॥

प्रशंसा स्तुतिः। अर्हतेर्द्धातोः प्रशंसायां शतृप्रत्ययो भवति। अर्हन्निह भवान्विद्याम्। अर्हन्निह भवान्पूजाम्। प्रशंसायामिति किम्। अर्हति चोरो वधम् ॥

आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ १३४ ॥

भ्राजभासेति क्विपं वक्ष्यति। आ एतस्मात् क्विप्संशब्दाद्यानित ऊर्द्ध्वमनुक्रमिष्यामस्तच्छीलादिषु कर्तृषु ते वेदितव्याः। अभिविधौ चायमाङ्। तेन क्विपोप्ययमर्थनिर्द्देशः। तदिति धात्वर्थः शीलादिविशेषणत्वेन निर्द्दिश्यते। तच्छीलो यः स्वभावतः फलनिरपेक्षस्तत्र प्रवर्त्तते। तद्धर्मा तदाचारः, यः स्वधर्मे ममायमिति प्रवर्त्तते विनापि शीलेन। तत्साधुकारी यो धात्वर्थं साधु करोति। उत्तरत्रैवोदाहरिष्यामः ॥

तृन् ॥ १३५ ॥

सर्वधातुभ्यस्तृन्प्रत्ययो भवति तच्छीलादिषु कर्तृषु। तकारः स्वरार्थः। तच्छीले तावत्। कर्ता कटान्। वदिता जनापवादान्। तद्धर्मणि। मुण्डयितारः श्राविष्ठायना भवन्ति वधूमूढाम्। अन्नमपहर्त्तार आह्वरका भवन्ति श्राद्धे सिद्धे। उन्नेतारस्तौल्वलायना भवन्ति पुत्रे जाते। तत्साधुकारिणि। कर्त्ता कटम्। गन्ता खेटम् ॥ तृन्विधावृत्विक्षु चानुपसर्गस्य ॥ * ॥ होता। पोता। अनुपसर्गस्येति किम्। उद्गाता। प्रतिहर्ता। तृजेव भवति। स्वरे विशेषः ॥ नयतेः षुक् च ॥ * ॥ नेष्टा ॥ त्विषेर्द्देवतायामकारश्चोपधाया अनिट्त्वं च ॥ * ॥ त्वष्टा ॥ क्षदेश्च नियुक्ते ॥ * ॥ क्षत्ता। क्व चिदधिकृत उच्यते ॥ छन्दसि तृच्च ॥ * ॥ क्षत्तृभ्यः संग्रहीतृभ्यः। स्वरे विशेषः ॥

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥ १३६ ॥

अलंकृञादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु इष्णुच्प्रत्य-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यो भवति । अलंकरिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्त्तिष्णुः । वर्द्धिष्णुः । सहिष्णुः । चरिष्णुः ॥ अलंकृञो मण्डनार्थाद्युचः पूर्वविप्रतिषेधेनेष्णुच्वक्तव्यः ॥ * ॥ *

णेश्छन्दसि ॥ १३७ ॥

ण्यन्ताद्धातोश्छन्दसि विषये तच्छीलादिषु कर्तृषु इष्णुच्प्रत्ययो भवति । दृषदं धारयिष्णवः । वीरुधः पारयिष्णवः ॥

भुवश्च ॥ १३८ ॥

भवतेर्धातोश्छन्दसि विषये तच्छीलादिष्विष्णुच प्रत्ययो भवति । भविष्णुः । योगविभाग उत्तरार्थः । चकारोनुक्तसमुच्चयार्थः । भ्राजिष्णुना लोहितचन्दनेन ॥

ग्लाजिस्थश्च क्नुः ॥ १३९ ॥

छन्दसीति निवृतं,ग्ला जि स्था इत्येतेभ्यो धातुभ्यश्चकाराद्भुवश्च तच्छीलादिषु क्नुः प्रत्ययो भवति । ग्लास्नुः । जिष्णुः । स्थास्नुः । भूष्णुः । गिच्चायं प्रत्ययो न कित् । तेन स्थ ईकारो न भवति । कृकिृति चेत्यत्र गकारोपि चर्त्वभूतो निर्द्दिश्यते । तेन गुणो न भवति । श्युकः कितीत्यत्रापि गकारो निर्द्दिश्यते । तेन भुव इड् न भवति ॥

क्नोर्गित्त्वाच्च स्थ ईकारः किन्ङितोरीत्वशासनात् ।
गुणाभावस्त्रिषु स्मार्यः श्युकोनिट्त्वं गकोरितोः ॥

दंशेश्छन्दस्युपसंख्यानम् ॥ * ॥ दंश्नवः पशवः ॥

वसिगृधिधृषिक्षिपेः क्नुः ॥ १४० ॥

वसादिभ्यो धातुभ्यस्तच्छीलादिषु क्नुः प्रत्ययो भवति । वस्नुः । ग्रन्थुः । धृष्णुः । क्षिप्नुः ॥

शमित्यष्टाभ्यो घिनुण् ॥ १४१ ॥

इतिशब्द आद्यर्थे । शमादिभ्यो धातुभ्यो ऽष्टाभ्यस्तच्छीलादिषु घिनुण् प्रत्ययो भवति । शम उपशमे इत्यतः प्रभृति मदी हर्षइत्येवमन्तः शमादिर्द्वंद्वाद्यन्तर्गणः । घकार उत्तरत्र कुत्वार्थः । उकार उच्चारणार्थः । णकारो वृद्ध्यर्थः । शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । प्रमादी । उन्मादी । अष्टाभ्य इति किम् । असिता ॥

संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ॥ १४२ ॥

घिनुणनुवर्त्तते । संपृचादिभ्यो धातुभ्यो घिनुण् भवति तच्छीलादिषु । पृची संपर्के इति रुधादिर्गृह्यते न त्वदादि-

* इदं वचनं पुस्तकेषु नोपलभ्यते ।

लुंग्विकरणत्वात् । परिदेविभ्यांदिर्गृह्यते देवृ देवनइति । हिप प्रेरणे दिवादिस्तुदादिश्च सामान्येन गृह्यते । युज समाधौ दिवादिः । युजिर् योगे रुधादिः । द्वयोरपि ग्रहणम् । रञ्ज रागइत्यस्य निपातनादनुनासिकलोपः । संपर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ॥

वा कषलसकत्थअम्भः ॥ १४३ ॥

कष हिंसार्थः । लस श्लेषणक्रीडनयोः । कत्थ श्लाघायाम् । ष्टम्भु विश्वासे । एतेभ्यो धातुभ्यो विशब्दउपपदे घिनुण् प्रत्ययो भवति । कष । विकाषी । विलासी । विकत्थी । विष्टम्भी ॥

अपे च लषः ॥ १४४ ॥

लष कान्तौ । अस्माद्धातोः अपउपपदे चकाराद्वौ च घिनुण् भवति । अपलाषी । विलाषी ॥

प्रे लपस्तृह्रुमथवदवसः ॥ १४५ ॥

प्रउपपदे लपादिभ्यो घिनुण् भवति । प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । प्रवासी । वस इति वस निवासइत्यस्य ग्रहणं नाच्छादनार्थस्य, लुंग्विकरणत्वात् ॥

निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ॥ १४६ ॥

निन्दादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु वुञ् प्रत्ययो भवति । पञ्चम्यर्थे प्रथमा । क्लिश उपतापे । क्लिश विबाधने । द्वयोरपि ग्रहणम् । निन्दकः । हिंसकः । क्लेशकः । खादकः । विनाशकः । परिक्षेपकः । परिराटकः । परिवादकः । व्याभाषकः । असूयकः । ण्वुलेव सिद्धे वुञ्विधानं ज्ञापनार्थं ताच्छीलिकेषु वासरूपन्यायेन तृजादयो न भवन्तीति ॥

देविक्रुशोश्चोपसर्गे ॥ १४७ ॥

देवयतेः क्रुशेश्चोपसर्गे उपपदे वुञ्प्रत्ययो भवति । आदेवकः । परिदेवकः । आक्रोशकः । परिक्रोशकः । उपसर्गइति किम् । देवयिता । क्रोष्टा ॥

चलनशब्दार्थादकर्मकाद्युच् ॥ १४८ ॥

चलनार्थेभ्यः शब्दार्थेभ्यश्चाकर्मकेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु युच् प्रत्ययो भवति । चलनः । चोपनः । शब्दार्थेभ्यः । शब्दनः । रवणः । अकर्मकादिति किम् । पठिता विद्याम् ॥

अनुदात्तेतश्च हलादेः ॥ १४९ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनुदात्तेद्भ्यो धातुः हलादिरकर्मकः ततश्च युच् प्रत्ययो भवति । वर्त्तनः । वर्द्धनः । अनुदात्तेत इति किम् । भविता । हलादेरिति किम् । एधिता । आदियहणं किम् । जुगुप्सनः । मीमांसनः । अकर्मकादित्येव । वसिता वस्त्रम् ॥

जुचङ्क्रम्यदन्द्रम्यस्तृगृधिज्वलशुचलषपतपदः ॥ १५० ॥

जुप्रभृतिभ्यो धातुभ्यो युच् प्रत्ययो भवति तच्छीलादिषु कर्तृषु । जु इति सौत्रो धातुः । जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । गर्द्धनः । ज्वलनः । शोचनः । लषणः । पतनः । पदनः । चलनार्थानां पदेश्च यहणं सकर्मकार्थमिह । ज्ञापनार्थं च पदियहणमन्ये वर्णयन्ति । ताच्छीलिकेषु मिथो वासरूपविधिर्नास्तीति । तेनालंकृञस्तृच भवत्यलंकर्त्तेति । तथाहि । पदेरकृञा विशेषविहितेन सामान्यविहितस्य युचो ऽसरूपत्वात्समावेशो भवेदेव किमनेन विधानेन । ज्ञापनार्थं पुनर्विधीयते । प्रायिकं चैतत् ज्ञापकम् । क्व वित्समावेश दृष्यतएव । गन्ता खेटं विकत्थनः ॥

क्रुधमण्डार्थेभ्यश्च ॥ १५१ ॥

क्रुध कोपे । मडि भूषायाम् । इत्येतदर्थेभ्यश्च धातुभ्यो युच् प्रत्ययो भवति । क्रोधनः । रोषणः । मण्डनः । भूषणः ॥

न यः ॥ १५२ ॥

यकारान्ताद्धातोर्युच् प्रत्ययो न भवति । पूर्वेण प्राप्तः प्रतिषिध्यते । क्रूयिता । ह्मायिता ॥

सूददीपदीक्षश्च ॥ १५३ ॥

सूद दीप दीक्ष इत्येतेभ्यश्च युच्प्रत्ययो भवति । अनुदात्तेत्त्वात्प्राप्तः प्रतिषिध्यते । सूदिता । दीपिता । दीक्षिता । ननु च दीपेर्विशेषविहितो रप्रत्ययो दृश्यते नमिकम्पिस्म्यजसकमहिंसदीपो र इति स एव बाधको भविष्यति किं प्रतिषेधेन । वासरूपेण युजपि प्राप्नोति । ताच्छीलिकेषु च वासरूपविधिर्नास्तीति प्रायिकमेतद् इत्युक्तम् । तथा च समावेशो दृश्यते । कम्रा युवतिः । कमना युवतिः । कम्या शाखा । कम्यना शाखेति । सूदेर्युचि प्रतिषिद्धे कथं मधुसूदनो रिपुसूदन इति । अनित्योयं प्रतिषेध इति योगविभागाद्वुञायते । अथ वा मधुसूदनादयो नन्द्यादिषु द्रष्टव्यन्ते । कृत्यल्युटो बहुलमिति ल्युडन्तो वा * ॥

लषपतपदस्थाभूषहनकमगमशृभ्य उकञ् ॥ १५४ ॥

लषादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु उकञ् प्रत्ययो भवति । अपलाषुकं वृषलसंगतम् । प्रपातुका गर्भा भवन्ति । उपपादुकं सत्त्वम् । उपस्थापुका एनं पशवो भवन्ति । प्रभावुकमत्वं भवति । प्रवर्षुकाः पर्जन्याः । आघातुकं कापालिकस्य शूलम् । कामुका एनं स्त्रियो भवन्ति । आगामुकं वाराणसीं रत्न आहुः । किंशारुकं तीक्ष्णमाहुः ॥

जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥ १५५ ॥

जल्पादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु षाकन् प्रत्ययो भवति । षकारो ङीषर्थः । जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । वराकी ॥

प्रजोरिनिः ॥ १५६ ॥

प्रपूर्वाज्जयतेः तच्छीलादिषु कर्तृषु इनिप्रत्ययो भवति । प्रजयी । प्रजयिनौ ॥

जिदृक्षिविश्रीङ्खमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ॥ १५७ ॥

जि जये । दृङ् आदरे । क्षि क्षये, क्षि निवासगत्योरिति द्वयोरपि यहणम् । प्रसू इति षू प्रेरणइत्यस्य यहणम् । जिप्रभृतिभ्यो धातुभ्य इनिप्रत्ययो भवति तच्छीलादिषु कर्तृषु । जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्ययी । अभ्यमी । परिभवी । प्रसवी ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ॥ १५८ ॥

स्पृह ईप्सायाम् । गृह यहणे । पत गतौ । चुरादावदन्ताः पठ्यन्ते । दय दानगतिरक्षणेषु । द्रा कुत्सायां गतौ, निपूर्वस्तत्पूर्वश्च, तदो नकारान्तता च निपात्यते । दुधाञ् अत्पूर्वः । एतेभ्यस्तच्छीलादिषु कर्तृषु आलुच् प्रत्ययो भवति । स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तन्द्रालुः । श्रद्धालुः ॥ आलुचि शीङो यहणं कर्तव्यम् ॥ * ॥ शयालुः ॥

दाधेट्सिशदसदो रुः ॥ १५९ ॥

दा धेट् सि शद सद इत्येतेभ्यो रुप्रत्ययो भवति । दारुः । धारुर्वत्सो मातरम् । न लोकाव्ययेत्युकारश्लेषात् षष्ठी न भवति । सेरुः । शद्रुः । सद्रुः ॥

सृघस्यदः क्मरच् ॥ १६० ॥

सृ घसि अद इत्येतेभ्यो धातुभ्यः तच्छीलादिषु कर्तृषु क्मरच् प्रत्ययो भवति । सृमरः । घस्मरः । अद्मरः ॥

भञ्जभासमिदो घुरच् ॥ १६१ ॥

भञ्ज भास मिद इत्येतेभ्यो घुरच् प्रत्ययो भवति तच्छीलादिषु कर्तृषु । भङ्गुरं काष्ठम् । घित्वात्कुत्त्वम् । भासुरं ज्योतिः । मेदुरः पशुः । भञ्जेः कर्मकर्त्तरि प्रत्ययः स्वभावात् ॥

विदिभिदिच्छिदेः कुरच् ॥ १६२ ॥

* कृत्येत्यारभ्य वेत्यन्तः पाठो बहुषु पुस्तकेषु नोपलभ्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्ञानार्थस्य विदेर्ग्रहणं न लाभाद्यर्थस्य स्वभावात् । विदादिभ्यो धातुभ्यः तच्छीलादिषु कर्तृषु कुरच् प्रत्ययो भवति । विदुरः पण्डितः । भिदुरं काष्ठम् । छिदुरा रज्जुः । भिदिच्छिद्योः कर्मकर्त्तरि प्रयोगः ॥ व्यधेः संप्रसारणं कुरच्च वक्तव्यः ॥ * ॥ विधुरः * ॥

दृणनशिजिसर्त्तिभ्यः क्करप् ॥ १६३ ॥

दृण् नश् जि सर्त्ति इत्येतेभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु क्करप् प्रत्ययो भवति । पकारस्तुगर्थः । दृत्वरः । दृत्वरी । नश्वरः । नश्वरी । जित्वरः । जित्वरी । सृत्वरः । सृत्वरी । नेड्वशि कृतीतीट्प्रतिषेधः ॥

गत्वरश्च ॥ १६४ ॥

गत्वर इति निपात्यते । गमेरनुनासिकलोपः क्करप् प्रत्ययश्च । गत्वरः । गत्वरी ॥

जागुरूकः ॥ १६५ ॥

जागर्त्तेरूकप्रत्ययो भवति तच्छीलादिषु कर्तृषु । जागरूकः ॥

यजजपदशां यङः ॥ १६६ ॥

यजादीनां यङन्तानामूकप्रत्ययो भवति तच्छीलादिषु कर्तृषु । यायजूकः । जञ्जपूकः । दन्दशूकः ॥

नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥ १६७ ॥

नम्यादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु रप्रत्ययो भवति । नम्रं काष्ठम् । कम्रा शाखा । स्मेरं मुखम् । अजस्रं जुहोति । कम्रा युवतिः । हिंस्रं रक्षः । दीप्रं काष्ठम् । अजस्रमिति जसु मोक्षणे नञ्पूर्वो रप्रत्ययान्तः क्रियासातत्ये वर्त्तते ॥

सनाशंसभिक्ष उः ॥ १६८ ॥

सनिति सन्प्रत्ययान्तो गृह्यते । न सनिर्द्धातुः । अनभिधानात्, व्याप्तिन्यायाद्वा । सन्तेभ्यो धातुभ्य आशंसेर्भक्षेश्च तच्छीलादिषु कर्तृषु उप्रत्ययो भवति । चिकीर्षुः । जिहीर्षुः । आशंसुः । भिक्षुः । आङः शसि इच्छायामित्यस्य ग्रहणं, न शंसेः स्तुत्यर्थस्य ॥

विन्दुरिच्छुः ॥ १६९ ॥

विदेर्नुमागम इषेश्छत्वमुकारश्च प्रत्ययो निपात्यते तच्छीलादिषु कर्तृषु । वेदनशीलो विन्दुः । एषणशील इच्छुः ॥

क्याच्छन्दसि ॥ १७० ॥

क्य इति क्यच्क्यङ्क्यषां सामान्येन ग्रहणम् । क्यप्रत्ययान्ताद्धातोश्छन्दसि विषये तच्छीलादिषु कर्तृषु उकारप्रत्ययो भवति । मित्र्युः । संस्वेद्युः । सुम्र्युः । छन्दसीति किम् । मित्रीयिता । न छन्दस्यपुत्रस्येति प्रतिषेधाच्च दीर्घः † ॥

आदृगमहनजनः किकिनौ लिट् च ॥ १७१ ॥

आकारान्तेभ्य ऋवर्णान्तेभ्यश्च गम हन जन इत्येतेभ्यश्छन्दसि विषये तच्छीलादिषु किकिनौ प्रत्ययौ भवतः । लिड्वच्च तौ भवतः । आदिति तकारो मुखसुखार्थः, न त्वयं तपरो, मा भूत्तादपि परस्तपर इति ऋकारे तत्कालग्रहणम् । पपिः सोमं ददिर्गाः । मित्रावरुणौ ततुरिः । दूरे ह्यध्वा जगुरिः । जग्मिर्युवा । जघ्निर्वृत्रम् । जज्ञिर्बीजम् । अथ किमर्थं कित्त्वम् । यावता असंयोगाल्लिट् किदिति कित्त्वं सिद्धमेव । ऋच्छत्यृतामिति लिटि गुणः प्रतिषेधविषयश्चारभ्यते तस्यापि बाधनार्थं कित्त्वम् ॥ किकिनावुत्सर्गश्छन्दसि सदादिभ्यो दर्शनात् ॥ * ॥ सेदिः । नेमिः ॥ भाषायां धाञ्क्रञ्सृजनिगमिनमिभ्यः किकिनौ वक्तव्यौ ॥ * ॥ दधिः । चक्रिः । सस्रिः । जक्षिः । जग्मिः । नेमिः ॥ सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ वक्तव्यौ ॥ * ॥ दीर्घाकितः । सासहिः । वावहिः । चाचलिः । पापतिः ॥

स्वपितृषोर्नजिङ् ॥ १७२ ॥

छन्दसीति निवृत्तम् । स्वपेस्तृषेश्च तच्छीलादिषु कर्तृषु नजिङ्प्रत्ययो भवति । स्वप् । स्वप्नक् । तृष्णक् ॥ धृषेश्चेति वक्तव्यम् ॥ * ॥ धृष्णक् ॥

शृवन्द्योरारुः ॥ १७३ ॥

शृ हिंसायाम् । वदि अभिवादनस्तुत्योः । एताभ्यां धातुभ्यां तच्छीलादिषु कर्तृष्वारुप्रत्ययो भवति । शरारुः । वन्दारुः ॥

भियः क्रुक्लुकनौ ॥ १७४ ॥

भि भीभये । अस्माद्धातोः तच्छीलादिषु कर्तृषु क्रुक्लुकनौ प्रत्ययौ भवतः । भीरुः । भीलुकः ॥ क्रुञ्चपि वक्तव्यः ॥ * ॥ भीरुकः ॥

स्थेशभासपिसकसो वरच् ॥ १७५ ॥

ष्ठा गतिनिवृत्तौ । ईश ऐश्वर्ये । भास दीप्तौ । पिस पेस गतौ । कस गतौ । एतेभ्यस्तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति । स्थावरः । ईश्वरः । पेस्वरः । विकस्वरः ॥

यश्च यङः ॥ १७६ ॥

या प्रापणे । अस्माद्यङन्तात्तच्छीलादिषु कर्तृषु वरच् प्रत्ययो भवति । यायावरः ।

भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् ॥ १७७ ॥

भ्राजादिभ्यो धातुभ्यस्तच्छीलादिषु कर्तृषु क्विप्प्रत्ययो भवति । विभ्राट् । विभ्राजौ । विभ्राजः । भाः । भासौ । भासः । धूः । धुरौ । धुरः । विद्युत् । विद्युतौ । विद्युतः । ऊक् । ऊर्जौ ।

* व्यधेरित्यारभ्य विधुर इत्यन्तः पाठो बहुषु पुस्तकेषु नोपलभ्यते ।

† छन्दसीत्यारभ्य दीर्घ इत्येतत्पर्यन्तं पुस्तकान्तरे न विद्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उर्जः । पूः । पुरौ । पुरः । जवतेर्दीर्घश्च निपात्यते * । जूः । जुवौ । जुवः । ग्रावस्तुत् । ग्रावस्तुतौ । ग्रावस्तुतः । किमर्थमिदमुच्यते, यावता ऽन्येभ्योपि दृश्यन्ते क्विप् चेति क्विप्सिद्ध एव । ताच्छीलिकैर्बाध्यते । वासरूपविधिर्नास्तीत्युक्तम् । अथ तु प्रायिकमेतत् । ततस्तस्यैवायं प्रपञ्चः ॥

अन्येभ्योपि दृश्यते ॥ १७८ ॥

अन्येभ्योपि धातुभ्यस्ताच्छीलिकेषु क्विप् प्रत्ययो दृश्यते । युक् । छित् । भित् । दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम् । क्व चिद्दीर्घः । क्व चिद्द्विर्वचनम् । क्व चित्संप्रसारणम् । क्व चिदसंप्रसारणम् । तथा चाह ॥ क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घो ऽसंप्रसारणं च ॥ * ॥ वचि । वाक् । प्रच्छि । शब्दप्राट् । आयतस्तूः । कटप्रूः । जूः । श्रीः । जुग्रहणेनात्र नार्थः । भ्राजादिसूत्रएव गृहीतत्वात् ॥ द्युतिगमिजुहोतीनां द्वे च ॥ * ॥ दिद्युत् । जगत् ॥ जुहोतेर्दीर्घश्च ॥ * ॥ जुहूः ॥ द्वृभयइत्यस्य ह्रस्वश्च द्वे च ॥ * ॥ ददृत् ॥ ध्यायतेः संप्रसारणं च ॥ * ॥ धीः ॥

भुवः संज्ञान्तरयोः ॥ १७९ ॥

† भवतेर्धातोः संज्ञायामन्तरे च गम्यमाने क्विप् प्रत्ययो भवति । विभू‡र्नाम कश्चित् । अन्तरे । प्रतिभूः । धनिकाधमर्णयोरन्तरे यस्तिष्ठति स प्रतिभूरुच्यते ॥

विप्रसंभ्यो ड्वसंज्ञायाम् ॥ १८० ॥

भुव इति वर्त्तते । वि प्र सम् इत्येवंपूर्वाद्भवतेर्धातोः डुप्रत्ययो भवति, न चेत्संज्ञा गम्यते । विभुः सर्वगतः । प्रभुः स्वामी । संभुर्जनिता । असंज्ञायामिति किम् । विभूर्नाम कश्चित् ॥ डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम् ॥ * ॥ मितं द्रवति मितद्रुः । शंभुः ॥

धः कर्मणि ष्ट्रन् ॥ १८१ ॥

धयतेर्दधातेश्च कर्मणि कारके ष्ट्रन्प्रत्ययो भवति । षकारो ङीषर्थः । धयन्ति तां दधति वा भैषज्यार्थमिति धात्री । स्तनदायिनी आमलकी चोच्यते ॥

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ॥ १८२ ॥

दाप् लवने । णीञ् प्रापणे । शसु हिंसायाम् § । यु मिश्रणे । युजिर् योगे । ष्टुञ् स्तुतौ । तुद व्यथने । षिञ् बन्धने । षिचिर् क्षरणे । मिह सेचने । पत्लृ गतौ । दंश दशने । णह बन्धने । एतेभ्यो धातुभ्यः करणे कारके ष्ट्रन्प्रत्ययो भवति । दान्त्यनेनेति दात्रम् । नेत्रम् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेड्ढ्रम् । पत्त्रम् । दंष्ट्रा । अजादित्वात् टाप् न ङीप् । दंशेरनुनासिकलोपेन निर्देशो ज्ञापनार्थः क्ङितो ऽन्यस्मिन्नपि प्रत्यये नलोपः क्व चिद्भवतीति तेन ल्युट्यपि भवति । दशनम् । नद्ध्री ॥

हलसूकरयोः पुवः ॥ १८३ ॥

पू इति पूङ्पूञोस्सामान्येन ग्रहणम् । अस्माद्धातोः करणे कारके ष्ट्रन् प्रत्ययो भवति । तच्चेत्करणं हलसूकरयोरवयवो भवति । हलस्य पोत्रम् । सूकरस्य पोत्रम् । मुखमुच्यते ॥

अर्त्तिलूधूसूखनसहचर इत्रः ॥ १८४ ॥

ऋ गतौ । लूञ् छेदने । धू विधूनने । षू प्रेरणे । खनु अवदारणे । षह मर्षणे । चर गतिभक्षणयोः । एतेभ्यो धातुभ्यः करणे कारके इत्रप्रत्ययो भवति । अरित्रम् । लवित्रम् । धवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् ॥

पुवः संज्ञायाम् ॥ १८५ ॥

पूङ्पूञोः सामान्येन ग्रहणम् । पवतेर्धातोः करणे कारके इत्रप्रत्ययो भवति समुदायेन चेत्संज्ञा गम्यते । दर्भः पवित्रम् । बर्हिष्पवित्रम् ॥

कर्त्तरि चर्षिदेवतयोः ॥ १८६ ॥

पुव इति वर्त्तते । पुवः करणे कर्त्तरि च इत्रप्रत्ययो भवति । ऋषिदेवतयोर्यथासंख्यं संबन्धः । ऋषौ करणे देवतायां कर्त्तरि । पूयते ऽनेनेति पवित्रोयमृषिः । देवतायाम् । अग्निः पवित्रं स मा पुनातु । वायुः सोमः सूर्य इन्द्रः पवित्रं ते मा पुनन्तु ॥

ञीतः क्तः ॥ १८७ ॥

ञि इद्यस्यासौ ञीत् । ञीतो धातोर्वर्त्तमाने ऽर्थे क्तप्रत्ययो भवति । भूते निष्ठा विहिता वर्तमाने न प्राप्नोतीति विधीयते । ञिमिदा स्नेहने । मिन्नः । ञिक्ष्विदा । क्ष्विण्णः । ञिधृषा । धृष्टः ॥

मतिबुद्धिपूजार्थेभ्यश्च ॥ १८८ ॥

मतिरिच्छा । बुद्धिर्ज्ञानम् । पूजासत्कारः । एतदर्थेभ्यश्च धातुभ्यो वर्त्तमानार्थे क्तप्रत्ययो भवति । राज्ञां मतः । राज्ञामिष्टः । राज्ञां बुद्धः । राज्ञां ज्ञातः । राज्ञां पूजितः । राज्ञामर्चितः । अनुक्तसमुच्चयार्थश्चकारः ।

शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि ।
रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ॥
हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ ।
कष्टं भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः ॥

---

* जवते र्दीर्घश्चेति । के चिदाहुः सूत्रे जू इति दीर्घः पठितव्य इति । विध्यन्तरोपसंग्रहार्थं दृशिग्रहणमुत्तरसूत्रादपकृष्टव्यमित्यन्ये ॥ इति पदमञ्जर्याम् ॥

† तच्छीलादिषु कर्तृष्विति निवृत्तमिति पुस्तकान्तरे दृश्यते ।

‡ मित्रभूरिति पा० ।

§ शसु हिंसायाम् । शंसु स्तुतौ च । द्वयोरपि ग्रहणमिति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कष्ट इति भविष्यति काले । अमृत इति पूर्ववत् । वर्त्तमानइत्यर्थः । तथा । सुप्तः * । शयितः । आशितः । लिप्तः । तृप्तः । इत्येवमादयोऽपि वर्त्तमाने द्रष्टव्याः ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ तृतीयस्याध्यायस्य द्वितीयः पादः ॥

* सुप्त इति पा० ।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ तृतीयस्तबकारम्भः ॥

एवं भुवमवतीर्णे नराकृतिनि परब्रह्मणि समुपागते च स्तनंधयतां पूर्वावतीर्णः स च ब्रह्मभूतो लोकः केवलं लौकिक इव लोकैर्दृश्यमानोऽपि सहावतीर्णया श्रियेव पुनरप्यलौकिको जायमानः सकलजननयनमनश्चमत्कारकारी बभूव ॥ १ ॥

तृतीये पूतनाघातः श्रीयशोदातिरोदनम् । वर्ण्यते मथुरातोऽथ नन्दस्यागमनं गृहे ॥ स च प्रसिद्धो ब्रह्मभूतः । "तासां* मध्ये साक्षाद् ब्रह्मगोपालपुरी ह्री"ति गोपालतापिनीश्रुतेः । श्रिया शोभया ॥ १ ॥

तन्मध्य एव लौकिकतापत्तौ व्रजराजे राज्ञः कंसस्य वार्षिकं गोरसादिकरमुपपादयितुं पुरपरिरक्षणार्थमाप्तमस्थविराभीरनिकरं नियोज्य नियोज्यैरेव कियद्भिर्यदुराजधानीं गतवति सति दुरात्मना तेनैव कंसाभिधेन नृशंसेन पूर्वजनुषि कालनेमितया ख्यातेन पूर्ववैरमनुस्मरता "किं मया हतया मन्द क्वचिज्जातस्तवान्तक" इति योगमायोदितेन तदनुसंधानधुरंधरतया तदपचिकीर्षया प्रेषितः पूतना नाम बालग्रहः प्रथममेव तामेव व्रजराजधानीमाससाद । सा पूतना नाम कामरूपिणी रूपिणी सौन्दर्यसंपत्तिरिव सकलजननयनचमत्कारकारिणी समपद्यत ॥ २ ॥

नियोज्यैः† किंकरैः, "नियोज्यकिंकरप्रेष्यभुजिष्यपरिचारका" इत्यमरः । यदुराजधानीं मथुरां, तस्य‡ निजशत्रोरपचिकीर्षया, अपकारेच्छया ॥ २ ॥

*—तः । श्रीभागवतादौ सर्वेषामपि भगवद्भावां ब्रह्मस्वरूपेण निश्चितत्वात् । "सा—इति पा० ।

† व्रजराजे गोरसादिकरं कंसस्योपपादयितुं गतवति सतीत्यन्वयः । किं कृत्वेत्यपेक्षायां पुरपरिरक्षणेत्यादि । नियोज्यैः इति पा० ।

‡ तस्य ज्ञातस्य निजशत्रोरनुसंधाने धुरंधरतया प्रवीणतया तस्य इति पा० ।

यामभिवीक्ष्य, उर्वशि उर्वशीवं[1] ते सौभगम्, अलम्बुषे अलम्बुषेणेव[2] ते दर्पेण, रम्भेऽरम्भेकीव[3] त्वमसि, घृताचि घृता-चितेव ते यशोनवनीतावलिः, मेनके मे-न-के त्वामुपहसन्ति, प्रस्नोचे प्रस्नोचेन गतं ते रूपसौभगं, चित्रलेखे चित्रलेखेव ते मूर्तिः, तिलोत्तमे तिलोत्तमेव ते कीर्तिः ॥ ३ ॥

हे· उर्वशि· उरु· अधिकमशिवममङ्गलं यस्य तथाभूतं सौभगं तवाभूत्, अनया स्वीयसौन्दर्येण तव तिरस्कारादिति भावः । वृषेणेव तृणादिक्षोदनेव, "कडङ्गरो वृषं क्लीबे," इत्यमरः । हे रम्भे,अरं द्रुतं भेकीव त्वम् । हे घृताचि ते तव यशांस्येव नवनीतानि तेषामावलिः सा । अधुना घृता जलादिना सिक्ता, चिता प्रेतदाहिकाग्निश्रेणीव, "घृ सेचने" इति धातुः । हे मेनके मे मम संबन्धिनः के न त्वामुपहसन्ति, अपितु सर्व एव । प्रस्नोचेन प्रवाहेण । चित्रलेखा रेखेव स्तब्धेत्यर्थः । तिलोत्तमा तिलादप्युत्तमा, अतिश्यामा,अपकीर्तिरभूदित्यर्थः ॥ ३ ॥

इति सकलैरेव पुरजनैर्नाकवेशविलासिनीरुपहस्य किमियं मूर्तेव व्रजपुरदेवता, किमियं चैलोक्यलक्ष्मीः, किमियमनम्बुधरा तडिन्मञ्जरी, किमियं निष्कुमुदबान्धवा कौमुदीति वितर्क्यमाणा व्रजपुरपरमेश्वरीभवनमेव सा प्रविवेश ॥ ४ ॥

इति नाकवेशविलासिनीः स्वर्गोप्सरसः, उपहस्य तिरस्कृत्य, व्रजपुरदेवतेति दुष्प्रधर्षत्वांशेन, चैलोक्यलक्ष्मीरिति परमशोभया, तडिन्मञ्जरीति गौरकान्त्या, कौमुदीति सुशीतलच्छवितया ॥ ४ ॥

तथा सति, इयं खलु व्रजपुरपुरंदरमन्दिरावतीर्णपरममहापुरुषचरणपरिचरणचातुर्यधुर्यतया चैलोक्यलक्ष्मीरेव समुपसर्पतीति पुनस्तैरिदमेव निरटङ्कि ॥ ५ ॥

इद*मेव निरटङ्कि निर्णीतम् । अत्र पूतनामाविश्य भगवतो योगमायैव लीलासिद्ध्यर्थं तादृशसौन्दर्यं स्फोरयित्वा तान् मोहयामासेति ज्ञेयम् । तस्या वराक्यास्तामस्यास्तया मायया शुद्धसत्त्वावरणसामर्थ्यान्यथानुपपत्तेः ॥ ५ ॥

१ यमकसुष्ठुताप्रतिपत्तये उर्वशि उर्वशीत्यसंधिरङ्गीकृतः ।

२ अलम्बुषे अलम्बुषेत्यसंधिरपि तथा, द्वितीयालम्बुषशब्दे परसवर्णोऽपि लिपितस्तत्ताप्रतिपत्तय एव ।

३ रं भेकीवेति मुद्रणार्हे परसवर्णो लिपितस्तत्ताप्रतिपत्तय एव ।

* पुनस्तैरेव जनैरिद—इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनन्तरं चोरमूर्तिरिव महासाहसा, लोभोपहता जनतेव निर्लज्जा, कोपवृत्तिरिवासमीक्ष्य कारिणी ॥ ६ ॥

महासाहसेति सहसान्तःपुरप्रवेशसामर्थ्यमुक्तम् । निर्लज्जेति स्वकार्यसाधन एव तात्पर्यम् । असमीक्ष्य कारिणीति तादृशसुभगश्रीमूर्तिदर्शनेऽपि घातुकत्वव्यवसायात्यागः ॥ ६ ॥

सा भवनं प्रविश्य ज्वलन्तमिव सकलाशुभसमूहभस्मीकरणचणमहानलस्फुलिङ्गं, निखिलरिपुनिकरबहलतमःसमुद्घाटनपाटवैकचटुलं विलक्षणं दीपशिखरमिव, संसारविषमविषमहाकूपारनिःशेषनिःशेषकारिणं मणिविशेषमिव, मथ्यमानचन्द्रिकाचयफेनधवलशयनतलशयितं कर्पूरधूलिकेदारतटसमुत्पन्नं महामरकताङ्कुरमिव ॥ ७ ॥

सा तमङ्कमारोपयितुं कृतमतिर्जनन्या न प्रत्यपेधि । कीदृशं तं, सकलानामशुभसमूहानां काष्ठस्थानीयानां भस्मीकरणचणं भस्मीकरणेन ख्यातं महाग्निकणम्, एतेनाधिकारिविशेषानियमेनैव स्पर्शमात्रेणैव निःशेषपापहारित्वमुक्तम् । निखिलारिपुनिकरा एव बहलानि तमांसि तेषां सम्यगुद्घाटनस्य पाटवे दक्षतायामेकं चटुलं चञ्चलं, परमसमर्थमित्यर्थः, एतेन रिपुप्रवर्त्यमानदुर्व्यापारारम्भमात्रेणैवाक्षोभेण तत्राशकारिस्वभावत्वमुक्तम् । संसार एव विषमस्य विषस्य महाकूपारः समुद्रस्तस्य निःशेषेण निःशेषकारिणम्, एतेन तादृशशत्रूणामपि संसारबन्धच्छेदकत्वेन परमदयालुत्वम् । इत्येवं तटस्थलक्षणेन महागुणानुद्दिश्य, तदानीं स्वरूपलक्षणेनापि परममाधुर्यं वर्णयति मथ्यमानेति । मथ्यमानानां चन्द्रिकाचयानां फेनमिव धवलमित्युपलक्षणं, शीतलं कोमलं च यच्छयनतलं तत्र शयितम् । अत्रोत्प्रेक्षते कर्पूरधूलीत्यादि ॥ ७ ॥

खलवाणीव बहिः सरसा, वारीव बहिरावृता, मणिकोषाचिता कालायसकरपालिकेव, दर्शनसुखदा कल्पलतिकायमाना विषलतिकेव ॥ ८ ॥

बहिः प्रकाशरूपेण सरसा, अन्तः स्वगतरूपेण त्वतिक्रूरा वाणीत्यर्थः । पूतनापि बहिर्वात्सल्यप्रकाशिनी, अन्तस्तु मारणव्यवसायवती । दुर्मदगजानां बन्धनेन वशीकारार्थं वारी यथा तृणादिभिर्बहिरावृता, अन्तस्तु विवरमयीत्यर्थः । कालायसकरपालिका तीक्ष्णखड्गलतिका ॥ ८ ॥

सस्नेहं जननीव तमङ्कमारोपयितुं कृतमतिर्जनन्या व्रजपुरपरमेश्वर्या वसुदेवभार्ययार्यया च किमियं भगवती गौरी, किमियं भूतधात्री, किमियमिन्द्राणी, किमियं वरुणानी, किमियमग्नायी, मदात्मजं प्रति वत्सलतया समुपसन्नेति वितर्कपरया न प्रत्यपेधि ॥ ९ ॥

वसुदेवभार्यया रोहिण्या च न प्रत्यपेधि । गौरीत्यनुपमसौन्दर्यदृष्ट्या, भूतधात्रीति परमकृपोदयदृष्ट्या, इन्द्राणीति स्वाधिकारप्रकाशनदृष्ट्या, वरुणानीति स्निग्धच्छविदृष्ट्या, अग्नायीत्यतिदुर्धर्षत्वदृष्ट्या, वितर्कः ॥ ९ ॥

किमहमस्य माता किमियं वेति निर्धारयितुमसमर्थायामिव व्रजेश्वर्यां निःसाध्वसमेव तमर्भकमङ्के निधातुमारेभे ॥ १० ॥

अङ्के क्रोडे ॥ १० ॥

जरीकृताङ्गभावेन ज्ञानघनविग्रहेण भगवतापि परमकारुणिकेन जननीवेशमात्रपरिलोचनपरितुष्टेनेव तया स्पृष्टमात्रेणैव तदङ्कतलमारुरुहे, सा च सादरमङ्के निधाय मात्रोः पश्यन्त्योः परमवत्सला जननीव पयोमुखं विषकुम्भमिव पयोधरमधरे निधापयामास ॥ ११ ॥

जरीकृतोऽङ्गीकृतोऽङ्गभावोऽङ्गत्वं येन तेन, तस्य सर्वदा मधुरलीलाविष्टत्वेऽप्युत्पातागमकाले सहसैवैश्वर्यस्फुरणस्वभावत्वात् ॥ ११ ॥

ततश्च ।

पिबन् दुग्धं स्निग्धोदरदलितबन्धूककलिका-
दलद्रोणीताम्राधरपुटचुमूत्कारकलया ॥
अमूं चक्रे लीलामयनवशिशुः प्राणपवनी-
समाकृष्या सद्यः सकलकरणग्लानिविवशाम् ॥ १२ ॥

अमूं पूतनां सकलानां करणानामिन्द्रियाणां ग्लानिभिर्विवशां चक्रे, प्राणपवनी प्राणनाडी तस्याः समाकृष्या सम्यगाकर्षणेन, कथं तदाकर्षणमित्यपेक्षायां तं विशिनष्टि, स्निग्धमुदरं यस्याः सा च दलिता दलवती या बन्धूककलिका तस्या दलमेव द्रोणी पानपात्री तद्रूपं यत् ताम्रवर्णमधरपुटं तेन या चुमूत्कारस्य कला वैदग्धी तया दुग्धं पिबन्, आवेशेन चूषणशब्दानुकरणं चुमूत्कारः * ॥ १२ ॥

अनन्तरम् ।

मुञ्चेति व्यथमानमानसतया क्षिप्तोऽपि गाढं तया ।
चूषन्नेव सुकोमलाधरपुटेनात्मप्रवत् कौतुकी ॥
बिभ्रत्या सहजाकृतिं विषपयः पीत्वाग्निवत् तां तनूमावासान्निरसीसरद्बहिरसौ तत्क्रोडवर्ती च सः ॥ १३ ॥

मुञ्चेति,

"बालं न मुञ्चत्यपि मान्त्रिकेण
या मुञ्च मुञ्चेत्यपसारितापि ।
तां पूतनां मुञ्चति नैष बालः
स्वं मुञ्च मुञ्चेत्यपसारयन्तीम्" ॥

* चुमूत्कार इति मूले टीकायां च पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सहजाकृतिं बिभ्रत्याः पूतनाया विपपयः पीत्वेति, तदानीं लब्धावसरया संहारिकया शक्त्यैव तत्पानं, तस्य तु व्यपदेशमात्रं, शक्तिशक्तिमतोरभेदादिति न्यायात् । एतच्च वर्णयिष्यमाणदावानलपानप्रसङ्गवदेव ज्ञेयम् । तस्यास्तां विकटां तनुमावासांवगरादुद्विर्निरसीसरच्चिःसारयामास । नगरमध्ये तत्संमर्दैन बहुनरलोकनाशं परामृश्य बहिश्चिक्षेपेत्यर्थः । स्वयं च तत्क्रोडवर्तीत्यहो आश्चर्यमिति ॥ १३ ॥

तदनु चक्रवर्तिराज इव सकलप्रजाकरालः, लङ्कापरिसर इव विभीषणमाहात्म्यः, गानव्यवहार इव तालप्रवेष्टः, महामहीध्र इव गण्डशैलपयोधरः ॥ १४ ॥

तट्टेहः क इव, चक्रवर्ती राजा सर्वमण्डलेश्वरः स इव सकलानां प्रजानां करमालाति गृह्णातीति सः, पक्षे सकलप्रजानां संबन्धे करालो भीषणः । विभीषणस्य माहात्म्यं महिमा यत्र, पक्षे विशिष्टं भीषणं भयप्रदं माहात्म्यं महाकायत्वं यस्य सः । तालानां प्रकर्षेण वेष्टनं यत्र सः, पक्षे तालौ तालवृक्षाविव प्रवेष्टौ बाहू यस्य सः, "भुजबाहू प्रवेष्टौ द्वौ" इत्यमरः । गण्डशैलेषु पयोधरा मेघा यस्य सः, पक्षे गण्डशैलाविव पयोधरौ स्तनौ यत्र सः ॥ १४ ॥

बलिरिव पातालास्यः, महाशैल इव कन्दरागम्भीरांगन्धवहः, महायोधसमूह इव संयुगप्रबलदन्तः, ध्वजिनीसंघ इव महाध्वजिह्वः ॥ १५ ॥

पाताल आस्या स्थितिर्यस्य सः, पक्षे पातालवदास्यं मुखं यस्य सः । कन्दरासु गम्भीरो गन्धवहो वायुर्यत्र सः, पक्षे कन्दरे इव गम्भीरे गन्धवहे नासिके यत्र सः, "गन्धवहा घोणा नासा च नासिके"त्यमरः । संयुगे युद्ध एव प्रबलचन्तो मरणं यस्य सः, पक्षे सम्यग् युगा इव प्रबला दन्ता यस्य सः, "रथसीराङ्गयोर्युग" इति विश्वः । ध्वजिनी सेना, महाध्वजिनं सेनान्यं हूयत इति सः, पक्षे महाध्वा मार्ग इव जिह्वा यस्य सः ॥ १५ ॥

यादोगण इव महाह्रदोदरः, वनप्रदेश इव महावटाक्षः शालोरुश्च, सार्धयोजनव्यापी तट्टेहस्तदानीं पुरबाह्यवनपरिसरे निपतन्नवनिरुहानपि पातयामास ॥ १६ ॥

महाह्रदेष्वेवोत्कर्षेणेयर्ति गच्छतीति, पचाद्यच, पक्षे महाह्रद इवोदरं यस्य सः । महान्तोऽवटा अक्षाश्च वृक्षभेदा यत्र सः, अक्षो बहेडा इति ख्यातः, पक्षे महान्ताववटौ गर्ताविवाक्षिणी यस्य सः, "गर्तावटौ भुवि श्वभ्र" इत्यमरः । शाखाभिः शाखाभिः शालवृक्षैर्वा, उरुर्बृहन्, पक्षे शालवृक्षाविवोरु यस्य सः । अवनिरुहान् कंसोपभोग्यफलांस्तदारामस्थान् तामसप्रकृतीनामादीन्, इति ज्ञेयम् ॥ १६ ॥

तदनु तदेतत् कुहकमिति जानती तमात्मजमनवेक्षमाणा व्रजराजमहिषी वत्सवत्सला गौरिव, अहो कष्टमहो किमिदं, क्व मे तनय, इति मूर्च्छन्ती व्रजपुरपुरन्ध्रीभिराश्वास्यमाना संज्ञामवलम्ब्य, हा धिक्, हा वत, नीलोत्पलमिति कर्णावतंसीकर्तुं किमपहृतो नाकनारीभिः, नीलरत्नमिति शिरःशेखरीकर्तुं चोरित इव नागरीभिः, तमालकुसुममिति चिकुरोतंसीकर्तुं किमपसारितो गन्धर्वीभिः, सिद्धाञ्जनमिति निर्हृत्य रक्षित इव योगिनीभिः, तुहिनकिरणकोरक इति जटाटवीं प्रापितो धूर्जटिना, किं ममैव प्रबलतरदुर्नियतिदेव्या विलसितमिदं, किमहमयोग्या जननीति स्वयमेव जनन्यन्तरमासादितवानिति पुनः स्खलन्ती मूर्च्छामेव कालक्षेपकरीमूरीचकार ॥ १७ ॥

तदानींतनं व्रजेश्वरीचेष्टितं वर्णयति कुहकमिति, यदयं तस्या दिव्यवेषः, यच्च वात्सल्यमङ्कनिधापनं, स्तनदानं च, तदेतत् सर्वमित्यर्थः, संज्ञां चेतनां, दुर्नियतिर्दुरदृष्टं सैव देवी तस्याः ॥ १७ ॥

तदनन्तरमविलम्बितमेवानया तनयो लभ्यतामिति स्वयमेव मूर्च्छया त्यज्यमानेव सा पुनः संज्ञामवलम्ब्य, हंहो के जानीथ,कथयत, केनापहृतं मेऽपत्यं, क्व गताहं लप्स्ये, इति प्रबलतरपवनभुग्नलवलीलतेव मलिना पदे पदे स्खलन्ती व्रजपुरपुरन्ध्रीजनैर्धार्यमाणापि सोरस्ताडनमुच्चैस्तरां रुदती विगलितचिकुरकलापा करुणस्य मूर्तिरिव यावत् पुरतोरणमाससाद ॥ १८ ॥

अनया मूर्च्छया त्यज्यमाना, लवली लोत्राली इति ख्याता, पुरतोरणं पुरबहिर्द्वारम् ॥ १८ ॥

तावदेव किमिदं विना वात्यामेव निपतितं गिरिशृङ्गं, किमयं पृथिव्या एव मृतगर्भः, किमयं नभसो गलित एव मांसपिण्डः, किमयं दिशामस्थिसंघातः, किमयं राक्षसीदेह इति ॥ १९ ॥

गिरिशृङ्गमित्युच्चत्वेन, मृतगर्भ इति लालाद्यावृतत्वेन, मांसपिण्ड इत्यतिविततत्वादलक्ष्यमाणमुखाद्यवयवविशेषत्वेन, अस्थिसंघात इति दंष्ट्रानखादिप्रदेशदृष्ट्या,पृथिव्या नभसो दिशामिति क्रमेण, अधस्त उपरितोऽभितो वागतोऽयं, त्रिभ्यो विना कुतस्त्योऽयं भविष्यति, चतुर्थपदार्थस्यासंभवादिति भावः ॥ १९ ॥

* तनुं न स्वभावसिद्धं तच्छरीरमावासा-इति पा० ।
† गभीरेति सर्वत्र पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परितो धावद्भिराभीरैस्तदुरसि निःसाध्वसमेव खेलन्तं, सर्व एव मां पश्येयुरिति करुणया तद्व्यपदेशेन बहिर्भूतमिव, महागिरिवरोपरिजलधराङ्कुरमिव, लीलाशिशुं तमालोक्य, अहो अद्भुतमिदं, पुरनिवेशसमये येयमवलोकिता सैवेयं, व्रजपुरपुरंदरनन्दनद्रोहार्थमागता स्वयमेव तेनैवापराधेन ननाशेति, किमहो भाग्यमस्माकमिति वितर्कयद्भिर्दृश्यमाना एव व्रजपुरपुरन्ध्र्यो गिरितटमिव तद्देहमारुह्य तदुरस्तः स्मितसुभगवदनमकुतोभयं तमादाय करात् करान्तरमुपसादयन्त्यो व्रजपुरेश्वरीं प्रति, अयि सुकृतिनि तनयोऽयमयं ध्रियतां ध्रियतामिति यदोचुस्तदा तदुदीरितां गिरमपि स्वप्नवाणीमिव मन्यमाना किं प्रतारयन्ति मां भवत्य इति शोकग्रहाभिभूतेव सा यदा न प्रत्येति तदोत्सङ्गेऽर्पितस्य सुतस्य स्पर्श एव प्रत्याययांचकार ॥ २० ॥

तद्व्यपदेशेन पूतनाप्राणाकर्षणच्छलेन, वितर्कयद्भिराभीरैर्दृश्यमाना इति, तेभ्योऽप्यतित्वरया तासां प्रथमं तत्र गमनात्, तं व्रजेश्वरीतनयं, करात् करान्तरमिति सर्वासामेव तासां तद्ग्रहणोत्सुक्यात्, तत्र महति जनसंघट्टेऽवकाशाभावादेकया समादाय शीघ्रमागन्तुमशक्यत्वाच्चेत्यर्थः, अयमयमित्यतिहर्षेण द्विरुक्तिः ॥ २० ॥

तदनु शोकनिद्रातो लब्धजागरेव, पुनरासादितजीवनेव, पुनरुत्पन्नसंविदिव, मूर्च्छयैव परिवर्तितसकलेन्द्रियवृत्तिरिव, तनयमुखमवीक्ष्य यावन्निर्वृणोति, तावदेव कृतकौतुकमङ्गलं गोपुच्छभ्रामणगोमूत्रस्नपनादिभिः संस्कार्य, रोहिणीसहिता उपनन्दसनन्दप्रमुखभार्या व्रजपुरपुरन्ध्रीभिः समं निजनिजमत्यनुसारेण सारेण भगवन्नामयामेन तदङ्गरक्षां विदधति स्म ॥ २१ ॥

लब्धजागरेवेति, तदपि घूर्णालस्यादीनीव कार्श्यमालिन्यादीनि प्रथमं तस्या न नष्टानीति भावः । आसादितेति, ततश्च जीवात्मना तस्या देहे पुनः प्रविष्टमिवेति भावः । उत्थेति, ततो बुद्ध्यापि । परिवर्तितेति, तत एवेन्द्रियैरपीति । तनयमुखमिति तत एव दर्शनं समभवदिति भावः । सारेण श्रेष्ठेन ॥ २१ ॥

अपरतश्च सर्व एव गोदुहो महाटङ्कैरिव गिरिवरपाषाणान् कुठारैः पूतनावयवान् खण्डशः कृत्वा नयनयोरपरिचितां चितां विधाय पुरुभिरिन्धनैरिन्धनैकाभ्रंलिहेन पुरुतरशिखावता शिखावता दीपयांचक्रुः ॥ २२ ॥

टङ्कैः, टांकीति ख्यातैः, "टङ्कः पाषाणदारणः" इत्यमरः । अपरिचितामविषयां, दूर इत्यर्थः । इन्धनैः काष्ठैः । शिखावता वह्निना । कीदृशेन, पुरुतरशिखावता बहुतरज्वालायुक्तेन । अत एवेन्धनेन दीप्ता, एकं मुख्यमभ्रं दूरगतमेघमपि लेढि व्याप्नोतीति तेन । दीपयांचक्रुर्ज्वालितवन्तः ॥ २२ ॥

भगवदुपभुक्ततया तच्चिताधूमस्तु कालागुरुधूम इव गगनतलमारुह्योपरितनसप्तभुवनजनघ्राणतर्पणो बभूव ॥ २३ ॥

उपरितनानां सप्तभुवनानां भुवःस्वर्महर्जनस्तपःसत्यवैकुण्ठानां ये जनास्तेषां घ्राणतृप्तिकारी ॥ २३ ॥

किं बहुना ।

यदुत्पन्ना धूमयोनयोऽपि यानि यानि सलिलानि वेमुस्तेरपि भूरपि सौगन्ध्यवती समपद्यतेत्यहो किं वक्तव्यं भगवतः कारुण्यं यदियं विषमविषमयपयःप्रदानार्थं गृहीतजननीवेषाभासापि जननीलोकमासादिता ॥ २४ ॥

धूमयोनयो मेघाः, वेमुः, ववृषुरिति यावत्, अत्र वमेर्दन्त्योष्ठ्यवकारादित्वेऽपि वेमतुर्वेवमतुरित्युभयस्यापि भागवृत्तौ दृष्टत्वात्, तथैव कविकल्पद्रुमेऽपि फणादिमध्यपठितत्वात्, "न शशदृदवादिगुणाना"मित्येत्वप्रतिषेधः प्रायिकः ॥ २४ ॥

एवं सति दूरतो मथुरातः प्रतिनिवर्तमाने व्रजपुरपुरंदरे तदनुवर्तिनो धूमलेखामवलोक्य संदिहानाः स्वामिनमूचुः, व्रजराज किमयं दावदेव्या आग्रपदीनो धूमलनीलनिचोलः पवनेन व्याधूयते, किममूर्वा * मूर्वाच्छवयो धरणितलमाच्छाद्य रसातलत एव महाहिमण्डलीफणामणिविशेषभासो विश्वमेव जगदखण्डभाण्डविवरं पिदधति, किंवा दिक्करिण एव परस्परं युध्यमाना इतस्ततो धावन्ति ॥ २५ ॥

द्यौरेव देवी तस्या नीलः प्रच्छदपटः, "आग्रपदं व्याप्नोती"ति खप्रत्ययः । पृथिवीनस्तदुद्गमं संभाव्य पुनः संशयाना आहुः, मूर्वा तृणविशेषस्तत्तुल्यदीप्तयः, विश्वमेव सर्वमेव, पिदधत्याच्छादयन्ति । पुनरितस्ततो धूमखण्डानालोक्याहुः, दिक्करिण इति ॥ २५ ॥

किंवा, जलधरा एव भुवि निपत्य पुनरुद्गच्छन्तो मलिनयन्ति दिशां मुखानि, किंवा, धरणिरेव रजोभावमासाद्य दिवमारोहति, किंवा, अकालसंतमसान्ते तानीति ॥ २६ ॥

* किमपूर्वा इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुनरतिनैविड्भेनैकीभूयोद्गच्छतो मूलधूमानवलोक्याहुः, जलधरा मेघाः । पुनस्तत्रत्यं भूतलं धूमेनाच्छन्नमालोक्याहुः, किंवा धरणिरेवेति । ततश्च, इतस्ततः सर्वमेव व्याप्तुमुपक्रामन्तं धूमसमूहमालोक्याहुः, अकालेति । "विप्वक्संतमस" मित्यमरः ॥ २६ ॥

कियदासन्नतया विभक्ताकृतित्वेनाहो धूमलेखेवेयमिति यदा निश्चिक्युस्तदैव तत्सौरभेण पुनर्जातसंदेहाः कथमकस्मादेवेतावानगुरुधूपधूमः, किंवा पृथिव्या निजगुणो गन्ध एव धूमाकारतामासाद्य स्वात्मना नभसः शब्दगुणजिगीषया विश्वमेव व्याश्नुते ॥ २७ ॥

निश्चिक्युर्निश्चितवन्तः । व्याश्नुते व्याप्नोति ॥ २७ ॥

इति वितर्कयत्सु तेषु व्रजराजेऽपि किमिदं किमिदमिति शङ्कमाने त्वरितमुपव्रजद्भिर्व्रजस्थैः कथिते सकल एव वृत्तान्ते वृत्तान्ते च पूतनाख्ये बालग्रहे ॥ २८ ॥

वृत्तो निर्व्यूढोऽन्तो नाशो यस्य तथाभूते बालग्रहे कथिते सति, सकल एव वृत्तान्ते कथित इत्यनेनैव पूतनागमननाशपर्यन्तकथनस्यापि सिद्धत्वाद् वृत्तान्ते च पूतनाख्ये इति पुनः कथनं पूतनास्तनपानादिकथाश्रवणे व्रजराजस्य मूर्च्छारम्भमालोक्य कथामन्तरान्तरा, सा तु पूतना मृतैव मृतैव, तव पुत्रस्तु मातुरङ्के संप्रति खेलचेव वर्तते, किमिति क्लाम्यसीति सान्त्वनार्थम् ॥ २८ ॥

कुमारानामयरसमयविवरणसमावेशपेशलतया त्वरितमेवोपगम्य कृतनये तनयेक्षणक्षणपरवशे ॥ २९ ॥

कुमारस्यानामयरसमयविवरणमारोग्यनिमित्तकरसमयगोमूत्रस्नापनादिस्वस्त्ययनविवृतिस्तत्र समावेशे पेशलतया त्वरितं निकटमागत्य कृतो नयो येन तथाभूते श्रीव्रजराजे तनयस्येक्षणेन क्षण उत्सवस्तत्परवशे ॥ २९ ॥

रवशेषविरतौ सुतमङ्कमारोपयति रोपयति च परमानन्दबीजानि हृदये मूर्धानमाजिघ्रति ॥ ३० ॥

रवाणामानन्दकोलाहलानां शेषस्य विरतौ सत्यां सुतं क्रोडमारोपयत्यारोहयति सति, परमानन्दानां बीजानि हृदये क्षेत्ररूपे मनसि रोपयति सति, अत्र सुतस्य यदङ्कारोपणं तत् परमानन्दबीजानां हृत्क्षेत्रे रोपणमिवेत्युत्प्रेक्षा, हृदय आनन्दबीजानां रोपणेन सह सुतस्याङ्कारोपणमिति सहोक्तिर्वा व्यङ्ग्या ॥ ३० ॥

मनस्यमानिव प्रमोदभरो हर्षाश्रुभरमिषेण नयनाभ्यामुत्प्रसर्पे च ॥ ३१ ॥

इत्यानन्दवृन्दावने पूतनावधलीलालताविस्तारे तृतीयः स्तबकः ॥ ३ ॥ :: :: ॥

एवंभूते व्रजराजे प्रमोदभरो मनसि,अमानिव, अतिवृद्धावकाशमप्राप्नुवन्निव, हर्षाश्रुभरच्छलेन नेत्राभ्यामुत्ससर्पे च । उच्छलितवानिवेत्यपह्नुतिः । अत्रानन्दबीजानां हृत्क्षेत्रे तदानीमेव प्रमोदभरवृत्तरूपेणातिवृद्धा तत्रावकाशाभावेन बहिः प्रसरणमिति समुच्चयालंकारस्य व्यञ्जिके सहोक्त्यपह्नुती इति ॥ ३१ ॥

इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां तृतीयस्तबकसंगमनम् ॥ ३ ॥ :: :: ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ चतुर्थस्तबकारम्भः ॥

अथ कियता विलम्बेन कदाचिदौत्थानिके कर्मणि जन्मनक्षत्रयोगे ॥ १ ॥

चतुर्थेऽनस्तृणावर्तो स्थैर्यंचाञ्चल्यशालिनौ ।
खण्डयेते शिशुना मातुः शोकश्च स्ववियोगजः ॥

कियता विलम्बेनेति, तृतीये मासीत्यर्थः । "त्रैमासिकस्य च पदा शकटोऽपवृत्त" इति द्वितीयस्कन्धात् । उत्थानं शिशोरङ्कपरिवर्तनं तदर्हे कर्मणि घोषेश्वरी योषितां श्रेणीमादाय तनयमभिषिच्य शनकैः शाययित्वा घोषयोषितामर्चनं विदधती मृदङ्गादिनिनादादिभिस्तस्य शिशो रोदनकलं नाकलयामासेत्यन्वयः ॥ १ ॥

वत्सलतालतानामिव मुत्सवभूतानामुत्सवभूतानामिव सुकृतमहोदयानामहोदयानारतरतहृदयानामहृदयानामतिकौतुकालं को-तु-कालं कुर्वतीनां तीव्रजयोषितां व्रजयोषितां श्रेणीमादाय ॥ २ ॥

व्रजयोषितां कासामिव, वत्सलताया वात्सल्यस्य लतानामिव, मुद्-आनन्दस्तस्याः सवभूतानां यज्ञरूपाणां, "यज्ञः मखोऽध्वरो याग"इत्यमरः । उत्सवस्य भुवि स्याने, उत्पत्तौ वा, ऋतानामिव यथितानामिव । सुकृतानां महानुदयो यासु तासाम् । अहो आश्चर्यं दयायामनारतं निरन्तरमेव रतं हृदयं यासां तासाम् । अकारो विष्णुस्तत्रैव हृदो मनसोऽयः शुभावहो विधिर्यासाम् । कौ तु पृथिव्यां तु कालं समयमतिकौतुकेन, अलमलंकृतं कुर्वन्तीनां श्रेणीम् । कीदृशीं, तीव्रजयोषितां तीव्रस्य जयस्य महोत्कर्षस्योषितां निवासभूमिम् । अधिकरणे निष्ठा ॥ २ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कृतनयं तनयं मङ्गलाभ्यङ्गोद्वर्तननिवर्तनानन्तरमभिषिच्य मङ्गलाभिवाद्यवाद्यनिर्घोषे घोषेश्वरी कृतमार्जनं कृतमार्जनं मङ्गलकज्जलेनाकज्जलेनाञ्जितनयनं नयनन्दितपुरजनावृतानावृतानन्दव्रजराजं व्रजराजं पुरस्कृत्य कृत्यकोविदया दयादिसकलगुणाधिरोहिण्या रोहिण्या समं कर्पूरपूरवलच्चलच्चमूल्यतल्पतले शनकैः शाययित्वा ॥ ३ ॥

तनयं कीदृशं, कृतनयं, कृतो नयो नीतिस्तद्विनोचिताचारो यत्र तम्। मङ्गलैरप्यभिवाद्यानां नमस्कर्तुं योग्यानां वाद्यानां मृदङ्गादीनां निर्घोषे सति, अभिषेकानन्तरं कृतं मार्जनं यस्य तम्। अत एव कृतं मा शोभा तस्या अर्जनं येन तम्। अकं दुःखमिवाचरज्जलं रसो यस्य तेन, आचारक्विबन्ताच्छता*। नयेन नीत्या नन्दितैः पुरजनैरावृता। अनावृते, आवरणशून्ये, आनन्दव्रजे सुखसमूहे राजत इति तं व्रजराजं पुरस्कृत्य, दयादीनां सकलगुणानामधिरोहिण्या निःश्रेणीरूपया, "निःश्रेणिस्त्वधिरोहिणी"त्यमरः। कर्पूरपूरादपि वलत्ते शुक्लवर्णे लक्षाणि मूल्यं यस्य तस्मिन् शय्यातले। शनकैरिति निद्राभङ्गशङ्कयेति भावः ॥ ३ ॥

समायातानां घोषयोषितामर्चनं विदधती मृदुमृदङ्गपणवभेरीकाहलदुन्दुभिनिह्रादैरवनिसुरवराशीराशिनिस्वनैः सूतमागधवन्दिवृन्दोदीरितगुणगणोदा†रकोलाहलैः संगीताचार्यवर्यसंगीतसंगीतकलकलतरङ्गैश्च मुखरितेषु दिग्वलयेषु क्षुद्बाधया स्तन्यकामस्य तस्य लीलाशिशोर्लीलाशिशोभस्य रोदनकलं नाकलयामास ॥ ४ ॥

संगीताचार्याणां गानशास्त्राध्यापकनां वर्यैः श्रेष्ठैः सम्यग्गीतानि संगीतानि तेषां कलकलतरङ्गैः। लीलाशिशोः कृष्णस्य। कीदृशस्य, ईराशिशोभस्य, ईराशेर्लक्ष्मीसमूहस्यापि शोभा यतस्तस्य, रेफद्वयस्य लत्वं यमकार्थम् ॥ ४ ॥

अनाकलिते च तस्मिन् रुदितकले सकले सविधगतशकटशकलीकरणाय नवदलवदलसविलसदङ्घ्रितलमयमाश्चर्योत्तानशायी समुन्मील्य समुदञ्चि समुदञ्चिपत् ॥ ५ ॥

शकलीकरणाय खण्डीकर्तुम्, अयम्, आश्चर्यरूप उत्तानशायी बालकः। नूतनदलवदलसं विलसच्च, अङ्घ्रितलम्। समुदञ्चि सानन्दनयनं यथा स्यात् तथा, सम्यगुदञ्चिपत्, उत्क्षिप्तवान्।

मातरमवधार्यितुं रोदनरावैरपारयन् कृष्णः।
शकटविघट्टनशब्दैः क्रुधेव तामाकुलीचक्रे ॥ ५ ॥

तच्च तच्चरणयुगं मृदुलकमलदलमलदललिततालुलितं नवद्विंतंसनम् ॥ ६ ॥

आश्चर्योत्तानशायीत्युक्तमाश्चर्यत्वं विवृणोति, तच्च तस्य कृष्णस्य चरणयुगलं, शकटभङ्गकार्यार्थं नृसिंहावतारस्येव हिरण्यकशिपुविदारणार्थं, न जात्यैव कठिनमित्याह, मृदुलस्य कमलदलस्यापि मलदा तिरस्कारकारिणी या ललितता लालित्यं तया, अलुलितमखण्डितं, न च वामनावतारस्येव कटाहभेदनार्थं तात्कालिकीं वृद्धिं प्राप्तमित्याह, नवद्विंतमिति, कीदृशं, नवा नवीना च द्विर्यत्र तथाभूतं तंसनमलंकारो यत्र तत् ॥ ६ ॥

न च तदतिनिकटमेव शकटं तथापि तथा पिञ्जलतया कटकटायमानविकटकटुरटनपुरःसरं विघटितकुप्यघटघटीघटाकमारादेव विदलिताक्षकूबरवरप्रासङ्गसंगतभूमितलमितस्ततो व्यस्ततया पर्यवर्तत ॥ ७ ॥

पिञ्जलतया, अत्याकुलतया, "समुत्पिञ्जपिञ्जलौ भृशमाकुले" इत्यमरः। तथा पर्यवर्तत, यथा, अनन्तरं सर्व एव तदुपकण्ठमुत्ससृपुरित्यन्वयः। कटकट इति तद्भङ्गशब्दानुकरणं, तद्वत् कटुरटनपुरःसरं यथा भवत्येवम्, इतस्ततो व्यस्ततया भग्नावयवत्वेन, पर्यवर्तत पतित्वा वैपरीत्येनातिष्ठत्। कीदृशं शकटं, विघट्टिना कुप्यादीनां घटा यत्र तत्। कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिमयपात्राणि। घटघट्योर्बृहत्त्वाल्पत्वाभ्यां भेदः। आरात्, शिशोर्निकट एव, विदलितैः खण्डितैरक्षादिभिः संगतं भूतलं यत्र तद्यथा स्यादेवम्, "अक्षो आख इति ख्यातः कूबरस्तु युगंधरः"। प्रासङ्गो युगः ॥ ७ ॥

अनन्तरं निपततस्तमनसोऽस्तमनसो रवमाश्रुत्य श्रुत्यरञ्जकं सर्व एव जनास्तद्वेदनावेदनातुरा इव धावमाना धावमानाकुलमानसास्त्वरितमेव तदुपकण्ठमुत्कण्ठमुत्ससृपुः, उपसृत्य च, अहो किमिदमाकस्मिकं नः संकटम् ॥ ८ ॥

निपततोऽनसः शकटस्य तं रवमाश्रुत्य, अस्तानि क्षिप्तानि मनांसि येषां ते, रवं कीदृशं, श्रुतीनां कर्णानामरञ्जकं, तस्य शिशोर्वेदना पीडा तस्या वेदना ज्ञापनं, शकटाघातशब्देनैवेत्यर्थः, तया या वेदना स्वपीडा तया, आतुरा धावमानाः, धावमानानि पैशुन्यादिदोषराहित्येन शुद्धानि, अत एवाकुलानि मानसानि येषां ते, "धावु गतिशुद्धोः," तस्य शिशोरुपकण्ठं निकटम्, उत्, उर्ध्वीकृतः कण्ठो यत्र तद्यथा स्यादेवम् ॥ ८ ॥

*—च्छता। अकज्जलेनाकुत्सितजलेन। इति पा०।
†—द्वार—इति पा०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदिदं प्रभूतकालमेवंविधमेव निर्व्याहृतमेव निस्यन्दमेंवं भवनमध्यमङ्गलभूतमिव वरीवृत्यते, कस्मादकस्मादद्य विना विनाशसामर्थ्यो विपर्यस्तं शकटम् ॥ ९ ॥

यद् यस्मादिदं शकटं प्रभूतकालं बहुतरकालं व्याप्य वरीवृत्यते, अतिशयेन वर्तते ॥ ९ ॥

कथं वा सुसंपन्नसुकृतपरिपाकस्य पाकस्य शयनतलं परितः परिपत्य परितः परितस्थुषां घटादीनां कृतमदपि मदर्पिच्छिल इवावयवे न लग्नमिति ॥ १० ॥

पाकस्य बालकस्य, "पोतः पाकोऽर्भको डिम्भ" इत्यमरः। शयनतलं परितः, शय्यातलस्य चतुर्दिक्षु, परिपत्य, परितः परितस्थुषामभितः स्थितवतां घटादीनां मध्ये कृतमदपि, मदर्पिच्छिले मृगमदेन पिच्छिल इव अवयवेऽङ्गे न लग्नम् ॥ १० ॥

व्रजपुरेश्वरस्य शुभवतो निखिलसभार्यस्य सभार्यस्य कीदृशं स्तवकीदृशं स्तवनार्हं भागधेयमिति च ब्रुवाणेषु ॥ ११ ॥

हे व्रजपुरेश्वर शुभवतो मङ्गलयुक्तस्य निखिलासु सभास्वार्यस्य श्रेष्ठस्य, भवतो भागधेयं भाग्यं स्तवनार्हं कीदृशं, † निर्वक्तुं वयं न शक्नुम इति भावः, स्तवकिनी स्तवकयुक्ता, ईलेक्ष्मीः, संपत्तिरिति यावत् तां पश्यतीति, दृगुपधत्वात् कः, स्तवकीदृशं संपत्तिमतायाः स्तवकं व्यञ्जयति तव भाग्यमित्यर्थः, अन्ये तु पुष्पफले अपि व्यञ्जयिष्यतीति भावः ॥ ११ ॥

तदभ्यर्णसमुपस्थिताः शिशवो यथाबलोचितं बलोचितं कलस्वरमनेनसानेन-साक्रोशं नाम रुदता मरुदताडवितकमलकोरकाचरणौ चरणौ समुदस्यतास्य-तादवस्थ्यं विघटितं, घटितं च भूमौ निपतनमिति यदोक्तवन्तस्तदा न केऽपि अद्रुधिरे दधिरे तु मनसा किमप्यलक्ष्यं कारणमिति ॥ १२ ॥

यथाबलोचितं यथादृष्टं, बलोचितं श्रीकृष्णपराक्रमोचितं, कलस्वरं यथा स्यात् तथोक्तवन्तः। अनेन कुमारेण, अनेनमा, एनोऽपराधस्तद्रहितेन, साक्रोशं रुदता क्रन्दता, रुधातुरोऽयं स्तन्यं न प्राप्नोतीति रोदने कोऽस्यापराधः, अत एवायं नोपालभ्य इति भावः। चरणौ समुदस्यता, रोदनवैकल्यमुद्रया समुत्क्षिपता, अस्य शकटस्य तादवस्थ्यं तदवस्थत्वं विघटितम्। चरणौ कीदृशौ, मरुता वायुना, अताडवितयोरनर्तितयोः कमलकोरकयोरिवाचरणं स्वधर्मो ययोस्तौ ॥ १२ ॥

* निष्यन्दमेव, इति पा०।

† कीदृशं स्तवनार्हं, कीदृशं स्तवनमर्हतीत्यर्थः, भागधेयं अर्थभूतं तत्त्वं-इति पा०।

अथ तत्पतनसमकालमेव तनयं प्रति शङ्कमाना व्रजराजमहिषी महीतलमधि निपपात, ततश्च सवैयग्र्यं पुरन्ध्रीभिः सह रोहिण्या सत्वरमुत्थाप्य कुमारस्य सौवस्तिकवृत्तवार्तवार्तया समाश्वासितासितापाङ्गी संज्ञामासाद्य बाष्पमुज्जगार ॥ १३ ॥

सौवस्तिकं स्वस्तिरूपं यद्वृत्तं चरित्रं, "विनयादिभ्यष्ठक्," तेन हेतुना, वार्ता निरामया, या वार्ता वृत्तान्तः, "वार्ता निरामयः क्षेम्य" इत्यमरः, तया समाश्वासिता, असितापाङ्गी श्रीयशोदा, संज्ञां चेतनाम् ॥ १३ ॥

बालो मे नवनीतलश्च मृदुलस्त्रैमासिकोऽस्यान्तिके
हा कष्टं शकटस्य भूमिपतनाद्भङ्गोऽयमाकस्मिकः।
तच्छ्रुत्वापि न मे गतं यदसुभिस्तेनास्मि वज्राधिका
धिङ्मे वत्सलतामहो सुविदितं मातेति नामैव मे ॥ १४ ॥

माता इति नामैव मम न तु मातृकार्यकारित्वमित्यर्थः॥१४॥

यन्निष्पातजवैर्महीं विचलिता यस्यारवैः सर्वतः
सर्वेऽमी बधिरीकृता निपतिते तस्मिन् समीपे शिशुः।
लब्ध्वाभूरि भयं यदेष तदितः स्मृत्वापि जीवत्यहो
मद्दुर्दैवफलं महद्व्रजपतेर्भाग्यैः क्रियद्वार्यताम् ॥ १५ ॥

आरवैः शब्दैः, तस्मिन् शकटे समीपे निपतिते सति यदेष शिशुः, भूरि भयं लब्ध्वा, इतोऽस्मादेव स्थानात् तच्छकटपतनं स्मृत्वापि, अहो आश्चर्यं जीवति, तत् तस्मात्, अनुमितस्य मद्दुर्दैवस्य फलं महदिदं, पूतनागमनशकटपतनाद्युत्पातबाहुल्यं, तथापि तत्तच्छान्तिदर्शनलिङ्गेनानुमितैर्व्रजपतेर्व्रजराजस्य भाग्यैर्बहुभिः क्रियच्चिरार्यतां,न जाने पुनरप्यये मद्दुर्दैवं कीदृशं फलिष्यतीति भावः ॥ १५ ॥

इति सत्वरमुपसर्पन्ती ससाध्वसा साध्वसावतिविधुरा विधुरामणीयकहारिवदनं तमङ्कमारोप्य मारोप्यमाणसौभगं समालोक्य समालोक्यमधुरिमा धुरि मानसं मानसंतोषतो न चकार ॥ १६ ॥

साधु सुष्ठु, अतिविधुरातिव्याकुला, विधोश्चन्द्रस्यापि रामणीयकहारि रमणीयत्वहरणशीलं वदनं यस्य तं तनयं, मा शोभा तया रोप्यमाणं प्रकाश्यमानं सौभगं यस्य तम्। यशोदा कीदृशी, समालोक्यः, अङ्गगतेन कृष्णेन हेतुना सम्यगालोक्यितुं योग्यो मधुरिमा माधुर्यं यस्याः सा। ततश्च मानश्चित्तसमुच्चतिस्तेन संतोषतो हेतोर्धुरि चिन्तायां मानसं मनो न चकार ॥ १६ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अनन्तरं तरङ्गितमङ्गलस्वस्त्ययनादिनादिना नीराजितं नीराजितं स्वमहसैव सैवमतिस्नेहस्नुतं स्तनरसं नरसंकाशं परं ब्रह्म बालकमपि नवालकं मूर्तमप्यमूर्तं पाययित्वा निद्राणमिव मत्वा पुनरन्यशयने शयनेयतया संयोज्य यावत् स्वापयति तावदेव वसुदेवभार्या सुदेवभार्या महोत्सवागतव्रजवनितानितान्यमानपूजावशेषं समापयामास, घो[1]षाधीशोऽपि कृतमथरारोदीरितमङ्गलस्वस्तिवाचनादिना पुनरपि शकटं तथैवाचारलब्धतया स्थापयामास॥१७॥

स्वस्त्ययनादिना कीदृशेन, आदिना प्रथमतः कृतेन, नीराजितं निर्मञ्छितं, स्वमहसा स्वकान्त्यैव निःशेषेण राजितं, नरसंकाशं नराकारेणैव सम्यक् काशः प्रकाशो यस्य तं, नवा नवीना अलका यस्य तम्, अमूर्तमकठिनं, "मूर्तः काठिन्यकाययो"रित्यमरः, निद्राणमिवेति निद्रापूर्वभावो व्यञ्जितः, शयनेयतया शयौ पाणी ताभ्यां नेयतया याह्यतया, "पञ्चशाखः शयः पाणि"रित्यमरः, वसुदेवभार्या रोहिणी, कीदृशी, शोभनस्य देवस्य देवजातेरिव भा कान्तिस्तया, आर्या पूज्या, महोत्सवागताभिर्व्रजवनिताभिः सह तासामेव वा नितरां तान्यमानाया विस्तार्यमाणायाः पूजाया अवशेषम् ॥ १७ ॥

अथ कस्मिन्नपि रसमये समये मणिकिरणप्रघणे प्रघणे सदयं मुत्सङ्गमुत्सङ्गमारोप्य जनन्या जनन्यायविदया श्रीयशोदया श्रीयशोदयालाल्यमानो मानोन्नतधीरधीनमायो मायोगरुचिरो रुचिरोपितनरदारकलीलो ज्ञानघनोऽज्ञानघनोदको भ्रमयन् कृतप्राकृतचरितोऽचरितोहः स बालकृष्णः संगम्यमानमतिरंस्यमानमतिरम्बरान्तरिष्यमाणमुपशमाय प्रमाय प्रबलानिलरूपं दानवं तदा-नवं ततान गरिमाणम् ॥ १८ ॥

कस्मिन्नपीति, एकवर्षवयःप्राकट्ये, "एकहायन आसीनो द्वियमाणो विहायसे"ति दशमस्कन्धोक्तेः। तदन्तरालवर्तिनामकरणादिलीलोल्लङ्घनेन प्रथमत एवैतद्वर्णनं तु दशमस्कन्धोक्तक्रमानुरोधेनैवेत्येवमेवान्यत्रापि ज्ञेयम् । स बालकृष्णः संगम्यमानं प्रबलानिलरूपं दानवं प्रमाय गरिमाणं ततानेत्यन्वयः । प्रघणेऽलिन्दे, कीदृशे, मणीनां किरणैः प्रकर्षेण घने निबिडे,मुदामानन्दानां सङ्गो यत्र तद्यथा स्यात् तथा, उत्सङ्गं क्रोडमारोप्य, जनन्या, जनानां न्यायं पुत्रोपलालनाद्याचारं वेत्तीति, दृगुपधत्वात् कः, तया, श्रीः समृद्धिश्च यशश्च दया च ताभिः श्रीः शोभा यस्यास्तया भूतया यशोदया, लाल्यमानः, संगम्यमानं संगतीभविष्यन्तं, स्वयं कथं भूतः, अम्बरान्तराकाशमध्येऽतिशयेन रंस्यमाना मतिर्यस्य सः, आकाशसंचाररूपक्रीडार्थमित्यर्थः, तं कीदृशम्, उपशमाय नाशाय, दृश्यमाणं संकल्प्यमानं प्रमाय निर्धार्य, तद्बुधार्थमपीत्यर्थः, इति प्रयोजनद्वयमुद्दिष्टं, तदा तस्मिन् समये नवमभूतपूर्वं गरिमाणं गौरवं ततान विस्तृतवान् ।

ननु केवलमाधुर्यानुभवशालिश्रीयशोदादिवात्सल्यरसावेशमयलीलस्य तस्य कुतस्तया स्फूर्तिर्यतस्तृणावर्तागमज्ञानेन निजभारकल्पनमित्यत आह, मानेन प्रमाणेनोचता धीर्यस्य सः, तदानीमुत्पातागमे निजसेवावसरमाज्ञाय सहसैवोपस्थितायामैश्वर्यशक्त्यां बुद्धिवृत्त्या अवधानादित्यर्थः ।

नन्वन्यदा तस्य निजैश्वर्यास्फूर्तौ मायावृतत्वं केनचित् किमिति नाशङ्क्येतेत्यत आह, अधीना वशवर्तिनी माया यस्य सः ।

ननु कदाचिदैश्वर्यस्फूर्तिः कदाचिच्चेत्येवमनियतलीलत्वं कथं तस्येति तत्राह, मायोगरुचिर इति, मा शोभा सौन्दर्यं तस्या योगेन रुचिं राति ददाति, गृह्णातीति वा सः, निखिलशक्तिकदम्बसेव्यमानस्य तस्य यथा यथा लीलायाः सौन्दर्येण रोचकत्वं भवति तथा तथैवावसरे स्वशक्त्यनुमोदनमित्यर्थः, तेन न केवलमसुराद्यागमे तत्तद्बुधार्थं स्वजनपालनार्थं चैश्वर्यसुखानुभविभक्त्यागमे च तत्प्रसादार्थं निजमहैश्वर्यस्फुरणं किंतु माधुर्यास्वादो यथा न व्याहन्येत प्रत्युत प्रणयगाढतया निजसंबन्धतया मनस्यंतिदार्ढ्येन सनर्म विस्मयकौतुकासक्त्या परिपुष्यतैव, तथा निजनिखिलकान्ताचक्रवर्तिनीनां महामाधुरीविवर्तवर्तिनीनां श्रीराधिकादीनामपि संसदि दशावतारशेषशय्या†दिलीलाविष्कारार्थमपीत्यलं विस्तरेण ।

ननु यदि तदानीमैश्वर्यं स्फुरितं तदा वामनाद्यवतारेषु त्रिविक्रमादिरूपवत् तद्बुधानुरूपं बृहत् स्वरूपं किमिति नाविश्चक्रे तत्राह रुचिरोपितेति, रुच्या कान्त्या रोपिता नरदारकस्येव लीला येन सः, बालकवपुषैव तादृशदुष्टवधे विस्मयवैलक्षण्यं स्यात्, माधुर्यास्वादविघातश्च न भवेदिति भावः ।

नन्वीदृशानेकप्रयोजनकृत्कार्यचातुरी सहसैव तस्य कथमभूदिति तत्राह, ज्ञानघन इति, प्रयोजनान्तरमप्याह, अज्ञांस्तृणावर्तादीन् भ्रमयन्, बालकाकारज्ञापनेन भ्रान्तान् कर्तुं, तथापि तेष्वपि मुक्तिदायित्वेन दयालुत्वमाह, अघनोदकः, अघं संसारदुःखं नुदति दूरीकरोतीति सः, न च बालत्वेऽपि सिंहबालस्येवासुरान् प्रति भयानकत्वप्रदर्शनमित्याह, कृतप्रा-

१ त्यज्यते सुगमं प्रायष्टीकाकारेण सर्वदा ।
इयं शैली बुधैरुक्ता सर्वत्रेति विनिश्चयः ॥

*—न्यमननस्या—इति पा० ।
†—शय्या—इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कृतचरित इति, अत एव न चरितः संचरित ऊहस्तर्को यत्र सः ॥ १८ ॥

मत्कृते मम कथं जनयित्री
वात्यया परिभवं समुपैतु ।
इत्यमङ्कगत एव स तादृक्
स्तोक एव बहु दुर्वह आसीत् ॥ १९ ॥

भारप्रकटने मुख्यं प्रयोजनमाह, मत्कृत इति ॥ १९ ॥

सा च तदा तदाक्रमणपीडितापीडिता भुवनजनैर्वेत्सलतया लतया फलभरनतया सदृशी कथंचिदेकरसं चिदेकरसं तमात्मजमात्मजवेन स्खलन्तं तत्रैवोपवेशयामास ॥ २० ॥

भुवनजनैः सर्वैरपि, ईडिता स्तुता, कथंचित् कृच्छ्रेण, उपवेशयामास, एकरसमेकरूपस्वरसं चिदेकरसं तदानीं ज्ञानैकवीर्यं, "शृङ्गारादौ विषे वीर्यं गुणे रागे द्रवे रस" इत्यमरः ॥२०॥

अथ भगवदिच्छयाच्छया क्षुरितमानसा मानसारतयाविवेकेनैव नैव चिन्तयित्वा विहायापि-तं हा-यापितं तं समयमविदती विदती च सहानीतमिति मितिहीनप्रभावं प्रभावन्तं गृहमध्ये प्रविश्य यदा कार्यान्तरनियुक्ता तस्थुषी ॥ २१ ॥

अथ सा यदा कार्यान्तरनियुक्ता तस्थुषी स्थितवती तस्मिन्नेवावसरे तृणावर्ताख्यः कोऽपि वात्याविवर्त आविरासीदित्यन्वयः । अच्छया निर्मलया भगवदिच्छया हेतुना मानस्य पुत्रातिभरप्रमाणस्य सारतया निबिडतया, अविवेकेनैव क्षुरितं मानसं यस्याः सा, अत एव तं पुत्रं विहाय बहिरङ्गणे स्थापयित्वापि नैव चिन्तयित्वा, हा खेदे यापितं गमितं तं घोरं समयम्, अविदती, अजानती ।

किंच,

अङ्गनाद्यदा गृहं प्रविष्टवती तदैव पुत्रमपि सह स्वेनैवानीतं विदती भ्रमादेव जानती ।

ननु कथं तादृशीनामेवं भ्रमस्तत्राह, मितिः प्रमाणं तया हीनः प्रभावो यस्य तं, तदिच्छाप्रभावेणैव भ्रमोऽपि जनित इति भावः ।

ननु विकटवात्यया बहिः स्थितस्य तस्यातिसुकुमारत्वेन परिभवः संभवेत्, तत्र नहि नहीत्याह, प्रभावन्तम्, ऐश्वर्यावेशेन देदीप्यमानम् ॥ २१ ॥

तस्मिन्नेवावसरे युगपद्विप्रयुक्तनागनागरीनिकुरम्बस्य दीर्घोष्णो निश्वास इव काललोहकारेणास्फालिताया भूभस्त्रायाः समुच्छ्वास इव युगपदेव दिङ्मातङ्गानां श्रवणशूर्प्पास्फालनतः कम्पमानस्य नभसः स्यन्द इव ॥ २२ ॥

युगपदेककालमेव विप्रयुक्तानां विरहिणीनां नागनागरीणां समूहस्य, निश्वास इत्यतिकटुत्वेन, भूभस्त्राया इत्यतिविततत्वेन, स्यन्दः चरणं, विदीर्यापरितोऽधः पतनमिति यावत्, इत्यतिभयानकत्वेन ॥ २२ ॥

वातात्मकोऽपि पित्तकफव्याधिरिव रजस्तमोबहुलः ॥ २३ ॥

वातधातोः सात्त्विकत्वेनायुर्वेदशास्त्रे प्रोक्तत्वाद्विरोधः, पित्तकफयोस्तु राजसत्वतामसत्वाभ्यां, पक्षे रजो धूलिस्तमोऽन्धकारः ॥ २३ ॥

खल इव बहिः शर्करावर्षी, अन्तर्दुरधिगमः; मद इवान्धंकरणः, पित्तज्वर इव महावेगः, संग्राम इव प्रसरत्करेणुसंघातकृतान्धकारः ॥ २४ ॥

शर्करा सिता कणी[1] च, प्रसरद्भिः करेणूनां हस्तिनां संघातैः कृतोऽन्धकारो यत्र, पक्षे प्रसरन्ति कानि सुखानि येभ्यस्तथाभूतै रेणुसंघातैरिति ॥ २४ ॥

पञ्चभूतात्मकतामपनीय, एकभूतात्मकं कुर्वन्निव त्रिभुवनं कंसप्रहितस्तृणावर्ताख्यः ।
ऊर्ध्वोर्ध्वावर्तनृत्यत्प्रचुरतृणरजःशर्करापूरदूर-
भ्रंशैरभ्रंलिहाग्रो ग्लपितजनतनुः कोऽपि वात्याविवर्तः ।
कल्पान्तप्रज्वलिष्यत्फणिपतिवदनव्यूहवह्निस्रुदीर्णैः
द्यौर्णां निर्भिद्य धूमैरिव भुवनजनानन्वयन्नाविरासीत् ॥ २५ ॥

एकभूतात्मकं पवनमयम् । कीदृशः, ऊर्ध्वोर्ध्वं, उपर्युपरि, आवर्तो भ्रमिः, तत्र नृत्यतामिव तृणरजःशर्करापूराणां दूरतो भ्रंशैर्ग्लपिता जनानां तनवो येन सः । कल्पान्ते प्रकर्षेण ज्वलिष्यन् यः फणिपतेरनन्तस्य वदनव्यूहतो वह्निस्तस्य धूमैरिव द्यौर्णां निर्भिद्य, उपरिगतभुवनस्यजनान् । अन्वयवन्धीकुर्वन् ॥ २५ ॥

अयमेति महानिलोऽसुरः
स्वयमेव स्वविनाशकारणम् ।
उररीकृतमिति प्रभु-
र्गरिमाणं न तथा ततान सः ॥ २६ ॥

न तथेति, पूर्वं यथा मातुरङ्के तथा न, किंतु तद्बलानुरूपं तु ततानैवेत्यर्थः, अन्यथातिलाघवेन सद्य एवात्युच्चदेशोचयने स्वस्य श्रमः संभवेदिति ॥ २६ ॥

१ कणीशब्दोऽपि कणिकायामस्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवमन्धतमसान्धतमसासाद्रूप्यं गतेषु सकलेषु परितस्तृणरजःशर्करावर्षे च महति हतिकारके सति भुवनमध्यमध्यवस्थाय चिन्तयत्सु पुरजनेषु च माचा यथैवोपवेशितं तथैवाकुतोभयस्य कुतोभयस्य तथापीति निरातङ्कं तं कञ्जनयनं नयन्दितभुवनजनं भुवनजनन्दिकरचरणतलं रणतलं गतानां गतानाञ्छानां सुरद्रुहामन्तकमन्तकरणाय स्वस्य स महासुरो हरति स्म ॥ २७ ॥

अन्धतमसेन गाढध्वान्तेन हेतुना, अन्धतमैरतिशयान्धैः सारूप्यं तुल्यरूपतां गतेषु, परितः सर्वतः, हतिकारके घातके सति, तं कञ्जनयनं कमलनेत्रं, स्वस्यान्तकरणाय मरणाय, महासुरो हृतवान्, नयेन नीत्या तादृशदानवबधनिबन्धनतादृशचातुर्यमय्या नन्दिता भुवनजना देवादयो येन तं, भुवनं जलं तत्र जातं कमलं तद्वन्दि, शैत्यसौरभ्यसौकुमार्यादिसमृद्धियुक्तं करचरणतलं यस्य तम्, अपीत्यतिदुरात्मत्वेन तस्य निर्दयत्वमुक्तं, किंच, सुरद्रुहामसुराणामन्तकं, कीदृशानां, रणतलं गतानाम्, "आङ्कि आयामे," आञ्छ आयामः, न-आञ्छोऽनाञ्छः, गतोऽनाञ्छो येषां, शौर्याद्यायामवतामित्यर्थः ॥ २७ ॥

स च बालब्रह्म ब्रह्मरुद्रादिसेवितो वितोदः प्रकटामोदो मोदोद्धुरः पटे निबध्य नीयमानोऽनल इव कण्ठशोधनार्थं कण्ठे कृतः कालकूट इव स्वयं निमन्त्र्यानीयमानो मृत्युरिव तेन ह्रियमाणः ॥ २८ ॥

वितोदो गतव्यथः, प्रकटो ब्रह्मरुद्रादिलोकपर्यन्तं व्याप्तया संचार्यमाण आमोदोऽङ्गसौरभ्यं यस्य सः, मोदेन तद्वोत्साहमयहर्षेणोद्धुरः, तेन तृणावर्तेन, पटे निबध्येति तेनाकर्षणं कृष्णस्य, कण्ठेति कृष्णेनाकर्षणं बाल्याद्वीत्येव तत्कण्ठस्य स्वयमिति, ततश्च तस्य मृत्युरेवेत्युक्तम्, अनलस्य जलादिना प्रतीकारोऽस्तीति कालकूट इति, तस्यापि मन्त्रादिनेति चेन्मृत्युरिति ॥ २८ ॥

सुरपुरपुरन्ध्रीकृतदर्शनार्तिपूर्तय इव तत्स्वरूपयानिःश्रेणिकया नाकतलमुज्जिगमिषुरिव कियद्दूरमुद्यातः प्रियसुहृदमिव तं मृगमदमेचकितविसवल्लीवल्लीलेन स्तोकेनैव भुजवलयेनाधिकण्ठतटं तथा शनैः शनैर्निपीडयामास यथास्य निर्गच्छन्तोऽप्यसवो विलम्ब्य विलम्ब्य सपदि चूर्णपेषं पिष्ट्वा इव निर्जग्मुः, अहो कौशलं कुशलिनः खेलाशिशोस्तस्य भगवतः ॥ २९ ॥

* मारणाय इति पा० ।

सुरपुरस्य पुरन्ध्रीभिः कृता या दर्शन आर्तिस्तत्कण्ठा तस्याः पूर्तये, वात्याकारया निःश्रेणिकया, सिढीति ख्यातया, मृगमदेन मेचकितायाः श्यामलीकृताया विसवल्ल्या मृणाललतायाः इव लीला यस्य तेन, शनैः शनैरिति एकदैवातिपीडने सहसैव तत्प्राणत्यागे सति दूरतो वेगत एव तद्वपुषः पतने स्वश्रम आपद्येतेति भावः, चूर्णपेषमिति "शुष्कचूर्णरूक्षेषु पिषः" इति णमुल्, चूर्णवत् पिष्ट्वा इत्यर्थः, विलम्ब्य विलम्ब्य जग्मुरिति, तेन शनैः शनैस्तद्वपुषो निपतने सति निःश्रेणिकयेवावतरणमपि भगवतः सुखेनैवाभूदिति भावः॥२९॥

॥ शेषमये ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

ब्रह्मसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

तत्र द्वानवतितमादिपरिच्छेदाः ।

९२—यथा सर्वसन्देहवादो जडद्रव्यसिद्धान्तमेव मूलस्तम्भमिवाश्रयते तथैनमेवावष्टम्भमाश्रित्याखिला अधर्म्या नास्तिक्यस्य धर्मलोपवादस्य च कल्पना उच्छ्रयन्ते स्म ॥ किं बहुना जडद्रव्यस्य शून्योपादानकत्वमशक्यकल्पनाकमवधार्य पुरातनकोविदाः परमेश्वरसत्तां स्वीकुर्वाणा अपि जडद्रव्यमीश्वरवच्चित्यमसृष्टमेव मेनिरे जडद्रव्यपक्षश्च नास्तिकानां तथा सुप्रसिद्धं चिरमित्रमस्ति यथाऽनुक्तमेव ज्ञायेत। यतोहि तेषामखिला घोरसिद्धान्तास्तथा सुस्पष्टं तदेकसिद्धान्ताश्रिताः प्रतीयन्ते यथा सुविशालगृहनिर्मितिर्मूलस्तम्भे इव सकृदपनीतमात्रे एव तस्मिन्सिद्धान्ते ते सर्वे विवशा भूत्वा सहसैव विध्वंसेरन् । तदेतेषामपक्षपटानां बाधितानां च निखिलनास्तिकमतभेदानां सविस्तरं निरूपणं त्वत्र व्यर्थमेव ।

९३—यद्यप्येतत् संभवति यदपुण्याः पापधियो नरा आत्मापरपर्यायाभौतिकाधिकरणावच्छेदकाण्यात्मनोऽपि शरीरवज्जरामरणयोग्यत्वस्य विधायकानि वाङ्मयप्रपञ्चरचनायामीश्वरीयपूर्वानुसंधातृत्वस्वेच्छाविधायकत्वादेरन्यथासिद्धिमुत्प्रेक्ष्य स्वतःसिद्धजडद्रव्यस्यैवाखिलपदार्थमूलतायाः प्रतिपादकानि चात एव स्वच्छन्दाकुलतीनि शास्त्रान्तराण्येव बहु मन्येरन् शृणुयुश्च तेषामेव सांसारिकसकलघटनासु परमेश्वरसंविधायकत्वमस्वीकुर्वाणानां सर्वस्य कार्यजातस्याकस्मिकत्वमेवोद्घोषयतां पण्डितंमन्यानां वचांसि ॥ तथापि सुसिद्धान्तविशारदाः सुधियो धर्मविमुखान् जडद्रव्ये एवैतावन्तं महिमभारमादधतस्सर्वं दृश्यजातं तदाश्रयतामेव प्रापयितुं यावच्छक्यं प्रयतमानांश्च जनान् पश्यन्तस्सुयुक्त्यनुभवादिघनासारैस्तेषां दुर्गभूते मुख्यपुरुषे तस्मिन्सिद्धताभित्तिवत्स्वयमेव विशीर्णे नि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राश्रयानशरणांश्च तान् अवलोक्य भृशं प्रहृष्येयुरेवेति मन्ये। यतोहि भोगपरायणा हावाचार्यादनुयायिनश्च जडद्रव्याभिमानिनस्तेन विना स्वार्थमुपपादयितुमप्यपि नेशते प्रत्युत विपक्षैरनायासेनैव पराभूयेरन्।

९४—किंचायं जडद्रव्यसिद्धान्तो न केवलं चार्वाकदैववादयोरेव मूलमपितु मूर्तिपूजासंप्रदाया अप्येतन्मूलकाएव प्रतीयन्ते। यदि जनाः सूर्यनिशाकराद्यखिलप्रत्यक्षविषयान् केवलमात्मसंस्पर्शज्ञानविशेषात्मकानेवाज्ञास्यन्त तर्हि न कदाचिदपि स्वज्ञानरूपांस्तानभिवादनपुरस्सरमपूजयिष्यन्त किंतु सर्वाधारभूतमखिलानुभवजनकमतीन्द्रियं सनातनं च परमात्मानमेवासेविष्यन्त।

९५—स एव बाधितसिद्धान्तो धर्ममार्गं प्रविशन् खीष्टधर्मे बहून् दोषाभासान् जनयति स्म। यथा सोसिनीयैरन्यैश्चेशवीयापसदैः सर्वप्रेतोज्जीवनविषयेऽनन्ता आक्षेपाः प्रोद्भाव्यन्ते। किमेतेषां भूयिष्ठाः सत्यसंकाशा दोषाभासाः शरीरं विविधाकारपरिवर्तनशालि भौतिकैकाधिकरणात्मकमेव नत्वाकारादिज्ञेयगुणात्मकमितिसिद्धान्तमेव नाश्रयन्ते। यदि सर्ववादमूलैकत्वकं भौतिकाधिकरणमेवापास्य शरीरपदेन सर्वसरलजनप्रसिद्धः साक्षात्प्रत्यक्षगोचरो वृत्तीनां ज्ञेयगुणानां वा समुदाय एव विवक्ष्येत चेत्तर्हि तेषां दुर्धर्षतमा अप्याक्षेपाः सहसैव विलीयेरन्।

९६—तदेतज्जडद्रव्यं संसारात्सङ्कुचिस्मारितमात्रमात्मना सह भूयिष्ठानि चार्वाकमतान्यधार्मिकमतान्तराणि चापकर्षत्। तथासतीशवीयानां तत्त्वज्ञानविदां च पत्ते कण्टकायमाना दुष्करोद्धारा अनन्ता विवादा भ्रामकप्रश्नाश्चानायासेनैव दत्तोत्तरा भवेयुः। यद्यप्युक्तसिद्धान्तखण्डनमुद्दिश्य कृतानां हेतुवादानां याथार्थ्यमयुक्तिकत्वे यथा मम स्फुटं प्रतीयेते तथाऽन्येषां केषां चिच्च प्रतीयेतां तथापि धर्मशान्तिविज्ञानकामास्सूरयस्तेषां सूपपत्त्वमेवावश्यमभिकाङ्क्षेरन्नित्याशासे।

केशवशास्त्री।

There consequently remain only two duties to the student, interrogation and acceptance. Of these, interrogation is the putting of questions in order to attain knowledge not yet attained. Acceptance is assent to the matters stated by the sacred teacher. These (Bauddha nihilists) are excellent in assenting to that which the religious teacher enounces, and defective in interrogation, whence their conventional designation of Mádhyamikas (or mediocre').

Certain other Buddhists are styled Yogáchárас, because while they accept the four points of view proclaimed by the spiritual guide, and the void of external things, they make the interrogation; Why has a void of the internal (or baselessness of mental phœnomena) been admitted? For their technology is as follows. Self-subsistent cognition must be allowed, or it will follow that the whole universe is blind. It has conformably been proclaimed by Dharmakírtti: "To one who disallows perception the vision of objects is not competent."

An external *percipibile* is not admissible, in consequence of the following dilemma. Does the object cognitively apprehensible arise from an entity or not? It does not result from an entity, for that which is generated has no permanence. Nor is it non-resultant, for what has not come into being is non-existent. Or (we may proceed) do you hold that a past object is cognitively apprehensible, as begetting cognition? If so, this is childish nonsense, because it conflicts with the apparent presentness of the object, and because on such a supposition the sense organs (and other imperceptible things) might be apprehended. Further (we ask), Is the *percipibile* a simple atom, or a complex body? The latter it cannot be, this alternative being ejected by the dilemma as to whether part or whole is perceived. The former alternative is equally impossible, an atom being supersensible, and it not being able to combine simultaneously with six others; as it bas been said:

SARVA-DARSANA-SAṄGRAHA

CHAPTER II.

THE BAUDDHA SYSTEM.

(Continued from page 194.)

In consequence, then, of these four points of view, when all ideas are come to an end, final extinction, which is a void, will result. Accordingly we have overtaken our end, and there is nothing to be taught to us.

॥ सर्वदर्शनसङ्ग्रहः ॥

तदेवं भावनाचतुष्टयवशाच्चिखिलवासनानिवृत्तौ परनि-

व्वाणं शून्यरूपं सेत्स्यतीति वयं कृतार्था नास्माकमुपदेश्यं किञ्चिदस्तीति शिष्यैस्तावद्योगश्चाचारश्चेति द्वयं करणीयम्। तत्राप्राप्तस्यार्थस्य प्राप्तये पर्य्यनुयोगो योगः, गुरूक्तार्थस्याङ्गीकरणमाचारः। गुरूक्तस्याङ्गीकरणादुत्तमाः पर्य्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः। गुरूक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्यान्तरस्य शून्यत्वञ्चाङ्गीकृतं कथमिति पर्य्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा। एषा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्य्यम्, अन्यथा जगदान्ध्यं प्रसज्येत। तत् कीर्त्तितं धर्म्मकीर्त्तिना। अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति। बाह्यं ग्राह्यं नोपपद्यत एव विकल्पानुपपत्तेः। अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा, न पूर्व्वः उत्पन्नस्य स्थित्य-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"If an atom could simultaneously combine with six, it would have six surfaces.

And each of these being taken separately, there would be a body of atomic dimension."

Intellect, therefore, as having no other *percipibile* but itself, is shown to be itself its own *percipibile*, self-subsistent, luminous with its own light, like light. Therefore it has been said:

"There is naught to be objectified by intellect; there is no cognition ulterior thereto;

There being no distinction between percept and percipient, intellect shines forth of itself alone.

The identity of percipient and percept is inferrible thus: That which is cognised by any cognition is not other than that cognition, as soul for instance is not other than the cognition of soul; and blue and other momentary objects are cognised by cognitions. For if there were a difference (between percept and percipient), the object could not now have any connection with the cognition, there being no identity to determine a constancy of connection, and nothing to determine the rise of such a connection. As for the appearance of an interval between the object and subject consciousnesses, this is an illusion, like the appearance of two moons when there is only one. The cause of this illusion is ideation of difference in a stream without beginning and without interruption; as it has been said:

"As invariably cognised together the blue object and the cognition thereof are identical,

And the difference should be accounted for by illusory cognitions, as in the example of the single moon."

And again:

"Though there is no division, the soul or intellect, by reason of illusory perceptions

Appears to possess a duality of cognitions, of percepts and of percipient."

Nor must it be supposed that (on this hypothesis) the juice, the energy, and the digestion, derivable from an imaginary and an actual sweetmeat will be the same for it cannot be questioned that though the intellect be in strictness exempt from the modes of object and subject, yet there is competent to it a practical distinction in virtue of the succession of illusory ideas without beginning, by reason of its possessing divers modes percept and percipient conformably to its illusory supposition of practical agency, just as to those whose eyes are dim with some morbid affection a hair and another minute object may appear either diverse or identical; as it has been said:

"As the intellect, not having object and subject modes, appears by reason of illusory cognitions.

Illuded with the diverse forms of perception, percept and percipient;

So when the intellect has posited a diversity, as in the example of the differences of the cognition *of* a hair and the like,

Then it is not to be doubted that it is characterised as percipient and percept."

Thus it has been evinced that intellect, as affected by beginningless ideation, manifests itself under diverse forms.

When, therefore, by constancy of reflection (on the four points of view) aforesaid, all ideation has been interrupted, there arises knowledge purged from the illusions which take the form of objects, such illusions being now melted away, (and this is technically called *Mahodaya* (the grand exaltation, emancipation).

Others again, (the Sautrāntikas) hold that the position that there is no external world is untenable, as wanting evidence. Nor (they contend) can it be maintained that invariability of simultaneous cognition

---

भावात्, नापरः अनुत्पन्नस्यासत्त्वात् । अथ मन्येथा अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति, तदपि बालभाषितं, वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च । किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः, अवयविरूपो वा । न चरमः कृत्स्नैकदेशविकल्पादिना तद्विराकरणात् । न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च । यथोक्तम्, षट्केन युगपद्योगात् परमाणोः षडंशता । तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रक इति । तस्मात् स्वव्यतिरिक्तग्राह्यविरहात् तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम् ॥ तदुक्तम्, नान्योऽनुभाव्यो बुद्धास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते इति । ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यद्वेद्यते येन वेदनेन तत् ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते तैश्च नीलादयः । भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात्, यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एक एवास्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः, अत्राप्यनादिरविच्छिन्नप्रवाहो भेदवासनैव निमित्तम् । यथोक्तम्, सहोपलम्भनियमादभेदो नीलतद्धियोः । भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय इति । अविभागेऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति च । न च रसवीर्यविपाकादि समानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुरायाऽपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिद्यग्राह्यग्राहकाकारकलुषतया तिमिरादुपप्लुतत्वाणां केशेन्दुनाडीज्ञाने भेदाभेदवत् अनादुपप्लववासनासामर्थ्याद्ग्राह्यस्योपपत्तेः पर्य्यनुयोगायोगात् । यथोक्तम्, अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते । विभक्तलक्षणग्राह्यग्राहकाकारवि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

s an evidence, for this simultaneous cognition which you accept as proof of the identity of subject and object, is indecisive, being found in dubious and in contrary instances. If you rejoin (they proceed): Let there be a proof of this identity, and let this proof be invariability of simultaneous cognition, we refuse this, because inasmuch as cognition must ultimately have some object, it is manifested in duality, and because such invariability of simultaneity as to time and place is impossible. Moreover (they continue) if the object, blue or whatever it be, were only a form of cognition, it should be presented as *Ego* not as *Hoc aliquid*, because the cognition and the object would be identical. Perhaps you will say: A blue form consisting of cognition is illusorily presented as external and as other than self, and consequently the Ego is not suggested, and so it has been said:

"This side of knowledge which appears external to the other portion,
This appearance of duality in the unity of cognition is an illusion."

And again:

"The principle to be known as internal also, manifests itself as if it were external."

To this we reply (say the Sautrāntikas): This is untenable, for if there be no external objects, there being no genesis of such, the comparison "as if they were external" is illegitimate. No man in his senses would say, 'Vasu-mitra looks like the son of a childless mother.' Again, if the manifestation of identity be proved by the illusoriness of the presentment of duality, and the presentment of duality be proved illusory by the manifestation of identity you are involved in a logical circle. Without controversy we observe that cognitions take external things, blue or whatever they may be, as their objects, and do not take merely internal modifications as such, and we see that men in their everyday life overlook their internal states. Thus this argument which you adduce to prove that there is difference between subject and object turns out a mere absurdity like milky food made of cow-dung. When, then, you say "as if it were external" you must already suppose an external *percipibile*, and your own arrow will return upon you and wound you.

If any one object that the externality of an object synchronous with the cognition is inadmissible, we (Sautrántikas) reply that this objection is inadmissible, inasmuch as the subject in juxtaposition to the sensory imposes its form upon the cognition then in production and the object is inferrible from the form thus imposed. The interrogation and response on this point have been thus summarised:

"If it be asked, How can there be a past *percipibile*? They recognise perceptibility,
And a competent inferribility of the individual thing is its imposition of its form."

To exemplify. As nourishment is inferred from a thriving look, as nationality is inferred from language, and as affection is inferred from flurried movements, so from the form of knowledge a knowable may be inferred. Therefore it has been said:

"With half (of itself) the object moulds (the cognition), without losing the nature of a half,
The evidence therefore of the recognition of a knowable is the nature of the knowable."

For consciousness of the cognition cannot be the being of the cognition, for this consciousness is everywhere alike, and if indifference were to attach itself to this, it

---

प्लवा ॥ तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत् । यदा तद्रा न सञ्चोद्या याह्ययाहकलक्षणेति ॥ तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम् । ततश्च प्रागुक्तभावनाप्रचयबलाविखिलवासनोच्छेदे विगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो महोदय इति । अन्ये तु मन्यन्ते यथोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात् । न च सहोपलम्भनियमोऽभेदे प्रमाणमिति वक्तव्यं वेद्यवेदकयोर्भवता भेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षवृत्तिकत्वात् । ननु भेदे सहोपलम्भनियमात्मकं साधनं स्यादिति चेद न ज्ञानस्यान्ततः सवृत्तिकतया भेदेन प्रतिभासमानत्वात् एकदेशत्वैकान्तत्वलक्षणसहत्वनियमासम्भवाच्च, किञ्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादव्यतिरेकात् । अथोच्येत ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्वेदेन प्रतिभासत इति न तत्राहमुल्लेख इति। तथोक्तम्, परिच्छेदान्तराद्योऽयं भागो बहिरवस्थितः।

ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लव इति ॥ यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत इति च ॥ तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः, न हि वसुमित्रो वन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत भेदप्रतिभासस्य भ्रान्तित्वे अभेदप्रतिभासस्य प्रामाण्यं तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च, अवि संवादाचौलादिकमेव संविदा वा बाह्यमेवोपादत्ते नाबाह्यमेव, जगत्युपेक्षते चान्तरमिति व्यवस्थादर्शनाच्च । एवञ्चायमभेदसाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत्, अतो बहिर्वदिति वदता बाह्यं बाह्यमेवेति भावनीयमिति भवदीय एव बाणो भवन्तं प्रहरेत् । ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम्, इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः, अतएव पर्य्यनुयोगपरिहारो समर्थाहिपाताम् । भिन्नकालं कथं बाह्यमिति चेद् बाह्यतां विदुः । हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

would reduce all things to indifference. Accordingly the formal argument for the existence of external things: Those things which while a thing exists appear only at times, all depend upon something else than that thing; as, for instance, if I do not wish to speak or to walk, presentments of speaking or walking must suppose others desirous of speaking or walking; and in like manner the presentments of activity under discussion, while there exists the recognition of a subject of them, are only at times manifested as blue and so forth. Of these the recognition of a subject is the presentation of the Ego, the manifestation as blue and so forth is a presentment of activity, as it has been said:

"That is a recognition of a subject, which is conversant about the Ego:

That is a presentment of activity, which manifests blue and the rest."

Over and above, therefore, the complement of subject-recognitions let it be understood that there is an external object world perceptible, which is the cause of presentments of activity; and that this external world does not rise into being only from time to time on occasion of presentments resulting from ideation.

According to the view of the sensationalists *(vijñá-vádin)*, ideation is a power of generating such and such sensations (or presentments of activity) in subject-recognitions which exist each as a single stream. The maturescence of this power is its readiness to produce its effect; of this the result is a presentment (or sensation); the antecedent momentary object (sensation) in the mental train is accepted as the cause, no other mental train being admitted to exercise such causality. It must therefore be stated that all momentary objects (fleeting sensations) in the subject-consciousness are alike able to bring about that maturescence of ideation in the subject-consciousness, which maturescence is productive of presentments of activity. If any one (of these fleeting sensations) had not this power, none would possess it, all existing alike in the stream of subject-recognitions. On the supposition that they all have this power, the effects cannot be diversified, and therefore any intelligent man, however unwilling, if he has a clear understanding, must decide, without putting out of sight the testimony of his consciousness, that to account for the occasional nature (of sense percepts) the six cognitions of sound, touch, colour, taste and smell, of pleasure and so forth, are produced on occasion of four conditions. These four conditions are known as (1) the data, (2) the suggestion, (3) the medium, and (4) the dominant (organ). Of these, the form of blue or the like arises from the condition of blue data in the understanding in which there is a manifestation of blue or the like, which manifestation is styled a cognition. The resuscitation of forms or cognitions arises from suggestion as a condition. The restriction to the apprehension of this or that object arises from the medium, light for instance, as a condition, and from the dominant, the eye for example, as another condition. The eye, as determinant of cognition of community of taste &c., in the cognition of which we are conscious, is able to become dominant; for in every-day life he who determines is regarded as dominant. We must thus recognise four causes of pleasure and the rest which constitute the understanding and its modifications.

So also the universe which consists of mind and its modifications is of five kinds, intitled, (1) the sensational (2) the perceptional, (3) the affectional, (4) the verbal, and (5) the impressional. Of these, the sensible world

---

तथाच यथा पुष्पा भोजनमनुमीयते यथा च भाषया देशो यथा वा सम्भ्रमेण खेदः, तथा ज्ञानाकारेण ज्ञेयमनुमेयम् । तदुक्तम्, अर्द्धेन घटयत्येनां न हि मुक्त्वार्द्धरूपताम् । तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपतेति ॥ न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्व्वत्राविशेषात् तान्तु सारूप्यमाविशत् सरूपयितुं घटयेदिति च । तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि क्वादाचित्काः ते सर्व्वे तदतिरिक्तसापेक्षा यथा अविवक्षति अजिगमिषति मयि वचनगमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथाच विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखिना दृति । तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम् । यथोक्तम्, तत् स्यादालयविज्ञानं यद्ववेदहमास्पदम् । तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेदिति ॥ तस्मादालयविज्ञानसन्तानातिरिक्तः क्वादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो याह्य एव न च वासनापरिपाकप्रत्ययः क्वादाचित्कत्वात् कदाचिदुत्पद्यत इति वेदितव्यम् ॥ विज्ञानवादिनये वासना नामैकसन्तानवर्त्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः तस्याश्च स्वकार्य्यात्पादं प्रत्याभिमुख्यं परिपाकः तस्य च प्रत्ययः कारणं स्वसन्तानवर्त्तिपूर्व्वक्षणः कारणत्वेन कल्पीक्रियते सन्तानान्तरनिबन्धनत्वानङ्गीकारात् । ततश्च प्रवृत्तिज्ञानजननकालविज्ञानवर्त्तिवासनापरिपाकं प्रति सर्व्वेऽप्यालयविज्ञानवर्त्तिनः क्षणाः समर्था एवेति वक्तव्यम्, न चेदेकोऽपि न समर्थः स्यादालयविज्ञानसन्तानवर्त्तित्वाविशेषात्, सर्व्वे समर्था दृति पक्षे कार्य्यक्षेपानुपपत्तिः, ततश्च क्वादाचित्कत्वानर्व्वाहाय शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाः षड़पि प्रत्ययाश्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरेणानिच्छताप्यिच्छमतिना स्वानुभवमनाक्काङ्क्ष परिच्छेत्तव्यम् । ते चत्वारः प्रत्ययाः प्रसिद्धा आलम्बनसमनन्तरसहकार्य्यधिपतिरूपाः, तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य] नीलालम्बनप्रत्ययाच्चीलाकारता भवति समनन्तरप्रत्ययात् प्राचीनज्ञानोद्बोधरूपता सहकारिप्रत्ययादालोकाच्चतुर्थोऽधिपतिप्रत्ययाद्विषयग्रहणप्र-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(rūpa-skandha) is the sense organs and their objects, according to the etymology viz. that objects are discriminated *(rúpyante)* by these. The perceptional world is the stream of subject-recognitions and of presentments of activity. The affectional world is the stream of feelings of pleasure and pain generated by the two aforesaid worlds. The verbal (or symbolical) world is the stream of cognitions conversant about words the words 'cow' and so forth. The impressional world is the miseries, desire, aversion &c., caused by the affectional world, the lesser miseries, conceit, pride &c., and merit and demerit.

Reflecting, therefore, that this universe is pain, an abode of pain, and an instrument of pain, a man should acquire a knowledge of the principles, the method of suppressing this pain. Hence it has been been said: "The principles sanctioned by Buddha are to the wise man the four methods of suppressing the aggregate of pains." In these words the sense of pain is known to every one, the 'aggregate' means the cause of pain. This aggregate is twofold as (1) determined by cognition; or (2) determined by causation. Of these, there is an aphorism comprising the aggregate determined by cognition, "which other causes resort to this effect;" the condition of these causes thus proceeding is cognition; the concurrence of causes is the result of this only, and not of any conscious being,—such is the meaning of the aphorism. To exemplify this. A germ, caused by a seed, is generated by the concurrence of six elements. Of these, earth as an element produces hardness and smell in the germ; water as an element produces viscidity and moisture; light as an element produces colour and warmth; air as an element produces touch and motion; ether as an element produces expansion and sound; the season as an element produces a fitting soil &c. The aphorism comprising the aggregate determined by causation is: "With the Táthágatas the nature of these conditions is fixed by production, or by non-production, continuance as a condition, and determination by a condition, conformity of the production to be obtained;" that is to say, according to the doctrine of the Táthágata Buddhists the nature of these conditions, that is, the causal relation between the cause and effect, results from production or from non-production. That which comes into being provided that something exists, is the effect of that as its cause, such is the explanation of the nature (or causal relation). Continuance as a condition is where the effect does not conflict with its cause. The (abstract) affix *tul* (in the word *sthititā*) has the sense of the concrete. Determination by a condition is the determination of the effect by the cause. Here some one might interpose the remark that the relation of cause and effect cannot exist apart from some conscious agent. For this reason it is added that there existing a cause, conformity of the genesis to be undergone to that cause is the nature which is fixed in conditions (that is, in causes and effects); and in all this no intelligent designer is observed.* To illustrate this, the causal determination of a genesis to be gone through is as follows, from the seed the germ, from the germ the stalk, from the stalk the hollow stem, from the hollow stem the bud, from the bud the spicules, from the spicules the blossom, from the blossom the fruit. In this external aggregate neither the cause, the seed and the rest, nor the effect, the germ and the rest, has any consciousness of bringing a germ into being, or of being brought into being by the seed. In like manner in mental facts two causes are to be recognis-

* Cf G. H. Lewes' History of Philosophy, vol. I. p. LXXXV. "We not only see that the architect's plan determined the arrangement of materials in the house, but we see why it must have done so, because the materials have no spontaneous tendency to group themselves into houses; that not being a recognised property of bricks mortar, wood, and glass. But what we know of organic materials is that they have this spontaneous tendency to arrange themselves in definite forms; precisely as we see chemical substances arranging themselves in definite forms, without the intervention of any extra-chemical agency."

तिनियमः, विदितस्य ज्ञानस्य रसादिसाधारण्यप्राप्तेर्नियामकं चतुरधिपतिर्भवितुमर्हति लोके नियामकस्याधिपतित्वोपलम्भात्, एवं चित्तचैत्तात्मकानां सुखादीनां चत्वारि कारणानि द्रष्टव्यानि। एवं चित्तचैत्तात्मकस्कन्धः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकः। तत्र रूप्यन्त एभिर्विषया इति रूप्यन्त इति च व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्रागुक्तस्कन्धद्वयसम्बन्धजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखो विज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धनिबन्धना रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमानादयो धर्माधर्मौ च संस्कारस्कन्धः। तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तच्चिरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं दुःखसमुदायनिरोधमार्गाश्चत्वार आर्यस्य बुद्धस्याभिमतानि तत्त्वानि। तत्र दुःखं प्रसिद्धं, समुदायो दुःखकारणं, स द्विविधः, प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च।

तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं सूत्रम्, इदं कार्यं ये अन्ये हेतवः प्रतियन्ति गच्छन्ति तेषां हेतूनां भावः प्रत्ययत्वं कारणसमवायस्तन्मात्रस्य फलं न चेतनस्य कस्यचिदिति सूत्रार्थः, यथा बीजहेतुरङ्कुरो धातूनां षण्णां समवायाज्जायते। तत्र पृथिवीधातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति, अप्धातुः स्नेहं रसञ्च जनयति, तेजोधातू रूपमौष्ण्यञ्च, वायुधातुः स्पर्शनं चलनञ्च, आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य समुदायस्य च संग्राहकं सूत्रम्, उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता धर्मस्थितिता धर्मनियामकता च प्रतीत्यसमुत्पादानुलोमतेति। तथागतानां बौद्धानां मते धर्माणां कार्यकारणरूपाणां या धर्मता कार्यकारणभावरूपा एषोत्पादादनुत्पादाद्वा स्थिता, यस्मिन् सति यदुत्पद्यते तत् तस्य कारण-

ed. There is a whole ocean of scientific matter before us, but we desist, apprehensive of making our treatise unduly prolix.

Emancipation is the suppression of these two causal aggregates, or the rise of pure cognition subsequent to such suppression. The method (path, road) is the mode of suppressing them. And this method is the knowledge of the principles, and this knowledge accrues from former ideas. Such is the highest mystery. The name Sautrántika arose from the fact that the venerated Buddha said to certain of his disciples who asked what was the ultimate purport *(anta)* of the aphorism *(sūtra)*, As you have inquired the final purport of the aphorism be Sautrántikas.

Certain Bauddhas, though there exist the external world consisting of odours &c., and the internal consisting of colours &c., in order to produce unbelief in these, declared the universe to be a void. These the venerated Buddha styled Práthamika (primary) disciples. A second school attached to the apprehension of sensations only, maintain that sensation is the only reality. A third school who contend that neither (of the foregoing doctrines) is true and maintain that the saying that sensible objects are inferrible is absurd language *(virwldhā bhāshā)* are known under the designation of Vaibhāshikas. Their technical language springs up as follows. According to the doctrine of inferrible sensibles, there being no perceptible object, and consequently no object from which a universal rule can be attained, it will be impossible that any illation should take place, and therefore a contradiction will emerge to the consciousness of all mankind. Objects, therefore, are of two kinds, sensible and cogitable. Of these apprehension is a non-discriminative instrument of knowledge as other than mere representation, cognition which is discriminative is not a form of evidence, as being a merely ideal cognition. Therefore it has been said:

"Apprehension, exempt from ideality, and not illusory, is non-discriminative. Discrimination, as resulting from the appearances of things, is without controversy an illusion.

The perceptible evidence of things is perception; if it were aught else

There could neither be things, nor evidence of things derived from verbal communication, inference, or sense."

Here some one may say: If discriminative cognition be unauthentic, how is the apprehension real objects by one energising thereon and the universal consentiency of mankind, to be accounted for? Let it be replied: This question does not concern us, for these may be accounted for by the possibility of an indirect apprehension of objects, just as if we suppose the light of a gem to be a gem (we may yet handle the gem, because it underlies the light, while if we were to take nacre for silver, we could not lay hold of any silver). The rest has been fully discussed in describing the Sautrántikas (cf. p. 15), and therefore need not here be further detailed.

It should not be contended that a diversity of instruction according to the disciples' modes of thought is not traditional (or orthodox); for it is said in the gloss on the Bodha-chitta:

"The instructions of the leader of mankind (Buddha) accomodating themselves to the character and disposition (of those who are to be taught),

Are said to be diverse in many ways, according to a plurality of methods.

स्य कार्य्यमिति धर्म्मेत्यस्य विवरणं, धर्म्मस्य कार्य्यस्य कारणानतिक्रमेण स्थितिः, स्वार्थिकस्तलप्रत्ययः। धर्म्मस्य कारणस्य कार्य्यं प्रति नियामकता। नन्वयं कार्य्यकारणभावश्चेतनमन्तरेण न सम्भवतीत्यत उक्तं कारणे सति तत् प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्म्मता उत्पादादनुत्पादाद्वा धर्म्माणां स्थिता। न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यते इति सूत्रार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धो बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डालो नालाद्गर्भस्ततः शूकं ततः पुष्पं ततः फलं न चात्र बाह्ये समुदाये कारणं बीजादि कार्यमङ्कुरादि वा चेतीयते, अहमङ्कुरं निर्वर्त्तयामि अहं बीजेन निर्वर्त्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवगन्तव्यम्। पुरःस्थिते प्रमेयाख्या यन्थविस्तरभीरुभिरुपरम्यते॥ तदुभयनिरोधस्तदनन्तरं विमलज्ञानोदयो वा मुक्तिः। तन्निरोधोपायो योगः स च तत्त्वज्ञानं तच्च प्राचीनभावनाबलाद्भवतीति परमं रहस्यम्। सूत्रस्यान्तं पृच्छता कथितं भवन्तश्च सूत्रस्यान्तं पृष्टवन्तः सौत्रान्तिका भवन्त्विति भगवतामिहतया सौत्रान्तिकसंज्ञा सञ्जातेति। केचन बौद्धा बाह्येषु गन्धादिषु आन्तरेषु रूपादिस्कन्धेषु सत्स्वपि तत्रानास्थामुत्पादयितुं सर्व्वं शून्यमिति प्राथमिकान् विनेयानचीकथद् भगवान्, द्वितीयास्तु विज्ञानमात्रयद्दाविष्टा विज्ञानमेवैकं सदिति, तृतीया अनुभयं सन्त्यमित्यास्थिता विज्ञेयमनुमेयमिति, सेयं विरुद्धा भाषेति वर्णयन्तो वैभाषिकाख्यया ख्याताः। एषा हि तेषां परिभाषा समुन्मिषति। विज्ञेयानुमेयत्वाद्वे प्रात्यक्षिकस्य कस्यचिदप्यर्थस्याभावेन व्याप्तिसंवेदनस्यानाभावेनानुमानप्रवृत्त्यनुपपत्तेः सकललोकानुभवविरोधश्च। तत्रश्चार्थो द्विविधः बाह्येऽध्यवसेयश्च, तत्र ग्रहणं निर्विकल्पकरूपप्रमाणं कल्पनापोढत्वात्, अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तं, कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्। विकल्पो वस्तुनिर्भासादसंवादादुपप्लव इति॥ बाह्यं वस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा। न तदस्तु न तन्मानं शब्दलिङ्गेन्द्रियादिजमिति च॥ ननु सविकल्पकस्याप्रामाण्यं कथं ततः प्रवृत्तस्यार्थप्राप्तिः संवादश्चोपपद्येयाता-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

For as deep or superficial, and sometimes both deep and superficial,

Instructions are diverse, and diverse is the doctrine of a universal void which is a negation of duality.'

It is well known in Buddhist doctrine that the worship of the twelve inner seats is conducive to felicity.

"After acquiring wealth in abundance, the twelve inner seats,

Are to be thoroughly reverenced; what use of reverencing aught else below?

The five organs of knowledge, the five organs of action,

The common sensory, and the intellect, have been described by the wise as the twelve inner seats."

The system of the Buddhists is described as follows in the Viveka-vilása:

"Of the Bauddhas Sugata (Buddha) is the deity; and the universe is momentarily fluxional;

The following four principles in order are to be known by the name of noble truth:

Pain, the abode, and from them an aggregate is held,

And the path (method); of all this let the explication be heard in order.

Sensation, consciousness, name, impression, and form,

The five organs of sense, the five objects of sense, sound and the rest, the common sensory.

These are the abode of merit, and the twelve inner seats.

This should be the complement of desire and so forth; when it arises in the heart of man

Under the name of soul's own nature, it should be aggregate.

The fixed idea that all impressions are momentary

This is to be known as the path, and is also styled emancipation.

Furthermore there are two instruments of science perception, and inferrence.

The Bauddhas are well known to be divided into four sects, the Vaibhāshikas and the rest.

The Vaibhāshika highly esteems an object concomitant to the cognition;

The Sautrāntika allows no external object apprehensible in perception:

The Yogāchāra admits only intellect accompanied with forms;

The Mādhyamikas hold mere consciousness self-subsistent.

All the four (sects of) Bauddhas proclaim the same emancipation,

Arising from the extirpation of desire &c., the stream of cognitions, and impressions.

The skin garment, the water-pot, the tonsure, the rags, the single meal in the forenoon,

The congregation, and the red vesture, are adopted by the Bauddha mendicants."

A. E. G.

मिति चेत्र तदुद्रं मणिप्रभाविषयमणिविकल्पन्यायेन पारम्पर्य्येण प्रमाणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः, अवशिष्टं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधेनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं, यतो भणितं बोधचित्तविवरणे, देशना लोकनाथानां सत्त्वाशयवशानुगाः। भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल ॥ गम्भीरोत्तानभेदेन क्वचित्त्वोभयलक्षणाः। भित्वा हि देशना भित्वा शून्यताऽद्वयलक्षणेति ॥ द्वादशायतनपूजा श्रेयस्करीति बौद्धनये प्रसिद्धम्। अर्थानुपार्ज्य बहुशो द्वादशायतनानि वै। परितः पूजनीयानि किमन्यैरिह पूजितैः ॥ ज्ञानेन्द्रियाणि पञ्चैव तथा कर्म्मेन्द्रियाणि च। मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैरिति ॥ विवेकविलासे बौद्धमतमित्थमभ्यधायि। बौद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम्। आर्य्यसत्याख्यया तत्त्वचतुष्टयमिदं क्रमात् ॥ दुःखमायतनञ्चैव ततः समुदयो मतः। मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः ॥ दुःखं संसारिणः स्कन्धास्ते च पञ्च प्रकीर्त्तिताः। विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च ॥ पञ्चेन्द्रियाणि शब्दाद्या विषयाः पञ्च मानसम्। धर्म्मायतनमेतानि द्वादशायतनानि तु ॥ रागादीनां गणोऽयं स्यात् समुदेति नृणां हृदि। आत्मात्मीयस्वभावाख्यः स स्यात् समुदयः पुनः ॥ क्षणिकाः सर्व्वसंस्कारा इति या वासना स्थिरा। स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥ प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा। चतुःप्रस्थानिका बौद्धाः ख्याता वैभाषिकादयः ॥ अर्थो ज्ञानान्वितो वैभाषिकेण बहु मन्यते। सौत्रान्तिकेन प्रत्यक्षगम्योऽर्थो न बहिर्मतः ॥ आकारसहिता बुद्धिर्योगाचारस्य सम्मता। केवलां संविदं स्वच्छां मन्यन्ते मध्यमाः पुनः ॥ रागादिक्षानसन्तानवासनोच्छेदसम्भवा। चतुर्णामपि बौद्धानां मुक्तिरेषा प्रकीर्त्तिता ॥ वृत्तिः कमण्डलुर्भोगश्चीरं पूर्व्वाह्णभोजनम्। सङ्घा रक्ताम्बरत्वञ्च शिश्रिये बौद्धभिक्षुभिरिति ॥ इति सर्व्वदर्शनसङ्ग्रहे बौद्धदर्शनम् ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 106. Benares, March 1st, 1875. Vol. IX.

काशिकायाः

॥ तृतीयाध्यायस्य तृतीयः पादः ॥

उणादयो बहुलम् ॥ १ ॥

वर्त्तमानदृत्येव, संज्ञायामिति च। उणादयः प्रत्यया वर्त्तमानेर्थे संज्ञायां विषये बहुलं भवन्ति। यतो विहितास्ततोन्यत्रापि भवन्ति। के चिदविहिता एव प्रयोगत उद्धीयन्ते। कृवापाजिमिस्वदिसाध्यशूभ्य उण्। कारुः। वायुः। पायुः। नायुः। मायुः। स्वादुः। साधुः। आशुः।

बाहुलकं प्रकृतेस्तनुदृष्टेः
प्रायसमुच्चयनादपि तेषाम्।
कार्यसशेषविधेश्च तदुक्तं
नैगमरूढिभवं हि सुसाधु ॥ १ ॥
नाम च धातुजमाह निरुक्ते
व्याकरणे शकटस्य च तोकम्।
यच्च पदार्थविशेषसमुत्थं
प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥ २ ॥
संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ॥ ३ ॥

भूतेपि दृश्यन्ते ॥ २ ॥

पूर्वत्र वर्त्तमानाधिकारादूतार्थमिदं वचनम्। भूते काले उणादयः प्रत्यया दृश्यन्ते। वृत्तमिदं वर्त्म। चरितं तदिति चर्म। भसितं तदिति भस्म। दृशियहणं प्रयोगानुसारार्थम् ॥

भविष्यति गम्यादयः ॥ ३ ॥

भविष्यति काले गम्यादयः शब्दाः साधवो भवन्ति। प्रत्ययस्यैव भविष्यत्कालता विधीयते न प्रकृतेः। गमी यामम्। आगामी। प्रस्थायी। प्रतिरोधी। प्रतिबोधी। प्रतियोधी। प्रतियोगी। प्रतियायी। आयायी। भावी ॥ अनद्यतनउपसंख्यानम् ॥ * ॥ श्वो गमी यामम् ॥

यावत्पुरानिपातयोर्लट् ॥ ४ ॥

भविष्यतीत्येव। यावत्पुराशब्दयोर्निपातयोरुपपदयोर्भविष्यति काले धातोर्लट् प्रत्ययो भवति। यावद्भुङ्क्ते। पुरा भुङ्क्ते। निपातयोरिति किम्। यावद्वास्यति तावद्वोह्यते। करणभूतया पुरा व्रजिष्यति ॥

विभाषा कदाकर्ह्योः ॥ ५ ॥

कदा कर्हि इत्येतयोरुपपदयोर्विभाषा भविष्यति काले धातोर्लट् प्रत्ययो भवति। कदा भुङ्क्ते। कदा भोक्ष्यते। कदा भोक्ता। कर्हि भुङ्क्ते। कर्हि भोक्ष्यते। कर्हि भोक्ता ॥

किंवृत्ते लिप्सायाम् ॥ ६ ॥

विभाषेति वर्त्तते। किमो वृत्तं किंवृत्तम्। वृत्तयहणेन तद्विभक्त्यन्तं प्रतीयात् इतरडतमौ चेति परिसंख्यानं स्मर्यते ॥ किंवृत्तउपपदे लिप्सायां भविष्यति काले धातोर्विभाषा लट् प्रत्ययो भवति। लिप्सा,लब्धुमिच्छा प्रार्थनाभिलाषः। कं भवन्तो भोजयन्ति। कं भवन्तो भोजयितारः। लब्धुकामः पृच्छति। कतरो भिक्षां दास्यति, ददाति, दाता वा। कतमो भिक्षां दास्यति, ददाति, दाता वा। लिप्सायामिति किम्। कः पाटलिपुत्रं गमिष्यति ॥

लिप्यमानसिद्धौ च ॥ ७ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विभाषेत्येव । लिप्स्यमानात्सिद्धिर्लिप्स्यमानसिद्धिः, लिप्स्यमानसिद्धौ गम्यमानायां भविष्यति काले धातोर्विभाषा लट् प्रत्ययो भवति । अकिंवृत्तार्थोयमारम्भः । यो भक्तं ददाति स स्वर्गं गच्छति । यो भक्तं दास्यति स स्वर्गं गमिष्यति । यो भक्तं दाता स स्वर्गं गन्ता । लिप्स्यमानाद् भक्तात्स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति ॥

लोडर्थलक्षणे च ॥ ८ ॥

लोडर्थः प्रषादिर्लक्ष्यते येन स लोडर्थलक्षणो धात्वर्थः, तत्र वर्त्तमानाद्धातोर्भविष्यति काले विभाषा लट् प्रत्ययो भवति । उपाध्यायश्चेदागच्छति । उपाध्यायश्चेदागमिष्यति । उपाध्यायश्चेदागन्ता । अथ त्वं छन्दो ऽधीष्व । अथ त्व व्याकरणमधीष्व । उपाध्यायागमनमध्ययनप्रेषस्य लक्षणम् ॥

लिङ् चोर्ध्वमौहूर्त्तिके ॥ ९ ॥

भविष्यति विभाषा लोडर्थलक्षणइति सर्वमनुवर्त्तते । ऊर्द्धंमौहूर्त्तिके भविष्यति काले लोडर्थलक्षणार्थे वर्त्तमानाद्धातोर्विभाषा लिङ् प्रत्ययो भवति, चकाराल्लट् च । ऊर्द्धं मुहूर्त्तादिव ऊर्ध्वमौहूर्त्तिकः । निपातनात्समासः, उत्तरपदवृद्धिश्च । भविष्यतश्चैतद्विशेषणम् । ऊर्ध्वं मुहूर्त्तादुपरि मुहूर्तस्य उपाध्यायश्चेदागच्छेत्, उपाध्यायश्चेदागच्छति, उपाध्यायश्चेदागमिष्यति, उपाध्यायश्चेदागन्ता । अथ त्व छन्दो ऽधीष्व । अथ त्वं व्याकरणमधीष्व ॥

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ॥ १० ॥

भविष्यतीत्येव । क्रियार्थायां क्रियायामुपपदे धातोर्भविष्यति काले तुमुन्ण्वुलौ प्रत्ययौ भवतः । भोक्तुं व्रजति । भोजको व्रजति । भुजिक्रियार्थो व्रजिरत्रोपपदम् । क्रियायामिति किम् । भिक्षिष्यदित्यस्य लटः । क्रियार्थायामिति किम् । धावतस्ते पतिष्यति दण्डः । अथ किमर्थं ण्वुल् विधीयते । यावता ण्वुलृचाविति सामान्येन विहित एव सोस्मिन्नपि विषये भविष्यति । लृटा क्रियार्थोपपदेन बाध्येत । वासरूपविधिना सोपि भविष्यति । एवं तर्ह्येतज् ज्ञाप्यते क्रियायामुपपदे क्रियार्थायां वासरूपेण तृजादयो न भवन्तीति । तेन कर्त्ता व्रजति विक्षिपो व्रजतीत्येवमादि निवर्त्त्यते ॥

भाववचनाश्च ॥ ११ ॥

भविष्यतीत्येव । भावइति प्रकृत्य ये घञादयो विहितास्ते च भाववचना भविष्यति काले क्रियायामुपपदे क्रियार्थायां भवन्ति । किमर्थमिदं यावता विहिता एव ते । क्रियार्थोपपदे विहितेनास्मिन्विषये तुमुना बाध्येरन् । वासरूपविधिश्चात्र नास्तीत्युक्तम् । अथ वचनग्रहणं किमर्थम् । वाचका यथा स्युः । कथं च वाचका भवन्ति । याभ्यः प्रकृतिभ्यो येन विशेषेण विहिता यदि ताभ्यस्तथैव भवन्ति नासामज्जस्येनेति । पाकाय व्रजति । भूतये व्रजति । पुष्टये व्रजति ॥

अण् कर्मणि च ॥ १२ ॥

भविष्यतीत्येव । चकारः सन्नियोगार्थः । धातोरणप्रत्ययो भवति भविष्यति काले कर्मण्युपपदे क्रियायां च क्रियार्थायाम् । कर्मण्यणिति सामान्येन विहितो वासरूपविधेरभावाद् ण्वुला बाधितः पुनरत्रिधीयते, सोपवादत्वाद् ण्वुलं बाधते, परत्वात्कादीन् । तेनापवादविषयेपि भवत्येव । काण्डलावो व्रजति । अश्वदायो व्रजति । गोदायो व्रजति । कम्बलदायो व्रजति ॥

लृट् शेषे च ॥ १३ ॥

भविष्यतीत्येव । शेषः क्रियार्थोपपदादन्यः । शेषे शुद्धे भविष्यति काले चकारात् क्रियायां चोपपदे क्रियार्थायां धातोर्लट् प्रत्ययो भवति । करिष्यामीति व्रजति । हरिष्यामीति व्रजति । शेषे खल्वपि । करिष्यति । हरिष्यति ॥

लृटः सद्वा ॥ १४ ॥

लृटः स्थाने सत्संज्ञौ शतृशानचौ वा भवतः । व्यवस्थितविभाषेयम् । तेन यथा लटः शतृशानचौ तथा ऽस्यापि भवतः । अप्रथमासमानाधिकरणादिषु नित्यम्, अन्यत्र विकल्पः । करिष्यन्तं देवदत्तं पश्य । करिष्यमाणं देवदत्तं पश्य । हे करिष्यन् । हे करिष्यमाण । अर्जयिष्यमाणो वसति । प्रथमासमानाधिकरणे विकल्पः । करिष्यन्देवदत्तः । करिष्यमाणो देवदत्तः । करिष्यते । करिष्यति ॥

अनद्यतने लुट् ॥ १५ ॥

भविष्यतीत्येव । भविष्यदनद्यतनेर्थे वर्त्तमानाद् धातोर्लुट् प्रत्ययो भवति । लटोपवादः । श्वः कर्त्ता । श्वो भोक्ता । अनद्यतनइति बहुव्रीहिनिर्देशः । तेन व्यामिश्रे न भवति । अद्य श्वो वा भविष्यतीति ॥ परिदेवने श्वस्तनो भविष्यदर्थे वक्तव्यः ॥ * ॥ इयं नु कदा गन्ता, यैवं पादौ निदधाति । अयं नु कदाध्येता, य एवमनभियुक्तः ॥

पदरुजविशस्पृशो घञ् ॥ १६ ॥

भविष्यतीति निवृत्तम् । इत उत्तरं त्रिष्वपि कालेषु प्रत्ययाः । पदादिभ्यो धातुभ्यो घञ् प्रत्ययो भवति । पद्यतेसौ, पादः । रुजत्यसौ, रोगः । विशत्यसौ, वेशः ॥ स्पृश उपतापइति वक्तव्यम् ॥ * ॥ स्पृशतीति स्पर्श उपतापः । ततो ऽन्यत्र पचाद्यच् भवति । स्पर्शो देवदत्तः । स्पर्शे विशेषः ॥

स्थ स्थिरे ॥ १७ ॥

सर्त्तेर्धातोः स्थिरे कर्त्तरि घञ् प्रत्ययो भवति । स्थिर इति कालान्तरस्थायी पदार्थ उच्यते । स चिरं तिष्ठन् कालान्तरं सरतीति धात्वर्थस्य कर्त्ता युज्यते । चन्दनसारः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

खदिरसारः । स्थिरइति किम् । सर्त्तो । सारकः । व्याधिमत्स्यबलेष्विति वक्तव्यम् ॥ * ॥ अतीसारो व्याधिः । विसारो मत्स्यः । सारो बलम् ॥

भावे ॥ १८ ॥

भावे वाच्ये धातोर्घञ् प्रत्ययो भवति । पाकः । त्यागः । रागः । क्रियासामान्यवाची भवतिः । तेनार्थनिर्देशः क्रियमाणः सर्वधातुविषयः कृतो भवति । धात्वर्थश्च धातुनैवोच्यते, यस्तस्य सिद्धता नाम धर्मः । तत्र घञादयः प्रत्यया विधीयन्ते । पुंलिङ्गैकवचनं चात्र न तन्त्रं, लिङ्गान्तरे वचनान्तरेपि चात्र प्रत्यया भवन्त्येव । पक्तिः । पचनम् । पाकौ । पाकाः । इति ॥

अकर्तरि च कारके संज्ञायाम् ॥ १९ ॥

कर्तृव्यतिरिक्ते कारके संज्ञायां विषये धातोर्घञ् भवति । प्रास्यन्ति तं प्रासः । प्रसीव्यन्ति तं प्रसेवः । आहरन्ति तस्माद्रसमित्याहारः । मधुराहारः । तक्षशिलाहारः । अकर्तरीति किम् । मिषत्यसौ मेषः । संज्ञायामिति किम् । कर्त्तव्यः कटः । संज्ञाव्यभिचारार्थश्चकारः । को भवता दायो दत्तः । को भवता लाभो लब्धः । कारकग्रहणं पर्युदासे न कर्त्तव्यं, तत्क्रियते प्रसज्यप्रतिषेधेपि समासोस्तीति ज्ञापनार्थम्, आदेच उपदेशेऽशितीति । इत उत्तरं भावे ऽकर्तरि च कारके इति च द्वयमनुवर्त्तते ॥

परिमाणाख्यायां सर्वेभ्यः ॥ २० ॥

परिमाणाख्यायां गम्यमानायां सर्वेभ्यो धातुभ्यो घञ् प्रत्ययो भवति । एकस्तण्डुलनिचायः * । द्वौ शूर्पनिष्पावौ । कृ विक्षेपे । द्वौ कारौ । त्रयः काराः । सर्वग्रहणमपीह बाधनार्थम् । पुरस्तादपवादन्यायेन ह्रस्वमेव बाधेत नापम् । परिमाणाख्यायामिति किम् । निश्चयः । आख्यायग्रहणं रूढिनिरासार्थम् । तेन संख्यापि गृह्यते न प्रस्थादेव । घञनुक्रमणमनपोर्विषये, स्त्रीप्रत्ययास्तु न बाधन्ते । एका तिनेच्छितिः । द्वे प्रसूती † ॥ दारजारौ कर्तरि णिलुक् च ‡ ॥ * ॥ दारयन्तीति, दाराः । जरयन्तीति, जाराः ॥

हृङश्च ॥ २१ ॥

हृङो धातोर्घञ् प्रत्ययो भवति । अचोपवादः । अध्यायः । उपेत्यास्मादधीते उपाध्यायः ॥ अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीप् ॥ * ॥ उपाध्याया । उपाध्यायी ॥ शृ वायुवर्णनिवृतेषु ॥ * ॥ शारो वायुः । शारो वर्णः । शारो निवृतम् ॥

गौरिवाक्षतनीशारः प्रायेण शिशिरे कृशः ॥

उपसर्गे रुवः ॥ २२ ॥

उपसर्गउपपदे रौतेर्धातोर्घञ् प्रत्ययो भवति । अपोपवादः । संरावः । उपरावः । उपसर्गइति किम् । रवः ॥

समि युद्रुवः ॥ २३ ॥

समि उपपदे यु द्रु द्रु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति । संयावः । संद्रावः । संद्रावः । समीति किम् । प्रयवः ॥

श्रिणीभुवोऽनुपसर्गे ॥ २४ ॥

श्रि णी भू इत्येतेभ्यो धातुभ्यो ऽनुपसर्गेभ्यो घञ् प्रत्ययो भवति । अजपोरपवादः । आयः । नायः । भावः । अनुपसर्गइति किम् । प्रश्रयः । प्रणयः । प्रभवः । कथं प्रभावो राज्ञः । प्रकृटो भाव इति प्रादिसमासो भविष्यति । कथं च नयो राज्ञः । कृत्यल्युटो बहुलमित्यन् भविष्यति ।

वौ क्षुश्रुवः ॥ २५ ॥

वावुपपदे क्षु श्रु इत्येताभ्यां धातुभ्यां घञ् प्रत्ययो भवति । अपोपवादः । विक्षावः । विश्रावः । वाविति किम् । क्षवः । श्रवः ॥

अवोदोर्नियः ॥ २६ ॥

अव उत् इत्येतयोरुपपदयोर्नयतेर्धातोर्घञ् प्रत्ययो भवति । अवनायः । उन्नायः । कथमुच्चयः पदार्थानाम् । कृत्यल्युटो बहुलमित्यन् भविष्यति ॥

प्रे द्रुस्रुश्रुवः ॥ २७ ॥

प्रशब्दउपपदे द्रु स्रु श्रु इत्येतेभ्यो धातुभ्यो घञ् प्रत्ययो भवति । प्रद्रावः । प्रस्रावः । प्रश्रावः । प्रइति किम् । द्रवः । स्रवः । श्रवः ॥

निरभ्योः पूल्वोः ॥ २८ ॥

पू इति पूङ्पूञोः सामान्येन ग्रहणम् । लूञ् छेदने । यथासंख्यमुपसर्गसंबन्धः । निरभिपूर्वयोः पूल्वोर्धात्वोर्घञ् प्रत्ययो भवति । निष्पावः । अभिलावः । निरभ्योरिति किम् । पवः । लवः ॥

उच्योर्यः ॥ २९ ॥

गृ शब्दे, गृ निगरणे, द्वयोरपि ग्रहणम् । उच्योरुपपदयोः गृ इत्येतस्माद्धातोर्घञ् प्रत्ययो भवति । उद्गारः समुद्रस्य । निगारो देवदत्तस्य । उच्योरिति किम् । गरः ॥

कृ धान्ये ॥ ३० ॥

उच्योरिति वर्त्तते । कृ इत्येतस्माद्धातोरुच्योरुपपदयोर्घञ् प्रत्ययो भवति, धान्यविषयश्चेद्धात्वर्थो भवति । विक्षेपार्थस्य किरतेर्ग्रहणं न हिंसार्थस्य, अनभिधानात् । उत्कारो धान्यस्य । निकारो धान्यस्य । धान्यइति किम् । भैक्ष्योत्करः । पुण्यनिकरः ॥

---

* निश्चाय इति पा० ।

† द्वे प्रसूती इति पा० ।

‡ दारा इत्यस्योत्तरमचि प्राप्ते घञ् । दारा इत्यत्रापि सिध्यति । घञापि घञोन्त उदात्त इति स्वरसिद्धिरित्यत्राधिकं पुस्तकान्तरे ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यज्ञे समि स्तुवः ॥ ३१ ॥

यज्ञविषये प्रयोगे संपूर्वात्स्तौतेर्घञ् प्रत्ययो भवति । संस्तावश्छन्दोगानाम् । समेत्य स्तुवन्ति यस्मिन् देशे छन्दोगाः स देशः संस्ताव इत्युच्यते । यज्ञइति किम् । संस्तवश्छात्रयोः ॥

प्रे स्त्रो ऽयज्ञे ॥ ३२ ॥

स्तृञ् आच्छादने । अस्माद्धातोः प्रशब्दे उपपदे घञ् प्रत्ययो भवति न चेद्यज्ञविषयः प्रयोगो भवति । शङ्खप्रस्तारः* ॥

प्रथने वावशब्दे ॥ ३३ ॥

स्तृञ् आच्छादने । अस्माद्धातोर्विशब्दउपपदे घञ् प्रत्ययो भवति प्रथने गम्यमाने, तच्चेत्प्रथनं शब्दविषयं न भवति । प्रथनं विस्तीर्णता । पटस्य विस्तारः । प्रथनइति किम् । तृणविस्तरः । अशब्दइति किम् । विस्तरो वचसाम् ॥

छन्दोनाम्नि च ॥ ३४ ॥

वा स्त्र इति वर्त्तते । विपूर्वात्स्तृणातेश्छन्दोनाम्नि घञ् प्रत्ययो भवति । वृत्तमत्र छन्दो गृह्यते, यस्य गायत्र्यादयो विशेषाः । न मन्त्रब्राह्मणं, नामग्रहणात् । विष्टारपङ्क्तिश्छन्दः । विष्टारबृहतीछन्दः । विष्टारपङ्क्तिशब्दोत्र छन्दोनाम, न घञन्तं शब्दरूपं, तत्र त्ववयवत्वेन तदुच्यते । छन्दोनाम्नीत्यधिकरणसप्तम्येषा ॥

उदि ग्रहः ॥ ३५ ॥

उद्युपपदे ग्रहेर्द्धातोर्घञ् प्रत्ययो भवति । अपोपवादः । उद्ग्राहः ॥ छन्दसि निपूर्वादपीष्यते स्रुगुद्यमननिपातनयोः ॥ * ॥ हकारस्य भकारः । उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन् ॥

समि मुष्टौ ॥ ३६ ॥

ग्रह इत्येव । सम्युपपदे ग्रहेर्द्धातोर्घञ् भवति मुष्टिविषयश्चेद्धात्वर्थो भवति । मुष्टिरङ्गुलिसंनिवेशः । अहो मल्लस्य संग्राहः । अहो मुष्टिकस्य संग्राहः । दृढमुष्टिताख्यायते । मुष्टाविति किम् । संग्रहो धान्यस्य ॥

परिन्योर्नीणोर्द्यूताभ्रेषयोः ॥ ३७ ॥

परिशब्दे निशब्दे चोपपदे यथासंख्यं निय दृणश्च धातोर्घञ् प्रत्ययो भवति । अचोपवादः । द्यूताभ्रेषयोः । अत्रापि यथासंख्यमेव संबन्धः । द्यूतविषयश्चेच्चयतेरर्थः । अभ्रेषविषयश्चेद्दिणर्थः । पदार्थानामनपचारो यथाप्राप्तकरणमभ्रेषः । द्यूते तावत् । परिणायेन शारान् हन्ति । समन्ताच्चयनेन । अभ्रेषे । एषोत्र न्यायः । द्यूताभ्रेषयोरिति किम् । परिणयः । न्ययं गतः पापः ॥

* मणिप्रस्तार इत्युदाहरणं बहुषु पुस्तकेष्वुपलभ्यते ।

परावनुपात्ययङ्णः ॥ ३८ ॥

परिशब्दउपपदे इणो धातोर्घञ्प्रत्ययो भवति । अनुपात्यये गम्यमाने । क्रमप्राप्तस्यानतिपातो ऽनुपात्ययः परिपाटी । तव पर्यायः । मम पर्यायः । अनुपात्ययइति किम् । कालस्य पर्ययः । अतिपात इत्यर्थः ॥

व्युपयोः शेतेः पर्याये ॥ ३९ ॥

वि उप इत्येतयोरुपपदयोः शेतेर्द्धातोर्घञ् भवति । पर्याये गम्यमाने । तव विशायः । मम विशायः । तव राज्ञोपशायः । तव राजानमुपशयितुं पर्याय इत्यर्थः । पर्यायइति किम् । विशयः । उपशयः ॥

हस्तादाने चेरस्तेये ॥ ४० ॥

हस्तादाने गम्यमाने चिनोतेर्द्धातोर्घञ् प्रत्ययो भवति । न चेत्स्तेयं चौर्यं भवति । हस्तादानयहणेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । फलप्रचायः । हस्तादानइति किम् । वृक्षशिखरे फलप्रचयं करोति । अस्तेयइति किम् । पुष्पप्रचयश्चौर्येण ॥ उच्चयस्य प्रतिषेधो वक्तव्यः ॥ * ॥ *

निवासचितिशरीरोपसमाधानेष्वादेश्च कः ॥ ४१ ॥

चेरित्येव । निवसन्त्यस्मिन्निति निवासः । चीयतेसौ चितिः । पाण्यादिसमुदायः शरीरम् । राशीकरणमुपसमाधानम् । एतेष्वर्थेषु चिनोतेर्घञ् प्रत्ययो भवति, धातोरादेश्च ककार आदेशः । निवासे तावत् । चिखल्लिनिकायः† । चितौ । आकायमग्निं चिन्वीत । शरीरे । अनित्यः कायः । उपसमाधाने । महान्गोमयनिकायः । एतेष्विति किम् । चयः । इह कस्माच्च भवति महान्काष्ठनिचयः । बहुत्वमत्र विवक्षितं नोपसमाधानम् ॥

संघे चानौत्तराधर्ये ॥ ४२ ॥

चेरित्येव । प्राणिनां समुदायः संघः । स च द्वाभ्यां प्रकाराभ्यां भवति । एकधर्मसमावेशेन, औत्तराधर्येण वा । तत्र औत्तराधर्यपर्युदासादितरो गृह्यते । संघे वाच्ये चिनोतेर्द्धातोर्घञ् प्रत्ययो भवति आदेश्च कः । भिक्षुकनिकायः । ब्राह्मणनिकायः । वैयाकरणनिकायः । अनौत्तराधर्ये इति किम् । सूकरनिचयः । प्राणिविषयत्वात्संघस्येह न भवति । कृताकृतसमुच्चयः । प्रमाणसमुच्चयः ॥

कर्मव्यतिहारे णच् स्त्रियाम् ॥ ४३ ॥

कर्म, क्रिया । व्यतिहारः, परस्परं करणम् । कर्मव्यतिहारे गम्यमाने धातोर्णचप्रत्ययो भवति स्त्रीलिङ्गे वाच्ये । तच्च भावे । चकारो विशेषणार्थः णचः स्त्रियामञ्जिति । व्यावक्रोशी ।

* कुत्र चित्पुस्तके इदं वार्तिकं न दृश्यते ।

† चिखल्लिनिकाय इति । चिखल्लिर्जनपदविशेषस्तत्संबन्धी ग्रामादिनिवासदेश इत्यर्थः । इति पदमञ्जर्याम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यावलेखी । व्यावहासी वर्त्तते । स्त्रियामिति किम् । व्यतिपाको वर्त्तते ॥ बाधकविषयेपि क्व चिदिष्यते ॥ व्यावचोरी । व्यावचर्ची । इह न भवति । व्यतीक्षा । व्यतीहा वर्त्तते । व्यात्युक्षी भवति । तदेतद्वैचित्र्यं कथं लभ्यते । कृत्यल्युटो बहुलमिति भवति ॥

अभिविधौ भावइनुण् ॥ ४४ ॥

अभिविधिरभिव्याप्तिः क्रियागुणाभ्यां कार्त्स्न्येन संबन्धः । अभिविधौ गम्यमाने धातोर्भावइनुण् भवति । सांकूटिनम् । सांराविणम् । सान्द्राविणं वर्त्तते । अभिविधाविति किम् । संकोटः । संरावः । संद्रावः* । भावइति वर्त्तमाने पुनर्भावग्रहणं वासरूपनिरासार्थं, तेन घञ् न भवति । ल्युटा तु समावेश इष्यते । संकूटनं वर्त्तते । तत्कथं, कृत्यल्युटो बहुलमिति ॥

आक्रोशे ऽवन्योर्ग्रहः ॥ ४५ ॥

दृष्टानुवृत्तिसामर्थ्याद् घञनुवर्त्तते, नानन्तर इनुण् । अव नि इत्येतयोरुपपदयोर्ग्रहेर्धातोर्घञ् प्रत्ययो भवति आक्रोशे गम्यमाने । आक्रोशः शपनम् । अवग्राहो हन्त ते वृषल भूयात् । निग्राहो हन्त ते वृषल भूयात् । आक्रोशइति किम् । अवग्रहः पदस्य । निग्रहश्चोरस्य ॥

प्रे लिप्सायाम् ॥ ४६ ॥

ग्रहइत्येव । प्रशब्दउपपदे ग्रहेर्धातोर्घञ् प्रत्ययो भवति लिप्सायां गम्यमानायाम् । पात्रप्रग्राहेण चरति भिक्षुः पिण्डार्थी† । स्रुवग्राहेण चरति द्विजो दक्षिणार्थी । लिप्सायामिति किम् । प्रग्रहो देवदत्तस्य ॥

परौ यज्ञे ॥ ४७ ॥

परिशब्दउपपदे ग्रहेर्घञ् प्रत्ययो भवति । यज्ञविषयश्चेत्प्रत्ययान्ताभिधेयः स्यात् । उत्तरपरिग्राहः । अधरपरिग्राहः । यज्ञइति किम् । परिग्रहो देवदत्तस्य ॥

नौ वृ धान्ये ॥ ४८ ॥

वृ इति वृङ्वृञोः सामान्येन ग्रहणम् । निशब्दउपपदे वृ इत्येतस्माद्धातोर्धान्यविशेषे ऽभिधेये घञ् प्रत्ययो भवति । अपोपवादः । नीवारा नाम व्रीहयः । धान्यइति किम् । निवरा कन्या ॥

उदि श्रयतियौतिपूद्रुवः ॥ ४९ ॥

उच्छब्दउपपदे श्रयत्यादिभ्यो घञ् प्रत्ययो भवति । अजपोरपवादः । उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । कथं पतनान्ताः समुच्छ्रयाः । वक्ष्यमाणं विभाषाग्रहणमिह सिंहावलोकितन्यायेन संबध्यते ॥

विभाषा ऽऽङि रुप्लुवोः ॥ ५० ॥

आङि उपपदे रौतेः प्लवतेश्च विभाषा घञ् प्रत्ययो भवति । आरावः । आरवः । आप्लावः । आप्लवः ॥

अवे ग्रहो वर्षप्रतिबन्धे ॥ ५१ ॥

विभाषेति वर्त्तते । अवउपपदे ग्रहेर्धातोर्घञ् प्रत्ययो भवति विभाषा वर्षप्रतिबन्धे ऽभिधेये । प्राप्तकालस्य वर्षस्य कुतश्चिन्निमित्तादभावो वर्षप्रतिबन्धः । अवग्राहो देवस्य । अवग्रहो देवस्य । वर्षप्रतिबन्धइति किम् । अवग्रहः पदस्य ॥

प्रे वणिजाम् ॥ ५२ ॥

ग्रह इति वर्त्तते । विभाषेत्येव । प्रशब्दउपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्ययो भवति । प्रत्ययान्तवाच्यश्चेद्वणिजां संबन्धी भवति । वणिक्संबन्धेन च तुलासूत्रं लक्ष्यते, न तु वणिजस्तन्त्रम् । तुला प्रगृह्यते येन सूत्रेण स शब्दार्थः । तुलाप्रग्राहेण चरति । तुलाप्रग्रहेण चरति । वणिगन्यो वा । वणिजामिति किम् । प्रग्रहो देवदत्तस्य ॥

रश्मौ च ॥ ५३ ॥

ग्रहो विभाषा प्रइति वर्त्तते । प्रशब्दउपपदे ग्रहेर्धातोर्विभाषा घञ् प्रत्ययो भवति । रश्मिश्चेत् प्रत्ययान्तेनाभिधीयते । रथादियुक्तानामश्वादीनां संयमनार्था रज्जू रश्मिरिह गृह्यते । प्रग्रहः । प्रग्राहः ॥

वृणोतेराच्छादने ॥ ५४ ॥

विभाषा प्रइति वर्त्तते । प्रशब्दउपपदे वृणोतेर्धातोर्विभाषा घञ् प्रत्ययो भवति । प्रत्ययान्तेन चेदाच्छादनविशेष उच्यते । प्रावारः । प्रवरः । आच्छादनइति किम् । प्रवरा गौः ॥

परौ भुवो ऽवज्ञाने ॥ ५५ ॥

विभाषेत्येव । परिशब्दउपपदे भवतेर्धातोर्विभाषा घञ् प्रत्ययो भवति अवज्ञाने गम्यमाने । अवज्ञानमसत्कारः । परिभावः । परिभवः । अवज्ञानइति किम् । सर्वतो भवनं परिभवः ॥

एरच् ॥ ५६ ॥

भावे अकर्त्तरि च कारके इति प्रकृतमनुवर्त्तते यावत्कृत्यल्युटो बहुलमिति । इवर्णान्ताद्धातोर्भावे अकर्त्तरि च कारके संज्ञायामच् प्रत्ययो भवति । घञो पवादः । चकारो विशेषणार्थः । अन्तः थाथघञ्क्ताजबित्रकाणामिति । चयः । अयः । जयः । क्षयः ॥ अज्विधौ भयादीनामुपसंख्यानम् ॥ * ॥ नपुंसके क्तादिनिवृत्त्यर्थम् । भयम् । वर्षम् ॥ जवसवौ छन्दसि

* सन्द्राव इति प्रत्युदाहरणं त्वयुक्तम्, समि युद्रुद्रुव इत्यस्यानवकाशत्वादिति पदमञ्जरी ।

† पिण्डपातार्थीति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वक्तव्यो ॥ * ॥ कर्वारस्तु मे जवः । पञ्चौदनसवः * ॥

कृदोरप् ॥ ५७ ॥

ऋकारान्तेभ्य उवर्णान्तेभ्यश्च अप् प्रत्ययो भवति । घञोपवादः । पित्करणं स्वरार्थम् । करः । गरः । शरः । उवर्णान्तेभ्यः । यवः । लवः । पवः । दकारो मुखसुखार्थः । मा भूत्तादपि परस्तपरः ॥

ग्रहवृदृदनिश्चिगमश्च ॥ ५८ ॥

ग्रहादिभ्यो धातुभ्यो ऽप् प्रत्ययो भवति । घञोपवादः । निश्चिनोतेस्त्वचोपवादः । ग्रहः । वरः । दरः । निश्चयः । गमः । निश्चयग्रहणं स्वरार्थम् ॥ वशिरण्योरुपसंख्यानम् ॥ * ॥ वशः । रणः ॥ घञर्थे कविधानं स्यात्तापाव्यधिहनियुध्यर्थम् ॥ * ॥ प्रतिष्ठन्तेस्मिन्निति प्रस्थः पर्वतस्य । प्रस्थात्यस्मिन्नस्थः । प्रपिबत्यस्यामिति प्रपा । आविध्यन्ति तेनेत्याविधः । विहन्यन्ते ऽस्मिन्निति विघ्नः । आयुध्यतेनेनेत्यायुधम् ॥

उपसर्गे ऽदः ॥ ५९ ॥

अबित्येव । उपसर्गउपपदे ऽदेर्द्धातोरप् प्रत्ययो भवति । विघसः । प्रघसः । उपसर्गेदिति किम् । घासः ॥

नौ ण च ॥ ६० ॥

निशब्दउपपदे अदेर्द्धातोर्णः प्रत्ययो भवति । चकारादप् च । न्यादः । निघसः ॥

व्यधजपोरनुपसर्गे ॥ ६१ ॥

व्यध जप इत्येतयोरनुपसर्गयोरप् प्रत्ययो भवति । घञोपवादः । व्यधः । जपः । अनुपसर्गेदिति किम् । आव्याधा । उपजापा ॥

स्वनहसोर्वा ॥ ६२ ॥

अनुपसर्गेदित्येव । स्वनहसोरनुपसर्गयोर्वा अप् प्रत्ययो भवति । स्वनः । स्वानः । हसः । हासः । अनुपसर्गेदिति किम् । प्रस्वानः । प्रहासः ॥

यमः समुपनिविषु च ॥ ६३ ॥

अनुपसर्गे वा इति वर्त्तते । सम् उप नि वि इत्येतेषूपपदेषु अनुपसर्गेपि यमेर्वा अप् प्रत्ययो भवति । घञोपवादः । संयामः । उपयामः । संयमः । उपयमः । नियमः । नियामः । वियमः । वियामः । अनुपसर्गात्खल्वपि । यमः । यामः ॥

नौ गदनदपठस्वनः ॥ ६४ ॥

अबित्येव । निशब्दउपपदे गद नद पठ स्वन इत्येतेभ्यो धातुभ्यो वा अप् प्रत्ययो भवति । घञोपवादः । निगदः । निगादः । निनदः । निनादः । निपठः । निपाठः । निस्वनः । निस्वानः ॥

* पिण्डोदनसव इति पा०

क्वणो वीणायां च ॥ ६५ ॥

नौ वा ऽनुपसर्गेदिति वर्त्तते । क्वणतेर्धातोर्निपूर्वादनुपसर्गाच्च वीणायां वा अप् प्रत्ययो भवति । घञोपवादः । सोपसर्गार्थं वीणाया ग्रहणम् । निक्वणः । निक्वाणः । अनुपसर्गात् । क्वणः । क्वाणः । वीणायां खल्वपि । कल्याणक्वणा वीणा । एतेष्विति किम् । अतिक्वाणो वर्त्तते ॥

नित्यं पणः परिमाणे ॥ ६६ ॥

पण व्यवहारे स्तुतौ च । अस्माद्धातोर्नित्यमप् प्रत्ययो भवति परिमाणे गम्यमाने । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । मूलकपणः । शाकपणः । संव्यवहाराय मूलकादीनां यः परिमितो मुष्टिर्बध्यते तस्येदमभिधानम् । परिमाणेदिति किम् । पाणः ॥

मदो ऽनुपसर्गे ॥ ६७ ॥

मदेर्द्धातोरनुपसर्गादप् प्रत्ययो भवति । घञोपवादः । विद्यामदः । धनमदः । कुलमदः । अनुपसर्गेदिति किम् । उन्मादः । प्रमादः ॥

प्रमदसंमदौ हर्षे ॥ ६८ ॥

प्रमद संमद इत्येतौ शब्दौ निपात्येते हर्षेभिधेये । कन्यानां प्रमदः । कोकिलानां संमदः । हर्षेदिति किम् । प्रमादः । संमादः । प्रसंभ्यामिति नोक्तं, निपातनं रूढ्यर्थम् ॥

समुदेरजः पशुषु ॥ ६९ ॥

समुदोरुपपदयोरजतेर्द्धातोः पशुविषये धात्वर्थे अप् प्रत्ययो भवति । घञो ऽपवादः । अज गतिक्षेपणयोरिति पठ्यते । स संपूर्वः समुदाये वर्त्तते, उत्पूर्वश्च प्रेरणे । समजः पशूनां, समुदाय इत्यर्थः । उदजः पशूनां, प्रेरणमित्यर्थः । पशुष्विति किम् । समाजो ब्राह्मणानाम् । उदाजः क्षत्रियाणाम् ॥

अक्षेषु ग्लहः ॥ ७० ॥

ग्लह इति निपात्यते अक्षविषयश्चेद्धात्वर्थो भवति । ग्रहेरप् सिद्ध एव लत्वार्थं निपातनम् । अक्षस्य ग्लहः । अक्षेष्विति किम् । ग्रहः पादस्य । अन्ये ग्लाहं प्रकृत्यन्तरमाहुः ते घञं प्रत्युदाहरन्ति । ग्लाहः ॥

प्रजने सर्तेः ॥ ७१ ॥

सर्तेर्द्धातोः प्रजने विषये अप् प्रत्ययो भवति, घञोपवादः । प्रजनः, प्रथमं गर्भग्रहणम् । गवामुपसरः । पशूनामुपसरः । स्त्रीगवीषु पुंगवानां गर्भाधानाय प्रथममुपसरणमुच्यते ॥

ह्वः संप्रसारणं च न्यभ्युपविषु ॥ ७२ ॥

नि अभि उप वि इत्येतेषु उपपदेषु ह्वयतेर्द्धातोः संप्रसारणम् अप् प्रत्ययो भवति, घञोपवादः । निह्वः । अभिह्वः । उपह्वः । विह्वः । एतेष्विति किम् । प्रह्वायः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

आङि युद्धे ॥ ७३ ॥

आङि उपपदे हूयतेर्द्धातोः संप्रसारणमप् प्रत्ययो भवति, युद्धे ऽभिधेये । आहूयन्ते ऽस्मिन्नित्याहवः । युद्धइति किम् । आह्वायः ॥

निपानमाहावः ॥ ७४ ॥

आङ्पूर्वस्य हूयतेर्द्धातोः संप्रसारणमप् प्रत्ययो वृद्धिश्च निपात्यते, निपानं चेदभिधेयं भवति । निपिबन्त्यस्मिन्निति निपानमुदकाधार उच्यते । आह्वावः । पशूनां कूपोपसरेषु य उदकाधारस्तत्र हि पानाय पशव आहूयन्ते । निपानमिति किम् । आह्वायः ॥

भावे ऽनुपसर्गस्य ॥ ७५ ॥

अनुपसर्गस्य हूयतेः संप्रसारणमप् प्रत्ययो भवति, भावे ऽभिधेये । हवः । हवेहवे सुहवं शूरमिन्द्रम् । अनुपसर्गस्येति किम् । आह्वायः । भावग्रहणमकर्त्तरि च कारके संज्ञायामित्यस्य निरासार्थम् ॥

हनश्च वधः ॥ ७६ ॥

भावेनुपसर्गस्येति वर्त्तते । हन्तेर्द्धातोरनुपसर्गे भावे अप् प्रत्ययो भवति, तत्संनियोगेन च वधादेशः, स चान्तोदात्तः । तत्रोदात्तनिवृत्तिस्वरेणाप उदात्तत्वं भवति । वधश्चोराणाम् । वधो दस्यूनाम् । भावइत्येव । घातः । अनुपसर्गस्येत्येव । प्रघातो, विघातः । चकारो भिन्नक्रमत्वाद्वादेशेन संबध्यते । किं तर्हि प्रकृतेन प्रत्ययेन, अप् च यश्चापरः प्राप्नोति । तेन घञपि भवति । घातो वर्त्तते ॥

मूर्तौ घनः ॥ ७७ ॥

हन इत्येव, मूर्तिः, काठिन्यं, मूर्तावभिधेयायां हन्तेरप् प्रत्ययो भवति, घश्चादेशः । अभ्रघनः । दधिघनः । कथं घनं दधीति । धर्मशब्देन धर्मी भण्यते ॥

अन्तर्घनो देशे ॥ ७८ ॥

अन्तःपूर्वाद्धन्तेरप् प्रत्ययो भवति घनादेशश्च भवति देशे ऽभिधेये । अन्तर्घनः, संज्ञीभूतो वाह्लीकेषु देशविशेष उच्यते । अन्ये णकारं पठन्ति । अन्तर्घणो देश इति, तदपि याच्ञमेव । देशइति किम् । अन्तर्घातोन्यः ॥

अगारैकदेशे प्रघणः प्रघाणश्च ॥ ७९ ॥

प्रपूर्वस्य हन्तेः प्रघण प्रघाण इत्येतौ शब्दौ निपात्येते; अगारैकदेशे वाच्ये । प्रघणः । प्रघाणः । द्वारप्रकोष्ठो बाह्य उच्यते । अगारैकदेशइति किम् । प्रघातो ऽन्यः ॥

उद्घनोत्याधानम् ॥ ८० ॥

उत्पूर्वस्य हन्तेरुद्घन इति निपात्यते ऽत्याधानं चेद्भवति । उद्घनः । यस्मिन्काष्ठे स्थापयित्वा अन्यानि काष्ठानि तत्यन्ते तदभिधीयते । उद्घातोन्यः ॥

अपघनोङ्गम् ॥ ८१ ॥

अपपूर्वस्य हन्तेरपघनइति निपात्यते, अङ्गं चेत्तद्भवति । अपघनः, अङ्गम् । अवयव, एकदेशो न सर्वः किं तर्हि पाणिः पादश्चाभिधीयते । अपघातो ऽन्यः ॥

करणे ऽयोविद्रुषु ॥ ८२ ॥

हन इति वर्त्तते । अयस् वि द्रु इत्येतेषूपपदेषु हन्तेर्द्धातोः करणे कारके ऽप् प्रत्ययो भवति, घनादेशश्च । अयो हन्यतेनेनेत्ययोघनः । विघनः । द्रुघनः । द्रुघण इति के चिदुदाहरन्ति । कथं णत्वम् । अरीहणादिषु पाठात् । पूर्वपदात्संज्ञायामग इति वा ॥

स्तम्बे क्वच ॥ ८३ ॥

करणे हन इति वर्त्तते । स्तम्बशब्दउपपदे करणे कारके हन्तेः कः प्रत्ययो भवति । चकारादप् । तत्र घनादेशः । स्तम्बघनः ॥ स्त्रियां स्तम्बघ्ना स्तम्बघना इति दृश्यते ॥ करणइत्येव । स्तम्बघातः ॥

परौ घः ॥ ८४ ॥

करणे हन इत्येव । परिशब्दउपपदे हन्तेर्द्धातोरप् प्रत्ययो भवति । करणे कारके घशब्दश्चादेशः । परिहन्यतेनेनेति परिघः । पलिघः ॥

उपघ्न आश्रये ॥ ८५ ॥

उपपूर्वस्य हन्तेरप् प्रत्यय उपधालोपश्च निपात्यते । आश्रयशब्दः सामीप्यं प्रत्यासत्तिं लक्षयति । पर्वतोपघ्नः । ग्रामोपघ्नः । आश्रयइति किम् । पर्वतोपघात एवान्यः ॥

संघोद्घौ गणप्रशंसयोः ॥ ८६ ॥

समुदोरुपपदयोर्हन्तेर्द्धातोरप् प्रत्ययो भवति टिलोपो घत्वञ्च निपात्यते, यथासंख्यं गणेभिधेये प्रशंसायां गम्यमानायाम् । संघः पशूनाम् । उद्घो मनुष्यः । गणप्रशंसयोरिति किम् । संघातः ॥

निघो निमितम् ॥ ८७ ॥

निघ इति निपूर्वाद्धन्तेरप् प्रत्ययष्टिलोपो घत्वं च निपात्यते, निमितं चेदभिधेयं भवति समन्तान्मितं निमितम् । समारोहपरिणाहम् । निघा वृक्षाः । निघाः शालयः । निमितमिति किम् । निघातः ॥

क्विन्प्रत्ययस्य क्विः ॥ ८८ ॥

भावे ऽकर्त्तरि च कारक इति वर्त्तते । हु इत्यस्य तस्माद्धितो धातोः क्विः प्रत्ययो भवति । क्रमेत्यमिति वचनात्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

केवलो न प्रयुज्यते । डुपचष् पाके । पक्तिमम् । डुवप् । उप्तिमम् । डुक्षञ् । क्षत्रिमम् ॥

ट्वितो ऽथुच् ॥ ८८ ॥

टु इत्यस्य तस्मात् ट्वितो धातोरथुच् प्रत्ययो भवति भावादौ । टुवेपृ । वेपथुः । टुओश्वि । श्वयथुः । टुदु । दवथुः ॥ *

यजयाचयतविच्छप्रच्छरक्षो नङ् ॥ ८० ॥

भावे अकर्त्तरि च कारकइति वर्त्तते । यजादिभ्यो धातुभ्यो नङ् प्रत्ययो भवति । ङकारो गुणवृद्धिप्रतिषेधार्थः । यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । रक्ष्णः । प्रच्छेरसंप्रसारणं ज्ञापकात् प्रश्ने चासचकालइति ॥

स्वपो नन् ॥ ८१ ॥

स्वपेर्धातोर्नन् प्रत्ययो भवति । नकारः स्वरार्थः । स्वप्नः ॥

उपसर्गे घोः किः ॥ ८२ ॥

भावे ऽकर्त्तरि च कारकइतिवर्त्तते । उपसर्गे उपपदे घुसंज्ञकेभ्यो धातुभ्यः किः प्रत्ययो भवति । कित्करणमातो लोपार्थम् । प्रदिः । प्रधिः । अन्तर्द्धिः ॥

कर्मण्यधिकरणे च ॥ ८३ ॥

घोरित्येव । कर्मण्युपपदे घुसंज्ञकेभ्यो धातुभ्यः किः प्रत्ययो भवति, अधिकरणे कारके । जलं धीयते अस्मिन्निति जलधिः । शरधिः । अधिकरणग्रहणमर्थान्तरनिरासार्थम् । चकारः प्रत्ययानुकर्षणार्थः ॥

स्त्रियां क्तिन् ॥ ८४ ॥

भावे ऽकर्त्तरि च कारकइति वर्त्तते । स्त्रीलिङ्गे भावादौ धातोः क्तिन्प्रत्ययो भवति । घञजपामपवादः । कृतिः । चितिः । मतिः ॥ क्तिवाबादिभ्यश्च वक्तव्यः ॥ * ॥ आबादयः प्रयोगतोनुसर्त्तव्याः । आप्तिः । राद्धिः । दीप्तिः । स्वस्तिः । ध्वस्तिः । लब्धिः ॥ श्रुयजिस्तुभ्यः करणे ॥ * ॥ श्रूयते ऽनयेति श्रुतिः । इष्टिः । स्तुतिः ॥ ग्लास्त्राज्याहाभ्यो निः ॥ * ॥ ग्लानिः । स्त्रानिः । ज्यानिः । हानिः ॥ ऋकारस्त्वादिभ्यः क्तिचिष्ठाववद्भवति इति वक्तव्यम् ॥ * ॥ कीर्णिः । गीर्णिः । जीर्णिः । शीर्णिः । लूनिः । यूनिः ॥ संपदादिभ्यः क्विप् ॥ * ॥ संपत् । विपत् । प्रतिपत् ॥ क्तिचपीष्यते ॥ संपत्तिः विपत्तिः ॥

स्थागापापचो भावे ॥ ८५ ॥

स्त्रियामिति वर्तते । स्थादिभ्यो धातुभ्यः स्त्रीलिङ्गे भावे क्तिन् प्रत्ययो भवति । अङोपवादस्य बाधकः । प्रस्थितिः । उद्गीतिः । संगीतिः । प्रपीतिः । संपीतिः । पक्तिः । भावग्रहणमर्थान्तरनिरासार्थम् । कथमवस्था संस्थेति । व्यवस्थायामसंज्ञायामिति ज्ञापकात् नात्यन्ताय बाधा भवतीति ॥

* टुदु । दवथुः । इदं कुत्र चिदधिकम् ।

मन्त्रे वृषेषपचमनविदभूवीराउदात्तः ॥ ८६ ॥

भावे स्त्रियामिति वर्तते । मन्त्रे विषये वृषादिभ्यो धातुभ्यः क्तिन् प्रत्ययो भवति, उदात्तः । प्रकृतिप्रत्यययोर्विभक्तिविपरिणामेन संबन्धः । कस्मादेवं कृतम् । वैचित्र्यार्थम् । वृष्टिः । इष्टिः । पक्तिः । मतिः । विक्तिः । भूतिः । वीतिः । रातिः । सर्वत्र सर्वधातुभ्यः सामान्येन विहित एव क्तिन् । उदात्तार्थं वचनम् । इषेस्तु इच्छेति निपातनं वक्ष्यति । ततः क्तिचपि विधीयते मन्त्रादन्यत्रादिरुदात्तः ॥

ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च ॥ ८७ ॥

मन्त्रइति नानुवर्त्तते । ऊत्यादयः शब्दा निपात्यन्ते । उदात्त इति वर्त्तते । अवतेर्ज्वरत्वरस्रिव्यविमवामुपधायाश्चेति ऊठ् । ऊतिः । स्वरार्थं वचनम् । यौतेर्जवतेश्च यूतिः । जूतिः । दीर्घत्वं च निपात्यते । सातिः । इत्वाभावो निपात्यते । सनोतेर्वा जनसनखनामित्यात्वे कृते स्वरार्थं निपातनम् । हन्तेर्हिनोतेर्वा हेतिः । कीर्त्तयतेः कीर्त्तिः ॥

व्रजयजोर्भावे क्यप् ॥ ८८ ॥

उदात्त इत्येव । व्रजयजोर्धात्वोः स्त्रीलिङ्गे भावे क्यप् प्रत्ययो भवति, उदात्तः । क्तिनोपवादः । व्रज्या । इज्या । पित्करणमुत्तरत्र तुगर्थम् ॥

संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः ॥ ८९ ॥

भावइति न स्वर्यते । पूर्व एवात्रार्थाधिकारः । समजादिभ्यो धातुभ्यः स्त्रियां क्यप् प्रत्ययो भवति । उदात्तः । संज्ञायां विषये । समजन्त्यस्यामिति समज्या । निषद्या । निपत्या । मन्या । विद्या । सुत्या । शय्या । भृत्या । दृत्या । कथं तदुक्तम्

'स्त्रियां भावाधिकारोस्ति तेन भार्या प्रसिध्यति' इति ।

भावाधिकारो, भावव्यापारो, वाच्यत्वेन विवक्षितः, न तु शास्त्रीयोधिकारः ॥

क्षत्रः घ्र च ॥ १०० ॥

करोतेर्धातोः स्त्रियां घ्रः प्रत्ययो भवति । चकारात् क्यप् च । योगविभागो ऽत्र कर्त्तव्यः । क्तिचपि यथा स्यात् । क्रिया । कृत्या । कृतिः ॥

इच्छा ॥ १०१ ॥

इषेर्धातोः शः प्रत्ययो यगभावश्च निपात्यते । इच्छा ॥ परिचर्यापरिसर्यामृगयाटाट्यानामुपसंख्यानम् ॥ * ॥ परिचर्या । परिसर्या । मृगया । अटाट्या ॥ जागर्तेरकारो वा ॥ * ॥ जागरा । जागर्या ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अ प्रत्ययात् ॥ १०२ ॥

प्रत्ययान्तेभ्यो धातुभ्यस्त्रियामकारः प्रत्ययो भवति । क्तिनोपवादः । चिकीर्षा । जिहीर्षा । पुत्रीया । पुत्रकाम्या । लोलूया । कण्डूया ॥

गुरोश्च हलः ॥ १०३ ॥

हलन्तो यो धातुर्गुरुमान् ततः स्त्रियामकारः प्रत्ययो भवति । क्तिनोपवादः । कुण्डा । हुण्डा । ईहा । ऊहा । गुरोरिति किम् । भक्तिः । हल इति किम् । नीतिः ॥

षिद्भिदादिभ्यो ऽङ् ॥ १०४ ॥

षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् प्रत्ययो भवति । गणपठितेषु भिदादिषु निष्कृष्य प्रकृतयो गृह्यन्ते । जृष् । जरा । त्रपूष् । त्रपा । भिदादिभ्यः खल्वपि । भिदा । छिदा । विदा । क्षिपा ॥ गुहा, गिर्यापध्योः ॥ श्रद्धा । मेधा । गोधा । आरा । हारा । कारा । क्षिया । भारा । धारा । लेखा । रेखा । चूडा । पीडा । वपा । वसा । सृजा ॥ क्रपेः संप्रसारणं च ॥ कृपा ॥ भिदा, विदारणे ॥ भित्तिरन्या ॥ छिदा, द्वैधीकरणे ॥ छित्तिरन्या ॥ आरा, शस्त्र्याम् ॥ आर्त्तिरन्या ॥ धारा प्रपाते ॥ धृतिरन्या ॥

चिन्तिपूजिकथिकुम्बिचर्चश्च ॥ १०५ ॥

चिति स्मृत्यां, पूज पूजायां, कथ वाक्यप्रबन्धे, कुबि आच्छादने, चर्च अध्ययने, चुरादिः । एभ्यो धातुभ्यो युचि प्राप्ते स्त्रियामङ् प्रत्ययो भवति । चिन्ता । पूजा । कथा । कुम्बा । चर्च्चा । चकाराद्युजपि भवति । चिन्तना * ॥

आतश्चोपसर्गे ॥ १०६ ॥

आकारान्तेभ्य उपसर्गे उपपदे स्त्रियामङ् प्रत्ययो भवति । क्तिनोपवादः । प्रदा । उपदा । प्रधा । उपधा ॥ अदन्तरोपसर्गवद्वृत्तिः ॥ श्रद्धा । अन्तर्द्धा ॥

* इदं पदमञ्जर्यसंमतम् ।

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ चतुर्थस्तबकावशेषः ॥

अथ विगतासौ गतासौभगे भगवदङ्गसङ्गादङ्गसङ्गानसमुचिते प्रागावेगवेगतो गतोत्कर्षेऽपि पांशुशर्करावर्षिणि पवमाने पवमाने स्वकुलं तस्मिन्नपि निपतति तत्कण्ठावलम्बी नीलमणिहार इवालब्धभूतलस्पर्श एव तेन सह भुवस्तलं यावदालम्बते तावदेव शाम्यति वात्यावर्ते पूर्वमेव तनयानवलोकशोकशुष्यमाणमना मनागप्यस्थवातुमसमर्था समर्थामेव मूर्च्छामवलम्ब्यावलम्ब्याहतधीरधीरतया व्रजेशवनिता नितान्तमवनितले निपपात ॥ ३० ॥

विगता असवो यस्य तस्मिन्, तथापि गतमसौभगं यस्य तस्मिन्, कुतः, भगवतोऽङ्गस्य सङ्गात्, अङ्गे तस्मिन्नाकारेऽपि संगानमुत्कर्षस्तस्य समुचिते, पवमाने वायौ, स्वकुलं पवमाने पवित्रीकुर्वति तस्मिन्नसुरे निपतति सति, अलब्धभूतलस्पर्श इति व्यधाभावो व्यञ्जितः ॥ ३० ॥

व्रजपुरपुरन्ध्रीभिरभिरभ्यमाणा जीवनानुमापकश्वासाश्वासामान्येन बोधयन्तीभिर्धयन्तीभिरिव तच्छोकानलकीलाः कीलालेन मुखमासिञ्चन्तीभिः किमपि समूचे ॥३१॥

अभिरभ्यमाणा,आलिङ्गनाकारेण ध्रियमाणा,आश्वासस्यआमान्द्येन आधिक्येनेत्यर्थः, धयन्तीभिः, अनुभवन्तीभिरिति यावत्, कीला ज्वालाः, कीलालेन जलेन, आसिञ्चन्तीभिः, सर्वतः क्षालयन्तीभिः, अपस्माराभमूर्च्छया मुखस्य लालाक्लिन्नत्वात् ॥ ३१ ॥

सुकृतिनि कृतिनि परमपरभागधेयेन भागधेयेन येन तादृशो दृशोरतिरसदो रसदोहवितततनयस्तनयः समासादि ॥ ३२ ॥

हे पुण्यवति, हे कृतिनि पण्डिते, येन भागधेयेन भाग्येन, कीदृशेन, परमः परभाग उत्कर्षो धेयो धार्यो यस्य तेन,अतिरसदोऽतिसुखदः,रसस्यानुरागस्य दोहेन पूरणेन विततो विस्तृतो नयो येन सः ॥ ३२ ॥

तेनैव स्वस्ति स्वस्तिमानसौ मानसौभाग्योदयौ वां दम्पत्योः पत्योर्व्रजपुरस्य रस्य एव ॥ ३३ ॥

तेनैव भागधेयेन हेतुना स्वस्तिमान् कुशली, असौ तनयः, स्वस्ति सुखेनास्ति, वां युवयोर्व्रजपुरस्य पत्योः स्वामिनोर्मानसौभाग्ययोरुदयरूपः, कीदृशः, रस्य इति, तथात्वेनैव सर्वैरनुभवनीय इत्यर्थः* ॥ ३३ ॥

तदलमलं मोहेन मोहेन क्लेशय मानसं मा-न-संतापी हि मानसज्वरः, स खलु कुशली संप्रति संप्रतिपत्स्यतेऽकस्मादेव कस्मादेवमुत्ताम्यसीति तासां चिराश्वासगिरा लब्धजागरेव सा तच्चेतनामापद्यते स्म सैव तस्याः शोकोद्गारिणी समजनिष्ट ॥ ३४ ॥

मा-ऊहेन-अपायतर्केण, मानसं क्लेशय, मानसज्वरो हि मा-न-संतापी, अपितु संतापक एव, मेति निषेधे ॥ ३४ ॥

तद्यथा,

* स्वामिनो रस्योऽनुभवनीयो मानसौभाग्ययोरुदयरूप इत्यर्थः,इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत एव मयोपवेशितो
वत वोढुं ह्यसमर्थया भरम् ।
मम दुर्नियतिस्वरूपया
तनयो हा धिगहारि वात्यया ॥
क्व शिशोर्वत तादृशो भरः
सहते यं वत न प्रसूरपि ।
अत एव तथानुमीयते
मम दुर्दैवविजृम्भितं हि तत् ॥ ३५ ॥

दुर्नियतिर्दुरदृष्टम् ॥ ३५ ॥

नवनीतमिवातिकोमलो
व्यथते यो बत मातुरङ्कतः ।
स कथं खरपांशुशर्करा-
तृणवर्षं सहते स्म मे सुतः ॥ ३६ ॥

व्यथते व्यथां प्राप्नोति ॥ ३६ ॥

स यथैव निशाचरीविष-
स्तनपानाच्छकटस्य पातनः ।
अवितः किल येन वेधसा
स इदानीमपि तं सदावतु ॥ ३७ ॥

अवितो रक्षितः ॥ ३७ ॥

अधुना परमेश्वरेण चे-
दवितोऽसौ यदि लभ्यते सुतः ।
न कदापि तदाङ्कमध्यतो
वत भूमौ विजहामि वा * पुनः ॥ ३८ ॥

परमेश्वरेण, अस्मदिष्टदेवेन ॥ ३८ ॥

त्वरितं परितोऽवलोक्यतां
क्व नु नीतः क्व नु पातितोऽर्भकः ।
मम यावदपैति जीवनं
न बहिस्तावदमुं समानये ॥

इति भूयो मूर्च्छति ॥ ३९ ॥

क्व नीतः, वात्ययेत्यर्थः ॥ ३९ ॥

ततश्च भूयस्ताभिः कृताश्वासा श्वासापितमपि जीवितं जहती-ह-तीव्रतरधीवैधुर्या धुर्या मलिनवदनारविन्दा-रविन्दारुणमिव दहन्तं शोकमावहन्ती हन्तीव यदा जनमनांसि ॥ ४० ॥

श्वासेन पूर्वमूर्च्छाभङ्गानन्तरं निश्वासेनापितं प्रापितमपि जीवितं जहती त्यजन्ती, ह स्फुटं, धुर्या श्रेष्ठा, दारुणं रविमिव दहन्तम् ॥ ४० ॥

तदैव पुरतोरणस्य पुरतो-रणस्य प्रथमारम्भ इवारम्भ इवातिसमीचीने निर्जितविपक्षोऽपक्षोदभूतस्य भूतस्य रिपोरुरसि रसिको महाकण्टकगहने विकचमेकमपराजिताकुसुममिव ॥ ४१ ॥

तदैव पुरतोरणस्य बहिर्द्वारस्य पुरतोऽग्रतो रिपोरुरसि स बालकृष्णो रोचते स्म, इत्यन्वयः । कीदृशः, रणस्य युद्धस्य प्रथमारम्भ इव-अरं शीघ्रं भे नक्षत्रे-अतिसमीचीने स्वभावेन स्वराशिगणनगत्या च शीघ्रविजयप्रद इव, निर्जितो विपक्षो येन सः । रिपोः कीदृशस्य, अपक्षोदभूतस्य चूर्णीभूतस्य, अतिशयेन पिष्टस्येत्यर्थः । भूतस्य भुवि पृथिव्यामूतस्य, सूतस्येत्यर्थः । तत्रस्थं तमुत्प्रेक्षते महाकण्टकेति, स्वाकृष्टविकटतृणस्तम्बशर्करापुञ्जभरितत्वेन ॥ ४१ ॥

तृणस्तम्बान्धजीर्णोसरसि समुद्रण्डमेकमसितोत्पलमिव, घनतरतिमिरपटलोपरि दीपाङ्कुर इव, महामोहोपरि परमज्ञानामृतमिव, मरुभुवि सुरतरुकडम्ब इव, परमदुःखवृक्षशिखरे सान्द्रानन्दकुसुममिव, स बालकृष्णो रोचते स्म ॥ ४२ ॥

तृणस्तम्बान्धेति बहिस्तृणाद्याच्छन्नत्वेन तदाकारस्य दुर्लक्ष्यतया, घनतिमिरेति तत्साहजिकवर्णत्वेन, दीपाङ्कुर इवेत्यनेन पूर्वोक्तापराजिताकुसुमत्वनीलोत्पलत्वाभ्यां तस्य प्राप्तं तत्सङ्गजनितं किंचित् क्लेशत्वं वारितं, ज्ञानामृतमिवेत्यनेन तत्साहित्येऽपि तेन सम्पुटमप्यशक्यत्वं ध्वनितं तन्मोक्षदायकत्वं च, मरुभुवीत्यतिकठोरत्वेन, सुरतरुरित्यतिविस्मयास्पदत्वेन, परमदुःखेति सान्द्रानन्देत्याभ्यां तत्र गतज्ञानानामसुरशरीरं श्रीकृष्णं च युगपत् पश्यतां निःसीमदुःखं निःसीमसुखं च युगपदेव जातमिति व्यञ्जितम् ॥ ४२ ॥

तमकुतोभयमर्भकमाकलय्य क्रमसमुपचीयमाने मानेन हीने जनचये केचन नायमेव पामरोऽमरोदयद्वेषी वात्याकृत्या कृत्यान्तरायभूतो भूतोदमिव कुर्वन् व्रजराजकुमारमपहर्तुं कृतोद्यमोऽद्य मोहितः स्वयैव किल्विषविषज्वालयालयान्तर्मपि गन्तुमशक्तो नभस्त एव निपपातेति ॥ ४३ ॥

क्रमेण समुपचीयमान इति, प्रथमं दश ततो विंशतिस्ततस्त्रिंशदिति क्रमेण, संख्यावृद्ध्येत्यर्थः । अतः क्षणमात्रेणैव माने-

* तं, इति पा० ।

१–न्द्रा रविं दारुणमिव, इत्येवं मुद्रणीये संधिर्लिपितोऽपि यमकसौष्ठवप्रतिपत्त्यर्थः ।

१–रं भ इति मुद्रणार्हे–रम्भ इति संधिस्तद्वत् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न परिमाणेन हीने सति जनसमूहे । अमराणां देवानामुदयद्वेषी । भुवः पृथिव्यास्तोदं व्यथामिव कुर्वन् । आलयान्तं गृहसमीपम् ॥ ४३ ॥

केऽपि च,

अयेऽयमेव महाप्रभावप्रभावर्धिष्णुरीशिता शितास्त्रममोघमिव सदा-नवो दानवोत्तमानां प्रावल्यमवधाय वधाय तेषामवततारेव, तेनारम्भ एव परिपूतनामा पूतनामारकोऽयमनोभञ्जको मनोऽभञ्जको जनानामधुना धुनानमिव भुवनमिमं च घातयामासेति ॥ ४४ ॥

केऽपीति, महादुर्जयस्यासुरस्य पतने स्वयैवेत्याद्युक्तं युक्त्याभासमकिंचित्करं मन्यमानाः, स्वबुद्धिप्रतिभातेनानुमानेनैव वास्तवार्थस्फूर्तिमन्त इत्यर्थः । अयं बालकः । ईशिता-ईश्वरः । अमोघं तीक्ष्णास्त्रमिव । ईश्वरत्वेन निश्चयाभावादवततार-इवेति भावः । सदैव नवः, सनातनोऽपि नित्यनूतनप्रतीतिको न तु वस्तुत इदानींतन एवेत्यर्थः । अनसः शकटस्य भञ्जकः । मनसश्चेतसो न भञ्जकः ॥ ४४ ॥

केचिदपि,

अये व्रजपुरपुरंदरस्यैव पूर्वपूर्वजनिजनिततपःसु कृतं सुकृतं यत् पुञ्जितं जितं तेनैव, तदृते यदिदमस्य दमस्य सकलापदां पदान्तरं नाकलयामः ॥ ४५ ॥

केचिदपीति, तदुक्तमतिसाहसं मत्वा दृढेन युक्त्यन्तरेणैव समादधाना इत्यर्थः । सर्व एवैते तत्प्रेममाधुरीविवर्तावर्तिन एव यथोत्तरं श्रेष्ठा ज्ञेयाः । तपःसु मध्ये पुञ्जितं यत् सुकृतं पुण्यं कृतं तेनैव, जितम्, उत्कर्षेण वर्तितं, तदृते तद्विना, अस्य सकलापदां पूतनादिप्रयुक्तानां दमस्य दमनस्य, नाशस्येति यावत् । पदान्तरं लक्षणान्तरम् ॥ ४५ ॥

इति गदन्तोऽगदं तोकं तमादाय दायलब्धं महाधनमिव निःसंकोचतयाङ्के कुर्वन्तो निजजनानामन्तःपुरमन्तः—पुरं प्रापयामासुः ॥ ४६ ॥

अगदं निरामयं तोकं बालकं, कीदृशं, निजजनानामन्तरन्तःकरणं पिपर्ति पूरयतीति क्विप्, तम् ॥ ४६ ॥

हर्षकलकलेनानुमाय कुशलितां तदनु दनुजदमनस्य मनस्यतीव पीवरेण वरेण हर्षतरङ्गेण रङ्गेण विकसद्वदनाभिर्व्रजपुरपुरन्ध्रीभिर्निजगदे ॥ ४७ ॥

मनसि-अतीव पीवरेण, अधिकमधिकं पुष्टीभवता, वरेण श्रेष्ठेन ॥ ४७ ॥

जगदेकपूज्ये भाग्यवति भवति भवद्भाग्येन समुपसन्नोऽसन्नोऽयं भवतनय इति हर्षकथासादितरसा तरसा पूर्णजलदावलीजलदावलीढवनभूमिरिव जीवितोङ्कुररुचिरा रुचिरामणीयकस्निग्धा क्व स क्व स इत्युत्कलिकोत्कलिकोदयवश्यावश्यायलिप्रकमलाकृतिनयना कृतिनयनामानुरूपगुणा सद्य एव भवन्ती तयानयावलोकनार्थमुद्गता मुद्गताधिक्येनात्मानमपि न सस्मार यशोदा ॥ ४८ ॥

हे भवति, अमवः अविपण्णः, तरसा वेगेन, पूर्णजलदावलीनां जलेन दावलीढा वनभूमिरिव जीवितेनाङ्कुरेण तृणादिसंबन्धिना, पक्षे जीवितस्य जीवनस्याङ्कुरेण, रुचिरा । उत्कलिकाया उत्कण्ठाया उत्कलिकोद्गतकोरकस्तस्या उदयेन हेतुना वश्या, मूर्च्छोत्थापनादिना वशीकर्तुं शक्या । अवश्यायेन नीहारेण लिप्तयोः कमलयोरिवाकृतिर्ययोस्तथाभूते नयने यस्याः सा । अत्र तनयप्राप्तिहर्षोत्थत्वादश्रूणां शैत्याच्चीहारेणोपमेति । मुद्गतम्, आनन्दनिष्ठं यदाधिक्यं तेन ॥ ४८ ॥

ततस्तु ततस्तुतिपराभिरपराभिरयमयमिति मृतसंजीवनौषधमिव स तदुत्सङ्गे सङ्गेयमहिमा न्यधायि ॥ ४९ ॥

ततस्तुतिपराभिर्विस्तृतस्तवकर्त्रीभिः, स श्रीकृष्णः ॥ ४९ ॥

सा च नष्टलब्धधनमिवाङ्कमारोप्य सस्पृहमीक्षमाणाक्षमाणामानन्दानुभववहनस्य करणानां करणानान्ध्य इव जाते क्षणं स्तिमितमनाः सती तनयमुवाच ॥ ५० ॥

सा यशोदा करणानामिन्द्रियाणां करणेषु स्वस्वव्यापारेष्वनान्ध्ये चक्षुष्मत्त्वे जाते सति, पूर्वमूर्च्छया तेषामान्ध्यमार्दित्यर्थः । करणानां कीदृशानाम्, आनन्दानुभवानां वह धारणस्याक्षमाणामसमर्थानाम् ॥ ५० ॥

जात जातमात्र एव मात्र एवमतिखेदमुपनय यसिद्धिरियं न भवतः, अथवा किं ते दूषणं, बहिरप्य भवन्तं गृहागतां दारुदारुणां नाम्नैव मातरं मां मातृनाम्नानाम्नातपारुष्यो रुष्योद्रेकं न गतो गतोऽपि यत् पुनरागा निरागा नितरामतो भवान् मातृवत्सलो वत्स लोकातीतोऽसि ममैवाग इति चिरं लालयन्ती स्नेहस्नुतं स्तनरसं नरसंकाशं तमथ मूर्तमानन्दं सानन्दं सा पाययामास ॥ ५१ ॥

इत्यानन्दवृन्दावने बाल्यलीलालताविस्तारे शकटतृणावर्तविवर्तो नाम चतुर्थः स्तवकः ॥ ४ ॥ :: :: ॥

हे जात हे पुत्र जातमात्र एव मात्रे जनन्यै मह्यमेवमतिखेदमुपनयसि ददासि, इयं भवतो नीतिसिद्धिर्न भवति, मातृनाम्ना मातृत्वस्य नाममात्रत्वेन हेतुनापि न-आम्नातमभ्यस्तं

१ संगेय-इति मुद्रणीये परसवर्णो निपतोऽपि यमकसौष्ठवार्थः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पारुष्यं कठोरत्वं येन सः, यतो रुष्याद्रेकं क्रोधोद्रेकं न गतः, भावे क्त्यप्रत्ययः, यत् पुनरागा आगतोऽसि, अतो निरागा निरपराधः ।

स्वयमाक्रम्य संस्थाप्य मन्मनश्चक्रमारुतम् ।
गोकुलं गोकुलानन्द तेनान्वीक्षतमुद्धर ॥ ५१ ॥

इत्यानन्दवृन्दावने टीकायां सुखवर्तिन्यां चतुर्थस्तबकसंगमनम् ॥ ४ ॥ :: :: ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चमस्तबकारम्भः ॥

अथ कस्मिन्नपि दिवसे तनयं लालयन्ती व्रजपुरपरमेशानाशानामेकविश्रामभूतस्य तस्य जृम्भमाणस्य वदनकमलं कमलंकुर्वदिव निरीक्षमाणा तत्रैव धरणिधरणिधरजलधिपुरतरुप्रभृति भुवनकोषप्रभृति भुवनकोषगृह इवात्मानमात्मनः पतिं चावलोक्य लोक्यचरितातीतत्वेन परमविस्मितैवासीत् ॥ १ ॥

जृम्भणं रिङ्गणं नामकरणं गव्यभोषणम् ।
मृद्भक्षणं विश्वरूपदर्शनं पञ्चमे क्रमात् ॥

व्रजपुरपरमेशाना श्रीयशोदा तनयं लालयन्ती जृम्भमाणस्य तस्य वदनकमलं निरीक्षमाणा धरण्यादिकं विलोक्य परमविस्मितैवासीत् । तत्र जृम्भणकालस्यात्यल्पप्रमाणत्वात् तन्मध्य एव धरण्यादिसमस्तपदार्थप्रत्येकावलोकनमसंभवदपि दुस्तर्कभगवदैश्वर्यशक्त्यैव तदानीं तच्चयनवृत्तिमाविशन्त्या निर्वाहितमित्यवसेयम् । आशानां मनोरथानां, वदनकमलं मुखपद्मं, कं सुखम्, अलमतिशयेन, कुर्वदिव निर्मिमाणमिव, कं सुखमपि भूषयदिवेति वा । तत्रैव सजृम्भमुखकमल एव धरण्यादिप्रभृति वस्तुजातमित्यर्थः । तत्र कीदृशे, भुवनकोषं प्रकर्षेण बिभर्तीति क्विप्, तस्मिन् । भुवनकोषगृह इवेत्यत्र भुवनकोषपदस्य "उदेति सविता ताम्रस्ताम्र एवास्तमेती"त्यादिवदुद्देश्यप्रतिनिर्देश्यत्वेन पौनरुक्त्यमदोषः । लोके भवं लोक्यं चरितं तदतिक्रान्तत्वेन । अत्र कारिकाः ।

"पूतनादिवधैश्वर्यं न प्रेम समवूवुधत् ।
प्रत्युतावर्धयत् तस्मिंश्चरिष्टुप्रतिशङ्क्या ॥
नन्दभाग्यादिहेतूनां तत्राभूद्यदि कल्पनम् ।
ततो निर्हेतुरेवेयमैश्वरी शक्तिरागता ॥
विभुत्वदर्शिका कृष्णदेहे प्रकटमेव हि ।
तथापि विस्मितैवासीन्मत्पुत्रस्येदमद्य किम् ॥
न त्वैश्यज्ञानसंभ्रान्त्या वात्सल्ये शिथिलाभवत् ।
नचात्र संभवेत् किंचित् पूर्ववद्धेतुकल्पनम् ॥
तच्चापि वस्तुतो गाढप्रेमोर्मिमयमेव हि ।
इति निष्कम्पता प्रेम्णः ख्यापिता स्या मुहुर्मुहुः" ॥

एवं च

"प्रेमदेख्याः परीक्षार्थमागच्छत्यन्तरान्तरा ।
शक्तिरेषा हरेः किंतु तया दासीकृता भवेत्"

इति ॥ १ ॥

तथैवापरेद्युरपि तनयमङ्कमारोप्य लालयन्ती तन्मुखकमलकोषमालोकयन्ती च व्रजपुरपरमेश्वरी किमिति सकौतुकमाजगाद ॥ २ ॥

अपरेद्युरपरस्मिन् दिवसे ॥ २ ॥

जृम्भस्व तात वदनं परिलोकयामि
दन्ताङ्कुरास्तव किमुन्मिषिता न वेति ।
व्यादत्त एव वदनेऽस्य ददर्श माता
लग्नान् निजस्तनरसस्य कणानिवैतान् ॥ ३ ॥

व्यादत्ते प्रकाशिते सति, एतान् दन्ताङ्कुरान् ॥ ३ ॥

अथैवं बालनिशाकर इवाशाकर इवाहरहः पुष्टिदेव्या सेव्यमानोऽव्यमानोऽपि पितृभ्यामकालकृतविशेषोऽपि तत्कालकृतविशेष इव जानुकरचंक्रमणचातुरीमुरीचकार ॥ ४ ॥

आशाकरः, आशासु दिक्षु कराः किरणा यस्य सः, पक्षे, आशासंपादकः । पुष्टिरेव देवी तयाहरहः प्रतिदिनं सेव्यमान इवेत्यन्वयः । "इवेन सह नित्यसमासवचन"मित्यस्य "उद्वाहुरिव वामन" इत्यादिदृष्ट्या प्रायिकत्वात् । पितृभ्यामव्यमानोऽपि निजाङ्कवहःकण्ठादौ रत्यमाणोऽपि । जानुभ्यां कराभ्यां च चंक्रमणस्य चातुरीमलिन्दादौ, अङ्गीचकार । न कालेन कृतो विशेषो विपरिणामो यस्येत्यप्राकृतत्वात्, तथापि तत्कालकृतेति नरलीलत्वादित्युभयत्वस्यैव वास्तवत्वं तस्याचिन्त्यशक्तिसिद्धमिति सार्वत्रिक एव सिद्धान्तः ॥ ४ ॥

मन्दं सुकोमलकराम्बुजजानुयायी
काञ्चीकलेन चकितः स्थगितत्वमेत्य ।
पश्चात् सविस्मयविवर्तितकम्बुकण्ठ-
मालोकयन् वितुते जननीप्रमोदम् ॥ ५ ॥

तन्माधुर्यं वर्णयति मन्दमित्यादिभिः ॥ ५ ॥

किंच ।

कराभ्यां जानुभ्यां लघु लघु चलन् रत्नघटित-
प्रघाणे तत्प्रान्तावरणमणिदण्डेषु वसताम् ।
प्रतिच्छायां वीनामरुणमृदुलैरङ्गुलिदलैः
कृतारम्भो धर्तुं व्रजपुरपुरन्ध्रीः सुखयति ॥ ६ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रत्नघटिते प्रघाणेऽलिन्दे,वीनां कपोतादिपक्षिणां प्रतिच्छायां प्रतिबिम्बमङ्गुलिदलैर्दक्षिणकरसम्बन्धिभिः, वामकरस्य भूम्यवष्टब्धत्वादित्यर्थः। वीनां कीदृशानां, तस्य प्रघाणस्य प्रान्ताचरण उपरितने ये मणिदण्डा भित्तिपटलयोस्तिर्यगवष्टम्भास्तेषु वसताम् ॥ ६ ॥

कदाचिदपि चिदपिहितेव स बालमूर्तिरमूर्तिरतिरमणीयः पूर्णज्ञानघनो ज्ञानमवधारयितुं कौतुकेन ॥ ७ ॥

अपिहिता चिदिव, आवृतं चैतन्यमिव, जीवधर्मानुकरणात्। अमूर्तिः, अतिसुकुमार इत्यर्थः। "मूर्तिः काठिन्यकाययो"रित्यमरः। पुरन्ध्रीभिः कृष्णस्य ज्ञानमवधारयितुम्। उदितः ॥ ७ ॥

क्व वक्त्रं क्व श्रोत्रं क्व तव दृगिति स्निग्धमुदितः
पुरन्ध्रीभिस्तान्यङ्गुलिकिसलयेनाधिगमयन् ।
क्व दन्ता इत्युक्तः करकमलमाधाय वदने
स्मितेनैवोत्पन्ना मम न त इति व्यक्तमवदत् ॥ ८ ॥

तानि वक्त्रादीन्यङ्गानि प्रत्येकप्रश्नानन्तरमङ्गुलिकिसलयेन स्पृष्ट्वा, अधिगमयन् ज्ञापयन् ॥ ८ ॥

किंच ।

का ते प्रसूर्जनयिता तव को वदेति
पृष्टः कयाचिदनतिस्मितपेशलास्यः ।
तां तं च कोमलकराम्बुजपल्लवेन
संदर्शयन् प्रणयिनां मुदमाततान ॥ ९ ॥

कयाचिदित्युपनन्दपत्न्या, इति ज्ञेयम्। अनतिस्मितेन मन्दस्मितेन पेशलं सुन्दरमास्यं यस्य सः। तां प्रसूं यशोदां, तं जनयितारं नन्दं च। प्रत्येकप्रश्नानन्तरमिति सर्वत्र ज्ञेयम् ॥ ९ ॥

अथ तदैव वक्तुं क्षमो न-वेति नवेऽतिकौतुके वात्सल्यरससंधाच्या धाच्या च ॥ १० ॥

नवे नवीनेऽतिकौतुके ॥ १० ॥

नामानयोः किमपि तात वदेति पृष्टो
मन्दस्फुटाक्षरमलक्ष्यवचाः स चारु ।
मातेति तात इति नामयुगादिवर्णौ
मा-ते-तिमात्रमतिमात्रमलंजगाद ॥ ११ ॥

माता-इति वक्तव्ये मा-इति, तात-इति वक्तव्ये ता-इति इति मात्रं जगाद। तत्रापि-अतिमात्रं यथा स्यात् तथा, मात्रा संस्कृतादिनियमस्तमतिक्रम्येत्यर्थः। तेन तात इत्यत्रादिवर्णं ता- इति वक्तव्ये, अपभ्रंशभाषया वा-इति जगादेत्यर्थः। प्रश्नस्याप्यपभ्रंशरूपत्वात् ॥ ११ ॥

कदाचिदपि,

जानुभ्यां करयुग्मकेन च चलन् रत्नप्रघाणोदरे
स्वच्छायामवलोक्य चारु चकितस्तां पाणिना लुम्पति ।
भूयस्तामपि तादृशीं प्रति भिया संकोचमेवाचरन्
मातुः क्रोडतलं निवृत्य चलनात् साशङ्कमारोहति ॥ १२ ॥

तां स्वच्छायां, तादृशीम् अनुप्राकारां तां प्रति, अत एव भिया भीत्या, संकुचिताकारः सन्, चलनाज्जानुचंक्रमणात्, निवृत्य ॥ १२ ॥

अथ कियता कालेन मणिमयमितिमवगृह्य मनागुत्थित एव प्रथमपादविहार एव निपतन्तमिवात्मानं मन्यमानो निजप्रतिबिम्बमेव करावलम्बनाय करकमलदलेनैकेन दधानो निरवलम्बन एव यदा स्खलति, तदा विस्रानवदनो मातृवदनमीक्षमाणः क्षणं रुदन्नेव माचा च करकमलदलाभ्यामभिमृश्य स्वाङ्गुलिदलं ग्राहयित्वा लघु लघु संचार्यमाणः पूर्वरोदनमलिनमाननचन्द्रं स्मितसुधया धावयन् मातृमोदमातनुते स्म ॥ १३ ॥

धावयन् क्षालयन् ॥ १३ ॥

तत इतस्ततश्चरणविहारो हारोल्लसितवक्षसोऽस्य यदा समघटत तदा तदालोकनकुतुकिनो व्रजराजस्य समक्षमेव जनन्या धात्री कौतुकेन तमुपदिशति स्म ॥ १४ ॥

ततस्तदनन्तरम्, इतस्ततश्चरणविहारः, कीदृशः, ततो विस्तृतः, जनन्या यशोदायाः, धात्री श्रीमुखरानाम्नी ॥ १४ ॥

वत्स,

स्थालीमानय पीठमानय घटीमप्यानयेति क्रमाद्यस्यैवानयनक्षमो भवति तत् स्मित्वैव किंचिदराम्।
पाणिभ्यामवगृह्य चारुजठरे संयोजयन् मन्थरं
विश्रम्यानयते न यत्र पटुता स्पृष्ट्वैव तन्मुञ्चति ॥ १५ ॥

विश्रम्य मध्यवर्त्मनि क्षणं भूमौ स्थापयित्वा पुनरुत्थाप्य, आनयत इत्यर्थः ॥ १५ ॥

तदा व्रजराजसमक्षमुपनन्दसनन्दपत्न्यौ तदवलोकनमनसौ लोकनमनसौभाग्यचणचरणं तमङ्कमारोप्य वत्स मुञ्च मुञ्च, त्वमीश्वरपुत्र ईश्वरोऽसि, किमनेन तेऽनुचितेन परिश्रमेणेति धात्रीं गर्ज्जयन्त्यौ तदुत्तारयतः ॥ १६ ॥

लोकानां भक्तजनानां श्रीनारदादीनां नमनेन यत् सौभाग्यं तेन प्रथितौ चरणौ यस्य तं, "तेन वित्तश्चुञ्चुप्चणपा"विति चणप्, ईश्वरस्य राज्ञः पुत्रोऽसि ॥ १६ ॥

एवं कदाचिदपि,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भो वत्स कृष्ण नवीतमिदं प्रदास्ये
नृत्येति कौतुकवशेन कयाचिदुक्तः ।
नृत्यन् सुतालमभिनीतकरं सुपाद-
विन्यासचारु जननीमुदमातनोति ॥ १७ ॥

कदाचिदपि,

भो वत्स वक्षसि विराजति किं तवैतत्
पाञ्चालिकेव कनकस्य सुचारु चिह्नम् ।
किं ते वधूरिति रसेन कयाचिदुक्तो
धुन्वन् शिरो हसति हासयते च सर्वान् ॥ १८ ॥

पाञ्चालिका, पोतरीति ख्याता, "पाञ्चालिका पुत्रिका स्या"दित्यमरः । श्रीकृष्णेनोत्तरे न दत्ते, पुनस्तयोक्तः,ते तव किमियं वधूर्भार्या, गौरवर्णत्वात् प्रियतमत्वेन वक्षसि कृतत्वाच्च, युक्तं चैतत्, संभवेदेव,यल्लज्जयैव नाम नोच्चारयसीति भावः । धुन्वन् शिर इति, शिरोधूननं संमतिव्यञ्जकम् ॥ १८ ॥

कदाचिदपि,

मात्रा संपरिधापितां सकुतुकं श्रद्धालुना चेतसा
पीतां चारुकटीतटीसमुचितां श्लक्ष्णातिसूक्ष्मां घटीम् ।
सानभ्यासवशादुपद्रवकरीत्याक्रन्ददीनाननः
पाणिभ्यामपसारयन्नतितरां मातुर्मुदे वर्तते * ॥ १९ ॥

सा घटी ॥ १९ ॥

कदाचिदपि,

रहसि पुरपुरन्ध्रीमण्डले मण्डनेन
व्रजपतिदयितायाः कुर्वति प्रीतिभूषाम् ।
चपलमतिहठेनाकृष्य सर्वं तदस्या-
मनियतपदमेव प्रापयामास भूषाम् ॥ २० ॥

रहसि पुरुषाद्यगोचरे विविक्ते मण्डनेन बालपाश्यादिना बालपाचउरी इति ख्यातेन प्रीतिभूषां प्रीतिमयीं भूषां कुर्वति, तत् सर्वं बालपाश्यादिकम्,आकृष्य·अस्यां स्वमातरि श्रीयशोदायाम्,अनियतपदम्, अयथास्थानं यथा स्यात् तथा, भूषां प्रापयामास, स्वहस्तेनैवेत्यर्थः ॥ २० ॥

अथ भगवद्बाल्यलीलावलोकेन लोकेनवन्द्यदेवककन्यातोऽपि धन्यातोऽपि धर्ममयी सुकृतशतावरोहिणी रोहिणी यं कियत्कालं गर्भे धृतवती स खलु भगवदग्रजनितया जनितया सततवर्तमानर्तमानमहिमतया सुप्रसिद्धः सिद्धमुनिचारणादिवन्दितोऽद्वितीयोऽपि द्वितीयत्वेन भगवत्सहचरो यदा समजनि ॥ २१ ॥

अथ श्रीबलदेवसाहित्येन तन्माधुर्यं वर्णयितुमुपक्रमते,अथेति, लोकानामिनैः पतिभिर्ब्रह्मादिभिर्वन्द्या, "इनः सूर्ये प्रभा"वित्यमरः, देवककन्या देवकी या ततोऽपि धन्या, भगवतोऽग्रे जनिराविर्भावो यस्य तस्य भावस्तत्ता तया सततमेव वर्तमानः· ऋतः सत्य एव मानमहिमा·आदरगौरवं यस्य तस्य भावस्तत्ता तया जनितया प्रकटितया सुष्ठु प्रसिद्धः ॥ २१ ॥

तदा स्फटिकमणिनेव महामरकतः, चन्द्रमसेव जलदाङ्कुरः, पुण्डरीकेणेव नीलोत्पलं,हंसेनेव यमुनातरङ्गः, ज्योत्स्नासकलेनेव तिमिरकडम्बो विडम्बितनरबाललीलः खेलालोलः स व्यरोचत ॥ २२ ॥

तदेति, स्फटिकमणिमरकताभ्यां स्वच्छत्वमुक्तं, तत्र प्रापितं स्फटिकमणेः स्ववर्णतिरोधानं द्वयोः काठिन्यं च वारयितुमन्यथोपमिमीते, चन्द्रेति द्वयोः स्निग्धत्वं मिथः सौन्दर्यपोषश्च,पुण्डरीकेति सौरभ्यसौकुमार्ये, हंसेति सुखमयचेष्टावत्त्वं, ज्योत्स्नेति छविमात्रमयत्वं, कडम्बोऽङ्कुरः,विडम्बिता तिरस्कृता नरबाललीला येन सः,एवं चेष्टितुं, ते पुनः के वराका इति भावः ॥ २२ ॥

तत्र च,

शुद्धस्फाटिकनीलरत्नमहसौ खेलालसेनालसौ
रेजाते यदि जंगमाविव निधी तौ शङ्खनीलौ तदा ।
अन्योन्यद्युतिभिर्विभिन्नवपुषोरन्योन्यभेदाक्षमा
रामे कृष्णमतिर्बभूव जननी कृष्णे च रामभ्रमा ॥ २३ ॥

खेलानां रसेन,अनुप्रासार्थं रलयोरेकत्र स्मरणम्,अन्योन्यद्युतिभिरिति,द्वयोरामिरूप्यनाम्नो गुणस्योद्गमः कादाचित्कोऽयं ज्ञेयः, सार्वदिकत्वेनातिसारस्याभावात् ॥ २३ ॥

किंच,

दृप्तानामपि शृङ्गिणामभिमुखं निःशङ्कमाधावति
व्यालान् धित्सति पावकस्य च शिखामाक्रन्तुमाकाङ्क्षति ।
बाल्येनातिशयेन लब्धकुतुके भ्रातृद्वये निर्भये
तन्मात्रोरनुतापभीतिकरुणाशङ्काङ्कितासीन्मतिः ॥ २४ ॥

शृङ्गिणां वृषादीनाम् । आधावतीत्यादिकं सप्तम्यन्तशत्रन्तम् । भ्रातृद्वये निर्भये,एवमेवं भूते सतीत्यर्थः । अनुतापेत्यादि स्वशब्दवाच्यत्वं रसदोष इति नाशङ्कनीयं,यदुक्तं काव्यप्रकाशे, "न दोषः स्वपदेनोक्तावपि संचारिणः क्वचित्",यथा,"औत्सुक्येन कृतत्वरे"त्यादीति ॥ २४ ॥

अथ शुद्धसत्त्ववसुदेवेन वसुदेवेन प्रहितः प्रहितः सर्वयदूनां दूनांहोरंहाः स्वतनयस्य नामकरणाय नाम-करणायतपाटवः ॥ २५ ॥

१ त्यक्तमिदं पद्यं व्याख्यात्रा ।
*—देवर्तत इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शुद्धसत्त्वमेव वसु धनं तन्मयेन देवेन द्योतमानेन तेन, दीव्यतीति वा, अनेन वसुदेवशब्दार्थ एव व्यञ्जितः,"सत्त्वं विशुद्धं वसुदेवशब्दितं"मिति चतुर्थस्कन्धोक्तनिरुक्तेः, प्रहितः प्रेषितः। कुतः,प्रकृष्टं हितं यस्मात् सः। दूनं क्षीणम्-अंहसां पापानां रंहो वेगो यत्र यस्माद् वा सः, इति। आभ्यां काकाक्षिगोलकन्यायेन यदूनामित्येतस्योभाभ्यामेवान्वयात् तस्य यदुकुलपुरोहितत्वसूचकं तेषामैहिकपारत्रिकहिताचरणमुक्तम्। नाम प्राकाश्ये, करणानामिन्द्रियाणां चक्रालिकसार्वत्रिकविषयवस्तुनि-आयतं दीर्घं पाटवं तदुचितकर्मठता यस्य सः। एतेनोपनिषज्ज्योतिषागमतन्त्राद्यभिज्ञत्वेन नामकरणे सामर्थ्यमुक्तम् ॥ २५ ॥

यज्ञवितान इव मन्त्रात्मा, कपिलावतार इव-अधीनतत्त्वग्रामः, स्वरसमूह इव श्रुतिसंपन्नः, अम्भोधिरिव न-दीनः ॥ २६ ॥

सूचितमर्थं स्पष्टयति। वितानो विस्तारः। मन्त्रा एव-आत्मा यस्य, तान् विना तस्य व्यर्थत्वात्, पक्षे मन्त्रे मन्त्रणायामात्मा बुद्धिर्यत्नो वा यस्य सः, "आत्मा यत्नो धृतिर्बुद्धि"रित्यमरः। अधीनेति स्पष्टं, पक्षे-अधिगत इनस्य सूर्यस्य प्राधान्यात् सर्वग्रहोपलक्षकस्य तत्त्वग्रामः संचारातिचारादियाथार्थ्यं येन सः। श्रुतयो द्वाविंशतिः, पक्षे वेदाश्चत्वारः। नदीनाम्-इनः प्रभुः, "इनः सूर्ये प्रभौ"त्यमरः, पक्षे न दीनो न दरिद्रः ॥ २६ ॥

विरोचन इव तमोऽपहः परममहातपः—प्रकाशबहुलश्च कुलधरः ॥ २७ ॥

विरोचनः सूर्यः, तमोऽन्धकारोऽज्ञानं च। परममहान्-आतपस्तापकरकिरणसमूहो यस्य सः। तथा प्रकाशेन बहुलश्च। गर्गपक्षे परममहतां तपसां प्रकाशे बहुलः। कुलधरः स्वनाम्ना वंशप्रवर्तकः, इति केवलं गर्गस्यैव विशेषणम्। कुलधरपदस्य यमकानुरोधादुपमामण्डलमध्यपातित्वमदोषः ॥२७॥

कुलधरणीधर इव, प्रावृडम्भोधर इव महासारः ॥ २८ ॥

कुलधरणीधरो मेर्वादिपर्वतः स इव महासारो महास्थिरः, अम्भोधरपक्षे महान्-आसारो धारासंपातो यत्र सः, गर्गपक्षे महमुत्सवं प्रति-आसरतीति स तथा कर्मण्यण् ॥ २८ ॥

परमात्मा परमात्मा यदुकुलाचार्यो मुनिर्गर्गो नाम यदृच्छया प्रागूढगूढभावः सन् व्रजराजभवनमाजगाम ॥ २९ ॥

परेषां मा लक्ष्मीसंपत्तिर्यस्मात्-एवंभूत आत्मा यत्नो गमनादिव्यापारो यस्य सः। अत एव परमः श्रेष्ठ आत्मा स्वभावो यस्य सः। प्राक् प्रथममूढगूढभावो धृतगूढाभिप्रायः। श्रीव्रजराजेनापि मया प्रार्थितं मत्पुत्रस्य नामकरणसंस्कारं न करिष्यतीत्येवमेव प्रथमं ज्ञापितत्वात् *। तदनन्तरं तु तत्संमत्या तेन ज्ञाताभिप्राय एवाभूदित्यर्थः ॥ २९ ॥

तमथ समासाद्य स-मासाद्यमानमानममिवाद्य पाद्यादिभिरभिपूज्य च हृदि निभृते निभृते हर्षसंपदा पदानेजनीरप उपस्पृश्य सविनयमूचे व्रजाधिनाथः ॥ ३० ॥

तं गर्गं समासाद्य समीपमागत्य स व्रजाधिनाथो माभिः शोभाभिः साकमानः प्राप्यमाणो मानः संमाननं यत्र तद्यथा स्यादेवमभिवाद्य प्रणम्य निभृते विविक्तदेशे-ऊचे। हृदि कीदृशे, हर्षसंपदा नितरां भृते पुष्टे सति ॥ ३० ॥

मुने किमु न मुनयो नयोद्भुरकरुणा भवादृशा दृशा पुनन्ति जगददो गददोषबहुलं तदपि भाग्यवतामतिमतिसुखदं भवच्चरणजलाचमनं, तदपि मम घटितमित्यहो मेऽगाधेयं भागधेयसंपत्तिः ॥ ३१ ॥

भवादृशा मुनयो दृशा दृष्ट्यैव जगत् किमु न पुनन्ति,अपितु पुनन्त्येव। गदो जन्ममरणादिलक्षणो व्याधिस्तद्दोषबहुलम्। अहो आश्चर्यं मे भाग्यसंपत्तिरियमगाधा ॥ ३१ ॥

पादरेणुनाणुनापि भुवनं पुनानानां नानांहोरंहसः सततशुभवतां भवतां शुभागमनभागमनवरतमाशासानानामाशा-सा-नाना-नाद्यापि केषामपि विश्राम्यति, तदनायासेनैव संपन्नमित्यहो अद्यैव मे फलितोऽफलितो भागधेयविटपी ॥ ३२ ॥

नानांहसां विविधपापानां रंहसो वेगाच्छुभवतां मङ्गलयुक्तानां युष्माकं, शुभागमनमेव भागः सर्वप्राप्यत्वेन दायांशःतम्-आशासानानां वाञ्छतां, सा नाना विविधा-ऐहिकसुखभगवत्प्रीतितद्भजनाद्यभिलाषलक्षणा- आशा केषामपि न विश्राम्यति। मम तु तद्वाञ्छितं संपन्नं जातम्। नासीत् फलिता फलवत्त्वं यस्य सः। अद्यैव फलितः ॥ ३२ ॥

मत्कृतार्थीकरणमात्रकामस्याकामस्याप्त भवतो भवतोदकस्य प्रयोजनवार्ता वार्ताङ्गस्य किं पृच्छामः ॥ ३३ ॥

भवतोदकस्य संसारनाशकस्य भवतः,अत्रागमनस्य प्रयोजनवार्तां किं पृच्छामः,वार्ताङ्गस्य निरामयविषयस्य,"वार्ता निरामयः, कल्प" इत्यमरः† ॥ ३३ ॥

* ज्ञातत्वात् इति पा०।

† वार्त्तां वा किं पृच्छामः। ऋताङ्गस्य सत्यविषयस्य इति पा०।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किंतु साध्वसं साध्वसंतोषकरमिदानीमिति मितिरहितो नानोत्कण्ठागौरवेण समुन्नमना न-मनागपि विलम्बं सहमानेन सह-मानेन समुज्ज्वलन्न-लोभवान् भवान् मया प्रार्थ्यते ॥ ३४ ॥

किन्तु, इदानीं साध्वसं विवक्षितेऽर्थे मम भयं साधु सुष्ठु-असंतोषकरम्- इति, अत एव हेतोर्भवान् मया प्रार्थ्यते,कीदृशः, मितिरहितः, अप्रमेय इत्यर्थः ।

ननु समयान्तरे तत् प्रार्थ्यतामिदानीमेव कोऽयमायहस्तत्राह,नानोत्कण्ठाया गौरवेणातिभारेण हेतुना मनागपि विलम्बं न सहमानेन, सोढुमशक्नुवतेत्यर्थः ।

नन्वेवं चेत् त्वत्प्रार्थितसंपादनेन ममाप्यभिप्रेतस्त्वत्तो धनादिलाभो भविष्यतीत्यतः प्रार्थने का चिन्ता नाम तत्राह, भवान् न लोभवान्, न लोभी । तत्र हेतुः,मानेन सर्वलोककृतेन संमाननेन सह समुज्ज्वलन्, तव संमानोऽपि महाप्रदीप्त इत्यर्थः,लोभी त्वतितिरस्कृत एवेति भावः । तर्हि प्रार्थने किमिति निःशङ्कोऽसि,तत्राह-समुन्नमनाः, सम्यगार्द्रचित्तः । तव कृपालुतास्वभावमालक्ष्य तत्र संकोचो मम न जायत इति भावः ॥ ३४ ॥

भगवन् प्रियसखस्यानकदुन्दुभेर्दुन्दुभेरिव प्रसिद्धघोषस्य प्रसिद्धघोषस्य मम चापत्यं नाम नामकरणेन चेदनुगृह्णासि, तदानुगृहीतो गृही-तोषवानहं भवानीति, नीतिवित्सु किं बहुना ॥ ३५ ॥

प्रसिद्धो घोषो वादनसंबन्धी महायशःसंबन्धी च शब्दो यस्य तस्य मम च प्रसिद्धगोपस्यापत्यं, रामं कृष्णं चेत्यर्थः । तदा-अनुगृहीतस्त्वया,अनुकम्पितः । गृही गृहस्थः ॥ ३५ ॥

स च मुनिरवादीदवादी ॥ ३६ ॥

अवादीदुवाच । अवादी, अनुकूलः ॥ ३६ ॥

दक्षिणाशय व्रजनाथ नाथति यदिदं भवान् दम्भवान् न भवति, भवति सदा विनीत एव, नीत एव वशतामनेनैव विनयेन सर्वः ॥ ३७ ॥

यदिदं भवान् नाथति याचते, तेन भवान् दम्भवान् न भवति, किंतु सदा विनीत एव। अनेनैव "मुने किमु न मुनय," इत्यादिवचनपरिपाटीद्योत्येन विनयेन सर्व एव वशतां नीतो भवति, किं पुनरहमित्यर्थः ॥ ३७ ॥

न हि तुहिनकरो न-करोति कुमुदमुदमिति ममेतत् तव समीहितसंपादनं युक्तमेव ॥ ३८ ॥

मम पुनर्दूरस्थत्वेऽपि सदा त्वयि प्रीतिस्त्वद्विनयादिनिरपेक्षा साहनिक्येवेत्याह, न हि तुहिनेति ॥ ३८ ॥

किंतु कंसनृशंसो नृशं सोऽति न सहते सह-तेन न कोऽपि परिस्पर्धी ॥ ३९ ॥

कंसनामा नृशंसः क्रूरः, नृशं नुर्मनुष्यस्य शं कल्याणं, स प्रसिद्धः, अति-अतीव न सहते,किंच, तेन सह कोऽपि न परिस्पर्धी ॥ ३९ ॥

स्वयं खलताफलमपि विषलताफलवत् स खलु सकलमेव जनमुद्वेजयति, जयति सुरानपि, न-पिहितं भवति कुचापि तत् तेजः ॥ ४० ॥

खलतायाः खलत्वस्य फलं दुःखमेव तदूपोऽपि,*निरन्तरस्वमृत्युभावनाविपद्वस्तोऽपीत्यर्थः,श्लेषेण- आकाशलताफलभूतोऽपि, अद्य श्वो वा मरिष्यमाणत्वादविद्यमानप्रायत्वेन ज्ञातोऽपीत्यर्थः । न पिहितं नाच्छादितं कुत्रापि, इन्द्रपुरादावपि, किं पुनरत्र तदीयदेश एवेति भावः ॥ ४० ॥

विशेषतश्च वसुदेवसुतः क्वचन वर्तत इति जपन् नगपन्नगवन्निश्वसन् सावधानमेव वरीवर्ति ॥ ४१ ॥

नगपन्नगवत् पर्वतवर्तिसर्पवत् ॥ ४१ ॥

वेत्ति मां यदुकुलाचार्यं चार्यं ते यदिदं चेत् कार्यमोहेऽमी-हे व्रजराज राजपुरुषा गूढवेशेन सर्वतश्चरन्तस्तदेव तस्मै निवेदयिष्यन्ते ॥ ४२ ॥

वेद्यादि, इदं कार्यं त्वत्पुत्रनामकरणादि,आर्यं श्रेष्ठं, चकारस्य वेत्तिपदस्यान्तेऽन्वयः । यद्वा चार्यमाचरणीयं कर्तुं योग्यमिति यावत् । ईहे चेष्टे, करोमीत्यर्थः । तदा- अमी राजपुरुषा हे व्रजराज ॥ ४२ ॥

दयिष्यन्ते न च ते भोजापसदाः कंसनामानो नामानोकहकोटरकुहरदहनवज्ज्वलान्तेऽलं-तोदयिष्यन्ति तेन दुष्करमेतत् ॥ ४३ ॥

ननु निवेदयन्तां नाम तथापि तन्मण्डलाध्यक्षमुखे मयि सदा सानुकम्प एवासावनुभूतः,† सत्यं. तथाप्यसौ भेतव्य एवेत्याह, दयिष्यन्त इति, बहुवचनं प्रायस्तत्सनाभसवासनानां तद्वात्रादीनामन्येषामपि ग्रहणार्थं, कंसनामानः, कंस्ते हिनस्तीति कंस इत्येवं स्वस्वनामयोगार्थं नैव त्यक्ष्यन्तीति भावः, अनोकहो वृक्षः, तादृशानलदृष्टान्तोऽत्यन्तानिवार्यत्वेन ॥ ४३ ॥

तन्निशम्य शम्यपि घोषाधीशो धीशोकं गतः पुनरपि निजगाद ॥ ४४ ॥

शम्यपि परमधृतिमानपि, धीशोकं धियैव शोकम्, अतिगाम्भीर्येण बहिस्तल्लक्षणानभिव्यक्तेरित्यर्थः ॥ ४४ ॥

* फलमैहिकपारत्रिकं स्वस्यैव महादुःखं तथा भूतोऽपि. इति पा० ।

† स कंसः स्निग्धस्वभाव एव सदानुभूतः, इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मन् युक्तमुक्तं जीवन्मुक्तं जीवन् को द्वेष्टि, तथापि, अषडक्षीणमिदमक्षीणमिदपर इह बहिरङ्गः कोऽपि जनो न वेत्स्यति ॥ ४५ ॥

जीवन्मुक्तं भगवन्तं, तेन भवद्द्वेषेण मय्यपि द्वेषो न भविष्यति, फलतस्त्स्येति भावः । तथापि शङ्कास्पदमिति चेत्, हे-अक्षीणमित्, अक्षीणस्नेह, "क्षिमिदा स्नेहने" क्षिवन्तः । त्वया मयि स्नेहः किं त्यक्तुं शक्य इति भावः । इह मदन्तःपुरे परमविविक्ते, इदं कर्म, अपरो न वेत्स्यति । कथं भूतम्, अषडक्षीणं, न विद्यते षडक्षीणि यत्र तत्, स्वान्तरङ्गपरिवार सहितोऽहमेक एव ज्ञेयस्त्वं चेत्येवं द्वाभ्यां क्षतमित्यर्थः । "अषडक्षाशितङ्वलंकर्मालंपुरुषाध्युत्तरपदात् ख" इति खः ॥ ४५ ॥

मूर्तिमता परममङ्गलेन भवता भवतापहारकेण क्रियमाणस्य कर्मणः किमुच्चावचमङ्गलकार्योपयोगिनातोद्यादिनातोऽद्यादिना, केवलेनैव स्वस्तिवाचनेन भवतैव संपादनीयमिदमिति ॥ ४६ ॥

अतोद्यादिना वाद्यादिना । अतो हेतोः । अद्यादिना, अद्यामुके मास्यमुके पक्ष इत्यादिसंकल्पवाक्येन । यद्वा, अद्य, अत्र दिने । आदिना कर्मप्रथमगतेन स्वस्तिवाचनेन ॥ ४६ ॥

तद्वचनानन्तरं स्वयमावृतमप्यान्तरं रसं विकाशयन्तीव काचगर्गरी गर्गरीतिराषीन्मुखप्रसादेन,ततस्तु मातृभ्यामुपनीतयोस्तयोर्बालकयोः प्रथमं व्रजेश्वरीक्रोडगतं श्रीकृष्णमवलोक्य स मुनिर्मनसि पराममर्श ॥ ४७ ॥

गर्गरीतिर्गर्गस्य चेष्टितपरिपाटी, काचस्य गर्गरीव, काचेन निर्मितेत्यर्थः । रसं तैलादि प्रेमरसं च ॥ ४७ ॥

अहो किमेतत्,

हन्तायं किमनादिमोहतमसः सद्रत्नदीपाङ्कुरः
किंन्वीशप्रतिपादकोपनिषदां प्रामाण्यमाप्तं वपुः ।
किं नः सौभगकल्पभूरुहवनस्याद्यः प्रसूनोदयः
सान्द्रानन्दसुधाम्बुधेः किमथवा सा कापि जन्मस्थली ॥ ४८ ॥

हन्तेति विस्मये । रत्नेति, अन्यदीपो हि तैलाद्युपचयाभावेन वातादिविघ्नेन च निर्विशेषज्ञानयोग इव कालेन नश्यत्यपीति भावः । तत्रापि सदिति, अवतारान्तरवैलक्षण्यार्थमुक्तम् । अत्र प्रामाण्यापेक्षा चेदत आह, ईशस्य षडैश्वर्यवतो भगवत इत्यर्थः, प्रामाण्यमेव कर्तृ, वपुः शरीरं प्राप्तं प्राप, प्रत्यक्षीभूतमभूदित्यर्थः । न तु निर्विशेषब्रह्मप्रतिपादिकानामुपनिषदां प्रामाण्यमिव केवलमनुमितिप्रत्यक्षमिति भावः । नन्वेतद्भुतभाग्यं कथं समभवत्, तत्र स्वयमेव वितर्कयन्नाह, नोऽस्माकम्, एतेनैवानुमितं यत् सौभगं तदेव कल्पभूरुहवनं तस्य, आद्यो मूलभूतः, तस्य प्रार्थितविविधान्यफलदायित्वेऽपि स्वज्ञात्येव जनिष्यमाणाय कस्मैचिदतिमुख्याय फलाय यः प्रसूनोदयः स एव, अस्माकं सर्वेषामद्भुतप्रेमफलकारणमेव मूर्तिधारीत्यर्थः । यद्वा प्रसूनोदयः फलोदय एव, "प्रसूनं पुष्पफलयो"रित्यमरः । अथ तदेव तादृशप्रेमफलकार्यभूतं * रसास्वादभरमनुभूयाह सान्द्रेति । सा प्रसिद्धा पूर्वं शास्त्रमहाजनप्रसिद्धा श्रुतैव न त्वनुभूतेत्यर्थः, क्वापि, अनिर्वचनीया, इदानीं त्वनुभूयमानमात्रत्वेन वक्तुमशक्येत्यर्थः । जन्मस्थलीति, तेन वैकुण्ठनाथादावपि तरतमभावेन स्थितानामानन्दानामेतदानन्द एव मूलं कारणमिति भावः ॥ ४८ ॥

किंच,

यं ब्रह्मेति वदन्ति केचन जगत्कर्तेति केचित् परे
त्वात्मेति प्रतिपादयन्ति भगवानित्येव केऽप्युत्तमाः ।
नो देशान्न च कालतो बत परिच्छेदोऽस्ति यस्योज्झसो
देवः सोऽयमवाप नन्ददयितोत्सङ्गं परिच्छिन्नताम् ॥ ४९ ॥

ब्रह्मेति ज्ञानाभ्यासिनः । जगत्कर्तेत्यणिमाद्यखिलैश्वर्यपरास्तार्किकाः । आत्मेति योगाभ्यासवन्तः । भगवानिति भक्त्येकनिष्ठाः । उत्तमा इत्येषामेव श्रैष्ठ्यं केऽपीति वैरल्यं च । तेन स्वारस्यमप्यत्रैव ध्वनितम् ॥ ४९ ॥

अहो अतिभूमिरियं विस्मयस्य, यदयं मातुरङ्कगत एव मे,

कर्पूरवर्तिरिव लोचनमङ्गकानि
पङ्को यथा मृगमदस्य कृतानुलेपः ।
घ्राणं धिनोत्यगुरुधूप इवायमुच्चै-
रानन्दकन्द इव चेतसि च प्रविष्टः ॥ ५० ॥

प्रविष्ट इति धिनोतीत्यनयोः सर्वत्रान्वयः ॥ ५० ॥

किंच,

धैर्यं धुनोति बत कम्पयते शरीरं
रोमाञ्चयत्यतिविलोपयते मतिं च ।
हन्तास्य नामकरणाय समागतोऽह-
मालोपितं पुनरनेन ममैव नाम ॥ ५१ ॥

मम, नाम प्रसिद्धिः, गर्गो नाम ऋषिर्महाधीरोऽतिगम्भीरो निर्विकारः परममतिमानित्यादिका सर्वलोकघोषिता ख्यातिरित्यर्थः । तत्र धैर्यं धुनोतीत्यात्मुक्ष्यचापल्ये । कम्पयत इति रत्याख्यः स्थाय । रोमाञ्चयतीति तदङ्गभूतो विस्मयः । मतिं विलोपयत इत्युन्मादः ॥ ५१ ॥

* फलोपलब्धिहेतुकं इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदधुना किमीहिष्ये.

पादौ दधामि यदि मां वदिता जनोऽय-
मुन्मत्तमेव बत वक्षसि चेत् करोमि ।
तच्चातिचापलमहो न करोमि वा चे-
दौत्कण्ठ्यमेव हि लविष्यति धैर्यबन्धम् ॥ ५२ ॥

तदपि पादौ दधामीत्यादिपरामर्शगर्भाधृतिरपि रसपरिपाटीभङ्गाभावाय लीलाशक्त्यैव तस्मिन् समर्पितेति ज्ञेयम् ॥ ५२ ॥

भवतु तथा,

धन्मादद्य साधु सफलं सफले च नेत्रे
विद्या तपः कुलमहो सफलं समस्तम् ।
आचार्यता भगवती हि यदोः कुलस्य
मामद्य हन्त नितरामकरोत् कृतार्थम् ॥ ५३ ॥

हन्तेत्यनुकम्पायाम् ॥ ५३ ॥

॥ शेषमत्रे ॥

॥ प्रोषितप्रियसमागमः ॥

॥ श्रीयुतकविवरगोल्डस्मिथाभिधमहाशयविरचिताद्
'हर्मिट' नामककाव्यादवतारितः ॥

'एङ्गलिना'नामिका काचन समृद्धश्रेष्ठिकुमारिका रूपयौवनधनसंपत्तिगर्विता स्वविवरिषया समागतेषु समृद्धतरेषु प्रार्थकेष्वेकं विविधविद्याकलादिगुणगणैर्वरिष्ठं द्रविणरहितं युवानमेड्विननामानं विवाहार्थिनं प्रत्याचख्यौ । सच तयाऽवमानितः किं चन निर्जनं वनमध्युवास । सापि स्वसमानगुणनिवहैरुपशोभितं वरान्तरमलभमाना तस्यैव परमसुन्दरगुणाननुस्मरन्ती तद्वियोगदुःखिता तमेव मार्गयन्ती वनाद्वनान्तरं बभ्राम । अथैकस्मिन्दिवसे ऽस्तंगतवति सवितरीतस्ततः परिभ्रमन्ती दैववशात्तद्ध्युषित एव वने समागता । तत्र च भस्मोद्धूलनधूसरितसर्वाङ्गं जटिलं तापसं मध्येकुटीरकस्योपशोभमानं दर्शनमात्रेणाशक्यप्रत्यभिज्ञानं रात्रिवासाय कुत्रचिच्छरणपदं जिज्ञासमाना वदतिस्म, "अयि वनवासेत्यादिना" ॥

॥ श्रीः ॥

अयिवनवासविहारिन्
देशय मार्गं मुने पुरतः ।
या ऽभिदधौ दीपशिखा
आह्वयतीवातिथीन् किरणैः ॥ १ ॥

असहायो ऽहं दीनो
विचरामि यथा यथा मन्दम् ।
विपिनाली दीर्घतरा
तथा तथा भाति मे पुरतः ॥ २ ॥

अयि पुच्छक यासि कुतः
प्रतियाहीत्यब्रवीन्मुनिश्रेष्ठः ।
निर्दय एष पिशाच-
स्तच्च हि हन्तुं प्रलोभयति ॥ ३ ॥

यद्यपि नैष कुटीरो
मामक आढ्यस्तथापि नो पिहितः ॥
अशरणदीनाः सततं
साधुलभन्तामभीष्टमितः ॥ ४ ॥

निवर्त्य तस्मादधिवासमद्य
राचौ कुरुष्वेह कुटीरकस्य मे ।
भजस्व तल्पं तृणनद्धमाशिषो
निःशङ्कचेता उपभुङ्क्ष्व किंचित् ॥ ५ ॥

स्वैरं गुहायाः परितश्चरन्ति
कुरङ्गयूथानि निहन्मि नाहम् ।
भजामि तच्चापि दयार्द्रभावं
दयालुरीशो भजते यथा मयि ॥ ६ ॥

आहरामि स्वयंशैलशाद्वलात्फलमूलकैः ।
शाकैः पूर्णं करण्डं च निर्झरात्सलिलं शुचि ॥ ७ ॥

परावर्तस्वातः पथिक जहि चिन्ता हि निखिला
भवन्त्यस्मिंल्लोके ऽबुधजनपरिभ्रान्तिकलिताः ।
नचास्ति प्राप्तव्यं मनुजतनयेनेह भुवने
यदस्ति प्राप्तव्यं तदपि चिररात्राय न भवेत् ॥ ८ ॥

प्रतिब्रुवन् कोमलया गिरा तदा
स यूथिका पुष्पचयं किरन्निव ।
प्रेम्णा कुलीनः पथिको विनीतः
प्रत्युज्जगामानुकुटीरमादरात् ॥ ९ ॥

अनुच्छितं वेश्म ततो ददर्श
गूढे वने भाग्यवशादुपागतम् ।
भ्रमाद्विमार्गं व्रजतां शरण्यं
समीपवास्यस्वजनस्य गृह्ये ॥ १० ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यस्मिंस्तृणाच्छादितवेश्मनोन्त-
र्नोपेक्ष्यते स्वामिकृता हि रक्षा ।
निरर्गलद्वारसमीपदेशे
ययौ पथिकं युगलं सहैव ॥ ११ ॥

सायं यदा श्रान्तिनिरासहेतो:
सुखं निषेदु: समजा: पशूनाम् ।
समुह्य वह्निं स मुनि: कराभ्या-
मारब्धवांस्तोषयितुं गृहागतम् ॥ १२ ॥

परिविष्य फलानि कौतुकात्
स्मयमान: समुनि: प्रहर्षित: ।
समयं श्रवणीयसत्कथ-
श्चिररात्राय निनाय भाषणै: ॥ १३ ॥

बिडालशावा: परितस्तदानी-
मुदग्रधन्त प्रमदाकुला भृशम् ।
हसन्तिकाकाष्ठचटत्कृतिस्वना:
सुखाकरा झिल्लिकुलारवो ऽभवन् ॥ १४ ॥

नैकं तत्पथिकशुचं प्राभवदीषल्लघूकर्तुम् ।
गुरुशोकाकुलचेता वर्षितुमारब्धवानश्रु ॥ १५ ॥

मुनिर्ददर्शास्य विवृद्धचिन्ता
गाढं समाभि: परितप्यमान: ।
चिन्ताभिराहा ऽसुखि पान्थ बाल
शोक: कुतस्ते हृदयान्तराले ॥ १६ ॥

निर्वासितस्त्वं भ्रमसीह रम्या-
त्सौधादनिच्छन्पदताडित:किम् ।
प्रवासिनो मित्रवरस्य हेतो:
प्रियावमानात्परितप्यसे किम् ॥ १७ ॥

यदृच्छया ऽऽसादितहर्षजातं
विनश्वरं क्षुद्रतरं हि हन्त ।
स्तुवन्ति तुच्छानि भृशं च येपि
तेभ्योपि ते क्षुद्रतमा मता मे ॥ १८ ॥

नाम्न: परं किं भवतीह मेच्यं
छायेव कीर्तिर्वसुनो ऽनुगामि ।
मोहाय यद्भुवतीन्द्रजाल-
मकिंचनाग्र्यप्रसवस्य बीजम् ॥ १९ ॥

निरर्थकं प्रेमपदं सदा त-
दुत्पद्यते यौवनलीलया भुवि ।
कुत्रापि तत्रैव भवेद्यथार्थं
कपोतयुग्मे ह्यथवा सुलभ्यम् ॥ २० ॥

धिक्कृत्य तन्मूढ जहि स्वकीयां
मत्वा शुचं स्त्रीलसितं तृणाय ।
श्रुत्वेदमीषत्पुलकाङ्कितेन
ह्याविश्चकाराशु वियोगदु:खम् ॥ २१ ॥

भास्वन्त: क्षणभङ्गुरा दिवि यथा प्रादुर्भवन्त्य स्थिरा
वर्णास्तद्वदमुष्य गण्डयुगले प्रादुर्बभूवु:क्षणात् ।
नूनं तत्सहसा ऽद्भुतं मुनिवरो लावण्यमस्यास्तदा
दर्शंदर्शमतीव विस्मितमनास्तूष्णीं स्थितस्तत्क्षणम् ॥ २२ ॥

अपचपासूचकवीक्षितेन
प्रोच्छूनवक्षोजनियुग्मकेन ।
क्रमेण लावण्यगुणैकसिन्धु-
राविष्कृता कान्ततमा वधूटी ॥ २३ ॥

हंताहं भवने विवेश सहसा यत्रेश्वरोराजते
त्वंचासीशकृपाकटाक्षकलया लब्धार्थकामोऽनिशम् ।
ऊचे दुर्भगतां गता मुनिवर त्वद्गेहमासादितं
वैयात्यादधुना क्षमस्व पथिकभ्रान्तेरिदं दूषणम् ॥ २४ ॥

भवतु तवानुग्राह्या
चेटीयं प्रोषितप्रिया ऽज्ञानात् ।
भ्राम्यति मार्गणरक्ता
लभते नैव प्रियं स्वीयम् ॥ २५ ॥

धनिकवरो मे तातो ऽध्युवास टेनामिधं नगरम् ।
अहमेवैका पुत्री दायहरा तस्य रिक्थस्य ॥ २६ ॥

दूराद्वत्सलतातपादवशगां मां लब्धुकामा गुणा-
नायाता बहवस्तदा प्रणयिनो ह्यारोपयां चक्रिरे ।
केचित्कामशराभितप्तमनस: केचिच्चकामातुर
ख्यातिं दर्शयितुं यशंसुरमलं लावण्यमत्यद्भुतम् ॥ २७

महार्हशुल्केरनुवेलमारात्
स्वाभीष्टसिद्धौ यतमानचेतसाम् ।
युवा समागत्य ननाम चेद्विन:
परं बभाषे न कदापि हृद्यम् ॥ २८ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विनीतसाधारणवेषसंवृतो
नासीत्तदानीं स धनी न शक्तिमान् ।
सर्वस्वमासीत्सुगुणाः सुबुद्धि-
स्त्वमेव मे ऽभीष्टतमास्तदीयाः ॥ २९ ॥
गाथां जगौ प्रेमयुतां गुहागतः
सुगन्धिभिःश्वाससमीरणैस्तदा ।
गानप्रतिध्वानिभिरङ्गणं मम
प्रपूरयामास निकुञ्जवृन्दम् ॥ ३० ॥
तुहिनं कुसुमानि वल्लरीणा-
मनुकर्तुं न हि शेकुरस्य चेतः ।
क्षणभङ्गुरता यतस्तदीये
शुचिरूपे नहि मानसाम्बुजाते ॥ ३१ ॥
प्रसूनलावण्यपविचते तद्-
हृदन्तराले ऽभवतां हि सुस्थिरे ।
धिङ्मां परं तद्गुणचञ्चलत्व-
मासीत्तदा मे प्रियविप्रयोगकृत् ॥ ३२ ॥
मय्यनुरक्तेतस्मि-
न्नाह मखिद्यंस्तस्य दुःखेन ।
गर्वोग्रहतः सतत-
मकारि चाञ्चल्यजं कपटम् ॥ ३३ ॥
यावत्सो ऽतिविषण्णो .
ऽवज्ञातो मानिनीं त्यक्त्वा ।
पुण्ये विजने ऽरण्ये
ऽत्यासीन्मन्ये जहौ प्राणान् ॥ ३४ ॥
त्यक्ष्यामि तत्रैव निजं कलेवरं
प्राणेश्वरान्वेषणतत्पराहम् ।
स्वीयापराधं परितापजीवने-
र्निराकरिष्ये प्रियरूस्थितेः क्षितौ ॥ ३५ ॥
अनाथा निराशा करिष्ये तदर्थं
यथा चेद्विनाख्यः प्रयातोमदर्थे ।
तदोवाच सो ऽतिप्रियं हृष्टचित्तः
परेशप्रसादोन्यथा कर्तुमीशः ॥ ३६ ॥
मुनीशो विदित्वा यदातामभीष्टां
समाश्लिष्यतिस्माथ रामां सुरुष्टाम् ।
परावर्तयन्तीं मुखं तर्जयन्तीं
भृशं विस्मितां तामुवाचेद्विनोहम् ॥ ३७ ॥
अयि एज्जलिने ऽनिशं प्रिये
मम मोहाय शरीरधारिणि ।
इह पश्य निजं तमेद्विनं
पुनराप्तं प्रियया त्वया ऽधुना ॥ ३८ ॥
प्राणेशि त्वं सर्वस्वं मे
चित्ते वासान्नष्टाश्चिन्ताः ।
संभाव्यन्ते विश्लेषा नः
क्वचित्क्वेतो ऽन्यस्मिन् काले ॥ ३९ ॥
अस्मादेव मुहूर्तकात्परतरं नो नैव संभाव्यते
विश्लेषो ऽथ कुरङ्गशावनयने सत्यानुरागो चिरम् ।
स्थास्यावस्तव मानसं प्रियतमे ऽत्यन्तानुरक्तं मयि
शोको येन विदीर्यते स हि मम द्राग् दारयेन्मानसम् ॥ ४० ॥

धर्माधिकार्युपपदेन
ढुण्ढिराजशास्त्रिणा ।

SÁNKHYATATTVAPRADÍPA
OR
THE PRINCIPLES OF
THE SÁNKHYA PHILOSOPHY.

(Continued from page 118.)

' It cannot be urged that in consequence of the difference of their notions and respective utilities the cause and the effect are really different, inasmuch as different notions and distinct profitableness are possible even in one and the same thing through the appearance and disappearance of its various peculiarities. Hence difference between the cause and the product cannot be established by the otherwise impossibility of the distinction of their notions and respective uses. For instance, as the limbs of a tortoise appear when stretched out and disappear when contracted together under the body, but are neither produced nor destroyed; so also a

१ न च बुद्धिभेदादर्थक्रियाभेदाच्च भेदसिद्धिः कार्यकारणयोरिति वाच्यमेकस्मिन्नपि विशेषान्तराविर्भावतिरोभावाभ्यामर्थक्रियाबुद्धिभेदसम्भवादिति न तदन्यथानुपपत्त्या भेदसिद्धिः। यथैकस्यापि कूर्म्मस्यावयवा निःसरन्त्याविर्भवन्ति तथैव कूर्म्मशरीरे निविशमानास्तिरोभवन्ति नहि ते कूर्म्मावयवा उत्पद्यन्ते ध्वंसन्ते वा। एवमेकस्यापि सुवर्णस्य मुद्रो वा कटककुण्डलादयो घटादयो वा निःसरन्त उत्पन्ना इति व्यवहारं भजन्ते तथैव निविशमानास्तिरोभवन्ति नश्यन्तीत्युच्यन्ते न पुनः सदसतोर्निरोधोत्पादयोर्निदर्शनमस्ति तथाचोक्तम्। नासतो विद्यते भावो नाभावो विद्यते सतइति। यथा सङ्कोचविकाशवत्भ्यः स्वावयवेभ्यः कूर्म्मो न भिद्यते तथा मत्सुवर्णादिभ्योऽपि कटककुण्डलघटादयो न भिन्नाः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

bracelet, an ear-ring *etcetera*, or a water-pot and the like, when they come out from the gold or the earth are called produced; and when they disappear or enter into the causes are spoken of as destroyed; but no instance of annihilation of an existent or of production of a non-existent has been seen. And it is said: there can be no existence of a non-existent, nor can there be non-existence of what exists. As the tortoise is not distinct from its contracted or extended limbs so also the earth or the gold is not different from the water-pot or the bracelet and ear-ring *etcetera*.

[1] Nor can it be said that distinction of the cause and the product is established in consequence of their appellations, their notions and their uses being different. Inasmuch as this argument is observed as wandering away in the case of a stage-player, who assuming different names such as I am Daśaratha, I am Rāma, I am Yudhishthira and the like, puts on different dresses and performs different acts according to his various appellations; but notwithstanding the three distinctions [as stated in the argument] the actor is not found to be different. The above fact is confirmed by the following verse:—

"The appearance, also the performance of the acts, and even the appellation of the stage-player are distinct; how is it that the actor himself does not become different? The answer of this must be furnished by the wise." Again the fire performs various benefits or acts, for instance the acts of burning, and of digesting, or preparing the food, and the like, but thereby it does not attain any difference. Also a single piece of straw is insufficient to furnish a shelter for rain or for sunshine, but a number of straws when collected together, become, in the particular condition possessed of enough power to protect from the rain or sunshine. In the same manner though one thread is unfit for the use of covering, yet a number of threads conjoined together on acquiring the peculiar state appearing as a cloth would do the work of covering &c. It is, therefore, stated that the product exists previously to its production, and it is merely manifestation of the product that is affected by the cause.

[2] It might be questioned whether this manifestation is or is not existent antecedently to the operation of the causes. By assuming the first alternative, the operation of causes would be needless, for causes do not operate in order to produce what exists; and by admitting the second the production of the non-existent would be established. In reply to this it is asked: Is the production acknowledged by yourself existent or non-existent? In accepting the former alternate we can see no necessity of causes, and in assuming the latter, there would arise the fault of regressus in infinitum, because as the non-existing production is produced there would be other production of this, and thereof another and so on, and thus there would clearly occur the regressus in infinitum. If it be replied that a piece of cloth &c. and its production are not distinct; we rejoin then that in that case it would be improper to say 'is produced,' when you say 'cloth' as well as to say 'cloth' when you say 'is produced,' for it would be but a repetition of the same thing. And it would also be wrong to say cloth is destroyed; inasmuch as it would be an assertion inconsistent in itself, produced and destroyed being contradictories to each other, and cloth and produced being according to your own statement synonymous. Therefore in accordance with your hypothesis the production of a piece of cloth would be the co-inhesion either of its existence or of its cause; but the relation of co-inhesion being eternal, the production of the piece of cloth would be a matter of utter impossibility, and the causes would not operate for producing the impossible production. For this reason it is unmistakingly said that, causes are necessary for the manifestation of a piece of cloth &c. previously non-existent. It must not be urged that relation of the piece of cloth &c. with its causes is in its very nature as product *i. e.* in its notion as cloth &c. because it is non-action, and causes must have their connection with action, for otherwise they would be non-productive of effect. Hence it is that the product is existent antece-

---

[1] न च नामयुक्त्यर्थक्रियाभेदात्कार्य्यकारणयोर्भेदसिद्धिरिति वाच्यं नटे व्यभिचारात्। नटो हि दशरथोऽहं रामोऽहं युधिष्ठिरोऽहमिति स्वयमनन्तनामा भूत्वा नामान्तरेण वेशान्तरमर्थक्रियान्तरञ्चकुरुते तथापि सत्यपि भेदत्रये नटभेदादर्शनात्। यथाहुः। रूपमयो अपि कार्य्यमयो अभिधापि नटस्य पृथग् विदितो न पृथत्वमुपैति नटः किमिति प्रतिवाच्यमवश्यमदङ्गुलैः॥ एकस्यापि वह्नेर्दाहकत्वपाचकत्वभेदेन नानार्थक्रियाकारित्वं दृश्यते नह्येतावता वह्निर्भेदमाधिगच्छति। एकैकस्य तृणस्यातपवृष्ट्यादिनिवृत्तावसामर्थ्येपि वह्नौ मिलित्वावस्थाविशेषं प्राप्य तान्येव यथा तद्विवृत्तौ सामर्थ्यमधिगच्छन्ति तथैकस्तन्तुः प्रावरणाद्यर्थक्रियासमर्थोपि मिलितास्त एव प्रावरणाद्यर्थक्रियाङ्कुरिष्यन्ति तस्मात्सदेवकार्य्यङ्कारणात्तदभिव्यक्तिरिति॥

[2] नन्वाविर्भावः कारणव्यापारात्पूर्वं सन्वा। आद्ये कारणव्यापारासम्भवः। नहि सदुत्पत्तौ केनापि कारणानि व्यापार्य्यन्ते। अन्त्ये प्राप्तमसदुत्पादनत्वम्। इति चेन्न। तवापि केयमुत्पत्तिः मत्यसती वा। आद्ये न कारणप्रयोजनं पश्यामः। अन्त्ये असदुत्पत्तिरुत्पद्यतइति तदुत्पत्तेरप्युत्पत्त्यन्तरं तत्राप्यन्येति स्फुटैवान्वस्था। अथ पटात्तदुत्पत्तिर्नातिरिच्यते तदा पट इत्युक्ते पुनरुत्पद्यत इति न वाच्यम्पौनरुक्त्यात्तथोत्पद्यत इत्युक्त्वा पुनः पट इति न वाच्यम्पूर्वोक्त दोषादेव। पटो न विनश्यतीत्यपि न वाच्यं विरोधात्। तस्मात्स्वसत्तासमवायः स्वकारणसमवायो वा पटोत्पत्तिः समवायस्य च नित्यत्वेन सर्वथापि न पटोत्पत्तिः सम्भवति तदर्थञ्च न कारणानि व्यापार्य्यन्ते। तथा च सत एव पटादेराविर्भावे कारणापेक्षेति न किञ्चिदवद्यम्। न च पटादेः कार्य्यरूपेण कारणसंबन्धस्तस्याक्रियात्वात्क्रियासम्बन्धित्वाच्च कारकाणामन्यथाकारकत्वञ्च स्यात्। तस्मात्सत्कार्य्यमिति स्थितं दुःखत्रयाभिघातसाधनमकृतिपुरुषान्यताज्ञानं तदुपयोगित्वाद्भूतवेऽप्यर्थमितिपादनीयम्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

dently to its manifestation. It having been thus shown that the discriminative knowledge of the soul and nature is the means of conquering the three-fold pain, the peculiarity of the evolved *i. e.* of the phenomena is now to be described, for it is subservient to the knowledge of the difference of the Soul and Nature.

[4] The evolved is the earth &c. It is different from the non-evolved—the Primary Cause; for it is caused, and is therefore non-eternal, that is to say, disappears into its cause, through what in the theory of the opponents would be said to be the apparatus of its destruction. It is non-pervasive, inasmuch as the cause pervades the effect, but the effect never pervades the cause; and is possessed of action; for instance, the Principle of understanding [buddhi] and the like,—internal phenomena abandon the former bodies and receive others; this is the action of these, and the action of the earth &c. *i. e.* of the external objects is familiarly known in the shape of change or motion. It is manifold, for 'understanding' *etcetera* are different in the different souls, so also are the earth and other things multifarious varying in the shape of a body, a water-pot, and the like. It is lying in its cause; although the understanding and the like internal objects are not distinct from the Primal Principle, however by allowing some distinction, the relation of being substratum and subsistent is held to exist between them, in the same way as by allowing some difference we say there are Tilaka trees in this forest, though the trees do not differ from the forest. It has constituent parts—*i. e.* is possessed of the conjunction as that of the integrant parts and integrate whole, but there is no conjunction between 'Understanding' and Nature, for they are identical; also there is no conjunction among Purity, Passion and Darkness, inasmuch as conjunction is the contact having a non-contact for its antecedent, and that does not exist in them. It is dependent; for example, the great Principle—the understanding &c. for producing their effect self-consciousness &c. require the aid of Nature, as well as all other causes in order to produce their respective effects are in need of her aid; consequently the evolved is dependent in producing products.

[5] The non-evolved—Nature—is contrary to what has been said above beginning from "It is" [see Section IV]. Although the non-evolved is possessed of the action characterized by change, it is in this respect not repugnant to the evolved,

[6] Now the similarity existing between the evolved and non-evolved, and their dissimilarity from the soul are to be mentioned. The evolved is possessed of the triad of qualities, that is, it has the three qualities *viz.*, pleasure, pain, and delusion. By the terms 'pleasure' &c., Purity, Passion and Darkness are designated, for the cause and effect are identical; and by the qualification 'is possessed of the triad of qualities' the hypothesis of opponents that purity *etcetera* are properties of the Soul must be understood, to be rejected; It is non-separable, because as the Primal Agency is not separated from itself, so also the Great Principle &c. are not separate from Nature, inasmuch as they have identity with it; or indistinction means separate, or non-separable may mean having productive power in aggregation, because nothing can produce an effect when single, but in aggregation, while in aggregation every thing is possessed of effective power. It is unintelligent, the Primal Agency and 'Understanding' &c. are all void of intelligence; and It has productiveness for its characteristic. Those that have been stated to be properties of the evolved, should be known to be the properties also of the non-evolved; this is the similarity of the evolved and non-evolved. Thus the evolved and non-evolved have been clearly described by their similarity and dissimilarity. The soul is repugnant to both evolved and non-evolved, for it possesses none of the properties belonging to them, and is therefore dissimilar to the evolved and the non-evolved.

G. D.

---

४ तच्च व्यक्तम्पृथिव्यादि तच्चाव्यक्तात्प्रधानाद्विलक्षणं यत इदं सकारणकं तत एव चानित्यम्पराभिमतविनाशसामग्र्या तिरोभवति। अव्यापकञ्च कारणं हि कार्य्यं व्याप्नोति न तु कार्य्यङ्कारणम्। सक्रियञ्च बुद्ध्यादयो हि पूर्वपूर्वापात्तं देहम्परित्यजन्ति देहान्तरञ्चोपादत्ते सैव तेषाङ्क्रिया पृथिव्यादीनाङ्क्रिया परिणामरूपेण प्रसिद्धैव। अनेकं बुद्ध्यादिकं प्रतिपुरुषभेदेनानेकं पृथिव्यादिकञ्च घटशरीरादिभेदेनानेकम्। स्वकारणाश्रितं। यद्यपि बुद्ध्यादीनाम्प्रधानभेदाभावाच्चाश्रयाश्रयिभावस्तथापि कथञ्चिद्भेदविवक्षयाश्रयाश्रयिभावोस्त्येव यथेह वने तिलकाः॥ सावयवमवयवायवसंयोगसंयोगि। बुद्धिप्रधानयोस्तु न संयोगस्तादात्म्याचापि सत्वरजस्तमसां संयोगः संयोगोह्यप्राप्तिपूर्विका प्राप्तिस्तदभावात्। नित्यमेव परतंत्रं स्वकार्य्येऽहङ्काराख्ये जनयितव्ये प्रकृत्यापूरमपेक्षते इत्यर्थः। एवङ्कारणमात्रं स्वकार्य्यं जनयितव्ये तदपेक्षां कुरुते तथा च स्वकार्य्ये जनयितव्ये परतन्त्रं व्यक्तं॥

५ यत इत्यभिव्याप्य यदुक्तं तद्विपरीतमव्यक्तं यद्यप्यव्यक्तत्वापि परिणामलक्षणा क्रियास्ति तथापि न परिस्पन्दः।

६ इदानीं व्यक्ताव्यक्तयोः साधर्म्यं पुरुषाच्च वैधर्म्यमुपादनीयम्। व्यक्तं हि त्रिगुणं त्रयोगुणाः सुखदुःखमोहात्मका अस्येति। अत्र कार्य्यकारणयोरभेदात्सुखादिशब्दैः सत्त्वादयोऽभिधीयन्ते। त्रिगुणमित्युक्त्वा सत्त्वादीनामात्मगुणत्वम्पराभिमतमपाकर्तं वेदितव्यं। तथा अविवेकि यथा प्रधानं स्वतो न विविच्यते तथा महदादयोपि प्रधानाच्च विविच्यन्ते तत्स्वरूपत्वात्। यद्वा सम्भूय कारिता अविवेकः सन्नेकं किञ्चित्कार्य्यं जनयितुं क्षमं सम्भूय सर्वः सर्वङ्करोति। एवमचेतनं प्रधानबुद्ध्यादयः सर्वे अचेतनास्तथा प्रसवरूपधर्मवन्तः॥ एते व्यक्तधर्माः कथितास्तथाव्यक्तस्यापीत्यवगन्तव्यम्। इदमेव व्यक्ताव्यक्तयोः साधर्म्यम्। एते साधर्म्यवैधर्म्याभ्यां व्यक्ताव्यक्ते निरूपिते तदुभयगतधर्मैरहितत्वाद्विपरीतः पुरुष इति पुरुषस्य व्यक्ताव्यक्तवैधर्म्यम्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

AN INTRODUCTION TO SANSKRIT PHILOSOPHY,

TRANSLATED FROM THE NYÁYA PADÁRTHATATVA OF PANDIT HARIKIŚORA TARKAVÁGÍŚA,

BY GIRÍŚA CHANDRA RÁYA OF BENARES COLLEGE.

Philosophy in Sanskrit included physiology and metaphysics. The Hindu philosopher, instead of being delivered from the inquiry into the nature of things, considered it his glory to speculate upon it. The celebrated motto of Socrates, that he knew nothing was quite foreign to a Hindu mind. The Hindu philosopher thought that he knew everything. The knowable phenomena were insufficient to satisfy his inquisitive habits. Having an implicit faith in the Śrutis, he did not scruple to understand the nature of the Deity himself.

Constitutionally imaginative, he was satisfied with ideal explanations when real ones were wanting. When he failed to explain anything he found a breach in the harmony of his system.

Eternal happiness is, as it must be, the characteristic of the Deity. Believing his own soul to be an emanation of the Divine, the Hindu did not hesitate to aspire to the same privilege. Full of sufferings as he was, he wished to get rid of them by developing his knowledge.

The attainment of Moksha (the absorption of the human soul into the Divine) was the final end of all his actions.

Theology played its part in hindering the course of his thought. The method adopted in his enquiries was always subjective. From a mind so constituted, what philosophy could be produced, it is easy to imagine. Abstract ideas, unwarranted by physical facts were the natural outgrowth of Hindu philosophy. The same causes which impeded the progress of European philosophy during hundreds of years also counteracted the growth of Sanskrit philosophy. The want of proper study of physics has rendered it metaphysical. The Gotama philosophy only had a tendency to become objective, but for the then imperfect knowledge of physics and the want of the objective method, it could not succeed. As it now is, it occupies an equal, if not a superior place to Aristotelian philosophy and logic. The metaphysical value of Sanskrit philosophy is superior to that of the Grecian.

An increased attention to the study of physics in the nineteenth century, has changed the course of thought in European minds. The objective philosophy which has resulted from the speculations of positive thinkers in France, Germany and England, cannot but be superior to any that has hitherto existed in Greece or India.

Blinded and antiquated as many of the systems now are in Sanskrit philosophy, their utility is not less on that account.

With regard to Locke, Browne, Kant and Reid, John Stuart Mill remarks that blundering as many of their opinions have now come to be a familiar acquaintance with their writings cannot fail to elevate the mental horizon of the reader. The same observation applies to the Sanskrit philosophers. A student may not derive any practical benefit from his reading of Sanskrit systems, *he will surely* find a very good exercise for his intellect.

Gotama, Kapila, Vyása, Jaimini, Kaṇád and Patanjalí are reputed to be the founders of the Nyáya, Sánkhya, Vedánta, Púrav Mimánsá, Vaiśeshika and Yoga systems of philosophy.

As regards their respective claims to the systems professed by them, the opinions of the succeeding generations are nearly unanimous; but as to the times in which they have respectively flourished, they are far from being at one. For the want of proper biographies, the attempt to arrive at precision seems almost an impossibility. Many Gotamas, many Kapilas and many Vyásas occur in the Puráṇas and other treatise of Sanskrit literature, but which Gotama or which Kapila was the philosopher, it is difficult to determine with certainty.

If we attempt to ascertain the priority of subsequence of the systems themselves, we run into confusion worse confounded. In every system others have been alluded to.

Several absurd hypotheses are propounded, suiting the caprice of the propounders, to solve these difficulties. Some attribute to the Munis the superhuman power of anticipating the doctrines of one another; others get rid of the riddle by maintaining the eternity of the productions themselves, which the munis being born at intervals, bring out to light, rather than evolve out of their own intellects.

Ridiculous as these prejudices are, they are so deep-rooted in native minds, that several recent works also being considered eternal, have been taken as the productions of the Munis. The want of proper biographies, the deep-rooted prejudices of the succeeding generations, and the want of regular training have each tended in turn, to heap darkness over darkness. A few faint glimmerings can be obtained from ancient treatises; but to dwell on them individually is beyond the scope of the present undertaking. We shall therefore remain content with a few general observations. Of all Sanskrit works, the Veda is the most ancient and Authoritative. Smṛiti, purans, and darśans all owe their existence to the Veda.

Nothing can be positively said with regard to the time in which the Vedas made their first appearance. Even the Manusaṅhitá appears comparatively a recent production. Perhaps the contemporaries of Manu could

CC-0. Sampurnanand University Collection. Digitized by eGangotri

not ascertain the time of the Vedas. This want of certainty as to the time of the Vedas has given rise to several conjectures with regard to them. The philosophers of the Mimánsá school maintained that the Veda has not been created and that it has been existent from eternity. On the other hand the Nyaiyáyikas affirmed that the Veda owed its conception and existence to the deity and therefore it is not eternal. Some foolishly reasoned against the Nyaiyáyikas and asked how could the vocal Veda be uttered by the Deity who is himself destitute of vocal organs. This gross and worthless objection could not of course escape the keen vigilance of the Nyaiyáyikas. They affirmed God not only to be the originator of the Vedas, but also to be the Supreme cause of the universe. If the creation of the world could be possible from God who has neither hand nor mouth &c. His production and utterance of the Veda could far more easily be imagined. To enter into these mysteries is not the object of the present attempt. The Veda may be eternal or not, it is surely the fountain head of all the Sanskrit works and full of supernatural instructions. The Upanishad treats of the worship of the formless God and of other transcendental and not metaphysical objects. Philosophy most probably derived its origin from the Upanishad. From internal evidence some imagine the Upanishad to be comparatively more recent than the Bráhmanas and the mantras. In many instances the munis have created several parts of the Upanishad and infused them into the *Śrúti* to give them a little more authoritative turn. Some portions of the Upanishad seem to be produced after the starting of some of the philosophical systems. It is far from our purpose to say that all the munis have attempted this forgery. In many cases the munis have appended their names to the Upanishads they have themselves produced, and are consequently free from any such imputation. The impostors only are to blame and none else.

Although the Upanishads are recent as compared with the Vedas, yet they are older than other treatises. It is equally difficult to determine the times in which the Upanishads were respectively produced—other remarks which hold good with respect to the Vedas, apply also to the Upanishads. With the gradual improvement of civilization, a better effect has been produced on the thoughts. The development of ideas in the Upanishad is better than those of the Veda. The production or the eternality of the Upanishad can be admitted or rejected on equal grounds to those of the Veda; but we do not wish to apply the same remark to the new Upanishads. The latter are so confused since the time of the Bauddhas, that everything is possible with regard to them.

If the Vedic language had not been beyond the access of the later writers, and if the Vedas had not been guarded by the table of contents appended to every one of them, then the Vedas produced by the common pundits would surely have been blended with the God-created Vedas. However, it appears to be quite certain that the first hints of philosophy—the mode of abstract thinking, were borrowed from the Upanishad. The affection did not spread to philosophy alone, other branches also, of which *Manu Sanhitá* is the most ancient, were affected by the Upanishad. In the times of the Upanishads, the philosophic systems were not developed. Some few general opinions were known to the literate, from which Gotama and others have elaborated their systems.

The following question might be started, Drawn from the common centre, how could the systems diverge into six different directions? The answer is too palpable to admit of thorough examination.

Every man is a philosopher when he asks the simple quesitons, whence he is and who he is &c. The difference of doctrines is due to the peculiarity of mental constitution in individuals. Gotama, Kapila &c., brought out different systems owing to their different modes of thinking. To ascertain the priority or subsequence of the philosophers relatively to one another is also a difficult task. It can be generally said that Gotama, Kapila and Vyása are more celebrated than Kaṇád, Patanjalí and recur oftener in older treatises than the latter set. Therefore it is not going beyond possibility to assume the former set to be more ancient than the latter. The name of Jaimini is mentioned in the Márkandeya Purána no doubt, but he is therein represented as the disciple of Vyása—on the other hand if we depend upon the Rámáyana and Mahábhárat alone, we are warranted to consider Gotama and Kapila to be a little more ancient than Vyása. From those two works it is evident that before the conception of Vyása in the womb of Satyavatí, Gotama uttered a curse on Indra and Ahalyá and Kapila on the Sagara family. Who is the elder of the two philosophers, Gotama or Kapila, it is not easy to understand. Arguing from thought alone, we can infer the precedence of Gotama to Kapila. The principles of the Nyáya philosophy are more closely related to the mental phænomena and based on general truths, whereas in the Sánkhya philosophy a greater trace of imagination is to be seen. To illustrate it at the long run will transcend our purpose, we shall however offer a general illustration. According to the Nyáya philosophy the creation is performed by atoms. Atoms are invisible and exceedingly small entities: the visible phænomena are produced by their combinations. Sánkhya evolves existence from Prakṛiti * who is herself eternal and unintelligent. The creation is nothing more than modification of already existent things. Prakṛiti is modified to *Maháttatva*, that to Ahankára and Ahankára to Panchatanmátra and so on.

(To be continued.)

* Prakṛiti is the equillibrium of the three principles Satva, rajas and tamas.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 107. Benares, April 1st, 1875. Vol. IX.

काशिकायाः

॥ तृतीयाध्यायस्य तृतीयः पादः ॥

ण्यासश्रन्थो युच् ॥ १०७ ॥

ण्यन्तेभ्यो धातुभ्य आस श्रन्थ इत्येताभ्यां च स्त्रियां युच्प्रत्ययो भवति । अकारस्यापवादः । कारणा । हारणा । आसना । श्रन्थना । कथमास्या । ऋहलोर्ण्यद्भविष्यति । वासरूपप्रतिषेधश्च स्त्रीप्रकरणविषयस्यैवोत्सर्गापवादस्य । श्रन्थिः क्र्यादिर्गृह्यते श्रन्थ विमोचनप्रतिहर्षयोरिति । न चुरादिः श्रन्थ ग्रन्थ संदर्भे इति । ण्यन्तत्वेनैव सिद्धत्वात् ॥ घट्टिवन्दिविदिभ्य उपसंख्यानम् ॥ * ॥ घट्टना । वन्दना । वेदना । घट्टेस्तौदादिकस्य ग्रहणं घट्ट चलनइति । न चौरादिकस्य घट्ट संवरणइत्यस्य ग्रहणं, तस्य णेरित्येव सिद्धत्वात् ॥ इषेरनिच्छार्थस्य युज्वक्तव्यः ॥ * ॥ अध्येषणा । अन्वेषणा ॥ परेर्वा ॥ * ॥ पर्येषणा । परीष्टिः ॥

रोगाख्यायां ण्वुल्बहुलम् ॥ १०८ ॥

रोगाख्यायां गम्यमानायां धातोर्बहुलं ण्वुल् प्रत्ययो भवति । क्तिन्नादीनामपवादः । आख्याग्रहणं रोगस्य चेत्प्रत्ययान्तेन संज्ञा भवति । बहुलग्रहणं व्यभिचारार्थम् । प्रच्छर्द्दिका । प्रवाहिका । विचर्चिका । न च भवति । शिरोर्त्तिः ॥ धात्वर्थनिर्द्देशे ण्वुल्वक्तव्यः ॥ * ॥ आशिका । शायिका वर्त्तते ॥ इक्श्तिपौ धातुनिर्द्देशे इति वक्तव्यम् ॥ * ॥ भिदिः । छिदिः । पचतिः । पठतिः ॥ वर्णात्कारः ॥ * ॥ निर्द्देशइति प्रकृतम् । अकारः । इकारः ॥ रादिफः ॥ * ॥ रेफः ॥ मत्वर्थाच्छः ॥ * ॥ अकारलोपश्च । मत्वर्थीयः ॥ इञजादिभ्यः ॥ * ॥ आजिः । आतिः । आदिः ॥ इक् कृष्यादिभ्यः ॥ * ॥ कृषिः । किरिः ॥

संज्ञायाम् ॥ १०९ ॥

संज्ञायां विषये धातोर्ण्वुल् प्रत्ययो भवति । उद्दालकपुष्पभञ्जिका । वरणपुष्पप्रवाहिका * । आभ्यूषखादिका । आचोषखादिका । शालभञ्जिका । तालभञ्जिका ॥

विभाषाख्यानपरिप्रश्नयोरिञ् च ॥ ११० ॥

पूर्वं परिप्रश्नः, पश्चादाख्यानम् । सूत्रे ऽल्पाच्तरस्य पूर्वनिपातः । परिप्रश्ने आख्याने च गम्यमाने धातोरिञ् प्रत्ययो भवति । चकाराद् ण्वुलपि । विभाषाग्रहणात्परोपि यः प्राप्नोति सोपि भवति । कां त्वं कारिमकार्षीः । कां कारिकामकार्षीः । कां क्रियामकार्षीः । कां कृत्यामकार्षीः । कां कृतिमकार्षीः । सर्वां कारिमकार्षम् । सर्वां कारिकामकार्षम् । सर्वां क्रियामकार्षम् । सर्वां कृत्यामकार्षम् । सर्वां कृतिमकार्षम् । कां गणिमजीगणः । कां गणनामजीगणः । सर्वां गणिमजीगणम् । सर्वां गणिकाम् । सर्वां गणनाम् । एवं कां याजिम् । कां याजिकाम् । कां याचिम् । कां याचिकाम् । कां पचाम् । कां पाठिम् । कां पाठिकाम् । इति द्रष्टव्यम् । आख्यानपरिप्रश्नयोरिति किम् । कृतिः । हृतिः ॥

पर्यायार्हर्णोत्पत्तिषु ण्वुच् ॥ १११ ॥

पर्यायः परिपाटीक्रमः । अर्हणमर्हः, तद्योग्यता । ऋणं तत् यत्परस्य † धार्यते । उत्पत्तिर्जन्म । एतेष्वर्थेषु धातोर्ण्वुच्

* प्रचायिकेति पा० ।

† परस्मै इति पाठः । तत्र धारेरुत्तमर्ण इति संप्रदानसंज्ञा ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रत्ययो भवति। क्तिवादीनामपवादः। पर्याये तावत्। भवतः शायिका। भवतो ऽयथासिका। अर्हे। अर्हति भवानित्युभक्तिकाम् *। ऋणे। दत्तुभक्तिकां मे धारयसि। ओदनभोजिकाम्। पयःपायिकाम्। उत्पत्तौ। दत्तुभक्तिका मे उदपादि। ओदनभोजिका। पयःपायिका। विभाषेत्येव। चिकीर्षात्यद्यते। ण्वुलि प्रकृते प्रत्ययान्तरकरणं स्वरार्थम्॥

आक्रोशे नञ्यनिः॥ ११२॥

विभाषेति निवृत्तम्। आक्रोशः शपनम्। आक्रोशे गम्यमाने नञ्युपपदे धातोरनिः प्रत्ययो भवति। क्तिवादीनामपवादः। अकरणिस्ते वृषल भूयात्। आक्रोशदति किम्। अकृतिस्तस्य कटस्य। नञीति किम्। मृतिस्ते वृषल भूयात्॥

कृत्यल्युटो बहुलम्॥ ११३॥

भावे ऽकर्त्तरि च कारकदति निवृत्तम्। कृत्यसंज्ञकाः प्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति। यत्र विहितास्ततोन्यत्रापि भवन्ति। भावकर्मणोः कृत्या विहिताः कारकान्तरेपि भवन्ति। स्नानीयं चूर्णम्। दानीयो ब्राह्मणः। करणाधिकरणयोर्भावे च ल्युट्। अन्यत्रापि भवति। अपसेचनमवस्रावणम्। राजभोजनाः शालयः। राजाच्छादनानि वासांसि। प्रस्कन्दनम्। प्रपतनम्। बहुलग्रहणादन्येपि कृतो यथाप्राप्तमभिधेयं व्यभिचरन्ति। पादाभ्यां ह्रियते, पादहारकः। गले चोप्यते, गलेचोपकः॥

नपुंसके भावे क्तः॥ ११४॥

नपुंसकलिङ्गे भावे धातोः क्तः प्रत्ययो भवति। हसितम्। सहितम्। जल्पितम्†॥

ल्युट् च॥ ११५॥

नपुंसकलिङ्गे भावे धातोर्ल्युट् प्रत्ययो भवति। हसनं छात्रस्य। शोभनम्। जल्पनम्। शयनम्। आसनम्। योगविभाग उत्तरार्थः॥

कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्॥ ११६॥

येन कर्मणा संस्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे धातोर्नपुंसकलिङ्गे भावे ल्युट् प्रत्ययो भवति। पूर्वेणैव सिद्धे प्रत्यये नित्यसमासार्थं वचनम्। उपपदसमासादिर्नित्यः समासः। पयःपानं सुखम्। ओदनभोजनं सुखम्। कर्मणीति किम्। तूलिकाया उत्थानं सुखम्। संस्पर्शादिति किम्। अग्निकुण्डस्योपासनं सुखम्। कर्तुरिति किम्। गुरोः स्नापनं सुखम्। स्नापयतेर्नै गुरुः कर्त्ता, किं तर्हि कर्म। शरीरग्रहणं किम्। पुत्रस्य परिष्वञ्जनं सुखम्। सुखं मानसी प्रीतिः। सुखमिति किम्। कण्टकानां मर्दनं दुःखम्। सर्वत्रासमासः प्रत्युदाह्रियते॥

करणाधिकरणयोश्च॥ ११७॥

करणे ऽधिकरणे च कारके धातोर्ल्युट् प्रत्ययो भवति। इध्मप्रव्रश्चनः। पलाशशातनः। अधिकरणे। गोदोहनी। सक्तुधानी॥

पुंसि संज्ञायां घः प्रायेण॥ ११८॥

करणाधिकरणयोरित्येव। पुंलिङ्गयोः करणाधिकरणयोरभिधेययोर्धातोर्घः प्रत्ययो भवति समुदायेन चेत्संज्ञा गम्यते। प्रायग्रहणमकार्त्स्न्यार्थम्। दन्तच्छदः। उरश्छदः। घटः। अधिकरणे खल्वपि। एत्य तस्मिन्कुर्वन्त्योत्याकरः। आलयः। पुंसीति किम्। प्रसाधनम्। संज्ञायामिति किम्। प्रहरणो दण्डः। घकारश्चादेर्घदति विशेषणार्थः॥

गोचरसंचरवहव्रजव्यजापणनिगमाश्च॥ ११९॥

गोचरादयः शब्दा घप्रत्ययान्ता निपात्यन्ते पूर्वेष्वेवार्थेषु। हलश्चेति घञं वक्ष्यति। तस्यायमपवादः। गावश्चरन्त्यस्मिन्निति, गोचरः। संचरन्ते ऽनेनेति, संचरः। वहन्ति तेन, वहः। व्रजन्ति तेन, व्रजः। व्यजन्ति तेन, व्यजः। निपातनादजेर्व्यघञपोरिति वीभावो न भवति। एत्य तस्मिन्नापणन्तदित्यापणः। निगच्छन्ति तस्मिन्निति, निगमः। चकारोनुक्तसमुच्चयार्थः। कपः। निकपः॥

अवे तॄस्त्रोर्घञ्॥ १२०॥

अवउपपदे तरतेस्तृणातेश्च धातोः करणाधिकरणयोः संज्ञायां घञ् प्रत्ययो भवति। घस्यापवादः। ञकारो वृद्ध्यर्थः, स्वरार्थश्च। घकार उत्तरत्र कुत्वार्थः। अवतारः। अवस्तारः। कथमवतारो नद्याः। नहीयं संज्ञा। प्रायानुवृत्तेरसंज्ञायामपि भवति॥

हलश्च॥ १२१॥

पुंसि संज्ञायां करणाधिकरणयोश्चेति सर्वमनुवर्त्तते। हलन्ताद्धातोः करणाधिकरणयोर्घञ् प्रत्ययो भवति। घस्यापवादः। लेखः। वेदः। वेपः। बन्धः। मार्गः। अपामार्गः॥

अध्यायन्यायोद्यावसंहाराधारावायाश्च॥ १२२॥

अध्यायादयः शब्दा घञन्ता निपात्यन्ते। पुंसि संज्ञायां घे प्राप्ते घञ्विधीयते। अहलन्तार्थ आरम्भः। अधीयतेस्मिन्नित्यध्यायः। नीयतेनेनेति न्यायः। उद्यवन्ति अस्मिन्नित्युद्यावः। संहियन्ते ऽनेनेति संहारः। आधियते ऽस्मिन्नित्याधारः। आवयन्त्यस्मिन्नित्यावायः। चकारोनुक्तसमुच्चयार्थः। अवहारः॥

* पयःपायिकामिति पुस्तकान्तरे ऽधिकम्।

† शयितम्। भुक्तम्। आसितम्। इति क्व चित्पुस्तके ऽधिकम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदङ्कोऽनुदके ॥ १२३ ॥

उदङ्क इति निपात्यते, अनुदकविषयश्चेद्भात्वर्थो भवति। उत्पूर्वादञ्चतेर्घञिनपात्यते। ननु च हलश्चेति सिद्ध एव घञ्। उदके प्रतिषेधार्थमिदं वचनम्। तैलोदङ्कः। अनुदकइति किम्। उदकोदञ्चनः। घः कस्माच्च प्रत्युदाह्रियते। विशेषाभावात्। घञ्यपि याधादिस्वरेणान्तोदात्त एव ॥

जालमानायः ॥ १२४ ॥

आनाय इति निपात्यते जालं चेत्तद्भवति। आङ्पूर्वाच्चयतेः करणे घञ् निपात्यते। आनायो मत्स्यानाम्। आनायो मृगाणाम् * ॥

खनो घ च ॥ १२५ ॥

खनतेर्द्योतेः करणाधिकरणयोर्घः प्रत्ययो भवति। चकारात् घञ् च। आखनः। आखानः ॥ डो वक्तव्यः ॥ * ॥ आखः ॥ डरो वक्तव्यः ॥ * ॥ आखरः ॥ डको वक्तव्यः ॥ * ॥ आखनिकः ॥ डकवको वक्तव्यः ॥ * ॥ आखनिकवकः† ॥

ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥ १२६ ॥

करणाधिकरणयोरिति निवृत्तम्। ईषत् दुस् सु इत्येतेषूपपदेषु कृच्छ्राकृच्छ्रार्थेषु धातोः खल् प्रत्ययो भवति। कृच्छ्रं दुःखम्। तद् दुरो विशेषणम्। अकृच्छ्रं सुखम्। तदितरयोर्विशेषणं, संभवात्। ईषत्करो भवता कटः। दुष्करः। सुकरः। ईषद्भोजः। दुर्भोजः। सुभोजः। ईषदादिष्विति किम्। कृच्छ्रेण कार्यः कटः। कृच्छ्राकृच्छ्रार्थेष्विति किम्। ईषत्कार्यः। लकारः स्वरार्थः। खित्करणमुत्तरत्र सुमर्थम् ॥

कर्तृकर्मणोश्च भूकृञोः ॥ १२७ ॥

भवतेः करोतेश्च धातोर्यथासंख्यं कर्तरि कर्मणि चोपपदे चकारादीषदादिषु च खल् प्रत्ययो भवति। ईषदाढ्यंभवं भवता। दुराढ्यंभवम्। स्वाढ्यंकरो देवदत्तो भवता ॥ कर्तृकर्मणोश्च्व्यर्थयोरिति वक्तव्यम् ॥ * ॥ इह मा भूत्। खाढ्येन भूयते‡ ॥

आतो युच् ॥ १२८ ॥

ईषदादयोनुवर्त्तन्ते। कर्तृकर्मणोरिति न स्वर्यते। कृच्छ्राकृच्छ्रार्थेषु ईषदादिषूपपदेषु आकारान्तेभ्यो धातुभ्यो युच् प्रत्ययो भवति। खनोपवादः। ईषत्यानः सोमो भवता। दुष्यानः। सुपानः। ईषद्दानो गौर्भवता। दुर्दानः सुदानः ॥

क्रन्दसि गत्यर्थेभ्यः ॥ १२९ ॥

ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि विषये युच्प्रत्ययो भवति। खलोपवादः। सूपसदनोऽग्निः। सूपसदनमन्तरिक्षम् ॥

अन्येभ्योपि दृश्यते ॥ १३० ॥

अन्येभ्योपि धातुभ्यो गत्यर्थेभ्यश्छन्दसि विषये युच्प्रत्ययो दृश्यते। सुदोहनामकृणोद्ब्रह्मणे गाम्। सुवेदनामकृणोद्ब्रह्मणे गाम् ॥ भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच् वक्तव्यः ॥ * ॥ दुःशासनः। दुर्योधनः। दुर्दर्शनः। दुर्द्धर्षणः। दुर्मर्षणः ॥

वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥ १३१ ॥

समीपमेव सामीप्यम्। प्यञः स्वार्थिकत्वं ज्ञाप्यते चातुर्वर्ण्यादिसिद्ध्यर्थम्। वर्त्तमानसमीपे भूते भविष्यति च वर्त्तमानाद् धातोर्वर्त्तमानवत्प्रत्यया वा भवन्ति। वर्त्तमाने लडित्यारभ्य यावदुणादयो बहुलमिति वर्त्तमाने प्रत्यया उक्तास्ते भूतभविष्यतोर्विधीयन्ते। कदा देवदत्तागतोसि। अयमागच्छामि। आगच्छन्तमेव मां विद्धि। अयमागमम्। अयोस्म्यागतः। कदा देवदत्त गमिष्यसि। एष गच्छामि। गच्छन्तमेव मां विद्धि। एष गमिष्यामि। गन्तास्मि। वत्करणं सर्वसादृश्यार्थम्। येन विशेषेण वर्त्तमाने प्रत्यया विहिताः प्रकृत्युपपदोपाधिना तथैवात्र भवन्ति। पचमानः। यजमानः। अलंकरिष्णुः। सामीप्यग्रहणं किम्। विप्रकर्षविवक्षायां मा भूत्। परुदगच्छत्पाटलिपुत्रम्। वर्षेण गमिष्यति। यो मन्यते गच्छामीति पदं वर्त्तमाने काल एव वर्त्तते। कालान्तरगतिस्तु वाक्याद्भवति। न च वाक्यगम्यः कालः पदसंस्कारवेलायामुपयुज्यतइति तादृशं वाक्यार्थेत्र प्रतिपत्तारं प्रति प्रकरणमिदं नारभ्यते। तथा च श्वः करिष्यति वर्षेण गमिष्यतीति सर्वमुपपद्यते ॥

आशंसायां भूतवच्च ॥ १३२ ॥

वेत्येव। वर्त्तमानसामीप्यइति नानुवर्त्तते। आशंसनमाशंसा। अप्राप्तस्य प्रियार्थस्य प्राप्तुमिच्छा। तस्याश्च भविष्यत्कालो विषयः। तत्र भविष्यति काले आशंसायां गम्यमानायां धातोर्वा भूतवत्प्रत्यया भवन्ति। चकारादुर्त्तमानवच्च। उपाध्यायश्चेदागमत्। आगतः। आगच्छति। आगमिष्यति। एते व्याकरणमधागीष्महि। एते व्याकरणमधीतवन्तः। अधीमहे। अधेष्यामहे। सामान्यातिदेशे विशेषानतिदेशाल्लङ्लिटौ न भवतः। आशंसायामिति किम्। आगमिष्यति ॥

---

* जालमिति किम्। आनयः। इति क्व चिदधिकमत्र।

+ अत्र "खनो भगः पदं चेति वक्तव्यम्" इति वार्तिकरूपेण कुत्र चित्पठ्यते सोऽपपाठः, पदमञ्जर्यां खनो घ चेति चित्करणमन्यतोपि ज्ञापनार्थं तेन खनो भगः पदं चेत्यादि सिध्यतीत्युक्तत्वात्।

‡ स्वाढ्येन भूयतइति। प्रमादपाठोयम्। अत्र हि खलभावात्सुप्रत्ययस्य धातोः प्राक् प्रयोगेण भाव्यं, तस्मादाढ्येन सुभूयतइति पाठ इति पदमञ्जरी।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

क्षिप्रवचने लृट् ॥ १३३ ॥

आशंसायामित्येव। क्षिप्रवचनउपपदे आशंसायां गम्यमानायां धातोर्लृट् प्रत्ययो भवति। भूतवच्चेत्यस्यायमपवादः। उपाध्यायश्चेत्क्षिप्रमागमिष्यति। क्षिप्रं व्याकरणमध्येष्यामहे। वचनग्रहणं पर्यायार्थम्। क्षिप्रं शीघ्रमाशु त्वरितम् अध्येष्यामहे। नेति वक्तव्ये लृट्ग्रहणं लुटोपि विषये यथा स्यात्। श्वः क्षिप्रमध्येष्यामहे ॥

आशंसावचने लिङ् ॥ १३४ ॥

आशंसा येनोच्यते तदाशंसावचनं, तस्मिन्नुपपदे धातोर्लिङ् प्रत्ययो भवति। भूतवच्चेत्यस्यायमपवादः। उपाध्यायश्चेदागच्छेत् आशंसे युक्तोधीयीय। आशंसे अवकल्पये युक्तोधीयीय। आशंसे क्षिप्रमधीयीय ॥

नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः ॥ १३५ ॥

भूतानद्यतने भविष्यदनद्यतने च लङ्लुटौ विहितौ, तयोरयं प्रतिषेधः। अनद्यतनवत्प्रत्ययविधिर्न भवति क्रियाप्रबन्धे सामीप्ये च गम्यमाने। क्रियाणां प्रबन्धः सातत्येनानुष्ठानम्। कालानां सामीप्यं तुल्यजातीयेनाव्यवधानम्। यावज्जीवं भृशमवमदात्। भृशमवं दास्यति। यावज्जीवं पुत्रोध्यापिपत्। यावज्जीवमध्यापयिष्यति। सामीप्ये खल्वपि। येयं पौर्णमास्यतिक्रान्ता, एतस्यामुपाध्यायोग्नीनाधित। सोमेनायष्ट। गामदित। येयममावास्या ऽऽगामिनी एतस्यामुपाध्यायोग्नीनाधास्यते। सोमेन यक्ष्यते। स गां दास्यते। द्वौ प्रतिषेधौ यथाप्राप्तस्याभ्यनुज्ञापनाय ॥

भविष्यति मर्यादावचने ऽवरस्मिन् ॥ १३६ ॥

नानद्यतनवदिति वर्त्तते। अक्रियाप्रबन्धार्थमसामीप्यार्थं वचनम्। भविष्यति काले मर्यादावचने ऽवरस्मिन्नविभागे ऽनद्यतनवत्प्रत्ययविधिर्न भवति। योयमध्वा गन्तव्य आपाटलिपुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे। तत्र सक्तून्पास्यामः। भविष्यतीति किम्। योयमध्वा गत आपाटलिपुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्र युक्ता अध्यैमहि। तत्र द्विरोदनम् अभुञ्जमहि। तत्र सक्तूनपिबाम। मर्यादावचनदति किम्। योयमध्वा निरवधिको गन्तव्यस्तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे। सक्तून् पास्यामः। अवरस्मिन्निति किम्। योयमध्वा गन्तव्य आपाटलिपुत्रात् तस्य यत्परं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे। तत्र सक्तून्पास्यामः। इह सूत्रे देशकृता मर्यादा उत्तरत्र कालकृता तत्र च विशेषं वक्ष्यति ॥

कालविभागे चानहोरात्राणाम् ॥ १३७ ॥

भविष्यति मर्यादावचने ऽवरस्मिन्निति वर्त्तते। कालमर्यादाविभागे सत्यवरस्मिन्नविभागे भविष्यति काले ऽनद्यतनवत्प्रत्ययविधिर्न भवति। न चेदहोरात्रसंबन्धी विभागस्तेषां च विभागे प्रतिषेधः। पूर्वेणैव सिद्धे वचनमिदमहोरात्रनिषेधार्थम्। योगविभाग उत्तरार्थः। योयं संवत्सर आगामी तत्र यदवरमायहायण्यास्तत्र युक्ता अध्येष्यामहे। तत्रौदनं भोक्ष्यामहे। भविष्यतीत्येव। योयं वत्सरोतीतस्तस्य यदवरमायहायण्यास्तत्र युक्ता अध्यैमहि। तत्रौदनमभुञ्जमहि। मर्यादावचनदित्येव। योयं निरवधिकः काल आगामी तस्य यदवरमायहायण्यास्तत्र युक्ता अध्येतास्महे। तत्रौदनं भोक्तास्महे। पवरस्मिन्निति एव। परस्मिन्विभाषां वक्ष्यति। अनहोरात्राणामिति किम्। त्रिविधमुदाहरणम्। योयं मास आगामी तस्य योवरः पञ्चदशरात्रः, योयं त्रिंशद्रात्र आगामी तस्य योवरोर्द्धमासः, योयं त्रिंशदहोरात्र आगामी तस्य योवरः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे। तत्र सक्तून्पातास्मः। सर्वथा ऽहोरात्रस्यार्शे प्रतिषेधः ॥

परस्मिन्विभाषा ॥ १३८ ॥

भविष्यति मर्यादावचने कालविभागे चानहोरात्राणामिति सर्वमनुवर्त्तते। कालमर्यादाविभागे सति भविष्यति काले परस्मिन्नविभागे विभाषा ऽनद्यतनवत्प्रत्ययविधिर्न भवति न चेदहोरात्रसंबन्धी प्रविभागः। अवरस्मिन्वर्जं पूर्वमनुवर्त्तते। अवरस्मिन्पूर्वेण प्रतिषेध उक्तः संप्रति परस्मिंश्चप्राप्तएव विकल्प उच्यते। योयं संवत्सर आगामी तस्य यत्परमायहायण्यास्तत्र युक्ता अध्येष्यामहे, अध्येतास्महे। तत्र सक्तून् पास्यामः। तत्र सक्तून्पातास्मः। अनहोरात्राणामित्येव। योयं त्रिंशद्रात्र आगामी तस्य यः परः पञ्चदशरात्रस्तत्र युक्ता अध्येतास्महे। तत्र सक्तून् पातास्मः। भविष्यतीत्येव। योयं संवत्सरोतीतस्तस्य यत्परमायहायण्यास्तत्र युक्ता अध्यैमहि। तत्रौदनमभुञ्जमहि। मर्यादावचनदित्येव। योयं संवत्सरो निरवधिकः काल आगामी तस्य यत्परमायहायण्यास्तत्र युक्ता अध्येतास्महे। तत्र सक्तून्पातास्मः। कालविभागदित्येव। योयमध्वा गन्तव्य आपाटलिपुत्रात् तस्य यत्परं कौशाम्ब्यास्तत्र युक्ता अध्येतास्महे। ओदनं भोक्तास्महे। इति सर्वत्रानद्यतनवत्प्रत्यया उदाहार्याः ॥

लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥ १३९ ॥

भविष्यतीत्यनुवर्त्तते। हेतुहेतुमतोर्लिङित्येवमादिकं लिङो निमित्तं, तत्र लिङ्निमित्ते भविष्यति काले लृङ् प्रत्ययो भवति क्रियातिपत्तौ सत्याम्। कुतश्चिद्वैगुण्यादनभिनिर्वृत्तिः क्रियायाः क्रियातिपत्तिः। दर्विणेन चेदायास्यत्र शकटं पर्या-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भविष्यत् । यदि कमलक*माह्वास्यच्च शकटं पर्याभविष्यत् । अभोक्ष्यत भवान्घृतेन यदि मत्समीपमागमिष्यत् । भविष्यत्कालविषयमेतद्वचनम् । भविष्यदपर्याभवनं च हेतुमत् तत्र हेतुभूतं च कमलकाह्वानम् । लिङ्निमित्ते लृङ्क्रियातिपत्तिं च प्रमाणान्तराद्वगम्य वक्ता वाक्यं प्रयुङ्क्ते । यदि कमलकमाह्वास्यच्च शकटं पर्याभविष्यदिति, हेतुहेतुमतोराह्वानापर्याभवनयोर्भविष्यत्कालविषययोरतिपत्तिरितो वाक्याद्वगम्यते ॥

भूते च ॥ १४० ॥

लिङ्निमित्ते लृङ्क्रियातिपत्ताविति सर्वमनुवर्त्तते । पूर्वेण भविष्यति विहितः संप्रति भूते विधीयते । भूते च काले लिङ्निमित्ते क्रियातिपत्तौ सत्यां लृङ् प्रत्ययो भवति । उताप्ये रित्यारभ्य लिङ्निमित्तेषु विधानमेतत् । प्राक्, ततो विकल्पं वक्ष्यति । दृष्टो मया भवत्पुत्रो ऽचार्यां चङ्क्रम्यमाणः । अपरश्च द्विजो ब्राह्मणार्यां, यदि स तेन दृष्टो ऽभविष्यत् । तदा ऽभोक्ष्यत न तु भुक्तवान् । अन्येन पथा स गतः ॥

वोताप्योः ॥ १४१ ॥

भूते लिङ्निमित्ते लृङ् क्रियातिपत्ताविति सर्व्वमनुवर्त्तते । वा आ उताप्योः वोताप्योः । मर्यादायामयमाङ् नाभिविधौ । उताप्योः समर्थयोर्लिङिति वक्ष्यति प्रागेतस्मात् सूत्रावधेर्यदित ऊर्द्ध्वमनुक्रमिष्यामः, तत्र भूते लिङ्निमित्ते क्रियातिपत्तौ लृङ्वा भवतीत्येतदधिकृतं वेदितव्यम् । वक्ष्यति विभाषा कथमि लिङ् च । कथं नाम तत्र भवान्वृषलमयाजयिष्यत् । यथाप्राप्तं च, याजयेत् ॥

गर्हायां लङपिजात्वोः ॥ १४२ ॥

गर्हा कुत्सेत्यनर्थान्तरम् । गर्हायां गम्यमानायाम् अपिजात्वोरुपपदयोर्धातोर्लट् प्रत्ययो भवति । वर्त्तमाने लडुक्तः कालसामान्ये न प्राप्नोतीति विधीयते । कालविशेषविहितांश्चापि प्रत्ययानयं परत्वाद् अस्मिन्विषये बाधते । अपि तत्र भवान्वृषलं याजयति, जातु तत्र भवान्वृषलं याजयति । गर्हामहे । अहो अन्याय्यमेतत् । लिङ्निमित्ताभावादिह क्रियातिपत्तौ लृङ् न भवति ॥

विभाषा कथमि लिङ् च ॥ १४३ ॥

गर्हायामिति वर्त्तते । कथंशब्दउपपदे गर्हायां गम्यमानायां धातोर्लिङ् प्रत्ययो भवति । चकारात्लट् च । विभाषाग्रहणं यथास्वं कालविषये विहितानामबाधनार्थम् । कथं नाम तत्र भवान्वृषलं याजयेत् । कथं नाम तत्र भवान्वृषलं याजयति, कथं नाम तत्र भवान्वृषलं याजयिष्यति । कथं नाम तत्र भवान्वृषलं याजयिता । कथं नाम तत्र भवान्वृषलं याजयेत् । कथं नाम तत्र भवान्वृषलमयाजयत् । कथं नाम तत्र भवान्वृषलं याजयांचकार । अत्र लिङ्निमित्तमस्तीति भूतविवक्षायां क्रियातिपत्तौ वा लृङ् । भविष्यद्विवक्षायां सर्वत्र नित्येनैव लृङा भवितव्यम् ॥

किंवृत्ते लिङ्लटौ ॥ १४४ ॥

गर्हायामित्येव । विभाषा न स्वर्यते । किंवृत्तउपपदे गर्हायां गम्यमानायां धातोर्लिङ्लटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । लिङ्ग्रहणं लटो ऽपरियह्यर्थम् । को नाम वृषलो यं तत्र भवान् याजयेत् । यं तत्र भवान्वृषलं याजयिष्यति । कतरो नाम कतमो नाम यं तत्र भवान्वृषलं याजयेत् । याजयिष्यति । भूते क्रियातिपत्तौ वा लङ् । भविष्यति तु नित्यम् । को नाम वृषलो यं तत्र भवानयाजयिष्यत् ॥

अनवक्लृप्त्यमर्षयोरकिंवृत्तेपि ॥ १४५ ॥

गर्हायामिति निवृत्तम् । अनवक्लृप्तिरसंभावना । अमर्षो, ऽक्षमा । किंवृत्ते अकिंवृत्ते चोपपदे अनवक्लृप्त्यमर्षयोर्धातोर्लिङ्लटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । बहुचः पूर्वनिपातो लक्षणव्यभिचारचिह्नम् । तेन यथासंख्यं न भवति । अनवक्लृप्तौ तावत् । नावकल्पयामि । न संभावयामि । न श्रद्दधे, तत्र भवान्नाम वृषलं याजयेत् । तत्र भवान्नाम वृषलं याजयिष्यति । को नाम वृषलो, यं तत्र भवान् वृषलं याजयेत् । को नाम तत्र भवान्वृषलं याजयिष्यति । अमर्षे । न मर्षयामि तत्र भवान्वृषलं याजयेत्, याजयिष्यति । को नाम वृषलो, यं तत्र भवान्याजयेत्, याजयिष्यति । भूतविवक्षायां तु क्रियातिपत्तौ वा लृङ् भवति । भविष्यति नित्यम् । नावकल्पयामि तत्र भवान्नाम वृषलमयाजयिष्यत् ॥

किंकिलास्त्यर्थेषु लट् ॥ १४६ ॥

अनवक्लृप्त्यमर्षयोरिति वर्त्तते । किंकिलशब्दः समुदाय उपपदम् । अस्त्यर्थो, ऽस्तिभवतिविद्यतयः । किंकिलास्त्यर्थेषूपपदेषु अनवक्लृप्त्यमर्षयोर्धातोर्लट् प्रत्ययो भवति । लिङपवादः । किंकिल नाम तत्र भवान्वृषलं याजयिष्यति । अस्ति नाम तत्र भवान्वृषलं याजयिष्यति । भवति नाम तत्र भवान्वृषलं याजयिष्यति । विद्यते नाम तत्र भवान्वृषलं याजयिष्यति । न श्रद्दधे । न मर्षयामि । लिङ्निमित्तमिह नास्ति तेन लङ् न भवति ॥

जातुयदोर्लिङ् ॥ १४७ ॥

अनवक्लृप्त्यमर्षयोरित्येव । जातु यदित्येतयोरुपपदयोः अनवक्लृप्त्यमर्षयोर्गम्यमानयोर्धातोर्लिङ् प्रत्ययो भवति । लटो ऽपवादः । जातु तत्र भवान्वृषलं याजयेत् । यद्नाम तत्र भवान्वृषलं याजयेत् । न श्रद्दधे, न मर्षयामि ॥ जातुयदोर्लिङ्वि-

* कमलकः क्वचित्पुस्क इति पदमञ्जरी ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धाने यदायद्योरुपसंख्यानम् ॥ * ॥ यदा भवद्विधः क्षत्रियं याजयेत् । यदि भवद्विधः क्षत्रियं याजयेत् । न श्रद्धे न मर्षयामि । क्रियातिपत्तौ भूते वा लृङ्, भविष्यति नित्यम् ॥

यच्चयत्रयोः ॥ १४८ ॥

अनवक्लृप्यमर्षयोरित्येव । यच्च यत्र इत्येतयोरुपपदयोरनवक्लृप्यमर्षयोर्गम्यमानयोर्धातोर्लिङ् प्रत्ययो भवति । लृटोपवादः । योगविभाग उत्तरार्थः । यथासंख्यं नेष्यते । यच्च तत्र भवान् वृषलं याजयेत् । यत्र तत्र भवान् वृषलं याजयेत् । क्रियातिपत्तौ यथायथं लृङ् भवति ॥

गर्हायां च ॥ १४९ ॥

अनवक्लृप्यमर्षयोरिति निवृत्तम् । गर्हा निन्दा कुत्सेत्यनर्थान्तरम् । यच्च यत्र इत्येतयोरुपपदयोर्धातोर्लिङ् प्रत्ययो भवति गर्हायां गम्यमानायाम् । सर्वलकाराणामपवादः । यच्च तत्र भवान् वृषलं याजयेत् । यत्र तत्र भवान् वृषलं याजयेद् ह्यहो वृद्धः सन् ब्राह्मणः, गर्हामहे । अहो अन्याय्यमेतत् । क्रियातिपत्तौ यथायथं लृङ् भवति ॥

चिचीकरणे च ॥ १५० ॥

यच्चयत्रयोरित्येव । चित्रीकरणमाश्चर्यमद्भुतं विस्मयनीयम् । यच्चयत्रयोरुपपदयोश्चित्रीकरणे गम्यमाने धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । यच्च तत्र भवान्वृषलं याजयेत् । यत्र तत्र भवान्वृषलं याजयेत् । आश्चर्यमेतत् । क्रियातिपत्तौ यथायथं लृङ् भवति ॥

शेषे लुडयदौ ॥ १५१ ॥

यच्चयत्राभ्यामन्यत्र चित्रीकरणं शेषः । शेषे उपपदे चित्रीकरणे गम्यमाने धातोर्लुट् प्रत्ययो भवति यदिशब्दश्चैव प्रयुज्यते । सर्वलकाराणामपवादः । आश्चर्यं चित्रमद्भुतम् । अन्धो नाम पर्वतमारोक्ष्यति । बधिरो नाम व्याकरणमध्येष्यते । अयदाविति किम् । आश्चर्यं यदि स भुञ्जीत । यदि सो ऽधीयीत । लिङ्निमित्ताभावादिह लृङ् न भवति ॥

उताप्योः समर्थयोर्लिङ् ॥ १५२ ॥

उत अपि इत्येतयोः समर्थयोर्धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । बाढमित्यस्मिन्नर्थे समानार्थत्वमनयोः । उत कुर्यात् । अपि कुर्यात् । उताधीयीत । अप्यधीयीत । बाढमध्येष्यतइत्यर्थः । समर्थयोरिति किम् । उत दण्डः पतिष्यति । अपि द्वारं धास्यति । प्रश्नः प्रच्छादनं च गम्यते । वोताप्योरिति विकल्पो निवृत्तः । इतः प्रभृति भूतेपि लिङ्निमित्ते क्रियातिपत्तौ नित्यं लृङ् । भविष्यति तु सर्वत्रैव नित्यः ॥

कामप्रवेदने ऽकच्चिति ॥ १५३ ॥

स्वाभिप्रायाविष्करणं कामप्रवेदनम् । काम इच्छा अभिलाष इत्यनर्थान्तरम् । तस्य प्रवेदनं प्रकाशनम् । तस्मिन् गम्यमाने ऽकच्चित्युपपदे धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । कामो मे भुञ्जीत भवान् । अभिलाषो मे भुञ्जीत भवान् । अकच्चितीति किम् ॥

कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता ।
मारविद * त्वां पृच्छामि कच्चिज्जीवति पार्वती ॥

संभावनेलमिति चेत्सिद्धाप्रयोगे ॥ १५४ ॥

लिङित्येव । संभावनं, क्रियासु योग्यताध्यवसानं शक्तिश्रद्धानम् । तदिदानीमलमर्थेन विशेष्यते । तच्चेत्संभावनं पर्याप्तमवितथं भवति । सिद्धाप्रयोगइत्यलमो विशेषणं, सिद्धश्चेदलमो ऽप्रयोगः, क्व चासौ सिद्धः । यत्र गम्यते चार्थो न चासौ प्रयुज्यते । तदीदृशे संभावनोपाधिकेर्थे वर्त्तमानाद्धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । अपि पर्वतं शिरसा भिन्द्यात् । अपि द्रोणपाकं भुञ्जीत । अलमिति किम् । विदेशस्थायी देवदत्तः प्रायेण गमिष्यति यामम् । सिद्धाप्रयोगइति किम् । अलं देवदत्तो हस्तिनं हनिष्यति । क्रियातिपत्तौ भूते च भविष्यति नित्यं लृङ् भवति ॥

विभाषा धातौ संभावनवचने ऽयदि ॥ १५५ ॥

संभावनेलमिति चेत् सिद्धाप्रयोगइति सर्वमनुवर्त्तते । संभावनमुच्यते येन स संभावनवचनः । संभावनवचने धातावुपपदे यच्छब्दवर्ज्जिते धातोर्विभाषा लिङ् भवति । पूर्वेण नित्यप्राप्तौ विकल्पार्थं वचनम् । संभावयामि भुञ्जीत भवान् । संभावयामि भोक्ष्यते भवान् । अवकल्पयामि भुञ्जीत भवान् । श्रद्धे भुञ्जीत भवान् । भोक्ष्यते भवान् । अयदीति किम् । संभावयामि यद्भुञ्जीत भवान् ॥

हेतुहेतुमतोर्लिङ् ॥ १५६ ॥

हेतुः कारणं, हेतुमत्फलम् । हेतुभूते हेतुमति चार्थे वर्त्तमानाद् धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । दक्षिणेन चेद्यायाच्च शकटं पर्याभवेत् । यदि कमलकमाहरेच्च शकटं पर्याभवेत् । दक्षिणेन यानं हेतुः । अपर्याभवनं हेतुमत् । विभाषा चायमिष्यते । भविष्यति च काले । तेन लृडपि भवति । दक्षिणेन चेद्यास्यति न शकटं पर्याभविष्यति । तत्र विभाषाग्रहणं तावदनन्तरमेवानुवर्त्तते । लिङिति वर्त्तमाने पुनर्लिङ्ग्रहणं कालविशेषप्रतिपत्त्यर्थम् । तेनेह न भवति । हन्तीति पलायते । वर्षतीति धावति । क्रियातिपत्तौ लृङ् भवति ॥

* मारविदेति शुकविशेषस्य संज्ञा, पार्वत्यपि शुकस्यैव का चिदिष्टेति पदमञ्जर्याम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इच्छार्थेषु लिङ्लोटौ ॥ १५७ ॥

इच्छार्थेषु धातुरूपपदेषु धातोर्लिङ्लोटौ प्रत्ययौ भवतः । सर्वलकाराणामपवादः । इच्छामि भुञ्जीत भवान् । इच्छामि भुङ्क्तां भवान् । कामये । प्रार्थये ॥ इच्छाकामप्रवेदनइति वक्तव्यम् ॥ * ॥ इह मा भूत् । इच्छन् करोति ॥

समानकर्तृकेषु तुमुन् ॥ १५८ ॥

इच्छार्थेषु धातुषु समानकर्तृकेषूपपदेषु धातोस्तुमुन् प्रत्ययो भवति । तुमुन्प्रकृत्यपेक्षमेव समानकर्तृकत्वम् । इच्छति भोक्तुम् । कामयते भोक्तुम् । वष्टि भोक्तुम् । वाञ्छति भोक्तुम् । समानकर्तृकेष्विति किम् । देवदत्तं भुञ्जानमिच्छति यज्ञदत्तः । इह कस्माच्च भवति । इच्छन्करोति । अनभिधानात् ॥

लिङ् च ॥ १५९ ॥

इच्छार्थेषु समानकर्तृकेषु धातुरूपपदेषु धातोर्लिङ् प्रत्ययो भवति । भुञ्जीयेतीच्छति । अधीयीयेतीच्छति । क्रियातिपत्तौ लृङ् भवति * ॥

इच्छार्थेभ्यो विभाषा वर्तमाने ॥ १६० ॥

इच्छार्थेभ्यो धातुभ्यो वर्तमाने काले विभाषा लिङ् प्रत्ययो भवति । लटि प्राप्ते वचनम् । इच्छति । इच्छेत् । वष्टि । उश्यात् । कामयते । कामयेत ॥

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् ॥ १६१ ॥

विधिः प्रेरणम् । निमन्त्रणं नियोगकरणम् । आमन्त्रणं कामचारकरणम् । अधीष्टः सत्कारपूर्वको व्यापारः । संप्रश्नः संप्रधारणम् । प्रार्थनं याच्ञा । विध्याद्यर्थेषु धातोर्लिङ् प्रत्ययो भवति । सर्वलकाराणामपवादः । विध्यादयश्च प्रत्ययार्थविशेषणम् । विध्यादिविशिष्टेषु कर्त्रादिषु लिङ् प्रत्ययो भवति । विधौ तावत् । कटं कुर्यात् । ग्रामं भवानागच्छेत् । निमन्त्रणे । इह भवान्भुञ्जीत । इह भवानासीत । आमन्त्रणे । इह भवानासीत । इह भवान्भुञ्जीत । अधीष्टे । अधीच्छामो भवन्तम् । माणवकं भवानुपनयेत् । संप्रश्ने । किं नु खलु भो व्याकरणमधीयीय । प्रार्थने । भवति मे प्रार्थना व्याकरणमधीयीय ।

लोट् च ॥ १६२ ॥

लोट् प्रत्ययो भवति धातोर्विध्यादिष्वर्थेषु । योगविभाग उत्तरार्थः । विधौ तावत् । कटं तावद्भवान्करोतु । ग्रामं भवानागच्छतु । निमन्त्रणे । अमुत्र भवानास्ताम् । अमुत्र भवान्भुङ्क्ताम् । आमन्त्रणे । इह भवान् भुङ्क्ताम् । अधीष्टे । अधीच्छामो भवन्तम् । माणवकं भवानध्यापयतु । माणवकं भवानुपनयताम् । संप्रश्ने । किं नु खलु भो व्याकरणमध्ययै । प्रार्थने । भवति मे प्रार्थना व्याकरणमध्ययै । छन्दोध्ययै ॥

प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ १६३ ॥

प्रेषणं प्रैषः । कामचाराभ्यनुज्ञानमतिसर्गः । निमित्तभूतस्य कालस्यावसरः प्राप्तकालता । एतेष्वर्थेषु धातोः कृत्यसंज्ञकाः प्रत्यया भवन्ति । चकाराल्लोट् च । भवता कटः करणीयः । कर्त्तव्यः । कृत्यः । कार्यः । लोट् खल्वपि । करोतु कटं भवानिह प्रेषितः । भवानतिसृष्टः । भवतः प्राप्तकालः कटकरणे । किमर्थं प्रैषादिषु कृत्या विधीयन्ते, न सामान्येन भावकर्मणोर्विहिता एव ते प्रैषादिष्वन्यत्र च भविष्यन्ति । विशेषविहितेनानेन लोटा बाध्यन्ते । वासरूपविधिना भविष्यन्ति । एवं तर्हि ज्ञापयति स्वयधिकारात्परेण वासरूपविधिर्नावश्यं भवतीति । विधिप्रैषयोः को विशेषः । के विदाहुः । अज्ञातज्ञापनं विधिः । प्रेषणं प्रैष इति ॥

लिङ् चोर्ध्वमौहूर्तिके ॥ १६४ ॥

प्रैषादयो वर्त्तन्ते । प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्तिकेर्थे वर्तमानाद्धातोर्लिङ् प्रत्ययो भवति । चकाराद्यथाप्राप्तं च । ऊर्ध्वं मुहूर्त्तादुपरि मुहूर्तस्य भवता खलु कटः कर्त्तव्यः । करणीयः । कार्यः । भवान्खलु कटं कुर्यात् । भवान्खलु करोतु । भवानिह प्रेषितः । भवानतिसृष्टः । भवान्प्राप्तकालः ॥

स्मे लोट् ॥ १६५ ॥

प्रैषादिपूर्ध्वमौहूर्तिके इति वर्तते । स्मशब्दउपपदे प्रैषादिषु गम्यमानेषूर्ध्वमौहूर्तिकेर्थे वर्तमानाद्धातोर्लोट् प्रत्ययो भवति । लिङ्लृत्यानामपवादः । ऊर्ध्वं मुहूर्तादुद्बान्कटं करोतु स्म । ग्रामं गच्छतु स्म । माणवकमध्यापयतु स्म ॥

अधीष्टे च ॥ १६६ ॥

स्मरिति वर्तते । अधीष्टं व्याख्यातम् । स्मशब्दउपपदे अधीष्टे गम्यमाने धातोर्लोट् प्रत्ययो भवति । लिङोपवादः । अङ्ग स्म राजन्माणवकमध्यापय । अङ्ग स्म राजन्यग्निहोत्रं जुहुधि ॥

कालसमयवेलासु तुमुन् ॥ १६७ ॥

कालादिषूपपदेषु धातोस्तुमुन्प्रत्ययो भवति । कालो भोक्तुम् । वेला भोक्तुम् । इह कस्माच्च भवति । कालः पचति भूतानीति । प्रैषादियहणमिहाभिसंबध्यते । इह कस्माच्च भवति । कालो भोजनस्य । वासरूपेण ल्युडपि भवति । उक्तमिदं स्वयधिकारात्परत्र वासरूपविधिरनित्य इति ॥

लिङ् यदि ॥ १६८ ॥

* योगविभाग उत्तरार्थ इति पुस्तकान्तरे धिकः पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कालादयोनुवर्त्तन्ते। यच्छब्दे उपपदे कालादिषु धातोर्लिङ् प्रत्ययो भवति। तुमुनोपवादः। कालो यद्भुञ्जीत भवान्। समयो यद्भुञ्जीत भवान्। वेला यद्भुञ्जीत भवान्॥

अर्हे कृत्यतृचश्च ॥ १६९ ॥

अर्हतीत्यर्हः। तद्योग्यः। अर्हे कर्तरि वाच्ये गम्यमाने वा धातोः कृत्यतृचः प्रत्यया भवन्ति। चकाराल्लिङ् च। भवता खलु कन्या वोढव्या। वाह्या। वहनीया। भवान् खलु कन्याया वोढा। भवान् खलु कन्यां वहेत्। भवानेतदर्हतीति। अथ कस्मादर्हे कृत्यतृचो विधीयन्ते। यावता सामान्येन विहितत्वादर्हेपि भविष्यन्ति। योयमिह लिङ्विधीयते, तेन बाधा मा भूदिति। वासरूपविधिश्चानित्यः॥

आवश्यकाधमर्ण्ययोर्णिनिः ॥ १७० ॥

अवश्यं भाव आवश्यकम्। उपाधिरयं नोपपदम्। अवश्यंभावविशिष्टे आधमर्ण्यविशिष्टे च कर्तरि वाच्ये धातोर्णिनिः प्रत्ययो भवति। अवश्यंकारी। मयूरव्यंसकादित्वात्समासः। आधमर्ण्ये खल्वपि। शतंदायी। सहस्रंदायी। निष्कंदायी॥

कृत्याश्च ॥ १७१ ॥

आवश्यकाधमर्ण्ययोरिति वर्तते। कृत्यसंज्ञकाश्च प्रत्यया आवश्यकाधमर्ण्ययोरुपाधिभूतयोर्धातोर्भवन्ति। भवता खलु अवश्यं कटः कर्त्तव्यः। अवश्यं करणीयः। अवश्यं कार्यः। अवश्यं कृत्यः। आधमर्ण्ये। भवता शतं दातव्यम्। सहस्रं देयम्। किमर्थमिदम्। यावता सामान्येन विहिता अस्मिन्नपि विषये भविष्यन्ति। विशेषविहितेन णिनिना बाधेरन्। कर्त्तरि णिनिः। भावकर्मणोः कृत्याः। तत्र कुतो बाधप्रसङ्गः। तत्र के चिदाहुः। भव्यगेयादयः कर्तृवाचिनः कृत्यास्तद्दोहोदाहरणमिति॥

शकि लिङ् च ॥ १७२ ॥

शक्नोति प्रकृत्यर्थविशेषणम्। शक्नोत्यर्थोपाधिके धात्वर्थे लिङ् प्रत्ययो भवति। चकारात्कृत्याश्च। भवता खलु भारो वोढव्यः। वहनीयः। वाह्यः। भवान् खलु भारं वहेत्। भवानिह शक्तः। सामान्यविहितानां पुनर्वचनं लिङा बाधा मा भूदिति॥

आशिषि लिङ्लोटौ ॥ १७३ ॥

आशंसनमाशीः। अप्राप्तस्येष्टस्यार्थस्य प्राप्तुमिच्छा। प्रकृत्यर्थविशेषणं चैतत्। आशीर्विशिष्टेर्थे वर्त्तमानाद्धातोर्लिङ्लोटौ प्रत्ययौ भवतः। चिरं जीयाद्भवान्। चिरं जीवतु भवान्। आशिषीति किम्। चिरं जीवति देवदत्तः॥

क्तिच्क्तौ च संज्ञायाम् ॥ १७४ ॥

आशिषीत्येव। आशिषि विषये धातोः क्तिच्क्तौ प्रत्ययौ भवतः। समुदायेन चेत्संज्ञा गम्यते। तनुतात् तन्तिः। सनुतात् सातिः। भवतात् भूतिः। मनुतात् मन्तिः। क्तः खल्वपि। देवा एनं देयासुर्देवदत्तः। सामान्येन विहितः क्तः पुनरुच्यते क्तिचा बाधा मा भूदिति। चकारो विशेषणार्थः न क्तिचि दीर्घश्चेति॥

माङि लुङ् ॥ १७५ ॥

माङ्युपपदे धातोर्लुङ् प्रत्ययो भवति। सर्वलकाराणामपवादः। मा कार्षीत्। मा हार्षीत्। कथं मा भवतु तस्य पापं मा भविष्यतीति। असाधुरेवायम्। के चिदाहुः। अङ्डिदपरो माशब्दो विद्यते तस्यायं प्रयोगः॥

स्मोत्तरे लङ् च ॥ १७६ ॥

स्मशब्दोत्तरे माङ्युपपदे धातोर्लङ् प्रत्ययो भवति। चकाराल्लुङ् च। मा स्म करोत्। मा स्म कार्षीत्। मा स्म हरत्। मा स्म हार्षीत्॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ तृतीयस्याध्यायस्य तृतीयः पादः॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ पञ्चमस्तबकावशेषः ॥

इति स्नात इवानन्दसिन्धौ पीतवानिव पीयूषं जायदेव निद्राण इव ज्ञानवानेव मुह्यन्निव जीवन्नेव मूर्च्छन्निव पश्यन्नप्यन्ध इव शृण्वन्नपि बधिर इव वदन्नपि मूक इव वह्वधैर्योऽपि चपल इव यदि क्षणमेवमासीत्॥ ५४॥

तथापि प्राप्ततादृशधृतावपि गर्गे तस्मिन् प्रेमा स्वकार्यं त्यक्तुमशक्नुवन्विवेदगाद्रेवेत्याह, स्नात इवेति दैहिकसुखस्य बहिः प्रकाशाधिक्यं, पीतवानिति मानससुखस्य अन्तरेवेति, ततश्च जायदित्यादिकं पूर्वपूर्वं धृतिलक्षणं निद्राण इत्यादिकमुत्तरोत्तरं प्रेमलक्षणमिति॥ ५४॥

तदा समीपमम्बाभ्यामुपनीतयोस्तयोः कुमारयोरयोन्नीतस्वस्तिवाचनोऽयं नामकरणायोद्यतो द्योतोऽखिलमशुभं शुभंय्वोरनयोरनयोपशमनाय नामार्थनिरुक्त्या नाम चिकीर्षुरुवाच॥ ५५॥

अयेन शुभावहविधिनोचीतं स्वस्तिवाचनं येन सः। द्योतोः खण्डयतोः। शुभंय्वोः कल्याणवतोः। "अहंशुभमोर्युस्"। अनयस्योपशमाय नामार्थनिरुक्त्येति, तां विनेश्वराणां नाम कस्मान्मनुष्यसुतेऽप्यर्थत इत्यनयो लोकदृष्ट्या स्यात्, तथैव वक्ष्यमाणेन "कृपणादिभि"रित्यादिना परमांशित्वरूपतात्पर्यार्थविवृतिं विना तत्त्वदृष्ट्याप्यनयः स्यादिति॥ ५५॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयं वसुदेवसुतो देवसुतोत्तमबलो बलोच्छ्रयाद् बली बलेन देवनमस्येति बलदेवेति ह्रासोचितं च नाम ॥ ५६ ॥

देवसुतस्येवोत्तमं बलं पराक्रमो यस्य सः । अस्येति, एतत्संबन्धि देवनं मल्लयुद्धादि क्रीडनं बलेनैव प्रतिभटनिष्ठेन भवति नान्यथेत्यर्थः । बलेन दीव्यतीत्यनुक्तिरये व्याख्यास्यमानेन बलेन रमत इत्यनेनैकार्थ्यात् । बलदेवेति ह्रासोचितं चेति, एतत्प्रियनर्मसखैः कदाचिदिमं क्रीडाकौतुकयुद्धे पराजित्य विरुदावलिलक्षणया हे देव त्वं बल बलं प्रकाशयेति लोहदन्तबलतिप्रयोगेण करिष्यमाणो यो ह्रासस्तदुचितं च बलदेवेति नाम,इत्यर्थद्वयम् ॥ ५६ ॥

महापुरुषत्वेन पापसंकर्षणे संकर्षणेति च समुचितमभिधानं, सर्वाभिरामतया रामतया चैष गमिष्यति प्रसिद्धिं, बलेन रमत इति बलरामश्च ॥ ५७ ॥

महापुरुषत्वेन सिद्धपुरुषत्वेनेति प्रकटोऽर्थः । महत स्रष्टादिपुरुषेभ्योऽपि महत्त्वेनेति वास्तवः । पापानां सम्यक् कर्षणे निमित्ते ॥ ५७ ॥

अयं तु तवात्मजो भगवद्वुक्तियोग इव चातुर्वर्ण्यो-पयुक्तः स्वभावत इन्द्रनीलनीलतया सिद्धोऽपि प्रतियुगमंशतः करुणाच्छवियहं वियहं दधदनेकवर्णतां प्रकटयति ॥ ५८ ॥

चातुर्वर्ण्ये चतुर्षु वर्णेषु ब्राह्मणादिरूपयुक्तः कर्तुं योग्यः, स्वार्थे ष्यञ्, पक्षे चत्वारो वर्णाः शुक्लादयो यस्य तस्य भावश्चातुर्वर्ण्यं तत्रोपयुक्तः । तदेव विवृणोति स्वभावत इत्यादिना, वियहं देहं, कीदृशं, करुणायाश्छविं कान्तिं गृह्णातीति तं, पूर्णकृपायास्तु तत्तद्रूपिणि श्रीकृष्ण एव सम्यक् संभवादिति भावः ॥ ५८ ॥

धर्माविकृते कृते शुक्लः, सवर्णस्त्रेतायास्त्रेतायामपि, द्वापरेऽद्वापरेण श्याम एव, मूर्त इव कलौ कलौ पीत इति ॥ ५९ ॥

धर्माणां तपःशौचादीनामविकृतं विकाराभावो यत्र तस्मिन्, परिपूर्णधर्ममये सत्याख्ये युग इत्यर्थः । त्रेताया अग्नित्रयस्य तुल्यवर्णः, रक्त इत्यर्थः । "दक्षिणाग्निर्गार्हपत्याहवनीयो त्रयोऽग्नयः । अग्नित्रयमिदं त्रेते"त्यमरः । अद्वापरेणासंदेहेन, अस्मिन् द्वापरयुगे तस्य श्यामस्यास्मिन् कृष्ण एवैक्यमाप्तत्वादयमेव स इत्येवमभिवतालक्षणेन, "संदेहद्वापरौ वे"त्यमरः । कलौ कलहे मूर्तियुक्त इव पीत इति । एतदव्यवहिते·आगामिनि कलावेवेति ज्ञेयं न तु सर्वत्र । प्रतिसत्यादि शुक्लादीनामिव प्रतिकलियुगं,

"कथ्यते वर्णनाभ्यां शुक्लः सत्ययुगे हरिः ।
रक्तः श्यामः क्रमात् कृष्णस्त्रेतायां द्वापरे कलौ" ॥

इत्यनेन भागवतामृते कृष्णवर्णस्यैव युगावतारत्वेन निरूपितत्वात्, तथैवात्रापि पञ्चदशे स्तवके "कलौ कृष्ण" इति वक्ष्यमाणत्वात् । अत्र पीत इत्युक्तिः "शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गत" इति मूलानुसारानुरोधेनैव । मूले चैकादशस्कन्धे "नानातन्त्रविधानेन कलावपि तथा शृणु । कृष्णवर्णं त्विषा कृष्ण"मित्यादिना कलियुगावतारत्वेन कृष्णवर्णस्यैव निरूपयिष्यमाणत्वेऽपि दशमस्कन्धे "तथा पीत इदानीं कृष्णतां गत" इत्युक्तिरिदानींतने कलौ पीत इति ज्ञिज्ञापयिषयैव ।

किंच, आसन्निति भूतकालानुरोधेन । आपाततः सुघटे व्याख्यान्तरे क्रियमाणे द्वापरयुगावतारस्य पीतत्वे "द्वापरे भगवान् श्यामः पीतवासा निजायुध" इत्यनेन विरोधः स्यात् ।

न च तत्रस्थश्यामपदस्यार्थान्तरं कल्प्यमिति वाच्यम् । "पीतवासा" इत्यनेन श्यामत्वस्यैव सुष्ठु निर्धारितत्वात् । श्यामस्यैव पीतवसनौचित्यात् । ततश्चायमर्थः । यत्तदोर्नित्यसंबन्धात्, यर्हीदानीं द्वापरान्ते कृष्णतां गतः स्वयमवतारी तथा तेनैव प्रकारेण स्वयमवतारित्वेनेत्यर्थः । इदानीं कलियुगादिभागे पीत इति किंचित् स्थूलकालमवलम्ब्य । इदानीमिति पदार्थे उभयत्राप्यन्वेतीति ।

ननु तर्ह्यधुना साक्षात् क्रियमाणोऽस्य कृष्णवर्णे इदानींतन एव, किंवा पूर्वमप्यासीदेव, तस्यैव प्राकट्यमधुनेति । तत्र न केवलं कृष्णवर्ण एव पूर्वमासीत्, किंत्वन्येऽपि वर्णा आसन्नेवेत्याह, आसन्निति । अनुयुगं तनूर्यद्धृतोऽस्यानुक्तोऽप्यन्यः शुक्लो रक्तस्तथोक्तः पीतः, एवं त्रयोऽपि वर्णा यथासंभवं तत्तद्युगे तदानीं दृश्यमाना अप्यासन्नेव । तत्तद्युगपूर्वमपि स्थितानामेव तदानीं तदानीं प्राकट्यम् । न तु ते तदानीमेवापूर्वा अभवन्नित्यर्थः । द्वापरकलियुगावतारयोः श्यामकृष्णयोः कृष्णवर्णत्वात् पृथगनुक्तिः । एवं च वैवस्वतमन्वन्तरगताष्टाविंशचतुर्युगीयद्वापरकलियुगयोः स्वयमेवावतारी कृष्णः पीतश्च प्रादुर्भवति । तद्युगद्वयावतारौ तदा तत्रैवान्तर्भूतौ तिष्ठतः । तत्र पीतस्य वैशद्येन कृष्णानुक्तिरतिरहस्यत्वात् । "कृतः कलौ यदभवस्त्रियुगोऽथ स त्व"मिति सप्तमस्कन्धे श्रीप्रह्लादेनापि कृतत्वेनैवोक्तत्वात् । तच्च कृतत्वं च स्ववर्णस्वरूपयोरन्यस्वीयवर्णभावाभ्यामावृतत्वेन तदानींतनजनैः प्रायो दुर्लक्ष्यत्वमेवेति । दुर्लक्ष्यत्वं च तत् तस्य रहस्यवस्तुजातव्यञ्जकताहेतुकमेवेति भक्तसुधीभिरवश्यमवगम्यम् । तत एव

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्प्रमापकस्य "नानातन्त्रविधानेन कलावपि तथा शृणु । कृष्णवर्णं त्विषा कृष्ण"मित्यादिवचनस्य युगावतारप्रकरणमध्यपठितस्य तथैव कृत एवार्थोऽतिगूढत्वादवसीयतेऽर्थान्तरेण । स यथा, नानाकलौ प्रतिकलियुगे, अपिकाराद् वैवस्वताष्टाविंशचतुर्युगीयकलावपि, तन्त्रविधानेन तन्नाम्न्यायविधिना, श्वेतो धावतीत्यादिवत्, एकप्रयोज्याख्यातेन,एकदैवार्थद्वयबोधकशब्देनेत्यर्थः । शृणुहीति । शृण्वन्तमपि राजानं प्रति पुनः प्रेरणं रहस्यत्वेन तन्त्रेणोच्यमानमर्थं विशिष्यावधारयितुम् । परीक्षितं प्रति तु पूर्वोक्तः "शुक्लो रक्तस्तथा पीत" इति पद्यस्थेन तथा पीतशब्दस्मारकेणाग्रत्यतथाशब्देन संकेतितं स्पष्टमेव तमर्थं प्रतिकलियुगपक्षे कृष्णवर्णं कृष्णवर्णेतियहं कृतत्वं व्यावर्तयति । त्विषा कान्त्या-अकृष्णम्, इन्द्रनीलमणिवदुज्ज्वलमित्यर्थः । एककलियुगपक्षे कृष्णवर्णं, किंतु त्विषा कान्त्या-अकृष्णं पीतम्, अन्तः कृष्णं बहिर्गौरमित्यर्थः । यद्वा, कृष्णं प्रसिद्धं कृष्णावतारं वर्णयति, तद्रूपलीलादिमाधुर्यं सर्वत्रोपदिशतीति तम् । साङ्गोपाङ्गेत्यादिकमुभयपक्षेऽपि । अग्रच्छत्वप्रच्छत्वाभ्यां तुल्य एवार्थ इति ।

जानामि वा न जानामि स्वं पुण्याम्येव केवलम् ।
शुद्धं लिखाम्यशुद्धं वा क्षमन्तां साधवोऽखिलम् ॥ ५९ ॥

कक्षपणाभिः पञ्चभिर्वर्णैः समवेतस्य कृष्ण इति नाम्नश्चतुर्भिरेव वर्णैश्चतुर्युगवर्णान् दधाति, वर्णानामादिभूतेनाकारेण स्वयमादिभूतो नीलेन्द्रमणिसावर्ण्यं दधत् कृष्ण इत्याख्यां भजते ॥ ६० ॥

वर्णैरक्षरैरेव ककारऋकारपकारणकारैर्वर्णान् क्रमेण शुक्लरक्तश्यामपीतान् दधाति धारयति, वर्णशब्दस्योभयार्थवाचित्वात्, ततश्च कक्षपणा वर्णा यत्र स चासावश्वेति विग्रहोऽभिप्रेतः, शाकपार्थिवादित्वाद्वर्णपदलोपः, एवं च "विद्वन्मानसहंसे"तिवच्छ्लेषेण कादयश्चत्वारो वर्णा एव वर्णाः शुक्लादय इति, ततश्च नामनामिनोरभेदात् कृष्णनाम्नि तेषां वर्णानां समवायः, नामिनि कृष्णेऽपि तेषां शुक्लादीनामिदानीमन्तर्भाव इति भावः, अकारेण पञ्चमेनादिभूतेनेति, अकारस्य सर्ववर्णादिभूतत्वमेव कृष्णस्य शुक्लाद्यवतारादिभूतत्वं ज्ञापयतीति ।

किंच, अकारस्य केवलस्यापि विष्णुवाचकत्वेनार्थवत्त्वमिति न तेषां कक्षपणानां तथाभूतत्वम्, अतो न तेषां स्वयंत्वम्, अस्य तु तत्तत्परेष्वेऽपि स्वतः सिद्धैः स्वयंत्वमिति । सर्वोऽप्ययं वस्त्वर्थ एव विवृतः । श्रीनन्दं बोधयितुमिष्टस्तु कोऽप्येवंविधमहापुरुषः शुक्लाद्यवतारोपासनया तदा तदा प्राप्ततत्तत्सारूप्यः संप्रति कृष्णोऽभूदित्येतत्प्रकारः प्रकट एवार्थः ॥ ६० ॥

कृषति भजतामघं कर्षत्यनुरक्तानां मनांसीति च कृष्णः ॥ ६१ ॥

कृषति दूरीकरोति "कृष विलेखने", इत्यस्मात् ॥ ६१ ॥

कृषिः सत्तार्थः, ण आनन्दार्थः, तेन च सत्तानन्दरूपतया कृष्ण इति मुख्यं नाम ॥ ६२ ॥

मुख्यमिति, "नाम्नां मुख्यतरं नाम कृष्णाख्यं मे परंतपे"ति प्रभासपुराणात् सत्तानन्दयोर्लक्षणसमन्वयः । शक्तिरूपत्वं च धर्मरूपत्वेऽपि धर्मित्वमित्यादिकं विस्तरभयादत्रानुपयोगाच्च भागवतसंदर्भादौ वक्तव्यत्वाच्च न विवृतमिति ॥ ६२ ॥

कदाचिदयं वसुदेवादपि जातोऽजातो विमुक्तादिति वासुदेवोऽपि लोकैरुद्घुष्यते ॥ ६३ ॥

कदाचिदिति, पूर्वस्मिन् जन्मनीति श्रीनन्देन बुध्यते । ततश्च वसुदेवस्यापि पूर्वजन्मनि वसुदेव इत्येव नामासीदिति च । अजातो मायातः ॥ ६३ ॥

नारायणसमो गुणैरित्युक्ते सरस्वती तमेवार्थमात्मगतं व्याख्याति स्म, नारायणश्चास्य गुणैरेव समो न त्वंशित्वेनाप्यभेदोपचारतो नारायणमप्येनं वदिष्यन्तीति ॥ ६४ ॥

नारायणस्य सम इति श्रीनन्दं बोधयितुमिष्टोऽर्थः, तेन च-अग्निर्माणवक इतिवदुपचारेणेमं नारायणमपि वदिष्यन्त जना इत्यवसीयते स्मेति । नारायणः समोऽस्येति तु वास्तवः स्वाभिप्रेतः । तमेव वास्तवमेव । आत्मगतम्- अनन्यबोध्यम् । गुणैरेव सत्यं शौचं दया क्षान्तिस्त्यागः संतोष इत्यादिभिः प्रथमस्कन्धोक्तैरेव, न त्वसाधारणैर्वेणुमाधुर्यरासविलासादिभिर्महागुणैरपीति । न त्वंशित्वेनाप्यभेदोपचारतो नारायणमप्येनं वदिष्यन्तीति, तेन गुणैरेवाभेदोपचारतो नारायणमप्येनं वदिष्यन्तीत्यर्थ आयाति । अत्र च नारायणमित्यनुवादपदम्, एनमिति विधेयपदं, नारायणमपि विश्वस्थित्यादिकर्तृत्वेन प्रसिद्धमप्येनं श्रीकृष्णं वदिष्यन्तीति । ततश्च सत्यदयादीन् मोक्षदायित्वादींश्च गुणान् मूलभूतत्वेन कृष्णनिष्ठान् पर्यालोच्य नारायणे च तादृशत्वेनैव स्थितान् विमृश्य माणवकेऽग्निपदमिव नारायणेऽपि कृष्णपदं प्रयोक्ष्यन्तीत्यर्थः । तेनाभेदोपचारोऽप्यत्र गौण एवेति भावः । न त्वंशित्वेनाप्यभेदोपचारत इति, कृष्णस्य तदंशित्वसंभवेऽपि कृष्णांशांशरूपत्वात् तस्य मुख्यं कृष्णांशत्वं नास्तीत्यंशांशिसंबन्धे मुख्य उपचारो न भवेदिति सरस्वत्या अभिप्रायः । कृष्णे नारायणादिशब्दप्रयोगस्तु नारायणादीनामवताराणां कृष्णेऽन्तर्भावादिति ॥ ६४ ॥

ततः स एवाह,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किं बहुना, अस्य महिमा नहि मादृशानां वाग्विषयः, अयं ते सर्वसौभाग्यफलम्, अनेन सर्वमेव तरिष्यसि दुर्गं दुर्गन्तव्यं च मनोरथमवाप्स्यसि, य एतस्मिन् रतिमन्तो*भविष्यन्ति तेषामपि सौभाग्यं सर्वज्ञा अपि न ज्ञास्यन्ति ॥ ६५ ॥

ततः स एवाहेति, वक्ष्यमाणवाक्यस्य सरस्वतीकर्तृकत्वनिरासार्थम्, न ज्ञास्यन्तीति, एतावत्त्वनिश्चयेनेत्यर्थः, सर्वज्ञा अपीति, नहि स्वपुष्पाज्ञानं सार्वज्ञ्यं निहन्तीति न्यायात् ॥ ६५ ॥

न चेदं क्वचन प्रकाशनीयमतिरहस्यमिति समुत्कण्ठाकाकुमारौ कुमारौ तावङ्के कृत्वा सपुलकमात्मगतं, कृष्णमालोक्य ॥ ६६ ॥

अङ्के कृत्वेत्यत्र हेतुः, समुत्कण्ठया यः काकुस्तस्य निरासकौ, आहेति पूर्वेणैवान्वयः ॥ ६६ ॥

अहो किमिदं महस ओज्ज्वल्यम् ।
इन्दीवरेन्द्रमणिवारिधराञ्जनादेः
किं भौतिकैरिदमभौतिकमस्य तेजः ।
औपम्यमेतु यदतीन्द्रियमेतदेके
ब्रह्मेति यन्मणिमणिद्युतिवद्गृणन्ति ॥ ६७ ॥

यद्यस्मात्, अतीन्द्रियं यदेतत् तेजः, एके मुख्या वादिनः, ब्रह्मेति गृणन्ति, एतत्तेजसो ब्रह्म न भिन्नमित्यर्थः, तत्र दृष्टान्तः, मणीति, मणिस्थानीयः कृष्णः, मणिद्युतिस्थानीयं ब्रह्मेति, अत्र प्रमाणं "ब्रह्मणो हि प्रतिष्ठाह"मित्यादिगीतादिवाक्यानि ॥ ६७ ॥

इति सादरादराभिलाषमालिङ्ग्य चणमपितु पितुरङ्कं लम्भयित्वा जिगमिषुरभिवादितोऽपि शुभाशिषं कुमारौ प्रति व्रजपतिनानुयातश्च कियद्दूरं स मुनिर्यथागतं निरगात् ॥ ६८ ॥

सादरं च तदादराभिलाषमनल्पाभिलाषं चेति तद्यथा स्यादेवमालिङ्ग्य, "ईषदर्थेदराव्यय" मिति विश्वः । वादितोऽपीति, शुभाशीर्वादं कारित इत्यर्थः ।

ज्योतिर्विदो वचस्तस्य गर्गस्य मुखनिःसृतम् ।
चित्तभित्तौ लिखंश्चिन्तां हित्वा नन्दो ननन्द सः ॥ ६८ ॥

अथ क्रमत उपरमत्याये जानुचंक्रमणे स्त पाने च, चरणकमलाभ्यामेव शनैर्विहरता हरता च नवनीतं, क्रियमाणे च बाल्यलीलाकौतुके, कौ-तु-केन प्रकारेण न जनित आनन्दः परमानन्दकन्देन तेन ॥ ६९ ॥

* नतिमन्त इति पा० ।

कौ तु पृथिव्यां तु ॥ ६९ ॥

एकदा,

शून्ये चोरयतः स्वयं निजगृहे हैयंगवीनं मणिस्तम्भे स्वप्रतिबिम्बमीक्षितवतस्तेनैव सार्धं भिया ।
भ्रातर्मा वद मातरं मम समो भागस्त्वयापीहितो
भुङ्क्ष्वेत्यालपतो हरेः कलवचो माता रहः श्रूयते ॥ ७० ॥
तेनैव स्वप्रतिबिम्बेनैव ॥ ७० ॥

कौतुकेनोपसन्नायां च तस्यां सप्रतिभं स्वप्रतिबिम्बमुद्दिश्य तामुवाच,

मातः क एष नवनीतमिदं त्वदीयं
लोभेन चोरयितुमद्य गृहं प्रविष्टः ।
मद्वारणं न मनुते मयि रोषभाजि
रोषं तनोति नहि मे नवनीतलोभः ॥ ७१ ॥

मातरिति, त्वमपि लोभेन चोरयितुं प्रविष्ट इति चेत् तत्राह, नहि मे· इत्यादि, अहं त्वेतद्वारणार्थमेव प्रविष्ट इति भावः ॥ ७१ ॥

अन्येद्युरपि कार्यान्तरगतायां जनन्यां तथैव नवनीतं चोरयति देवादागतया तया तमनालोच्य समाजुहुवे ॥ ७२ ॥

समाजुहुवे-इति भावसाधनमेव, कर्मणोऽविवक्षितत्वात् ॥ ७२ ॥

कृष्ण क्वासि करोषि किं पितरिति श्रुत्वैव मातुर्वचः
साशङ्कं नवनीतचौर्यविरतो विश्राम्य तामब्रवीत् ।
मातः कङ्कणपद्मरागमहसा पाणिर्ममातप्यते
तेनायं नवनीतभाण्डविवरे विन्यस्य निर्वापितः ॥ ७३ ॥

पितरिति वात्सल्येन संबोधनं, पद्मरागमहसेति तस्य वह्नितेजःसारूप्यदृष्ट्या तादृशत्वं ज्ञापयति, तेन वयःसमुचितं स्वमैश्वर्यं च मातरमनुभावयति, अयं पाणिः ॥ ७३ ॥

तदाकर्ण्य कर्णरम्यं च जननी च, एहि वत्स.एहीति तमङ्कमादाय, पश्यामि वत्स पाणिं ते, कीदृक् तप्त इति, पाणिं प्रसारयतस्तस्य पाणिमालोक्य चुम्बित्वा, अहह सत्यमेव तप्तोऽयं पाणिस्तदितः पद्मरागा दूरीकर्तव्या इति वदन्ती लालयामास ॥ ७४ ॥

सत्यमेव तप्तोऽयं पाणिरिति तन्मैश्वर्यानुमोदनं पुनरपि तथाविधबाल्यचापलेऽवकाशं वर्धयितुम् ॥ ७४ ॥

अपरेद्युरपि,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

घृणाभ्यां करकुड्मलेन विगलद्बाष्पाम्बु दृग्भ्यां रुदन्
हुं हुं हूमिति रुद्धकण्ठकुहरादस्पष्टवाग्विभ्रमः ।
माचासौ नवनीतचौर्यकुतुके प्राग्भर्त्सितः स्वाञ्चले-
नामृज्यास्य मुखं तवेतदखिलं वत्सेति कण्ठे कृतः ॥७५॥

घृणाभ्यां मर्दिताभ्यां, करकुड्मलेनेति जातावेकत्वं, कुड्मलीभूतपाणिभ्यामित्यर्थः । विगलद्बाष्पाम्बु यथा स्यात् तथा। रोदने हेतुः, मात्रेत्यादि । अस्य कृष्णस्य । अखिलं तवेति, तेनस्ववस्तुग्रहणे चौर्यं न भवति, मया तु दृष्टैव भर्त्सितम्, अतो मा रोदीरिति भावः ॥ ७५ ॥

अथ कदाचन पूर्णचन्द्रिकाधौते निजमणिमयाङ्गणे व्रजपुरपुरन्ध्रीभिः सह कृतगोष्ठ्यां मातरि तत्रैव खेलन् कृष्णचन्द्रश्चन्द्रमवलोकयामास,

ततश्च,

पश्चादेत्य हृतावगुण्ठनपटे वेणीं कराभ्यां मृदु-
स्निग्धाभ्यां लुलितां विधाय जननीपृष्ठं तुदत्यात्मजे ।
देहीत्यस्फुटगद्गदं विरुवंति स्नेहार्द्रचित्ता परं
पार्श्वस्थालिजनेषु लोचनयुगं व्यापारयामास सा ॥ ७६ ॥

हृतः शिरःप्रदेशादधः पतितोऽवगुण्ठनपटो येन तस्मिन्, लुलितां स्खलितां, जनन्याः पृष्ठं तुदति, उपरि पाणिभ्यां वेणीं धृत्वा तामवलम्ब्य भूमितः स्वपादावभ्युत्थाप्य ताभ्यां तस्याः पृष्ठमवष्टभ्य पीडयति सतीत्यर्थः, सर्वमेव तच्चापलं विस्तार्यमाणकथावेशां सखीभिः सह मातरं स्वप्रार्थनेऽवधापयितुमेवेति, पार्श्वस्थालिजनेष्विति, यूयमेव पृच्छत किमसौ याचत इति भावः ॥ ७६ ॥

तदा ताश्च सविनयप्रणयोत्साहनपरस्परं स्वसविधमानीय निजगदुः,

वत्स किमर्थयसे,

किं क्षीरं न किमुत्तमं दधि न ना किं कूर्चिका वा न ना-
मिक्षा किं न न किं तवेप्सितमहो हैयंगवीनं घनम् ।
दास्यामो न विषीद वत्स नतरां कुप्यस्व माचे गृहो-
त्पन्ने नो रुचिरित्युदङ्गुलिदलः शीतांशुमालोकयत् ॥७७॥

"कूर्चिका क्षीरविकृति"रित्यमरः । गृहोत्पन्ने तत्र हैयंगवीने न रुचिरिति कृष्णोत्तरम् । तर्हि कुत्रत्ये रुचिरिति । ततश्च, उदङ्गुलिदलः, उच्चमिततर्जनीकः, आ सम्यक्-अदर्शयत् । आकाशोत्पन्नेऽमुष्मिन् हैयंगवीनखण्डे मम रुचिरित्यर्थः ॥ ७७ ॥

* विरुदति इति पा० ।

ततस्ता अपि पुनरूचुः,

कलय न पितरेतद्धुन्त हैयंगवीनं
प्रतरति कलहंसो व्योमवीथीतडागम् ।
अहमपि कलहंसं प्रार्थये खेलनार्थी
तदुपनय न यावन्नेष पारं प्रयाति ॥ ७८ ॥

अहमपीत्यादि कृष्णोत्तरम् ॥ ७८ ॥

इति भूयः सोत्कण्ठं चरणयुगं भूतटे नाटयन् कराभ्यामाभामपि कण्ठतटं धृत्वा धृत्वा देहि देहीति पूर्वतोऽप्यधिकतरं रोदिति स्म ।

ततश्चैवं बाल्यावेशेन रुदन्तं तमन्या ऊचुः[1] ॥ ७९ ॥

वत्स,

आभिः प्रतारितमयं नहि राजहंसः
पीयूषरश्मिरयमम्बरमध्यवर्ती ।
देह्येनमेव महतीह मदीयवाञ्छा
खेलिष्यते तदधुनानय देहि देहि ॥ ८० ॥

देहि देहित्येकैकां प्रति कथनादेकवचनम्, एवमुत्तरत्रापि ॥ ८० ॥

इति भूयः समधिकमेव रुदन्तं माता तमङ्कमानीय,

वत्स,

हैयंगवीनमिदमेव न राजहंसः
पीयूषरश्मिरपि नैष न तत् प्रदेयम् ।
पश्याच दैववशतो गरलं विलग्नं
तेनैतदुत्तममपीह न कोऽपि भुङ्क्ते ॥ ८१ ॥

गरलं विलग्नमिति, कलङ्कचिह्नं दर्शयति ॥ ८१ ॥

ततश्च, अम्बाम्ब कथमत्र गरलं लग्नं तद्वा किमिति पूर्वावेशविरहेण रसान्तरमापन्नस्य कृष्णस्य कथाश्रवणश्रद्धायां सत्यां समीचीनमिदं जातमिति कृत्वा जननी तमालिङ्ग्य वत्स श्रूयतामिति किमपि मधुरमधुरमुवाच ॥ ८२ ॥

तद्वा गरलमेव वा किम्, एतस्योत्तरमये कालकूटनामेति ॥ ८२ ॥

वत्स,

अस्ति कश्चन क्षीरोदधिर्नाम, मातः कीदृशोऽसौ, वत्स यदिदं दुग्धमवलोक्यते तन्मयः समुद्रः, मातः कियतीभिर्धेनुभिः प्रस्तुतं तत्, येन समुद्रो जातः ॥ ८३ ॥

१ त्वयुक्तमिदम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र प्रकरणे संबोधनपदैरेव श्रीकृष्णयशोदयोरुक्तिप्रत्युक्ती ज्ञेये, तद् दुग्धम् ॥ ८३ ॥

वत्स गोदुग्धं तन्न भवति, मातः प्रतारयसि मां. विना गाः कथं दुग्धं, वत्स येन गोषु दुग्धं सृष्टं स एव ना कृतेऽपि तत् स्रष्टुमर्हेति, मातः कोऽसौ, वत्स भगवान् जगत्कारणं, मातः स एव कः, वत्स स भगवान्, अगः स गन्तुं न शक्यते, मातः. हुं सत्यमेव ब्रवीषि. तत् कथय, वत्स स एकदा दुग्धोदधिः सुरासुराणां कलहेऽसुरमोहनाय तेनैव भगवता मथितः. तत्र मन्दरो नाम गिरिर्मन्थानदण्ड आसीद्. वासुकिर्नाम नागराजो रज्जुः. एकतोऽसुरा अन्यतश्च सुरा एवाकर्षकाः, मातः. यथा गोप्यो दधि मथ्नन्ति, वत्स हूम्, एवं मथ्यमाने तस्मिन् कालकूटो नाम गरलमुत्पन्नं, मातः दुग्धे कथं गरलं. सर्पेष्वेव तत्, वत्स तस्मिन् महेशेन पीते सति तच्छीकरा ये पतितास्तानेव पीत्वा भुजगा विषधरा आसन्. तेन भगवत एव सा शक्तिर्यद् दुग्धेऽपि गरलं, मातः हुं सत्यमेतत्, वत्स इदमपि हैयंगवीनं तत एवोत्थितं. तेनात्र तस्यावशेषो लग्नः. पश्य तमिमं कलङ्क इति सर्वे गायन्ति. तद्गृहोत्पन्नं भुङ्क्ष्व नेदमिति श्रूयमाणे. लीलानिद्रावशमागतं जननी च कर्पूरधूलिधवले महापरार्ध्यशयनतले समारोप्य शनैरसूषुपत् ॥ ८४ ॥

अगः, न गच्छतीत्यगः, सर्वत्रैव यस्तिष्ठतीत्यर्थः, तथापि गन्तुं तन्निकटे यातुं न शक्यते, यतस्तमद्य त्वां दर्शयामीत्यर्थः । सरस्वती तु, अगो गकारहीनो भगवान्, भवानेवेत्यर्थः, इति श्लेषेण तमेवोक्तवती ॥ ८४ ॥

अथानुदित एव मयूखमालिनि दधिनवनीतादि समुपसाद्य, वत्स जागृहि जागृहीति करतलेनाभिमृश्य, निर्मञ्छनयामि, पर्युषितयेव क्षुधा तिष्ठसि, तदिदानीमुत्तिष्ठेति समुत्थाप्य, सुरभिसलिलेनाननकमलं धावयित्वाङ्कमारोप्य, कनकभाजनोपनीतं नवनीतादि दर्शयित्वा, वत्स यदभिरोचते तदश्यतामिति जनन्या निगदितोऽभ्यासवशतस्त्यक्तमपि पयोधरमेव तस्याः पातुमारेभे ॥८५॥

पर्युषितया श्वस्तन्या ॥ ८५ ॥

सा च त्वां पाययित्वा वत्स नवनीतं ते प्रियमिदमश्यतां, मातर्नापरमिदमश्नामि, गतायां निशायां मृषाकथयाहं निद्रां गमितोऽस्मि. क्षुद्बाधयैव मया स्थितं, वत्स कस्तदा चोरयिष्यति नवनीतं, मातर्मया कदा ते चोरितं नवनीतं मृषा वदसीति लीलाबालकेन तेन बाल्यलीलापरिपाट्या बहुनैव प्रकारेण जननी मनोरञ्जनमातनोति ॥ ८६ ॥

जननीति कर्तृपदम् ॥ ८६ ॥

कदाचिदपि,

गोशालचत्वरतले विचलन् द्रवन्तं
वत्सं विधृत्य विनिपात्य निजाङ्कमूले ।
दोर्भ्यां विगृह्य मुखमस्य मुखाम्बुजेन
चुम्बन् प्रियं च कुतुकं च तनोति मातुः ॥ ८७ ॥

अङ्गणे निजगवां घृतपुच्छ-
स्तर्णके सपदि धावति धावन् ।
नग्न एष तदनावृतमेव
ब्रह्म मूर्तमहरज्जनचेतः ॥ ८८ ॥

निजगवामिति टजभावः, शूद्रस्वामिकगोवधपापयश्चित्तमित्यादिना प्राचां वाक्येन "गोरतद्वितलुकी"ति टचोऽनित्यत्वज्ञापनात् । श्रीव्रजराजेन कौतुकवशात् कृष्णस्वामिकत्वेन कांश्चन गावः स्थापिता इति ज्ञेयम् । तर्णके वत्से । नग्नो दिगम्बरः ॥ ८८ ॥

अङ्कितो निजगवां[2] अङ्गणपङ्केः
शङ्क्यते मृगमदैरिव लिप्तः ।
पश्यतां नयनयोरभिरामः
सुन्दरे हि किमसुन्दरमस्ति ॥ ८९ ॥

पश्यतां सर्वेषामेव ॥ ८९ ॥

कदाचिदपि,

उष्णीषमीषदतिचारु निवध्य मूर्ध्नि
माचा विशिष्य परिधापितपीतवासाः ।
गोरोचनारचितचित्रतमालपत्रः
स्निग्धाञ्जनाक्तनयनो बहिरप्युपैति ॥ ९० ॥

कदाचिदपीति यात्रोत्सवादौ, तमालपत्रं तिलकं, "तमालपत्रतिलकचित्रकाणि विशेषक"मित्यमरः ॥ ९० ॥

चैलोक्यमोहनमवेक्ष्य कुलोकदृष्टि-
र्मा भूदिहेति कृतलौकिकमातृभावम् ।
माचा थुथूत्कृतिदरत्वरदास्यचन्द्र-
पीयूषबिन्दुभिरपूजि तु तस्य मूर्धा ॥ ९१ ॥

१ सुगमामिति त्यक्तं व्याख्यात्वा ।

२ अत्र पुमान् स्त्रियेति स्मर्तव्यम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इह श्रीकृष्णशरीरे ॥ ९१ ॥

कण्ठे हरेर्नखमनूनमहेमनद्धं
श्रोण्योर्महार्हमणिकिङ्किणिदाम बिभ्रत् ।
मन्दं पुराद्बहिरुपेत्य करोति खेला-
माभीरनीरजदृशां भवनाङ्गणेषु ॥ ९२ ॥

हरेर्व्याघ्रस्य ॥ ९२ ॥

अथ कदाचिदपि,

सकला एव व्रजयोषितो जयोषितोदयस्य सदयस्य सततबाल्यधार्ष्ट्यकौतुकं को-तु-कं नरं न-रञ्जयति जयति वा न कुचेति मनसि न सिद्धुवेदना वेदनाय तथापि व्रजराजदाराणामुदाराणामुपजग्मुरभ्यासम् ॥ ९३ ॥

जयेन· उपित उदयो यस्य तस्य, यस्योदये विजयः सदा निष्ठतीत्यर्थः । अत एव सन् सदा वर्तमानः शोभनो वा. अयः शुभावहो विधिर्यस्य तस्य, यद्वा सदयस्य दयायुक्तस्य, ईदृशमधुरलीलाविष्कारे लोकेषु तस्य दयैव कारणमिति भावः । को तु पृथिव्यां तु, कं नरं कं मनुष्यमात्रमपि, किं पुनस्ताः परमवात्सल्यप्रेमवतीरित्यर्थः । कुत्र वा न जयति, अपितु सर्वत्रैव जयति, उत्कर्षमेव प्राप्नोति, न तु संकोचमित्यर्थः । इति·अत एव हेतोः प्रतिदिनगव्यभाण्डस्फोटनादिभिरपि ताः सिद्धुवेदना जातपीडा मनसि न भवन्ति, किंतु कौतुकार्थं मुखमात्र एवेत्यर्थः । तथापि मनसि पीडिता इव वेदनाय तत्तद्वार्ष्ट्यविज्ञापनाय । व्रजराजदाराणां श्रीयशोदायाः । अभ्यासं समीपम् ॥ ९३ ॥

आगत्य च सहासं सप्रणयं सकौतुकं किमपि समूचुः ॥ ९४ ॥

सहासमिति भाविनितान्तेत्यादि, सप्रणयमिति लुम्पति तं स्मितेनेति, सकौतुकमिति दूरे स्थितो गर्जतीत्यादि, विशेषविचारे तु सर्वत्रैव सर्वमिति ॥ ९४ ॥

अयि व्रजराजभाविनि भाविनितान्तदुरन्तभावोऽयं तव कुमारः, यदयं द्विपन्न एवाधुना धुनान इव भुवनमबलमानसंपल्लीलोऽपि पल्लीलोऽपि चरितमभ्यस्यति स्थित्वा वा किं विधास्यति ॥ ९५ ॥

भावी नितान्तं दुरन्तो भावश्चेष्टा यस्य सः । कथमनुमीयत इति चेत् तत्र हेतुमाह यदयमिति । द्विपन्न एवेति इतोपमया । न जानीमो जनिष्यमाणानां शाखापल्लवपुष्पफलादीनां कीदृशमुद्वेजकत्वं भविष्यतीति भावः । न बलमाना संपत् समृद्धिर्यस्यां तथाभूता लीला यस्य सोऽपि । पल्लीलोऽपि पल्ली नगरं लुम्पतीति, तच्चरितम् । स्थित्वा वा, इत ऊर्ध्वमित्यर्थः ॥ ९५ ॥

तथाहि,

अदुग्धदुग्धेन गवां गणेषु
निपाययत्येष विमुच्य वत्सान् ।
संभूय भूयः क्रियते यदा तु
रोषस्तदा लुम्पति तं स्मितेन ॥ ९६ ॥

संभूय मिलित्वा ॥ ९६ ॥

निहुत्य यत्राद्यहनान्धकारे
हैयंगवीनादि सुरक्षितं यत् ।
प्रविश्य पश्यन् स्वमहःप्रकाशै-
स्तत् सर्वमानीय बहिष्करोति ॥ ९७ ॥

निहुत्य संगोप्य ॥ ९७ ॥

हेलालसं तत् क्रियदेव भुङ्क्ते
शाखामृगान् भोजयते प्रकामम् ।
न भुञ्जते ते यदि तृप्तिमन्तो
भूमो किरत्येव विभिद्य भाण्डम् ॥ ९८ ॥

शाखामृगान् वानरान् ॥ ९८ ॥

करालभ्ये पीठं विरचयति पीठोपरि पुनस्तदूर्ध्वं तच्चान्यत् तदुपरि समारोप्य चरणौ ।
समुद्वाहुः शिक्याद्बुधि च नवनीतादि च हरन्
निषिद्धश्चेत् कैश्चित् क्षिपति सकलं तूर्णमवनौ ॥ ९९ ॥

तदूर्ध्वं· तस्य पीठस्योर्ध्वम्. उपरि·अन्यच्च तत् पीठं विरचयति ॥ ९९ ॥

धृतः कयाचिदादि कौतुकेन वा
विमोट्य पाणिं सहसापसर्पति ।
दूरे स्थितो गर्जति तिष्ठ तिष्ठ भो
दग्ध्वा गृहं ताडयितास्मि बालकान् ॥ १००

कयाचिद् गृहिण्या ॥ १०० ॥

चोर एष इति केनचिदुक्तः
क्रुद्ध एव निगदत्यतिधृष्टः ।
त्वं हि चोर इदमेव मदीयं
गेहमस्य सकलं हि ममैव ॥ १०१ ॥

केनचिद् गृहपतिना, अस्य गेहस्य, गेहस्थितमित्यर्थः ॥ १०१ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वास्तो लिप्ते सुललितमृदा चिचिते चारुचूर्ण-
धूलीपत्त्रादिभिरशुचिभिः शुद्धिहानिं करोति ।
त्वत्सांनिध्यऽधिकसुचरितोऽस्मादृशामालयेषु
स्तेनो धृष्टः प्रखरमुखरः क्रोधनो गर्धनश्च ॥ १०२ ॥
गर्धनो लोलुपः ॥ १०२ ॥

इत्येवं व्रजवनिता नितान्तमृषा परुषा रुषा गिरो यदि निजगदुः ॥ १०३ ॥

नितान्तमृषा अत्यन्तमिथ्याभूतया, रुषा रोषेण, परुषा गिरो निष्ठुरवाक्यानि ॥ १०३ ॥

जगदुत्सवकरोऽपि तदा तदालापवैयर्थ्यं प्रतिपादयितुं मृषाश्रुकलितनयनो नयनोदापराद्धोऽपि राद्धोऽपि तदप्यपिधापयितुं तत् सकलं स-कलं व्याजहार ॥ १०४ ॥

मृषा-अश्रुभिः कलिते व्याप्ते नयने यस्य सः, नयस्य नीतेर्नोदेन दूरीकरणेन हेतुना, अपराद्धो राद्धः, अपराधवान् जातः, तदप्यपिधापयितुम्,आच्छादयितुं,तत् सकलं दधिचौर्यादि, स कृष्णः, कलं मधुरम् ॥ १०४ ॥

अम्ब,आसां मध्ये कस्याश्चिदपि स्निग्धता न वर्तते,नवर्ततेह वचसि, सत्यमेता अनृता अनृता वासां समस्तानामेव ॥ १०५ ॥

नवा ऋतता सत्यता, इह वचसि, अदुग्धदुग्धेत्यादिवाक्ये. अनृता अत्यन्तानृतभाषित्वेनानृतरूपा एवैताः सत्यमित्यर्थः, आसामनृता, न नृता, मनुष्यता नास्ति, अमानुष्य एवैता इत्यर्थः, वस्त्वर्थोऽपि सहसा-आपतित इति ॥ १०५ ॥

यत आसामबालकेषु बालकेषु मे स्वभावभाववत्ता, तेन तदीक्षणाय क्षणायत्ततया प्रत्येकमासां निशान्ते निशान्ते सत्येव मया गम्यते ॥ १०६ ॥

अबालं तरुणं कं सुखं येभ्यस्तेषु, स्वभावेन निसर्गेण भाववत्ता प्रेमवत्ता, तेन हेतुना, तेषामीक्षणाय क्षणायत्ततया-उत्सवाधीनत्वेन, निशान्ते गृहे, निशान्ते प्रातःकाले ॥ १०६ ॥

तदवलोच्य बलोच्यमानमिदमनृतं वचो मा प्रतीहि,मातः परमे मातः परमेव बन्धुदर्शनाय गन्तव्यमिति भिया रुदन्मुखं तनयमङ्के कृत्वा, व्रजेश्वरी व्रजयोषितः सस्मितावहित्थमब्रवीत्, अयि मिथ्याभाषिण्य एव भवत्यः, अयमेव सत्यवादी, तन्मैवं निरपराधोऽयमस्मद्बालकः पुनरुपालभ्यो भवतोभिरिति ताभिः सह प्रीतिसंकथया क्षणमवस्थाय रोहिणीद्वारैव तासां बन्धुसपर्यां विधाय च विसर्जयामास ॥ १०७ ॥

बलेनोच्यमानं, हे मातः, हे परमे पूज्ये, इत्यात्मनः सुचरितत्वं व्यञ्जितम्, अतः परं मा-एव गन्तव्यं, बन्धुसपर्यां तिलकादिक्रियाम् ॥ १०७ ॥

अथ निर्गतासु तासु कृष्णजननी जननीतिकोविदा तनयं तमङ्के निधाय वत्स लोभवान् भवान् निजगृहे जगृहे यदतिचापलं तदिह शुशुभे शुभेनैव, परसदनेऽसदनेकं कर्म न शोभते,सुशोभ-ते चरितमिदं नातिललितं, निजाङ्गण एव खेल, इत्युपदिशन्ती लालयामास ॥ १०८ ॥

जनानां नीतिषु कोविदा,लोभवान् लोभयुक्तः,असत्-चौर्याद्यनेकं कर्म, हे सुशोभ, ते तव ॥ १०८ ॥

तस्मिन्नेव समये व्रजराजोऽपि तत्रैवागत्य वागत्यधिकमाधुर्येण किमपि तमपिहितप्रभावमपि हितप्रभावमात्मजमात्मनः सुहृदं संबोध्य निजगाद ॥ १०९ ॥

वाचामत्यधिकमाधुर्येण, आत्मजं संबोध्य किमपि निजगादेत्यन्वयः, अपिहित आच्छादितः प्रभावो यस्य तं,हितां प्रभां कान्तिमवति रक्षति तम् ॥ १०९ ॥

एह्येहि वत्स पितरेहि ममाङ्कमूल-
मित्युक्त एव जनकेन स मातुरङ्कात् ।
आगत्य कण्ठमवलम्ब्य जुगुप्सते मां
माता कथं बत मृषेति कलं जगाद ॥ ११० ॥

कलम्-अतिमधुरम्,अस्फुटं, बाल्यत्वादिति ॥ ११० ॥

तदा तदाकर्ण्य किं तदिति पृच्छति घोषाधीशे धीशेवधिरिव स आश्चर्यबालोऽवालोच्य मातरं मातरञ्जसा त्वमेव कथयेति निजगाद, सा च घोषनारीणां रीणां मधुरामिव कथितां कथां कथितवती ॥ १११ ॥

पृच्छति सति, धीशेवधिर्धीनिधिः, हे मातः, अञ्जसा शीघ्रं, रीणां चरितां, "रीङ् स्रवणे," इत्यस्मात् ॥ १११ ॥

तव तीव्रतरापराधोऽयं यदनागसि सततनये तनये मम . मृषादोषासञ्जनसंजननकुतुकिनीनां गोपरमणीनां परमणीनां दर्शने समत्सराणामिव जनानां वचसि प्रत्यय इति महिष मवहित्थयानुयोज्य तात मदङ्कमूलमेवातिष्ठ मा परमस्या अङ्कं गाः ॥ ११२ ॥

सततमेव नयो विनयो नीतिर्वा यस्य तथाभूते मम तनये विषये मृषा दोषासञ्जनं दोषारोपस्तस्य सजनन उत्पादने कुतुकिनीनां वचसि प्रत्ययः प्रतीतिरिति, परमणीनां परकीयस्त्रीणां दर्शने समत्सराणामिति श्रीकृष्णप्रोत्साहनेन

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ताः प्रत्यसूयया च स्वस्यान्तरङ्गताद्योतनं, यशोदायास्तु मातृत्वेऽपि तट्टयाभावाद् बहिरङ्गत्वज्ञापनमवहित्थयानुयोगश्चेति, स्वाङ्कमूलस्य रोचकत्वे हेतुत्रयमिति ॥ ११२ ॥

इत्युक्त एव पितुरङ्कान्मातुरङ्कं जवेनारोहति तनये नयेन तौ दम्पती एव जहसतुः ॥ ११३ ॥

तर्हि तातः स्वाङ्क एव बध्वा वा मां रक्षिष्यति, तथा सति मातुरङ्के स्यातुं न प्राप्स्यामीत्यत इदानीमेव बलादितोऽपसृत्य तत्र यामीत्येष बाल्यस्वभावज्ञापकः कृष्णस्य मनसि विचार एव जवेन मातुरङ्कारोहणे हेतुर्ज्ञेयः, नयेनेति, बालकस्य नीतिरवेयमिति ज्ञात्वेत्यर्थः ॥ ११३ ॥

तदनु दनुजदमनमाचा सह सहर्षहसितमेव कृतप्रकृतप्रवृत्तितया व्रजराजः किमपि प्रास्तौषीत् ॥ ११४ ॥

कृता प्रकृता प्रस्तुता प्रवृत्तिर्वार्ता येन तस्य भावस्तत्ता तया, प्रास्तौषीत् प्रस्तावमकरोत् ॥ ११४ ॥

अयमेकक एव बहिरेति, न प्रबलो बलोऽपि,तेनोरुभयोरुभयोरेव नैकाकिविहारित्वं सम्मतीनम्,अतः खेलासहचराः परिचरणचतुराः परिचारकाश्च कल्पनीयाः, यथामी सततमनयोः सविधचारिणो भवन्तीति विचार्य, कियन्तो धीसचिवाः कियन्तो बालपरिचारकाश्च तदवधि तेन नियुयुजिरे ॥ ११५ ॥

बलोऽपि बलभद्रोऽपि, उर्वी भा कान्तिर्ययोस्तयोः, कल्पनीया मया कल्पितुमर्हाः,धीसचिवा मन्त्रिणः,"मन्त्री धीसचिव" इत्यमरः ॥ ११५ ॥

बालसहचरास्तु प्रागेव गृहाद्गृहादेव मिलितवन्तः, एवं सबलः सबालसहचरश्च सबालदासश्च धीसचिवैरुपलक्षणत्वेनैव वीक्ष्यमाणः प्रतिपुररथ्यं धूलीखेलाकौतुके करिवरकलभ इव चपलकरदण्डताण्डवसमुद्भूतधूलीपटलेनात्मानं परं च धूसरयन् सह संवासतया शिशुतया च निःसंकोचमेव व्रजबालिका अपि सह खेलन्तीः सहचरबालकसाधारण्येनैव खेलया परितोषयन्, कदाचिदपि ताभिस्तैरपि कलहायमानस्तास्तानपि ताडयन् ताभिस्तैश्च ताडितः कदाचिद्धसति,कदाचित् कुप्यति, न कुप्यति च ॥ ११६ ॥

उपलक्षयन्तीत्युपलक्षणास्तत्त्वेन, रथ्या प्रतोली ॥ ११६ ॥

कदाचिदपि धूलीभिरेव प्राचीरपुरगृहादि निर्मिमीते, कदाचिदपि परनिर्मितं भनक्ति, तेऽपि तन्निर्मितं भञ्जन्ति, पुनरपि निर्मिमीते, पुनरपि भनक्तीत्येवप्रवसरे दिवि दिविषदस्तदेव कुतुकं पश्यन्तो मनसि सकौतूहलं परामृशुः ॥ ११७ ॥

यदीयो भ्रूभङ्गः कति न जगदण्डानि शतशः
प्रसूते संपाति क्षपयति न तत्र प्रयतते ।
स एवायं धूलीपुरगृहविनिर्माणरभसे
भृशं श्रान्तः खिन्नस्तदपि न विरामं रचयति ॥११८॥

इति सप्रमोदमालोकयन्ति स्म ॥ ११९ ॥

एवमतिकालखेलया गृहागमनमपि विस्मृत्य रथ्यासु खेलन्तं खेऽलन्तं बालसूर्यमिव तत्पुरपुरन्ध्रयो मातृवदतिवत्सलाः सलालित्यमभिदधति ॥ १२० ॥

खे सुखे निमित्ते, अलम्· अतिशयेन, खेलन्तं,"खमिन्द्रिये सुखे स्वर्गे" इति विश्वः, पक्षे खे· आकाशे,अलन्तं शोभमानम् ॥ १२० ॥

एह्येहि लाल ललिताङ्गणमस्मदीयं
तत्रैव खेल शिशुभिः कियदप्यशान ।
इत्युक्त एव विहसन् मृदु भाषतेऽसौ
नो यामि नाप्यवसरो मम तावदास्ते ॥ १२१ ॥

हे लाल"लल ईप्सायाम्," घञ्,हे लालनीय इत्यर्थः, अशान भुङ्क्ष्व ॥ १२१ ॥

इत्युक्ते सति ताभिरप्यतिशयं मातृवदतिशयायहयहिलाभिः प्रसभेन सभेन करकमलमाधृत्य धृत्यनवस्थितनयाततया स्वगृहमानीय मानीयमानसौभाग्येऽसौ भाग्योचितया मज्जनमार्जनादिसपर्यया पर्ययातस्नेहया परिचर्य स्नेहमर्यादया दयालुभिः किंचित् सरनवनीताद्याशयित्वा सह सहचरैर्गृहाय प्रहीयते ॥ १२२ ॥

प्रसभेन हठेन । कीदृशेन सभेन, भा शोभा तत्सहितेन, परमवात्सल्यप्रेमसूचकत्वात् कृष्णे प्रसभस्यापि सशोभत्वमेवेत्यर्थः । धृतौ धैर्ये· अनवस्थिततया, आततया विस्तृतया, प्रेमभरेण धैर्यं कर्तुमसमर्थाभिस्ताभिरित्यर्थः । भा शोभा तयैव·आनीयमानं सौभाग्यं यत्र सः, असौ परि । सर्वतो भावेनापि· अयातः प्राप्त एव स्नेहो यस्यां तया । सरो दुग्धदध्यादीनामयो घनभागः ॥ १२२ ॥

एवं खेलन् कदाचिदनुरक्ताया व्रजभुवो महिमानं वर्धयन्निव जठरगतजगत्पावनायेव मृदं भक्षितवान्,

॥ ११७ ॥ ११८ ॥ ११९ ॥ त्यक्तानीमानि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदथ बलोऽवलोक्य कृतसुकृतपाकैः पाकैश्च सह चरैः सहचरैरिव भद्राभद्रयोश्चपलमेव व्रजेश्वरीमासाद्य, साद्यमानमानसो न सांप्रतं मातरेष यन्मृदमाद, मादत्ते चास्माकमपि वचनं च, नन्दयति तददन एव लालसामिति निजगाद ॥ १२३ ॥

पाकैर्बालकैः, "पोतः पाकोऽर्भको डिम्भ" इत्यमरः । चलैः सहैव चपलं सत्वरमेव. "सत्वरं चपलं तूर्ण"मित्यमरः । हे मातः सांप्रतं साद्यमानं दम्यमानं मानसं यस्य तथाभूत एष न भवति । यद्यस्मान्मृदम्·आद भक्षितवान् । अस्माकमपि वचनं, मेति नेत्यर्थः, न गृह्णातीत्यर्थः । नन्दयति बहुलीकरोति ॥ १२३ ॥

सा च तदा तदाश्रुत्य श्रुत्यसमञ्जसं रुषा परुषा परया रयानीतयष्टिकया कयापि भ्रुकुटिकुटिलयावलोकनमुद्रया भाययन्ती, कथमदान्त मृदमत्सि,मत्-सितादिकं न लभ्यते, मृदि कः स्वादः ॥ १२४ ॥

श्रुत्योः कर्णयोरसमञ्जसं, परया रुषा, परुषा रूक्षा, मत्·मत्तः, सितादिकं शर्करादिकम् ॥ १२४ ॥

न च परगृहापराधवत् प्रतारयितुं तारयितुं स्वस्वदोषमधुना शक्ष्यसि, तवाग्रजोऽग्रजोपस्तव सहचराश्च सर्वे साक्षिण इति निजगाद ॥ १२५ ॥

अग्रजोषोऽग्रवर्ती ॥ १२५ ॥

तदा जननीभिया कृतापह्नवोऽपराद्धाऽप्यनपराद्ध इव मृषाश्रुकलाकलिलनयनोऽनयनोदाय मातर्न मया मृदशिता सर्वेऽमी मृषा भाषन्ते ॥ १२६ ॥

अनयनोदाय·अनीतिदूरीकरणाय, अशिता भक्षिता ॥१२६॥

यदि न प्रत्येषि तदवलोकय मे मुखमिति यदायमुवाच, तदा व्यादेहि वदनमिति व्रजराजमहिषी निजगाद, समनन्तरमनन्तरहसि हसितपुरःसरं व्यादत्तवदने निखिलसौभगवति भगवति पारावारवारपरिवारितसप्तान्तरीपां तरीपारावारादियुतनदनदीनदनदीर्घां सपवनवनोपवनां पवनान्दोलितलतातरुगुल्मां मृगमृगराजराजमानमेरुलोकालोकावधिविविधाचलामचलामखिलनागनागरीगणोपसेव्यमाननागनायकादिमण्डितं नागलोकं च कंचन ॥ १२७ ॥

पारावाराणां समुद्राणां वारेण समूहेन परिवारिताः सप्त·अन्तरीपा द्वीपा यस्यां तां, तरी नौका· पारावारे तीरे·आदिशब्दात् तत्रस्था मनुष्यादयस्तैर्युतानां युक्तानां नदनदीनां नदनेन गर्जनेन दीर्घां, मृगराजः सिंहः, अचलां पृथिवीं, भूर्लोकमित्यर्थः ॥ १२७ ॥

निखिलतारकाग्रहनक्षत्रकृतदिनभोगं नभो गन्धर्वसिद्धकिंनरचारणविद्याधरादिविद्याधरादिमुनिगणगणनीयशोभं यशोभं नाकमपि कमपि महर्लोकादिकमन्यं च न्यञ्चदुदञ्चज्जीवनिकायकायमखिलमेव ब्रह्माण्डमात्मानमात्मनः पतिमात्मनोऽपत्यं तमपि सव्रजलोकमालोकयामास ॥ १२८ ॥

निखिलैस्तारकादिभिः कृतो दिनस्य भोगो ज्योतिःशास्त्रोक्तो यत्र तथाभूतं, नभ आकाशं, भुवर्लोकमित्यर्थः। विद्याधरादयो ये विद्यानां धरा धारकाः, आदिमुनिगणा मरीच्यादयः, एतैर्गणनीया शोभा यत्र तं, यशसां तत्रत्यसंबन्धिनां भा दीप्तिर्यत्र तं, नाकं स्वर्गम्। अखिलमेव समस्तमेव ब्रह्माण्डम् । कीदृशं, न्यञ्चतां कीटपतङ्गादीनामुदञ्चतां ब्रह्मेन्द्रादीनां जीवनिकायानां काया यत्र तम् ॥ १२८ ॥

आलोक्य च किमयं मे भ्रमः किमयं मे स्वप्नः किमियं देवमाया किमिदमैन्द्रजालिकं किमस्यैव भ्रामकः शक्तिविशेष इति निर्णेतुमपारयन्ती रयन्तीव्र[1]माप मोहस्य ॥ १२९ ॥

इन्द्रजाले भवमैन्द्रजालिकं, मोहस्य तीव्रं रयं वेगम्, आप्तवती ॥ १२९ ॥

तदनन्तरं तदनन्तरंहसोऽस्य वैभवमिति विज्ञाय विज्ञा-यत्नतोऽपि न विस्मयन्ती यदधीनतयानतया मयेदमालोकितं स एव मे शरणं तदवलोकेन केन च नाद्भुतचरितस्य तस्य तदलौकिकं वैभवं वै-भवं च मोहयितुं समर्थमिति जानती तमेव सुतमेव सुतरामीश्वरत्वेनावगच्छन्तीच्छन्ती च पुत्रभावमुभयोरेव भयोरेवमतिभरेण भुग्ना पूर्वभावं विहाय चरम एव भावे प्रसज्य पुनरङ्के निधाय लालयामास ॥ १३० ॥

इत्यानन्दवृन्दावने बाल्यलीलालताविस्तारे मृद्भक्षणसक्षणो नाम पञ्चमस्तबकः ॥ ५ ॥ :: :: ॥

अस्य वैभवमिति विज्ञायेतीति, नाहं भ्रान्ता नापि शयाना नापि क्वचिदपि देवे सापराधा नाप्यत्र कश्चिदैन्द्रजालिकोऽस्ति । किंच, मत्पुत्रस्यास्य नामकरणसमये पूर्वसिद्ध-

१ रयं तीव्रमिति मुद्रणीये रयन्तीव्रमिति संधिर्लिपितोऽति यमकसौष्ठवप्रत्ययायैव ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

योगैश्वर्यमपि गर्गेणोक्तमिति वितर्कान्ते निश्चयादिति भावः। तद् विश्वदर्शनम्। अनन्तरंहसः, अपरैश्वर्यवेगस्य। विज्ञा पण्डिता। आनतया, आनम्रया। तदवलोकनेन विश्वदर्शनेन। वै निश्चितं भवं महेशं च। इच्छन्ती च पुत्रभावमिति, तथाभूतैश्वर्यदर्शनेऽपीत्यतः पुत्रभावस्य प्राबल्यं दर्शितम्। तेन देवक्याः खल्वैश्वर्यभावेन पुत्रभावो विलाप्यते विरोधित्वात्, अस्यास्तु पुत्रभावेनैवैश्वर्यभावो विलाप्यते बलवत एव बाधकत्वसंभवादिति भावः। युगपदेव-उभयोरीश्वरभावपुत्रभावयोर्यं मे शेभे तयोः। एवमनेन प्रकारेणातिभरेण, भुग्ना क्षीणा, द्वयोरेव कान्तिच्छटाघातेन पीडितेत्यर्थः। पूर्वभावं विहायेति, तस्यागन्तुकत्वेन दौर्बल्यात्। चरमे इत्यस्य स्वाभाविकत्वेन प्राबल्यात्। अत्र समाहितं श्रीवैष्णवतोषण्यां यथा"तादृशतदैश्वर्यशक्तिरेव तु स्वयं वा तमालिङ्ग्य वा तदभीष्टलीलारससंपादनाय मातरि कोपाच्छादकभावान्तरापादनेन तथा सर्वमेवास्यान्तर्विद्धते न किमपि भक्षयतीति तद्वचःसत्यापनेन च निजविभुसाहाय्याय विस्मयादिद्वारा मातुस्तत्प्रेमपोषाय च विश्वं दर्शितवती"ति ॥ १३० ॥

इत्यानन्दवृन्दावनचम्पूकाव्यटीकायां सुखवर्तिन्यां पञ्चमस्तबकसंगमनम् ॥ ५ ॥ :::: ॥

doctrine of the momentariness of everything. (They say,) If no continuing soul is accepted, then even the arrangement of the means for attaining worldly fruit in this life will be useless. But surely this can never be imagined as possible—that one should act and another reap the consequences! therefore as this conviction, "I who previously did the deed, am the person who now reap its consequences," establishes undoubtedly the existence of a continuing soul which remains constant through the previous and the subsequent period, the discriminating Jainas or Arhats reject as untenable the doctrine of momentary existence, i. e. an existence which lasts only an instant, and has no previous or subsequent part.

But the opponent may maintain, "the unbroken stream (of momentary sensations) has been fairly "proved by argument, so who can prevent it? In "this way, since our tenet has been demonstrated by "the argument 'whatever is, is momentary, &c.,' it fol-"lows that in each parallel line of successive experi-"ences, the previous consciousness is the agent and the "subsequent one reaps the fruit. Nor may you object, "that 'if this were true effects might extend beyond all "bounds,' [i. e. A might act and B. receive the punish-"ment,],—because there is an essentially controlling "relation in the very nature of cause and effect. Thus "we see, that when mango seeds, after being steeped "in sweet juices, are planted in prepared soil, there "is a definite certainty that sweetness will be found "in the shoot, the stalk, the stem, the branches, the "peduncle &c., and so on by an unbroken series to "the fruit itself; or again, when cotton seeds have "been sprinkled with lac juice, there will be a similar "certainty of finding, through the same series of shoot,

SARVA-DARSANA-SANGRAHA

CHAPTER III.

THE ÁRHATA SYSTEM.

(Continued from page 220.)

The Gymnosophists * (Jainas,) rejecting these opinions of the Muktakachchhas † and maintaining continued existence to a certain extent, overthrow the

* *Vivasanas*, "without garments."

† "The Buddhists are also called *Mukta-kachchhas*, alluding to a peculiarity of dress, apparently a habit of wearing the hem of the lower garment untucked." *(Colebrooke.)*

॥ सर्वदर्शनसङ्ग्रहः ॥

तदित्थं मुक्तकच्छानां मतमसहमाना विवसनाः कथञ्चित् स्थायित्वमास्थाय क्षणिकत्वपदं प्रतिक्षिपन्ति। यद्यात्मा कश्चिदास्थीयेत स्थायी तथापीह लौकिकफलसाधनसम्पादनं विफलं भवेत्। न ह्येतत् सम्भविष्यति, अन्यः करोत्यन्यो भुङ्क्त इति। तस्माद्योऽहं प्राक् कर्म्माकरवं सोऽहं सम्प्रति तत्फलं भुञ्ज इति पूर्व्वापरकालानुयायिनः स्थायिनस्तस्य

स्पष्टप्रमाणावसिततया पूर्व्वापरभागविकलकालकलावस्थितिलक्षणक्षणिकता परीक्षकैरर्हद्भिर्न परिग्रहार्हा। अथ मन्येथाः प्रमाणवत्त्वादायातः प्रवाहः केन वार्य्यत इति न्यायेन यत् सत् तत् क्षणिकमित्यादिना प्रमाणेन क्षणिकतायाः प्रमितितया तदनुसारेण समानसन्तानवर्त्तिनामेव प्राचीनः प्रत्ययः कर्म्मकर्त्ता उत्तरः प्रत्ययः फलभोक्ता। न चातिप्रसङ्गः, कार्य्यकारणभावस्य नियामकत्वात्। यथा मधुररसभावितानामाम्रबीजानां परिकर्षितायां भूमावुप्तानामङ्कुरकाण्डस्कन्धशाखापल्लवदिषु तद्द्वारा परम्परया फले माधुर्यनियमः, यथा वा लाक्षारसावसिक्तानां कार्पासबीजादीनामङ्कुरादिपारम्पर्येण कार्पासादौ रक्तिमनियमः। यथोक्तं, यस्मिन्नेव हि सन्ताने आहिता कर्म्मवासना। फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥ कुसुमे बीजपूरादेर्यद्भावाद्यत्प्रसिच्यते। शक्तिराधीयते तत्र काचि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"&c, an ultimate redness in the cotton. As it has "been said.

"'In whatever series of successive states the original impression of the action was produced,

"'There verily accrues the result, just like the redness produced in cotton.

"'When lac-juice, &c., are poured on the flower of the citron &c.,

"'A certain capacity is produced in it,—do you not see it?'"

But all this is only a drowning man's catching at a straw, for it is overthrown by the following dilemma.

In the example of 'the cloud,' &c., [*supra p.* 190], was your favourite 'momentariness' proved by this very proof or by some other? It could not be the former,—because your alleged momentariness is not always directly visible in the cloud, and consequently, as your example is not an ascertained fact, your supposed inference falls to the ground. Nor can it be the latter —because you might always prove your doctrine of momentariness by this new proof (if you had it,) and consequently your argument regarding all existence ["whatever is, is momentary," &c.,] would become needless. If you take as your definition of 'existence' "that which produces an effect," this will not hold, as it would include even the bite of a snake imagined in the rope, since this undoubtedly produces the effect [of fear.] Hence it has been said that the definition of an existence is "that which possesses an origin, an end and an [intermediate] duration."

As for what was said [in p. 191] that "the momentariness of objects is proved by the fact that the contrary assumption leads to contradictory attributes of capacity and want of capacity existing contemporaneously," *that* also is wrong—for the alleged contradiction is not proved, as the holders of the Syád-váda †† doctrine [*vide infra*] willingly admit the indeterminateness of the action of causes. As for what was said of the example of the cotton, that is only mere words, since no proof is given, and we do not accept even in that instance a separate destruction [at each moment.] And again, your supposed continued series cannot be demonstrated without some subject to give it coherence, as has been said, "In individual things which are of the same class or successively produced or in mutual contact, there may be a continued series; and this series is held to be one [throughout all]."

Nor is our objection obviated by your supposed definite relation between causes and effects. For even on your own admission it would follow that something experienced by the teacher's mind might be remembered by that of the pupil whom he had formed, or the latter might experience the fruits of merit which the former had acquired; and thus we should have the twofold fault that the thing done passed away without result, and that the thing not done produced its fruit. This has been said by the author of the Siddhasenávákya.

"The loss of the thing done,—the enjoyment of the fruit of a thing not done,—the dissolution of all existence,—and the abolition of memory,—bold indeed is the Buddhist antagonist, when, in the teeth of these four objections, he seeks to establish his doctrine of momentary destruction!"

त् तां किं न पश्यसीति ॥ तदपि काशकुशावलम्बनकल्पं विकल्यासहत्वात् । जलधरादौ दृष्टान्ते क्षणिकत्वमनेन प्रमाणेन प्रमितं प्रमाणान्तरेण वा । नाद्यः, भवदभिमतस्य क्षणिकत्वस्य क्वचिदप्यदृष्टचरत्वेन दृष्टान्तासिद्धावस्यानुमानस्यानुत्थानात् । न द्वितीयः, तेनैव न्यायेन सर्व्वत्र क्षणिकत्वसिद्धौ सत्त्वानुमानवैफल्यापत्तेः । अर्थक्रियाकारित्वं सत्त्वमित्यङ्गीकारे मिथ्यासर्पदंशादेरप्यर्थक्रियाकारित्वेन सत्त्वापाताच्च । अत एवोक्तम्, उत्पादव्ययध्रौव्ययुक्तं सदिति । अथोच्येत सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्म्माध्यासात्तत्सिद्धिरिति तदासाधु, स्याद्वादिनामनैकान्तावादस्येष्टतया विरोधासिद्धेः । यदुक्तं कार्पासादिदृष्टान्त इति तदुक्तिमात्रं, युक्तेरनुक्तेः, तत्रापि निरन्वयनाशस्यानङ्गीकाराच्च । न च सन्तानिव्यतिरेकेण सन्तानः प्रमाणपदवीमुपारोढुमर्हति । तदुक्तं, सजातीयाः क्रमोत्पन्नाः प्रत्यासन्नाः परस्परम् । व्यक्तयस्तासु सन्तानः स चैक इति

†† In p. 26, l. 3 read *Syád-vádinám.*

गीयत इति । न च कार्यकारणभावनियमोऽतिप्रसङ्गभङ्गमर्हति । तथाहि उपाध्यायबुद्ध्यनुभूतस्य शिष्यबुद्धिः स्मरेत् तदुपचितकर्म्मफलमनुभवेद्वा, तथा च कृतप्रणाशाकृताभ्यागमप्रसङ्गः । तदुक्तं सिद्धसेनवाक्यकारेण, कृतप्रणाशाकृतकर्म्मभोगभवप्रमोक्षस्मृतिभङ्गदोषान् । उपेक्ष्य साक्षात्क्षणभङ्गमिच्छतो महासाहसिकः परोऽसाविति ॥ किञ्च क्षणिकत्वपक्षे ज्ञानकाले ज्ञेयस्यासत्त्वेन ज्ञेयकाले ज्ञानस्यासत्त्वेन च ग्राह्यग्राहकभावानुपपत्तौ सकललोकयात्रास्तमियात् । न च समसमयवर्त्तिता शङ्कनीया, सव्येतरविषाणवत् कार्यकारणभावासम्भवेन ग्राह्यस्यालम्बनप्रत्ययानुपपत्तेः । अथ भिन्नकालस्यापि तस्याकारार्पकत्वेन ग्राह्यत्वं, तदप्यपेशलं, क्षणिकस्य ज्ञानस्याकारार्पकताश्रयताया दुर्वचत्वेन साकारज्ञानवादे प्रत्यादेशेन निराकारज्ञानवादेऽपि योग्यतावशेन प्रतिकर्म्मव्य-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Moreover, (on your supposition of momentary existence,) as, at the time of the perception (the second moment), the object (of the first moment), does not exist, and similarly at the time of the object's existence, the perception does not exist, there can be no such things as a perceiver and a thing perceived, and consequently the whole course of the world would come to an end. Nor may you suppose that the object and the perception are simultaneous, because this would imply that like the two horns of an animal, they did not stand in the relation of cause and effect, [as this relation necessarily involves succession] and consequently the *Álambana*, or the object's form, would be abolished as one of the four concurrent causes *(pratyaya)*.*

If you say that "the object may still be perceived, inasmuch as it will impress its form on the perception, even though the one may have existed in a different moment from the other," this too will not hold. For if you maintain that the knowledge acquired by perception has a certain form impressed upon it, you are met by the impossibility of explaining how a momentary perception can possess the power of impressing a form; and if you say that it has no form impressed upon it, you are equally met by the fact, that if we are to avoid incongruity, there must be some definite law to determine the perception and knowledge in each several case. Thus by perception the abstract consciousness, which before existed uninfluenced by the external object, becomes modified under the form of a jar, &c., with a definite reference to each man's personality, [i. e. I see the jar], and it is not merely the passive recipient of a reflection like a mirror. Moreover, if the perception only reproduced the form of the object, there would be an end of using such words as 'far,' 'near,' &c. of the objects.* Nor can you accept this conclusion, 'as exactly in accordance with your own views,'—because, in spite of all our logic, the stubborn fact remains that we do use such phrases as 'the mountain is nearer' or 'further,' 'long' or 'large.' Nor may you say that "it is the object (which supplies the form,) that really possesses these qualities of being 'further' &c, and they are applied by a fashion of speech to the perception [though not really belonging to it]," —because we do not find that this is the case in a mirror, [i. e. it does not become a *far* reflection, because it represents a far object.] And again, as the perception produced by an object follows it in assuming the form of blue, so too, if the object be insentient, it ought equally to assume its form and so become itself insentient. And thus, according to the proverb, 'wishing to grow, you have destroyed your root,' and your cause has fallen into hopeless difficulties.

If, in your wish to escape this difficulty, you assert, that "the perception does not follow the object in being insentient,"—then there would be no perception that the object is insentient,† and so it is a case of the proverb, 'while he looks for one thing which he has lost, another drops.' "But what harm will it be, if there is no per-

* I propose to read in p. 26 line 5 infra *gráhyasya for agráhyasya.*

* As they necessarily relate to the perceiver.

† I correct the reading तस्याग्रहणं to तस्या ग्रहणं—*tasyá* being जडताया:

वस्थाया: स्थितत्वात् । तथाहि, प्रत्यक्षेण विषयाकाररहितमेव ज्ञानं प्रतिपुरुषमहमिकया घटादिज्ञानमनुभूयते न तु दर्पणादिवत् प्रतिबिम्बक्रान्तम् । विषयाकारधारित्वेन च ज्ञानस्यार्थे दूरनिकटादिव्यवहाराय जलाञ्जलिर्विधीयेत । न चेदमिष्टापादनमेष्टव्यं, दवीयान् महीधरो नेदीयान् दीर्घो बहुरिति व्यवहारस्य निराबाधं जागरूकत्वात् । नचाकाराधायकस्य तस्य दवीयस्त्वादिशालितया तथा व्यवहार इति कथनीयं दर्पणादौ तथानुपलम्भात् । किञ्चार्थादुपजायमानं ज्ञानं यथा तस्य नीलाकारतामनुकरोति तथा यदि जड़तामपि, तर्ह्यर्थवत् तदपि जड़ं स्यात् । तथा च वृद्धिमिष्टवतो मूलमपि ते नष्टं स्यादिति महत् कष्टमापतम् । अथैतद्दोषपरिजिहीर्षया ज्ञानं जड़तां नानुकरोतीति ब्रूषे, हन्त तर्हि तस्या ग्रहणं न स्यादित्येकमनुसन्धित्सतोऽपरं प्रत्यवत इति न्यायापातः । ननु मा भूज्जड़तायाग्रहणं किं नश्छत्रं तदग्रहणेऽपि नीलाकारग्रहणे तयोर्भेदो नैकान्तो वा भवेत् । नीलाकारग्रहणे चागृहीता जड़ता कथं तस्यानुरूपं स्यात्, अपरथा गृहीतस्य स्तम्भस्याग्

ह्रीतं चैलोक्यमपि रूपं भवेत् । तदेतत् प्रमेयजातं प्रतापचन्द्रप्रभृतिभिरर्हन्मतानुसारिभिः प्रमेयकमलमार्त्तण्डादौ प्रपञ्चितमिति ग्रन्थभूयस्त्वभयाच्चोपन्यस्तम् । तस्मात् पुरुषार्थाभिलाषुकैः पुरुषैः सौगती गतिर्नानुगन्तव्या, अपित्वार्हत्येवार्हणीया । अर्हत्स्वरूपञ्च अर्हच्चन्द्रसूरिभिराप्तनिश्चयालङ्कारे निरटङ्क्षि । सर्व्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वर इति ॥ ननु न कश्चित् पुरुषविशेषः सर्व्वज्ञपदवेदनीयः प्रमाणपद्धतिमध्यास्ते सद्भावबाधकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात्, तथाचोक्तं तौतातिकैः, सर्व्वज्ञो दृश्यते तावच्चेदानीमस्मदादिभिः । दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत् ॥ न चागमविधिः कश्चिच्चित्यसर्व्वज्ञबोधकः । न च तत्रार्थवादानां तात्पर्य्यमपि कल्प्यते ॥ न चान्यार्थप्रधानैस्तैस्तदस्तित्वं विधीयते । न चानुवदितुं शक्यः पूर्व्वमन्यैरबोधितः ॥ अनादेरागमस्यार्थो न च सर्व्वज्ञ आदिमान् । कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ception of a thing's being insentient?" [We reply that] if its being insentient is not perceived, while its blue form is perceived, the two may be quite distinct [and as different from each other as a jar and cloth,] or it may be a case of 'indeterminateness' [so that the two may be only occasionally found together, as smoke with fire.] And again, if insentience is not perceived contemporaneously with the blue form, how could there then be conformity between them [so that both, the blue and the insentience, should together constitute the character of the thing?] We might just as well maintain, that, on perceiving a post, the unperceived universe entered into it as also constituting its character.*

All this collection of topics for proof has been discussed at full length by the Jaina authors, Pratápachandra, and others in the *Prameyakamalamártanda* &c. and is here omitted for fear of swelling the book too much.

Therefore those who wish for the *summum bonum* of man, must not accept the doctrine of Buddha, but rather honour only the Arhata doctrine. This Arhata system has been thus described by Arhachchandra-súri, † in his *Apta-nischayálankára*.

"The divine Arhat is the supreme lord, the omniscient one, who has overcome all faults, desire, &c.—adored by the three worlds, the declarer of things as they are."

But may it not be objected that no such omniscient soul can enter the path of proof, since none of the five affirmative proofs can be found to apply, as has been declared by Tautátika [Bhaṭṭa Kumárila‡]?

1. "No omniscient being is seen by the sense here in this world by ourselves or others; nor is there any part of him seen, which might help us as a sign to infer his existence.

2. "Nor is there any injunction (*vidhi*) of scripture which reveals an eternal omniscient one, nor can the meaning of the explanatory passages (*arthaváda*) be applied here.

3. "His existence is not declared by those passages, which refer to quite other topics; and it cannot be contained in any emphatic repetitions (*anuváda*), as it had never been mentioned elsewhere before.

4. "An omniscient being who had a beginning can never be the subject of the eternal Veda; and how can he be established by a made and spurious Veda?

5. "Do you say that this omniscient one is accepted on his own word? How can you establish either, when they thus both depend on reciprocal support?

6. "The saying is true because it was uttered by one omniscient, and this proves the Arhat's existence; how can either point be established without some previously established foundation?

* I. e. If you say that the *avayava* may be not seen though the *avayavi* is seen, then I may say that the post is the *avayavi* and the unperceived three worlds its *avayava*!

† I read अर्हत्स्वरूपमर्हच्चन्द्र in p. 27. l. 3. infra.

‡ The following passage may occur in some part of Kumárila's writings as a Jaina *púrvapaksha*: but it is curious that in the Sánkara-digvijaya, ch. 55, it is mentioned that Kumárila had a little leaning towards the Jainas at the end of his life. He repented of having so cruelly persecuted them, and acknowledged that there was some truth in their teaching: *Jainagurumukhát kaschid vidyáleśo játah.*

अथ तद्वचनेनैव सर्व्वज्ञोऽन्यैः प्रतीयते । प्रकल्प्येत कथं सिद्धिरन्योन्याश्रययोस्तयोः ॥ सर्व्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता । कथं तदुभयं सिध्येत् सिद्धमूलान्तरादृते ॥ असर्व्वज्ञप्रणीतात् तु वचनान्मूलवर्जितात् । सर्व्वज्ञमवगच्छन्तस्तद्वाक्योक्तं न जानते ॥ सर्व्वज्ञसदृशं किञ्चिद्यदि पश्येम सम्प्रति । उपमानेन सर्व्वज्ञं जानीयाम ततो वयम् ॥ उपदेशोऽपि बुद्धस्य धर्म्माधर्म्मादिगोचरः । अन्यथा नोपपद्येत सार्व्वज्ञ्यं यदि नाभवदित्यादि ॥ अत्र प्रतिविधीयते । यदभ्यधायि सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति, तदयुक्तं,

तत्सद्भावावेदकस्यानुमानादेः सद्भावात् । तथाहि, कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययत्वात्, यद् यद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययं तत् तत्साक्षात्कारि, यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि । तद्ग्रहणस्वभावत्वे सति प्रतीयप्रतिबन्धप्रत्ययश्च कश्चिदात्मा, तस्मात् सकलपदार्थसाक्षात्कारीति । न तावदशेषार्थग्रहणस्वभावत्वमात्मनोऽसिद्धं, चोदनाबलाद्विखिलार्थज्ञानात्, नाप्यन्यथानुपपत्त्या सर्व्वमनेका-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

7. "But they who accept a [supposed] omniscient on the baseless word of a parviscient, know nothing of the meaning of a real omniscient's words."

8. "And again, if we now could see anything like an omniscient being, we might have a chance of recognising him by the [well-known fourth] proof of comparison (*upamána*.)

9. "And the teaching of Buddha [as well as that of Jina], which embraces virtue, vice, &c., would not be established as authoritative, if there were not in him the attribute of omniscience, * and so on."

We reply as follows. As for the supposed contradiction of an Arhat's existence, derived from the failure of the five affirmative proofs,—this is untenable, because there *are* proofs, as inference &c., which *do* establish † his existence. Thus any soul will become omniscient, when (its natural capacity for grasping all objects remaining the same,) the hindrances to such knowledge are done away. Whatever thing has a natural capacity for knowing any object, will, when its hindrances to such knowledge are done away, actually know it, just as the sense of vision cognizes form, directly the hindrances of darkness, &c. are removed. Now there *is* such a soul, which has its hindrances done away, its natural capacity for grasping all things remaining unchanged; therefore there is an omniscient being. Nor is the assertion unestablished that the soul has a natural capacity for grasping all things; for otherwise the Mímánsist could not maintain that a knowledge of all possible cases can be produced by the authoritative injunction of a text,* —nor could there otherwise be the knowledge of universal propositions, such as that in our favourite argument, 'All things are indeterminate from the very fact of their existence,' [and of course a follower of the Nyáya will grant that universal propositions can be known, though he will dispute the truth of this particular one.] Now it is clear that the teachers of the Púrva Mímánsá accept the thesis that the soul has a natural capacity for grasping all things. Since they allow that a knowledge embracing all things can be produced by the discussion of injunctions and prohibitions, as is said [by Sabara in his commentary on the Sútras, I.1.2.], "a precept makes known the past, the present, the future, the minute, the obstructed, the distant &c." Nor can you say that "it is impossible to destroy the obstructions which hinder the soul's knowing all things," because we [Jainas] are convinced that there are certain special means to destroy these obstructions, viz. the three ['gems'], right intention, &c. By this charm, also all inferior assaults of argument can be put to flight.

But the Naiyáyika may interpose, "You talk of the pure intelligence, which, after all hindrances are done away, sees all objects, having sense-perception at its height; but this is irrélevant, because there can be no hindrance to the omniscient, as from all eternity he has been always liberated." We reply that there is no proof of your eternally liberated being. There cannot be an omniscient who is eternally 'liberated,' from the very fact of his being 'liberated,' like other liberated persons,—since the use of the term 'liberated' necessarily implies the having been previously bound; and if the latter is absent, the former, must be too, as is seen in the case of the ether. "But is not this being's exis-

* Kumárila tries to prove that no such being can exist, as his existence is not established by any one of the five recognized proofs,—the sixth, *abhára*, being negative is of course not applicable. I understand the last śloka as showing the inapplicability of 'presumption' or *arthápatti*. A Jaina would say, "if the Arhat were not omniscient, his words would not be true and authoritative, but we see that they are, therefore he is omniscient." He answers by retorting that the same argument might be used of Buddha by a Buddhist; and as the Jaina himself would disallow it in that case, it cannot be convincing in his own.

† In p. 29. 2 read तत्सद्भावावेदकस्य for तत्सद्भावादेकस्य.

* In p. 29. l. 9 for निखिलार्थज्ञानात् नोत्पत्त्य° I propose to read निखिलार्थज्ञानोत्पत्त्य°

न्तात्मकं सदिति व्याप्तिज्ञानोत्पत्तेश्च। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयतीत्येवंजातीयकैरध्वरमीमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम्। न चाखिलार्थप्रतिबन्धकावरणप्रक्षयानुपपत्तिः सम्यग्दर्शनादित्रयलक्षणस्यावरणप्रक्षयहेतुभूतस्य सामग्रीविशेषस्य प्रतीतत्वात्, अनया मुद्रयापि क्षुद्रोपद्रवा विद्राव्याः। नन्वावरणप्रक्षयवशादशेषविषयं विज्ञानं विशदं मुख्यप्रत्यक्षं प्रभवतीत्युक्तं तदयुक्तं तस्य सर्व्वज्ञस्यानादिमुक्तत्वेनावरणस्यैवासम्भवादिति चेत्, तच्च अनादिमुक्तत्वस्यैवासिद्धेः। न सर्व्वज्ञोऽनादिमुक्तो मुक्तत्वादितरमुक्तवत्, बद्धपूर्व्वतया च मुक्तव्यपदेशः, तद्रहिते चास्याप्यभावः स्यादाकाशवत्। नन्वनादेः चित्यादिकार्यपरम्परायाः कर्तृत्वेन तत्सिद्धिः, तथाहि, चित्यादिकं सकर्तृकं कार्यत्वाद् घटवदिति, तदप्यसमीचीनं, कार्यत्वस्यैवासिद्धेः। न च सावयवत्वेन तत्साधनमित्यभिधातव्यं, यस्मादिदं विकल्पजालमवतरति। सावयवत्वं किमवयवसंयो-

tence definitely proved, by his being the maker of that eternal series of effects, the earth &c? According to the well-known argument, 'the earth, &c., must have had a maker, because they have the nature of effects, as a jar." This argument, however, will not hold, because you cannot prove that they have the nature of effects. You cannot establish this from the fact of their being composed of parts, because this supposition falls upon the horns of a dilemma. Does this 'being composed of parts', mean (i.) the being in contact with the parts; or (ii.) 'the being in intimate relation to the parts; or (iii.) the being produced from parts;' or (iv.) the being a substance in intimate relation; or (v.) the being the objects of an idea involving the notion of parts?

Not *the first*, because it would apply too widely as it would include ether, [since this though not itself composed of parts, is in contact with the parts of other things;] nor *the second*, because it would similarly include genus, &c., [as this resides in a substance by intimate relation, and yet itself is not composed of parts;] nor *the third*, because this involves a term ('produced') just as much disputed as the one directly in question*; nor *the fourth*, because its neck is caught in the pillory of the following alternative. Do you mean by your phrase used above, that the having something else in intimate relation to itself is to be the definition of substance,—or do you mean that it must have intimate relation to something else, in order to be valid for your argument? If you say the former, it will equally apply to ether, since this is a substance, and has its qualities resident in it by intimate relation; if you say the latter, your new position involves as much dispute as the original point, since you would have to prove the existence of intimate relation in the parts, or the so-called 'intimate causes,' which you mean by 'something else.' We use these terms in compliance with your terminology; but of course from our point of view we do not allow such a thing as 'intimate relation,' as there is no proof of its existence.

Nor can *the fifth* alternative be allowed, because this would reach too far, as it would include soul, &c., since soul can be the object of an idea involving the notion of parts, and yet it is acknowledged to be not an effect.† Nor can you maintain, that the soul may still be indiscerptible in itself, but by reason of its connection with something possessing parts, may itself become metaphorically the object of an idea involving the notion of parts,—because there is a mutual contradiction in the idea of that which has no parts and that which is all-pervading, just as the atom [which is indiscerptible but not all-pervading.]

And. moreover, is there only one maker? Or, again, is he independent?

* *Janya* is included in *Kárya* and equally disputed.

† Thus 'I am possessed of a body' *(aham Śarīri)*' my hand,' &c,—are all sentences in which a predicate involving the notion of parts is applied to the soul, "I."

गित्वम्, अवयवसमवायित्वम्, अवयवजन्यत्वं, समवेतद्रव्यत्वं, सावयवबुद्धिविषयत्वं वा। न प्रथमः, आकाशादावनैकान्त्यात्। न द्वितीयः, सामान्यादौ व्यभिचारात्। न तृतीयः, साध्याविशिष्टत्वात्। न चतुर्थः, विकल्पयुगलार्गलयहगलत्वात् समवायसम्बन्धमात्रवद्द्रव्यत्वं समवेतद्रव्यत्वम् अन्यत्र समवेतद्रव्यत्वं वा विवक्षितं हेतूक्रियते। आद्ये गगनादौ व्यभिचारः, तस्यापि गुणादिसमवायवत्त्वद्रव्यत्वयोः सम्भवात्। द्वितीये साध्याविशिष्टता, अन्यशब्दार्थेषु समवायिकारणभूतेष्ववयवेषु समवायस्य साधनीयत्वात्। अभ्युपगम्यैतदभाणि, वस्तुतस्तु समवाय एव न समस्ति प्रमाणाभावात्। नापि पञ्चमः, आत्मादिनानैकान्त्यात्, तस्य सावयवबुद्धिविषयत्वेऽपि कार्यत्वाभावात्। न च निरवयवत्वेऽप्यस्य सावयवार्थसम्बन्धेन सावयवबुद्धिविषयत्वमौपचारिकमित्येतद्युक्तं निरवयवत्वे व्यापित्वविरोधात् परमाणुवत्॥ किञ्च किमेकः कर्त्ता साध्यते किं वा स्वतन्त्रः, प्रथमे प्रासादादौ व्यभिचारः, स्यपत्यादीनां बहूनां पुरुषाणां तत्र कर्तृत्वोपलम्भादनेनैव सकलजगज्जननोपपत्तावितरवैयर्थ्यञ्च। तदुक्तं वीतरागस्तुतौ, कर्त्तास्ति नित्यो जगतः स चैकः स सर्वगः सन् स्ववशः स सत्यः। इमाः कुहेवाः * कुविडम्बनाः

* कुहेया इति पाठान्तरम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

In the former case, your position will apply too far, as it will extend erroneously to palaces, &c., where we see for ourselves the work of many different men, as carpenters &c.; and [in the second case] if all the world were produced by this one maker, all other agents would be superfluous. As it has been said in the *Vítarágastuti*, or 'Praise of Jina.'

1. 'There is one eternal maker for the world, all-pervading, independent, and true';—they have none of these inextricable delusions, whose teacher art *thou*." And again,

2 "There is here no maker acting by his own free-will,—else his influence would extend to the making of a mat. What would be the use of yourself or all the artisans, if Íswara fabricates the three worlds?"

Therefore it is right to hold, as we do, that omniscience is produced when the hindrances are removed by the three means before alluded to.

Nor need the objection be made that 'right intention &c.' are impossible, as there is no other teacher to go to,—because this universal knowledge can be produced by the inspired works of former omniscient Jinas. Nor is our doctrine liable to the imputation of such faults as *Anyonyáśrayatá*,* &c.,—because we accept an eternal succession of revealed doctrines and omniscient teachers, like the endless series of seed springing from shoot and shoot from seed. So much for this preliminary discussion.

E. B. C.

* Reasoning in a circle.—I suppose, the &c. includes the *Anavasthá-dosha* or reasoning ad infinitum. He accepts the supposed fault, and holds, that it is actually borne out in a case before everybody's eyes.

स्युस्तेषां न येषामनुशासकस्त्वमिति ॥ अन्यत्रापि । कर्त्ता न तावदिह कोऽपि यथेच्छया वा दृष्टोऽन्यथा कटकृतावपि तत्सङ्गः । कार्यं किमत्र भवतापि च तत्कादौराहृत्य च त्रिभुवनं पुरुषः करोतीति ॥ तस्मात् प्रागुक्तकारणत्रितयबलादावरणप्रक्षये सार्व्वज्ञ्यं युक्तम् । न चास्योपदेष्टृन्तराभावात् सम्यग्दर्शनादित्रितयानुपपत्तिरिति भणनीयं पूर्व्वसर्व्वज्ञप्रणीतागमप्रभवत्वादमुष्याशेषार्थज्ञानस्य । न चान्योन्याश्रयतादिदोषः, आगमसर्व्वज्ञपरम्पराया बीजाङ्कुरवदनादित्वाङ्गीकारादित्यलम् ।

List of books printed and published and for sale by E. J Lazarus and Co., at the Medical Hall Press, Benares.

ATMA PURÁṆA, containing all the principles of Vedántism by ŚANKARÁNAND, with commentary by *Kákárám Pandit*. Rs. 16-0. Published at Ganpat Krihanaji's, Bombay.

THE LAGHU KAUMUDI, a Sanskrit grammar with an English version, commentary and references by Dr. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College. Benares. *Price* 8 *Rs.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Professor Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚAŚTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares, Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚAŚTRI. Rs. 1-4.

VAIŚESHIKA APHORISMS OF KAṆÁDA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADEŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNAVA DHARMA PRAKÁS ARTHAT MANUSMRITI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230 Price, Rs. 5-0-0.

SIDDHÁNTA KAUMUDI VYÁKARAṆ, 8vo. demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 108. Benares, May 1st, 1875. Vol. IX.

काशिकायाः

॥ तृतीयाध्यायस्य चतुर्थः पादः ॥

धातुसंबन्धे प्रत्ययाः ॥ १ ॥

धात्वर्थं धातुशब्दः । धात्वर्थानां संबन्धो धातुसंबन्धः । विशेषणविशेष्यभावः । तस्मिन्सति अयथाकालोक्ता अपि प्रत्ययाः साधवो भवन्ति । अग्निष्टोमयाज्यस्य पुत्रो जनिता । कृतः कटः श्वो भविता । भावि कृत्यमासीत् । अग्निष्टोमयाजीति भूतकालः, जनितेति भविष्यत्कालः, तत्र भूतः कालो भविष्यत्कालेनाभिसंबध्यमानः साधुर्भवति । विशेषणं गुणत्वाद्विशेष्यकालमनुरुध्यते, तेन विपर्ययो न भवति । प्रत्ययाधिकारे पुनः प्रत्ययग्रहणमधात्वधिकारविहिता अपि प्रत्ययास्तद्विहिता धातुसंबन्धे सति कालभेदे साधवो यथा स्युरिति । गोमानासीत् । गोमान्भविता । गावो विद्यन्तेस्येति वर्तमानविहितो मतुबासीद् भवितेति संबन्धादतीते भविष्यति च साधुर्भवति ॥

क्रियासमभिहारे लोट् लोटो हिस्वो वा च तध्वमोः ॥ २ ॥

धातुसंबन्धइति वर्तते । पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः । प्रकृत्यर्थविशेषणं चैतत् । समभिहारविशिष्टक्रियावचनाद्धातोर्लोट् प्रत्ययो भवति, सर्वेषु कालेषु, सर्वलकाराणामपवादः । तस्य च लोटो हि स्व इत्येतावादेशौ भवतः तध्वंभाविनस्तु वा भवतः । योगविभागोत्र कर्तव्यः । क्रियासमभिहारे लोट् भवति । ततो लोटो हिस्वौ । लोडित्येव । लोड्धर्माणौ हिस्वौ भवत इत्यर्थः । तेनात्मनेपदपरस्मैपदत्वं भेदेनावतिष्ठते तिङ्त्वं च भवति । लुनीहिलुनीहीत्येवायं लुनाति । इमौ लुनीतः । इमे लुनन्ति । लुनीहिलुनीहीत्येव त्वं लुनासि । युवां लुनीथः । यूयं लुनीथ । अथ वा लुनीतलुनीतेत्येव यूयं लुनीथ । लुनीहिलुनीहीत्येवाहं लुनामि । आवां लुनीवः । वयं लुनीमः । भूते । लुनीहिलुनीहीत्येवायमलावीत् । अलाविष्टाम् । अलाविषुः । एवं मध्यमोत्तमयोरुदाहार्यम् । भविष्यति । लुनीहिलुनीहीत्येवायं लविष्यति । लविष्यतः । लविष्यन्ति । एवं मध्यमोत्तमयोरुदाहार्यम् । अधीष्वाधीष्वेत्येवायमधीते । इमावधीयाते । इमे ऽधीयते । अधीष्वाधीष्वेत्येव त्वमधीषे । युवामधीयाथे । यूयमधीध्वे । अथ वा अधीध्वमधीध्वमित्येव यूयमधीध्वे । अधीष्वाधीष्वेत्येवाहमधीये । आवामधीवहे । वयमधीमहे । एवं सर्वेष्वेव लकारेषूदाहार्यम् । क्रियासमभिहाराभिव्यक्तौ द्विर्वचनमयं लोडपेक्षते क्रियासमभिहारे द्वे भवत इति । यङ्प्रत्ययः पुनरस्मिन्नेवार्थे विधीयमानः स्वयमेव शक्तत्वाच्चापेक्षते द्विर्वचनम् ॥

समुच्चये ऽन्यतरस्याम् ॥ ३ ॥

अनेकक्रियाध्याहारः समुच्चयः । समुच्चीयमानक्रियावचनाद्धातोरन्यतरस्यां लोट् प्रत्ययो भवति । तस्य लोटो हिस्वावादेशौ भवतः । तध्वंभाविनस्तु वा भवतः । भ्राष्ट्रमट मठमट खदूरमट स्याल्यपिधानमटेत्येवायमटति । इमावटतः । इमे ऽटन्ति । भ्राष्ट्रमट मठमट खदूरमट स्याल्यपिधानमटेत्येव त्वमटसि । युवामटथः । यूयमटथ । अथ वा भ्राष्ट्रमटत मठमटत खदूरमटत स्याल्यपिधानमटतेत्येव यूयमटथ । भ्राष्ट्र-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मट मठमट खदूरमट स्याल्यपिधानमटेत्येवाहमटामि । आवामटावः । वयमटामः । अथ वा भ्राष्ट्रमटति मठमटति खदूरमटति स्याल्यपिधानमटति इत्येवायमटति । इमावटतः । इमे ऽटन्ति । भ्राष्ट्रमटसि मठमटसि खदूरमटसि स्याल्यपिधानमटसि इत्येव त्वमटसि । युवामटथः । यूयमटथ । भ्राष्ट्रमटामि मठमटामि खदूरमटामि स्याल्यपिधानमटामीत्येवाहमटामि । आवामटावः । वयमटामः । छन्दोधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येवायमधीते । इमावधीयाते । इमे ऽधीयते । छन्दोधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येव त्वमधीषे । युवामधीयाथे । यूयमधीध्वे । अथ वा छन्दोधीध्वं व्याकरणमधीध्वं निरुक्तमधीध्वमित्येव यूयमधीध्वे । छन्दोधीष्व व्याकरणमधीष्व निरुक्तमधीष्वेत्येवाहमधीये । आवामधीवहे । वयमधीमहे । अथ वा व्याकरणमधीते छन्दोधीते निरुक्तमधीते इत्येवायमधीते । इमावधीयाते । इमे ऽधीयते । छन्दोधीषे व्याकरणमधीषे निरुक्तमधीषे इत्येव त्वमधीषे । युवामधीयाथे । यूयमधीध्वे । छन्दोधीये व्याकरणमधीये निरुक्तमधीयइत्येवाहमधीये । आवामधीवहे । वयमधीमहे ॥

यथाविध्यनुप्रयोगः पूर्वस्मिन् ॥ ४ ॥

पूर्वस्मिन् लोड्विधाने यथाविध्यनुप्रयोगो भवति । यस्माद्धातोर्लोड्विहितस्स एव धातुरनुप्रयोक्तव्यः । धातुसंबन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव । यथाविध्यर्थं तु वचनम् । तथा चैवोदाहृतम् । लुनीहिलुनीहीत्येवायं लुनातीति । छिनत्तीति नानुप्रयुज्यते । अधीष्वाधीष्वेत्येवायमधीते । पठतीति नानुप्रयुज्यते ॥

समुच्चये सामान्यवचनस्य ॥ ५ ॥

द्वितीये लोड्विधाने समुच्चये सामान्यवचनस्य धातोरनुप्रगः कर्तव्यः । ओदनं भुङ्क्ष्व सक्तूनिव धानाः खादेत्येवायमभ्यवहरति । सर्वविशेषानुप्रयोगनिवृत्त्यर्थं वचनम् । लाघवं च लौकिके शब्दव्यवहारे नाद्रियते । भ्राष्ट्रमट मठमट खदूरमट स्याल्यपिधानमटेत्येवायमटतीत्यत्रापि कारकभेदात् क्रियाभेदे सति सामान्यवचनता सम्भवत्येव ॥

छन्दसि लुङ्लङ्लिटः ॥ ६ ॥

धातुसंबन्धे इत्येव । छन्दसि विषये धातुसंबन्धे सर्वेषु कालेषु लुङ्लङ्लिटः प्रत्यया भवन्ति । अन्यतरस्यामिति वर्त्तते । तेनान्येपि लकारा यथायथं भवन्ति । लुङ् । शकलाङ्कुष्टकोकरत् । अहं तेभ्योकरं नमः । लङ् । अग्निमद्य होतारमवृणीतायं यजमानः । लिट् । अद्या ममार । अद्य म्रियते ॥

लिङर्थे लेट् ॥ ७ ॥

छन्दस्यन्यतरस्यामिति वर्त्तते । लिङर्थे यत्र लिङ्विधीयते विध्यादिर्हेतुहेतुमतोर्लिङित्येवमादिस्तत्र छन्दसि विषये ऽन्यतस्यां लेट् प्रत्ययो भवति । नोषिषत् । तारिषत् । मन्दिषत् । नेता नेषत् । तविषत् । पतति दिद्युत् । उदधिं व्यावयति ॥

उपसंवादाशङ्कयोश्च ॥ ८ ॥

उपसंवादः परिभाषणं, कर्त्तव्ये पणबन्धः । यदि मे भवानिदं कुर्याद् अहमपि भवतइदं दास्यामीति । कारणतः कार्यानुसरणं तर्कं उत्प्रेक्षा आशङ्का । उपसंवादे आशङ्कायां च गम्यमानायां छन्दसि विषये लेट् प्रत्ययो भवति । उपसंवादे । अहमेव पशूनामीशे । मदया एव वो यज्ञा यज्ञान्ते इति । मद्देवत्यान्येव वः पात्राण्युच्यन्ते । आशङ्कायां च । नेन्निन्द्रायन्तो नरकं पताम । निन्द्याचरणेन नरकपात आशङ्क्यते । लिङर्थ एवायं नित्यार्थं तु वचनम् । पूर्वसूत्रे ऽन्यतरस्यामिति वर्त्तते ॥

तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यै अध्यै न्कध्यै कध्यै न्शध्यै शध्यै न्तवैतवेङ्तवेनः ॥ ९ ॥

छन्दसीत्येव । तुमुनो ऽर्थस्तुमर्थः । तत्र छन्दसि विषये धातोः सयादयः प्रत्यया भवन्ति । तुमर्थो भावः कथं ज्ञायते । वचनसामर्थ्यात् । तावदयं कर्तुरुच्यते । न चान्यस्मिन्नर्थे तुमुचादिश्यते । अनिर्दिष्टार्थाश्च प्रत्ययाः स्वार्थं भवन्ति स्वार्थश्च धातूनां भाव एव । से । वहे रायः । सेन् । ता वामेषे रथानाम् । असे । असेन् । क्रत्वे दक्षाय जीवसे । स्वरे विशेषः । क्से । क्सेन् । प्रेषे भगाय । श्रियसे । अध्यै । अध्यै न् । कर्मण्युपाचरध्यै । स्वरे विशेषः । कध्यै । इन्द्राग्नी आहुवध्यै । कध्यै न् । श्रियध्यै । शध्यै । शध्यै न् । पिबध्यै । सह मादयध्यै । तवै । सोममिन्द्राय पातवै । तवेङ् । दशमे मासि सूतवे । तवेन् । स्वर्देवेषु गन्तवे । कर्त्तवे । हर्त्तवे ॥

प्रयै रोहिष्यै अव्यथिष्यै ॥ १० ॥

तुमर्थे छन्दसीत्येव । प्रयै रोहिष्यै अव्यथिष्यै इत्येते शब्दा निपात्यन्ते छन्दसि विषये । प्रपूर्वस्य यातेः कैप्रत्ययः । प्रयै देवेभ्यः । प्रयातुम् । रुहेः इष्यैप्रत्ययः । अपामोषधीनां रोहिष्यै । रोहणाय । व्यथेर्नञ्पूर्वस्य इष्यैप्रत्ययः । अव्यथिष्यै । अव्यथनाय ॥

दृशे विख्ये च ॥ ११ ॥

तुमर्थे छन्दसीत्येव । दृशे विख्ये इत्येतौ छन्दसि विषये निपात्येते । दृशेः के प्रत्ययः । दृशे विश्वाय सूर्यम् । द्रष्टुम् । विख्ये त्वा हरामि । विख्यातुम् ॥

शकि णमुल्कमुलौ ॥ १२ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

छन्दसीत्येव । शक्नोतौ धातावुपपदे छन्दसि विषये तुमर्थे णमुल्कमुल् इत्येतौ प्रत्ययौ भवतः । णकारो वृद्ध्यर्थः । ककारो गुणवृद्धिप्रतिषेधार्थः । लकारः स्वरार्थः । अग्निं वै देवा विभाजं नाशक्नुवन् । विभक्तुमित्यर्थः । अपलुपं नाशक्नुवन् । अपलोप्तुमित्यर्थः ॥

ईश्वरे तोसुन्कसुनौ ॥ १३ ॥

तुमर्थे छन्दसीत्येव । ईश्वरशब्दउपपदे छन्दसि विषये तुमर्थे धातोस्तोसुन्कसुन्प्रत्ययौ भवतः । ईश्वरोभिचरितोः । अभिचरितुमित्यर्थः । ईश्वरो विलिखः । विलिखितुमित्यर्थः । ईश्वरो वितृदः । वितर्दितुमित्यर्थः ॥

कृत्यार्थे तवैकेन्केन्यत्वनः ॥ १४ ॥

छन्दसीत्येव । कृत्यानामर्थो भावकर्मणी । तस्मिन् कृत्यार्थे छन्दसि विषये तवै केन् केन्य त्वन् इत्येते प्रत्यया भवन्ति । अन्वेतवै । अन्वेतव्यम् । परिधातवै । परिधातव्यम् । केन् । नावगाहे । नावगाहितव्यम् । केन्य । दिदृक्षेण्यः । शुश्रूषेण्यः । दिदृक्षितव्यम् । शुश्रूषितव्यम् । त्वन् । कर्त्वं हविः । कर्त्तव्यम् । तुमर्थे छन्दसीति सयादिसूत्रेपि तवै विहितः । तस्य तुमर्थादन्यत्र कारके विधिर्द्रष्टव्यः ॥

क्त्वचत्ते च ॥ १५ ॥

कृत्यार्थे छन्दसीत्येव । अवपूर्वाच्चक्षिङ एशप्रत्ययो निपात्यते । नावचक्षे । नावख्यातव्यमित्यर्थः ॥

भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् ॥ १६ ॥

कृत्यार्थइति निवृत्तम् । तुमर्थइति वर्त्तते । प्रकृत्यर्थविशेषणं भावलक्षणग्रहणम् । भावो लक्ष्यते येन तस्मिंश्च वर्त्तमानेभ्यः स्थादिभ्यो धातुभ्यश्छन्दसि विषये तुमर्थे तोसुन्प्रत्ययो भवति । आ संस्थातोर्वेद्यां सीदन्ति । आ समाप्तेः सीदन्तीत्यर्थः । इण् । पुरा सूर्यस्योदेतोराधेयः । कृञ् । पुरा वत्सानामपाकर्त्तोः । वदि । पुरा प्रवदितोराग्नौ प्रहोतव्यम् । चरि । पुरा प्रचरितोराग्नीध्रे होतव्यम् । हु । आ होतोरप्रमत्तस्तिष्ठति । तमि । आ तमितोरासीत । जनि । आ विजनितोः संभवामेति ॥

स्तृपितृदोः कसुन् ॥ १७ ॥

भावलक्षणे छन्दसीति वर्त्तते । स्तृपितृदोर्द्धात्वोर्भावलक्षणेर्थे वर्त्तमानयोश्छन्दसि विषये तुमर्थे कसुन्प्रत्ययो भवति । पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जतृभ्य आतृदः ॥

अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥ १८ ॥

छन्दसि भावलक्षणइति सर्वं निवृत्तम् । अलं खलु इत्येतयोः प्रतिषेधवाचिनोरुपपदयोर्धातोः क्त्वा प्रत्ययो भवति प्राचामाचार्याणां मतेन । अलं कृत्वा । खलु कृत्वा । अलं बाले ऽदित्वा । अलंखल्वोरिति किम् । मा कार्षीः । प्रतिषेधयोरिति किम् । अलंकारः । प्राचांग्रहणं विकल्पार्थम् । अलं रोदनेन । वासरूपविधिश्चेत्यूङर्थम् ॥

उदीचां माङो व्यतीहारे ॥ १९ ॥

क्त्वा तु वर्त्तते । माङो धातोर्व्यतीहारे वर्त्तमानादुदीचामाचार्याणां मतेन क्त्वा प्रत्ययो भवति । अपमित्य याचते । अपमित्य हरति । अपूर्वकालत्वादप्राप्तः क्त्वा विधीयते । उदीचांग्रहणात्तु यथाप्राप्तमपि भवति । याचित्वा ऽपमयते । हृत्वा ऽपमयते । मेङः कृतात्वस्यायं निर्द्देशः कृतो ज्ञापनार्थो नानुबन्धकृतमनेजन्तत्वमिति, तेन दाधा घ्वदाबिति दैपोपि प्रतिषेधो भवति ॥

परावरयोगे च ॥ २० ॥

परावराभ्यां योगः परावरयोगः । परेण पूर्वस्य योगे गम्यमाने अवरेण च परस्य धातोः क्त्वा प्रत्ययो भवति । परेण तावत् । अप्राप्य नदीं पर्वतः स्थितः । परनदीयोगेन पर्वतो विशेष्यते । अपरयोगे । अतिक्रम्य तु पर्वतं नदी स्थिता । अवरपर्वतयोगेन नदी विशिष्यते ॥

समानकर्तृकयोः पूर्वकाले ॥ २१ ॥

समानः कर्त्ता ययोर्द्धात्वर्थयोस्तत्र पूर्वकाले धात्वर्थे वर्त्तमानाद्धातोः क्त्वा प्रत्ययो भवति । शक्तिशक्तिमतोर्भेदस्याविवक्षितत्वात् समानकर्तृकता । भुक्त्वा व्रजति । पीत्वा व्रजति । द्विवचनमतन्त्रम् । खात्वा पीत्वा भुक्त्वा दत्त्वा व्रजति । समानकर्तृकयोरिति किम् । भुञ्जति ब्राह्मणे गच्छति देवदत्तः । पूर्वकाले इति किम् । व्रजति च जल्पति च ॥ आस्यं व्यादाय स्वपिति संमील्य हसतीत्युपसंख्यानमपूर्वकालत्वात् ॥ * ॥

आभीक्ष्ण्ये णमुल् च ॥ २२ ॥

समानकर्तृकयोः पूर्वकाल इत्येव । आभीक्ष्ण्यं पौनःपुन्यम् । प्रकृत्यर्थविशेषणं चैतत् । आभीक्ष्ण्यविशिष्टेर्थे वर्त्तमानाद्धातोर्णमुल्प्रत्ययो भवति । चकारात् क्त्वा च । द्विर्वचनसहितौ क्त्वाणमुलावाभीक्ष्ण्यं द्योतयतः न केवलौ । आभीक्ष्ण्ये द्वे भवत इत्युपसंख्यानाद् द्विर्वचनम् । भोजंभोजं व्रजति । भुक्त्वाभुक्त्वा व्रजति । पायंपायं व्रजति ॥

न यद्यनाकाङ्क्षे ॥ २३ ॥

यच्छब्दउपपदे धातोः क्त्वाणमुलौ प्रत्ययौ न भवतो ऽनाकाङ्क्षे वाक्ये । यत्र ते पूर्वोत्तरे क्रिये स्तस्तच्चेद्वाक्यं न परं किं चिदाकाङ्क्षतीति । णमुलनन्तरः, क्त्वा तु पूर्वसूत्रविहि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तोपि प्रतिषिध्यते । यदयं भुङ्क्ते ततः पचति । यदयमधीते ततः शेते । अनाकाङ्क्षइति किम् । यदयं भुक्त्वा व्रजति अधीतएव ततः परम् ॥

विभाषाग्रेप्रथमपूर्वेषु ॥ २४ ॥

अप्राप्तविभाषेयम् । आभीक्ष्ण्यइति नानुवर्त्तते । अग्रे प्रथम पूर्व इत्येतेषूपपदेषु समानकर्तृकयोः पूर्वकाले धातोः क्त्वाणमुलौ प्रत्ययौ विभाषा भवतः । अग्रे भोजं व्रजति । अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति । प्रथमं भुक्त्वा व्रजति । पूर्वं भोजं व्रजति । पूर्वं भुक्त्वा व्रजति । विभाषाग्रहणमेताभ्यां मुक्ते लडादयोपि यथा स्युः । अग्रे भुङ्क्ते ततो व्रजति । ननु च वासरूप इति भविष्यति, क्त्वाणमुलौ यत्र सह विधीयेते तत्र वासरूपविधिर्नास्तीत्येतदनेन ज्ञाप्यते । तेनाभीक्ष्ण्ये लडादयो न भवन्ति । उपपदसमासः कस्माच्च क्रियते । उक्तं तत्रैवकारस्य प्रयोजनम् अग्रमेव यत्तुल्यविधानमुपपदं तत्समस्यते नान्यदिति ॥

कर्मण्याक्रोशे कृञः खमुञ् ॥ २५ ॥

कर्मण्युपपदे कृञो धातोः खमुञ् प्रत्ययो भवति आक्रोशे गम्यमाने । चोरंकारमाक्रोशति । चोरोसि दस्युरसि इत्याक्रोशति । चोरकरणमाक्रोशसंपादनार्थमेव न त्वसौ चोरः क्रियते ॥

स्वादुमि णमुल् ॥ २६ ॥

समानकर्तृकयोः पूर्वकाले कृञ इति चानुवर्त्तते । स्वादुमीत्यर्थग्रहणम् । स्वादुर्थेषूपपदेषु कृञो णमुल् प्रत्ययो भवति । स्वादुंकारं भुङ्क्ते । संपचंकारं भुङ्क्ते । लवणंकारम् । स्वादुमीति मकारान्तनिपातनमीकाराभावार्थं, स्वन्तस्यापि मकारार्थं दीर्घाभावार्थं च । अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते । वासरूपेण क्त्वापि भवति । स्वादुं कृत्वा भुङ्क्ते । तुमर्थाधिकाराच्च सर्वेएते भावे प्रत्ययाः । यद्येवं स्वादुंकारं भुङ्क्ते देवदत्त इति णमुला कर्त्तुरनभिहितत्वात्कर्त्तरि कस्मात्तृतीया न भवति । भुजिप्रत्ययेनाभिहितः कर्त्ता । न चास्मिन्प्रकरणे शक्तिशक्तिमतोर्भेदो विवक्ष्यते । समानकर्तृत्वं हि विरुध्यते । प्रधानशक्त्यभिधाने वा गुणशक्तिरभिहितवत्प्रकाशते ॥

अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ २७ ॥

कृञ इत्येव । अन्यथादिषूपपदेषु कृञो णमुल् प्रत्ययो भवति सिद्धाप्रयोगश्चेत्करोतेर्भवति । कथं पुनरसौ सिद्धाप्रयोगः । निरर्थकत्वाच्च प्रयोगमर्हतीति एवमेव प्रयुज्यते । अन्यथा भुङ्क्तइति यावानर्थस्तावानेवान्यथाकारं भुङ्क्तइति गम्यते । अन्यथाकारं भुङ्क्ते । एवंकारं भुङ्क्ते । कथंकारं भुङ्क्ते । इत्थंकारं भुङ्क्ते । सिद्धाप्रयोग इति किम् । अन्यथा कृत्वा शिरो भुङ्क्ते ॥

यथातथयोरसूयाप्रतिवचने ॥ २८ ॥

कृञः सिद्धाप्रयोग इति वर्त्तते । यथातथाशब्दयोरुपपदयोः कृञो णमुल् प्रत्ययो भवति असूयाप्रतिवचने गम्यमाने । *यद्यसूयन् पृच्छति प्रतिवक्ति तत्र प्रतिवचनं, यथाकारमहं भोक्ष्ये तथाकारमहं किं तवानेन । असूयाप्रतिवचनइति किम् । यथा कृत्वा ऽहं भोक्ष्ये तथा त्वं द्रक्ष्यसि । सिद्धाप्रयोग इत्येव । यथा कृत्वा ऽहं शिरो भोक्ष्ये किं तवानेन ॥

कर्मणि दृशिविदोः साकल्ये ॥ २९ ॥

कर्मण्युपपदे साकल्यविशिष्टे ऽर्थे दृशिविदोर्धातोर्णमुल् प्रत्ययो भवति । कन्यादर्शं वरयति । यायाः कन्याः पश्यति तास्ता वरयतीत्यर्थः । ब्राह्मणवेदं भोजयति । यंयं ब्राह्मणं जानाति लभते विचारयति वा तान्सर्वान् भोजयतीत्यर्थः । साकल्यइति किम् । ब्राह्मणं दृष्ट्वा भोजयति ॥

यावति विन्दजीवोः ॥ ३० ॥

यावच्छब्दउपपदे विन्दतेर्जीवतेश्च णमुल् प्रत्ययो भवति । यावद्वेदं भुङ्क्ते । यावल्लभते तावद्भुङ्क्तइत्यर्थः । यावज्जीवमधीते । यावज्जीवति तावदधीतइत्यर्थः ॥

चर्मोदरयोः पूरेः ॥ ३१ ॥

कर्मणीत्येव । चर्मोदरयोः कर्मणोरुपपदयोः पूरयतेर्णमुल् प्रत्ययो भवति । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ॥

वर्षप्रमाणऊलोपश्चास्यान्यतरस्याम् ॥ ३२ ॥

कर्मणीत्येव । पूरयतेर्धातोर्णमुल् प्रत्ययो भवति, ऊलोपश्चास्य पूरयतेरन्यतरस्यां भवति समुदायेन चेद्वर्षस्य प्रमाणमियत्ता गम्यते । गोष्पदपूरं वृष्टो देवः । गोष्पदं वृष्टो देवः । सीतापूरं वृष्टो देवः । सीताप्रं वृष्टो देवः । अस्यग्रहणं किमर्थम् । उपपदस्य मा भूत् । मूषिकाबिलपूरं वृष्टो देवः । मूषिकाबिलप्रम् ॥

चेले क्नोपेः ॥ ३३ ॥

कर्मणि इत्येव । क्नूयी शब्दे उन्दने च । अस्माण्ण्यन्ताद्धातोश्चेलार्थेषु कर्मसु उपपदेषु णमुल् प्रत्ययो भवति वर्षप्रमाणे गम्यमाने । चेलक्नोपं वृष्टो देवः । वस्त्रक्नोपं, वसनक्नोपम् ॥

निम्मूलसम्मूलयोः कषः ॥ ३४ ॥

कर्मणीत्येव । निम्मूलसम्मूलशब्दयोः कर्मवाचिनोरुपपदयोः कषेर्धातोर्णमुल् प्रत्ययो भवति । निम्मूलकाषं कषति । सम्मूल-

* असूया ज्ञमेति पुस्तकान्तरे ऽधिकम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कार्षं कषति । निर्मूलं कषतीत्यर्थः । इतः प्रभृति कषादीन्यान्वक्ष्यति तत्र कषादिषु यथाविध्यनुप्रयोग इति ॥

शुष्कचूर्णरूक्षेषु पिषः ॥ ३५ ॥

कर्मणीत्येव । शुष्कादिषु कर्मवाचिषूपपदेषु पिषेर्द्वितीयान्तात् णमुल् प्रत्ययो भवति । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । चूर्णपेषं पिनष्टि । चूर्णं पिनष्टीत्यर्थः । रूक्षपेषं पिनष्टि । रूक्षं पिनष्टीत्यर्थः ॥

समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥ ३६ ॥

कर्मणीत्येव । समूल अकृत जीव इत्येतेषु शब्देषु कर्मसूपपदेषु यथासंख्यं हन् कृञ् ग्रह इत्येतेभ्यो धातुभ्यो णमुल् प्रत्ययो भवति । समूलघातं हन्ति । समूलं हन्तीत्यर्थः । अकृतकारं करोति । जीवग्राहं गृह्णाति ॥

करणे हनः ॥ ३७ ॥

करणउपपदे हन्तेर्द्वितीयान्तात् णमुल् प्रत्ययो भवति । पाणिघातं वेदिं हन्ति । पादघातं भूमिं हन्ति । हिंसार्थानां च समानकर्मकाणामिति णमुलं वक्ष्यति । अहिंसार्थोयमारम्भः । नित्यसमासार्थो वा यथाविध्यनुप्रयोगार्थश्च ॥ पूर्वविप्रतिषेधेन हन्तेर्हिंसार्थस्यापि प्रत्ययोनेनैवेष्यते ॥ असिघातं हन्ति । शरघातं हन्ति ॥

स्नेहने पिषः ॥ ३८ ॥

करणइत्येव । स्निह्यते येन तत् स्नेहनम् । स्नेहनवाचिनि करणउपपदे पिषेर्द्वितीयान्तात् णमुल् प्रत्ययो भवति । उदपेषं पिनष्टि । तैलपेषं पिनष्टि । तैलेन पिनष्टीत्यर्थः ॥

हस्ते वर्त्तिग्रहेः ॥ ३९ ॥

करणइत्येव । हस्तइत्यर्थग्रहणम् । वर्त्तिर्यन्तः । हस्तवाचिनि करणउपपदे वर्त्तयतेर्ग्रहेश्च णमुल् प्रत्ययो भवति । हस्तेन वर्त्तयति । हस्तवर्त्तं वर्त्तयति । करवर्त्तम् । पाणिवर्त्तम् । ग्रहेः खल्वपि । हस्तेन गृह्णाति । हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् ॥

स्वे पुषः ॥ ४० ॥

करणइत्येव । स्वइत्यर्थग्रहणम् । स्ववाचिनि करणे उपपदे पुषेर्धातोर्णमुल्प्रत्ययो भवति । आत्मीयज्ञातिधनवचनः स्वशब्दः । स्वपोषं पुष्णाति । आत्मपोषम् । गोपोषम् । पितृपोषम् । मातृपोषम् । धनपोषम् । रैपोषम् ॥

अधिकरणे बन्धः ॥ ४१ ॥

अधिकरणवाचिन्युपपदे बध्नातेर्द्वितीयान्तात् णमुल्प्रत्ययो भवति । चक्रबन्धं बध्नाति । कूटबन्धं बध्नाति । मुष्टिबन्धं बध्नाति । चोरकबन्धं बध्नाति । चोरके बध्नातीत्यर्थः ॥

संज्ञायाम् ॥ ४२ ॥

संज्ञायां विषये बध्नातेर्द्वितीयान्तात् णमुल्प्रत्ययो भवति । क्रोञ्चबन्धं बध्नाति । मयूरिकाबन्धं बध्नाति । मयूरिकाबन्धं बद्धः । अट्टालिकाबन्धं बद्धः । बन्धविशेषाणां नामधेयान्येतानि ॥

कर्त्रोर्जीवपुरुषयोर्नशिवहेः ॥ ४३ ॥

जीवपुरुषयोः कर्त्तृवाचिनोरुपपदयोर्यथासंख्यं नशिवहेर्द्वितीयान्तात् णमुल् प्रत्ययो भवति । जीवनाशं नश्यति । जीवो नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः । कर्त्तरीति किम् । जीवेन नष्टः । पुरुषेणोढः ॥

ऊर्ध्वे शुषिपूरोः ॥ ४४ ॥

कर्त्तृग्रहणमनुवर्त्तते । ऊर्ध्वशब्दे कर्त्तृवाचिन्युपपदे शुषिपूरोर्द्वितीयान्तात् णमुल् प्रत्ययो भवति । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वं शुष्यतीत्यर्थः । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वं पूर्यतइत्यर्थः ॥

उपमाने कर्मणि च ॥ ४५ ॥

उपमीयते ऽनेनेत्युपमानम् । उपमाने कर्मण्युपपदे चकारात्कर्त्तरि धातोर्णमुल् प्रत्ययो भवति । घृतनिधायं निहितः । घृतमिव निहित इत्यर्थः । सुवर्णनिधायं निहितः । सुवर्णमिव निहितः । कर्त्तरि खल्वपि । अजकनाशं नष्टः । अजकइव नष्टः । चूडकनाशम् । दन्तनाशम् ॥

कषादिषु यथाविध्यनुप्रयोगः ॥ ४६ ॥

निर्मूलसमूलयोरित्येतदारभ्य कषादयः । एतेषु यथाविध्यनुप्रयोगो भवति । यस्माद्धातोर्णमुल् प्रत्ययो भवति स एवानुप्रयोक्तव्यः । ननु धातुसंबन्धे प्रत्ययविधानादनुप्रयोगः सिद्ध एव, यथाविधीति नियमार्थं वचनम् । तथा चैवोदाहृतम् ॥

उपदंशस्तृतीयायाम् ॥ ४७ ॥

दंश दशने । अस्माद्धातोरुपपूर्वात्तृतीयान्तउपपदे णमुलप्रत्ययो भवति । मूलकोपदंशं भुङ्क्ते । मूलकेनोपदंशम् । आर्द्रकोपदंशम् । आर्द्रकेणोपदंशम् । अत्र विकल्पेनोपपदसमासस्तृतीयाप्रभृतीन्यन्यतरस्यामिति । मूलकादि चोपदंशः कर्म । भुजेः करणम् । सर्वस्मिंश्चैतत्र णमुलप्रकरणे सति क्रियाभेदे वासरूपविधिना क्त्वापि भवति । मूलकेनोपदंश्य भुङ्क्ते ॥

हिंसार्थानां च समानकर्मकाणाम् ॥ ४८ ॥

तृतीयायामित्येव । हिंसा प्राण्युपघातः । तदर्थानां धातूनामनुप्रयोगधातुना समानकर्मकाणां तृतीयान्तउपपदे णमुल् प्रत्ययो भवति । दण्डोपघातं गाः कालयति । दण्डेनोपघातम् । दण्डताडम् । दण्डेन ताडम् । समानकर्मकाणामिति किम् । चोरं दण्डेनोपहत्य गोपालको गाः कालयति ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सप्तम्यां चोपपीडरुधकर्षः ॥ ४९ ॥

उपशब्दः प्रत्येकमभिसंबध्यते । उपपूर्वेभ्यः पीडरुधकर्षेभ्यः सप्तम्यन्तउपपदे चकारात्तृतीयान्तउपपदे णमुल् प्रत्ययो भवति । पार्श्वोपपीडं शेते । पार्श्वयोरुपपीडम् । पार्श्वाभ्यामुपपीडम् । व्रजेपरोधं गाः स्थापयति । व्रजे उपरोधम् । व्रजेनोपरोधम् । पाण्युपकर्षं धानाः संगृह्णाति । पाणावुपकर्षम् । पाणिनोपकर्षम् । कर्षतेरिदं ग्रहणं न कृषतेः ॥

समासत्तौ ॥ ५० ॥

सप्तम्यां तृतीयायामिति वर्त्तते । समासत्तिः सन्निकर्षः । समासत्तौ गम्यमानायां तृतीयासप्तम्योरुपपदयोर्ह्वातिर्णमुल् प्रत्ययो भवति । केशेषाहं युद्धन्ते । केशेषु याहम् । केशैर्याहम् । हस्तयाहम् । हस्तेषु याहम् । हस्तैर्याहम् । युद्धसंरम्भादत्यन्तं सन्निकृष्यन्तइत्यर्थः ॥

प्रमाणे च ॥ ५१ ॥

तृतीयासप्तम्योरित्येव । प्रमाणमायामः दैर्घ्यम् । प्रमाणे गम्यमाने तृतीयासप्तम्योरुपपदयोर्ह्वातिर्णमुल् प्रत्ययो भवति । द्व्यङ्गुलेोत्कर्षं खण्डिकां छिनत्ति । द्व्यङ्गुले उत्कर्षं, द्व्यङ्गुलेनोत्कर्षम् । व्यङ्गुलोत्कर्षम् ॥

अपादाने परीप्सायाम् ॥ ५२ ॥

परीप्सा त्वरा । परीप्सायां गम्यमानायामपादानउपपदे धातोर्णमुल् प्रत्ययो भवति । शय्योत्थायं धावति । शय्याया उत्थाय । एवं नाम त्वरते यदवश्यं कर्त्तव्यमपि नापेक्षते । शय्योत्थानमात्रमाद्रियते । रन्धापकर्षं पयः पिबति । भ्राष्ट्रापकर्षमपूपान् भक्षयति । परीप्सायामिति किम् । आसनादुत्थाय गच्छति ॥

द्वितीयायां च ॥ ५३ ॥

परीप्सायामित्येव । द्वितीयान्तउपपदे परीप्सायां गम्यमानायां धातोर्णमुल् प्रत्ययो भवति । यष्टिंयाहं युध्यन्ते । यष्टिं याहम् । लोष्टंयाहम् । लोष्टं याहम् । एवं नाम त्वरते यदायुधग्रहणमपि नाद्रियते । लोष्टादिकं यत्किंचिदासन्नं तद्गृह्णाति ॥

स्वाङ्गे ऽध्रुवे ॥ ५४ ॥

द्वितीयायामित्येव । अध्रुवे स्वाङ्गवाचिनि द्वितीयान्तउपपदे धातोर्णमुल् प्रत्ययो भवति । अक्षिनिकाणं जल्पति । भ्रूक्षेपं कथयति । अध्रुवइति किम् । उत्क्षिप्य शिरः कथयति । यस्मिन्नङ्गे क्षिप्तेऽपि प्राणी न म्रियते तदध्रुवम् । अद्रवं प्रवृत्तिमत्स्वाङ्गम् ॥

परिक्लिश्यमाने च ॥ ५५ ॥

स्वाङ्गे द्वितीयायामित्येव । परिक्लिश्यमाने स्वाङ्गवाचिनि द्वितीयान्तउपपदे धातोर्णमुल् प्रत्ययो भवति । परिक्लेशः सर्वतो बाधनम्, दुःखनम् । उरःपेषं युद्धन्ते । उरःप्रतिपेषं युद्धन्ते । शिरःपेषम् । शिरःप्रतिपेषम् । कृत्वमुरः पीडयन्तो युध्यन्ते । ध्रुवार्थोयमारम्भः ॥

विश्रिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ॥ ५६ ॥

द्वितीयायामित्येव । द्वितीयान्तउपपदे विश्यादिभ्यो धातुभ्यो णमुल् प्रत्ययो भवति व्याप्यमाने आसेव्यमाने चार्थे गम्यमाने । विश्यादिभिः क्रियाभिरनवयवेन पदार्थानां संबन्धो व्याप्तिः । तात्पर्यमासेवा । द्रव्ये व्याप्तिः, क्रियायामासेवा । गेहानुप्रवेशमास्ते । समासेन व्याप्त्यासेवयोरुक्तत्वाच्चत्वद्वीप्सयोरिति द्विर्वचनं न भवति । असमासपक्षे तु व्याप्यमानतायां द्रव्यवचनस्य द्विर्वचनम्, आसेव्यमानतायान्तु क्रियावचनस्य । तथा च वक्ष्यति । सुप्सु वीप्सा, तिङ्सु नित्यमेति । गेहंगेहमनुप्रवेशमास्ते । आसेवायाम् । गेहमनुप्रवेशमनुप्रवेशमास्ते । पति । गेहानुप्रपातमास्ते । गेहंगेहमनुप्रपातमास्ते । गेहमनुप्रपातमनुप्रपातमास्ते । पदि । गेहानुप्रपादमास्ते । गेहंगेहमनुप्रपादम् । गेहमनुप्रपादमनुप्रपादम् । स्कन्दि । गेहावस्कन्दमास्ते । गेहंगेहमवस्कन्दम् । गेहमवस्कन्दमवस्कन्दम् । व्याप्यमानासेव्यमानयोरिति किम् । गेहमनुप्रविश्य भुङ्क्ते । ननु चाभीक्ष्ण्ये णमुल्विहित एव । आसेवा चाभीक्ष्ण्यमेव । किमर्थमुनरासेवायां णमुलुच्यते । त्वानिवृत्त्यर्थमिति चेत् । न, दृष्टत्वात्तस्य । द्वितीयेोपपदार्थं तर्हि वचनम् । उपपदसमासः पक्षे यथा स्यात् । तेन हि सत्युपपदाभावः ॥

अस्यतितृषोः क्रियान्तरे कालेषु ॥ ५७ ॥

द्वितीयायामित्येव । क्रियान्तरयति क्रियान्तरः, क्रियाव्यवधायकः । क्रियान्तरे धात्वर्थे वर्त्तमानाभ्यामस्यतितृषिभ्यां द्वितीयान्तेषु कालवाचिषूपपदेषु णमुलप्रत्ययो भवति । द्व्यहात्यासं गाः पाययति । द्व्यहमत्यासं गाः पाययति । व्यहात्यासं गाः पाययति । द्व्यहतर्षं गाः पाययति । द्व्यहं तर्षं गाः पाययति । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । विच्छिद्यते । अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः । अस्यतितृषोरिति किम् । द्व्यहमुषोष्य भुङ्क्ते । क्रियान्तरइति किम् । अहरत्यस्यैषून् गतः । न गतिर्व्यवधीयते । कालेष्विति किम् । योजनमत्यस्य गाः पाययति । अध्वकर्मकमत्यसनं व्यवधायकं न कालकर्मकम् ॥

नाम्न्यादिशिग्रहोः ॥ ५८ ॥

द्वितीयायामित्येव । नामशब्दे द्वितीयान्तउपपदे आदिशे-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

र्यहेश्च धातोर्णमुल्प्रत्ययो भवति । नामादेशमाचष्टे । नामयाहमाचष्टे ॥

अव्यये ऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ॥ ५९ ॥

* अव्ययउपपदे ऽयथाभिप्रेताख्याने गम्यमाने करोतेः क्त्वाणमुलौ भवतः । ब्राह्मण पुत्रस्ते जातः, किं तर्हि वृषलो नीचैःकृत्याचष्टे । नीचैः कृत्वा । नीचैःकारम् । उच्चैश्चाम प्रियमाख्येयम् । ब्राह्मण कन्या ते गर्भिणी, किं तर्हि वृषलोच्चैःकृत्याचष्टे । उच्चैः कृत्वा । उच्चैः कारम् । नीचैश्चामाप्रियमाख्येयम् । अयथाभिप्रेताख्यानइति किम् । उच्चैः कृत्वा ऽऽचष्टे पुत्रस्ते जात इति । क्त्वा यहणं किम् । यावता सर्वस्मिन्नेवात्र प्रकरणे वासरूपेण क्त्वा भवतीत्युक्तम् । समासार्थं वचनम् । तथा च क्त्वा चेत्यस्मिन्सूत्रे तृतीयाप्रभृतीन्यन्यतरस्यामिति वर्त्तते । णमुलधिकारे पुनर्णमुलयहणं तुल्यकक्षत्वज्ञापनार्थम् । तेनोत्तरत्र द्वयोरप्यनुवृत्तिर्भविष्यति ॥

तिर्यच्यपवर्गे ॥ ६० ॥

तिर्यक्शब्दउपपदे कृञः क्त्वाणमुलौ प्रत्ययौ भवतो ऽपवर्गे गम्यमाने । अपवर्गः समाप्तिः । तिर्यक्कृत्य गतः । तिर्यक् कृत्वा गतः । तिर्यक्कारं गतः । समाप्य गत इत्यर्थः । अपवर्गइति किम् । तिर्यक्कृत्वा काष्ठं गतः । तिर्यचीति शब्दानुकरणम् । न च प्रकृतिवदनुकरणेन भवितव्यम् । अनुक्रियमाणरूपविनाशप्रसङ्गात् । एतदेव, अदसोमादिति ॥

स्वाङ्गे तस्प्रत्यये कृञ्वोः ॥ ६१ ॥

तस्प्रत्ययो यतः स्वाङ्गात्तदेवमुच्यते । तस्प्रत्यये स्वाङ्गवाचिन्युपपदे करोतेर्भवतेश्च धात्वोः क्त्वाणमुलौ प्रत्ययौ भवतः । यथासंख्यमत्र नेष्यते । अस्वरितत्वात् । मुखतःकृत्य गतः । मुखतः कृत्वा गतः । मुखतःकारं गतः । पृष्ठतःकृत्य गतः । पृष्ठतः कृत्वा गतः । पृष्ठतःकारं गतः । मुखतोभूय तिष्ठति । मुखतो भूत्वा तिष्ठति । मुखतोभावं तिष्ठति । पृष्ठतोभूय गतः । पृष्ठतो भूत्वा । पृष्ठतोभावम् । स्वाङ्गइति किम् । सर्वतः कृत्वा गतः । तस्यहणं किम् । मुखीकृत्य गतः । मुखीभूय गतः । प्रत्ययग्रहणं किम् । मुखे तस्थतीति मुखतः । मुखतः कृत्वा गतः ॥

नाधार्थप्रत्यये च्व्यर्थे ॥ ६२ ॥

नार्थो धार्थश्च प्रत्ययो यस्मात्स एवमुच्यते । नाधार्थप्रत्यये शब्दे च्व्यर्थउपपदे कृभ्वोर्धात्वोः क्त्वाणमुलौ प्रत्ययौ भवतः । अनाना नाना कृत्वा गतः, नानाकृत्य गतः । नाना कृत्वा गतः । नानाकारं गतः । विनाकृत्य गतः । विना कृत्वा गतः । विनाकारं गतः । नानाभूय गतः । नाना भूत्वा गतः । नानाभावं गतः । विनाभूय गतः । विना भूत्वा गतः । विनाभावं गतः । द्विधाकृत्य गतः । द्विधाकारं गतः । द्विधा कृत्वा तः । द्विधाभूय गतः । द्विधा भूत्वा गतः । द्विधाभावं गतः । द्वैधंकृत्य गतः । द्वैधं कृत्वा गतः । द्वैधंकारं गतः । द्वैधं भूय गतः । द्वैधं भूत्वा गतः । द्वैधंभावं गतः । प्रत्ययग्रहणं किम् । हिरुक् कृत्वा । पृथक् कृत्वा । च्व्यर्थइति किम् । नाना कृत्वा काष्ठानि गतः । धार्थमर्थग्रहणं, ना पुनरेक एव विनञ्भ्यां नानाञाविति ॥

तूष्णीमि भुवः ॥ ६३ ॥

तूष्णींशब्दउपपदे भवतेर्धातोः क्त्वाणमुलौ प्रत्ययौ भवतः । तूष्णींभूय । तूष्णीं भूत्वा । तूष्णींभावम् । भूयग्रहणं कृञो निवृत्त्यर्थम् ॥

अन्वच्यानुलोम्ये ॥ ६४ ॥

अन्वक् शब्दउपपदे भवतेर्धातोरानुलोम्ये क्त्वाणमुलौ भवतः । आनुलोम्यमनुलोमता, अनुकूलत्वं परचितानुविधानम् । अन्वग्भूयास्ते । अन्वग्भूत्वास्ते । अन्वग्भावमास्ते । आनुलोम्यइति किम् । अन्वग्भूत्वा तिष्ठति ॥

शक्धृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥ ६५ ॥

शक्यादिषूपपदेषु अस्त्यर्थेषु वा धातुमात्रात्तुमुन् प्रत्ययो भवति । अक्रियार्थोपपदोयमारम्भः । शक्नोति भोक्तुम् । धृष्णोति भोक्तुम् । जानाति भोक्तुम् । ग्लायति भोक्तुम् । घटते भोक्तुम् । आरभते भोक्तुम् । लभते भोक्तुम् । प्रक्रमते भोक्तुम् । सहते भोक्तुम् । अर्हति भोक्तुम् । अस्त्यर्थेषु खल्वपि । अस्ति भोक्तुम् । भवति भोक्तुम् । विद्यते भोक्तुम् ।

पर्याप्तिवचनेष्वलमर्थेषु ॥ ६६ ॥

पर्याप्तिरन्यूनता । पर्याप्तिवचनेष्वलमर्थेषूपपदेषु धातोस्तुमुन्प्रत्ययो भवति । पर्याप्तो भोक्तुम् । अलं भोक्तुम् । भोक्तुं पारयति । पर्याप्तिवचनेष्विति किम् । अलं कृत्वा । अलमर्थेष्विति किम् । पर्याप्तं भुङ्क्ते । पूर्वसूत्रे शक्तिग्रहणमनलमर्थम् । शक्यमेवं कर्त्तुमिति ॥

कर्त्तरि कृत् ॥ ६७ ॥

कृत्संज्ञकाः प्रत्ययाः कर्त्तरि कारके भवन्ति । कृदुत्पत्तिर्वाक्यानामयमर्थशेषः । तत्र येष्वर्थादेशो नास्ति तत्रेदमुपतिष्ठते । अर्थाकाङ्क्षित्वात् । न ण्वुलादिवाक्येषु । साक्षादर्थनिर्देशे सति तेषां निराकाङ्क्षत्वात् । कारकः । कर्त्ता । नन्दनः । याही । पचः ॥

* अव्ययउपपदे ऽयथाभिप्रेताख्याने गम्यमाने करोतेः क्त्वाणमुलौ भवतः । ब्राह्मण पुत्रस्ते जातः, किं तर्हि वृषल नीचैःकृत्याचष्टे । नीचैः कृत्वा । नीचैःकारम् । उच्चैश्चाम प्रियमाख्येयम् । ब्राह्मण कन्या ते गर्भिणी, किं तर्हि वृषलोच्चैःकृत्याचष्टे । उच्चैः कृत्वा । उच्चैः कारम् । नीचैश्चामाप्रियमाख्येयम् । अयथाभिप्रेताख्यानइति किम् । उच्चैः कृत्वा ऽऽचष्टे पुत्रस्ते जात इति । क्त्वा यहणं किम् । यावता सर्वस्मिन्नेवात्र प्रकरणे वासरूपेण क्त्वा भवतीत्युक्तम् । समासार्थं वचनम् । तथा च क्त्वा चेत्यस्मिन्सूत्रे तृतीयाप्रभृतीन्यन्यतरस्यामिति वर्त्तते । णमुलधिकारे पुनर्णमुलयहणं तुल्यकक्षत्वज्ञापनार्थम् । तेनोत्तरत्र द्वयोरप्यनुवृत्तिर्भविष्यति ॥

* द्वितीयायामित्येवेति कुत्र चिदधिकम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्या-
पात्या वा ॥ ६८ ॥

भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते । तयोरेव कृत्यक्तखलर्था इति भावकर्मणोः प्राप्तयोः कर्त्ता च वाच्यः पक्षे उच्यते । भवत्यसौ भव्यः । भव्यमनेनेति वा । गेयो माणवकः सामभिः, गेयानि माणवकेन सामानीति वा । प्रवचनीयो गुरुः स्वाध्यायस्य । प्रवचनीयो गुरुणा स्वाध्याय इति वा । उपस्थानीयो ऽन्तेवासी गुरोः । उपस्थानीयः शिष्येण वा गुरुः । जायते ऽसौ जन्यः । जन्यमनेनेति वा । आप्लूयते ऽसावाप्लाव्यः । आप्लाव्यमनेनेति वा । आपतत्यसावापात्यः । आपात्यमनेनेति वा ॥

लः कर्मणि च भावे चाकर्मकेभ्यः ॥ ६९ ॥

ल इत्युत्सृष्टानुबन्धं सामान्यं गृह्यते । प्रथमाबहुवचनं चैतत् । लकाराः कर्मणि कारके भवन्ति । चकारात्कर्त्तरि च । अकर्मकेभ्यो धातुभ्यो भावे भवन्ति । पुनश्चकारात्कर्त्तरि च । गम्यते ग्रामो देवदत्तेन । गच्छति ग्रामं देवदत्तः । अकर्मकेभ्यः । आस्यते देवदत्तेन । आस्ते देवदत्तः । सकर्मकेभ्यो भावे न भवन्ति ॥

तयोरेव कृत्यक्तखलर्थाः ॥ ७० ॥

तयोरेव भावकर्मणोः कृत्यसंज्ञकाः क्तखलर्थाश्च प्रत्यया भवन्ति । एवकारः कर्तुरपकर्षणार्थः । कृत्याः कर्मणि । कर्त्तव्यः कटो भवता । भोक्तव्य ओदनो भवता । भावे । आशितव्यं भवता । शयितव्यं भवता । क्तः कर्मणि । कृतः कटो भवता । भुक्त ओदनो भवता । भावे । आसितं भवता । शयितं भवता । खलर्थाः कर्मणि । ईषत्करः कटो भवता । सुकरः । दुष्करः । भावे । ईषदाढ्यंभवं भवता । स्वाढ्यंभवं भवता । भावे चाकर्मकेभ्य इत्यनुवृत्तेस्सकर्मकेभ्यो भावे न भवन्ति ॥

आदिकर्मणि क्तः कर्तरि च ॥ ७१ ॥

आदिकर्मणि यः क्तो विहितः स कर्त्तरि भवति । चकाराद्यथाप्राप्तं भावकर्मणोः । आदिभूतः क्रियाक्षण आदिकर्म, तस्मिंश्चादिकर्मणि भूतत्वेन विवक्षिते यः क्तो विहितस्तस्यायमर्थनिर्द्देशः । प्रकृतः कटं देवदत्तः । प्रकृतः कटो देवदत्तेन । प्रकृतं देवदत्तेन । प्रभुक्त ओदनं देवदत्तः । प्रभुक्त ओदनो देवदत्तेन । प्रभुक्तं देवदत्तेन ॥

गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजी-
र्यतिभ्यश्च ॥ ७२ ॥

गत्यर्थेभ्यो धातुभ्यो ऽकर्मकेभ्यः श्लिषादिभ्यश्च यः क्तः स कर्त्तरि भवति । चकाराद्यथाप्राप्तं च भावकर्मणोः । गतो देवदत्तो ग्रामम् । गतो देवदत्तेन ग्रामः । गतं देवदत्तेन । अकर्मकेभ्यः । ग्लानो भवान् । ग्लानं भवता । आसितो भवान् । आसितं भवता । श्लिष । उपश्लिष्टो गुरुं भवान् । उपश्लिष्टो गुरुर्भवता । उपश्लिष्टं भवता । शीङ् । उपशयितो गुरुं भवान् । उपशयितो गुरुर्भवता । उपशयितं भवता । उपस्थितो गुरुं भवान् । उपस्थितो गुरुर्भवता । उपस्थितं भवता । आस । उपासितो गुरुं भवान् । उपासितो गुरुर्भवता । उपासितं भवता । वस । अनूषितो गुरुं भवान् । अनूषितो गुरुर्भवता । अनूषितं भवता । जन । अनुजातो माणवको माणविकाम् । अनुजाता माणवकेन माणविका । अनुजातं माणवकेन । रुह । आरूढो वृक्षं भवान् । आरूढो वृक्षो भवता । आरूढं भवता । जीर्यति । अनुजीर्णो वृषली देवदत्तः । अनुजीर्णा वृषली देवदत्तेन । अनुजीर्णं देवदत्तेन । श्लिषादयस्सोपसर्गास्सकर्मका भवन्ति तदर्थमेषामुपादानम् ॥

दाशगोघ्नौ संप्रदाने ॥ ७३ ॥

दाशगोघ्नौ शब्दौ संप्रदाने कारके निपात्येते । दाशृ दाने, ततः पचाद्यच् । स कृत्संज्ञकत्वात्कर्त्तरि प्राप्तः, संप्रदाने निपात्यते । दाशन्ति तस्मादिति दाशः । आगताय तस्मै दातुं गां घ्नन्तीति गोघ्नो ऽतिथिः । टगत्रनिपात्यते । निपातनसामर्थ्यादेव गोघ्न ऋत्विगादिरुच्यते, न तु चण्डालादिः । असत्यपि च गोहनने तस्य योग्यतया गोघ्न इत्यभिधीयते ॥

भीमादयो ऽपादाने ॥ ७४ ॥

भीमादयः शब्दा अपादाने निपात्यन्ते । उणादिप्रत्ययान्ता एते । श्याधूसूभ्यो मक् भियष्णुक्त्वेत्येवमादयः । ताभ्यामन्यत्रोणादय इति पर्युदासे प्राप्ते निपातमारभ्यते । भीमः । भीष्मः । भयानकः । वरुः । चरुः । भूमिः । रजः । संस्कारः । संक्रन्दनः । प्रपतनः । समुद्रः । स्रुचः । स्रुक् । स्खलतिः ॥

ताभ्यामन्यत्रोणादयः ॥ ७५ ॥

उणादयः शब्दास्ताभ्यामपादानसंप्रदानाभ्यामन्यत्र कारके भवन्ति । कृत्त्वात् कर्तर्येव प्राप्ताः कर्मादिषु कथ्यन्ते । ताभ्यामिति संप्रदानार्थं प्रत्यवमर्शः । अन्यथा ह्यपादानमेव पर्युदस्येत, अनन्तरत्वात् । कृषितो ऽसौ कृषिः । तन्यतइति तन्तुः । वृत्तमिति वर्त्म । चरितं चर्म ॥

क्तो ऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ॥ ७६ ॥

ध्रौव्यार्था अकर्मकाः प्रत्यवसानार्था अभ्यवहारार्था इति स्वनिकायप्रसिद्धिः । ध्रौव्यगतिप्रत्यवसानार्थेभ्यो यः क्तो विहितः सो ऽधिकरणे भवति । चकाराद्यथाप्राप्तं च ध्रौव्यार्थेभ्यः कर्तृभावाधिकरणेषु, गत्यर्थेभ्यः कर्तृकर्मभावाधिकरणेषु, प्रत्यवसानार्थेभ्यः कर्मभावाधिकरणेषु । ध्रौव्यार्थेभ्यस्तावत् । आ-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सितो देवदत्तः । आसितं तेन । इदमेषामासितम् । गत्यर्थेभ्यः । यातो देवदत्तो यामम् । यातो देवदत्तेन यामः । यातं देवदत्तेन । इदमेषां यातम् । प्रत्यवसानार्थेभ्यः । भुक्त ओदनो देवदत्तेन । भुक्त ओदनं देवदत्तः । देवदत्तेन भुक्तम् । इदमेषां भुक्तम् । कथं भुक्ता ब्राह्मणाः, पीता गाव इति । अकारो मत्वर्थीयः । भुक्तमेषामस्ति पीतमेषामस्तीति ॥

॥ अथानन्दवृन्दावनचम्पूकाव्यस्य ॥

॥ षष्ठस्तबकारम्भः ॥

अथैवं शैशवकलाकौशलवान् स बालभगवानेकदानेकदासीगणेषु विद्यमानेषु विद्यमानेषु कार्यान्तरकरणाय नियोजितेषु जितेषु निजाज्ञया ॥ १ ॥

भाण्डस्फोटो दामबन्धोऽर्जुनमोक्षः फलक्रयः ।
वृन्दावने प्रयाणं च षष्ठे विस्तार्य वर्ण्यते ॥

स बालभगवान् मातरं स्वयमेव करपल्लवेन दधिमथनमादधानां वीक्ष्य मन्थानदण्डमादधारेत्यन्वयः । विद्यमानेषु दधिमथनार्थमेव तत्रागत्य वर्तमानेषु । मयैवाद्य मथनीयं युष्माभिः कार्यान्तरं क्रियतामिति नियोजितेषु, मथनकर्मत्याजन-मेव तात्पर्यं, कार्यान्तरेऽन्यासां बह्वीनां दासीनां तत्र तत्र सदा तत्पराणां सद्भावादेवेत्यर्थः । तत्र तत्त्याजने हेतुः, विदितादृशमथनेन तादृशनवनीतोत्क्रमणज्ञाने विषयेन विख्याते मानः संमानो येषां तेषु, स्वसुतलोभ्यतादृशनवनीतोत्क्रमणयोग्यतामहाचतुरासु तासु दासीषु वर्तमानास्वपि न संभाविता, प्रेमचापल्यादेवेति भावः ।

ननु जनिष्यमाणं तस्यास्तत्र महाश्रमं ज्ञात्वापि दासीगणेन ततः किमित्यपसृतं तत्राह, निजाज्ञया जितेषु पराभूतेषु । मच्छ्रममालक्ष्य बलादेता दास्य एव मथिष्यन्तीत्याशङ्क्य तत्र तया स्यातुमपि न दीयते यात यातेति मुहुर्विसृज्यत एव किं कर्तव्यं ताभिरिति भावः ॥ १ ॥

स्वयमेव दामसमुत्कर्षकर्षणजनितपर्यायपर्यायस्तेन चलमरकतवलयनटनटनझङ्कारमुखरेणारवेणामलतरेण मदकारणरणदलिदलितकमलमलकारिणा करपल्लवेन मृणालदण्डदण्डनपण्डितेन भुजयुगलेन चाङ्गलतागलता श्रमजलकणभरेण निर्भरेण निर्भरितम् ॥ २ ॥

करपल्लवेन कथंभूतेन, दाम्नां सम्यगुत्कर्षेण यत् कर्षणमाकर्षणमवकर्षणं च तस्य जनितः पर्यायः पुनः पुनरावृत्तिस्तेन हेतुना परि सर्वतो भावेन-ायस्तेन परिश्रान्तेन । मदकारणेन मत्तताकरनिमित्तेन रणन्तो गुञ्जन्तोऽलयो भ्रमरा यत्र तथाभूतं दलितं प्रफुल्लदलं यत् कमलं तस्य मलकारिणा मालिन्यकारिणा । अङ्गलताया गलता स्रवता । निर्भरेणातिशयेन निःशेषेण भरितं पूरितं यस्मात् तद्यथा स्यात् तथा ॥ २ ॥

अलककुलाकुलायमानभालभाललितं पीवरकुचतटविहारहारलतान्दोलदोलत्कञ्चुलिकम् ॥ ३ ॥

अलकानां कुलैराकुलायमानस्य भालस्य भा कान्तिर्ललिता यतस्तत् । पीवरे कुचतटे विहारो यस्यास्तथाभूताया हारलताया आन्दोलेन दोलन्ती कञ्चुलिका यतस्तत् ॥ ३ ॥

अमलतरश्रुतियुगलगलदलावलावण्यसुधासुधारायमाणकर्णभूषामणिकिरणमञ्जरीजरीजृभ्यमाणमाधुर्यधुर्यतरभुजशिरोभुजशिरोधिकम् ॥ ४ ॥

अमलतराच्छुतियुगलाद् गलन्ती निःसरन्ती च· अलावं विच्छेदरहितं लावण्यं यस्यास्तथा च· सुधाया अमृतस्य सुष्ठु धारायमाणा च· या कर्णभूषास्यमणीनां किरणमञ्जरी तस्यास्तया वा जरीजृभ्यमाणम्· अतिशयेन प्रकाशमानं माधुर्यं तस्य धुर्यतरा अतिशयेन धारका भुजशिरआदयो यतस्तत् । तत्र भुजशिरसी स्कन्धौ, भुजौ बाहू, शिरोधिः कन्धरा ॥ ४ ॥

अधिकमञ्जुलपृथुलश्रोणिभारभारमणीयमणीयमितझणझणायमानकाञ्चिकाञ्चितम् ॥ ५ ॥

श्रोणिभारस्य भा कान्तिस्तया रमणीया च· मणीभिर्यमिता जटिता च· झणझणायमाना च· या काञ्चिका तया· अञ्चितं पूजितम् ॥ ५ ॥

अतिशिथिलकबरीकलापकलापरिस्रंसमानसमानकुसुमनिकरापदेशेन तिमिरनिकरवम्यमानतारावतारावनिकृतशोभाभरम् ॥ ६ ॥

कलापकला भूषणविन्यासः । ताराणामवतारोऽवतरणं पतनं यत्र तथाभूताया अवनेः पृथिव्याः कृतः शोभाभरो यतस्तत् ॥ ६ ॥

अतिवरविवरविस्रियमाणघनघोरघोषोदधिदधिगर्गरीमुखसमुच्छलदच्छलदब्धिशीकरनिकरनितान्तार्कीर्णस्वर्णशाटिकान्तकान्तम् ॥ ७ ॥

अतिपृथुलत्वादतिवरे विवरे विस्रियमाणो घनः मान्द्रो घोरो घोषोदधिः शब्दसमुद्रो यस्यां तथाभूताया दधिगर्गर्या मुखात् सम्यगुच्छलन्तोऽच्छलदब्धा न कस्यचिद्राज्ञे चतुरा ये दधिशीकरनिकरास्तैर्नितान्तं संततमाकीर्णस्वर्णशाटिकाया अन्तः क्रान्तः कमनीयो यतस्तत् ॥ ७ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स्वतनयनयनलोभनीयनवनवनीतनीतमानसत्वेन मानसत्वेन[1] दधिमथनमादधानां मादधानां धीत्य मातर-मातरलहृदयो विरचितपयोधरसाकाङ्क्षाकां-क्षामतामभिनीय कुरु विलम्बं मा मथनतो मा मथ-न-तोदय देहि मे स्तनरसमिति सकलजनमनोमन्था मन्थानदण्डमादधार ॥८॥

तादृशेन नवनीतेन नीतं प्रापितं मानसं यया तस्या भावस्तत्त्वेन हेतुना, मानस्य मथनवैशिष्ट्येन विलक्षणनवनीतोत्पापनेऽहमेव चतुरास्मीत्येवंलक्षणगर्वस्य सत्त्वेन विद्यमानत्वेन, मादस्य हर्षस्य धानं धारणं यस्यास्तां क्षामतां क्षुधा क्षीणतां, मथनतो हेतोर्मा कुरु विलम्बम्, अत एव मा मथ मथनं मा कुरु, "मथे विलोडने" इति भौवादिकः, न तोदय न दुःखं दापय, अन्यथा भाण्डादिस्फोटनेनापि त्वामुद्वेजयिष्यामीति भयप्रदर्शनं, सर्वमिदं तस्याः प्रेमपोषकमेव, मनोमन्था-इति कर्तरि युक्तम् ॥ ८ ॥

तदपहाय समनन्तरमनन्तरमणीयचरितमतिकोमलं बालकं लम्बालकं तमङ्के निधाय स्तनरसं पाययन्त्यां मातरि मातरिश्वना क्षुभितदहनज्वालयालयान्तिकान्तिकावदनाधिश्रितपयःस्थालीस्थालीनपयःसमुच्छ्वसनवेगमवलोक्य तदुत्पलनाशङ्क्या कयाचन भवनोदरे तनयोपवेशमीहित्वा च तं प्रयातवत्यां मातरि ॥ ९ ॥

तदपहाय दधिमन्थनं त्यक्त्वा, मातरिश्वना पवनेन, आनयान्तिके वासगृहनिकटे, अन्तिका चुल्ली, "अधिश्रयणी चुल्लिरन्तिके"त्यमरः, तस्या वदने· अधिश्रिता· आरोपिता पयःस्थाली दुग्धपाकपात्रं, तत्रस्थस्य· आलीनस्य पयसः सम्यगुच्छ्वसनं समसमत्कारेण पृथुलीभवनं, तस्य वेगमवलोक्य, तस्य पयस उत्पलनाशङ्क्या ॥ ९ ॥

कृतमनोरुषा रुषा तत उत्थाय त्वरितमेव शिलाशकलेन दधिगर्गरीं विभिद्य विभिद्यमानमना रोषभयाभ्यां सर्वतः सरीसृप्यमाणमथितधाराधौते प्रघणतले भवनान्तरं गतो रङ्गतो विजनगतं जनगतं च यन्न भवति तदपि हेयङ्गवीनं नवीनं नवप्रयत्नेन समुत्तार्य कियदशित्वा कियदवचिन्वानोऽन्वानोदितकोपस्तदादाय* यावज्जननी नायाति तावदेव देवे† न्द्रादिवन्दितचरणो जननीभियाभियातः ॥ १० ॥

तद्वत्यवस्तुन्यपि काप्यपेक्षता
यया पुनः सोऽपि समेत्युपेक्ष्यताम् ।
प्रेम्णो विचित्रा परिपाट्युदीरिता
बोध्या तथा प्रेमवतीभिरेव या ॥

अत्र दुग्धावर्तनकारिण्यो दास्योऽपि तत्राविचक्षणतादोषारोपेण पूर्ववदहमेव स्वतनयभक्षणीयं दुग्धमावर्तयितुं जानामीत्यभिमानेन तया विसर्जिता एवेति ज्ञेयम् । रुषा क्रोधेन हेतुना । कीदृश्या, क्षतमनोव्रणया, "व्रणोऽस्त्रियामीर्ममरु"रित्यमरः । रोषभयाभ्यां विशेषेण भिद्यमानं मनो यस्य सः । ततश्च प्रघणतले तथाभूते सति, अवचिन्वानस्तत्तत्पात्रेभ्योऽयमयं भागमुत्थापयन् । तद्यवनीतमादाय गृहीत्वा । कीदृशः, अनु तदनन्तरम्· आ सम्यक् प्रकारेण नोदितो दूरीभूतः कोपो यस्य सः, कोपस्य स्वकार्यनाश्यरूपत्वात्, यदुक्तं,"कामस्यान्तं तु क्षुत्तृड्भ्यां क्रोधस्यैतत् फलोदया"दिति, आङा दधिगर्गरीभेदने सत्यपि पूर्वं कोपशेष आसीदिति द्योतितम् ॥ १० ॥

पलायनसपक्षपक्षद्वारेण निष्क्रम्य बहिरङ्गने रङ्गनेयचरितोऽवहननसमयान्यसमयान्यथाभूतावस्थितेरुलूखलस्य खलस्य निहन्ता हन्तावलम्ब्य पृष्ठं चकितचकित एव शाखामृगशावकान् नवकान् नवनीतं तदाशयन्नवतस्थे ॥ ११ ॥

पलायनस्य सपक्षं सहाययुक्तं पक्षद्वारं खिडिकीद्वार इति ख्यातं तेन, "पक्षः सहायेऽपी"त्यमरः । रङ्गे नाट्यादिस्थले नेयम्· अभिनेतुं योग्यं चरितं भाण्डस्फोटनपलायनादिकं यस्य सः । अवहननसमयादन्यस्मिन् समये· अन्यथाभूता· अधोमुखतया· अवस्थितिर्यस्य तस्य पृष्ठमवलम्ब्य । चकितचकित इति मातुरागमनवर्त्मनि दत्तनेत्रतयासावधान इत्यर्थः । आशयन् भोजयन् ॥ ११ ॥

अथ पयःस्थालीमवतार्य तार्यमाणजगज्जना निजसौभाग्येन भाग्येन केनापि लब्धतादृशतनया नयासादितयशोभारा यशोभारामणीयकवती तनयमङ्के कर्तुमुपसीदन्ती सीदन्ती च यथास्थानमवस्थापितमनालोक्य क्व गत इति तमनुसंदधती दधती च मनसि खेदं क्षीत्य च पुरतो भग्नदधिगर्गरीगरीयोगलितमथितधाराधवलितवलितपैच्छिल्यं भवनोदरं नोदरंहसा शकलितकर्परपरःशतं च किमिदमहो अकस्मात् कस्माद् भग्नेयं दधिगर्गरीति रीतिनिर्णयं कर्तुमशक्नुवाना शिलाशकलाकलनेन तस्यैवेदं दुर्ललितमिति नासिकाशिखरनिहिताललितवामतर्जनीकं क्षणमवलोकयन्ती स्मयमाना ॥ १२ ॥

१+२—मानसत्वेन मानसत्वेन,-साकाङ्क्षाकां क्षामता-इत्येतादृशस्यनेपूच्चारणसाम्यादेवान्यत्रेव यमकतावसेया ।

* भवनाङ्गरङ्गतोरं—गत इति वरपा० ।

† देवदेवेन्द्रादि—इति पा० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यशश्च भा कान्तिश्च ताभ्यां रामणीयकवती । नोदरंहसा निक्षेपवेगेन, शकलितानां खण्डितानां कर्पराणां परःशतं च वोढ्य, "परःशताद्यास्ते येषां परा संख्या शतादिका" दित्यमरः । अशक्नुवाना इति "ताच्छील्यवयोवचनशक्तिषु चानश" इति चानश् । शिलाशकलस्य शिलाखण्डस्य आकलनेन दर्शनेन लिङ्गेन ॥ १२ ॥

स्मयमानाभ्यामपि समवदातहृदया दयालुरपि कृतकृतकप्रतिघाऽप्रतिघातमहसो महसोपूयमाणमानस्य तस्य सुतस्यान्वेषणाय यदा बहिरियाय ॥ १३ ॥

मुग्धस्य शिशोरपि कथमीदृशी प्रगल्भताभूदिति स्मेरो विस्मयः मयि सर्वत्र महामावधानायां सत्यामप्येवं कर्तुमशकदिति मानोऽहंकारस्ताभ्यां हेतुभ्यां सङ्ग्रामपि सम्यगवदातं शुद्धं हृदयं यस्याः सा, कृता कृतका कृत्रिमा प्रतिघा क्रोधो यया सा, "प्रतिघा रुट्कुधौ स्त्रिया" वित्यमरः । नास्ति प्रतिघातो यस्य तन्महो यस्य तस्य, महे लीलाचौर्याद्युत्सवे सोपूयमाणोऽतिशयेन जायमानो ज्ञानं गर्वो वा यस्य तस्य ॥१३॥

तदैव तामालोक्य सहसा सह साध्वसेनोत्थिता चपला पलायनपरा पराक्रमेण क्रमेण सजवं धावमानावमानाय शङ्कमाना सा काचन श्यामला स्तनंधयी मोहनदेवता त्वरितमनुधावन्त्या जनन्या जनन्यायविदापि निजगदे जगदेकधूर्त मा धाव मा धावेति ॥ १४ ॥

जनन्यायविदा जननीजनानां न्यायं नीतिं वेत्तीति तया ॥ १४ ॥

स च पलायमानो मानोन्नतमना मनाग्विवर्तितग्रीवमायाति न वेति नवेऽतिभये मातरमातरलितमनसमाधावमानां माधावमानाङ्गीमालोक्य धावति स्म ॥ १५ ॥

मानेन वाम्येन उन्नतं मनो यस्य सः । आयाति न वा आयाति माता, इति नवे नूतनेऽतिभये सति । मा श्रीस्तया धावमानानि निर्मलानि अङ्गानि यस्यास्तां मातरमवलोक्य ॥ १५ ॥

ततश्च,

धावं धावमतित्वरं स चकितः पश्यन् मुहुर्मातरं
ग्रीवाभङ्गमनोहरं तरलिते पश्चाद्दृशौ विक्षिपन् ।
स्तोभद्भुव्यतया न धावितुमलं यावत् तदा कातरः
शीतः शीतलयांचकार कृतकक्रोधं जनन्या मनः ॥ १६ ॥

धावितुं यावच्चलं न समर्थस्तावत् तदा कातरः सन्, शीतः चलसः, कृतकः क्रोधो यत्र तत् मनः ॥ १६ ॥

साप्यूचे,

* धूर्त कत्थेवं धाविष्यसि, क्व वा गन्तव्यं, तन्मा धाव, तिष्ठ, तया तथोक्ते, यदि न ताडयसि, करतश्च यष्टिं पातयसि, तदा मा परं धावितव्यमित्युक्तवन्तं दूरत एव स्थितं सा पुनरूचे ॥ १७ ॥

ताडने यदि बतातिशया भी-
स्तत् किमद्य दधिभाण्डमभाङ्क्षीः ।
मातरेवमपरं न करिष्ये
पातयस्व करतो बत यष्टिम् ॥ १८ ॥

कृष्णः प्रत्यूचे मातरेवमित्यादि ॥ १८ ॥

* तदाकर्ण्य मनसा स्मयमाना बहिः कृतककोपा निकटमनुसरन्ती धर्तुं यदारेभे, तदैव पुनरपि सत्वरं धावमानः पुनरनुधावमानां मातरमवलोक्य कातरमनाः पुनरूचे ॥ १९ ॥

मातः पातय पाणितः खरतरां यष्टिं न मत्ताडनं
कार्यं चेति कुरुष्व सत्यमनघे तद्यामि ते संनिधिम् ।
इत्याकर्ण्य सुतस्य कातरवचः सा पाणितोऽपातयद्
यष्टिं दूरत एव वीक्ष्य तदसौ विश्रान्तवान् धावनात् ॥ २० ॥

सत्यं शपथं, "सत्यं शपथतथ्ययोः" रित्यमरः ॥ २० ॥

एवमतिक्रीतुकं दिवि दिविषदो विलोकयन्तः परमविस्मयस्मयजुषः परस्परमूचुः ॥ २१ ॥

परमविस्मयेन स्मयजुषः, मन्दहास्ययुक्ताः ॥ २१ ॥

अहो अतिचित्रम्,

यद् ब्रह्मणोऽपि च परार्धयुगावसाने
वैकल्यकारि परमं किमुतापरेषाम् ।
तद्वै भयं नियतमेव यतो बिभेति
सोऽयं प्रसूकलितयष्टिकृतेऽतिभीतः ॥ २२ ॥

परार्धयोर्युगस्य युगलस्य, अवसानेऽन्ते ॥ २२ ॥

यदा श्वसितसमीरणान्दोलितकञ्चुकाञ्चला श्रमजलकणालंकृतवदनसरोजा श्लथमानकचकलापा द्रुतधावनासन्नपदकमला तनयस्य करं गृहीतवती, तदा सकातरं मातर्मां ताडयिष्यसि मा ताडनीयमिति गलद्भ्रुकलाकलिलमीक्षणकमलयुगलमभिनवपट्टपलाशकोमलाभ्यां कर-

१ इतः प्रभृति स्पष्टतया व्याख्यात्रा परित्यक्तव्याक्यसमुदायस्य मूलकं वाक्यसमुदायादौ मयेदं * चिह्नं स्थापयिष्यत इति स्मरणीयम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तलाभ्यां विमृजन् मन्दमन्दगद्गदकलवचनसुधाबिन्दुनिस्यन्दतुन्दिलवदनचन्द्रबिम्बो भीतभीत एव रुदन् विलोकनीय आसीत्, तदैवं माता मनसि विचारयामास, क्षणमयं बद्ध्वा रक्षणीयः, यद्ययं न बध्यते, तदा कदाचिदमर्षणोऽयममर्षवशाद्यत्र कुत्रापि वनादौ गन्तमर्हति, तत् संप्रति बन्धनमेव करोमीति विकसितचारुदन्तं रुदन्तं तमादाय ॥ २३ ॥

अमर्षणः क्रोधनः ॥ २३ ॥

तस्यैवोलूखलस्य सविधमागम्य गम्यमानेतरमहिम्नो विहितानुबन्धाय बन्धाय दासीगणमाहूय, अयि कुरङ्गवति, अयि लवङ्गवति लुलितललितपट्टदामानमानय द्रुतमिति ॥ २४ ॥

गम्यमानादितरोऽगम्यमानो दुर्विगाह्यो महिमा यस्य तस्य कृष्णस्य बन्धाय बन्धनार्थं विहितो योऽनुबन्ध उपायस्तस्मै, तं संपादयितुमित्यर्थः, "क्रियार्थोपपदस्ये"त्यादिना चतुर्थी। लुलितां मार्जितां ललितां कोमलां पट्टदामानं, न तु कर्कशामित्यर्थः ॥ २४ ॥

ताभ्यां समानीतया तया जगदेकबन्धुं बन्धुं समुद्यतायां मुद्यतायां व्रजेश्वर्यां वात्सल्यसारमणीषु रमणीषु सकलसंपल्लीलासु पल्लीलासु कासुचन समागतासु ताभिः समं समुपसन्नेषु नवालकेषु वालकेषु यदभूत् तदतिचित्रम् ॥ २५ ॥

ताभ्यां कुरङ्गवतीलवङ्गवतीभ्याम्। तया तादृशपट्टदाम्ना। जगतामेकं मुख्यं बन्धुमिति, बन्धनानर्हत्वेन विरोधः। मुदि· आनन्दे, दाम्नः कोमलत्वदर्शनेन जनित इत्यर्थः, यतायां रतायाम्। पल्लीं नगरं लान्ति वासार्थं स्वीकुर्वन्तीति तासु, पुरवासिनीष्वित्यर्थः। नवालकेषु नवीनालकयुक्तेषु ॥ २५ ॥

तद्यथा,

आद्यं दाम कटीरवेष्टनविधौ वीक्ष्य प्रसूर्द्व्यङ्गुल-
न्यूनं तत्र जुगुम्फ यत् परमहो यच्चाभवत् तादृशम्।
तत्रान्यच्च जुगुम्फ यत् सुकृतिनी तच्चेदृशं चेदहो
ब्रह्मेवाजनि ह्रासवृद्धिरहिता सा द्व्यङ्गुलन्यूनता ॥ २६ ॥

द्व्यङ्गुलन्यूनमिति, "तत्पुरुषस्याङ्गुले"रित्यादिनाच् समासान्तः। तेषां सर्वेषामेव दाम्नां सा द्व्यङ्गुलन्यूनता ब्रह्मतुल्या· अजनि· अभूत्, ह्रासवृद्धिराहित्यसाधर्म्यात्। अत्र निजप्रभोर्हठवत्तारक्षणाय विभुताशक्त्यैव सा दर्शिता· इति·भावः ॥२६॥

ततस्तस्याः कोपावेशमुपश्यन्तीभिः पश्यन्तीभिः पुरपुरन्ध्रीभिः सा निजगदे ॥ २७ ॥

उप· आधिक्येन श्यन्तीभिः, दूरीकुर्वतीभिः। "शो तनूकरणे" इत्यस्य रूपम् ॥ २७ ॥

जगदेकधन्ये चित्रमिदं तदतिपरिमितपरिमाणेन कनकमेखलासूत्रेण वेष्टितमिदमस्य कटितटं तदधुना गृहस्थितेन यावतैव दाम्ना न परिमीयते, सर्वमेव दामनिकुरम्बं द्व्यङ्गुलन्यूनमेव संपद्यते, तदवश्यमेव केनापि रहस्येन भवितव्यम्, तदितः परमेव विरमेति तद्वचनविरतौ, विस्मयोत्कर्षपरवशयावशयावधिरस्यावश्यमेव विलोकितव्य इति कृतनिबन्धया सस्मितमूचिरे ता अपि, अयि मद्गृहे नैतादृशान्यपराणि सन्ति दामानि भवतीनां गृहेषु यानि वा सन्ति, तान्यप्यानयतेति ॥ २८ ॥

केनापि रहस्येनेति, अस्य ललाटपत्रे विधात्रा बन्धनं न लिखितमित्यनुमीयत इति भावः। विरमेति, तदन्यथा कर्तुं त्वया· अशक्यमिति भावः ॥ २८ ॥

ततश्च,

न क्रोधान्न च वैरतो व्रजपुरेश्वर्या न च त्रासतो
यासां येषु गृहेषु सन्ति परितो यावन्ति दामान्यथ।
तावन्त्येव हि ताभिरत्र परमादानन्दकौतूहला-
ल्लोकातीतचरित्रवीक्षणवशादानिन्यिरे तत्पुरः ॥ २९ ॥

सन्ति, साधूनि, कोमलपट्टमयानीत्यर्थः। तत्पुरः, तस्या यशोदाया अग्रे ॥ २९ ॥

तमथ तथैव शैशवनाट्यपरिपाट्यनिशकृतनयनकमलजलकणनिपातपरिमृजादुःस्थितकरसरसिजमतिगद्गदगदनकलभास्वरस्वरमतिमृदुमधुरतरं रुदन्तमपि ॥ ३० ॥

अथ पुनरपि तं बध्नती सा सर्वाण्येव दामानि द्व्यङ्गुलन्यूनान्यवलोक्य पुनर्बन्धनोपायं चिन्तयामासेत्यन्वयः। शैशवनाट्यस्य परिपाट्या· अनिशकृता निरन्तरमेव कृता या नयनकमलयोर्जलकणानां निपातस्य परिमृजा परिमार्जनं तया दुःस्थिते करसरसिजे यस्य तम् ॥ ३० ॥

कपटरोषावेशेन पुनस्तानि सकलानि कलानिपुणतया प्रत्येकमेव संग्रथ्य कटितटघटितपूर्वसंग्रथितदामनि संयोज्य बध्नती गृध्नती गूढतरमन्तःकुतुकेन विलसन्तीषु हसन्तीषु हरिणनयनासु सौहृदेन कृष्णरोदनमालोक्य चारुदत्सु रुदत्सु बालकेषु पुरेव सर्वाण्येव द्व्यङ्गुलन्यूनान्यवलोक्य ॥ ३१ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तानि ताभिरानीतानि दामानि । अन्तःकुतुकेनेति, कृष्णस्यादृष्टगतं बन्धनं नास्तीत्यस्मद्वचनं न मानितवत्या व्रजेश्वर्याः प्रौढिः क्वियदवधिर्भविष्यतीत्यद्य पश्याम इति । चारवो दन्ता येषां तेषु,रोदनार्थं मुखव्यादाने दन्तानां प्रकाशात् । बालकेषु सुबलादिषु कृष्णवयस्येषु ॥ ३१ ॥

श्वसनसमीरणवेगवेपमानवक्षःस्थलमवयवक्षिसलयसमुद्भान्तक्रान्तश्रमजलकणभरनिर्भरमाकुलविगलत्कबरीभारविस्रंमानमालतीदाम श्रममात्रशेषकोपफला निष्फलप्रयासेव पुनर्बन्धनोपायं चिन्तयामास ॥ ३२ ॥

श्वसनसमीरणेत्यादिना श्रमः, अवयवक्षिसलयेत्यादिना श्रमस्य बहुकालव्यापित्वम्,आशुनविगलदित्यादिना बन्धनार्थप्रयत्नैकायमनस्त्वं व्यञ्जितम् । श्रममात्रमेव शेषोऽवशिष्टं कोपस्य फलं यस्याः सा ॥ ३२ ॥

ततश्च,

निष्यन्दानि विलोचनानि विगतश्रद्धानि गेहं प्रति
स्वान्तानि प्रहृताः समस्तविषये संस्कारशेषा अपि ।
निर्दामानि बभूवुरेव भवनान्याभीरवामभ्रुवां
माद्यां कौतुककुप्रयाद्भुतशिशोर्बन्धानुबन्धे कृते ॥ ३३ ॥

कौतुकेन कुप्यतीति कौतुककुप् तस्या भावस्तत्ता तया हेतुना । अद्भुतशिशोरिति, न च देहो वर्धते, अतिपरिमितपरिमाणेन कनकमेखलासूत्रेण वेष्टितमस्य कटितटमिति पूर्वोक्तेः । न च दामान्यपि ह्रसन्ति, यावतैव दाम्ना, सर्वमेव दामनिकुरम्बमित्याद्युक्तेः, प्रत्यक्षमेव यथारूपत्वेन तेषां दृश्यमानत्वात्, अतः शिशुनिष्ठमेवाद्भुतत्वमिति ॥ ३३ ॥

न क्वचिदपि केनापि चिद्बन्धुं शक्यते न चानन्दो न च ज्ञानं न महोऽपि, तत् कथमहो चिदानन्दज्ञानमहोमयवपुषं तमसौ बध्नातु ॥ ३४ ॥

अत्र समादधाति न क्वचिदिति,चिच्चैतन्यं, ज्ञानम्· आनन्दनिष्ठोऽनुभवः ॥ ३४ ॥

तथापि,

अन्तर्यस्य न विद्यते न च बहिर्योऽन्तर्बहिश्चित्तया-
नन्दत्वेन महस्तया च सदृशः पूर्णोऽपरिच्छेदवान् ।
नो पूर्वं न परं च यस्य तमहो माता कथं कोपतो
बध्नीयादिति तत्कृपैव कृतिनी चिन्तान्विताघर्तत ३५॥

उक्तमर्थमेव विशदयन् प्रस्तुतोपयोगित्वेन शक्त्यन्तरप्रादुर्भावमाह, अन्तरिति । बन्धनं बहिः परीतेन दाम्नान्तरावृतस्य संभवति, यस्यान्तर्न विद्यते बहिश्च न विद्यते तत्र क्व वा दाम्ना स्यात्र्यं किं वा तेन वेष्टनीयम् । अत्र· अन्तरभावे बहिरभाव एव हेतुः, बहिरभावे चान्तरभाव इति, द्वयोः परस्परसापेक्षत्वेन सिद्धत्वात् । किंतु सर्वेषामेव वस्तूनामन्तर्बहिश्च सदृशस्तुल्यः, उभयत्रापि विद्यमानत्वात् । किंच, पूर्वापरविभागवद्वस्तु पूर्वतो दाम धृत्वा परतो बध्यते, यस्य न पूर्वं न च परं तं कथं बध्नीयादिति । अत्र पूर्वं मातर्नं मत्ताडनादिकं कार्यमित्यादिकाकुभिः कारितसत्याया अपि मातुः स्वबन्धनव्यवसायमालोक्य कृष्णस्य कुपितशिशुहठवत्तास्वाभाव्येन बन्धनासंमतौ जातायां मत्प्रभुं का बध्नीयादिति तत्र विभुताशक्त्या स्वयमेव प्रादुर्भूतम्, ततश्च तथापि बन्धननिर्बन्धानिवृत्तिमतिश्रमं च मातुरालोक्य कृष्णस्यैव स्वप्रौढित्यागेच्छायां जातायां विभुताशक्त्या तत्रैवान्तर्भूतम्, कृष्णतद्भक्तयोर्मध्ये भक्तस्यैव प्रौढेर्बलवत्त्वदर्शनात् । "स्वनिगममपहाय मत्प्रतिज्ञा"मित्यादेरिति, ततश्च मातुः श्रमदर्शनजनितखेदपरवशतयाधुना मम बन्धनमेव मम सुखदमित्याकारिकाणां मनोवृत्तौ कृपाशक्त्या शक्त्यन्तरवृत्तिपराभाविण्या प्रादुर्भूतमित्याह तत्कृपैवेति । कृतिनी पण्डिता, अतिविरुद्धमपि समाधातुमित्यर्थः ॥ ३५ ॥

अथ तथापि बन्धनिर्बन्धनिर्भरपरिश्रमलुलितकलेवरां मातरमभिवीक्ष्य संजातकरुणो भक्तजनपरिश्रमो निजकृपा चेति द्वाभ्यामेवायं च बद्धो भवति नान्यथेति यावत् तद्व्यानुत्पत्तिरासीत् तावदेव दाम्नां द्व्यङ्गुलन्यूनतासीत्,संप्रत्युभयमेव जातमिति पुनरुद्यममाचे तया क्रियमाण एव बन्धनमुरीचकार ॥ ३६ ॥

न्यूनतायां द्व्यङ्गुलमात्रत्वे रहस्यप्रदर्शकं निदानमाह भक्तजनपरिश्रम इति । सिद्धसाधकतारतम्येन श्रमस्याल्पत्वे तारतम्यं ज्ञेयम् । तथानुसारेण कृपयाऽपि तारतम्यं ज्ञेयम् । श्रमत्वं च लोकप्रतीत्यैव, जातरतिषु भक्तेषु कृष्णसंबन्धेन तस्य सुखमयत्वेनैवानुभवात् । द्वाभ्यामिति, प्रथमो भक्तनिष्ठः, द्वितीयः कृष्णनिष्ठो गुणः, ताभ्यां हेतुहेतुमद्भ्यामित्यर्थः । तया यशोदया ॥ ३६ ॥

ततः सिद्धार्थैव सा सहचरबालकान् प्रति भो भो भवद्भिरवलोकनीयोऽयं स्वयमात्मानं मोचयित्वा यदि पलायते तदाहमाकारणीयेति प्रोच्य पुरपुरन्ध्रीभिः सह भवनमध्यमाविवेश । गतायां च तस्यां विगतरोदनमलिनिमाननचन्द्रमतिप्रसन्नमादधानो जननीकृतो बन्धः कार्यान्तरोपयोगी भवत्विति परमयोगीन्द्रस्य निज-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परमप्रियभक्तस्य नारदस्य नारदस्य वचनामृतमृतमेव कर्तुं तदभिशापलब्धतरुजन्मनोर्धनदतनुजन्मनोर्नलकूवरमणिग्रीवयोरनुग्रहयहिलमना मन्दमन्दमुलूखलं विकर्षन् जानुकरचंक्रमणेन तयोरभ्यासमभ्याययौ ॥ ३७ ॥

नारदस्य "नृ विक्षेप" इत्यस्मात् नारं तयोर्मदिराकृतविक्षेपं द्यति शापव्याजेन खण्डयतीति तस्य । यद्वा "नृ नये" इत्यस्य रूपं,नीतिप्रदस्येत्यर्थः । ऋतमेव सत्यमेव । अभ्यासं निकटम् ।

प्रणयरसनया सन्मानसोलूखलान्तः
श्वपचमपि निबद्धो मोचये मृत्युपाशात् ।
विधिमपि परिबाधामीदृशं चेदबद्धो
मुनिमपि लयकारागारमध्ये क्षिपामि ॥
इति बत मम बद्धस्यैव यन्मोचकत्व-
व्रतमिह न जनन्यां सार्थकत्वं प्रयाति ।
तदुपपुरभुवो द्रागर्जुनौ मोचयामी-
त्यमृशदिव मुकुन्दस्तत्समीपं जिहानः ॥ ३७ ॥

तदनु सहचरबालका अपि चलितवन्तो दूरे,सदसतोरिव एकमूलयोः· ज्ञानकर्मणोरिव पृथक्पृथक्काण्डयोः· सामयजुषोरिव बहुशाखयोः· महाराजकीर्तिप्रतापयोरिव विदूरविस्तारयोः· गिरिवरधनवरयोरिव महासारयोः· वर्षाशरत्कालयोरिव बहुतराब्दयोः· ब्रह्माण्डविराड्ग्रहयोरिव महास्थूलयोः· भीमानुजकार्तवीर्ययोरिवार्जुननामधेययोः· नकुलसहदेवयोरिव यमयोः· महीरुहयोः समीपमुपसर्पन्तं तमालोक्य दिनकरकिरणासहिष्णुतयानयोर्मूलमवलम्बत इति यदा वितर्कयांबभूवुः ॥ ३८ ॥

सदसतोः स्थूलसूक्ष्मतत्त्वयोः । एकमूलयोः, द्वयोरेव प्रकृतिपुरुषभवत्वात् तुल्यकारणकयोः । विस्तारो विस्तृतिः, पक्षे विटपः, "विस्तारो विटपोऽस्त्रिया" मित्यमरः । महासारयोरिति, गिरिवरे सारः स्थैर्यं, घनवरे· आसारो धारासंपातः, महीरुहयोः सारो मज्जा· इति । बहुतराब्दयोरिति, वर्षासु अब्दा मेघाः, शरदि· अपां दा शुद्धिः, "दैप् शोधने" इत्यस्मादड्डि· अब्दाः, महीरुहयोरब्दाः, तदुभयपरिच्छेदकवत्सराः ॥ ३८ ॥

तदैव दृश्यमान एव तयोर्मूलमध्यमध्यास्य तिर्यक्कृतोलूखलः खलहन्ता स आश्चर्यबालकोऽवालकोऽमलवपुरपूर्वचित्रचरितो विना प्रयत्नेनैव तावुलूखलसंघट्टनतः समूलमुन्मूलयामास ॥ ३९ ॥

अवगता व्यस्ततया लम्बिता अलकाश्चूर्णकुन्तला यस्य सः । अमलशरीरः । संघट्टनतः संचालनात् ॥ ३९ ॥

एवं तन्नामकीर्तनेन सवासनेऽहःसंघे इव तेन समुन्मूलिते तरुद्वये जगदण्डभाण्डविवरवर्ती सकलशब्दनिर्वापकः कश्चन प्रलयघनघटानिर्मुक्तमहाशनिप्रकरभैरवारवानुकारी मडमडेति ध्वनिविशेषः सविशेषमुत्पपात, तद्द्वयं च निपपात, पतितयोश्च तयोर्मध्य एव स उलूखलनिबद्धस्तादृशेनापि भैरवेण रवेण नतरामुद्विग्नमना मनागपि न चकितः प्रसन्नवदनस्तयोरात्मानाविव मूर्तिमन्तौ परमतेजस्विनौ दिव्यमूर्ती पुरुषावालोकयामास । तावपि शापनिर्मुक्तौ नित्यमुक्तमपि बद्धं नित्यशुद्धमपि नवनीतापहारदूषितं जगद्बन्धमोचकमपि मातृवात्सल्येन स्वीकृतबन्धं तमभितुष्टुवतुः ॥ ४० ॥

प्रलयकालीनाभिर्मेघघटाभिर्निर्मुक्तानां विसृष्टानां महावज्रप्रकराणां यो भैरवो भयप्रद आरवो ध्वनिस्तमनुकर्तुं शीलं यस्य सः ॥ ४० ॥

जय जय सच्चिदानन्दघन घनघटामेदुर दुरवगाह लील लीला कृतधरणितलावतरण रणसर्वदानवसर्वदानवपराभवभवत्पटिमचटुलभुजबल ॥ ४१ ॥

रणे युद्धविषये सर्वदैव नवा अतिबलिष्टत्वाच्चवीना इव सर्वे दानवास्तेषां पराभवनिमित्ते भवदुत्पद्यमानं पटिम्नि चातुर्ये चटुलं त्वरायुक्तं भुजबलं यस्य हे तथाभूत ॥ ४१ ॥

जवलवोत्खातमहार्जुनद्वन्द्व निर्द्वन्द्वनिर्भरपुरुकृप कृपणजनवत्सल जनवत्-सललितविलासव्रज व्रजपुरमङ्गलावतार तारकेशकेशकरवदनबिम्ब बिम्बबन्धूकरुचिरमधुराधर धरणितलालंकारकार ॥ ४२ ॥

जनवल्लोकानुकारी सलीलो विलाससमूहो यस्य ॥ ४२ ॥

कारणहीनकृपाकृपाणलतिकालूनयानाद्यविद्ययानन्दितमतिमज्जन ॥ ४३ ॥

कारणहीना निर्हेतुका कृपैव कृपाणलतिका खड्गलतिका तया लूनया छिन्नया, अनादिरूपयाविद्यया हेतुना,आनन्दिता मतिमन्तो जना येन ॥ ४३ ॥

मतिमज्जननिर्विषयलीलाकूपार पारमहंस्यपथाधिगम्यचरणकमल कमलजशितिकण्ठादिकण्ठाभरणीभूतगुणगण गणनातीतलोकोत्तरप्रभाव प्रभावबहुल बहुललितविहार

CC-0. Sampurnanand University Collection. Digitized by eGangotri

हारविलसद्वक्षःस्थल स्थलकमलविमलपदयुग युगचतुष्क-
कृतांशावतार तारकावदगणेयनामरूप निर्मलयशोऽवदा-
त ॥ ४४ ॥

मतेर्बुद्धेर्मज्जनमाप्लवो यत्र स च निर्विषयो विषयातीतश्च लीलासमुद्रो यस्य, "समुद्रोऽब्धिरकूपार" इत्यमरः। निर्मलैर्य-
शोभिरवदात श्वेतीकृतेत्यर्थः ॥ ४४ ॥

दातरभिमतानामभिमतानामखिललोकनाथ ॥ ४५ ॥

अभिमतानामभिमानविषयाणाम्। अभिमतानामभीप्सि-
तानां दातः, हे दायक ॥ ४५ ॥

नाथ नमस्ते नमस्ते जगति समस्ते समस्ते कोऽ-
परः। परमपुरुष तव कुहकं कुह-कं न मोहयति, दु-
र्घटघटनचातुरी चातुरीकरोति कस्य न मनो मनोरम ॥४६॥

नमस्ते नमस्त इति हर्षेण द्विरुक्तिः, समस्ते जगति ते तव समः• अपरः कः, त्वमेव त्वत्सम इत्यर्थः, तव हेतुः, तव कुहकं माया, कुह कुत्र कं न मोहयति, कुत्रेत्यर्थे कुहेत्यव्ययम्, आतुरीकरोति व्याकुलीकरोति ॥ ४६ ॥

मूर्तानन्द नन्दनन्दन नन्दनवनविहारिणां मुकुट महामारकत कतमो भवन्तमुतमश्लोकमुपश्लोकयितुम-
र्हति ॥ ४७ ॥

उपश्लोकयितुं श्लोकैरुपस्तोतुम् ॥ ४७ ॥

त्वमसि मूर्तामूर्तानन्दत्वेन व्यक्ताव्यक्ताकारतयानन्दयसि निजभजनकारिणोऽध्यात्मविदश्च, तेन निरर्गलगलदमन्दचिन्मकरन्दमन्दाकिनीमेदुरे तव चरणारविन्दे विन्देव रतिमरतिमपाकुरु ॥ ४८ ॥

मूर्तामूर्तेत्यादि, यथासंख्येनार्थो ज्ञेयः, विन्देव लभेवहि ॥४८॥

किंच,

बाञ्छावहे किमपि नापरमार्तबन्धो
त्वत्पादपङ्कजपरागनिषेविसङ्गात्।
शापोऽपि यन्मुनिपतेरभवत् प्रसादः
केनोद्रियेत तदहो महतां प्रसङ्गः ॥
रागस्तु ते स्तुतिषु तावकपादपद्म-
ध्याने मनस्तव कथाश्रवणे श्रुती च।
किं भूरिणा बत हृषीकपतेऽस्मदीयः
सेवारसेन रसिकोऽस्तु हृषीकवर्गः ॥
देवर्षिणा तव पदाब्जमधुव्रतेन
भूयानकारि बत नो शपता प्रसादः।
लीलालवोढजगदण्डपरःसहस्रो
येन त्वमद्विविषयोऽद्भुतबालखेलः ॥ ४९ ॥

लीलालवेन• ऊढम्• आत्मनि धृतं जगदण्डानां परःसह-
स्रं येन सः। तथाभूतोऽपि• अद्भुता बालखेला यस्य सः ॥ ४९ ॥

के वर्णयन्तु भगवन् भवतो जनन्याः
सौभाग्यमेतदतिभूरि ययासि बद्धः।
यस्यैकलेशशतभागमपीह नापु-
र्ब्रह्मा शिवः शतमखश्च महर्षयश्च ॥
न ज्ञानिनां सकलवेदविदां च भूमन्
योगैकनिष्ठमनसां च भवान् सुखापः।
तेषामतीव सुलभस्त्वमसीह येषां
नन्दात्मजे त्वयि रतिर्नरबाललीले ॥ ५० ॥

यस्य सौभाग्यस्य ॥ ५० ॥

तदनुजानीहि नाथ नाथय नो मनोरथं यथा भवदीयचरणारविन्द एव रतिमुद्वहन्तो हन्तोचित्येन प्रारब्धफलमुपभुञ्जानो समयं गमयावहे ॥ ५१ ॥

नो• आवां, मनोरथं वाञ्छितं, नाथय याचय, प्रार्थनां कारय ॥ ५१ ॥

इति यावदन्तर्हित्य तौ दिशमुत्तरामुपययतुस्तावदेव देवदिङ्नागनागपुरनागरीवाधिर्यकारिणा चासितघोषेण घोषेण तेन पततोर्लब्धशापसंयमयोर्यमयोरर्जुनयोर्गतरसा तरसा सर्वैव बालवृद्धनरनारीसंहतिर्व्रजेश्वरी च वितर्कं पुरस्कृत्य कृत्यपराङ्मुखहृदया हृदयारूढपरमशङ्कया कयाचन तत्रैवोपससाद ॥ ५२ ॥

दिङ्नागा दिग्गजाः, चासितो घोषो गोकुलं येन तेन घोषेण हेतुना गतो रसो यस्याः सा ॥ ५२ ॥

आगत्य च भगवते बालकृष्णाय दण्डवत् प्रणामार्थं पतिताया भुवो हस्ताविव पातालविवराद्युगपदूर्ध्वमुत्थाय पृथगयियासन्तावजगराविव भगवतैव युगपत् पातितावादिदैत्यौ मधुकैटभाविव पतितौ सहादुमावन्तरान्तरायरहितमनाकुलमकुतोभयं कुतोऽभयं वितरन्तमिव तं बालमुकुन्दं मुकुन्दं निधिमिव विलोकयन्तः ॥ ५३ ॥

हस्ताविति• द्वयत्तया द्वयोरन्यूनानतिरिक्तत्वम्, अजगराविवेत्यतिदैर्घ्यं, मधुकैटभाविवेति भयानकत्वमुक्तम्। अन्तरा मध्ये-अन्तरायैर्विघ्नै रहितम्। कुत इति, कुः पृथिवी तस्यै, सार्वेत्रिभक्ति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कस्तसिः,अभयं वितरन्तं ददतमिव । मुकुन्दं तन्नामानं, तथा च क्रमदीपिकायाम्,

"इन्द्रनीलमुकुन्दाद्यान् मकरानङ्गकच्छपान् ।
शङ्खपद्मादिकांश्चैव निधीनष्टौ क्रमाद्यजेत्" ॥ इति ॥ ५३ ॥

किमिदं किमिदमहो विना वात्ययात्ययासादनेन भुवि निपतितावेतौ महार्जुनौ, कस्मादकस्मादयं वोभयतो भयतोदकरावेतावन्तरान्तरालेख्यगतं नवपयोदशकलमिव शिशुरयं समुज्जिहीते ही-तेन भाग्यं नोऽधिकतरं बलीयो यदयं निराकुल एवास्ते ॥ ५४ ॥

अत्ययासादनेन नाशप्राप्या, "विप्रान्तः प्रलयोऽत्यय" इत्यमरः । कृष्णस्य भयकरौ-आत्मनोश्च तोदकरौ-इत्युभयतो भयतोदकरौ । अन्तरालेख्यम्- अन्तश्चित्रं, समुज्जिहीते समुद्भवति, हीति विस्मये ॥ ५४ ॥

किमेनयोश्चिरकालीनतयोपनतयोपप्लवकारिण्या जया मूलमेव जीर्णं, तेन निजविस्तारभारेणैवानयोर्निपातः, न च तथा, मूलमनयोः सरसमेव, समे बहुलश्लिष्टानिवहे स्निग्धता स्थूलता च, इति मीमांसमानेषु समानेषु सुखदुःखाभ्यां व्रजजनेषु व्रजपुरंदरोऽदरोदितस्मितसुधालेशपेशलास्यं कुर्वतेव मनसा त्वरमाणेन, पितरमालोक्य समुल्लसन्तं, मुल्लसन्तं तं बालकृष्णं मोचयित्वाङ्केकृत्य, कृत्यकोविदामपि स-भार्यां सभार्यां महदनार्यं कृतं भवत्येति जुगुप्समानो गर्गगिरमनुस्मृत्य, स्मृत्यविरोधेन ज्ञातमहिम्नः पुत्रस्यैवेयं कृतिरिति मनसि विदांचक्रार ॥ ५५ ॥

उपनतया प्राप्तया । समे द्वयोरपि तुल्ये शाखासमूहे, मीमांसमानेषु विचारयत्सु । सुखदुःखाभ्यामिति, कृष्णस्य स्वस्तिदृष्ट्या भयसंभावनया च । पेशलं सुन्दरं, "पेशलो रुचिरे दक्षे" इति विश्वः । समुल्लसन्तमिति पितरमित्यस्य विशेषणं, मुदा लसन्तमिति बालकृष्णमित्यस्य । स नन्दः, भार्यां श्रीयशोदां, सभासु- आर्याम् । आनार्यं निन्द्यम् । जुगुप्समानो निन्दन् । गर्गगिरं "नारायणसमो गुणै"रित्यादिकाम् । स्मृत्यविरोधेन, धर्मशास्त्रोक्तं यत् कृष्णैश्वर्यं तद्यथार्थतया । प्रकारान्तरेण ज्ञातमपि नन्दवात्सल्यस्य विरोधं नाकरोदित्यर्थः । यद्वा, स्मृतिरिच्छा तदविरोधेन, पुत्रप्रभावः पित्रोः सुखायैव स्यादिति । "स्मृतिरिच्छाधियोर्धर्मसंहितायामपि स्मृति"रिति विश्वः ॥ ५५ ॥

तस्मिन्नेव समये सहचराः शिशवोऽपि भो भो अनेनसानेन सांप्रतं तिर्यगेव कृत्वोलूखलं समेखलं समेतभरेणाकर्षणेन समूलमुन्मूलितावेतावितीति यदूचिरे, चिरेणापि न तत् केऽपि प्रतीयुः, अनन्तरं कृतस्वस्त्ययनं सकलस्वस्त्ययनं तं बालकृष्णं दधिदूर्वाक्षतादिनाऽक्षतादिना नारायणगुणाधिकगुणं निर्मज्ज्य कृतमङ्गलतूर्यघोषेण भवनं प्रवेशयामास घोषाधीशः ॥ ५६ ॥

अनेनसा- अनघेन, अनेन कृष्णेन, समेखलं मेखलासहितं, समेतभरेण संप्राप्तभरेण, तस्याकर्षणेन, अक्षतं क्षताभावः ॥ ५६ ॥

अथ तथैव कदाचन धूलिखेलालसं लालसं वयस्यबालकेषु निजपरागपटलेन धूसरमिन्दीवरमिव धूलिधोरणिकलिलममलकलेवरमभ्रविभ्रमं भ्रमन्तमितस्ततस्ततखेलनकुतुकावेशेन गमितामितकालं सरामममिरामचरितं यथाकालमालयमप्राप्तमवलोक्य ॥ ५७ ॥

धूलिखेलायां रसो यस्य तं, लालसीति लालसं, यङ्लुगन्तात् पचाद्यच्, धूलीनां धोरणिभिः श्रेणिभिः कलिलं संकीर्णम् । अभ्रविभ्रममिति पुनरभ्रोपमा-इतस्ततो भ्रमणसाधर्म्येण लीलामृतवृष्ट्या च । ततो विस्मृतः खेलन एव यः कुतुकावेशस्तेन ॥ ५७ ॥

सखेदया दयावत्या व्रजपुरपरमेश्वर्या प्रहीयमाणाऽहीयमानानन्तपरमसुकृताधिरोहिणी रोहिणी देवी त्वरितमागत्य गत्यवसादेनाप्यसन्नपदकमला दूरत एव तात प्रातरारभ्य संततंतन्यमानखेलयालयागमनमपि विस्मृतम् ॥ ५८ ॥

प्रहीयमाणा प्रस्याप्यमाणा, वर्तमानसामीप्ये वर्तमानत्वात्, प्रहितेत्यर्थः । अहीयमानानि त्यक्तुमयोग्यानि- अनन्तानि परमसुकृतानि- अधिरोढुमधिरोहयितुं वा शीलमस्याः सा । न सचे विशीर्णे पदकमले यस्याः, रामकृष्णयोर्दर्शनसुखावेशादिति भावः ॥ ५८ ॥

गगनमध्यमध्यवरुह्य तपति ललाटंतपस्तपन एषः । कथमनेन नवनीतकोमलेन वपुषा घनघर्माघातमपि न सहसे, सहसेमं खेलारसमपहाय सह सहचरैरेव समेहि, समेहि काले कृतमज्जनो भवदभिरामेण रामेण पूर्वजनिना सह कृताशनो जननीमनः प्रमोदयेत्यूचे ॥ ५९ ॥

ललाटंतप इति, "अर्यललाटयोर्दृंशितपो"रिति खश् ॥ ५९ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति तदुक्त्यापि यदि खेलातो न विरराम रामकनीयान्, तदा गृहागतायां राममातरि मातरिश्ववेगतो गतोत्साहा व्रजेश्वरी स्वयं स्वयन्त्रणया त्वरितमागत्य राममामन्त्र्य निजगाद, वत्स राम त्वरितमेहि मे हितं वचनमाकर्णय तव मुखमीक्षमाणो व्रजपुरपुरंदरोऽपि निरशन एव वर्तते ॥ ६० ॥

मातरिश्ववेगतः पवनवेगेन, त्वरितमागत्य स्वयन्त्रणया स्वखेदेन ॥ ६० ॥

विशेषतश्चाह, वत्स कृष्ण भवतोऽद्य जन्मर्क्षयोगे मङ्गलाभिषिक्तः द्विजसुरवराशिषा समर्चितः सदाचारसमुचितं त्वमपि तेभ्यः कनकवसनादि जनकोपनीतमुपकल्प्य जनकेन सह भोक्तुमर्हसि ॥ ६१ ॥

स्वभावत एव सदा दानप्रियं कृष्णं तदुत्साहमुत्पाद्य खेलातो निवर्तयति विशेषतश्चेति ॥ ६१ ॥

इति निगदन्ती दन्तीन्द्रगामिनी निकटमभ्येत्य वत्स गृहीति कृष्णकरकमलमाधृत्य बलदेवमयतः कृत्वा सहचरानपि सहानयन्ती नयं तीव्रमुपादयन्ती स्वयमेव सहोदरयो रयोपनायितमङ्गलाभ्यङ्गोद्वर्तनस्नपनमार्जनपरिधापनानुलेपनभूषणमालादिसकलसामग्रीका दलदिन्दीवरसोदरतः कलेवरतो वरतो धूलिमपनीयातिमितातिमितवसनशकलेन परिमृज्य च पुनरभ्यङ्गादिनोपचर्य तदवसरमीक्षमाणस्य व्रजराजस्याभिमुखमुपनिनाय रामकृष्णौ ॥ ६२ ॥

नयं तीव्रमिति, मातुरीदृश्येव नीतिः प्रशस्यते यत् पुत्रस्य खेलासुखमपीयं न सहते, भोजनापेक्षयेति भावः । रयेण वेगेन· उपनायिता दासीवृन्दद्वारैव निकटमानायिता मङ्गलाभ्यङ्गोद्वर्तनादिसामग्री यया सा । विकसितनीलाम्बुजसदृशात्· अङ्गात्· प्रथमं स्वपाणिभ्यां स्वाञ्चलेन वा धूलीमपनीय, पुनरतिसूक्ष्मधूलीनिरसनाय· अतिमितम्· अतिपरिमितं महासूक्ष्मतन्तुमयत्वात्, तिमितम्· आर्द्रीकृतं "तिम ष्टिम ष्टीम आर्द्रीभाव" इति धातुः ॥ ६२ ॥

उपसन्नयोश्च तयोः प्रमुदितमना मनाक् स्मितपूर्वमवेक्ष्य वदनं निजमङ्कमारोपयामास व्रजराजः ॥ ६३ ॥

तयोर्वदनं स्मितपूर्वं मनागवेक्ष्येति हर्षसंगोपक्रमतिगाम्भीर्यं द्योतितम् ॥ ६३ ॥

तदनु तनयाभ्यां सह भोजनारम्भे सहोपसन्नान् सहचरानपि भगवज्जननी निजतनयसाधारण्येन भृत्यजनैः कारिताभ्यङ्गादिसकलोपचारान् समाहूय कृष्णेन सहैव विधिवदाशयित्वा निजगृहान् प्रापिपयिषुरपि वत्सौ मा परमेतावन्तं कालं खेलनीयं यद्यप्ययमतिचञ्चलो मद्बालः खेलां न परिहरति तथापि भवद्भिः क्षणमेव खेलित्वा मद्गृहे स्वगृहे वा गन्तव्यं, तथा सति कथमेकक एव खेलतु, इति सदयं तान् विसर्जयामास, अथापरेद्युरपि कयापि फलविक्रयिण्या केन क्रेयाणि फलानीति चतुरया रयासादितव्रजराजपुरद्वारया पुनरुदीरिते व्याहारे हारेण विलसदुरःस्थलः स्थलकमलचरणः करपुटपुटकिनीप्रसूनाभ्यां गृहान्तरतः क्रमनिर्गलनेन द्विचधान्यावशिष्टं धान्याञ्जलिमादाय क्वणक्वणत्कारिकाञ्चनकिङ्किणीको बहिरियाय यदा, तदा जलमुग्धाममुग्धामलं मूर्तानन्दकन्दकल्पं तमालोक्य मुग्धात्मानमपि विस्मरन्ती सा सुकृतवती कृतवती करकमलाञ्जलिप्रपूरं फलवितरणम्, अथ तस्या भाजनान्तरे जनान्तरेणालक्षितानि रत्नान्येव बभूवुः ॥ ६४ ॥

करपुट एव पुटकिनीप्रसूने कमले ताभ्यां, "नालीकिनी पुटकिनी विसिनी नलिनीति चे"ति हारावली । जलमुग्धो मेघेभ्योऽपि धावा कान्त्या मुग्धं मनोहरं च तममलं च तं, यमकानुरोधेन विधेयांशाविमर्शः सोढव्यः । मुग्धा मूढा ॥ ६४ ॥

अथ कदाचिदपि तेनैवान्तर्यामिणा प्रेर्यमाणान्तःकरणैरुपनन्दसनन्दादिभिः स्थविरामीरमुख्यैः सरभसमास्थानीमास्थानीतमानसतया समास्थाय व्रजराजः सादरमूचे ॥ ६५ ॥

आस्थानीम्· आथा· इति पाश्चात्येषु ख्यातां सभां, समास्थाय सम्यगालम्ब्य, आस्थया· अपेक्षया· आनीतं करिष्यमाणमन्त्रणायां भद्राभद्रविवेकार्थमेकाग्र्यीकृतं न क्वापि चालितं मानसं यैस्तेषां भावस्तत्ता तया, "आस्था चालम्बनास्थानयवापेक्षासु कथ्यते" इति विश्वः ॥ ६५ ॥

॥ शेषमग्रे ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

SARVA-DARSANA-SANGRAHA

CHAPTER III.

THE ÁRHATA SYSTEM.

(Continued from page 263.)

The well-known triad, called the three gems, right intuition &c., are thus described in the *Paramágamasára* (which is devoted to the exposition of the doctrines of the Arhats,),—"Right intuition, right knowledge, right conduct are the path of liberation." This has been thus explained by Yogadeva.

a. When the meaning of the predicaments, the soul, &c., has been declared by an Arhat in exact accordance with their reality, absolute faith in the teaching,—i.e. the entire absence of any contrary idea,—is 'right intuition.' And to this effect runs the *Tattvártha-sútra*, "faith in the predicaments* is 'right intuition'". Or as another definition gives it, "Acquiescence in the predicaments declared by a Jina, is called 'right faith'; it is produced either by natural character or by the instruction." 'Natural character' means the soul's own nature, independent of another's teaching 'instruction' is the knowledge produced by the teaching of another in the form of explanation, &c.

b. 'Right knowledge' is a knowledge of the predicaments, soul, &c. according to their real nature, undisturbed by any illusion or doubt; as it has been said:

"That knowledge which embraces concisely or in detail, the predicaments as they actually are, is called 'right knowledge' by the wise."

This knowledge is fivefold as divided into *mati, śruta, avadhi, manas-paryáya*, and *kevala;* as it has been said, "*Mati, śruta, avadhi, manas-paryáya*, and *kevala*,—these are knowledge." The meaning of this is as follows: 1. *Mati* is that by which one cognizes an object through the operation of the senses and the mind, all obstructions of knowledge being abolished.

2. *Śruta* is the clear knowledge produced by *mati*, all the obstructions of knowledge being abolished.

3 *Avadhi* is the knowledge of special objects, caused by the abolition of hindrances, which is effected by 'right intuition' &c. *

4. *Manas-paryáya* is the clear definite knowledge of another's thoughts, produced by the abolition of all the obstructions of knowledge caused by the veil of envy.

5. *Kevala* is that pure unalloyed knowledge, for the sake of which ascetics practice various kinds of penance. The first of these is not self-cognized, the other four are. Thus it has been said:

"True knowledge is a proof which nothing can overthrow, and which manifests itself as well as its object; it is both supersensuous and itself an object of cognition, as the object is determined in two ways."

But the full account of the further minute divisions must be got from the authoritative treatise above-mentioned.

c. 'Right conduct' is the abstaining from all actions tending to evil courses, by one who possesses faith and knowledge, and who is diligent in cutting off the series of actions and their effects which constitutes mundane existence. This has been explained at length by the Arhat;

"1. Right conduct is described as the entire relinquishment of blameable impulses; this has been subjected to a fivefold division, as the five 'vows', *ahimsá súnṛitá, asteya, brahmacharyá*, and *aparigraha*. †

2. The 'vow' of *ahimsá* is the avoidance of injuring life, by any act of thoughtlessness, in any moveable or immoveable thing.

3. A kind, salutary, and truthful speech is called 'vow' of *súnṛita*. That truthful speech is not truthful, which is unkind to others and prejudicial.

* In p. 31, line 5 *infra*, read *tattvárthe* for *tattvártham*.

* I read in p. 32. l. 9 *Samyagdarśanádi* for *asamyagdarśanádi*; but the old text may mean "caused by the abolition of hindrances produced by the qualities, wrong intuition, &c."

† Cf. the five *yamas* in the *Yoga-sútras*, ii. 30. Hemachandra (*Abhidh.* 81) calls them *yamas*.

॥ सर्वदर्शनसङ्ग्रहः ॥

रत्नत्रयपदवेदनीयतया प्रसिद्धं सम्यग्दर्शनादित्रितयमर्हत्प्रवचनसङ्ग्रहपरे परमागमसारे प्ररूपितं सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति । विवृतञ्च योगदेवेन, येन रूपेण जीवाद्यर्था व्यवस्थितस्तेन रूपेणार्हता प्रतिपादिते तत्त्वार्थे विपरीताभिनिवेशरहितत्वाद्यपरपर्य्यायं श्रद्धानं सम्यग्दर्शनं, तथा च तत्त्वार्थसूत्रं, तत्त्वार्थे श्रद्धानं सम्यग्दर्शनमिति । अन्यदपि, रुचिर्जिनोक्ततत्त्वेषु सम्यक् श्रद्धानमुच्यते । जायते तद्विसर्गेण गुरोरधिगमेन वेति ॥ परोपदेशनिरपेक्षमात्मस्वरूपं निसर्गः । व्याख्यानादिरूपपरोपदेशजनितं ज्ञानमधिगमः । येन स्वभावेन जीवादयः पदार्था व्यवस्थिताः तेन स्वभावेन मोहसंशयरहितत्वेनावगमः सम्यग्ज्ञानम् । यथोक्तम् । यथावस्थिततत्त्वानां संक्षेपाद्विस्तरेण वा । योऽवबोधस्तमत्राहुः सम्यग्ज्ञानं मनीषिण इति ॥ तज्ज्ञानं पञ्चविधं मतिश्रुतावधिमनःपर्य्यायकेवलभेदेन । तदुक्तम्, मतिश्रुतावधिमनःपर्य्यायकेवलानि ज्ञानमिति । अस्यार्थः ज्ञानावरणक्षयोपशमे सति इन्द्रियमनसी पुरस्कृत्य व्याप्तः सन् यथार्थं मनुते सा मतिः । ज्ञानावरणक्षयोपशमे सति मतिजनितं स्पष्टं ज्ञानं श्रुतम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

4. The not taking what is not given is declared to be the 'vow' of *Asteya*; the external life is a man's property, and, when it is killed, it is killed by some one who seizes it.

5. The 'vow' of *brahmacharyá* (chastity) is eighteenfold,—viz. the abandonment of all desires, * heavenly or earthly, in thought, word, and deed, and whether by one's own action or by one's consent, or by one's causing another to act.

6. The vow of *aparigraha* is the renouncing of all delusive interest in everything that exists not; since bewilderment of thought may arise from a delusive interest even in the unreal.

7. When carried out by the five states of mind in a fivefold order, these great 'vows' of the world produce the eternal abode."

The full account of the five states of mind (*bhávaná*) has been given in the following passage [of which I only quote one śloka;]

"Let him carry out the 'vow' of *súnṛita* uninterruptedly by the abstinence from laughter, greed, fear, and anger, and by the deliberate avoidance of speech†,' —and so forth.

These three, right intuition, right knowledge, and right conduct, when united, produce liberation, but not severally; just as, in the case of an elixir, it is the knowledge of what it is, faith in its virtues, and the actual application of the medicine‡, united, which produce the elixir's effect, but not severally.

Here we may say concisely that the *tattvas* or predicaments are two, *jíva* and *ajíva*; the soul, *jíva*, is pure intelligence,—the non-soul, *ajíva*, is pure non-intelligence. Padmanandin has thus said:

"The two highest predicaments are 'soul' and 'non-soul'; 'discrimination' is the power of discriminating these two, in one who pursues what is to be pursued and rejects what is to be rejected. The affection of the agent, &c., are to be rejected, these are only for the non-discriminating; the supreme light [of knowledge] is alone to be pursued, which is defined as *upayoga*."

Upayoga [or 'the true employment of the soul's activities'] takes place when the vision of true knowledge recognises the manifestation of the soul's innate nature; but as long as the soul, by the bond of *pradeśa* and the mutual interpenetration of form which it produces [between the soul and the body,] considers itself as identified with its actions [and the body which they produce,] knowledge should rather be defined as 'the cause of its recognizing that it is other than these.'*

Intelligence (*chaitanya*) is common to all souls and is the real nature of the soul viewed as *pariṇata* [i. e. as it is in itself;] but by the influence of *upaśama-kshaya* and *kshayopaśama*; it appears in the 'mixed' form as possessing both,† or again, by the influence of actions as they arise, it assumes the appearance of foulness, &c.‡ As has been said by Váchakáchárya, [in a sútra,]

---

* I read कामानां for कामाणां in p. 33, l. 7. (2 × 3 × 3 = 18.

† For *abhásháṇa* see Hemach. 16.

‡ I propose in p. 33, l. 17. रसायनज्ञानश्रद्धावचारणानि for रसायनज्ञानं श्रद्धानावरणानि. For *avachárana* see *Suśruta*, vol. ii. p. 157, &c.. It *anávaraṇa* be the true reading I suppose it must mean 'the absence of obstructions.'

* This is a hard passage, but some light is thrown on it by the scholiast to Hemachandra, *Abhidh.* 79.

† Or this may mean "by the influence of *upaśama-kshaya* or *kshayopaśama* it appears characterized by one or the other."

‡ I read in p. 34. l 7. *kalushádyákárena* for *kalushányákárena*. —The *upaśamakshaya* and *kshayopaśama* respectively correspond to the *aupaśamika* and *kshayika* states about to be described.

असम्यग्दर्शनादिगुणजनितत्तयोपशमनिमित्तम् अवच्छिन्नविषयं ज्ञानमवधिः । ईर्ष्यान्तरीयज्ञानावरणक्षयोपशमे सति परमनोगतस्यार्थस्य स्फुटं परिच्छेदकं ज्ञानं मनःपर्य्यायः । तपःक्रियाविशेषात् यदर्थं सेवन्ते तपस्विनस्तज्ज्ञानमन्यज्ञानासंस्पृष्टं केवलम् । तत्राद्यं परोक्षं प्रत्यक्षमन्यत् । तदुक्तम्, विज्ञानं स्वपराभासि प्रमाणं बाधवर्ज्जितम् । प्रत्यक्षञ्च परोक्षञ्च द्विधा मेयविनिश्चयादिति । अन्तर्गणिकभेदस्तु सविस्तरस्तत्रैवागमेऽवगन्तव्यः । संसरणकर्म्मोच्छित्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापागमनकारणक्रियानिवृत्तिः सम्यक्चारित्रम् । तदेतत् सप्रपञ्चमुक्तमर्हता, सर्व्वसावद्ययोगानां त्यागश्चारित्रमुच्यते । कीर्त्तितं तदहिंसादिव्रतभेदेन पञ्चधा । अहिंसासूनृतास्तेयब्रह्मचर्य्यापरिग्रहाः ॥ न यत्प्रमादयोगेन जीवितव्यपरोपणम् । चराणां स्थावराणाञ्च तदहिंसाव्रतं मतम् ॥

प्रियं पथ्यं वचस्तथ्यं सूनृतं व्रतमुच्यते । तत्तथ्यमपि नो तथ्यमप्रियञ्चाहितञ्च यत् ॥ अनादानमदत्तस्यास्तेयं व्रतमुदीरितम् । बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते ॥ दिव्यौदारिककामानां कृतानुमतकारितैः । मनोवाक्कायतस्त्यागो ब्रह्माष्टादशधा मतम् ॥ सर्व्वेभावेषु मूर्च्छायास्त्यागः स्यादपरिग्रहः । यदसत्स्वपि जायेत मूर्च्छया चित्तविप्लवः ॥ भावनाभिर्भावितानि पञ्चभिः पञ्चधा क्रमात् । महाव्रतानि लोकस्य साधयन्त्यव्ययं पदमिति ॥ भावनापञ्चकप्रपञ्चनञ्च प्ररूपितम्, हास्यलोभभयक्रोधप्रत्याख्यानैर्निरन्तरम्। आलोच्याभाषणेनापि भावयेत् सूनृतं व्रतमित्यादिना ॥ एतानि सम्यग्दर्शनज्ञानचारित्राणि मिलितानि मोक्षकारणं न प्रत्येकं यथा रसायनज्ञानश्रद्धानावरणानि सम्भूय रसायनफलं साधयन्ति न प्रत्येकम् । अत्र संक्षेपतस्तावज्जीवाजीवाख्ये द्वे तत्त्वे स्तः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"The *aupaśamika*, the *Kshâyika*, and the 'mixed' states are the nature of the soul, and also the *audayika* and the *Pâriṇâmika*."

1. The *aupaśamika* state of the soul arises, when all the effects of past actions have ceased and no new actions arise [to affect the future], as when water becomes temporarily pure through the defiling mud sinking to the bottom by the influence of the clearing nut-plant,* &c.

2. The *Kshâyika* state arises when there is the absolute abolition of actions and their effects, as in final liberation.

3. The 'mixed' (*miśra*) state combines both these as when water is partly pure.

4 The *Audayika* state is when actions arise [exerting an inherent influence on the future.] The *Pâriṇâmika* state is the soul's innate condition as pure intelligence &c., and disregarding its apparent states as (1), (2) (3), (4). †This nature in one of the above-described varieties is the character of every soul, whether happy or unhappy. This is the meaning of the Sútra quoted above.

This has been explained in the *Svarûpa-sambodhana*. "Not different for knowledge and yet not identical with it,—in some way both different and the same,—knowledge is its first and last,—such is the soul described to be."

If you say, that, "as difference and identity are mutually exclusive, we must have one or the other in the case of the soul, and its being equally both is absurd,"—we reply, that there is no evidence to support you when you characterize it as absurd. Only a valid non-perception* can thus preclude a suggestion as absurd; but this is not found in the present case, since (in the opinion of us, the advocates of the *Syâd-vâda*,) it is perfectly notorious that all things present a mingled nature of many contradictory attributes.

Others lay down a different set of *tattvas* from the two mentioned above, *jîva* and *ajîva*; they hold that there are five *astikâyas* or categories,—*jîva*, *âkâśa*, *dharma*, *adharma*, and *pudgala*. To all these five we can apply the idea of 'existence,' (*asti*†), as connected with the three divisions of time, and we can similarly apply the idea of 'body' (*kâya*‡), from their occupying several parts of space.

The *jîvas* (souls) are divided into two, the 'mundane' and the 'released.' The 'mundane' pass from birth to birth; and these are also divided into two, as those possessing an internal sense (*samanaskâh*) and those destitute of it (*amanaskâh*). The former possess *saṁjñâ*, i. e. the power of apprehension, talking, acting, and receiving instruction; the latter are those without this power. These latter are also divided into two, as 'locomotive' (*trasa*), concurrent, or 'immoveable' (*sthâvara*.)

The 'locomotive' are those possessing at least two senses [touch and taste], as shell-fish, worms, &c., and are thus of four kinds [as possessing two, three, four, or five senses;] the 'immoveable' are earth, water, fire, air, and trees.§ But here a distinction must be made. The dust of the road is properly 'earth,' but bricks

* *Strychnos potatorum.*

† Just as in the Sânkhya philosophy, the soul is not really bound though it seems to itself to be so.

* A valid non-perception is when an object is not seen and yet all the usual concurrent causes of vision are present, such as the eye, light, &c.

† I read in the p. 35, l. 5. स्तोति for स्थिति.

‡ Hence the term here used for 'category.'—*astikâya.*

§ These (by Hemach. *Abhidh* 21,) possess only one sense, touch.—In p. 35, l. 10 I read अङ्गगण्डोलकप्रभृतयस्त्रसाश्चतुर्विधाः पृथिव्यप्तेजो o. This is a necessary correction.

तत्र बोधात्मको जीवः, अबोधात्मकस्त्वजीवः। तदुक्तं पद्मनन्दिना, चिदचिद्वे परे तत्त्वे विवेकस्तद्विवेचनम्। उपादेय-मुपादेयं हेयं हेयञ्च कुर्व्वतः॥ हेयं हि कर्तृरागादि तत् कार्य्यमविवेकिनः। उपादेयं परं ज्योतिरुपयोगैकलक्षणमिति॥ सहजविद्रूपपरिणतिं स्वीकुर्व्वाणस्य ज्ञानदर्शने उपयोगः स परस्परप्रदेशात् प्रदेशबन्धात् कर्म्मणैकीभूतस्यात्मनोऽन्यत्व-प्रतिपत्तिकारणलक्षणं भवति। सकलजीवसाधारणं चैतन्य-मुपशमक्षयक्षयोपशमवशादौपशमिकक्षायिकक्षायोपशमिकभा-वेन कर्म्मोदयवशात् कलुषान्याकारेण च परिणतजीवपर्य्याय-जीवविवक्षायां स्वरूपं भवति। यदवोचद्वाचकाचार्य्यः, औप-शमिकक्षायिकौ भावौ मिश्रश्च भावो जीवस्य सत्त्वमौदयिक-पारिणामिकौ चेति। अनुदयप्राप्तिरूपे कर्म्मण उपशमे सति जीवस्योत्पद्यमानो भाव औपशमिकः, यथा पङ्के कलुषतां कु-र्व्वति कतकादिद्रव्यसम्बन्धादधः पतिते जलस्य स्वच्छता। कर्म्मणः क्षयोपशमे सति जायमानो भावः क्षायिकः, यथा मेघः। उभयात्मा भावो मिश्रः, यथा जलस्यार्द्धस्वच्छता। कर्म्मोदये सति भवन् भाव औदयिकः। कर्म्मोपशमाद्यनपेतः सहजो भावश्चेतनत्वादिः पारिणामिकः। तदेतत् सत्त्वं यथासम्भवं भव्यस्याभव्यस्य वा जीवस्य तत्त्वं स्वरूपमिति सूत्रार्थः। तदुक्तम्, स्वरूपसम्बोधने, ज्ञानाद् भिन्नो नचाभिन्नो भिन्नाभिन्नः कथञ्चन। ज्ञानं पूर्व्वापरीभूतं सोऽयमात्मेति कीर्त्तित इति॥ ननु भेदाभेदयोः परस्परपरिहारेणावस्थानाद-न्यतरस्यैव वास्तवत्वादुभयात्मकत्वमयुक्तमिति चेत्तदयुक्तम्। बाधे प्रमाणाभावात्, अनुपलम्भो हि बाधकं प्रमाणं न सो-ऽस्ति समस्तेषु वस्तुष्वनेकरसात्मकत्वस्य स्याद्वादिनो मते सुप्रसिद्धत्वादित्यलम्। अपरे पुनर्जीवाजीवयोरपरं प्रपञ्चमा-चक्षते, जीवाकाशधर्म्माधर्म्मपुद्गलास्तिकायभेदात्। एतेषु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

&c., are aggregated 'bodies of earth,' and that soul by whom this body is appropriated becomes 'earthen-bodied,' and that soul which will hereafter appropriate it is the 'earth-soul.' The same four divisions must also be applied to the others, water, &c. Now the souls which have appropriated or will appropriate the earth &c., as their bodies, are reckoned as 'immoveable'; but earth &c., and the 'bodies of earth, &c.' are not so reckoned, because they are inanimate.* These other immoveable things and such as only possess the one sense of touch are considered as 'released,' since they are incapable of passing into any other state of existence.

Dharma, *adharma* and *ákáśa* are singular categories [and not generic,] and they have not the attribute of 'action,' but they are the causes of a substance changing its place.

Dharma, 'merit,' and *adharma*, 'demerit,' are well-known. They assist souls in progressing or remaining stationary in the universally extended † sky [or ether] characterized by light and also called Lokákáśa; hence the presence of the category 'merit' is to be inferred from progress, that of 'demerit' from stationariness. The effect of *ákáśa* is seen when one thing enters into the space previously occupied by another.

Pudgala, 'body,' possesses touch, taste and colour. Bodies are of two kinds, atomic and compound. Atoms cannot be enjoyed; ‡ the compounds are the binary and other combinations. Atoms are produced by the separation of these binary and other compounds, while these arise from the conjunction of atoms. Compounds sometimes arise from separation and conjunction [combined;] hence they are called *pudgalas*, because they 'fill' *(púr)* and 'dissolve' *(gal.)* * Although 'time' is not properly an *astikáya*, because it does not occupy many separate parts of space [as mentioned in the definition,] still it is a *dravya* [or *tattva*,] as the definition will hold, 'substance' *(dravya)* possesses qualities and action.' † Qualities reside in substance but do not themselves possess qualities as the general qualities, knowledge &c., of the *jíva*,—form &c. of the body, and the power of causing progress, stationariness, and motion into a 'place previously occupied, in the case, respectively, of merit,' 'demerit,' and *ákáśa*. 'Action' (*paryáya*) has thus been defined, the actions (*paryáyáh*) of a substance are, as has been said:

"Its existence, its production, its being what it is, its development, its course to the end,' as e. g. in the *jíva* the knowledge of objects as of a jar, &c, happiness, pain, &c., in the *pudgala* the lump of clay, the jar, &c;—in merit and demerit the special functions of progress, &c. Thus there are six substances or tattvas, [i. e. the five above-mentioned and 'time'.]"

Others reckon the *tattvas* as seven, as has been said, "The *tattvas* are *jíva*, *ajíva*, *ásrava*, *bandha*, *samvara*, *nirjará*, and *moksha*." *Jíva* and *ajíva* have been already described. *Asrava* is described as the move-

* In p. 35, l. 16, I read तेषामजीवत्वात् for तेषां जीवत्यात् If we keep the old reading, we must translate it, "because the former only are animate."

† In p. 35. l. 3. from bottom I read सर्वत्रावस्थिते for सर्वत्रावस्थिति० In the preceding line I read आलोकेनावच्छिन्ने for ślokenávichchhinne.

‡ Cf. Siddhánta-muktávali, p. 27. The *vishaya* is *upabhoga-sádhanam* but it begins with the *dryanuka*. This category takes up the forms of *sthávara* which were excluded from *jíva*.

* It is an interesting illustration how thoroughly Mádhava for the time throws himself into the Jaina system which he is analyzing, that he gives the Jaina terminology for this definition of *dravya*., cf. *Vaiśesh Sútra* i. 1. 15.—*Paryáya* is explained as *karman* in Hemach. *Anek.*

† *Paryáya* in p. 36. l. 11. seems used in a different sense from that which it bears elsewhere. I have taken it doubtingly as in Hemach *Abhidh.* 1503, *paryáyo' nukramah kramah.*

यञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया ऽस्तीतिव्यपदेशो ऽनेकप्रदेशत्वेन शरीरवत् कायव्यपदेशः । तत्रजीवा द्विविधाः संसारिणो मुक्ताश्च । भवाद् भवान्तरप्राप्तिमन्तः संसारिणः । ते च द्विविधाः समनस्का अमनस्काश्च, तत्र संज्ञिनः समनस्काः शिक्षाक्रियालापग्रहणरूपा संज्ञा तद्विधुरास्त्वमनस्काः । ते चामनस्का द्विविधाः त्रसस्थावरभेदात् । तत्र द्वीन्द्रियादयः शङ्खगण्डोलकप्रभृतयश्चतुर्विधास्त्रसाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः । तत्र मार्गगतधूलिः पृथिवी, दृष्टकादिः पृथिवीकायः, पृथिवी कायत्वेन येन गृहीता स पृथिवीकायकः, पृथिवीं कायत्वेन यो ग्रहीष्यति स पृथिवीजीवः । एवमवादिष्वपि भेदचतुष्टयं योज्यम् । तत्र पृथिव्यादि कायत्वेन गृहीतवन्तो ग्रहीष्यन्तश्च स्थावरा गृह्यन्ते न पृथिव्यादिपृथिवीकायादयः तेषामजीवत्वात् । ते च स्थावराः स्पर्शनैकेन्द्रियाश्च, भवान्तरप्राप्तिविधुरा मुक्ताः धर्म्माधर्म्माकाशास्तिकायास्ते एकत्वशालिनो निष्क्रियाश्च धर्म्मद्रव्यस्य देशान्तरप्राप्यप्राप्तिहेतुः । तत्र धर्म्माधर्म्मौ प्रसिद्धौ आलोकेनावच्छिन्ने नभसि लोकाकाशपदवेदनीये सर्व्वत्रावस्थितिगतिस्थित्युपग्रहौ धर्म्माधर्म्मयोरुपकारः, अतएव धर्म्मास्तिकायः प्रवृत्त्यनुमेयः अधर्म्मास्तिकायः स्थित्यनुमेयः । अन्यवस्तुप्रदेशमध्येऽन्यस्ववस्तुनः प्रवेशोऽवगाहः तदाकाशकृत्यम् । स्पर्शरसवर्णवन्तः पुद्गलास्ते च द्विविधाः अणवः स्कन्धाश्च, भोक्तुमशक्या अणवः द्व्यणुकादयः स्कन्धाः । तत्र द्व्यणुकादिस्कन्धभेदादण्वादिरुत्पद्यते अण्वादिसंघातात् द्व्यणुकादिरुत्पद्यते क्वचिद्भेदसंघाताभ्यां स्कन्धोत्पत्तिः । अतएव पूरयन्ति गलन्तीति पुद्गलाः । कालस्यानेकप्रदेशत्वाभावेनाऽस्तिकायत्वाभावेऽपि द्रव्यत्वमस्ति तल्लक्षणयोगात् । तदुक्तं, गुणपर्य्यायवद्द्रव्यमिति । द्रव्याश्रया निर्गुणा गुणा यथा जीवस्य ज्ञानत्वा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ment of the soul, called *yoga* *, whereby it participates in the movement of its various bodies, *audarika* † &c. As a door opening into the water is called *ásrava*, because it causes the stream to descend through it ‡, so this *yoga* is called *ásrava*, because by it as by a pipe actions and their consequences flow in upon the soul. Or as a wet garment collects the dust brought to it from every side by the wind, so the soul, wet with previous sins, collects, by its manifold points of contact with the body, the actions which are brought to it by *yoga*. Or as when water is thrown on a heated lump of iron, the iron absorbs the water altogether, so the *jíva*, heated by previous sins, receives from every side the actions which are brought by *yoga*. *Kasháya* ('sin,' 'defilement,) is so called, because it 'hurts' *(kash)* the soul by leading into evil states;—it comprises anger, pride, delusion and lust. *Asrava* is twofold, as good or evil. Thus ing from doing injury is a good *yoga* of the body,—speaking what is true, measured, and profitable is agood *yoga* of the speech.

These various subdivisions of *ásrava* have been described at length in the *Sútra-sandarbha*. "*Asrava* is the impulse to action with body, speech or mind, and it is good or evil as it produces merit or demerit," &c Others however explain it thus,—"*Asrava* is the action of the senses which impels the soul towards external objects; the light of the soul, coming in contact with external objects by means of the senses, becomes developed as the knowledge of form, &c." §

* *Yoga* seems to be here the natural impulse of the soul to act.

† In p. 36. l. 16. read औदारिक° for ओदारिक°.

‡ In l. 18 read *ásravaṇa-káraṇatvád.*

§ The *Jnána* is one but it becomes apparently manifold by its connection with the senses and external objects.

Bandha, "bondage,' is when the soul, by the influence of 'false intuition,' 'non-indifference,' 'carelessness,' and 'sin' *(kasháya,)* and also by the force of *yoga*, assumes various bodies occupying many parts of space, which enter into its own subtile body, and which are suited to the bond of its previous action. As has been said,—"Through the influence of sin the individual soul assumes bodies suitable to its past actions,—this is 'bondage'." In this quotation, the word 'sin' *kasháya)* is used to include the other three causes of bondage as well as that properly so termed. Váchakáchárya has thus enumerated the causes of bondage; "the causes of bondage are false intuition, non-indifference, carelessness, and sin."

a. 'False intuition' is twofold,—either innate from one's natural character, as when one disbelieves Jaina doctrines from the influence of former evil actions, irrespectively of another's teaching,—or derived, when learned by another's teaching.

b. 'Non-indifference' is the non-restraint of the five senses and the internal organ from the set of six, earth, &c.

c. 'Carelessness' (*pramáda*) is a want of effort to practise the five duties, *samiti*, *gupti*, &c.

d. 'Sin' consists of anger, &c. Here we must make the distinction that the four things, false intuition, &c., cause those kinds of bondage called *sthiti* and *anubháva*; *yoga* [or *ásrava*,] causes those kinds called *prakṛiti* and *pradeśa*.

'Bondage' is fourfold, as has been said—"*prakṛiti*, *sthiti*, *anubháva*, and *pradeśa* are its four kinds."

1. Prakṛiti means 'the natural qualities', as bitterness or sweetness in the vimba plant or molasses. This may be subdivided into eight *múla-prakṛitis*. *

* These are also called the eight *karmans*, of Govindánanda's gloss *Ved. Sút.* ii. 2. 33.

दिसामान्यरूपाः पुद्गलस्य रूपत्वादिसामान्यस्वभावाः धर्माधर्माकाशकायानां यथासम्भवं गतिस्थित्यवगाहहेतुत्वादिसामान्यानि गुणाः। तस्य द्रव्यस्योक्तरूपेण भवनमुत्पादस्तद्भावः परिणामः पर्य्याय इति पर्य्यायाः यथा जीवस्य घटादिज्ञानसुखक्लेशादयः पुद्गलस्य मृत्पिण्डघटादयः धर्मादीनां गत्यादिविशेषाः, अतएव षड् द्रव्याणीति प्रसिद्धिः। केचन सप्त तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षास्तत्त्वानीति। तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते औदारिकादिकायादिचलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः, यथा सलिलावगाहद्वारा नद्यास्रवणकारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकया कर्मास्रवतीति स योग आस्रवः। यथा आर्द्रं वस्त्रं समन्ताद्वातानीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म सर्व्वप्रदेशैर्गृह्णाति यथा वा निष्टप्तायःपिण्डो जले क्षिप्ते अम्भः समन्ताद् गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म्म समन्तादादत्ते। कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च स द्विविधः शुभाशुभभेदात्, तत्राहिंसादिः शुभः काययोगः। सत्यमितहितभाषणादिः शुभो वाग्योगः। तदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्म्मयोगः स आस्रवः शुभः पुण्यस्य, अशुभः पापस्येत्यादिना सूत्रसन्दर्भेण सप्रपञ्चमभाणि। अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रवः, इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण परिणमत इति। मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्म्मबन्धयोग्यानामादानमुपश्लेषणं यत् करोति स बन्धः। तदुक्तं, सकषायत्वाज्जीवः कर्म्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति। तत्र कषाययहणं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Thus obstructions (*ávaraṇa*) * cloud the knowledge and intuition, as a cloud obscures the sun or a shade the lamp. This is *a. jnánávaraṇa* or *b. darśanávaraṇa*. *c.* An object recognized as simultaneously existing or non-existing produces mingled pleasure and pain, as licking honey from a sword's edge—this is *vedaníya*. *d.* A delusion (*mohaníya*,) in intuition produces want of faith in the Jaina categories like association with the wicked; delusion in conduct produces want of self-restraint, like intoxication. *e. Ayus* produces the bond of body, like a snare.† *f. Náman* or 'the name' produces various individual appellations, as a painter paints his different pictures. *g. Gotra* produces the idea of noble and ignoble, as the potter fashions his pots. *h. Antaráya* produces obstacles to liberality, etc., as the treasurer hinders the king by considerations of economy.

Thus is the *prakṛiti-bandha* eightfold being denominated as the eight *múla-prakṛitis*, with subdivisions according to the different actions of the various subject matter.

And thus has Umáswámi-váchakáchárya declared; "the first kind of *bandha* consists of obstructions of the knowledge and the intuition, *vedaníya, mohaníya, áyus, náman, gotra*, and *antaráya*;" and he has also reckoned up the respective subdivisions of each, as five, nine, twenty-eight, four, two, forty, two, and fifteen. All this has been explained at full length in the *Vidyánanda* and other works, and here is omitted through fear of prolixity.

* The Calcutta MS. reads *ádaraṇíyasya* for *áraṇyasya* in p. 37 last line. But *ávaraṇíya* may be used for *ávaraṇa* (*Páṇ.* 3. 4. 68), cf. *Yoga Sút.* ii. 52, where Vyása's Comm. has *ávaraṇíya*.

† *Jálavat*? The printed text has *jalavat*.

2. *Sthiti.* As the milk of the goat, cow, buffalo, &c., have continued unswerving from their sweet nature for so long a period, so the first three *múla-prakṛitis*, *jnánávaraṇa*, &c., and the last, *antaráya*, have not swerved from their respective natures even through the period described in the words, "*sthiti* lasts beyond crores of crores of periods of time measured by thirty *ságaropamas*."* This continuance is *sthiti*.

3. *Anubháva.* As in the milk of goats, cows, buffaloes &c., there exists, by its rich or poor nature, a special capacity for producing† its several effects, so in the different material bodies produced by our actions there exists a special capacity (*anubháva*) for producing their respective effects.

4. *Pradeśa.* The *bandha* called *pradeśa* is the entrance into the different parts of the soul by the masses, made up of an endless number of parts, of the various bodies which are developed by the consequences of actions.

Samvara is the stopping of *ásrava*—that by which the influence of past actions (*karman*) is stopped from entering into the soul. It is divided into *gupti, samiti*, etc. *Gupti* is the withdrawal of the soul from that 'impulse' (*yoga*) which causes mundane existence,—it is threefold, as relating to body, speech, or mind. *Samiti* is the acting so as to avoid injury to all living beings. This is divided into five kinds, as ‡ *íryá, bháshá*, &c., as has been explained by Hemachandra.

* For the *Ságaropama* see Wilson's *Essays*, vol. i. p. 309.—In p. 8, l. 16 I read *ityádyukta-kálád úrdhvam api* for the obscure इत्याद्युक्तं कालदुर्द्धानवत् I also read at the end of the line—प्रच्युतिः स्थितिः for ० प्रच्युतिस्थितिः

† In p. 38, l. 18, read स्वकार्यकरणे.

‡ In p. 39. line 2 and line 5 for ईर्य्या read ईर्या,—a bad misreading.

सर्व्वबन्धहेतूपलक्षणार्थम्। बन्धहेतून् पपाठ वाचकाचार्य्यो, मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति। मिथ्यादर्शनं द्विविधं मिथ्याकर्म्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम्, अपरं परोपदेशजम्। पृथिव्यादिषट्कोपादानकं षडिन्द्रियासंयमनञ्च अविरतिः। पञ्चसमितिगुप्तिष्वनुत्साहः प्रमादः। कषायः क्रोधादिः। तत्र कषायान्ताः स्थित्यनुभाववन्धहेतवः प्रकृति प्रदेशबन्धहेतुर्योग इति विभागः। बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदेशास्तु तद्विधय इति. यथा निम्बगुडादेस्तिक्तत्वमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्भोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलेहनवद्दर्शनमोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवद् नाम्नो विचित्रनामकारित्वं चैत्रिकवद्गोत्रस्योच्चनीचकारित्वं कुम्भकारवद्वा नदीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः कोशाध्यक्षवत्। सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्म्मोपान्तरभेदमूलप्रकृतिवेदनीयः। तथा चोचदुमास्वामिवाचकाचार्य्यः, । आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्वेदश्च समग्रहात् पञ्चनवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चदशभेदा यथाक्रममिति। एतच्च सर्वं विद्यानन्दादिभिर्विवृतमिति विस्तरभयाच प्रस्तूयते। यथा अजागोमहिष्यादितीराणामेतावन्तमनेहसं माधुर्य्यस्वभावादप्रच्युतिः स्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतीनामादितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटिकोट्यः परा स्थितिरित्याद्युक्तकालादूर्ध्वमपि स्वीयस्वभावादप्रच्युतिः स्थितिः। यथा अजागोमहिष्यादितीराणां तीव्रमन्दादिभावेन स्वकार्य्यकरणे सामर्थ्यविशेषोऽनुभावः, तथा कर्म्मपुद्गलानां स्वकार्य्यकरणे सामर्थ्यविशेषोऽनुभावः। कर्म्म-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"1. In a public highway, kissed by the sun's rays,—to walk circumspectly so as to avoid injuring living beings —this the good call *iryá*.

"2. Let him practise* a measured utterance in his intercourse with all people; this is called *bháshá-samiti*, dear to the restrainers of speech.

3. The food which the sage takes, ever free from the forty-two faults which may accrue to alms, is called the *eshaṇá-samiti*.†

4. Carefully looking at it and carefully seating himself upon it, let him take a seat, &c., set it down, and meditate,—this is called the *ádána-samiti*.

5. That the good man should carefully perform his bodily evacuations in a spot free from all living creatures ‡,—this is the *utsarga-samiti*." § Hence samvara has been etymologically analysed as that which closes *(sam+vṛiṇoti)* the door of the stream of *ásrava* ‖, as has been said by the learned, "*Ásrava* is the cause of mundane existence, *samvara* is the cause of on; ¶ this is the Árhat doctrine in a handful; all else is only the amplification of this."

Nirjará is the causing the fruit of past actions to decay by self-mortification, &c; it destroys by the body the merit and demerit of all the previously performed actions, and the resulting happiness and misery; 'self-mortification' means the plucking out of the hair, &c. This *nirjará* is twofold * 'temporary' *(yathákála)* and ancillary *(aupakramaṇika)*. It is 'temporary' as when a desire is dormant in consequence of the action having produced its fruit, and at that particular time, from this completion of the object aimed at, *nirjará* arises, being caused by the consumption of the desire, &c. But when by the force of asceticism, the sage turns all actions into means for attaining his end (liberation), this is the *nirjará* of actions. Thus it has been said: "From the decaying of the actions which are the seeds of mundane existence, *nirjará* arises, which is two-fold, *sakámá* and *akámá*. That called *sakámá* belongs to ascetics, the *akámá* to other embodied spirits. †

E. B. C.

* In p. 39, l. 6, I read *ápadyetá* for ápadyatá —
† In p. 39. l. 9 for सेषणा० read सेषणा०
‡ In p. 39. l. 12 join *nirjantu* and *jagatitale*.
§ (Mádhava omits the remaining divisions of *samvara*. Wilson, *Essays*, i.p 311, gives them as *parishahá* 'endurance,' as of a vow; *yatidharma*, 'the ten duties of an ascetic, patience, gentleness, etc.; *bhávaná*, 'conviction, such as that worldly existences are not eternal, etc.; *cháritra* 'virtuous observance.'
‖ In p. 39, l. 14 read आस्रवस्रोतसो·
¶ For मोह in l. 16 read मोक्ष.

भावपरिणतपुद्गलस्कन्धानामनन्तान्तप्रदेशानाम् आत्मप्रदेशानुप्रवेशः प्रदेशबन्धः। आस्रवनिरोधः संवरः येनात्मनि प्रविशत् कर्म्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः। संसारकारणाद्योगादात्मनोगोपनं गुप्तिः। सा त्रिविधा कायवाङ्मनोनियहभेदात्। प्राणिपीडापरिहारेण सम्यगयनं समितिः सा ईर्याभाषादिभेदात् पञ्चधा। प्रपञ्चितञ्च हेमचन्द्राचार्य्यैः, लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः। जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम्॥ आपद्यतागतः सर्व्वजनीनं मितभाषणम्। प्रिया वाचंयमानां सा भाषासमितिरुच्यते॥ द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम्। मुनिर्यदन्नमादत्ते सैषणासमितिर्मता॥ आसनादीनि संवीक्ष्य प्रतिलङ्घ्य च यत्नतः। गृह्णीयाच्चिक्षिपेद्वायेत् सादानसमितिः स्मृता॥ कफमूत्रमलप्रायैर्निर्जन्तुजगतीतले। यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत्॥ अत एवास्रवः स्रोतसो द्वारं संवृणोतीति संवर इति निराहुः। तदुक्तमभियुक्तैः, आस्रावे भवहेतुः स्यात् संवरो मोक्षकारणम्। इतीयमार्हती मुष्टिरन्यदस्याः प्रपञ्चनम्॥ अर्जितस्य कर्म्मणस्तपः प्रभृतिभिर्निर्जरणं निर्जराख्यं तत्त्वं चिरकालप्रवृत्तकषायकलापं पुण्यं सुखदुःखे च देहेन जरयति नाशयति केशोल्लुञ्चनादिकं तप उच्यते। सा निर्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकजेति च गीयते। यत् कर्म्म तपोबलात् स्वकालमनयोदयावलिं प्रवेश्य प्रपद्यते तत् कर्म्म निर्जरा। यदाह संसारबीजभूतानां कर्म्मणां जरणादिह। निर्जरा संस्मृता द्वेधा सकामा कामनिर्जरा॥ स्मृता सकामा यमिनामकामात्वन्यदेहिनामिति।

THE
ŚULVASÚTRA OF BAUDHÁYANA,
WITH THE COMMENTARY BY DVÁRAKÁNÁTHAYAJVAN.

For the following edition of Baudháyana's Śulvasútra four MSS. have been used, one, belonging to the Library of the Benares College, containing the text only (M.) and three containing the text and the Commentary by Dvárakánáthayajvan, one belonging to the Library of the India Office, London (A.), another belonging to the Library of the Government College Benares (B.), the third in private hands at Benares (C.)

* In p. 39 l. 2 infr. I read यथाकालो० for यथा कालो०
+ This passage is very difficult and not improbably corrupt, and my interpretation of it is only conjectural. The ordinary *nirjará* is when an action attains its end, (like the lulling of a passion by the gratification) this lull is temporary. That *nirjará* is 'ancillary,' which is rendered by asceticism a means to the attainment of the highest good. The former is *akámá* 'desireless'—because at the moment the desire is satisfied and so dormant; the latter is *sakámá*, because the ascetic conquers the lower desire under the overpowering influence of the higher desire for liberation.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

In the first Paṭala extracts are occasionally given from the Śulvamímánsá, a commentary on Baudháyana's Śulvasútra and from the commentaries of Kapardisvámin and Karavindasvámin on the Śulvasútra of Ápastamba. These extracts have been taken from manuscripts belonging to the collection made by Mr. Burnell, which forms at present a part of the Library of the India Office; they are transcribed from the Granthacharacter into Devanágarí. The translation of the Sútras is partly periphrastic, as it is required for clearness' sake. It follows in most cases the explanation of the commentary; there are however a number of passages, for the right understanding of which the guidance of the commentator could not be accepted; in the more important cases this has been explicitly mentioned.

The publication of Baudháyana's Śulvasútra will be followed by that of the Sulvasútra of Ápastamba and of the Śulvapariśishṭa ascribed to Kátyáyana. It will be seen that these ancient rules for the construction of the various altars contain the first germs of geometrical speculation among the Indians. Only hints referring to this side of the question have been joined to the translation of the single sútras; a full discussion of the matter, founded on all śulva-texts which are accessible at present, will be given separatedly.

बौधायनीयशुल्वस्य प्रव्याख्याः प्रेक्ष्य यज्ञना।
टीकाभट्टात्मजेनेयं क्रियते शुल्वदीपिका॥

अथेमे ऽग्निचयाः। १

In the following we shall treat of the different manners of building the agni.

अथ गृह्यानन्तरम्। अग्निचयंग्रहणं वेद्या अप्युपलक्षणार्थम्।

तेषां भूमेः परिमाणविहारान्व्याख्यास्यामः। २

We shall explain how to measure out the circuit of the area required for them. (agni, vedi etc.)

परिमाणविशेषान्विहारान्। विहरणं नाम चतुरस्रादिरूपेण भूमेः करणम्।

अथाङ्गुलप्रमाणम्। ३

The following is the measure of an aṅgula.

सर्वप्रमाणशेषत्वादङ्गुलप्रमाणमुच्यत इति शेषः।

चतुर्दशयवः। ४

Fourteen grains of the aṇu-plant (panicum miliaceum)-

अणुर्धान्यविशेषः। परस्परसंश्लिष्टाश्चतुर्दशाणवो यावत्प्रमाणं तावदङ्गुलप्रमाणमित्यर्थः।

चतुस्त्रिंशत्तिलाः पृथुसंश्लिष्टा इत्यपरम्। ५

Or according to another opinion thirty-four sesame-grains put together with their broad sides.

कोशसंस्थानवत् पृथुप्रदेशेन संश्लिष्टाश्चतुस्त्रिंशत्तिला अङ्गुलप्रमाणमित्यपरं मतम्।

दशाङ्गुलं क्षुद्रपदम्। ६

The small pada has ten aṅgulas.

द्वादश प्रत्यञ्चि क्षुद्रपदानीत्येवमादिषु दशाङ्गुलं क्षुद्रपदं विद्यात्।

द्वादश प्रादेशः। ७

The prádeśa has twelve aṅgulas.

तदवस्तात्प्रादेशेन वर्धयेदित्येवमादिषु द्वादशाङ्गुलः प्रादेश इति विद्यात्।

पृथोत्तरयुगे त्रयोदशिके। ८

The two measures called pṛithá and uttarayuga contain thirteen aṅgulas.

पृथमाच्चाद्वेदी ऋंसमित्रे भवत उत्तरयुगेनोत्तरनाभिरित्यादिषु त्रयोदशाङ्गुलप्रमाणे पृथोत्तरयुगे विद्यात्।

पदं पञ्चदश। ९

The pada contains fifteen aṅgulas.

त्रिंशत्पदानीत्यादिषु पञ्चदशाङ्गुलप्रमाणं पदं विद्यात्। क्षुद्रपदादीनां पदान्तानां क्रमविध्युपादानात्परस्परसंबन्धः।

अष्टाशीतिशतमीषा। १०

The ísha contains eighty-eight aṅgulas.

रथसंमितेत्येकेषामित्यादिषु ईषाप्रमाणमष्टाशीतिशताङ्गुलप्रमाणं विद्यात्।

चतुःशतमक्षः। ११

The aksha one hundred and four.

तत्रैव रथाद्यन्तराला यूपावटा भवन्तीत्येवमादिषु चतुरधिकशताङ्गुलमक्षप्रमाणं विद्यात्।

षडशीतियुगम्। १२

The yuga eighty-six.

तत्रैव षडधिकाशीतिप्रमाणं युगं विद्यात्। ईषादीनां रथावयवापेक्षया संगतिः।

द्वात्रिंशज्जानुः। १३

1. A. B. C. बोध°
2. C °चयन°
3. A. °स्थानवत् स्थापिताः पृथुप्रदेशेन संश्लिष्य चतु°

CC-0. Sampurnanand University Collection. Digitized by eGangotri

The jánu thirty-two.

ऊर्ध्वप्रमाणाभ्यासं जानोः पञ्चमस्येत्यादिषु द्वात्रिंशदङ्गुलप्रमाणं जानोः प्रमाणं भवति ।

षट्त्रिंशच्छम्याबाहू । १४

The two measures, śamyá and báhu, contain thirty-six aṅgulas each.

शम्यामात्री चतुःशक्तिर्भवति तस्माद्बाहुमात्राः खायन्त इत्यादिषु षट्त्रिंशदङ्गुलप्रमाणे शम्याबाहू विद्यात् ।

द्विपदः प्रक्रमः । १५

The prakrama is equal to two padas (=30 aṅgulas).

प्राग्वंशः षोडशप्रक्रमायाम इत्यादिषु प्रक्रमप्रमाणं द्विपदं विद्यात् ।

द्वौ प्रादेशावरत्निः । १६

Two prádeśas are one aratni (=24 aṅg.)

उदक् सप्तविंशत्यरत्नय इत्यादिषु द्वौ प्रादेशावरत्निविद्यात् । एतेषामपि परस्परसंबन्धोऽन्वेषणीयः ।

अथाप्युदाहरन्ति । १७

In this matter the following rule too is given.

पद्यान्तरमिदम् ।

पदे युगे प्रक्रमेऽरत्नावियति शम्यायां च मानार्थेषु यथाकामीति । १८

There is liberty regarding the length of pada, yuga, prakrama, aratni and śamyá, if these words denote measures.

अत्र कात्यायनः । द्वादशाङ्गुलं पदं चत्वारो ऽष्टकाः शम्येति च । आपस्तंबः । प्रक्रमो द्विपदस्त्रिपदो वेति । पदादिषु मानार्थेषु चोदितेषु लोकसिद्धैः शास्त्रान्तरोक्तैश्च विकल्प्यन्ते । तत्रापस्तंबः । यजमानस्याध्वर्योर्वैष हि चेष्टानां कर्ता भवतीति ।

पञ्चारत्निः पुरुषः । १९

Five aratnis are one purusha (=120 aṅg.)

पुरुषमात्रेण विमिमीत इत्यादिषु पञ्चारत्निं पुरुषं विद्यात् ।

व्यामश्च । २०

A vyáma has the same length.

व्याममात्रौ पक्षौ इत्यादिषु व्यामश्च पञ्चारत्निः ।

चतुररत्निर्व्यायामः । २१

A vyáyáma has the length of four aratnis (=96 aṅg.)

व्यायाममात्री भवतीति गार्हपत्यचितेरित्यादिषु चतुररत्निर्व्यायामः ।

चतुरस्रं चिकीर्षन्यावच्चिकीर्षितावतीरज्जुमुभयतः पाशां कृत्वा मध्ये लक्षणं करोति लेखामालिख्य । २२

If you wish to make a square, take a cord of the length which you desire to give to the side of the square make a tie at both its ends and a mark at its middle; then having drawn the line—(i.e. the práchí, the line pointing to the east and west points; the different methods by which this line was found will be discussed later).

प्राचीज्ञानोपायाः कर्मान्त उक्ताः । कृतिकाः खल्विमाः प्राचीं दिशं न परिजहति तासां संदर्शनेन मापयेदित्येतदेकं श्रोणासंदर्शनेन मापयेदित्येतदेकं चित्रास्वात्योरन्तरालेन मापयेदित्येतदपरमिति । एतानि लक्षणानि देशविशेषेषु व्यवतिष्ठन्ते । सर्वदेशसाधारणं कात्यायन आह । समे शङ्कुं निखाय शङ्कुसंमितया रज्ज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्कुच्छाया निपतति सा प्राचीति । लेखयोरिति मण्डललेखयोरित्यर्थः ।

षडङ्गुलपरीणाहं द्वादशाङ्गुलमुच्छ्रितं ।
जठरं चाव्रणं चैव शङ्कुं कुर्याद्विशेषतः ॥
एकतक्षं ऋजुस्तीक्ष्णः खादिरः सम आयतः ।
शङ्कुः समशिराः कार्यस्तस्यार्धं गमयेन्महीम् ॥
इति शङ्कुलक्षणम् ।

तस्या मध्ये शंकुं निहन्यात्तस्मिन्पाशौ प्रतिमुच्य लक्षणेन मण्डलं परिलिखेत् विष्कम्भान्तयोः शङ्कुं निहन्यात् । २३

---

[1] A. B. जठरेव्रणं C. जरठं चा° The above ślokas occur in the Śulvapariśishṭa ascribed to Kátyáyana. The Berlin MS. of this pariśishṭa reads जरजं corrected by a second hand into जठरं; a MS. belonging to the Library of the Benares College reads जठरं; the same reading is found in another MS. containing this pariśishṭa together with a commentary by Mahídhara. The Śloka is quoted also in the Śulvavârtika by Ráma, son of Súryadása, who comments on Kátyáyana; there we find जरठं चा° corrected into जठरं चा°

[2] The reading is doubtful A. एकतक्ष्णुऋजु° B. एकतक्षुऋजु° C. एकतःक्ष्णूऋजु° the MS. of the Śulvapariśishṭa: एकतक्ष ऋ° Possibly we have to read: एकतःक्ष्णुदृजु° Compare अन्यतः क्ष्णुत् उभयतःक्ष्णुत्.

[3] The MSS. of the Śulvapar. read: खादिरः सममायतः । शङ्कुः कार्यस्तु गुल्वज्ञैस्तस्यार्धं.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

Fix a pole in the middle of that line; having fastened at that pole the two ties of the cord, describe (around the pole) a circle with the mark. (As the mark divides the length of the cord, the circle is to be described with half the length of the cord); fix poles at both ends of the diameter (i.e. the diameter formed by the práchí).

पूर्वापरीभूता लेखा विष्कम्भः । तस्या मण्डलसंगमौ विष्कम्भान्तः । अथ दक्षिणोत्तरदिग्ज्ञानार्थमाह ।

पूर्वस्मिन्पार्श्वं प्रतिमुच्य पाशेन मण्डलं परिलिखेत् । २४

Having fastened one tie at the eastern pole (the pole fixed at the east-end of the práchí) describe a circle with the other tie (i.e. with the full length of the cord).

पाशौ रज्ज्वन्तः प्रतिमोचनसमर्थः ।

एवमपरस्मिंश्च ते यत्र समेयातां तेन द्वितीयं विष्कम्भमायच्छेत् । २५

In the same manner a circle is described round the pole at the west end of the práchí; then a second diameter is drawn joining the points in which these two circles intersect (this diameter is the line pointing to the north and south points).

मत्स्यमुखपुच्छानुसारेण लेखां कुर्यादित्यर्थः ।

विष्कम्भान्तयोः शङ्कू निहन्यात् । २६

Fix a pole at both ends of the diameter.

दक्षिणोत्तरलेखायाः प्रथममण्डलस्य च संगमौ विष्कम्भान्तः ।

अथ कोणदिक्परिज्ञानोपायार्थमाह ।

पूर्वस्मिन्पार्श्वे पाशौ निमुच्य लक्षणेन मण्डलं परिलिखेत् । २७

Having fastened both ties at the east pole, describe a circle round it with the mark (see sút. 23).

इत उत्तरं मध्यमण्डलचिह्नानि लक्षीकृत्योच्यते ।

एवं दक्षिणत एवं पश्चादेवमुत्तरतस्तेषां येऽन्त्याः संसर्गास्तच्चतुरस्रं संपद्यते । २८

The same is to be done in the south, the west and the north (i.e. circles are to be described round the three other poles); the points of intersection of these four circles which (i.e. the points) are situated in the four intermediate regions (north-east, north-west &c.) are the four corners of the required square.

अन्त्या अवान्तरदिक्षु । उपायान्तरमाह ।

शु० मी० तेषां मण्डलानां ये ऽन्त्यास्संसर्गा अवान्तरदिक्षु संयोगास्तेष्वपि शङ्कून्निहन्यात् । तेषामष्टानां शङ्कूनां धर्मप्रदेशश्चतुरस्रं चेत्तं संपद्यत इत्यर्थः ।



अथापरम् । २९

Another method of making a square is the following

करणमिति शेषः ।

प्रमाणाद् द्विगुणाश्चरज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति । ३०

Make two ties at the ends of a cord the length of which is double the measure (of the side of the required square) and make a mark in its middle.

द्वादशाङ्गुलप्रमाणां द्विगुणां चतुर्विंशत्यङ्गुलप्रमाणां रज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति ।

स प्राच्यर्थः । ३१

This piece of the cord (i.e. the half of the cord) gives us the práchí (of the required square; the práchí of a square has the some length as its side.)

प्राच्यर्थः पार्श्वमानीपरिज्ञानार्थः खण्डः ।

अपरस्मिन्नर्धे चतुर्भागोने लक्षणं करोति । ३२

Make a mark at the western half of the cord less the fourth part (of the half).

If we wish, for instance, to make a square the side of

CC-0. Sampurnanand University Collection. Digitized by eGangotri

which is 12 padas long, we take a cord 24 padas long; stretching this cord on the ground towards the east and west, we find its middle by a measurement beginning from the western end and having fixed the point which lies at the distance of twelve padas from the western end we measure three padas back (proceeding from the middle towards the western end) and make at the point we arrive at a mark; this mark divides the cord into two parts of 15 and 9 padas length.

उपरिष्टिप्रद्वादशाङ्गुले । अर्धचतुर्भागोने चक्षुलेऽतीते आदित आरभ्य पञ्चदशाङ्गुल इति यावत् ।

तन्न्यञ्छनम् । ३३

The name of this mark is nyañchhana.

अपसारकम् ।

अर्धेऽंसार्थम् । ३४

Another mark is to be made at the half (of the western half of the cord) in order to fix by it the corners of the square, (literally the shoulders i.e. the two eastern corners of the square or originally of the vedi; the term "aṇsa" implies here the "śroṇí" the two western corners).

This second sign is at a distance of 18 padas from the eastern end of the cord.

आदितो ऽष्टादशाङ्गुलेंऽसार्थम् ।

शु॰ मी॰ अंसग्रहणं श्रोण्युपलक्षणम् ।

पृष्ठ्यान्तयोः पाशौ प्रतिमुच्य न्यञ्छनेन दक्षिणापाय-म्यार्धेन श्रोण्यंसान्निर्हरेत् । ३५

Having fastened the two ties at the two ends of the prishṭhyá-line, one takes the cord at the nyañchhana-mark and stretches it towards the south; the four corners of the square are then fixed by the half (i.e. by the mark described in S. 34).

Prishṭhyá, the "line marking the backbone," denotes the same thing as práchí; the expression has its origin in the comparison of the vedi with an animal or human body which occurs repeatedly in the Bráhmaṇas.

If we proceed as the sútra directs us, a triangle is formed by the práchí and the two parts of the cord, which are separated by the nyañchhana; the length of its three sides is 12 p. 9 p. and 15 p.; as $12^2 + 9^2 = 15^2$, the triangle is a rectangular one and the eastern and western sides of the square which are found by repeating four times the process taught in the sútra (i.e. by stretching the nyañchana towards the north-east, south-east &c.) cannot but stand at right angles on the práchí. In this way the square becomes a perfect one.

अभीष्टक्षेत्रायामसंमिता सर्वमानेषूभयतः पाशा प्राचीं पर्वापरयोः षडङ्कोर्नेहिता भवति सैव मध्ये भवतीति पृष्ठ्या । संप्रसार्य षडङ्गुलेन श्रोण्यंसान्निर्हरेत् । कुर्यात् । एतत्करणद्वयं समचतुरस्रविषयम् ।

दीर्घचतुरस्रं चिकीर्षन्यावच्चिकीर्षितावत्यां भूमौ द्वौ शङ्कू निहन्यात् । ३६

He who wishes to make an oblong is to fix two poles on an area of the length which he intends to give to the oblong (i.e. at the two ends of the práchí of that area).

अभीष्टक्षेत्रायामपृष्ठ्यान्तयोः ।

द्वौ द्वावेकैकमभितः समौ । ३७

On both sides, i.e. on the west and east-sides of both these poles, two other poles are to be fixed at equal distances.

अभितः पश्चात्पुरस्ताच्च समान्तरालौ ।

यावती तिर्यङ्मानौ तावतीरज्जुमुभयतःपाशां कृत्वा मध्ये लक्षणं करोति पूर्वेषामन्त्ययोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणापायम्य लक्षणे लक्षणं करोति । ३८

Taking then a cord of the length one intends to give to the sideline of the oblong one makes ties at both its ends and a mark at its middle. Then one fastens the two ties at those two of the three eastern poles which stand at the outside, stretches the cord towards the south, holding it by the mark and makes on this mark (i. e. at the place where the mark touches the ground after the cord has been stretched) a mark.

पृष्ठ्यान्तयोस्त्रयस्त्रयः[1] शङ्कवः । अन्त्ययोः त्रयाणां पाश्चात्यपौरस्त्ययोः ।

मध्यमे पाशौ प्रतिमुच्य लक्षणस्योप. पाद्दक्षिणापाय-म्य लक्षणे शङ्कुं निहन्यात् । ३९

Then fastening both ties at the middle pole, one stretches the cord over the mark (on the ground) towards the south and fixes a pole on the mark (i.e. on the spot touched by the mark on the cord).

उपरिष्टात् समीपेन ।

सोऽस्य एतेनोत्तरोऽंसो व्याख्यातस्तथा श्रोणी । ४०

That is the southern aṅsa i.e. the south-east corner of the oblong; thereby are explained likewise the northern aṅsa and the two śroṇís (the uttara aṅsa is found by stretching the cord towards the north, the two śroṇís by fastening the cord at the western poles and stretching it at first towards the south and then towards the north).

The process described in S. 38 serves for drawing the east-and west side of the oblong at right angles on the

[1] A. B. C. first hand, प्राची द्वौ पू॰

[1] A. B. C. °स्तिस्रस्तिस्रः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

rāchī; S. 39 teaches how to give to these two sides the quired length.—There was no real reason for restricting ie above method to the drawing of oblongs. All the ethods of chaturasrakaraṇa and dirghachaturasrakaraṇa hich the sútras contain are in reality nothing but meods for drawing a line at right angles on another and ch of them can be employed equally well for squares nd for oblongs.

यच्च पुरस्ताद्दक्षीयसीं मिनुयात्तच्च तदर्धे लक्षणं करोति । ४१

If one wishes to give a shorter measure to the eastern side (of a chaturasra; tiryaṅmánim is to be supplied) one makes a mark at half (the tiryaṅmání).

यत्तांक्षीयसीमेकतो ऽक्षिमच्छिक्षीर्षति[2]। तदर्धे विक्षीर्षताक्षिमत्तिर्यङ्मान्यर्धे ।

अथापरं प्रमाणादध्यर्धाश्च रज्जुमुभयतःपाशां कृत्वास्मिंस्तृतीये षड्भागोने लक्षणं करोति । ४२

Another method (of the chaturasrakaraṇa) is the following. Having taken a cord the length of which is equal to one and a half of the length intended for the side of the square, and having made ties at both its ends, one makes a mark on its western third, less the sixth part of the third.

द्वादशालं प्रक्षिप्यङ्गुले षडङ्गु पञ्चाङ्गुले लक्षणम् । तन्न्यञ्चनम् । ४३

This is the nyañchhana-mark.

अपसारकम् ।

इष्टेऽर्थाथं पृष्ठ्यान्तयोः पाशौ प्रतिमुच्य न्यञ्चनेन दक्षिणापाय्येष्टेन श्रोण्यक्षान्निर्हरेत् । ४४

Another mark, which is used for fixing the corners of the square, is to be made at the desired point (at the point marking the length, which one desires to give to the side of the square; in the example given by the commentary on S. 43, this point would be at the distance of 6 aṅg. from the end of the cord). Then, having fastened the ties at the two ends of the práchí and having stretched the cord towards the south by means of the nyañchhana, one fixes the situation of the four corners by means of the second mark (ishṭena).

पञ्चाङ्गुला तिर्यङ्मानी चयोदशाङ्गुलाक्ष्णयारज्जुः द्वादशाङ्गुला पार्श्वमानी । इष्टेन इष्टप्रमाणकृतलक्षणेन निर्हरेत् उत्पादयेत् । अथ द्विकरणीमाह ।

The process described in the preceding sútras is essentially the same as that described in S. 29—35.

The difference is that the sútrakára makes here use of the rectangular triangle the sides of which are 13, 12, 5, while he employed above the rectangular triangle 15, 12, 9, i.e. 5, 4, 3. An enumeration of all the Pythagorean triangles with which the authors of the śulvasútras were acquainted, will be given in S. 49.

समचतुरस्राक्ष्णयारज्जुर्द्विस्तावतीं भूमिं करोति । ४५

The cord stretched across a square (i.e. in the diagonal) produces an area of the double size (i. e. the square on the diagonal of a square is twice as large as that square).

कर्णरज्ज्वा समचतुरस्रे कृते प्रमाणक्षेत्राद् द्विगुणं भवति ।

अथ विकरणीमाह ।

प्रमाणं तिर्यग् द्विकरण्यायामस्तस्याक्ष्णयारज्जुस्त्रिकरणी । ४६

Take the measure (the side of a square) for the breadth, the dvikaraṇí (i.e. the diagonal of that square) for the length (of an oblong); the diagonal of that oblong is the side of a square, the area of which is three times the area of the square.

प्रमाणं द्वादशाङ्गुलं तिर्यक् । तस्य द्विकरणी तिलोनसप्तदशाङ्गुला पार्श्वमानी । एवंभूतस्य दीर्घचतुरस्राक्ष्णयारज्जुर्विंशतिरङ्गुलयः सप्तविंशतिस्तिलाश्च । सा विकरणी प्रमाणविमितक्षेत्रत्रिगुणं क्षेत्रं करोति ।

तृतीयकरण्येतेन व्याख्याता नवमस्तु भूमेर्भागो भवतीति । ४७

Thereby is explained that line which is the side of a square, the area of which is the third of the area of a given square; it is the ninth part of the area.

It seems that, in order to find the tṛitíyakaraṇí, we are directed to find at first the trikaraṇí; the third part of the trikaraṇí is the tṛitíyákaraṇí; for it is the side of a square the area of which is one ninth of the square of the trikaraṇí and consequently one third of the given square. This is the method, taught by the commentators of Ápastamba's Śulvasútras, where the above sútra recurs in slightly different words, and it seems indeed to have been the method intended by Baudháyana too, although his commentator propounds a different explanation:

एतेन न्यायेन तृतीयकरणी व्याख्याता । प्रमाणक्षेत्रं नवधा विभज्य एकभागस्य करणी तिर्यङ्मानी तद्द्विकरणी पार्श्वमानी तस्याक्ष्णयारज्जुस्तृतीयकरणी । प्रमाणपरिमितात् क्षेत्रात्तृतीयं क्षेत्रं करोति । एषा फलकरण्यास्तृतीयभागा । अनेन सूत्रेणेदमपि सूचितं भवति । प्र-

2. A. B. C. ' कीर्षन्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मार्णं तिर्यक् चिकरण्यायामस्तस्याक्ष्णयारज्जुश्चतुष्करणी। प्रमाणानि चीणि तिर्यग् द्विकरण्यायामस्तस्याक्ष्णयारज्जुरेकादशकरणी[1]। एकादशभेदकरण्येतेन व्याख्याता। विभागास्त्वेकविंशाधिकशतधेत्यर्थः।

दीर्घचतुरस्रस्याक्ष्णयारज्जुः पार्श्वमानी तिर्यङ्मानी च यत्पृथग्भूते कुरुतस्तदुभयं करोति। ४८

The diagonal of an oblong produces by itself both the areas which the two sides of the oblong produce separately (i.e. the square of the diagonal is equal to the sum of the squares of the two sides).

दीर्घचतुरस्रपार्श्वमान्या समचतुरस्रे कृते यत् क्षेत्रं संपद्यते यच्च तिर्यङ्मान्या तदुभयमक्ष्णयारज्ज्वा समचतुरस्रे कृते संपद्यते। चिकचतुष्कोः पञ्चिकाक्ष्णयारज्जुरित्याद्युदाहरणम्। तासां चिकरणेऽप्ययमेव प्रकारः। समचतुरस्रविषयः पूर्वसूत्रोक्तः।

चिकचतुष्कयोर्द्वादशिंकपञ्चिकयोः पञ्चदशिकाष्टिकयोः सप्तिकचतुर्विंशिकयोर्द्वादशिकपञ्चत्रिंशिकयोः पञ्चदशिकषट्त्रिंशिकयोरित्येतासूपलब्धिः। ४९

This is seen in those oblongs the sides of which are three and four, twelve and five, fifteen and eight, seven and twenty-four, twelve and thirty-five, fifteen and thirty-six.

We should of course say "rectangular triangles' instead of "oblongs". The length of the diagonals of these oblongs or of the hypothenuses of these rectangular triangles is not explicitly mentioned by Baudháyana. Ápastamba states it, when describing the different manners of constructing the vedi.

प्रमाणं तिर्यगित्येवमादिनावगतानामक्ष्णयारज्जूनां चिकचतुष्कयोरित्यादिषु दीर्घचतुरस्रकरणीषूपलब्धिः। अवगतिः। चिकचतुष्कयोः पञ्चिकाक्ष्णयारज्जुः। पञ्चदशिकषट्त्रिंशिकयोरेकोनचत्वारिंशिकाक्ष्णयारज्जुरित्यादि। एवं तासां द्वयोर्ज्ञातयोस्तृतीया ज्ञातुं शक्यते। यथा पार्श्वमानीतिर्यङ्मान्योर्ज्ञातयोः पृथग्वर्गयित्वा संयोज्य वर्गमूलमक्ष्णयारज्जुः। तथा पार्श्वमान्यक्ष्णयारज्ज्वोर्ज्ञातयोरक्ष्णयारज्जुवर्गात्पार्श्वमानीवर्गं विशोध्य शिष्टस्य मूलं तिर्यङ्मानी। एवं तिर्यङ्मानीवर्गं विशोध्य पार्श्वमानी एवं सर्वत्र द्रष्टव्यम्।

[1] A. C. प्रमाणादित्रिणि द्विकरण्या° B. प्रमाणादि त्रीणि द्विक° A word like तिर्यक् or तिर्यङ्मानी must be supplied. In order to find a square the area of which is eleven times the area of a given square, we form on oblong of which one side is three times as long as the side of the square and the other equal to the diagonal of the square. The first is the navakaraṇí, the second the dvikaraṇí. The diagonal of that oblong is the ekádaśakaraṇí.

[1] A. B. ° दशक°

List of books printed and published and for sale by E. J Lazarus and Co., at the Medical Hall Press, Benares.

ATMA PURAṆA, containing all the principles o Vedántism by ŚANKARÁNAND, with commentary b *Kákárám Pandit.* Rs. 16-0. Published at Ganpat Kri hanaji's, Bombay.

THE LAGHU KAUMUDI, a Sanskrit gramm with an English version, commentary and references Dr. BALLANTYNE, late Principal of the Sanskrit Colleg Benares, re-edited by RALPH GRIFFITH, M. A Principal of the Sanskrit College Benares. *Price* 8 *Rs*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar. *Professor Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with a lengthy introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3-0.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA edited by PANDIT GOVINDA DEVA ŚÁSTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares Rs. 2-0.

THE PRASANNARÁGHAVA, a Drama by Jaya deva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4

VAIŚESHIKA APHORISMS OF KAṆÁDA, by A. E. GOUGH, B. A., Benares College, Price Rs. 4-0.

THE HITOPADEŚA, containing the Sanskrit text with an Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2-0-0.

MÁNAVA DHARMA PRAKÁS ARTHAT MANUSMRITI KA BHÁSHÁ, with Commentary in Hindí by GULZAR PANDIT, Royal Quarto, Pages 230 Price, Rs. 5-0-0.

SIDDHÁNTA KAUMUDI VYÁKARAN, 8vo. demy. Pages. 614 Rs. 4-8-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ जैनग्रन्थसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसङ्ख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिवर्णनम्
२७ द्वितीयवाचना	खं	२०	०	दे	श्रीमन्महामहोपाध्यायदयारुचिभट्टाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणरङ्गरुचिभट्टाचार्यान्तेवासिपण्डितप्रसिद्धरुचिभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितामृतरुचिभट्टाचार्यविरचितटिप्पणीसहिता परिशुद्धियुता नवीना च
२८ द्वितीयसमाचारीसूचम्	खं	२	०	दे	श्रीमन्महामहोपाध्यायदयारुचिभट्टाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणरङ्गरुचिभट्टाचार्यान्तेवासिपण्डितप्रसिद्धरुचिभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितामृतरुचिभट्टाचार्यविरचितटिप्पणीसहितं परिशुद्धान्वितं नवीनं च
२९ षोडशसमाचारीसूचम्	खं	३	०	दे	श्रीमन्महामहोपाध्यायदयारुचिभट्टाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणरङ्गरुचिभट्टाचार्यान्तेवासिपण्डितप्रसिद्धरुचिभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितामृतरुचिभट्टाचार्यविरचितटिप्पणीसहितं परिशुद्धान्वितं नवीनं च
३० पानकसमाचारीगाथा	सं	२	०	दे	श्रीमन्महामहोपाध्यायदयारुचिभट्टाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणरङ्गरुचिभट्टाचार्यान्तेवासिपण्डितप्रसिद्धरुचिभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितामृतरुचिभट्टाचार्यविरचितटिप्पणीसहिता परिशुद्धान्विता नवीना च
३१ नवमीसमाचारीसूचम्	खं	२	०	दे	श्रीमन्महामहोपाध्यायदयारुचिभट्टाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणरङ्गरुचिभट्टाचार्यान्तेवासिपण्डितप्रसिद्धरुचिभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितामृतरुचिभट्टाचार्यविरचितटिप्पणीसहितं परिशुद्धान्वितं नवीनं च
४ वेष्टनम्					
१ पूजावर्णनटीका	सं	४	०	दे	श्रीमन्महामहोपाध्यायभट्टारकशिरोमणिपण्डितनागपुरीयचन्द्रकीर्तिसूरिशिष्यपदवा-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ जैनग्रन्थसूचीपत्रम् ॥

ग्रन्थनामानि	पूर्णापूर्णविवेकः	पत्रसङ्ख्या	लिपिकालः	लिपिभेदः	ग्रन्थकर्तृनामादिवर्णनम्
					क्यप्रमाणपारावारीणजैनशास्त्राम्बुधिकृत-सेतुपण्डितहर्षकीर्तिसूरिकृता नवीना शुद्धा च
२ क्रोधप्रक्रमवर्णनम्	सं	१	०	दे	श्रीमन्महामहोपाध्यायाजितदेवाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणभट्टारकशिरोमणिपण्डितवर्यविजयसिंहभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुसोमप्रभाचार्यविरचितं नवीनमशुद्धं च
३ जिनमतनिरूपणटीका	सं	२	०	दे	श्रीमन्महामहोपाध्यायभट्टारकशिरोमणिपण्डितनागपुरीयचन्द्रकीर्तिसूरिशिष्यपदवाक्यप्रमाणपारावारीणजैनशास्त्राम्बुधिकृतसेतुपण्डितहर्षकीर्तिसूरिकृता नवीनाशुद्धा च
४ पूजावर्णनम्	सं	१	०	दे	श्रीमन्महामहोपाध्यायाजितदेवाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणभट्टारकशिरोमणिपण्डितवर्यविजयसिंहभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितसोमप्रभाचार्यभट्टारकविरचितं नवीनमशुद्धं च
५ सद्भक्तिप्रक्रमटीका	सं	२	०	दे	श्रीमन्महामहोपाध्यायभट्टारकशिरोमणिपण्डितनागपुरीयचन्द्रकीर्तिसूरिशिष्यपदवाक्यप्रमाणपारावारीणजैनशास्त्राम्बुधिकृतसेतुपण्डितहर्षकीर्तिसूरिकृता नवीनाऽशुद्धा च
६ मानप्रक्रमवर्णनम्	सं	१	०	दे	श्रीमन्महामहोपाध्यायाजितदेवाचार्यान्तेवासिपदवाक्यप्रमाणपारावारीणधुरीणभट्टारकशिरोमणिपण्डितवर्यविजयसिंहभट्टाचार्यान्तेवासिजैनशास्त्राम्बुधिकृतसेतुपण्डितसोमप्रभाचार्यभट्टारकविरचितं प्राचीनमशुद्धं च
७ अनृतप्रक्रमटीका	सं	२	०	दे	श्रीमन्महामहोपाध्यायभट्टारकशिरोमणिपण्डितनागपुरीयचन्द्रकीर्तिसूरिशिष्यपदवाक्यप्रमाणपारावारीणजैनशास्त्राम्बुधि-

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THEMEDICAL HALL PRESS, BENARES.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri